कि० ३९८

वे० - ३९८

RS. 95 only.

तिलक-महाराष्ट्र-विद्यापीठ-शाखाभूत-

वैदिक - संशोधन - मण्डलेन

प्रकाशिता

शुक्ल-यजुर्वेदीया

काण्व - संहिता

पदपाठयुता

सायणाचार्य-आनन्दबोध-विरचितभाष्यद्वय-समेता

प्रथमः खण्डः

[१-१० अध्यायाः]

शेणई-कुलोत्पन्नेन डॉ. बे. रामचन्द्रशर्मणा

पाठभेदादिभिः संशोध्य संपादिता

शाके १९०९

RS. 95 only

DEDICATED

TO

My Revered TEACHER

Dr. SUMITRA MANGESH KATRE

चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ।

11 April 1988

Foreword

We have great pleasure in introducing to the world of oriental scholars, the first volume of Kāṇva-Saṁhitā (chapters 1-10) with Padapāṭha and commentaries of Sāyaṇācārya and Ānandabodha, first time critically edited by Dr. B. R. Sharma.

We have contemplated to bring out the edition of Kāṇva Saṁhitā, with Padapāṭha and three commentaries in four volumes. Fifth volume will consist of various indices. The commentaries of Sāyaṇācārya and Ānandabodha have been available on the first twenty chapters, while chapters 21-40 have been commented upon, by Ānandabodha and Anantācārya.

The entire work has been critically edited by Dr. B. R. Sharma, on the basis of numerous manuscript material, and we are very much grateful to him for preparing this edition laboriously, and also for allowing us to publish the same.

The Government of India, Ministry of Human Resource Development, New Delhi, have accorded sanction to the grant towards the editing and publishing of this volume. We record our deep sense of gratitude to the central Ministry.

Similarly Shriman M. S. Parkhe, relieved us from the anxiety caused by the paucity of paper and extended timely help in furthering the printing of this volume. We are very much thankful to him.

Our colleagues Dr. Mrs. S. R. Abhyankar, Dr. N. D. Sharma and shri. J. D. Joshi, who rendered great help in revising the press copy and correcting the proofs, deserve our heartfelt thanks.

We hope this volume will receive high approbation from the world of oriental scholars.

PUNE.
Phālguna Pūrṇimā
Śake 1909
3rd March 1988

T. N. Dharmadhikari
N. M. Dhadphale
Secretaries

Preface

The edition of the Vājasaneyī Kāṇva Saṁhitā of the Śukla Yajurveda was planned by me as early as 1966. While working on my major Sāmavedic project, side by side I started to collect the manuscript material for my new project from the Libraries and private possessions. Before I left Tirupati in August 1970, I had been able to collect considerable material needed for this project. The rest of the essential manuscript material I collected while working at Hoshiarpur, Kathmandu and finally at Mysore.

In April 1978 having nearly finished my work one by one on my other projects, I sat down to work on the Kāṇva Saṁhitā seriously and dedicated my entire time on this major project. After the completion of the collation work I started to write the press copy in November 1979, to be exact, on 7-11-1979, wednesday at 10.08 a. m. and completed the tenth chapter on 27-8-1980, wednesday at 13.35 (i.e., 1.35 p. m.) I am very happy now to see that the first volume of this major Saṁhitā of the Śukla Yajurveda comprising the full *Daśaka* is now being issued by the Vaidika Saṁśodhana Maṇḍala, Pune. Other volumes will follow in due course one by one as soon as they are printed. I can now express my feeling of satisfaction in the following a few words of our great poet Kalidasa: क्लेशः फलेन हि पुनर्नवतां विधत्ते ।

The edition of the Kāṇva Saṁhitā has been prepared, as planned by me earlier with Padapāṭha and all the three available commentaries. Of these three commentaries, Ānandabodha's *Bhāṣyasaṅgraha* alone covers all the four *Daśakas*. Sāyaṇa's *Vedārthaprakāśa* is available only on the first two *Daśakas* and the remaining latter two *Daśakas* are commented on by Anantācārya. I could not, however much I liked to, include the Orissan commentary on the *Uttarārdha* attributed to Sāyaṇa in my edition, for reason I have mentioned in the Introduction. However, I must mention here, this is the first critical edition of the entire Kāṇva Saṁhitā with Padapāṭha with accent and all the three commentaries, of which, as far as I know, Ānandabodha's has been printed only in part before; and Anantācārya's was never.

I dedicate this work to my professor Dr. S. M. Katre, who not only initiated and guided me in my researches, when I was a research student

under him for my doctorate at the Deccan College Post-Graduate Research Institute, Pune, but also continued to guide me later in my academic life, whenever I sought his advice and guidance in my difficulties. I, now offer this *Puṣpāñjali* in the form of the edition of the Kāṇva Saṁhitā to my revered Gurudeva as a humble token of my gratitude.

Now before concluding this preface, my pleasant duty is to record my gratitude to all those who have been helpful to me directly and indirectly in successfully finishing this critical edition. My thanks are due in this connection, particularly to :

1. Prof. D. V. Urs the Ex-Vice-Chancellor, Mysore University for having recommended my name for the award of the U. G. C. meant for the Retired University teachers and for enabling me to carry out my Research Project in Mysore University in 1978.
2. The Director, Oriental Institute, Mysore, for extending to me all facilities for my research while in Mysore;
3. Pandit Lakṣmaṇa Śāstri Joshi, the President of the Vaidika Saṁśodhana Maṇḍala, Pune, for accepting the Kāṇva-Saṁhitā of the Śukla Yajurveda, edited by me for publication; and finally to–
4. Dr. T. N. Dharmadhikari for carefully going through the Press-copy and inserting the references in the commentary. He also went through the proofs with great care and saw the book through the press. I also express my sincere appreciation to the printing unit of the Vaidika Saṁśodhana Maṇḍala, for the fine work they have done in printing this book.

Mysore,
27–1–1988

B. R. Sharma

INTRODUCTION

General

Yajurveda, the Veda of the sacrificial formulae once existed in as many as 101 *Śākhās* as we learn from the *Mahābhāṣya* and other ancient works. Of these, 86 *Sākhās* belonged to the *Kṛṣṇa Yajurveda* and the remaining 15 to the *Vājasaneya Śukla Yajurveda*. Out of these two divisions of the original *Yajurveda*, five of the *Kṛṣṇa Yajurveda* and two of the *Śukla Yajurveda* are known to exist today. They are :

1. Taittirīya Saṁhitā,
2. Maitrāyaṇī Saṁhitā,
3. Kāṭhaka Saṁhitā,
4. Kapiṣṭhala Kaṭha Saṁhitā, and
5. Caraka Saṁhitā–of the Kṛṣṇa Variety–
6. Vājasaneyi Kāṇva Saṁhitā, and
7. Vājasaneyi Mādhyandina Saṁhitā–of the Śukla variety.

Among the *Sākhās* of the *Kṛṣṇa Yajurveda* the *Taittirīya* and the *Maitrāyaṇī* are the most important recensions. The *Taittirīya Saṁhitā* has the largest following in the Dakṣiṇāpatha, while the followers of the *Maitrāyaṇī Saṁhitā* are restricted to the interior Maharashtra, scattered in Nasik and Nagapur region. Here Bhadgaon was the main centre of the *Maitrāyaṇī Śākhā* and the followers of this *Śākhā* in Bhadgaon invariably followed the *Mānava Sūtra* whereas elsewhere they followed either Mānava or *Vārāha Sūtra*. The *Caraka Saṁhitā* which is adhered to by the *Caraka Brāhmins* of Nagpur - Aurangabad region of Maharashtra has long become extinct and today these Brahmins actually study the *Maitrāyaṇī Saṁhitā* which is in vogue side by side in this region. Some believe that originally the *Caraka Śākhā* was the same as the *Kaṭha Śākhā*, but when the latter became extinct they adopted the *Maitrāyaṇī* which is the nearest to the *Kaṭha Śākhā*. But the followers of the *Caraka Śākhā* refute this argument and say that *Caraka* is a separate recension as much as the *Maitrāyaṇī* and other recensions of the *Kṛṣṇa Yajurveda*. It may be mentioned in this connection that I could not trace a single MS of *Caraka Saṁhitā*, not even in parts or fragments, in possession of any when I undertook a survey of this region in 1977 in search of Vedic MSS. In Nasik however, we were able to get two collections of MSS preserved in old families which were acquired by the Vaidika Saṁśodhana Maṇḍala, PUNE, These collections contained some rare and precious MSS including those of the *Maitrāyaṇī Saṁhitā*.

The *Caraka Brāhmins* mainly follow the *Vārāha Sūtra* but some among them are found to have adopted *Mānava Sūtra* as well. This change of the *Sūtra* might have occurred at a time when they adopted the *Maitrāyaṇī* along with its *Sūtra* which prevailed side by side in the region where they lived. Today the differences and deviations if any, in rituals and ceremonies among the followers of these two akin Vedic *Śākhās* are not very significant for obvious reason. Almost similar is the case with the followers of the *Kāṇva* and *Mādhyandina Saṁhitās* of the *Śukla Yajurveda*. Further these two *Śākhās* have *Kalpasūtras* and *Prātiśākhyas* of the common authorship which make the merger into another *Śākhā* or change over from one *Śākhā* to another in the same line easier and smoother. It is still more interesting to note that the followers of the *Kauthuma* recension of the *Sāmaveda* in the South have unwillingly accepted the *Drāhyāyaṇa Śrauta Sūtra* of the *Rāṇāyanīya* recension abandoning their own *Lāṭyāyana Śrauta Sūtra* of the *Kauthama* tradition. In all these matters, it may be noted in this connection that the laity, often being ignorant of ritual procedures, is being guided by the priests, who more often than not, follow their own tradition with which they are more familiar and perform the rites as prescribed in their own *Sūtras*.

Vājasaneyi Śukla Yajurveda :

The origin of the *Vedas* according to the tradition and also as recorded in the *Brāhmaṇas* is that *Brahmā*, the Self-born, first transmitted the *Veda* to *Prajāpati* and then it came down through the lineage which consisted of five divinities including *Prajāpati* heading the list. This Vedic tradition thus came down through these divinities to *Kaśyapa*, a semi-mythical figure, who formed the link between the divinities and the *Ṛṣis* of human origin. But according to the *Mahābhārata*, the *Maharṣis* after performing penance blessed by *Brahmā* acquired the *Vedas* which had disappeared at the time of *Mahāpralaya* when the entire universe had merged into the *Mūla Prakṛti*. But as regards the *Śukla Yajurveda* we hear of a different story. *Yājñavalkya*, the son of *Vājasani*, while studying the *Yajurveda* from *Vaiśampāyana* was turned out of the Āśrama for reason of disobedience and also was asked to return the knowledge acquired by him from his Guru, *Vaiśampāyana*, before he left the *Āśrama*. He was penalised on the same charges by *Śākalya* earlier and was turned out by him of his Āśrama where *Yājñavalkya* had first started his Vedic studies. *Yājñavalkya*, sad and much dejected, worshipped the Sun God, who, pleased with his devotion, taught him again the *Yajurveda* but this time *Śukla*, the white. The *Yajurveda* thus acquired by *Yājñavalkya* became known as the *Vājasaneya Śukla Yajurveda* as against the *Yajurveda* taught by *Vaiśampāyana*, which subsequently came to be known as the *Kṛṣṇa Yajurveda*. *Yājñavalkya's* father was called *Vājasani*, because in sacrifices he used to offer only *Vāja*, the simple cooked rice, as *Sani*, oblation, to Gods. He thus performed a real *a-dhvara* in spirit and meaning, in which no *hiṁsā* was committed, no slaughter of animal was involved. Therefore, he became known as *Vājasani*, among the followers of Vedic tradition, his real name being long forgotten later. *Yājñavalkya*, his son, was a revolutionary, since his young age, he never yielded to any one, even to his own *Guru*, when the question of principle was involved. He re-edited the *Yajurveda*, removing the theological discussion that intervened between its main text and that was likely to divert the attention of the *Adhvaryu* from his principal duties when he was engaged in executing his responsibilities while the sacrificial session was in progress. This new edition of the *Yajurveda* brought out by him after concentrated study and research, displaced the old *Yajurveda* that was propagated by *Vaiśampāyana*, *Yājñavalkya's* own uncle and *Guru*, from its own region of *Kuru-Pāñcāla* and then this new *Veda* gradually spread itself in the entire *Āryāvarta*. *Yājñavalkya* achieved his goal by practising austerity, religious observances and penance like *Viśvāmitra*[1] the discoverer of the great *Gāyatrī-mantra* whose foot-steps he closely followed. *Viśvāmitra* happened to be the ancestor of this illustrious family in which *Yājñavalkya* was born. He was conscious of the great tradition of his family, and also felt proud of his father, Vājasani who like *Ṛṣi Godhā* abstained from killing animals for offering oblations to gods in sacrifices. He named the new *Yajurveda Saṁhitā*, that he acquired with the grace of the Sun God, as *Vājasaneyī Śukla Yajurveda Saṁhitā* आदित्यानीमानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥ (Bṛ. Ār. Up. 6.5.3). Thus *Yājñavalkya* opened a new era in the Vedic tradition.

The *Śukla Yajurveda* thus acquired by *Yājñavalkya* was taught by him to a batch of following 15 students :

1. Kāṇva, 2. Mādhyandina, 3. Śākalya, 4. Sthāpāyanīya,
5. Kāpāla, 6. Pauṇḍravatsa, 7. Āvaṭika, 8. Paramāvaṭika,
9. Pārāśarya, 10. Vaidheya, 11. Vaineya, 12. Audheya,
13. Gālava, 14. Vaijava and 15. Kātyāyana.

Eventually because of textual variants and other differences, though minor, that had cropped up in the text of the *Śukla Yajurveda* taught by these disciples in their respective schools the Śukla Yajurveda has since come into existence in fifteen different *Śākhās* known after these first disciples of *Yājñavalkya*, Nevertheless all these *Śākhās* have retained the generic designation *Vājasaneyī*, since it was taught first by *Vājasaneya*, the son of *Vājasani*, that was *Yājñavalkya*. Of these fifteen recensions today only two, *Mādhyandina* and *Kāṇva*, have survived, of which the *Mādhyandina Saṁhitā* is followed, exclusively, throughout the *Āryāvarta*. Besides, this *Saṁhitā* has the largest number of followers compared to any other one *Saṁhitā* in the North or South. The only other *Veda* that has some following in the North, is the *Sāmaveda* of th *Kauthuma* recension but there too in some parts of Bihar and Bengal.

The *Kāṇva Śākhā* prevails side by side with other Vedas, in the *Dakṣiṇāpatha*, - Maharashtra, Karnataka, Tamilnadu, Andhra and Orissa. The Orissan version of the *Kāṇva-Sāṁhitā*, besides having the minor textual varints,

---

1. तद्ध विश्वामित्रः श्रमेण तपसा व्रतचर्येण इन्द्रस्य प्रियं धामोपजगाम (JUp. 3.3.7)

differs from the recension followed in the South including Maharashtra in that the Orissan recension is divided into 41 chapters by redistribution of *mantras* as against 40 chapters in the Southern recension. In his article on the Orissan recension of *Kāṇva-Saṁhitā*, P. Acharya, Bankipur, published in the Vishveshvaranand Indological Journal (Vol. II, Pt. 1, March 1964) says "The contents and arrangements of the text of chapters 1 to 34 is the same in both the recensions with minor textual variants. The arrangement of further chapters, however, differs. Chapter 35 of the Maharashtran *Kāṇva-Saṁhitā* contains *Anuvākas* comprised of 35 *mantras*, whereas in the Orissan text this chapter is split up into three : Ch. 35 in two *Anuvākas* comprised of 32 *mantras*, Ch. 36 in *Anuvāka* with 2 *mantras*, and Ch. 37 in one *Anuvāka* with 22 *mantras*. The last *Anuvāka* of the Maharashtran text which forms Ch. 37 of the Orissan text contains only 21 *mantras*, the extra *mantra* in the Orissan text being the one beginning with *dadhikrāvṇo* which finds a place also in Ch. 34 of both recensions. Chapter 36 of the Maharashtran text corresponds to Ch. 38 of the Orissan text. Chapter 37 and 38 of the Maharashtran text, containing three and seven *Anuvākas* respectively, together form Chapter 39 in ten *anuvākas* of the Orissan text. The last two chapters 39 and 40 of the Maharashtran text correspond to the last two chapters, 40 and 41 of the Orissan text." He further mentions that in the beginning of each chapter in the Orissan recension the specific purposes assigned to the *mantras* grouped in respective chapters are stated. Besides, it may be noted that, the *KS* once prevailed in the Himalayan region as well as in *Kurukṣhetra*, and in *Kaṇvagrāma* in the area where the adherents to the *KS*, mostly *Sārasvatas*, are said to have domiciled in large numbers but today because of the non-availability of the *Kāṇva-Saṁhitā*, they have adopted the *Mādhyandina-Saṁhitā* just as the *Carakas* in Maharashtra have unwillingly accepted the *Maitrāyaṇī Saṁhitā* for the same reason. The southern recension of the *Kāṇva-Samhitā* is nearer to the *Ṛgveda* in many respects though it belonged to the area of the *Yajurveda*. The phonetic ळ is retained by the *KS*, as by the *Jaimnīya* recension of the *Sāmaveda* and both these Vedic *Śākhās* were once prevalent very much in the above region. The recitation of the *KS* does not differ much from that of the *Ṛgveda* and the *Svarita* pitch can be distinctly heard when the *KS* is chanted, unlike in the recitations of the *Kṛṣṇa Yajurveda*.

Thus the *Yajurveda* has been preserved in two rather strongly divergent texts, known as *Śukla* and *Kṛṣṇa*, the former, devoid of and the latter commingled with, theological discussion. The *Saṁhitās* of the *Kṛṣṇa Yajurveda* are closely inter-related and so are the *Saṁhitās* of the *Śukla Yajurveda*. Therefore, it must be noted that the study of any one *Saṁhitā* of the *Yajurveda*, however comprehensive, will always remain incomplete if the study is not supported by a close survey of the other *Saṁhitās* in this area. The *Kāṇvas*, just as the *Carakas*, claim that their *Saṁhitā* is the original *Yajurveda*. The *Caraka Śākhā* tops the list of 86 recensions of *Kṛṣṇa Yajurveda* just as the *Kāṇva* does the list of 15 *Śukla Yajurveda Śākhās*. While the *Kṛṣṇa Yajurveda*, like the other Vedas, is believed to have come down from *Brahmā*, the Self-born, through *Prajāpati*, the *Śukla Yajurveda* is likewise said to have come down from the Sun God through *Yājñavalkya*. Thus their claim within these two narrow points may, for arguments sake, be accepted but the very story that *Yājñavalkya* acquired the *Yajurveda* from the Sun God indicates that it has no relation whatsoever with the *Kṛṣṇa Yajurveda* of different origin and it cannot have legitimate claim or jurisdiction over the wider area of the *Kṛṣṇa Yajurveda* comprising 86 recensions. The *Yajurveda* gained prominence for a long period of time extending several centuries in our history when the sacrificial cult attracted the fascination of the people who sought material well-being and fulfilment of their wordly desire including a sojourn to the celestial abode by performing a variety of sacrifices which promised these awards sought by them. The *Bhagavad-Gītā* criticises this propensity of the people to indulge in rituals of evanescent value in clear terms for the ephemeral gain at the utter negligence of study of *Parā Vidyā*, higher knowledge. *Yājñavalkya*, the son of *Vājasani*, cleared the landmark shrouded in obscurity in order to tell the students of the Vedas that all the paths ultimately lead to the eternal peace from where one need not return to this world plagued by *Janma-mṛtyu-Jarā-Vyādhi*. He has, therefore, rightly concluded his critical edition of the *Yajurveda*, with an *Upaniṣad* telling clearly that a *Sādhaka* treads the *karma-mārga*, the path of action, like *Janaka*, the royal philosopher, only to raise himself to the higher plane of life which would lead him ultimately to the supreme goal of immortality :

विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥

(*KS* 40.1.11)

The texts of the *Kāṇva* and the *Mādhyandina* are almost identical except for minor additions and variants here and there but the arrangement of the text in both does slightly differ. The *KS* is first divided into *anuvākas* and then into chapters, each having the number of *mantras* just required for the purpose of respective sacrificial acts to be executed by the *Adhvaryu* when they are being recited by him. They are, therefore, arranged exactly in the order of sacrificial procedure for the facility of the *Adhvaryu* e. g. the first two chapters in the *Vājasaneyī Saṁhitās* lay down the rules for the performance of the *Darśapūrṇamāsa* sacrifice. In this, the first act of the *Adhvaryu* is to cut a twig of the *Palāśa* tree wherewith he separates the calves from the cows who are then driven to different directions for grazing. Before driving them to different directions he first prays to *Savitā* for the safe return of the cows and calves after grazing in the evening when milk is required for offerings. He also addresses the cows for abundance of healthy milk etc. and then finally driving the cattle to the grazing ground he ties the *darbha* straws to the *Palāśa* twig and keeps it near the fire-place of either *Āhavanīya* or *Gārhapatya*, facing east. Therefore the *Adhvaryu* proceeds with his next act that is concerned with *Ukhā*, the sacrificial pot. The *KS* in its first *anuvāka* has included the *mantras* which are required just to commence and finish the first act of the *Adhvaryu*, that is related to the *Darśapūrṇamāsa*, and concerned with the *Palāśa* branch and the milch cattle. The chief priest lays down the twig in front of the fire-place to the accompaniment of recitation of the *mantra* वसो: पवित्रमसि in the first instance. The *Mādhyandina Saṁhitā* is divided into chapters in which the *mantras* are serially numbered, but while grouping the *Kaṇḍikās* their purpose does not seem to have been taken into consideration. For instance the *Mādh–S* breaks, its first *Kaṇḍikā* at पशून् पाहि and takes over the *yajus* वसो: पवित्रमसि to the next *mantra* where it is irrelevant as far as the ritual procedure is concerned. The result is that the *Adhvaryu* who has to execute the multifarious sacrificial acts, has to be vigilent in his every action, lest he should commit mistakes in his duties since he is not guided by the internal arrangement of the *Kaṇḍikās* in the *Mādh–S* while employing the *mantras* in accompaniment of his respective sacrificial acts. The *Vājasaneyī Saṁhitā* was composed by separating the *Brāhmaṇa–protions* from its texts which has made the work of an *Adhvaryu* comparatively easy and the *KS* made his work still easier by including in each of its *anuvāka* the number of *mantras* just–enough to complete the relevant acts to the accompaniment of which these *mantras* are muttered by the *Adhvaryu*. The *KS* divided the *anuvākas* in its chapter keeping this main purpose in view unlike the *Mādh-S* which is divided into chapters consisting of *Kaṇḍikās* numbered serially.

Commentaries :

A commentator of the *Vājasaneyī Saṁhitās* ought to be familiar with the textual differences and traditions of both the *Kāṇva* and *Mādhyandina* recenssions, which are closely inter–related, as they are, before undertaking the task of interpreting either of the *Saṁhitās* and at the same time he must be careful not to get confused one for the other while commenting on the *Saṁhitā* of either recension. The commentaries of *Uvaṭa* and *Mahīdhara*, which were written earlier, were available to the later commentators of the *KS* when they wrote their commentaries on this recension. The fact that all these commentators of the *KS* were indebted to the commentaries of *Uvaṭa* or *Mahīdhara* or both on the *Mādhyandina* is clearly discernible from their commentaries, although they, except *Anantabhaṭṭa*, do not acknowledge this fact in their commentaries even indirectly. *Anantabhaṭṭa* refers to the commentary of *Mahīdhara* but without citing his name.

1. Sāyaṇa's Vedārthaprakāśa :–

Among the commentaries on the *Vedas*, *Sāyaṇa's* commentary in general is very instructive as well as informative. In his *Upodghāta* on each *Veda* he explains the view held at large by the traditionalists about the origin of the *Veda*, with profuse quotations from the *Mīmāṁsā Sūtra* and other relevant works. He has enriched his Commentary on the Vedic texts, with his intimate knowledge of

Srauta and *Gṛhya* rites, his sound scholarship of *Vyākaraṇa* and *Mīmāṁsā* and his familiarity with all the four *vedas* and their *Brāhmaṇas*. He always cites the *Viniyoga*, *Ṛṣi*, *Chandas* and *devatā*, of each *mantra* and explains the texts with citations from the *Brāhmaṇas*; discusses the derivation and etymology etc., of the Vedic vocables -all these explanations supported with relevant quotations cited from the works belonging to the area of the *vedāṅgas* as well as from other authentic works.

In the *Upodghāta* of his commentary on the *KS*, *Sāyaṇa* closely follows his own *Upodghāta* on the ṚV rather than that on the *Taittirīya Saṁhitā*. He even repeats, almost verbatim, in many places, what he has already stated, in his *Upodghāta* on the *ṚV*. He was familiar with the commentaries of *Uvaṭa* and *Mahīdhara* on the *Mādh-S*, but he has not so much as expressed it even indirectly, as normally done by the commentators, in such contexts with expressions such as केचित्, एके, अन्ये etc. e. g. the commentary of *Sāyaṇa* on 20.3.6 may be compared with the *Mantra-bhāṣya* of *Uvaṭa*. And many such instances can be quoted from *Sāyaṇa's* commentary. Therefore unless the earlier commentaries are available, it is not possible to say to what extent a commentator is indebted to his predecessors. All the same, we must agree that among the Vedic commentaries now available to us; *Sāyaṇa's* is the best. He mentions the application of the *mantras* in relevant rituals; includes theological discussions as warranted; makes references to old Vedic legends etc., and elaborates on the grammatical peculiarities of the Vedic language including morphology, derivation, etymology, syntax, accentography, usages, etc. all supported with citation from the authorities in respective disciplines. A student of the *Veda* will certainly benefit to a very great extent if he carefully goes through the *Upodghāta* and the commentary of *Sāyaṇa* on at least first ten hymns of the *Ṛgveda*. He will be able to have a sound knowledge of the grammatical peculiarities of the Vedic language and some clear idea about the, concept of unquestionable authority attributed to the *Veda* in all religious matters by the *Mīmāṁsakas*. For a serious student of the *Veda* this is an essential discipline like Gray's Anatomy for a student of medicine. *Sāyaṇa* might have helped himself by going through the commentaries of his predecessors but we must not forget the fact that the norms laid down by the authorities, the source material such as *Saṁhitās*, *Brāhmaṇas* etc., and the *Vedāṅgas* being common for all commentators, the explanation of the Vedic texts and expression of the interpreters, at least to some extent, are bound to be almost similar or identical in view of the nature of the text. As far as *Sāyaṇa's* work is concerned he has done it very systematically as well as scientifically unlike others and his commentary is simply remarkable. In fine he adored whatever he touched.

The Commentary attributed to *Sāyaṇa* on the latter half of *KS* :-

In our edition we could not include the commentary on *Uttaraviṁśati* of the *KS* attributed to *Sāyaṇa*. The MSS of this commentary are not available in any library in India or abroad except in the State Museum, Bhuvaneshwar, Orissa. The Library of this Museum possesses one or two MSS containing *Sāyaṇa's* commentary but they were reported to be not in a very good condition. In remote villages of Orissa, particularly in Ganjam District the MSS of *Sāyaṇa's* commentary on the *Uttara-viṁśati* are reported to exist. But I found it extremely difficult, if not impossible, after a prolonged correspondence to get so much as a simple transcript or microfilm of any of these MSS. But now, however, we are happy that this commentary on the *Uttara-viṁśati* is available in print published in the series of the Sarasvatī Granthamālā, No. 114, Saṁpūrṇānanda Sanskrit University, Vārāṇasī.

This commentary now published and attributed to *Sāyaṇa*, lacks many of the traits which distinguish the *Vedārthaprakāśa* of *Sāyaṇa* from other Vedic commentaries. Therefore, I have my own reservation about its authenticity, the reasons being :-

1. In his commentary on the *Pūrva-viṁśati* i. e., on chapters 1-20 *Sāyaṇa* gives at the end of chapter, or chapters, in case the topic dealt with extends more than one chapter,-a summary in verses of topics treated therein quoting the ***Pratīka*** of the ***mantras*** connected with the relevant ritual acts *anuvāka*-wise. This is not found in the Orissan version.

2. The style, explanation that we are wont to enjoy in *Sāyaṇa's* commentary with profuse citations from the *Vedas*, *Vedāṅgas* and the *Brāhmaṇas* are missing in the commentary of the *Uttara-viṁśati* ascribed to *Sāyaṇa*,

3. In his commentaries on the *Vedas*, *Sāyaṇa* hardly refers to the commentaries of others. In one or two places he has said **अपर आह** (*ṚV* X. 155.3), without mentioning the name of the person who had said it. But in the Orissan edition *Ànandabodha* has been quoted by the commentator by name :

तदुक्तम् आनन्दबोधाचार्यैः – सूपस्था अद्येति साधु यज्ञमुपतिष्ठते इति । (*KS* 23.6.13). This clearly shows that the commentator on the *Uttara-viṁśati* of the *KS* is a different person, since *Ànandabodha*, whom he quotes, lived somewhere between 15th and 16th century. This commentator, who calls himself *Sāyaṇa*, might have intentionally concealed his real name with a pious desire for gaining wider popularity to his commentary. A close study of this commentary in comparison to *Sāyaṇa's* commentaries on other *Vedas* may reveal many more evidences proving its authenticity or otherwise.

4. *Ànandabodha's* knowledge of the Vedic language, and the Vedic ancilliary works seems to be not upto the mark. He has committed many inexcusable mistakes in his commentary which he calls *Bhāṣyasaṅgraha*, a compendium, complied by him extracting material from several other commentaries, which he has not named. A scholar of *Sāyaṇa's* calibre, who has not spoken of a word about other commentators, in his commentary, it seems highly improbable, that

he would ever think of quoting in his *Vedārthaprakāśa* a commentator, that too by name, who is ill-equipped for the work.

5. In the *Saṁhitās* when the same *mantra* occurs more than in one place, it is usually commented only in the first instance and then in the subsequent instances, the commentator would leave it saying that it had already been commented on- व्याख्यातम् or पूर्वं व्याख्यातम्. In the *KS* there are a number of verses and formulae which are found repeated in both *Pūrva-viṁśati* as well as in the *Uttara-viṁśati*. In the Orissan version of the *KS* some of the *mantras* which have occurred in the *Pūrva-viṁśati* have often been commented on again as if they did not occur before. E. g. The verse पुत्रमिव पितरौ (*KS* 22.7.11) is not commented on by *Ānandabodha* since it has occurred earlier in the *Pūrva-viṁśati*, where he has already explained it. But in Orissan edition it has been commented again. *Anantabhaṭṭa*, who has not commented on the *Pūrva-viṁśati*, of course explains it for obvious reason. Therefore, doubt about the identity of the commentator of Orissan version with the famous Vedic commentator *Sāyaṇa* will persist until and unless we get the conclusive proof about him either way.

2. *Ānandabodhaś Bhāṣya Saṅgraha*

Ānandabodha's commentary called *Bhāṣya-saṅgraha* covers the entire *KS* including the 40th chapter that constitutes the *Iśāvāsya Upaniṣad*. He says his commentary is a compendium of many earlier commentaries and that he has often consulted the *Anukramaṇī* of *Kātyāyana* while writing his compendium. Before concluding his *Upodghāta*, he has added for the purpose of easy identification of the metres, the fifth chapter of the above *Anukramaṇikā* that treats the Vedic metres, with his own explanation. Nowhere has he mentioned in his *Bhaṣya-saṅgraha*, the names of the earlier commentators or the commentaries which he had consulted or from which he had extracted material for preparing his compendium. But all the same the bold imprint of the commentaries of *Uvaṭa* and *Mahīdhara* on the *Mādhyandina Saṁhitā* is distinctly reflected in his *Bhāṣya-Saṅgraha* as in the *Vedārthaprakāśa* of *Sāyaṇa*. He has in many places split the *Kaṇḍikās* as is done in the *Mādhyandina* and even accepted the variant readings as found in that *Saṁhitā* in some places in his commentary. e. g.- *vīryakṛto* of *Mādhya-S* (10-25) in place of *vīryakṛtā* of *KS* (11.7.57). Further he seems to have taken no notice of the *Anuvāka*-wise division of chapters followed in the *KS*. His knowledge of the *Vedāṅgas* in general, and classical and Vedic grammar including of accentography in particular, is not as wide and deep as it ought to have been for a Vedic commentator. This has resulted in his committing many mistakes in his commentary while explaining the Vedic words and usages. In places he has foundered in his track and it is often difficult to accept some of his interpretations. A few examples picked up from here and there are given below :—

Kāṇva Saṁhitā

1. हर्यत (*KS.* 3.1.4) has wrongly been taken as a verb and interpreted as : हर्यतिः प्रेप्साकर्मा। अवप्रेप्सुमुत्पादयत। But it is an adjective of Agni and is a vocative. The word is derived from √ हर्य with suffix अतच्–भृमृदृशि...हर्येभ्योऽतच् (उणादि- 4.391).

2. श्रद्धातन (*KS.* 8.2.1) *Ānandabodha* explains this :- श्रदिति सत्यनामसु पठितम्। श्रद्धातनेत्यत्र नकारोऽनर्थकः। Here he simply followed *Uvaṭa* who explains this : श्रद्धातन श्रद्धानाः कुरुत। नेत्यनर्थका उपजना भवन्ति इति नकारोऽनर्थकः। The verb दधातन is imperative second person plural with suffix तन as per तप्तनप्तनथनाश्च (पा 7.1.45).

3. गोवित् (*KS* 18.4.5) is wrongly taken as a vocative without knowing that it is accented and an adjective of त्वम्. If it were vocative it would have been wholly unaccented, सर्वानुदात्त since it is not in the beginning of a *pāda*.

There are many such mistakes, and graver still, which will be dealt with in the process of publication in the succeeding volumes. On account of phonetic contamination and faulty pronunciation, which appear from the evidences cited above, to have obscured his thinking, he has misunderstood many Vedic vocables and as a result he has wrongly interpreted many words and indulged in fanciful etymologies. E. g. he derives the word रुद्र from √ ऋ as ऋ गतौ। ऋत्या ज्ञानेन संसारकारणज्ञानं द्रावयतीति रुद्रः (*KS.* 3.8.1). Again the word अत्रिणम् has been explained by *Ānandabodha* as तृणमपि शून्यं यथा भवति (*KS* 18.2.1). Here is another example how a corrupt pronunciation has led the commentator to a ridiculous position. We could not differentiate between अत्रिणम् and अतृणम, two absolutely different vocables of different phonetic and semantic values and interpreted them as above. Moreover, to suit in his fanciful interpretation he made the word which is an adjective, an adverb, क्रियाविशेषण and even then his explanation hardly fits in the context. For him strangely enough अत्रिणम् and अतृणम sounded the same. It may be noted that त्रि made up of त् + र् + इ and तृ of त् + ऋ phonemes are two different and distinct syllables, the former is a conjunct and the latter a simple letter both thus differing in their respective phonetic values. These etymologies are based on corrupt pronunciation of vowel ऋ as रु or रि as is done in some linguistic regions to which evidently the commentator belonged or at least he had lived long enough to lose his sense of audibility to clearly distinguish between ऋ, a vowel, and रु or रि a consonant.

In the *Śikṣās*, the norms for the pronunciation of various phonemes, such as their place of utterance, mode of articulation, etc., are clearly explained, giving little or no chance for faulty utterance. *Akṣaravyakti*, clear and distinct utterance of letters with their accurate phonetic value is one of the imperative qualities of the Vedic recitation on which no compromise or relaxation of rules is permitted. Therefore the *Vedas* are classified as *Śabda–pradhāna*, clearly emphasising the unchangeability of their verbal form and composition and replacement even of a single phoneme, short or long vowels, accent etc. with another.

The oral tradition has succeeded through the ages in maintaining to a very great extent, the purity of pronunciation of Sanskrit phonemes with their precise phonetic values. The *Śikṣā* and *Prātiśākhya* enforced the norms of mode of pronunciation of phonemes and syllables in the Vedic texts and thus the chanting of the Vedic *mantras* has been preserved as accurately as it was done in the past to a very great extent. The pronunciation of vowel, ऋ is absolutely faulty and that of ऌ is utterly lost. As a result of faulty pronunciation of ऋ, the vocables both क्रिमि and कृमि meaning worm have gained currency in classical Sanskrit. Again in the *Maitrāyaṇī Saṁhitā* we have a solitary example where the word रथह, has silently transformed itself to चह due to the phonetic contamination of the mother tongue of the people of the region where this *Veda* has been prevalent. In the *Veda* every letter and syllable in a word is counted and analysed including its component phonemes along with the accent it carried, leaving no scope for faulty pronunciation. The *Varṇapāṭha*, *Padapāṭha*, as also *Vikṛtipāṭha* were introduced in Vedic syllabi primarily for this purpose, for fortifying the Vedic text against the infiltration of phonetic contamination and thus preserve the prestine purity of the Vedic chants. Nevertheless the influence of regionalism in pronuciation can be seen reflected in many manuscripts and in the editions prepared by persons having little experience in modern textual criticism. E. g. in the *Saṁhitopaniṣad Brāhmaṇa* (2.3) the commentator explaining the *Sāman* melodies that carried *stobhas* in all their *parvans* or *bhaktis* quotes सघायस्ताइ 1 ए (365.1) of the *Grāmegeya* book sung on the verse, स घा यस्ते (SV. 365) as an example. But the MS No. 9921 of the Oriental Institute, Baroda in *Nandināgarī* and two printed editions in Tamil Nadu have सखायस्त्वा (SV 62) in place of सघायस्ताइ which is absolutely wrong since the melody based on this verse does not answer the definition. In Andhra and Tamil Nadu the unvoiced aspirates ख and थ are invariably pronounced as घ and ध and this faulty pronunciation was the cause for this mistake. In this connection the requirements of a Vedic chanter briefly given in the *Varṇaratnadīpīkā* :-

स्वरो वर्णोऽक्षरं मात्रा तत्प्रयोगोऽर्थ एव च ।
मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे ॥

referred to by *Ānandabodha* in his *upodghāta* may be noted. But he gave least heed to these needs when he handled the Vedic texts.

The Date

Ānandabodba while explaining the word सुतीर्थम् (*KS* 4.2.2) quotes the verse :-

तीर्थं मन्त्राद्युपाध्यायशास्त्रेष्वम्भसि पावने ।
पात्रोपायावतारेषु स्त्रीपुष्पे योनियज्ञयो: ॥

without referring to the source. But this verse is found in the *Sabdaratnākara* (26.3865) of *Abhinava Vāmanabhaṭṭa-Bāṇa*, who passed his early days in the court of King *Harihara II*, of *Vijayanagara*, 1379 – 1406 A. D. Later *Vāmanabhaṭṭa-Bāṇa* moved to the court of *Peda Komaṭi Vemabhūpāla*, a ruler of *Koṇḍavedu* (1403–1420 A D.). His name is mentioned in a copper plate grant dated *Śaka* 1338, i. e., 1441 A. D. (see Hist. of Classical Sanskrit Literature– by M. Krishnamachary, p. 126). From the above citation it becomes clear that *Ānandabodha* lived in the area where this lexicon might have already gained popularity. *Vāmanabhaṭṭa-Bāṇa* was a versatile, author who was credited to have written a dozen literary works including the *Śabdaratnākara* and *Śabdacandrikā*. He claims to have been a disciple of *Vidyāraṇya* and from his writings he seems to have been a highly respected scholar. The MSS. of *Śabdaratnākara* are found only in South India, and therefore *Ānandabodha* might have hailed from the area of old *Āndhra-Karṇāṭaka* region. *Ānandabodha* does not give any information about himself except that he was the son of one *Jātaveda-Bhaṭṭopādhyāya*, and that he had studied all the four *Vedas*, if the title *Caturvedi* prefixed to his name is literally taken. He followed the Orissan version of the *Kāṇva Saṁhitā* in his commentary and most probably, he was an adherent of this *Veda*. He might have hailed from north Āndhra or Ganjam district of Orissa where even today the followers of the *Kāṇva-Veda* are found in a large number among the Āndhras and others. Therefore we may safely say that he lived after *Vāmanabhaṭṭa-Bāṇa* or at the most he was his later contemporary and might have lived somewhere between the 15th or 16th centuary. All these evidences support our assumption that *Sāyaṇa's* namesake was a different person. He might have assumed the name *Sāyaṇa*, as we said earlier and also named his commentary on the *Uttaraviṁśati* as *Vedārthaprakāśa* concealing his real name for gaining popularity for his commentary. Further it may be noted that king *Bukka* of *Vijayanagara* has been invariably referred to as *Bukkaṇa* in the colophon of the Orissan commentary, perhaps in analogy with Sāyaṇa.

3. Anantabhaṭṭa's Commentary :

Anantabhaṭṭa, also known as *Anantācārya*, has interpreted the *Uttaraviṁśati* only, obviously because *Sāyaṇa* has not commented on it and, if at all he had done, it was not known to him. He too, like *Sāyaṇa* and *Ānandabodha*, is indebted to *Uvaṭa* and *Mahīdhara* whom he refers to as केचित् in 27.5.1. He, like *Ānandabodha*, follows the Āndhra-Orissan version of the *KS* and in place of अथ he writes अध and adds a note saying धकार आर्ष: (29. 1-6; 29.19 etc). In Āndhra थ is invariably pronounced as ध and here the commentator has taken refuge under आर्षप्रयोग in order to justify his provincialism in usage and pronunciation. *Anantabhaṭṭa* too betrays his poor base of Vedic grammar in his commentary here and there. E. g. मित्रा in 32.4.4 has been interpreted as मित्रम् by *Ānandabodha*, *Anantabhaṭṭa* and the Orissan *Sāyaṇa*,–all three following *Uvaṭa* and *Mahīdhara*, who at least say मित्रा विभक्तेराकारः. But here मित्रा in fact simply meant *Mitra* and *Varuṇa* (मित्रावरुणा)– an example for the एकशेषसमास.

Anantabhaṭṭa appears to have hailed from Āndhra but he has not referred to *Ānandabobha* anywhere in his commentary, nor has he mentioned the name of *Sāyaṇa* either. We hope we may be able to give some more information about him in our Introduction to the last volume of the *KS* when it is printed.

Internal Division of *KS*

At the end of each chapter, after the *Padapāṭha* of the last *mantra* of the concluding *anuvāka* of the chapter, the number of *mantras* in each *anuvāka* is given in our edition as found in the manuscript of the *Padapātha* acquired from Prahlāda-śastrī Joshi of Ahmadnagar The printed edition of *Ānandavana* Agadi, which was kindly lent to me by Dr. T. N. Dharmadhikari, Pune, also gives these details at the end of each chapter. This was actually taken from the *Anuvāka Sūtra-Adhyāya* of the *Kāṇva-Saṁhitā*. We have included these details at the end of each chapter in square brackets, since it enables us to know the total number of *Kaṇḍikās* in each *anuvāka*, and then the total number of *Kaṇḍikās* in each chapter divided into so many *anuvākas*, and thus the grand total number of *mantras* of the entire *KS*. *Ānandabodha* follows the *Mādhyandina* tradition in numbering the *Kaṇḍikās* continuously to the end, in each chapter, without dividing them into *anuvākas*, unlike *Sāyaṇa*.

Contents :

This first volume that is now being brought out covering the first *Daśaka* of the *KS* comprises the first ten chapters, of which the first two treat *Darśapūrṇamāsa* rites. These rites end with the 6th *anuvāka* of the second chapter and the seventh and concluding *anuvāka* relates the *Piṇḍa-pitṛyajña*.

Chapter III consisting of nine *anuvākas* contains the rules for the *Agnyādhāna*, kindling of fire for *Agnihotra*, a rite performed every morning and evening; for *Agnyupasthāna*, maintenance of fire and for *Cāturmāsya* rites, the three seasonal sacrifices, each of four months' duration.

Chapters IV – IX contain *mantras* pertaining to *Somayāga*. Of these six chapters, chapter IV consisting of ten *anuvākas* is mainly concerned with *Soma-kraya*, a ritual related to the purchase of soma. This ritual commences with the *Vapana*, shaving of the hair of *Yajamāna* and ends with *Somapraveśa* i. e., a ceremony of removing and placing the *Soma*-stalks on *āsandī*, a stool, covered with the skin of black antelope and kept in a safe place marked for it in the *yajñaśālā*, sacrificial enclosure.

Chapter V comprising ten *anuvākas* contains *mantras* pertaining to *saumikī vedi*, rites which commence with *Ātithyeṣṭi* to *Tānūnaptra* and conclude with rites concerning *Yūpa,* i. e., the cutting and fashioning of the sacrificial post.

Chapter VI having 8 *anuvākas* are concerned with the *mantras* related to *Agnīṣomīya* rite which extends from the rites of *Yūpasaṁskāra* to *Somābhiṣava* i. e., extracting the *Soma*-juice.

Chapter VII and VIII consisting of 22 *anuvākas* contain the *mantras* that treat *Graha-grahaṇa*, a rite for sanctifying the *grahas*, the wooden cups used in three *savanas*,the litanies, morning, mid-day and evening, for drinking *soma*– juice,

Chapter IX consisting of 7 *anuvākas* comprises the *mantras* that are related to the rites of *Grahāvekṣaṇa*, *Dakṣiṇā-homa Samiṣṭayajus*, *avabhṛtha*, *Prāyaścitta* and some miscellaneous *mantras* related to *Soma*-sacrifice.

Chapter X consisting of 6 anuvākas deals with the *mantras* related to *Vājapeya* Sacrifice.

Manuscripts :–

For this edition of the *KS* I have made use of the following manuscript-material obtained from libraries and private possession.

With bhāṣya of *Sāyaṇa :*

1. P^1 Vaidika Saṁśodhana Maṇḍala, Pune, chapters 1–20

A transcript of the above MS neatly made out, was kindly supplied to me by the V. S. Maṇḍala, Pune. This was copied with great care in good hand by Pandit Parashuram Renukadas Bodhankar and checked by Shri A. V. Shendye, Āyurveda Vishārada, teacher, Aṣṭāṅga Āyurveda Vidyālaya, Pune. The transcript is dated : 25.6.1967,

2. M^1 Government Oriental MSS Library, Madras No. D15004 inc. contains Chapter 1, *Anuvākas* 8–10, Pl. *Grantha*-Script. Chapter 2, *Anuvākas* 1-6 inc.

3. M^2 Government Oriental MSS Library, Madras No. R2396c Chapter 1, *Anuvāka* 1 and chapter 17 and 19 only. Pl. *Grantha*-script.

4. K. Oriental MSS Library, University of Kerala, Trivandrum, No. 7714, Chapter 17 only Pl. *Grantha*-script.

5. V^1 Vishveshvarananda Vedic Research Institute, Sadhu Ashram, Hoshiarpur, No. 5651 (b) Paper, Devanāgarī, chapters 1–10.

6. S^1 Sampūrṇānanda Sanskrit University, Varanasi, No. 48316 / 000692 Chapters 1–10, Paper, Devanāgarī.

(V^1 above was copied by Dr. R. P. Chaudhury, K. S. Vidyāpīṭha, Tirupati, now Reader and Head of the Dept. Teacher's Training Wing, Ranvir, K. S. Vidyapeetha, Tawi, Jammu and S^1 was collated with V^1 by Dr. Shankar Bhat, (Now Reader) K. S. Vidyapeetha, Tirupati).

7. S^2 Sampūrṇānanda Sanskrit University, Varanasi. No. 691, Chapters 11–20, Paper, Devanāgarī. This MS has often reproduced the commentary of Mahīdhara here and there e. g. the commentary on *KS* 14.I.11 = (MS 13.11) is a reproduction in toto of Mahīdhara's commentary.

8. C Printed book, chapters 1-20, Chowkhamba Sanskrit Series 1915. This was kindly lent to me by the Oriental Institute, Mysore.

Bhāṣya of *Ānandabodha :*

9. S^3 Sampūrṇānanda Sanskrit University, Varanasi, No. 690, Paper Devanāgarī, Chapters 21-30.

10. B^1 Bhandarkar Oriental Research Institute, Poona, No. 1872–73, Devanāgarī, Paper, Chapters 1-20.

11. H^1 Vishveshvarananda Vishvabandhu Institute of Sanskrit and Indological Studies, Punjab University, Sadhu Ashram, Hoshiarpur, No. 1344, Chapters 1-6 *anuvāka* 8 verse 5 Inc., (See fn, 7 p. 397), Pl. brittle, ends broken, Grantha Script, farely accurate, folios 88, at the end after पाल्ायेभ्य: (6. 8 5.) it adds : हरिः ॐ । शुभमस्तु । श्रीगुरुभ्यो नमः । रामकृष्णाभ्यां नमः । on the right side margin: written in Tamil, which means :- "of the first Daśaka i. e. of the first ten chapters only this much is found in the MS from which the present copy was made out." After this a few leaves have been added with commentary beginning with श्रुतेः (chapters 11.24).

12. H^2 VVISIS, Punjab University, Sadhu Ashram, Hoshiarpur, No. 1343. begins with chapters 12.3.9 ends with chapter XIX - 43, Pl. damaged / worm-eaten, ends broken. It begins : त्रिष्टुबाग्नेयी । भगवन्नग्ने देवानां होतः and ends : अथ वाजसनेयं जुहोति- This is the first sentence of the commentary of chapter 20 : folio 126,

13. H^3 VVISIS Punjab University, Sadhu Ashram, Hoshiarpur, No. 1345 (A) *Grantha*, Pl. brittle, worm-eaten, ends broken, folios 62; chapters 12–20; begins : त्रिष्टुबाग्नेयी । हे भगवन्नग्ने देवानां होतः (12.3.9). At the end seven leaves are added which contain *Pitṛmedha-Prayoga*.

The above three MSS (H^1, H^2 & H^3) were gifted to the VVISIS, by the late Shri Jambunathan, Bombay, a noted Vedic scholar, a reformist and a great admirer of *Āryasamāja* movement. He had translated the Vedas into Tamil and some of these works have already been published.

14. V^2 Vishveshvarananda Vedic Research Institute, Sadhu Ashram, Hoshiarpur, No. 5651 (a), chapters 21-39, contains notes - written on the margin which explain some of the difficult words from the text. These notes appear to have been added later.

15. V^3 V. V. Res. Inst. Sadhu Ashram, Hoshiarpur, No. 4255, Chapter 32 and a few leaves of chapter 34 - all mixed up, gaps, not accurate.

16. M^3 Government Oriental MSS Library, Madras, No. R. 2815 (a) chapter 11.4.4 - 13 inc. it begings : शुभमस्तु । आविघ्नमस्तु । कण्वशाखाभाष्यम् । and then explains

the verse इन्द्र ज्येष्ठानि ... ... (RV 2.21.6). After this, actual commentary of Ānandabodha commences with : अनेन धनुषा त्वयायं यजमानो ... ... (11.4.4)

17. D³ Transcript supplied by Pandit Mārtaṇḍa Chidambara Dīkṣit, Chidambar Nivas, Hubli: Chapter 21. Inc.

18. A² Printed book with the commentary of Ānandabodha and Anantabhaṭṭa on chapter 40 which constitutes the *Iśāvāsyopaniṣad* published by Ānandashrama, Poona, Granthāṅka 5, 1980. This was given to me by Dr. T. N. Dharmadhikari, Director, Vaidika Saṁśodhana Maṇḍala, Pune.

Bhāṣya of Ananta-bhaṭṭa

19. P² Vaidika Saṁśodhana Maṇḍala, Pune, chapters 21-39. A micro film of this MS was supplied to me by the Maṇḍala of which an enlarged print was made out at the Nepal Research Centre, Kathmandu, Nepal, when I was working at this Centre, 1977-78. I am extremely grateful to the N. R. C. for all the facility and encouragement I received for carrying out my personal research project during my stay there.

20, M⁴ Government Oriental MSS Library, Madras, No, R. 2452, Chapters 21-30, Pl. *Grantha*.

21. B³ Bhandarkar Oriental Research Inst. Poona, No. 19/1884-86 Chapters 31-40, paper, Devanāgarī.

22. A¹ Printed book of *Kāṇva Saṁhitā*, Ānandavana Agadi edition (Brahmapatra-unbound), text alone : this was kindly lent to me by Dr. T. N. Dharmadhikari, Pune.

23. For *Pada-pāṭha* I have utilised two MSS - one belonged to Paṇḍit Prahlāda-śāstrī Joshi. Ahmadnagar; and the other, to Paṇḍit Mārtaṇḍa Chidambar Dīkṣit, Hubli. These are marked as D¹ and D³ respectively. The first MS (D¹) gives at the end of chapters the number of *kaṇḍikās* that each *Anuvāka* of respective chapters contained.

One additional manuscript of Padapāṭha was made available by shri. V. L, Manjul, Pune from his family collection and was used with benifits, at the stage of correcting the proofs.

Now, I express my deep gratitude to the authorities of the above Libraries and Institutes and those who kindly supplied the precious manuscript material or books to me for preparing this critical edition.

12th Main, 455,
Saraswatīpuram,
Mysore - 9
Dated : 30-12-1987

B. R. Sharma

ॐ शान्तिः शान्तिः शान्तिः ।

काण्वसंहिता – विषयानुक्रमणिका

अध्यायः – अनुवाकः	विषयः	पृष्ठसंख्या
१.१-१०	**दर्शपूर्णमासयोः हविःसंपादनयुक्ता मन्त्राः**	१-११०
१.१	वत्सापाकरणम्	१ – ४१
१.२	दोहनमन्त्राः	४२– ४७
१.३	हविर्वापनमन्त्राः	४८– ६१
१.४	हविःप्रोक्षणमन्त्राः	६२ – ६६
१.५	अवघातमन्त्राः	६६– ७३
१.६	कपालोपधानमन्त्राः	७४– ७८
१.७	पेषणमन्त्राः	७९– ८३
१.८	पुरोडाशश्रपणमन्त्राः	८४– ९०
१.९	वेदिमन्त्राः	९०–१००
१.१०	आज्यग्रहणार्थमन्त्राः	१०१–११०
२.१-७	**दर्शपूर्णमासयोः यजनोपयुक्ता मन्त्राः**	१११-१७३
२.१	इध्म-प्रोक्षण-स्रुगासादनमन्त्राः	१११–१२१
२.२	स्रुच्याघारमन्त्राः	१२२–१३०
२.३	ब्रह्मसंबन्धिप्रयोगे मन्त्राः	१३०-१३८
२.४	स्रुग्व्यूहनादिमन्त्राः	१३९-१४६
२.५	स्रुक्स्रुवप्रग्रहादिमन्त्राः	१४६-१५५
२.६	ऐष्टिकयाजमानमन्त्राः	१५५–१६४
२.७	पिण्डपितृयज्ञमन्त्राः	१६४–१७३
३.१-९	**आधान-अग्निहोत्र-अग्न्युपस्थान-चातुर्मास्य-मन्त्राः**	१७४-२४४
३.१	अग्न्याधानमन्त्राः	१७४–१८१
३.२	अग्निहोत्रमन्त्राः	१८२–१८८
३.३	अग्न्युपस्थानमन्त्राः	१८८–२१२
३.४	,,	२१३–२१८
३.५	वरुणप्रघासमन्त्राः	२१८–२२४
३.६	साकमेधगत-पूर्णदर्व्याख्यकर्म-मन्त्राः	२२४–२२६
३.७	साकमेधगत-पितृयज्ञमन्त्राः	२२६–२३१

३.८ साकमेधगत-त्र्यम्बकहविर्मन्त्राः २३१–२३७
३.९ वाजिनमन्त्राः, वपनमन्त्राः २३८–२४४

४.१-१० सोमे वपनसंस्कारमारभ्य क्रीतस्य सोमस्य शालाप्रवेशपर्यन्ता मन्त्राः २४५–२९२

४.१ यजमान–वपनमन्त्राः, सोमक्रयमन्त्राः २४५–२४८
४.२ अभ्यञ्जनादिसंस्कारमन्त्राः २४८–२५१
४.३ औद्ग्रभणहोममन्त्राः २५२–२५४
४.४ कृष्णाजिनादिमन्त्राः २५४–२५७
४.५ व्रतकरणादिमन्त्राः २५८–२६५
४.६ सोमक्रयण्यानयनमन्त्राः २६५–२६९
४.७ सोमक्रयण्यनुगमनादिमन्त्राः २७०–२७३
४.८ यजमानवाचनादिमन्त्राः २७३–२७७
४.९ हिरण्यस्पर्शादिमन्त्राः २७७–२८२
४.१० कृष्णाजिनास्तरणादिमन्त्राः २८२–२९२

५.१-१० सोमे आतिथ्य-तानूनप्त्र-उत्तरवेद्यादि-यूपनिर्माणपर्यन्ता मन्त्राः २९३–३५३

५.१ आतिथ्यहविरादिमन्त्राः २९३–२९८
५-२ तानूनप्त्रादिमन्त्राः २९८–३०५
५.३ उत्तरवेदिनिर्माणमन्त्राः ३०५–३०९
५.४ उत्तरवेदेः प्रोक्षणादिसंस्कारमन्त्राः ३१०–३१४
५.५ हविर्धानाख्यमण्डपनिर्माणमन्त्राः ३१४–३२५
५.६ उपरवनिर्माणमन्त्राः ३२५–३३२
५.७ सदोमण्डपनिर्माणमन्त्राः ३३२–३३८
५.८ धिष्ण्यनिर्माणमन्त्राः ३३८–३४३
५.९ वैसर्जनहोमादिमन्त्राः ३४३–३४९
५.१० यूपसंपादनमन्त्राः ३५०–३५३

६.१-८ सोमे यूपसंस्कार-अग्नीषोमीय-पशु-सोमाभिषवार्था मन्त्राः ३५४–३९७

६.१ यूपसंस्कारमन्त्राः ३५४–३६१
६.२ पशूपाकरणादिमन्त्राः ३६१–३६७
६.३ संज्ञप्तपशुहविःसंस्कारमन्त्राः ३६८–३७४
६.४ वसाहोममन्त्राः ३७४–३७८
६.५ उपपट्होममन्त्राः (गुदकाण्डहोमः) ३७८–३८२
६.६ वसतीवरीमन्त्राः ३८२–३८४
६.७ सोमोपाहरणमन्त्राः ३८४–३८९
६.८ सोमाभिषवमन्त्राः ३८९–३९७

७.१–२२	**सोमे उपांशुग्रहादिसवनद्वयगता मन्त्राः**	३९८–४४०
७.१	उपांशुग्रहार्था मन्त्राः	३९८–४०२
७.२	अन्तर्यामग्रहार्था मन्त्राः	४०२–४०४
७.३	ऐन्द्रवायवग्रहमन्त्राः	४०४–४०६
७.४	मैत्रावरुणग्रहमन्त्राः	४०६–४०८
७.५	आश्विनग्रहमन्त्राः	४०८–४०९
७.६	शुक्रग्रहमन्त्रा·	४०९–४१४
७.७	मन्थिग्रहमन्त्राः	४१४–४१८
७.८	आग्रयणग्रहमन्त्राः	४१९–४२१
७.९	उक्थ्य-ग्रहमन्त्राः	४२१–४२३
७.१०	ध्रुवग्रहमन्त्राः	४२३–४२६
७.११	विप्रुषां होमः	४२६–४२७
७.१२	ऋतुग्रहमन्त्राः	४२७–४३०
७.१३,१४	ऐन्द्राग्नग्रहमन्त्राः	४३०–४३१
७.१५,१६	वैश्वदेवग्रहमन्त्राः	४३२–४३३
७.१७–२०	मरुत्वतीयग्रहमन्त्राः	४३३–४३७
७.२१,२२	माहेन्द्रग्रहमन्त्राः	४३७–४४०
८.१–२२	**सोमे तृतीयसवने षोडशि-अतिग्राह्यादीनां मन्त्राः, गवामयने अतिग्राह्य-मन्त्राः, महाव्रते ग्रहग्रहण-मन्त्राः**	४४१–४७८
८.१	आदित्यग्रहमन्त्राः	४४१–४४५
८.२	सोमविशेषावेक्षणमन्त्राः	४४५–४४६
८.३,४	सावित्रग्रहमन्त्राः	४४६–४४८
८.५	वैश्वदेवग्रहमन्त्राः	४४८–४४९
८.६	पात्नीवतग्रहमन्त्राः	४४९–४५२
८.७	हारियोजनग्रहमन्त्राः, / प्राणभक्षग्रहमत्राः	४५२–४५४
८.८,९–१०	षोडशिग्रहमन्त्राः	४५४–४५७
८.११	षोडश्युपस्थानमन्त्राः	४५७–४५९
८.१२–१५	अतिग्राह्यमन्त्राः	४६०–४६५
८.१६–१७	गवामयने अतिग्राह्यग्रहणमन्त्राः	४६५–४६८
८.१८–२१	महाव्रते ग्रहग्रहणमन्त्राः	४६८–४७३
८.२२	अदाभ्यग्रहमन्त्राः	४७३–४७८

९.१-७ सोमे उपांश्वातिग्राह्य-दाक्षिणहोमादि-मन्त्राः, पशुप्रायश्चित्ति-मन्त्राः ४७९-५२०

९.१ उपांश्वादिग्रहावेक्षणमन्त्राः ४७९-४८३
९.२ दाक्षिणहोमादिमन्त्राः ४८३-४९०
९.३ समिष्टयजुर्मन्त्राः ४९०-४९७
९.४ अवभृथमन्त्राः ४९७-५०२
९.५ गर्भिण्याः अनुबन्ध्याया प्रायश्चित्तिमन्त्राः ५०२-५०६
९.६ अहर्गणसंबन्धिमन्त्राः ५०६-५१२
९.७ सोमसंबन्धिनो नैमित्तिका मन्त्राः ५१२-५२०

१०.१-६ वाजपेय-मन्त्राः ५२१-५५८

१०.१ सवितृप्रेरणाद्यर्थां मन्त्राः ५२१-५२६
१०.२ रथाहरणादिमन्त्राः ५२६-५३२
१०.३ रथचक्रादिरोहणमन्त्राः ५३२-५४२
१०.४ स्रुवाहुत्यादिमन्त्राः ५४३-५४७
१०.५ अन्नहोममन्त्राः ५४७-५५३
१०.६ उज्जितिमन्त्राः ५५३-५५८

संक्षेप - विवरणम्

आपश्रौ	आपस्तम्बश्रौतसूत्रम्
आपश्रौसू	,,
आब्रा	आर्षेय-ब्राह्मणम्
उसू	उणादिसूत्रम्
ऋ	ऋग्वेदसंहिता
ऋसं	,,
ऋ प्रा	ऋग्वेदप्रातिशाख्यम्
ऐआ	ऐतरेयारण्यकम्
ऐब्रा	ऐतरेयब्राह्मणम्
कउ	कठोपनिषत्
कात्या सर्वानु	कात्यायनसर्वानुक्रमणी
कात्यास	,,
कायस	,,
कासं	काण्वसंहिता
काश	काण्वीयशतपथब्राह्मणम्
काशब्रा	,,
काश्रौ	कात्यायनश्रौतसूत्रम्
छांउ	छान्दोग्योपनिषत्
जै	जैमिनीयन्यायमाला
जैन्या	,,
जैसू	जैमिनीयसूत्राणि
जैब्रा	जैमिनीयब्राह्मणम्
तांब्रा	ताण्ड्यब्राह्मणम्
तैआ	तैत्तिरीयारण्यकम्
तैउ	तैत्तिरीयोपनिषत्
तैब्रा	तैत्तिरीयब्राह्मणम्
तैसं	तैत्तिरीयसंहिता
द्र.	द्रष्टव्यम्
नि	निरुक्तम्

पा	पाणिनीया अष्टाध्यायी
पा वा	,, ,, – वार्तिकम्
पाम	पातञ्जल-महाभाष्यम्
पिंसू	पिङ्गलसूत्रम्
बृउ	बृहदारण्यकोपनिषत्
बृदे	बृहद्वेता
बौश्रौ	बौधायनश्रौतसूत्रम्
ब्रसू	ब्रह्मसूत्राणि
भगी	भगवद्गीता
मनुस्मृ	मनुस्मृतिः
मभा	महाभारतम्
माश	माध्यन्दिनशतपथब्राह्मणम्
माशब्रा	,,
शब्रा	,,
मीसू	मीमांसासूत्रम्
मुण्डउ	मुण्डकोपनिषत्
मैसं	मैत्रायणीसंहिता
या स्मृ	याज्ञवल्क्यस्मृतिः
वासं	वाजसनेयि-संहिता
श्वेउ	श्वेताश्वतरोपनिषत्
सअ	सर्वानुक्रमणी (द्र. कात्या सर्वानु)
सांख्यतत्त्वकौ	सांख्यतत्त्वकौमुदी
सासं	सामवेदसंहिता
Bṛ. Ār. Up	Bṛhadāraṇyaka Upaniṣad
KS	Kāṇva Saṁhitā
MS	Manuscript
MSS	Manuscripts
Mādhya-S	Mādhyandina Saṁhitā

॥ ॐ ॥

शुक्ल-यजुर्वेदीया

काण्व-संहिता

सायणाचार्यविरचितेन वेदार्थप्रकाशेन
आनन्दबोधभट्टोपाध्यायविरचितेन भाष्यसंग्रहेण च
समन्विता

॥ श्रीगणेशाय नमः ॥

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥१॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥२॥
यत्कटाक्षेण तद्रूपं दधद्बुक्कमहीपतिः ।
आदिशत् सायणाचार्यं वेदार्थस्य प्रकाशने ॥३॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात् ।
कृपालुः सायणाचार्यो वेदार्थं व्याकरोत् खलु ॥ ४ ॥
ऋग्यजुःसामवेदा ये व्याख्यातास्तेषु तद्यजुः ।
कृष्णं शुक्लमिति द्वेधा तत्कृष्णं तैत्तिरीयकम् ॥५॥
वैशम्पायनशिष्येण याज्ञवल्क्येन यद्यजुः ।
अधीत्य वान्तमाचार्यकोपभीतेन योगिना ॥६॥

V1 begins:– श्रीगणेशाय नमः ॥ श्रीभद्रकाल्यै नमः ॥ P1 श्रीदेवदेवाय नमः ॥ M2 श्रीगणेशाय नमः ॥

6. V1 on the left hand margin the scribe writes ब्राह्मणभाष्यरचने तु तत्सूनुर्हरिहरः आदिशादिति = माधवाज्ञयैव । तथा ऋग्भाष्ये दर्शनात् । तत एव माधवीये इति समाख्या संगतिश्च आज्ञाहेतुरिति तत्रैवोक्तः ॥

7. V1 (अतिसंग्रहात्) = अतिसंक्षेपात्

9. P1 व्याख्यास्तेषु च for व्याख्यातास्तेषु

11. M2 तद् for यद्

12. P1 अधीत for अधीत्य

गुरुः शिष्यमुवाचेत्थं क्रुद्धः केनापि हेतुना ।
प्रत्यर्पय मदीयां त्वं विद्यामित्यर्थयत् स च ॥७॥
योगसामर्थ्यतो विद्यां मूर्तां कृत्वाऽवमत् तदा ।
गृह्णीत तद्यजुर्वान्तमित्यन्यान् गुरुरब्रवीत् ॥८॥
अन्ये तित्तिरयो भूत्वा किंचित् किंचिदभक्षयन् ।
प्रवर्तितं खण्डशस्तैर्न सम्यग् बुध्यते नृभिः ॥८॥
आध्वर्यवं क्वचिद्धौत्रं क्वचिदित्यव्यवस्थया ।
बुद्धिमालिन्यहेतुत्वात् तद्यजुः कृष्णमीर्यते ॥१०॥
याज्ञवल्क्यस्ततः सूर्यमाराध्यास्मादधीतवान् ।
व्यवस्थितप्रकरणं यजुः शुक्लं तदीर्यते ॥११॥
पौराणिकीं कथामेतां वेदव्याख्यान आदरात् ।
आदिशन्मह्यमाचार्यः श्रुतावपि मया श्रुतम् ॥१२॥
काण्ववेदगते विद्यावंशब्राह्मण ईर्यते ।
यजूंषि शुक्लान्यादित्यान्मुनिः प्रापेत्यतिस्फुटम् ॥१३॥

"अथ वंशः । पौतिमाषीपुत्रः कात्यायनीपुत्रात्" (बृउ ६.५.१) इत्यारभ्य "परमेष्ठी ब्रह्मणः ब्रह्म स्वयंभु ब्रह्मणे नमः" (बृउ ४.६.३) इत्येतदन्तं काण्ववेदस्यान्तिमं वंशब्राह्मणम् । पौतिमाषीपुत्रः कश्चिद्वेदसंप्रदायप्रवर्तको मुनिर्मनुष्याणां गुरुः । स च कात्यायनीपुत्रात् वेदमधीतवान् ।

---

1. V1 On the margin : केनापि हेतुनेति । अत्र ब्राह्मणावज्ञानलक्षणदृष्टहेतुसद्भावेऽपि केनापि हेतुनेत्याचार्योक्तिस्तु चरितेनाल्पसाराणामित्यादि यन्मयोक्तमवज्ञाभासमात्रं वचस्तत्तु एतेषामल्पसारत्वदर्शनप्रयुक्तकरुणयैव श्रीमतो गुरोश्च तादृशब्रह्मवध्याप्रयुक्तकलुषाविलत्वं माभूदिति सद्भक्तिमत्तयैवेत्यभिप्रायेणेति तदभिप्रायः ॥ अतस्तदुक्तदृष्टहेतोर्हेतुत्वानुपपत्त्या हेत्वाभासमात्रत्वमित्याभिप्रायेण केनापीत्यनिर्वचनीयतोक्तिः । युक्तं चैतत् । तस्य तदीयाल्पसारत्वज्ञानसंभवात् । तस्य च गुरुभक्तिमत्त्वसंभवात् अधीत्य वान्तमाचार्यकोपभीतेनेत्याचार्येणैव प्रागुक्तत्वाच्च ।

2. V1 On the margin : विद्याम् = चिदेकरसस्यात्मनः चिच्छक्तिसामरस्येन अवस्थिता या ताम् । मूर्तामिति संबन्धनीयम् । अर्थयत् = पुनर्याचितवान् ; P1 S1 M2 अर्पयत् for अर्थयत्

3. V1 On the margin : इषे त्वेत्यारभ्य वर्णानुपूर्वीणवृत्त्यारूढतया बहिरपि तेजोमयवर्णराशिरूपतया च । मूर्तां परिच्छिन्नपरिणामवतीं कृत्वेति व्याख्येयम । योगिनेत्युक्तसामर्थ्यात् माधवकृपाविलसितव्याकरणशक्तिः सन् इत्यर्थात् ।

5. S1 तान्यभि, C तान्यपि for 2nd किंचित ; M2 अमर्षयन् for अभक्षयन्

6. V1 M2 C प्रवर्तितः for प्रवर्तितम्

8. V1 C om. तद् and after कृष्णम् ins. इति

11. V1 व्याख्यातां सद्भिर् , S1 वेदव्यासेन for वेदव्याख्यान

12. P1 V1 C आचार्याः for आचार्यः; M2 श्रुता for श्रुतम्

13. M2 कण्वादेदादागता for काण्ववेदगते

14. V1 On the margin : यजूंषि = काण्वमध्यन्दिनादिपञ्चदशशाखासाधारणानि; शुक्लानि = विद्यापरपर्यायाणिः मुनिः = कण्वस्याचार्यो याज्ञवल्क्यः; M2 प्राप्ये सति for प्रापेत्यति°

परमेष्ठिशब्देन सत्यलोकप्रवर्त्ती चतुर्मुखोऽभिधीयते । ब्रह्मशब्देनात्र "प्रज्ञानं ब्रह्म" (ऐआ ३.३) "सत्यं ज्ञानमनन्तं ब्रह्म" (तैउ २.१) "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" (श्वेउ ४.१०) इत्यादिवेदवाक्यप्रसिद्धः परमेश्वरो विवक्षितः । तस्य चेतरेषामिवोत्पत्त्यर्थं वेदाध्ययनादिव्यवहाराय वा [यत्] पारतन्त्र्यं तत्स्वयंभुशब्देन निवार्यते । तथा च श्वेताश्वतरा आमनन्ति –

"न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते ।
पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥
न तस्य कश्चित् पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम् ।
स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः ॥" (श्वेउ ६.८,९) ॥
"यो ब्रह्माणं विदधाति पूर्वं यो वेदांश्च प्रहिणोति तस्मै ।
तं हि देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥" इति ॥ (श्वेउ ६.१८) ॥

नमःशब्देन चास्य वंशब्राह्मणस्य गुरुपरम्पराविषयनमस्कारं प्रत्यङ्गमन्त्रत्वं द्योत्यते । सा च गुरुनमस्काररूपा गुरुसेवा वेदाध्ययनतदर्थविचारतदनुष्ठानानां साफल्याय संपद्यते । तथा च स्मृतिः –

"गुरुमुख्याः क्रियाः सर्वा भुक्तिमुक्तिफलप्रदाः ।
तस्मात् सेव्यो गुरुर्नित्यं मुक्त्यर्थं सुसमाहितैः ॥" इति ।

ईदृशे चास्मिन् वंशब्राह्मणे वाक्यमेवमाम्नायते– "आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते" (बृउ ६.५.३) इति । आदित्येनाध्यापितत्वादादित्यान्युच्यन्ते । वाज इत्यन्नस्य नामधेयम्, "अन्नं वै वाजः" (तैसं २.५.७) इति श्रुतेः । वाजस्य सनिर्दानं यस्य महर्षेरस्ति सोऽयं वाजसनिस्तस्य पुत्रो वाजसनेयः । तस्य याज्ञवल्क्य इति नामधेयम् । तेन याज्ञवल्क्येनैतानि शुक्लयजूंषि महर्षिभ्यः पञ्चदशभ्य आख्यायन्ते समन्तादुपदिश्यन्ते । एवं सति याज्ञवल्क्येन प्रवर्तिताः शुक्लयजुर्विषयाः शाखाः पञ्चदश संपद्यन्ते । तच्छाखाध्यायिनश्चरणव्यूहादिग्रन्थे काण्वादिभिः पञ्चदशभिर्नामभिरित्थं व्यवह्रियन्ते – (१) काण्वाः, (२) माध्यन्दिनाः, (३) शाफेयाः (४) स्थापायनीयाः, (५) कापालाः, (६) पौण्ड्रवत्साः, (७) आवटिकाः, (८) परमावटिकाः, (९) पाराशर्याः, (१०) वैधेयाः, (११) वैनेयाः, (१२) औधेयाः, (१३) गालवाः, (१४) वैजवाः, (१५) कात्यायनीयाश्च [चरणव्यूहे यजुर्वेदखण्डे] इति । इति पञ्चदशनामानि । तत्र कण्वाभिधेन महर्षिणा लब्धो यजुर्वेदशाखाविशेषः काण्वः । तल्लाभश्च स्मर्यते–

---

1. V1 पतिः for प्रवर्त्ती; V1 सिध्यति for अभिधीयते
3. S1 om °वेद°
4. M2 S1 निगद्यते for निवार्यते
8. S1 C कारण° for करण°
19. P1 M2 तानि for एतानि
20. P1 M2 V1 जाबालादिभिः for काण्वादिभिः
21. P1 M2 V1 जाबालाः, गौधेयाः, काण्वाः माध्यन्दिनाः, श्यामाः, श्यामायनीयाः, गाल्वाः, पिङ्गलाः, वत्साः, आवटिकाः, परमावटिकाः, पाराशर्याः वैणेयाः बौधेयाः गाल्वाश्च for काण्वाः .. …… कात्यायनीयाश्च [L. 24]·
24. P1 M2 V1 om. first इति; P1 V1 S1 C काण्व for कण्व

" युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा ॥ " (मभा १२.२०३.१७) इति ।

यद्ययं वेदः स्वयंभुपरमेष्ठ्यादिपरम्परया प्राप्तः आदित्यशिष्येण याज्ञवल्क्येन बहुभ्यः शिष्येभ्य उपदिष्टस्तथापि महता तपसा तुष्टस्येश्वरस्यानुग्रहात् कण्वसंबन्धितयैव लोके प्रख्यायते तमेतं काण्ववेदमधीयते विदन्ति वेति कण्वशिष्यप्रशिष्यादिपरम्परायां वर्तमानाः सर्वेऽपि काण्वाः इत्युच्यन्ते । एवं ज्ञात्वा काण्वादिषु द्रष्टव्यम् । तत्रेदं काण्ववेदाख्यं शुक्लं यजुः पूर्वं न व्याख्यातम् । किंतु तैत्तिरीयाख्यं कृष्णं यजुरेव व्याख्यातम् । तस्मादिदानीं काण्वशाखा व्याख्यायते । यद्यप्यनयोः शाखयोराध्वर्यव एव प्रयोगः प्रतिपाद्यते, तथापि मन्त्रपाठविशेषैः प्रयोगविशेषैर्वा अस्ति महान् भेदः । स चानुष्ठातृभेदेन व्यवस्थितविषयत्वान्न विकल्प्यते । अत एव " स्वाध्यायोऽध्येतव्यः " (तैआ २.१५) इति स्वकीयशाखाध्ययनमनुष्ठानविशेषाय विहितम् । अत्रैतच्चिन्तनीयम्– किमेतत् स्वविधिप्रयुक्तं माणवकाध्ययनम् उताध्यापनविधिप्रयुक्तमिति । तत्र प्रभाकरो मन्यते – " स्वाध्यायोऽध्येतव्यः " (तैआ २.१५) इत्यर्थविधिरष्टवर्षमुपनीतं माणवकमध्ययने प्रवर्तयितुं न प्रभवति । अनधीतवेदस्य तद्विधिवाक्यपाठाभावात् । वाक्यार्थज्ञानं व्याकरणादिषडङ्गाध्ययनरहितस्य दूरापेतम् । बालक्रीडासु निरन्तरमासक्तस्यानुष्ठाने प्रवृत्तिराशङ्कितुमप्यशक्या । तस्मान्नायं विधिः प्रवर्तकः । ननु पित्राचार्यादिभिः शिक्षितो माणवकः क्रीडाभ्य उपरतः पित्रादिमुखादेव यथोक्तवाक्यार्थमवगत्याध्ययने प्रवर्तिष्यत इति चेत् । एवं तर्हि पित्राचार्यकर्तृकाध्यापनप्रयुक्तं माणवकाध्ययनम् । न त्वध्ययनविधिप्रयुक्तमित्येतादृशमस्मदीयमेव मतं भवताऽप्यङ्गीकर्तव्यम् । अध्यापनस्य तु विधिरेवमाम्नायते – " अष्टवर्षं ब्राह्मणमुपनीय तमध्यापयीत " इति । ननु पूर्वोक्ताध्ययनविधाविवैतस्मिन्नध्यापनविधावपि योग्योऽधिकारी साक्षान्न श्रूयते । ततोऽध्यापनासिद्धौ तत्प्रयुक्तिरप्यध्ययनस्य तस्य दुर्लभेति चेत् । नैवम् । उपनयीतेत्यनेनात्मनेपदेनाचार्यत्वकामस्याधिकारिणः प्रतीयमानत्वात् । " संमाननोत्सञ्जनाचार्यकरण° " (पा १.३.३६) इत्यादिना सूत्रेणाचार्यकरणविवक्षायां नयतिधातोरात्मनेपदं विहितम् । एवमप्युपनयन एवाधिकारी सिद्धो न त्वध्यापन इति चेत् । नैवम् । ' उपनयीत तमध्यापयीत ' इत्युपनयनाध्यापनयोरेकप्रयोगात्मकत्वात् । अयमेवार्थो मनुना स्मर्यते –

" उपनीय गुरुः शिष्यं वेदमध्यापयेन्नरः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥ " (मनुस्मृ २.६९) इति ॥

---

5. P1 V1 वेत्ति, M2 वेत्तीति for वेति
6. P1 M2 V1 जाबालादिषु for काण्वादिषु
7. P1 M2 V1 after शाखयोः ins. उभयोः
8. S1 C om. वा अस्ति
14. M2 om. आशङ्कितुम्
16. P1 V1 (अ) ध्ययन° for (अ) ध्यापन°
19. S1 अध्ययन° for अध्यापन°; M2 (अ) सिद्धा for (अ) सिद्धौ;
P1 V1 S1 om. तस्य; S1 C एतेन for अनेन
21. S1 V1 °कारिसिद्धेर्, C °कारिसिद्धिर् for °कारी सिद्धो
22. M2 (अ) ध्ययनयोर् for (अ) ध्यापनयोर्

आचार्यत्वकामेन पित्रादिनानुष्ठेयमध्यापनं माणवककर्तृकाध्ययनव्यतिरेकेण न सिद्ध्यति। पाचयति याजयतीत्यादौ सर्वत्र णिच्प्रत्ययार्थादर्शनात्। अतः पित्रादिभिरनुष्ठेयमध्यापनं माणवकाध्ययनस्य प्रयोजकम्। एवं तर्हि "स्वाध्यायोऽध्येतव्यः" (तैआ २.१५) इत्यस्य विधेः का गतिरिति चेत्। ब्रह्मयज्ञाध्ययनमनेन विधीयत इति ब्रूमः। अत एव तैत्तिरीयाः– "ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि ग्रामात्" (तैआ २.११) इत्यारभ्य तस्मिन्नेव प्रकरणे स्वाध्यायस्य महिमानम् "अपहतपाप्मा स्वाध्यायः" (तैआ २.१५) इत्यादिना बहु प्रपञ्च्य तस्मादेवमामनन्ति– "तस्मात् स्वाध्यायोऽध्येतव्यो यं यं क्रतुमधीते तेन तेनास्येष्टं भवति" (तैआ २.१५) इति। तस्मादध्यापनविधिप्रयुक्तं माणवकाध्ययनमित्येवं प्राभाकराणां मतम् ॥

अत्रोच्यते। नित्यस्य ग्रहणाध्ययनस्य काम्येनाध्यापनेन प्रयोज्यत्वं न संभवति। ग्रहणाध्ययनस्य नित्यत्वमकरणे प्रत्यवायश्रवणादवगन्तव्यम्। तथा च स्मर्यते –

"योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" ॥ (मनुस्मृ २.१६८) इति ॥

अध्यापनं तु कुटुम्बपोषणाय गुरुदक्षिणाकामेनानुष्ठीयत इति तस्य काम्यत्वम् ॥

एतदपि स्मर्यते –

"षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" ॥ (मनुस्मृ १०.७६) इति ॥

यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहेषु षट्कर्मसु यजनाध्ययनदानानि त्रीण्यदृष्टार्थानि। याजनादीनि तु त्रीणि जीवनार्थानि। न त्वदृष्टार्थानि। यस्तु गुरुदक्षिणामनपेक्ष्य माणवकानध्यापयति तस्याध्यापनं विद्यादानरूपत्वाददृष्टार्थमस्तु। न चैतावता एतस्य नित्यत्वं सिध्यति। दानस्य धनवस्त्रादिना संपादयितुं शक्यत्वात्। इत्थमनित्यमध्यापनम्। यदा पित्रादयो नानुतिष्ठन्ति तदा नियमाध्यापनप्रयुक्तं माणवकस्याध्ययनं न निष्पद्येत। तस्मान्नित्यं ग्रहणाध्ययनं स्वविधिप्रयुक्तमेवेत्यवगन्तव्यम्। ननु "स्वाध्यायोऽध्येतव्यः" (तैआ २.१५) इत्यस्य वेदब्रह्मयज्ञविषयत्वाद्ग्रहणाध्ययनस्य स्वविधिर्न लभ्यत इति चेत्। बाढम्। अत एव प्रकाशात्माचार्यैर्विवरणग्रन्थे 'तमध्यापयीत' इत्यस्य माणवकाध्ययनविधिपरत्वमुक्तम्। अत्र 'अध्यापयीत' इति पदे धात्वर्थौ णिच्प्रत्ययार्थौ विधायकविभक्त्यर्थश्चेति

---

3. M2 V1 om. ब्रह्म°
4. M2 om. विधीयत इति ब्रूमः; M2 तैत्तिरीये, C S1 तैत्तिरीय° for तैत्तिरीयाः;
C M2 यक्ष्यमाणः for यक्ष्यमाणाः
7. C S1 प्राभाकर for प्राभाकराणां
18. M2 om. तु; P1 जीवनार्थत्वाद्दृष्टार्थानि for जीवनार्थानि। नत्वदृष्टार्थानि
20. V1 C तदा नित्यम्, P1 M2 तदानीम् for नियम°
21. P1 माणवक्य for माणवकस्य; M2 निषिध्यते for निष्पद्येत
22. P1 V1 (अ) ध्ययन° for (अ)ध्ययनस्य; M2 om. स्व°

त्रयोऽर्थाः प्रतीयन्ते । तेषु णिच्-प्रत्ययार्थस्य जीवनकामनयैव प्राप्तत्वान्नासौ विधेयः । अतः प्राप्तं तमनूद्य धात्वर्थोऽप्राप्तोऽस्मिन् वाक्ये विधीयते । यथा 'अग्निहोत्रं जुहोति' इति होमं विधाय 'दध्ना जुहोति' इति वाक्ये प्राप्तहोमानुवादेनाप्राप्तो दधिगुणो विहितस्तद्वत् । तस्मान्माणवककर्तृकाध्ययनविधिपरमेतद् वाक्यम् । तच्च तदर्थवाचकत्वाय 'अष्टवर्षो ब्राह्मण उपगच्छेत् । सोऽधीयीत' इत्येवं परिणेतव्यम् । किं च सर्वासु स्मृतिषु ब्रह्मचारिप्रकरणेऽध्ययनविधेर्दृष्टत्वात् तन्मूलभूतासु श्रुतिषु विद्यत एवाध्ययनविधिरित्यनुमीयते । तस्मात् स्वविधिप्रयुक्तमध्ययनं तत्र माणवकस्याप्रबुद्धत्वेऽपि पित्रादिशिक्षया तदनुष्ठानं सिध्यति । यथा वेदाध्ययनात् प्रागेव पित्रादिशिक्षया संध्यावन्दनसमिदाहरणाद्यनुष्ठानसिद्धिस्तद्वत् । तस्मात् "स्वाध्यायोऽध्येतव्यः" (तैआ २.१५) इत्ययमेव विधिः कण्वशिष्यान् स्वशाखाविशेषाध्ययने प्रवर्तयतीति सिद्धम् ॥

इदमपरं चिन्त्यते । किमेतदध्ययनमदृष्टार्थमुत दृष्टार्थमिति । तत्र दृष्टार्थेष्वाहारनिद्रादिषु वैदिकविध्यदर्शनाद्वेदेन विहितस्याध्ययनस्य संध्यावंदनादिवददृष्टार्थत्वं युक्तम् । "स्वर्गकामो ज्योतिष्टोमेन यजेत" (शब्रा १०.२.१.६; तांब्रा १६.१५.५) इत्यादिष्विवैतत्कामोऽधीयीतेत्येवमदृष्टसाध्यः फलविशेषो न श्रूयते इति चेत् । तर्हि अध्ययनत्वसाम्येन ब्रह्मयज्ञाध्ययने श्रूयमाणं घृतकुल्यादिफलमत्रातिदिश्यताम् । ब्रह्मयज्ञप्रकरणे ह्येवं श्रूयते – "यदृचोऽधीते पयसः कूल्या अस्य पितॄन्त्स्वधा अभि वहन्ति यद्यजूँषि घृतस्य कूल्या । यत् सामानि सोम एभ्यः पवते । यदथर्वाङ्गिरसो मधोः कूल्या" (तैआ २.१०) इति । तदेतद्ब्रह्मयज्ञफलं ग्रहणाध्ययनेऽतिदेष्टव्यम् । न चादृष्टचरोऽतिदेश इति वाच्यम् । जैमिनीययोः सप्तमाष्टमाध्याययोरतिदेशस्यैव बहुधा विस्तृतत्वात् । तत्र कर्माङ्गानामेवातिदेशो निरूपितः घृतकूल्यादि वाक्यं न तु कर्माङ्गावबोधकम् । किन्तु फलकथनेन स्तावकोऽर्थवादः । मैवम् । वैयासिके गुणोपसंहारपादे "हानौ तूपायनशब्दशेषत्वात्" (ब्रसू ३.१.२६.२५) इति सूत्रे तस्य दृष्टत्वात् । तथा हि – कौषीतकिनो ब्रह्मविदा परित्यक्तयोः सुकृतदुष्कृतयोरितरेतरैरनुकूलैः प्रतिकूलैश्च स्वीकारमिष्टमामनन्ति । तत्सुकृतदुष्कृते विधुनुते (? विधुन्वते) तस्य प्रियाः ज्ञातयः सुकृतमुपनयन्ति । अप्रिया दुष्कृतमिति । आथर्वणिकास्तु परित्यागमेवामनन्ति । न त्वितरस्वीकारम् । तदीयं च वाक्यमेतत्– "तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" (मुण्ड उ. ३.१.३) इति । तत्र भगवान् बादरायणः

---

1. S1 प्रतिपाद्यन्ते for प्रतीयन्ते
4. P1 V1 S1 °गच्छेत for °गच्छेत्; M2 सोऽधीतेति, V1 सोऽधीयतेति for सोऽधीयीतेति; M2 °गमितव्यम् for °णेतव्यम्
5. P1 विधिदृष्टः । तत्, S1 M2 V1 विधेर्दृष्टम् for विधेर्दृष्टत्वात्; M2 स्मृतिषु for श्रुतिषु
9. M2 V1 S1 सिद्धेः, P1 सिद्धे for सिद्धम्
12. V1 S1 C °साध्य° for °साध्यः
13. V1 S1 C नहि for तर्हि; P1 after घृतकूल्या ins. मधुकूल्या; M2 फलवद् for फलम्; V1 S1 आदिश्यताम् for अतिदिश्यताम्
15. S1 C घृत° for घृतस्य; C यदर्थ चा° for यदथर्वा°
20. S1 इतरैर् for इतरेतरैर्; V1 S1 C om. तत्सुकृत...एवामनन्ति । (L. 21)
21. M2 विधूनुते for विधुनुते

कौषीतकिशाखायां श्रुतस्येतरस्वीकारस्याथर्वणशाखायामुपसंहारं निर्णीतवान् । सोऽयं फलवाक्यरूपस्यार्थवादस्यातिदेशः । तद्वत् घृतकुल्यादिकमतिदिश्यताम् । अथवा विश्वजिन्न्यायेन स्वर्गो ग्रहणाध्ययनफलत्वेन कल्पनीयः । तथा हि ‘विश्वजिता यजेत’ इति यागविधिरेवाम्नातो न तत्र फलविशेषः । तथा सत्यधिकार्यभावादननुष्ठाने प्राप्ते तत्समाधानं भगवान् जैमिनिरसूत्रयत्– “स स्वर्गः स्यात् सर्वान् प्रत्यविशिष्टत्वात्” (जैसू ४.३.७.१५) इति । अस्यायमर्थः अधिकारहेतुत्वेन योऽयं फलविशेषोऽपेक्षितः सोऽयं स्वर्गोऽत्र भवेत् । कुतः ? फलकामिनः सर्वान् पुरुषान् प्रति स्वर्गाख्यफलस्य साधारणत्वादिति । स्वर्गो नाम सुखातिशयः । तथा चोक्तम्–

“दुःखेन यन्न संभिन्नं नच ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च सुखं स्वर्गपदाभिधम् ॥” (द्र. सांख्यतत्त्वकौ १.८) इति ॥

अतोऽत्रापि तेनैव न्यायेन माणवकाध्ययनस्य स्वर्गः फलमित्यदृष्टार्थमध्ययनमिति प्राप्ते ब्रूमः– दृष्टफलसंभवे सत्यदृष्टफलकल्पनमन्याय्यम् । अन्यथा “व्रीहीनवहन्ति” (आपश्रौ १.२१.७) इत्यत्रापि तण्डुलनिष्पत्तिलक्षणं दृष्टफलं बहुप्रयाससाध्यत्वादुपेक्ष्य सकृन्मुसलप्रहाररूपं प्रयासरहितमवघातमदृष्टार्थी पुरुषोऽनुतिष्ठेत् । तथा सति शास्त्रीयतण्डुलाभावेन पुरोडाशासिद्धौ यागविधयो बाध्येरन् । तस्मात् दृष्टफलसंभवे तदेवादरणीयम् । संभवति ह्यध्ययनस्याक्षरप्राप्तिरूपं दृष्टफलम् । नन्वक्षरप्राप्तिरूपं दृष्टफलं गुरुपूर्वकाध्ययनव्यतिरेकेण लिखितपाठेनापि लभ्यते । आयुर्वेदादिमन्त्रपाठस्य तथा दर्शनात् । तथा सति किमनेनाध्ययनविधिनेति चेत् । उच्यते । नियमादृष्टार्थोऽयमध्ययनविधिः । यथा तण्डुलनिष्पत्तिरूपस्य दृष्टफलस्य विक्रियनखविदलनादिनापि सिद्धौ नियमादृष्टार्थोऽवघातविधिः, तद्वत् । तस्मादक्षरप्राप्तिः फलम् प्रत्यक्षोऽध्ययनविधिरिति सिद्धम् ॥

तदिदं शांकरदर्शनानुसारिणां मतमसहमानौ भट्टगुरू मन्येते । भवत्यध्ययनस्याक्षरप्राप्तिः फलम् । तथापि न तावतापि विधिः पर्यवस्यति । किंतु प्राप्तैरक्षरैर्योऽयमर्थावबोधस्तस्मिन् विधिः पर्यवस्यति । अर्थावबोधेनानुष्ठाने निष्पन्ने सति पुरुषार्थस्याग्निहोत्रादिफलस्य स्वर्गस्य सिद्धेः । अक्षरप्राप्तिमात्रेण तु

---

1. P1 संहरन् for °संहारं
4. P1 अनुष्ठाने for अननुष्ठाने; P1 V1 S1 असूत्रयत for असूत्रयत्
5. V1 C om. अयम्
6. P1 M2 om. अत्र; V1 न for अत्र
10. S1 अभिप्रायेण for न्यायेन
12. P1 M2 V1 S1 उपेक्ष्यम् for उपेक्ष्य; M2 V1 S1 C अदृष्टार्थं for अदृष्टार्थी
14. P1 V1 S1 न तु, M2 तत्तु for ननु
15. M2 V1 S1 °पाठस्तु, C °पाठेषु for °पाठस्य
16. S1 नियमदृष्ट° for नियमादृष्ट°
18. S1 M2 V1 om. फलम्; M2 प्रत्यक्ष° for प्रत्यक्षः
20. M2 C V1 S1 भवताम् for तावता; M2 पर्यवस्यते for 1st and 2nd पर्यवस्यति
21. S1 पुरुषस्य for पुरुषार्थस्य

नाग्निहोत्राद्यनुष्ठानफलं सिध्यति । तस्मात् फलवदर्थावबोधे अध्ययनविधेः पर्यवसानमवगन्तव्यम् । यद्यपि विहितस्वाध्यायाध्ययनमात्रादिदानींतनेषु सर्वेष्वध्यापकेषु अर्थावबोधो न दृष्टस्तथापि निगमनिरुक्तव्याकरणाद्यङ्गपरिशीलनवत्सु दृष्ट एवार्थावबोधः । व्याकरणादिपरिशीलनमात्रेणार्थप्रतीतिमात्रे सत्यपि तन्निर्णयो न लभ्यते । "अक्ताः शर्करा उपदधाति" (तैब्रा ३.१२.५.१२) इत्यादिवाक्येषु केन द्रव्येणाक्ता इत्यादेः संदेहस्यानवगमादिति चेत् । एवं तर्हि निर्णायकं मीमांसाशास्त्रमनेनाध्ययनविधिना अर्थनिर्णयाय स्वीक्रियताम् । यथाऽवघातविधिस्तण्डुलनिष्पत्तिफलसिध्यर्थः अवघातस्यावृत्तिं स्वीकरोति, तद्वत् । तस्मात् फलवदर्थावबोधे पर्यवस्यत्ययमध्ययनविधिः । न त्वक्षरप्राप्तिमात्र इति प्राप्ते ब्रूमः– किमयमर्थावबोधः स्वयमेव पुरुषार्थस्य स्वर्गस्य हेतुः, उताग्निहोत्राद्यनुष्ठानद्वारेण ? नाद्यः । अनुष्ठानवैयर्थ्यप्रसङ्गात् । द्वितीये तु यथार्थावबोधस्यानुष्ठानहेतोः परंपरया पुरुषार्थहेतुत्वम् । एवमर्थावबोधहेतुभूताया अक्षरप्राप्तेरपि परंपरया पुरुषार्थहेतुत्वात् विधिरक्षरप्राप्तौ पर्यवस्यतु । किं च अनुष्ठानद्वारकस्वर्गफलोपेतेऽर्थावबोधे विधेः पर्यवसानं वदतः कृत्स्नवेदाध्ययनं न सिध्येत् । राजसूयाश्वमेधादावनधिकारिणो ब्राह्मणस्य तत्फलत्वपर्यन्तार्थावबोधासंभवात् । अक्षरप्राप्तिफलवादिनस्तु कृत्स्नवेदाध्ययनं सिध्यति । अक्षरप्राप्तिर्ब्रह्मयज्ञे जपहेतुत्वात् । तत्र ब्राह्मणोऽपि राजसूयाश्वमेधादिवेदभागे भागान्तरवत् ब्रह्मयज्ञजपं करोत्येव । विधेरर्थावबोधपर्यन्तत्वाभावे कथमर्थावबोधसिद्धिरिति चेत् । काव्यनाटकादिग्रन्थेषु वैदिकविधिमन्तरेण यथार्थावबोधस्तद्वद्भविष्यति । विध्यर्थाभावेऽर्थावबोधप्रयुक्तमदृष्टं किंचिदपि न सिध्यतीति चेत् । मैवम् । अर्थावबोधस्याध्ययनविधिप्रयुक्त्यभावेऽपि विध्यन्तरप्रयुक्तत्वेन तस्यादृष्टस्य सिद्धेः । विध्यन्तरं चैवमाम्नायते– "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" (पाम पस्पशा) इति । "योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा" (नि १.१८) इति च । तस्मादध्ययनविधिः पाठमात्रपर्यवसायी । अर्थावबोधस्तु विध्यन्तरप्रयुक्त इति सिद्धम् ॥

अथेदानीं विहितार्थावबोधसिद्ध्ये काण्ववेदो व्याख्यायते । कण्वसंबन्धश्च वेदस्य पूर्वमेव प्रसिद्धः प्रदर्शितः [च] । कण्वसंबन्धिशाखाया वेदत्वं च अलौकिकपुरुषार्थोपायवेदनहेतुत्वादवगन्तव्यम् । तथा चोक्तम्–

"प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।
एतं विदन्ति वेदेन तस्माद्वेदस्य वेदता ॥" इति ॥

---

6. M2 after स्वीक्रियताम् । adds इत्यादि लेखनीयमेव । तथापि किंचिद्देशकालादिकं विचार्य मया अत्यावश्यकं लिख्यते and om. यथावघात...इति सिद्धम् (L. 19)

8. V1 C स्वर्ग° for स्वर्गस्य

9. S1 V1 °हेतुत्वे for हेतुत्वम्

10. S1 C °द्वार° for °द्वारक°

11. C विधि° V1 विधिः for विधेः

12. V1 कृष्ण° for कृत्स्न°

13. S1 C °विभागे for °भागे; S1 V1 C भागेतर° for भागान्तरवत्

20. P1 M2 om. प्रसिद्धः

21. M2 दर्शितः for प्रदर्शितः; M2 P1 काण्वसंबन्धि° for कण्वसंबन्धि°

24. P1 V1 एवं for एतं

तस्मिंश्च वेदे द्वौ काण्डौ । कर्मकाण्डो ब्रह्मकाण्डश्च (इति) । बृहदारण्यकाख्यो ग्रन्थो ब्रह्मकाण्डस्तद्व्यतिरिक्तं शतपथब्राह्मणं संहिता चेत्यनयोर्ग्रन्थयोः कर्मकाण्डत्वम् । तत्रोभयत्राधानाग्निहोत्रदर्शपूर्णमासादिकर्मण एव प्रतिपाद्यत्वात् । बृहदारण्यके तु तृतीयाद्यध्यायेषु ब्रह्म प्रतिपाद्यते । अतः कर्मब्रह्मणी वेदस्य विषयः । तदवबोधः प्रयोजनम् । बोधार्थी चाधिकारी । तत्र प्रयोजनं विषयेण जन्यते । तयोर्जन्यजनकभावः संबन्धः । प्रयोजनाधिकारिणोरर्थ्यमानार्थित्वं संबन्धः । अधिकारिविषययोस्तु प्रयोजनद्वारेणोपकार्योपकारकत्वसंबन्धः । इत्थं विषयप्रयोजनाधिकारिसंबन्धरूपस्य अनुबन्धचतुष्टयस्य विद्यमानत्वात् तदीयप्रामाण्यस्य जैमिनिना प्रथमपादे प्रपञ्चितत्वाच्च वेदो व्याख्यातुं योग्यः ॥

तस्मिंश्च वेदे कर्मकाण्डः प्रथममाम्नातः । यद्यपि ब्रह्मणोऽभ्यर्हितत्वात् ब्रह्मकाण्डस्यैव प्राथम्यमुचितं तथापि कर्मभिः साध्यां चित्तशुद्धिमन्तरेण पुरुषस्य ब्रह्मकाण्डेऽधिकाराभावात् अधिकारहेतुकर्मप्रतिपादकः काण्डः प्रथममाम्नातः । कर्माणि चतुर्विधानि । नित्यं नैमित्तिकं काम्यं निषिद्धं चेति । तत्र नित्यनैमित्तिकयोरननुष्ठानान्निषिद्धसेवनाच्च प्रत्यवाय उत्पद्यते । तथा च याज्ञवल्क्यः स्मरति--

> " विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
> अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥ " (यास्मृ ३.५.२१९) इति ॥

तेन च प्रत्यवायेन बुद्धिमान्द्ये सति नित्यानित्यवस्तुविवेकवैराग्यादीनामनुदयात् ब्रह्मविविदिषा पुरुषस्य न जायते । तस्माद्विविदिषाहेतुत्वं नित्यनैमित्तिककर्मणां बृहदारण्यके समामनन्ति – " तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन " (बृउ ४.४.२२) इति । तदनुष्ठानेन तमोगुणरूपे चित्तमालिन्ये अपगते सति सत्त्वगुणरूपस्य नैर्मल्यस्योदयात् विवेकवैराग्यादिसंपत्तौ सत्यां परमपुरुषार्थरूपे ब्रह्मतत्त्ववेदनेऽभिरुचिर्जायते । " कारीर्या वृष्टिकामो यजेत " (मैसं २.४.८), " चित्रया यजेत पशुकामः " (तैसं २.४.६) इत्यादीनि तु काम्यकर्माणि परमपुरुषार्थसाधनत्वाभावेऽपि स्वाभाविककामग्रस्तानां पुरुषाणां वैदिकमार्गे फलसंवादेन श्रद्धामुत्पादयितुमेवाम्नायन्ते । तस्मात् तानि वेदे प्रासङ्गिकानि । परमतात्पर्यं तु वेदस्य नित्यकर्मस्वेव । तस्मात् कर्मकाण्डगतयोः संहिताशतपथग्रन्थयोः प्राधान्येन नित्यकर्माण्याम्नातानि ॥

तत्र शतपथब्राह्मणस्य मन्त्रव्याख्यानरूपत्वात् व्याख्येयमन्त्रस्वरूपप्रतिपादकः संहिताग्रन्थः पूर्वभावित्वात् प्रथमो भवति । तस्मिंश्च संहिताग्रन्थे चत्वारिंशदध्यायाः । तेषु प्रथमद्वितीययोरध्याययोः

---

3. C V1 S1 कर्माणि for कर्मब्रह्मणी
5. M2 om. प्रयोजना°...°कारकत्वसंबन्धः (L. 26)
6. M2 om. विषय...रूपस्य
7. M2 om. तदीयः ... आम्नातः (L. 8)
10. S1 समाम्नातः for आम्नातः; M2 before कर्माणि adds इत्यादि ।
15. M2 om. न जायते...हेतुत्वं; P1 V1 जायेत for जायते;
M2 om. तमेतं...विवेक° (L. 17)
17. P1 °रूपचित्तमालिन्योपगमे for °रूपे चित्त...°गते; P1 °रूप° for °रूपस्य
19. V1 C S1 °साधन° for °साधनत्व°
22. M2 C S1 V1 om °स्वरूप°

दर्शपूर्णमासौ । तृतीये त्वाधानाग्निहोत्राग्न्युपस्थानचातुर्मास्यानि । चतुर्थपञ्चमषष्ठसप्तमाष्टमनवमेषु षट्स्वग्निष्टोमः । दशमे वाजपेयः । एकादशे राजसूयः । द्वादशमारभ्य विंशान्तेषु नवस्वग्निचयनम् । एकविंशद्वाविंशत्रयोविंशेषु त्रिषु सौत्रामणी । चतुर्विंशपञ्चविंशषड्विंशसप्तविंशेषु चतुर्ष्वश्वमेधः । अष्टाविंशमारभ्य त्रयस्त्रिंशान्तेषु षट्सु तत्र तत्र विप्रकीर्णा लिङ्गविनियोज्या अनारभ्याधीता मन्त्राः । चतुस्त्रिंशपञ्चत्रिंशयोः पुरुषमेधः । षट्त्रिंशे शान्तिः । सप्तत्रिंशाष्टत्रिंशैकोनचत्वारिंशेषु प्रवर्ग्यः । चत्वारिंशे च ब्रह्मविद्या ॥

ननु संहिताया आदौ कर्मान्तरं परित्यज्य दर्शपूर्णमासेष्टिरेव कुतः प्रतिपाद्यत इति चेत् प्रकृतित्वान्निरपेक्षत्वाच्चेति ब्रूमः । प्रकर्षेणाङ्गोपदेशो यत्र क्रियते सा प्रकृतिः । कृत्स्नाङ्गविषयत्वमुपदेशस्य प्रकर्षः । विकृतिषु तु विशेषाङ्गमात्रस्योपदेशः क्रियते । अङ्गान्तराणि तु प्रकृतेरतिदिश्यन्ते । अत उपदेशस्य प्रकर्षाभावः । प्रकृतिस्त्रिविधा । अग्निहोत्रमिष्टिः सोमश्चेति । त्रिष्वप्येतेषु अन्यनैरपेक्ष्येण स्वाङ्गजातं सर्वमुपदिष्टम् । तत्र सोमयागस्य स्वरूपेणान्यनैरपेक्ष्येऽप्यङ्गेषु दीक्षणीयाप्रायणीयादिषु दर्शपूर्णमासेष्टिसापेक्षत्वात् न पूर्वभावित्वं युक्तम् । इष्टेस्तु सोमयागनैरपेक्ष्यात् सोमात् प्राचीनत्वं युक्तम् । यद्यप्यग्निहोत्रस्य स्वरूपाङ्गेषु नास्त्यन्यापेक्षा तथाप्यग्निसिद्ध्यपेक्षत्वादाहवनीयाद्यग्नीनां च पवमानेष्टिसाध्यत्वात् पवमानेष्टीनां च दर्शपूर्णमासविकृतित्वात् परंपरयाऽग्निहोत्रस्य दर्शपूर्णमासापेक्षाऽस्तीति प्रथमभावित्वं युक्तम् । दर्शपूर्णमासयोरग्निसाध्यत्वात् अग्निसाधकमाधानं प्रथमतो वक्तव्यमिति चेत् । मैवम् । नाधानमात्रेणाग्नयः सिध्यन्ति । किं तु पवमानेष्टिभिरपि । ताश्चेष्टयो दर्शपूर्णमासविकृतित्वात् साक्षादेव दर्शपूर्णमासावपेक्षन्ते । दर्शपूर्णमासौ त्वग्निद्वारा पवमानेष्टिसापेक्षावपि न साक्षात् पवमानेष्टीरपेक्षेते । अतो निरपेक्षत्वात् दर्शपूर्णमासेष्टिरेव प्रथमं वक्तव्या । ऋग्वेदसामवेदयोरादौ दर्शपूर्णमासेष्टिर्नाम्नातेति चेत् । बाढम् । यजुर्वेदमपेक्ष्य दर्शपूर्णमासयोरादित्वमुक्तम् । कर्मकाण्डविषये यजुर्वेदस्यैव प्राधान्यात् । आनुपूर्व्या कर्मणां स्वरूपं यजुर्वेदे समाम्नातम् । तत्र तत्र विशेषापेक्षायामपेक्षिता याज्यापुरोनुवाक्यादयः ऋग्वेदे समाम्नायन्ते । स्तोत्रादीनि तु सामवेदे । तथा सति भित्तिस्थानीयो यजुर्वेदः । चित्रस्थानीयावितरौ । तस्मात् कर्मसु यजुर्वेदस्य प्राधान्यम् । तस्मिंश्च दर्शपूर्णमासेष्टिरादौ समाम्नाता । तस्यां चेष्टौ इषे त्वादयो मन्त्राः आम्नाताः । तेषां च मन्त्राणां सामान्यलक्षणं न्यायविस्तराभिधे ग्रन्थे द्वितीयाध्याये प्रथमपादे द्वाभ्यामधिकरणाभ्याम् इत्थं विचारितम्--

" अहे बुध्निय मन्त्रम् इति मन्त्रस्य लक्षणम् ।
नास्त्यस्ति वास्य नास्त्येतदव्याप्त्यादेरवारणात् ॥

---

1. V1 C (अ) न्वाधान° for त्वाधान°
8. M2 after प्रकृतिः । adds इत्यादि and om. कृत्स्नाङ्ग°...अपेक्षेते
9. P1 om. तु
11. C om. °प्रायणीया°
12. V1 उक्तम् for युक्तम्
13. P1 V1 after अङ्गेषु adds वा
14. P1 पवमानादीष्टीनां for पवमानेष्टीनां
16. P1 इति for अपि
20. M2 (अ) पेक्षया for (अ) पेक्षायाम्; P1 M2 अपेक्षितत्वात् for अपेक्षिता
22. M2 om. तस्यां...व्यवहृतत्वात् (P. 11 L. 23)
23. V1 om. आम्नाताः

पाक्षिकाणां समाख्यातं लक्षणं दोषवर्जितम् ।
तेऽनुष्ठानस्मारकादौ मन्त्रशब्दं प्रयुञ्जते ॥ " (जैन्या २.१.७) इति ॥

आधानप्रकरण इदमाम्नायते– " अहे बुध्निय मन्त्रं मे गोपाय " (तैब्रा १.२.१) इति । तत्र मन्त्रस्य लक्षणं नास्ति । कुतः ? अव्याप्त्यतिव्याप्त्योर्वारयितुमशक्यत्वात् । विहितार्थस्याभिधायको मन्त्र इत्युक्ते, " वसन्ताय कपिञ्जलानालभते " (कासं २६.४.५) इत्यस्य मन्त्रस्य विधिरूपत्वादव्याप्तिः । मननहेतुर्मन्त्र इत्युक्ते ब्राह्मणेऽतिव्याप्तिरिति चेत् । मैवम् । पाक्षिकसमाख्यानस्य निर्दोषलक्षणत्वात् । तच्च समाख्यानमनुष्ठानस्मारकादीनां मन्त्रत्वं गमयति । " उरु प्रथस्व " (कासं १.८.२) इत्यादयोऽनुष्ठानस्मारकाः । " अग्निमीळे पुरोहितम् " (ऋसं १.१.१) इत्यादयः स्तुतिरूपाः । " इषे त्वा " (कासं १.१.१) इत्यादयः शाखाच्छेदनादिस्मारकाः । " अग्न आ याहि वीतये " (सासं १.१.१) इत्यादय आमन्त्रणोपेताः । एवमन्येऽप्युदाहार्याः । ईदृशेष्वत्यन्तविजातीयेषु समाख्यानमन्तरेण नान्यः कश्चिदुपगतो धर्मोऽस्ति यस्य लक्षणमुच्यते । तस्मात् समाख्यानं मन्त्रलक्षणम् ॥

ऋगादिलक्षणम् । पूर्वोत्तरपक्षादा (वा ?) ह–

" नर्क्सामयजुषां लक्ष्म सांकर्यादिति शङ्किते ।
पादश्च गीतिः प्रश्लिष्टपाठ इत्यस्त्वसंकरः ॥ " (जैन्या २.१.१७)

इदमाम्नायते– " अहे बुध्निय मन्त्रं मे गोपाय । यमृषयस्त्रैविदा विदुः । ऋचः सामानि यजूंषि " (तैब्रा १.२.१) इति । त्रीन् वेदान् विदन्तीति त्रिविदः । त्रिविदां संबन्धिनोऽध्येतारस्त्रैविदाः । ते च यं मन्त्रभागमृगादिरूपेण त्रिविधं वदन्ति तं गोपायेति योजना । त्रिविधानामृक्सामयजुषां व्यवस्थितं लक्षणं नास्ति । कुतः ? सांकर्यस्य दुष्परिहरत्वात् । अध्यापकप्रसिद्धेष्वृग्वेदादिषु पठितो मन्त्र ऋगादिरूप इति हि वक्तव्यम् । तच्च संकीर्णम् । तथा हि– " अग्नये मथ्यमानायानुब्रूहि " (तैसं ६.३.५), " हविर्धानाभ्यां प्रोह्यमाणाभ्यामनुब्रूहि " (ऐब्रा १.२९) इत्यादीनि यजूंष्यृग्वेदे समाम्नातानि । " देवो वः सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः " (तैसं १.१.५) इत्ययं मन्त्रो यजुर्वेदे संप्रतिपन्नयजुषां मध्ये पठितः । न च तस्य यजुष्ट्वमस्ति । ऋग्रूपत्वेन तद्ब्राह्मणे व्यवहृतत्वात् । " सावित्र्यत्र (र्चा ?) " (तैब्रा ३.२.३) इति हि ब्राह्मणम् । " एतत् साम गायन्नास्ते " (तैउ ३.१०) इति प्रतिज्ञाय " हाउवु हाउवु " इत्यादिकं साम यजुर्वेदे गीतम् । " अक्षितमस्यच्युतमसि प्राणसꣳशितमसि " (छांउ ३.१७.६) इति त्रीणि यजूंषि सामवेदे समाम्नायन्ते । तस्मान्नास्ति लक्षणमिति चेत् । न । पादादीनामसंकीर्णलक्षणत्वात् । पादेनार्धर्चेनोपेता वृत्तबद्धा मन्त्रा ऋचः । गीतिरूपा मन्त्राः सामानि । वृत्तगीतिवर्जितत्वेन प्रश्लिष्टपठिता मन्त्रा यजूंषि इति व्यवस्थितं लक्षणम् ॥

---

1. C याज्ञिकानां for पाक्षिकाणां
6. C याज्ञिक° for पाक्षिक°
7. P1 om. तच्च; C V1 S1 before उरु add उरुप्रथा
10. P1 V1 समाख्याम् for समाख्यानम्
13. V1 P1 after °यजुषां adds लक्षणं कुर्यात्; P1 om. सांकर्यात्
26. M2 after न writes इत्यादि and om. पादादीनाम्...युज्यते इति (P. 12 L. 23)

प्रथमाध्यायस्य द्वितीयपादे मन्त्रेष्वन्यद्विचारितम्–

"मन्त्रा उरु प्रथस्वेति किमदृष्टैकहेतवः ।
यागेषूत पुरोडाशप्रथनादेश्च भासकाः ॥
ब्राह्मणेनापि तद्भानान्मन्त्राः पुण्यैकहेतवः ।
न तद्भानस्य दृष्टत्वाद्दृष्टं वरमदृष्टतः ॥" (जैन्या १.२.४) इति ॥

"उरु प्रथस्व" (कासं १.८.२) इत्ययं कश्चिन्मन्त्रः । तस्यायमर्थः– भोः पुरोडाश, त्वमुरु विपुलता यथा भवति तथा कपालेषु प्रसरेति ईदृशा मन्त्रा यागप्रयोगेषु श्रूयमाणा अदृष्टमेव जनयन्ति । न त्वर्थप्रकाशनाय तदुच्चारणम् । पुरोडाशप्रथनलक्षणार्थस्य ब्राह्मणवाक्येनापि भासमानत्वात् । "उरु प्रथस्वेति पुरोडाशं प्रथयति" (शब्रा १.२.२.८) इति हि ब्राह्मणवाक्यमिति चेत् नैतद्युक्तम् । अर्थप्रत्यायनस्य दृष्टप्रयोजनस्य संभवे सति केवलादृष्टस्य कल्पयितुमशक्यत्वात् । तस्मात् दृष्टमर्थानुस्मरणमेव यागप्रयोगे मन्त्रोच्चारणस्य प्रयोजनम् । ब्राह्मणवाक्येनापि अर्थानुस्मरणसंभवे मन्त्रेणैवानुस्मरणीयमिति यो नियमस्तस्यादृष्टं प्रयोजनमस्तु । ननु मन्त्राणामनुष्ठेयार्थस्मारकत्वं क्वचिद्व्यभिचरितम् । तथा हि– "दिवो वा विष्णवुत वा पृथिव्या महो वा विष्णवुत वाऽन्तरिक्षाद्धस्तौ पृणस्व बहुभिर्वसव्यैरा प्र यच्छ दक्षिणादोत सव्यात्" (तैसं १.२.१३) इत्यस्मिन् मन्त्रे 'धनमाशास्ते' इत्ययमर्थः प्रतीयते । अनुष्ठेयार्थस्तु शकटविशेषस्थापनायाधारभूतकाष्ठस्थापनम् । तत् तु ब्राह्मणेन विधीयते– "दिवो वा विष्ण उत वा पृथिव्या इत्याशीरित्यर्चा दक्षिणस्य हविर्धानस्य मेढीं निहन्ति" (द्र. तैसं ६.२.९) इति ॥ नायं दोषः । अस्याधिकरणस्य लिङ्गविनियोगविषयत्वादुदाहृतस्तु मन्त्रः श्रुत्या विनियुज्यते । य एतेऽर्थस्मरणाय प्रयोक्तव्या मन्त्राः सन्ति तेषु सर्वेष्वृष्यादिकं वेदितव्यम् । अत एव छन्दोगा ऋष्याद्यवेदने बाधमभिधाय तद्वेदनविधिमामनन्ति– "यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यते" (आब्रा १.१.६) इत्यादिरवेदने बाधः । "तस्मादेतानि मन्त्रे मन्त्रे विद्यात्" (आब्रा १.१.६) इति वेदने विधिः । तथा कात्यायनाचार्योऽप्याह– "एतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजते याजयते तस्य ब्रह्म निर्वीर्यं यातयामं भवत्यथ विज्ञायैतानि योऽधीते तस्य वीर्यवदथ योऽर्थवित् तस्य वीर्यवत्तरं भवति जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते" (स अ १.१) इति । अस्यास्तु मन्त्रब्राह्मणात्मिकायाः काण्वशाखायाः सर्वस्या अपि स्वयंभुब्रह्माऽऽरभ्य पौतिमाषशाखापर्यन्ताः संप्रदायप्रवर्तका ऋषयस्त्रिषु वंशब्राह्मणेषु मन्त्रविशेषेषु स्पष्टमाम्नाताः । काण्डविशेषेषु मन्त्रविशेषेषु चापेक्षितास्तत्तदृषिविशेषा ब्राह्मणगताख्यायिकाभिरनुक्रमणिकादिग्रन्थैश्चावगन्तव्याः । तदज्ञानेऽपि वंशोक्तानामृषीणामवगतत्वादवेदनप्रयुक्तो बाधो नास्ति । ऋषिविशेषाणामपि विज्ञाने फलाधिक्यमस्ति । अत एव 'वीर्यवत्तरं' भवति (स अ १-१) इति कात्यायनवाक्यं पूर्वमुदाहृतम् । छन्दस्तु मन्त्राणाम् इषे त्वादीनामनियताक्षरत्वान्नास्त्येव । ये तु यजुषामपि छन्द इच्छन्ति, तैः कात्यायनोक्तसर्वानुक्रमणिकायां पञ्चमाध्यायमारभ्य तद्द्वारेण तत्तन्मन्त्रच्छन्दोऽनुसंधेयम् । देवता तु

---

4. P1 S1 ब्राह्मणेनाम्नाताः तद्वन्मन्त्राः for ब्राह्मणेन...मन्त्राः
16. P1 मेढ्यां for मेढीं
22. P1 M2 S1 V1 याजयति for याजयते
23. P1 तद्यो यथार्थवित् for अथ योऽर्थवित्
25. M2 V1 S1 C om. °माष°
26. M2 आक्षिप्ताः for अपेक्षिताः

मन्त्रार्थप्रतिपाद्या । सा च मन्त्रलिङ्गादवगन्तव्या । येषु मन्त्रेष्वग्नीन्द्रादयश्चेतनाः प्रतिपाद्यन्ते तेष्वग्न्यादीनां देवतात्वं विस्पष्टम् । येषु मन्त्रेषु पलाशशाखाबर्हिर्जुह्वादयोऽचेतनाः प्रतिपाद्यन्ते तेष्वपि शाखादिशब्दाभिधेयास्तत्तद्द्रव्याभिमानिन्यश्चेतना देवता अवगन्तव्याः । अत एव भगवान् बादरायणो 'मृदब्रवीदापोऽब्रुवन्' इत्यादिष्वचेतनद्रव्येषु चेतनोचितव्यापारमुपपादयितुम् – "अभिमानिव्यपदेशस्तु" (ब्रसू २.१.५) इति सूत्रयामास । एवं च सति इषे त्वादीनां मन्त्राणामृषिच्छन्दोदेवता यथोक्तनीत्या सुबोधाः । तस्माद्ग्रन्थबाहुल्यभीरुभिरस्माभिः प्रतिमन्त्रं नोदाह्रियन्ते । विनियोगज्ञानाय तु प्रतिमन्त्रं कात्यायनसूत्रवाक्यमुदाह्रियते । मन्त्रार्थज्ञानाय काण्वसंबन्धिब्राह्मणं तत्र तत्र यथासंभवमुदाहरामः । तदर्थावबोधदार्ढ्याय शाखान्तरविषयमप्यापस्तम्बसूत्रं बौधायनसूत्रं तैत्तिरीयब्राह्मणं च क्वचित् क्वचिदुदाहरामः । दर्शयागं चिकीर्षुरमावास्यायां प्रातर्नित्याग्निहोत्रं कृत्वा ततो दर्शयागार्थं "ममाग्ने वर्चः" (तैसं ४.७.१४) इत्यादिभिर्मन्त्रैर्वह्निषु समिदाधानरूपमन्वाधानं कृत्वा वत्सापाकरणं कुर्यात् । किमिदं वत्सापाकरणमिति चेत् । सन्ति दर्शयागे त्रीणि प्रधानहवींषि, आग्नेयोऽष्टाकपालः, ऐन्द्रं दधि, ऐन्द्रं पय इति । तत्र प्रतिपदि दधि होतुं तस्य दध्नः संपादनायामावास्यायां रात्रौ गावो दोग्धव्याः । तद्दोहनार्थं प्रातःकाले लौकिकदोहादूर्ध्वं स्वमातृभिः सह संचरन्तो वत्सा मातृभ्योऽपाकरणीयाः । तदिदं वत्सापाकरणम् । एतच्च कण्वो महर्षिः स्वकीये ब्राह्मणे विधातुमिदं वाक्यं पठति "स वै पर्णशाखया वत्सानपाकरोति" (शब्रा १·७·१·१) इति । तदेतदुपपादयितुमर्थवादे गायत्रीकृतसोमाहरणमभिधाय तदाहरणवेलायां पक्षिरूपायाः गायत्र्याः पक्षविशेषः सोमवल्याः पर्णं च भूमावपतत् । तयोरन्यतरत् पर्णनामकः पलाशवृक्षोऽभूत् । अतः सोमसंबन्धाद्गायत्रीसंबन्धाच्च पलाशवृक्षः प्रशस्त इत्यभिधीयते । तं विधिमेवोपसंहरति । पर्णं प्रचिच्छेद गायत्र्या वा सोमस्य वा राज्ञस्तत् पतित्वा पर्णोऽभवत् । तस्मात् पर्णो नाम यत् तत्र किंचित् सोमस्य त्यक्तं तस्मात् पर्णशाखया वत्सानपाकरोतीति । गायत्र्याः सोमाहरणं तु "कद्रूश्च वै सुपर्णी च" (तैसं ६.१.६) इत्यादौ तैत्तिरीयब्राह्मणगतानुवाके "सोमो वै राजा गन्धर्वेष्वासीत्" (ऐब्रा १.२७) इत्यादौ बह्वृचब्राह्मणे च प्रपञ्चितम् । पलाशवृक्षस्य सोमसंबन्धिपर्णादुत्पन्नत्वेन वृक्षजातिषु ब्राह्मणवृक्षरूपतया प्रशस्तत्वात् तदीयशाखया वत्सापाकरणं तैत्तिरिः स्वकीयब्राह्मणेऽपि स्पष्टमित्थमुवाच– "तृतीयस्यामितो दिवि सोम आसीत् । तं गायत्र्यपाहरत् । तस्य पर्णमच्छिद्यत । तत् पर्णोऽभवत् । तत् पर्णस्य पर्णत्वम् । ब्रह्म वै पर्णम् । यत् पर्णशाखया वत्सानपाकरोति ब्रह्मणैवैनानपाकरोति" (तैब्रा ३.२.१) इति । न चात्र सोमवल्याः पत्रमात्रस्य कथं वृक्षत्वसंपत्तिरिति विस्मेतव्यम् । विधातुरीश्वरस्याचिन्त्यशक्तित्वात् । अन्यथा बीजाद्वृक्ष इत्यत्रापि क्व बीजं कुत्र वा वृक्ष इत्ययं विस्मयः केन वार्येत । सर्वत्र पर्णेभ्यो वृक्षः

---

3. C °मानिन° for °मानिन्य°
7. P1 M2 कण्व° for काण्व°
12. M2 °होमं for होतुं
18. C प्रशस्यः for प्रशस्तः; M2 om. पर्णं ..प्रपञ्चितम् । (L. 22)
19. P1 after त्यक्तं adds तदिहाप्यसदिति
22. C V2 S1 om. °रूप°
24. P1 उदच्छिद्यत्, V1 C S1 उच्छिद्येत् for अच्छिद्यत; P1 C V1 तस्य पर्णो° for तत् पर्णो°; C S1 तस्य पर्णस्य for तत् पर्णस्य
25. P1 ब्रह्म वै तनपा° for ब्रह्मणैवैनानपा°
26. M2 om. कथं; M2 V1 S1 C वृक्षस्य for वृक्षत्व°

प्रसज्येतेत्ययमतिप्रसङ्गोऽपि ईश्वरसंकल्पाभावेन परिहर्तव्यः । स च संकल्पः कार्यैकसमधिगम्यः। तस्माद्वेदार्थे कुतर्कैर्न चोदनीयम् । तस्याः पर्णवृक्षशाखायाः छेदनेन प्रथममन्त्रं कात्यायनः स्वकीयसूत्रे इत्थं विनियुङ्क्ते – "पर्णशाखां छिनत्ति शामीलीं वेषे त्वेत्यूर्जे त्वेति वा। छिनद्मीति वोभयोः साकाङ्क्षत्वात् । संनयामीति वोत्तरे" (काश्रौसू ४.२.१-३) इति । अस्यायमर्थः- पलाशशाखा शमीशाखा चात्र विकल्पिता। तच्छेदने "इषे त्वा ऊर्जे त्वा" (कासं १.१.१) इति चैतौ मन्त्रौ विकल्पितौ । तयोरुभयोः क्रियापदाकाङ्क्षत्वादर्थावबोधाय 'छिनद्मि' इति पदमध्याहर्तव्यम् । सोऽयमेकः पक्षः । "इषे त्वा" इति छेदनार्थो मन्त्रः । "ऊर्जे त्वा" इति संनमनार्थो मन्त्रः । संनमनमृजूकरणम् । तदिदं पक्षान्तरमिति । अत्र बोधायन उभयोर्वाक्ययोरेकमन्त्रत्वमाश्रित्य तं तं मन्त्रं छेदने विनियुङ्क्ते– "तामाछिनत्तीषे त्वोर्जे त्वा" (बौश्रौ १.१०) इति । आपस्तम्बस्तु तदेतदभिसन्धाय मन्त्रभेदपक्षमपि कंचिदाश्रित्य विनियोगभेदमाह- "संनयतः पलाशशाखां शमीशाखां वाऽऽहरति...इषे त्वोर्जे त्वेति तामाच्छिनत्यपि वेषे त्वेत्याच्छिनत्त्यूर्जे त्वेति संनमयत्यनुमार्ष्टि वा" (आपश्रौ १.१.८,१०,११) इति । संनयतः सांनाय्यनामकं दधिरूपं हविः कुर्वत इत्यर्थः । काण्वशिष्यास्तु मन्त्रभेदं विनियोगभेदं चाश्रित्येत्थमामनन्ति– "तामाच्छिनत्तीषे त्वेति वृष्ट्यै तदाह यदाहेषे त्वेत्यूर्जे त्वेत्यनुमार्ष्टि यद्वृष्टादूर्ग्रसो जायते तस्मा उ एतदाह तस्मादाहोर्जे त्वेति" (शब्रा १.७.१.२) इति । अस्यायमर्थः– तां पर्णशाखाम् 'इषे त्वा' इति मन्त्रेण अध्वर्युः साकल्येन छिन्द्यात् । छेदनकालेऽध्वर्युः 'इषे त्वा' इति यद्वाक्यमाह, तद्वाक्यं वृष्टिसिद्ध्यर्थम् । अधिकेनादरेण सेवते । 'ऊर्जे त्वा' इति मन्त्रेण तां शाखामनुमृज्यात् । अनुमार्जनमानुलोम्येन तस्यां संलग्नधूल्याद्यपनयनम् । यद्वृष्टात् प्रभूताया वृष्टेः सकाशाद् व्रीहियवाद्यभिवृद्धिहेतुरूर्जशब्दाऽभिधेयः समीचीनजलात्मको रसो जायते, तदा प्राणिनामुपकारो भवति । तदर्थमेवाऽध्वर्युरेतदाह । किमाहेत्याशङ्क्य, 'तस्मादाहोर्जे त्वा' इति वाक्येन तदेव स्पष्टीक्रियते इति । काण्वाभिमत एव मन्त्रभेदपक्षो जैमिनीयैरपि द्वितीयाध्याये प्रथमपादे इत्थं निर्णीतः –

---

1. S1 अपि for अति°
3. M2 om. पर्णशाखां...वोत्तर इति (L. 19); P1 चोभयोः for वोभयोः
4. P1 चोत्तरः for वोत्तरे
7. P1 after पक्षः । adds इषे त्वेत्यस्य अस्मिन्नध्याये परमेष्ठी प्राजापत्यो देवा वा ऋषयः इति सर्वत्रावगन्तव्यम् । विशेषोक्तौ तु स एव ऋषिरिति द्रष्टव्यम् । शाखा देवता देव्यनुष्टुप् परमेष्ठी ऋषिः ।
8. M2 बोधायनः for बौधायनः
9. V1 S1 C om. एतद्; P1 अभिधाय, M2 अभिध्याय for अभिसंधाय
10. M2 om. कंचिद्; M2 om. विनियोग...
11. P1 च for वा.
12. P1 सानाय्य S1 M2 V1 C सान्नाय for सांनाय्य°
13. M2 after आमनन्ति । writes इत्यादि and om. तामा...° °क्रियत इति (L. 20); V1 S1 C यद्वृष्टया for यद्वृष्टात्
16. P1 after सिद्ध्यर्थम् ins अभिदधाति
17. V1 S1 C यदि for यद्वृष्टात्
19. P1 तद् for एतद्
20. P1 (अ) ध्यायं° for (अ) ध्याये

"इषे त्वादिर्मन्त्र एको भिन्नो वैकः क्रियापदे ।
असत्यर्थास्मारकत्वादेकादृष्टस्य कल्पनात् ॥
छेदने मार्जने चैतौ विनियुक्तौ क्रियापदे ।
अध्याहृते स्मारकत्वान्मन्त्रभेदोऽर्थभेदतः" ॥ (जै. २.१.१५.४८) इति ।

'इषे त्वोर्जे त्वा' इत्यत्र क्रियापदाभावेन 'उरु प्रथस्व' (कासं १.८.९) इति मन्त्रवदर्थस्मारकत्वाभावाददृष्टार्थे सत्येकादृष्टस्य कल्पने लाघवादेक एव मन्त्र इति चेत् । मैवम् । काण्वब्राह्मणे 'छिनत्ति', 'अनुमार्ष्टि' इति विनियोगभेदश्रवणात् । तदनुसारेण 'इषे त्वा छिनद्मि', 'ऊर्जे त्वाऽनुमार्ज्मि' इति क्रियापदेऽध्याहृते सति अर्थद्वयस्मारकत्वाद्भिन्नौ मन्त्रौ ॥ अथानयोरर्थोऽभिधीयते ॥

* * *

[प्रथमोऽनुवाकः]

ॐ इ॒षे त्वो॒र्जे त्वा॑ वा॒यव॑ स्थ । दे॒वो वः॑ स॒वि॒ता प्रार्प॑यतु॒ श्रेष्ठ॑तमाय॒ कर्म॑णे ॥ १ ॥

ॐ ॥ इ॒षे । त्वा॒ । ऊ॒र्जे । त्वा॒ । वा॒यव॑ः । स्थ॒ ।
दे॒वः । व॒ः । स॒वि॒ता । प्र । अ॒र्प॒य॒तु॒ । श्रेष्ठ॑तमा॒येति॒ श्रेष्ठ॑ऽतमाय । कर्म॑णे ॥ गी॒° ॥

सा–इष इच्छायाम् इति धातुः । इष्यत इति व्युत्पत्या क्विबन्तेन षकारान्तेनेष्शब्देन वृष्टिरभिधीयते । व्रीहियवादिधान्यनिष्पत्तिहेतुत्वेन सर्वे प्राणिनो वृष्टिमिच्छन्ति । हे पलाशशाखे, इष्यमाणायै वृष्ट्यै त्वा छिनद्मि । ऊर्ज बलप्राणनयोरिति धातुः । वृष्टिगतो जलात्मको रसः सर्वान् मनुष्यपश्वादीन् बलयति पानादिना दृढशरीरान् करोति । यद्वा– प्राणयति प्रकर्षेण चेष्टयतीति व्युत्पत्तिद्वयेन रसः ऊर्ज्शब्देनाभिधीयते । हे पलाशशाखे, ऊर्जे रसाय त्वामनुमार्ज्मि । इष्शब्दगत इकारो धातुस्वरेण प्रातिपदिकस्वरेण वा उदात्तः । चतुर्थ्येकवचनस्य "अनुदात्तौ सुप्पितौ" (पा ३.१.४) इत्यनुदात्तत्वे प्राप्ते तदपवादत्वेन "सावेकाचस्तृतीयादिर्विभक्तिः" (पा ६.१.१६८) इत्युदात्तत्वं तस्मिन्निति "अनुदात्तं पदमेकवर्जम्" (पा ६.१.१५८) इति पूर्व इकारोऽनुदात्तः । यद्यप्येकशब्देन द्वयोरुदात्तयोरन्यतरो यः कोऽपि वक्तुं शक्यते तथापि "सति शिष्टस्वरो बलीयान्" (द्र. पाम ६.१.१५८ वा १) इति न्यायेन विभक्तिगत उदात्त एव प्रबलः । तथा सत्यनुदात्तादिकमुदात्तान्तमिदं पदं संपन्नम् । त्वा-

---

1. V1 before इषे त्वादिर् adds :– विषयो विषयश्चैव पूर्वपक्षस्तथोत्तरे । प्रयोजनं च वक्तव्यं ग्रन्थादौ पञ्चकं स्मृतम् ।
2. P1 असत्यर्थ° for असत्यर्था°
4. P1 °भेद इतीरितः for °भेदोऽर्थभेदतः
5. P1 M2 °अनु° for °अर्थ°; C. (अ)र्थे for (अ)र्थत्वे
8. P1 M2 तयोर् for अनयोर्
13. V1 S1 C before धातुः om. इति
16. M2 पालनादिना for पानादिना
17. M2V1 इषु for इष्; P1 धातोरिति सूत्रेण । फिष् इति सूत्रेण वा for धातुस्वरेण.
18. M2 om. चतुर्थ्येक...यजमाने (P.16 L.7)

शब्दस्य प्रातिपदिकस्वरेण यद्यपि उदात्तः प्राप्तस्तथापि "अनुदात्तं सर्वमपादादौ" (पा ८.१.१८) इत्यस्य सूत्रस्यानुवृत्तौ सत्यां "त्वामौ द्वितीयायाः" (पा ८.१.२३) इति त्वादेशविधानादयं शब्दोऽनुदात्तः। संहितायाम् "उदात्तादनुदात्तस्य स्वरितः" (पा ८.४.६६) इति त्वाशब्दस्य स्वरितत्वम्। "ऊर्जे त्वा" इत्यत्रापि यथोक्तरीत्या स्वर उन्नेयः। मन्त्रद्वयस्य संहितायामूर्जे इत्यूकारः "स्वरितात् संहितायामनुदात्तानाम्" (पा १.२.३९) इति प्रचयाभिधायामेकश्रुत्यां प्राप्तायां तदपवादत्वेन "उदात्तस्वरितपरस्य सन्नतरः" (पा १.२.४०) इत्यन्तर्नीचोऽनुदात्तो भवति। एवमुत्तरेष्वपि मन्त्रेषु स्वरप्रक्रियोहनीया। उक्तमन्त्रद्वयपाठेनाध्वर्युरिष्यमाणमन्नं बलकरमाज्यक्षीरादिरसं च यजमाने संपादयत्येव। तदाह तित्तिरिः– "इषे त्वोर्जे त्वेत्याह। इषमेवोर्जं यजमाने दधाति" (तैब्रा ३.२.१) इति। न चात्र प्रत्यक्षविरोध आशङ्कनीयः। अर्थवादस्य प्रशंसारूपगुणत्वाङ्गीकारात्। भूतार्थवादत्वाङ्गीकारे यदा कदाचिदन्नरसयोर्यत् संपादनं तदेतन्मन्त्रफलमित्यवगन्तव्यम् ॥

उत्तरमन्त्रस्य विनियोगमाह कात्यायनः– "मातृभिर्वत्सान्त्संसृज्य वत्सं शाखयोपस्पृशति। वायव स्थोपायव स्थेति चैके" (काश्रौ ४.२.७,८) इति। वायव स्थेत्यस्य वायुर्देवता, दैवी बृहती छन्दः, परमेष्ठी ऋषिः। सामान्यतो मन्त्रेषु विशेषानुक्तौ परमेष्ठी प्रजापतिर्ऋषिर्वेदितव्यः ॥

कण्वोऽप्याह– "वत्समुपस्पृशति। वायव स्थ" (शब्रा १.७.१.३) इति॥ एतावानेव कण्वाभिमतो मन्त्रः। "उपायव स्थ" इत्ययमुत्तरभागस्तित्तिरेरभिमतः। तस्मादेक इत्यन्यदीयमतत्वेन कात्यायन उदाजहार। तित्तिर्यभिमतं विनियोगमाह बौधायनः– तथा "वत्सानपाकरोति वायव स्थ" इति। तत्रोत्तरभागं कण्वो निराचकार। "उपायव स्थेत्युहैक आहुस्तदु नाद्रियेत" (शब्रा १.७.१.३) इति। वा गतिगन्धनयोरिति धातुः। वान्ति गच्छन्तीति वायवो गन्तारः। हे वत्साः, यूयं 'वायवः 'स्थ मातृभ्यः सकाशादन्यत्र गन्तारो भवत। सह मातृभिर्गमने सति सायं दोहो न लभ्यत इत्यभिप्रायः। अथवा वायुसदृशत्वाद्वत्सानां वायुत्वम्। यथा वायुः पादप्रक्षालननिष्ठीवनादिभिरुपहतां भूमिं शोषयित्वा पुनाति एवं वत्सा अप्यनुलेपनहेतुभूतगोमयादिदानेन पादसंचरणादिना च भूमिं पुनन्ति। तस्माद्वायुसादृश्यम्। सोऽयमभिप्रायः कण्वेन– "अयं वाव वायुर्योऽयं पवते" (माशब्रा १.७.१.२) इत्यादिवाक्येनाम्नातः। अथवा मनुष्याणामिव पशूनां स्वनिवासाय गृहनिर्माणसामर्थ्याभावान्निरावरणेऽन्तरिक्षे संचरणादन्तरिक्षमेव पशूनां देवता। तस्य चान्तरिक्षस्य वायुरधिपतिः। स च वायुरेतान् पशून् स्वकीयावयवानिव पालयतीति पशूनां वायुरूपत्वम्। तथाविधपालनाय पशून् वायवे समर्पयितुं

---

5. C ऐकश्रुत्यं for एकश्रुत्यां; M2 C प्राप्तम् for प्राप्तायां.
9. M2. om न चात्र…अवगन्तव्यम् ॥ [L.10]
11. P1 after °स्पृशति adds प्रतिवत्सं मन्त्रावृत्तिः
12. P1 after वायव स्थ ins इति।; S1 V1 M2 C om. वायव स्थेति…वेदितव्यः ॥ [L.13]
14. M2 एवानेव कण्वाभिमतौ मन्त्रौ for एतावानेव…मन्त्रः।
15. M2. om. तस्माद्…वायव स्थेति। [L.17]
16. P1 बोधायनः for बौधायनः
19. M2 सोऽयं, C सायो for सोऽयं
21. P °लेपने for °लेपन°; V1 C M2 om. पादसंचरणादिना
22. M2 °सदृशः for °सादृश्यम्; V1 C after कण्वेन add प्रदर्शितः; C V1 before अयं add वायव स्थेति

वायुरूपत्वमापाद्य "वायव स्थ" इति मन्त्रः प्रवर्तते। सोऽयमभिप्रायस्तित्तिरिणाम्नातः– "वायवः स्थेत्याह। वायुर्वा अन्तरिक्षस्याध्यक्षाः। अन्तरिक्षदेवत्याः खलु वै पशवः। वायव एवैनान् परि दधति" (तैब्रा ३.२.३) इति। तेन वायुरूपत्वमुच्यते। अथवा तृणभक्षणायाहनि तत्र तत्रारण्ये चरित्वा सायंकाले वायुवद्वेगेन यजमानगृहे समागमनाय पशून् प्रकर्षेणाकारयितुं वायुरूपत्वमुच्यते। अयमभिप्रायस्तित्तिरिणैवाम्नातः– "प्र वा एनानेतदाकरोति। यदाह। वायवः स्थेति" (तैब्रा ३.२.१) इति च ॥

कात्यायनः– "देवो व इति मातृकाणामेकां व्याकृत्य ऐन्द्रं भवति माहेन्द्रं वा" (काश्रौ ४.२.१०) इति। अत्र पूर्वमन्त्रविनियोगसूत्रवाक्याच्छाखयोपस्पृशतीति पदद्वयमनुवर्तते। ततोऽयमर्थः संपद्यते। वत्सानां मातरो या गावः सन्ति तासां मध्ये गामेकैकां व्याकृत्य पृथक्कृत्य "देवो वः" इति मन्त्रेण शाखयोपस्पृशेत् ॥ तथा सति गोसंबन्धिदधिरूपं हविरैन्द्रं माहेन्द्रं वा भवति। एतदेवाभिप्रेत्यापस्तम्ब आह–"इन्द्रं निगमेषूपलक्षयेदिन्द्रयाजिनो महेन्द्रयाजिनः" (आपश्रौ १.२.७) इति। तत्रोभयविधयजमानविवेकं तित्तिरिर्दर्शयति– "नागतश्रीर्महेन्द्रं यजेत। त्रयो वै गतश्रियः शुश्रुवान् ग्रामणी राजन्यस्तेषां महेन्द्रो देवता" (तैसं २.५.४) इति ॥

मन्त्रपाठस्तु–"देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे। आप्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्माः। मा व स्तेन ईशत माघशंसः। ध्रुवा अस्मिन् गोपतौ स्यात बह्वीः" इति। द्योतनार्थस्य दीव्यतिधातोर्देव इति रूपम्। षूङ् प्रेरणे इति धातोः सवितेति। सोऽयं ᵛसविता ᵛदेवः स्वस्वव्यापारे प्रेरकः परमेश्वरः। हे गावः, ᵛवः युष्मान् ᵛप्रार्पयतु प्रभूततृणपयसोपेतमरण्यदेशं गमयतु। किमर्थम्? ᵛश्रेष्ठतमाय ᵛकर्मणे। कर्म हि चतुर्विधम्। अप्रशस्तं, प्रशस्तं, श्रेष्ठं, श्रेष्ठतमं चेति। लोकविरुद्धं वधबन्धचौर्यादिकम् अप्रशस्तम्। लौकिकैः श्लाघनीयं बन्धुवर्गपोषणादिकं प्रशस्तम्। स्मृतिभिः श्लाघनीयं वापीकूपतडागादिकं श्रेष्ठम्। वेदैः श्लाघनीयं यज्ञरूपं कर्म श्रेष्ठतममिति तद्विवेकः ॥ १ ॥

---

1. M2 लघुरूपत्वम् for वायुरूपत्वम्
2. M2 अस्य for आह and then add– वायुर्देवता। दैवी बृहती छन्दः। परमेष्ठी ऋषिः।; V1 C एतान् for एनान्; P1 V1 C °ददाति, M2 °दधाति for दधति
3. M2 Om. तेन; C आहेति for अहनि
4. P1 M2 °गृह° for °गृहे
5. M2 om. प्र वा...किमर्थं (L. 18)
7. P1 व्यावृत्य for व्याकृत्य; C S1 महेन्द्रं for माहेन्द्रं.
9. P1 व्यावृत्य for व्याकृत्य.
10. C महेन्द्रं for माहेन्द्रं
14. P1 after °पाठस्तु– adds परमेष्ठि यजुरैन्द्रम्।
17. P1 °यवस° for तृणपयस°

भाष्यसंग्रहः ॥

[आ] शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ १ ॥
भारूपो यो विजयते भासयन् भुवनत्रयम् ।
तमिनं गोपतिं वन्दे ऋग्यजुःसामविग्रहम् ॥ २ ॥
अधीत्य यातयामानि शुक्लान्यथ यजूंषि च ।
भास्वतोऽध्यापयञ्शिष्यान् याज्ञवल्क्यं नमामि तम् ॥ ३ ॥
पदवाक्यप्रमाणज्ञान् पूर्वाचार्यान् गुरूत्तमान् ।
जगत्पूज्यान् सदा वन्दे प्रणतोऽभीष्टदान् मुदा ॥ ४ ॥
विघ्नेशं भारतीं देवीं जाह्नवीं जातवेदसीम् ।
गुरुपत्नीं च सततं नमस्ये शिरसा मुदा ॥ ५ ॥
काण्ववेदस्य [........] र्थज्ञानस्य भूरिभिः ।
प्रणीतस्येह भाष्यस्य संग्रहः क्रियते मया ॥ ६ ॥
निरीक्ष्यानुक्रमणिकां कात्यायनकृतां मुहुः ।
श्रीकृष्णस्य [हि] पूजार्थं संग्रहः क्रियतेऽधुना ॥ ७ ॥

अत्रादौ वक्ष्यमाणस्य ग्रन्थसंदर्भस्योपकारिकतया यदर्थोऽभिधीयते, प्रथमं तावत् पूर्वतन्त्रे --" उ [औ]त्पत्तिके [क]स्तु शब्दस्यार्थेन संबन्धः । तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्य अनपेक्षत्वात् " (मीसू १·१·५) इत्यादिभिः सूत्रैर्वेदस्यानपेक्षलक्षणं प्रतिष्ठापितम् । अस्यार्थोऽभ्यवगन्तव्यः पुरुषार्थवत् प्रसिद्धये । तत्रापि पदपदार्थवाक्यवाक्यार्थतद्भेदस्य मन्त्रप्रभेदस्वरवर्णाक्षरमा(त्र)र्षिदेवताप्रभेदः प्रयोगविनियोगात् ज्ञातव्यः । अत्र चतुर्विधानि पदजातानि नामाख्यातोपसर्गनिपाता इति नैरुक्ताः पठन्ति (नि १०१) ।

" धातुजं धातु[जा]ज्जातं समर्थार्थजमेव च ।
वाक्यजं व्यतिकीर्णं च निर्वाच्यं पञ्चधा पदम् ॥ " (बृदे २·१०४) इति ॥

तत्र धातुजं– वन्दारुः पचमानो यजमान इत्यादि । धातुजाज्जातमिति तद्धितपदम्– आ(ग्ने)यं याजमान इत्यादि । समर्थार्थजमिति समासपदम्; तच्च सामान्यतश्चतुर्विधम् । अव्ययीभावस्तत्पुरुषो द्वन्द्वो बहुव्रीहिरिति । तत्रोदाहरणानि । उपरिनाभि बहिष्पिण्डमित्याद्ये,

---

2. B1 om. शुक्ला°...अव्ययी° [L.26] and instead adds अथ सौत्रामणि त्रिभिर् .. प्रत्यङ्मुख सोमे i. e. the beginning of chapter 21

महादेवः प्रजापतिरिति द्वितीये, अग्नीषोमौ इन्द्राग्नी इति तृतीये, कृष्णग्रीवः शितिकण्ठ इति चतुर्थे। वाक्यजम् [इति]—क्रयस्य रूपं सोमस्य लाजाः इत्यत्र सोमस्य क्रयस्य रूपं लाजा इत्येवं प्राप्ते रूपपदेन व्यवधानं व्यत्ययश्च। व्यतिकीर्णमिति—यत्पदत्वेन तत्प्रतिरूपका ये वर्णास्तैः सहोच्चार्यते, [यत्तत्] तद्व्यतिकीर्णम्— पार्श्वतः श्रोणितः शितामत इति ॥

अथ पदार्थः। (नाम्नां) सामान्यतोऽर्थवचनम्। सत्त्वप्रधानानि नामानीति। सतो भावः सत्त्वम् अस्तिता, तद्यत्र प्रधानम्। अत्र गुणभूता क्रिया, विभक्त्यर्थः, कारकं चेति गुणभूतानीमानि। सत्त्वप्रधानानि नामानीति नामार्थः ॥

अथाख्यातम् – अर्थ [? भाव]प्रधानमाख्यातम्। अर्थः प्रयोजनम्। भावो नाम क्रियायाः फलम्। तद्यथा-ओदनं पचति देवदत्त इति। अत्र देवदत्ताश्रया [पाक]क्रिया ओदनाख्यभावस्य गुणभूता। अतो भावप्रधानमाख्यातमित्युच्यते। अथवा भावप्रधानमिति। भावो भावना। सा पुरुषप्रयत्नः परिस्पन्दश्च। पुरुषप्रयत्नश्चात्मनो व्यापारः, परिस्पन्दश्च भूतादीनाम्। सा यत्र प्रधानम्, तत्र गुणभूता भूतादिक्रियेति। तदिदं भावप्रधानमाख्यातम् इति। यद्वा-भावो धात्वर्थः क्रिया वा यत्र प्रधानम्। तदा गुणभूतानि षट् कारकाणीति तदिदं भावप्रधानम् आख्यातम् इत्याख्यातार्थः ॥

अथ विंशतिरुपसर्गाः प्रपराऽपेत्यादयः क्रियाविशेषकरा इति सामान्यार्थः। [तथा च–]

धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते।
तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा ॥ इति ॥

अथ निपाताश्चादयः। सामान्यतश्चासत्त्ववचन इति तेषामर्थः। अथ त्रैराश्यं कृत्वा उपमार्थीयाः कर्मोपसंग्रहार्थीयाः पादपूरणार्था इति वदन्ति। तत्रोपमार्थीयाः इव न इत्यादयः।

---

3. H1 शब्देन for °पदेन; H1 om. यत् पदत्वेन.. व्यतिकीर्णम् [L.4]
4. B1 after व्यतिकीर्णम्। adds च यथा– त्वमग्ने द्युभिरित्यत्राशुशुक्षणिरिति पदे। सं ते वायुरिति पदे मन्त्रे मातरिश्वेति वायुरित्यपि; H1 सित° for शित°.
5. H1 सत्त्वे for सत्त्व
7. H1 चैतानि नामानि for गुणभूतानि; B1 om. इति; B1 अर्थः for नामार्थः
9. B1 om. तद्यथा
10. B1 अथ for अथवा
13. H1 सा for वा; H1 तथा for तदा
18. H1 om. इति; B1 विशेष° for तेषाम्
19. H1 केवलोपमा° for उपमा°; H1 अत्र for तत्र

तद्यथा —‘ देवः सविता न ’, ‘ सत्यधर्मेन्द्रो न ’ इति । कर्मोपसंग्रहार्थीयास्तु असत्त्ववचनाः—च, वा ह अह इत्यादयः । तद्यथा—‘ वता वायो मनो वा ’; ‘ अग्निश्च पृथिवी च ’ इत्यादयः । पादपूरणार्थाः । पादमेव पूरयन्ति नत्वर्थान्तरं वदन्ति । इमा नु कम् इत्यादयः । उक्तार्थे अभियुक्तवचनमाह—

“ क्रियावचनमाख्यातमुपसर्गो विशेषकृत् ।
सत्त्वाभिधायकं नाम निपातः पादपूरणः ॥ ” (ऋप्रा १२·२५) इति ॥

पदार्थ इति । रूढ्या योगवृत्त्या वाऽभिधेयः पदार्थः । एतदनुपपत्त्या लक्षणया गौण्या वा प्रतीयमानोऽर्थोऽप्यर्थ एव । अत्रापि आकृतिस्तु क्रियार्थत्वादिति तत्तज्जातिरेव शब्दार्थः । तत्रापर्यवसानाद्व्यक्तिप्रतीतिः । पदानां च योग्येतरान्वितस्वार्थे शक्तिः । पदार्थयोः प्रत्याय्यप्रत्यायकलक्षणः संबन्धः । एते शब्दः शब्दार्थस्तत्संबन्धः इति त्रयोऽपि नित्याः ॥

अथ वाक्यमिति । अत्र नामाख्यातोपसर्गनिपातसमुदायो वाक्यम् । अत्रापि गुणप्रधानभावविवक्षायां सत्यामाकाङ्क्षासंनिधियोग्यतावशेन पदानां परस्परान्वयः ॥

अथ वाक्यार्थः इति । तस्यार्थो वाक्यार्थः । एवं च पदार्थानामेव वाक्यार्थत्वेऽपि साकाङ्क्षनिराकाङ्क्षतया व्यावृत्तिसिद्धः साकाङ्क्षः पदार्थो निराकाङ्क्षो वाक्यार्थ इति । तत्रोदाहरणानि— गौरिति, गच्छतीति, गौर्गच्छतीत्यादीनि । अत्राप्याकाङ्क्षादित्रयोपेतपदोच्चारणानन्तरं श्रुतेभ्यः पदेभ्यः पदार्थाः प्रतीयन्ते । तेभ्यो वाक्यार्थप्रत्यय इति वार्तिककाराः । गुरुस्तु अर्थानामबोधकत्वात् कल्पनागौरवाच्च श्रुतानि पदानि स्वार्थान् स्मारयित्वा आकाङ्क्षादि-

---

1. H1 om. तद्यथा
4. B1 सति युक्तं for अभियुक्त°
8. B1 चार्थः for शब्दार्थः
9. H1 पयव° for अपर्यव°; H1 तु for च; B1 योगो for योग्ये°; B1 °स्वार्य° for °स्वार्थे
10. B1 एतेन for एते
13. B1 om. तस्यार्थो वाक्यार्थः
14. H1 °निराकाङ्क्षतयोर्वृत्ति° for °निराकाङ्क्षतया व्यावृत्ति°; B1 om. वाक्यार्थ इति
16. B1 om. श्रुतेभ्यः
17. H1 अवबोधकत्वात् for अबोधकत्वात्; H1 कृतानि for श्रुतानि

त्रयोपेतानि वाक्यार्थप्रमितिजनकानीति वाक्यार्थभेदा इति। ते च त्रयोदशविधा वाक्यार्थाः– 'इषे त्वा' इति मन्त्रगणेषु प्रायशो दृश्यन्ते–

विध्यर्थवादयाच्ञाशीः स्तुतिप्रैषप्रवह्लिकाः ।
प्रश्नो व्याकरणं तर्कः पूर्ववृत्तानुकीर्तनम् ॥
अवधारणं चोपनिषद्वाक्यार्थाः स्युस्त्रयोदश ।

तत्र तेषामुदाहरणानि। तत्र विधिः– "परमेष्ठ्यभिधीतः" (कासं ९.७.१), "अश्वस्तूपरो मृगः" (कासं २४.१.१) इत्यादि। अर्थवादः– "देवा यज्ञमतन्वत" (कासं २१.२.१) इत्याद्यनुवाकः। याच्ञा– "तनूपा अग्नेऽसि तन्वं मे पाहि" (कासं ३.३.७) इत्यादि। आशीः– "आ वो देवास ईमहे" (कासं ४.२.३) इत्यादि। स्तुतिः– "अग्निर्मूर्धा दिवः ककुत् पतिः पृथिव्याः" (कासं ३.३.२) इत्यादि। प्रैषः– "होता यक्षत् समिधाग्निम्" (कासं २३.४.१) इत्यादि। प्रवह्लिका –"इन्द्राग्नी आगतं सुतम्" (कासं ७.१३.१) इत्यादि। प्रश्नः– "कः स्विदेकाकी चरति" (कासं २५.३.६) इत्यादि। व्याकरणम्– "सूर्य एकाकी चरति" (कासं २५.३.७) इत्यादि। तर्कः– "मा गृधः कस्यस्विद्धनम्" (कासं ४०.१.१) इत्यादि। पूर्ववृत्तानुकीर्तनम्– "ओषधयः संवदन्ते" (कासं १३.६.२३) इत्यादि। अवधारणम्– "तमेव विदित्वाऽति मृत्युमेति" (कासं ३५.२.२) इत्यादि। उपनिषत्– "ईशावास्यम्" (कासं ४०.१) इत्यादि ॥

अथ व्याख्याधर्माः–

अतिरिक्तं पदं त्याज्यं हीनं वाक्ये निवेशयेत् ।
विप्रकृष्टं तु संदध्यादानुपूर्वीं च कल्पयेत् ॥
लिङ्गं धातुं विभक्तिं च योजयेच्चानुलोमतः ।
यद्यत् स्याच्छान्दसं वाक्ये तत्तत् कुर्यात् तु लौकिकम् ॥

अथैतेषामुदाहरणानि – अतिरिक्तं पदं त्याज्यमिति– "इमा नु कं भुवना सीषधाम" (कासं २७.१५.१) इत्यादौ अनर्थो निपात इति। हीनं वाक्ये निवेशयेदिति– "अस्मादन्नात्" (कासं २.६.४) इत्यत्राधस्तनमन्त्रशेषः इहाभिसंबन्धनीयः– "अस्मादन्नान्निर्भक्तः" इत्यादि।

---

1. °त्रयोपत for त्रयोपेतानि and om. वाक्यार्थ° and it trans. प्रमिति ... विधाः after त्रयोदश (L.5) B1 om. ते
2. H1 प्रयोगे for प्रायशो
6. B1 तथैतेषाम् for तत्र तेषाम्; B1 °धीयतः, H1 धीतः for हितः
9. B1 om. पृथिव्याः
10. B1 om. होता ... अग्निमित्यादि
20. H1 तत्र कुर्याच्च कारिकाम् for तत् तत् ... लौकिकम्

विप्रकृष्टं तु संदध्यादिति– “ सं रेवतीर्जगतीभिः पृच्यन्ताम् ” (तैसं १.१.८.१) इति । अत्र ‘ संपृच्यन्ताम् ’ इति व्यवहितेन संबन्धः । आनुपूर्वीं च कल्पयेत् इति – “ तं प्रत्नथा: ” (कासं ७.६.१) इत्यादौ ‘ ज्येष्ठतातिम् ’ (कासं ७.६.१) इत्याद्युत्तरार्धः पूर्वं व्याख्येयः; ‘ तं प्रत्नथा: ’ इत्यादि पश्चादिति । लिङ्गं धातुं विभक्तिं च योजयेच्चानुलोमतः इति– लिङ्गादिकं तत्र वाक्यवशात् संनमयेत् । “ पवित्रे स्थो वैष्णव्यौ ” (कासं १.४.१) इत्यत्र ‘ पवित्रे ’ इति नपुंसकलिङ्गवशात् ‘ वैष्णव्यौ ’ इति पुंलिङ्गं ‘ वैष्णव्ये ’ इति संक्रमयेत् । “ अग्रेगुवो अग्रेपुवः ” (कासं १.४.२) इत्यत्र ‘ पिबतेः ’ रूपं ‘ पवतेः ’ वेति संदेहे श्रुतितोऽत्र निर्णयः । ‘ सोमस्य राज्ञो भक्षयन्ति ’ (द्र. तैसं ६.२.११) इति व्याख्यानात् ‘ पिबतेः ’ रूपम् इति निर्णयः । “ कस्मै देवाय हविषा विधेम ” (कासं १३.७.१) इत्यादौ विभक्तिं संनमयेत् । ‘ हविषा ’ इति तृतीयाया हविरिति द्वितीयात्वेन परिणामो वाक्यबलात् । किंच यत् किंचिच्छान्दसं तत् सर्वं लौकिकैः शब्दैर्व्याख्येयमिति ॥

अथ मन्त्रः । द्रव्यदेवताप्रकाशको मन्त्रः करणानुमन्त्रणाभेदेन बहुविधः । मन्त्राणां स्वरवर्णाक्षरमात्राः प्रायेण तत्तन्मन्त्रपदव्याख्यानसमय एव ज्ञातुं शक्याः । नान्यदा ॥

अथ ऋषयः । ते परमेश्वरप्रसादात् विशिष्टकर्मजनितस्तुतिसंस्कारसंतानानुच्छित्तिधर्माणः सुप्तप्रतिबुद्धन्यायेन हिरण्यगर्भप्रभृतयः कल्पादौ सहविद्ययाऽभिव्यज्यमानाः स्मर्तारो मन्त्राणां द्रष्टार ऋषय इत्युच्यन्ते । एवं हिरण्यगर्भादिपरम्परया नित्यो वेदः । तेन वेदे पठ्यमानास्तत्र तत्र ते प्रज्ञायन्ते । तत एवं “ परमेष्ठी प्राजापत्यो यज्ञमपश्यद्दर्शपौर्णमासौ ” (शब्रा ११.१.६.१६) इति दर्शपौर्णमासद्रव्यदेवतामन्त्रादि सर्वं परमेष्ठिना दृष्टमित्यर्थः । तथा–“ दध्यङ् ह वा आथर्वणः । एतं शुक्रमेतं यज्ञं विदांचकार ” (शब्रा १४.१.१.१८) इत्युपक्रम्य–“ तदु हाश्विनोरनुश्रुतमास ”

---

1. B1 after जगतीभि ins. इति
3. B1 प्रतप्य for प्रत्नथाः
4. B1 प्रकृत्य for प्रत्नथाः and om. पश्चादिति
5. H1 संनामयेत् for संनमयेत्
6. B1 वैष्णव्येति इधातुं संक्रमयेत्; H1 वैष्णव स्वे इति संनमयेत् for वैष्णव्ये...मयेत् ।
7. H1 रूपे पवतेर्थ इति संदेहतो° for °रूपं श्रुतितो°
11. H1 om. तत् सर्वं; H1 लौकिक° for लौकिकैः
12. H1 °मन्त्र° for °मन्त्रण°
14. B1 तत्र for ते
16. H1 ते च for तेन B1 om. one तत्र
17. H1 om. ते प्र°; B1 एतं for एवं; B1 °पूर्ण° for पौर्ण°
18. B1 °पूर्ण° for °पौर्ण°

(शब्रा १४.१.१.२०) इत्यादिना प्रवर्ग्यगतानां मन्त्राणां दध्यङ्ङाथर्वणस्तु ऋषिर् [इति] अवगम्यते। " प्रजापतिः प्रथमां चितिमपश्यत् " (शब्रा ६.२.३.१०) इत्युपक्रम्य–"स हैतदेवं चितीनामार्षेयं वेद " (शब्रा ६.२.३.१०) इत्यादिना ऋषिश्च ज्ञातव्य इति दर्शयति। मन्त्रयाज्याभिधेयतया स्तुतिभाजो हविर्भाजश्च देवताः। " अग्निर्मूर्द्धा दिवः ककुत् पतिः " (कासं ३·३·२) इत्यग्निः। " इषे त्वा " (कासं १·१·१) इति शाखादेवता। सत्यज्ञानानन्दात्मको भगवान् वशीकृतमात्रो विष्णुर्लीलया जगदाकारेण विवर्तते। अत एवेश्वरेच्छया विराड्रूपस्य समष्टिरूपस्य व्यष्टिरूपस्यापि ईश्वरात्मत्वात् शाखोखाशम्योपवेषकपालेध्मोलूखलादीनामपि देवतात्वमुपपद्यते। पार्थिवत्वाविशेषेऽपि भगवदनुग्रहबलात् संनिधिविशेषवशेन शालग्रामप्रतिमादिवद्वा देवतात्वोपपत्तिः। 'यः सर्वेषु क्रतुषु तिष्ठन्' इत्यादि श्रुतेः। तथा छन्दश्चापि विज्ञेयम् – 'न ह्यच्छन्दोवित् देवतामाग्नेयीं संपदं वेद' इत्यादि श्रुतेः। तथा– " अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यति " (आब्रा १.१·६) इत्यादिश्रुत्यन्तरम् ऋष्यादित्रितयं सर्वथा ज्ञातव्यमिति दर्शयति। तथा कात्यायनाचार्योऽपि " एतान्यविदित्वा योऽधीते अनुब्रूते जपति जुहोति यजते याजयति तस्य ब्रह्म निर्वीर्यं यातयामं भवत्यथ विज्ञायैतानि योऽधीते तस्य वीर्यवदथ योऽर्थवित् तस्य वीर्यवत्तरं भवति। जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते " (कात्या-स १.१)। इति ऋषिदैवतच्छन्दांसि सर्वथा ज्ञातव्यानीत्याह। अथ स त्वध्ययनविधिपरिगृहीतत्वेन नियमाधीतानां ब्राह्मणवाक्यैस्तत्र तत्र प्रधानकर्माङ्गत्वेन विनियुक्तानाम् " इषे त्वा " इत्यादिमन्त्राणां प्रधानकर्मानुष्ठानकाले यस्यै देवतायै हविर्गृहीतं स्यात् तां ध्यायेत् वषट्करिष्यन् इत्याद्यपेक्षितदेवतास्वरूपप्रकाश्यत्वेनैव प्रधानोपकारकत्वात् सोऽपि पदपदार्थविवेकं विना नोपपद्यते। अतो वेदात्मकस्य श्रीभगवतः पूजार्थमेव

---

3. B1 ज्ञाप्यः for ज्ञातव्यः
4. H1 मन्त्राणां for मन्त्र; °B1 श्रुति° for स्तुति°
5. B1 affer °ज्ञान° ins. अनन्त
6. H1 before जगद् adds सर्व°
7. B1 before व्यष्टि° adds वा; H1 om. °उखा°
9. B1. om. वा
10. B1 अस्यापि for चापि; H1 तर्ह्यपि छन्दांसि for न ह्यच्छन्दोविद्
12. B1 आम्नायम् for स्थाणुम
18. H1 after °युक्तानाम् ins. इति
19. H1 देवतादि° for °देवता°; B1 प्रकाशत्वेन for प्रकाश्यत्वेन

तदवगमसामर्थ्याभावेऽपि ‘ मम वेद एव परमा गतिः ’ इत्यनया धिया मन्त्रपदपदार्थविवरणादौ यत्नः क्रियते ॥

अत्र च सत्यज्ञानानन्दात्मभूताद्वशीकृतमायद्ब्रह्मणः आविर्भूतोऽयं वेदकल्पतरुः, यस्तु प्रणववीजः ऋगादिस्कन्धसंयुक्तो गायत्र्यादिसारः शाकल्यादिशाखोपशाखोऽङ्गवलयो व्याहृत्यङ्घ्रिसमायुक्तो वहुविधयज्ञवल्कलोन्नीतः छन्दोब्राह्मणसंज्ञकप्रवालपल्लवः पुराणन्यायमीमांसाधर्मशास्त्रप्रसूनः ऋष्यादिहृदयभूसंस्थः सच्छायो ज्ञानगन्धश्चतुर्वर्गफलः । तस्यास्य ऋगादिशाखां भगवान् वेदव्यासो विभज्य पैलवैशम्पायनादिभ्यो ददौ । तत्रापि सर्ववेदमयात् सर्ववेदशाखाभिज्ञात् भगवतो विवस्वतो याज्ञवल्क्यः शुक्लानि यजूंष्यपि जगौ । ततस्तानि स स्वयं पञ्चदशधा विभज्य तत्तन्नाम्नीः शाखास्तत्तन्नामभ्यः शिष्येभ्यो ददौ । तथा च--जावालाः, गौधेयाः, काण्वाः, माध्यन्दिनाः, श्यामाः, शा (श्या ?)मायनीयाः, कापालाः, पिङ्गलाः, वत्साः, आवटिकाः, परमावटिकाः, पाराशर्याः, वैणेयाः, वैधेयाः, गालवाश्चेति पञ्चदश । का चेयं काण्वशाखासंहिता व्याचिख्यासिता ? तत्र “ इषे त्वा ” (कासं १.१.१) इति प्रारभ्य दर्शपौर्णमासाग्निहोत्रपशुचातुर्मास्याग्निष्टोमात्यग्निष्टोमवाजपेयराजसूयाग्निसवाग्निचयनसौत्रामण्यश्वमेधपुरुषमेधप्रवर्ग्योपनिषत्सत्रसंवद्धा मन्त्राः व्याख्येयाः । चरणव्यूहात् जाबालाः बौधायनाः काण्वाः, माध्यंदिनाः, शापेयाः, स्तापायनीयाः, कापालाः, पौण्ड्रवत्साः, आवटिकाः, परमावटिकाः, पाराशर्याः, वैनेयाः, वैधेयाः, अद्धाः (औधेयाः ?) वहुधेयाश्च प्रसिद्धाः ॥

तत्र च पूर्वं पौर्णमासमारभ्यते । यद्यपि फलवत्युत्क्रमो नास्ति, अनुष्ठानं प्रत्यनुविधाने तु दूरोत्सारित एव इति तथापि क्रमवर्तिनां वर्ण्यानां क्रमवर्तिनी वाग् इत्यवश्यंभाविनि क्रमे श्रुत्यर्थानु-

---

1. B1 भावेन for अभावेऽपि
3. H1 सत्यस्य for सत्य°; B1 after ज्ञान° ins. अनन्त°; H1 कृतात्मनो for कृतमायद्-
   B1 om. °कल्प°
4. B1 युक्तो for संयुक्तो
5. B1 सकलकल्नांगितः, for यज्ञवल्कलोन्नीत
6. H1 om. °हृदय°; B1 om. °भू°
7. H1 after °वेदमयात् ins. °शाखामयात्
8. H1 शुक्लादीनि for शुक्लानि; H1; च for सः
9. B1 om. तथा च
12. B1 प्रकृत्य for प्रारभ्य; B1 °पूर्ण° for °पौर्ण°;
13. B1 om. अत्यग्निष्टोम°; H1 om. °अग्निसव; H1 °सर्वमेधपितृमेध° for °पुरुषमेध°;
   H1 °सत्व° for °सत्र°; H1 संबन्धाः for संबद्धाः
17. H1 °वस्तुक्रमो for °वत्युत्क्रमो
18. H1 दूरोऽस्तीति त एवेति for तु ... एवेति

सारेण पौर्णमासारम्भः प्रथमः । ननु च सामर्थ्यादाधानस्य प्राक्कालता । न ह्यकृताधानः शक्नोति पौर्णमासमनुष्ठातुमिति । श्रुतिक्रमाच्च "स वै संभारान् संभरति" (शब्रा १४.१.२.१) इति । तथा च स्मृत्यनुक्रमणम्-- अग्न्याधेयमग्निहोत्रं दर्शपौर्णमासाविति । नैतदेवम् । "स वै व्रतमुपैष्यन्" (शब्रा १.१.१.१ तैसं १.६.७.२) इति श्रुतिक्रमात् पूर्वं पौर्णमासम् (? सः) । सामर्थ्याच्च । न हि पौर्णमासमनुक्त्वा साकल्येन आधानमनुविधातुं शक्यते । सन्ति तत्र दर्शपौर्णमासविधानग्राहिण्य इष्टयः । किं च-- मन्त्रक्रमात् "अग्ने व्रतपते" (कासं १.३.१) इति । दर्शस्तर्हि प्राप्नोति-- "इषे त्वा" (कासं १.१.१) इति । सत्यमेतत् । किं तु असौ दर्शः पौर्णमासपूर्वकः, दाक्षायणे च साक्षादेव मन्त्रक्रमानुग्रहः । तस्मात् पौर्णमासारम्भ एव कारणभूयस्त्वमिति । तेन पूर्णमासमारब्धमिति न कश्चिद्विरोधः ॥

तत्र "इषे त्वा" इति । "इषेत्वाऽऽदि खंब्रह्मान्तं विवस्वानपश्यत्" (का-य-स १.२) [इति] । ततः इषे त्वाऽऽदि खंब्रह्मान्तस्य विवस्वानृषिः । परमात्मा देवता । यजुश्छन्दः । विशेषतस्त्वेकादिपञ्चाक्षरपर्यन्तं दैवी गायत्री, दैव्युष्णिक्, दैवी बृहती, दैवी पङ्क्तिः । तत उपरिष्टात् गायत्र्युष्णिगनुष्टब्बृहतीपङ्क्तित्रिष्टुब्जगतीशक्वर्यतिशक्वर्यष्टिरत्यष्टिर्धृतिरतिधृतिन्यूनाधिकाक्षरयुक्ते निचृद्भुरिजौ चेतीमान्यत्रोपपन्नानि छन्दांसि । ईश्वरसमाराधने विनियोगः । अत्र इन्द्राग्न्यादिरूपेण श्रीभगवानेवोपास्यः । प्रतिपाद्यश्च स एव । "तमेतमग्निरित्यध्वर्यव उपासते यजुः" (शब्रा १०.५.२.२०) इत्यादि श्रुतेः । "सर्वे वेदा (देवा ?) यत्पदमामनन्ति" (कउ २.५) इत्यादि श्रुतेश्च । अत्र प्रतिकर्मविभागेन ब्राह्मणानुसारेण च ऋष्यादयो वेदितव्याः ।

अत्र 'इषे त्वा' इति द्वावध्यायौ । अत्र दर्शपूर्णमासमन्त्राः । ततः--"एतं परमेष्ठी प्राजापत्यो यज्ञमपश्यत् यद्दर्शपौर्णमासौ" (शब्रा ११.१.६.१६) इति श्रुतेः । तथा--"ते देवा अकामयन्त" इत्युपक्रम्य "त एतं हविर्यज्ञं ददृशुर्यद्दर्शपौर्णमासौ" (शब्रा १.७.२.२३) इति च ब्राह्मणवाक्यद्वयानुसारेण दर्शपौर्णमासमन्त्राणां परमेष्ठी प्राजापत्या देवा वा ऋषयः । अतो-

---

1. H1 प्रधान° for प्राक्°; H1 om. शक्नोति
6. H1 °विध्यन्तर° for °विधान°
9. B1 om. तेन ... आरब्धमिति
10. H1 त्वं for खं
13. B1 उपरि for उपरिष्टात्
17. B1 om. ब्राह्मणानुसारेण च
18. B1 Before दर्श° om. अत्र
20. H1 B1 एवं for एतं
21. H1 om. वा; H1 ऋषिः for ऋषयः

ऽध्यायद्वये प्रतिमन्त्रमृषिर्न वक्ष्यते। 'इषे त्वा' इत्यस्य शाखा देवता। शाखृ श्लाखृ व्याप्तौ। शाखति व्याप्नोति इति शाखा। दैव्यनुष्टुप्। शाखाच्छेदने विनियोगः। अस्मिन्नध्याये सर्वाण्येव यजूंषि, "पुरा क्रूरस्य" (कासं १.९.६) इतीमं मन्त्रं विना। अनियताक्षरत्वात् यजुषां छन्दो नास्ति। केचित् तु "दैव्येकम्" (पिंसू २.३) इत्यादि पिङ्गलपठितं छन्द इच्छन्ति। तत्पक्षे तु यजुषां छन्दस्तूक्तरीत्या चोहनीयम्। तदत्र ग्रन्थविस्तरभयान्न लिख्यते। तथा सर्वानुक्रमणिकायां पञ्चमाध्याये श्रीमत्कात्यायनेन अभिहितान्यत्र ऋष्यादीन्यभिधीयन्ते सुखप्रतिबोधनाय ॥

[अथ प्रथमः खण्डः]

तथा हि–

अथ छन्दांसि (का-य-स ५.१.१) इति ॥

श्रीमद्भगवतः सर्वज्ञस्य कात्यायनस्य कृतौ वाजसनेयसंहितासर्वानुक्रमणिकायाम्। अथ अनन्तरं छन्दांसि वक्ष्यन्त इत्यर्थः ॥१॥

तथा [हि]–

गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तिस्त्रिष्टुब्जगत्यतिजगतीशक्वर्यतिशक्वर्यष्ट्यत्यष्टिधृत्यतिधृतयः (५.१.२) इति ॥

एषां गायत्र्यादीनां शब्दानामितरेतरयोगे द्वन्द्वः ॥२॥

एतेषां गायत्र्यादीनां योगाक्षरसंख्यामाह–

चतुर्विंशत्यक्षरादीनि चतुरुत्तराणि (५.१.३) ॥ इति ॥

चतुर्विंशत्यक्षरात्मकं गायत्रीच्छन्दः उपक्रम्य चतुरुत्तराणि चतुरक्षरवृद्ध्या छन्दांसि भवन्ति। तथा हि–चतुर्विंशत्यक्षरा गायत्री। अष्टाविंशत्यक्षरा उष्णिक्। द्वात्रिंशदक्षरा अनुष्टुप्। षट्त्रिंशदक्षरा बृहती। चत्वारिंशदक्षरा पङ्क्तिः। चतुश्चत्वारिंशदक्षरा त्रिष्टुप्। अष्टाचत्वारिंशदक्षरा जगती। द्वापञ्चाशदक्षरा अतिजगती। षट्पञ्चाशदक्षरा शक्वरी। षष्ट्यक्षरा अतिशक्वरी। चतुःषष्ट्यक्षरा अष्टिः। अष्टषष्ट्यक्षरा अत्यष्टिः। द्वासप्तत्यक्षरा धृतिः। षट्सप्तत्यक्षरा अतिधृतिः ॥३॥

---

1. B1 दृश्यते for वक्ष्यते; H1 श्लाखति for शाखति
3. B1 om. इमं
5. H1 वा for च
9. B1 after अथ ins. अतः
10. B1 वाजनेयक° for वाजसनेय°
16. B1 om. योग°

अत्रापि विशेषमाह–

न्यूनाधिकेनैकेन निचृद्भुरिजौ (५.१.४) इति ॥

न्यूनेन अधिकेन च एकेनाक्षरेण इति । अनेनैकाक्षरस्य न्यूनत्वेन गायत्र्यादीनां निचृदुपपदं संज्ञान्तरं भवति। निचृद्गायत्री, निचृदुष्णिक् निचृज्जगतीत्यादि। तथा अधिकेनाक्षरेण एकस्याक्षरस्याधिक्ये सति भुरिगुपपदं संज्ञान्तरं गायत्र्यादीनां भवति। भुरिग्गायत्री भुरिगुष्णिक्, भुरिगनुष्टुबित्यादि ॥४॥

तथा हि–

द्वाभ्यां विराट्स्वराजौ (५.१.५) इति ॥

द्वाभ्यामक्षराभ्यामधिकाभ्यां स्वराडुपपदं संज्ञान्तरं भवति। स्वराड्गायत्री, स्वराडुष्णिगित्यादि । तथा द्वाभ्यामक्षराभ्यां न्यूनाभ्यां विराडुपपदं संज्ञान्तरं गायत्र्यादीनां भवति। विराड्गायत्री, विराडुष्णिगित्यादि ॥५॥

अथ न्यूनाक्षरेषु छन्दःसु गायत्र्यादिव्यवहारसिद्धये पादनिर्वाहप्रकारमाह–

पादपूरणार्थं तु क्षैप्रसंयोगैकाक्षरीभावान् व्यूहेत् (५.१.६) इति ॥

क्षैप्रसंयोगः यकारवकारसंयोगः अन्य[तर]संयोग इति वा। एकः पूर्वपरयोरित्यादिभिः संपन्नः संधिरेकाक्षरीभावः। एतान् पादपूरणान् व्यूहेत् पृथक् कुर्यात्। यकारं व्यूहेत्। "तत् सवितुर्वरेण्यम्" (कासं ३·३·२७) इत्यत्र। वकारं व्यूहेत् "द्रन्नः सर्पिरासुतिः" (कासं १२·७·५) इत्यत्र। क्वचिद्रेफमूहेत् पृथक् कुर्यात्। क्वचिद्गुणं क्वचित् पूर्वरूपं क्वचित् सवर्णदीर्घं व्यूहेदिति ॥६॥

संज्ञाविशेषविषयमाह–

आद्ये तु सप्तवर्गे पादविशेषात् संज्ञाविशेषाः (५.१.७) ॥

तुशब्दोऽत्रावधारणार्थः। आद्ये सप्तवर्गे सप्तानां छन्दसां वर्गः। स च वर्गो द्विविधः। आद्यो वर्गस्त्वेकः। द्वितीयस्तु अपरो वर्गः । आद्यस्तु गायत्र्यादिजगत्यन्तः। द्वितीयस्तु अतिजगत्याद्यतिधृत्यन्तः। तत्राद्ये सप्तवर्गे एव पादविशेषात् संज्ञाविशेषा भवन्ति, नान्यत्रेति ॥७॥

---

4. H1 after °गायत्री adds निचृत्पङ्क्तिः
14. H1 om. अन्य [तर] संयोगः
16. H1 दवने for द्रन्नः
21. H1 om. वर्गो
23. H1 after अन्यत्रेति । adds प्रतिपादयिष्यामः

ताननुक्रामन्त एवोदाहरिष्यामः (५.१.८) इति ॥

तान् पादकृतसंज्ञाविशेषान् प्रतिसूक्तमृष्यादि परिपाट्या (प्रतिपादं ?) वदन्त एवोदाहरिष्यामः ॥८॥

विराड्रूपा विराट्स्थानाश्च बहूनामपि त्रिष्टुभ एव (५.१.९) इति ॥

त्रिष्टुभश्चतुश्चत्वारिंशदक्षरत्वे प्राप्ते सति बहुभिरक्षरैरूनाः हीना अपि विराड्रूपा विराट्स्थानाश्च त्रिष्टुबधिकारोक्तास्त्रिष्टुभ एव स्युः ॥९॥

नवको वैराजस्त्रैष्टुभश्च द्वौ वा वैराजौ नवकस्त्रैष्टुभश्च विराट्स्थानैकादशिनस्त्रयोऽष्टकश्च विराड्रूपा (५.७.४) इति ॥

एवमेकोनचत्वारिंशत् चत्वारिंशत् एकचत्वारिंशत् इति पञ्चभिश्चतुर्भिस्त्रिभिरक्षरैर्हीना अप्यधिकारात् त्रिष्टुभ एवेत्यर्थः। किमर्थमिदमुच्यते ? असत्यस्मिन् योगे एकोनचत्वारिंशतो निचृत्पङ्क्तित्वं, चत्वारिंशतः पङ्क्तित्वम्, एकचत्वारिंशतो भुरिक्पङ्क्तित्वमेव स्यादिति ॥[५·७·४]॥

इत्युद्देशः (५.१.१०) इति ॥

इति-शब्दः प्रकारे। उद्देशः संक्षेपः। बहुवस्त्वे पूर्वोक्तप्रकारान्तेष्वपि तदधिकारात् तदात्मकं सर्वं छन्दः गायत्र्यादिषु अभिधीयत इत्यर्थः। तथा च श्रूयते– "न वा एकेनाक्षरेण छन्दांसि वियन्ते न द्वाभ्याम्" (ऐब्रा १·६) इति। तत्र गायत्र्यादिजगत्यन्ते प्रथमसप्तके वक्ष्यमाणं वेदितव्यम् ॥१०॥

व्यवहारलाघवाय संज्ञां करोति–

तत्र दशाक्षरैकादशाक्षरद्वादशाक्षराणां वैराजत्रैष्टुभजागता इति संज्ञाः (५.१.११) ॥

पादानामिति शेषः। अक्षरशब्दस्य प्रत्येकं पादशब्दसंबन्धः। दशाक्षरस्य पादस्य वैराज इति संज्ञा। एकादशाक्षरस्य पादस्य त्रैष्टुभ इति संज्ञा। द्वादशाक्षरस्य पादस्य जागत इति संज्ञा। "दशाक्षरा विराट्। एकादशाक्षरा त्रिष्टुप्। द्वादशाक्षरा जगती" (जैब्रा ७.१३२) इति च श्रुतिरपि पादाभिप्राया ॥११॥

---

1. H: om. तान् . (उ)दाहरिष्यामः (L. 3)
5. B1 om. त्रिष्टुभश्
6. B1 after स्थानाः ins. प्रकारः
13. प्रकारबहूनेष्वपि is corected as above
14. H1 °मतः for °धीयते
19. H1 om. पादशब्द°

अनादेशेऽष्टाक्षराः पादाः (५.१.१२) ॥

अनादेशे अक्षरसंख्यानुक्तौ तु पादोऽष्टाक्षरो भवति। तत्र पूर्वसप्तके तेन ‘ त्रिपदा गायत्री ’ इत्यादौ ऋष्टकेत्यादि सिद्धम् ॥१२॥

चतुष्पदाश्चर्चः (५.१.१३) ॥

अनादेशे अनुक्तपादसंख्या ऋचश्चतुर्भिः पादैर्युक्ता भवन्ति। तेनातिजगत्याद्यातिधृत्यन्ते उत्तरसप्तके यथाऽध्ययनं पादाक्षरसंख्याव्यवस्थेति सिद्धम् ॥१३॥

[इति प्रथम खण्डः]

[अथ द्वितिय खण्डः]

अथोदितसप्तच्छन्दांसि गायत्र्यादीनि पादविशेषाद्विशेषसंज्ञकानि भवन्ति। तानि विविच्य दर्शयति –

प्रथमं छन्दस्त्रिपदा गायत्री (५.२.१) ॥

चतुर्दशसु छन्दःसु प्रथममुद्दिष्टत्वात् प्रथमं छन्दः गायत्री। “ गायत्री छन्दसामहम् ” (भगी १०·३५) इति भगवतोक्तत्वात्। प्रथमं प्रधानम्। गायतां त्राणनाद् गायत्री। “ प्राणा वै गयास्तत् प्राणांस्तत्रे तद्यद्गयांस्तत्रे तस्माद्गायत्री नाम ” (माश १४·८·१५-७) इति। त्रिपदा पादत्रययुक्ता गायत्री। पादश्चाष्टाक्षर एव। एवं त्रिपदा चतुर्विंशत्यक्षरा गायत्री। “ समिधाग्निम् ” (कासं ३·१·१) इत्यादि ॥१॥

प्रकारान्तरमाह–

पञ्चकाश्चत्वारः षट्कश्चैकश्चतुर्थश्चतुष्को वा पदपङ्क्तिः (५.२.२) इति ॥

पञ्चाक्षराः चत्वारः पादाः, षडक्षर एकः पादः, चतुर्थः पादश्चतुरक्षरो वा। एषा पदपङ्क्तिः नाम गायत्री– “ अग्ने तमद्य ” (कासं १६·५·२६) इत्यादौ प्रसिद्धा ॥२॥

षट्सप्तैकादशा उष्णिग्गर्भा (५.२.३) ॥

षडक्षर एकः पादः, द्वितीयः सप्ताक्षरः, तृतीय एकादशाक्षरः। एते त्रयः पादा यस्याः सा उष्णिग्गर्भा नाम गायत्री– “ एभिर्नो अर्कैः ”, “ अधा ह्यग्ने ” (कासं १६·५·२८,२७) इत्याद्याः ॥३॥

---

2. B1 om. °संख्या°
4. H1 चतुःपदवर्गः। पूर्वसप्तके for चतुष्पदाश्चर्चः
6. B1 om. अक्षर°

त्रयः सप्तकाः पादनिचृत् (५.२.४)॥

सप्तकाः सप्ताक्षरास्त्रयः पादाः । यस्याः त्रयः पादा अपि प्रत्येकं सप्ताक्षराः सा पादनिचृन्नाम गायत्री । “ अभी षु णः सखीनाम् ” (कासं २९.५.१०) इत्यादि ॥४॥

मध्यमः षट्कश्चेदतिनिचृत् (५.२.५) ॥

यस्याः प्रथमः पादः सप्ताक्षरो द्वितीयः षडक्षरस्तृतीयश्च सप्ताक्षरः सा अतिनिचृन्नाम गायत्री । “ अग्ने वाक्पत्नि ” (कासं ८.६.३) इत्यादि ॥५॥

दशकश्चेद्यवमध्यमा (५.२.६) ॥

आद्यः पादः सप्ताक्षरो मध्यमः पादो दशाक्षरस्तृतीयः पादः सप्ताक्षरो यस्याः सा यवमध्यमा नाम गायत्री । “ दस्रा युवाकवः ” (कासं ३२.५.४) इत्यादि ॥६॥

यस्यास्तु षट्कसप्तकाष्टकाः सा वर्धमाना (५.२.७) ॥

यस्याः प्रथमः पादः षडक्षरः द्वितीयः पादः सप्ताक्षरः तृतीयोऽष्टाक्षरः सा वर्धमाना नाम गायत्री । “ अधि न इन्द्रैषाम् ” (कासं ३२.४.४) इत्यादि ॥७॥

विपरीता प्रतिष्ठा (५.२.८) ॥

यस्याः प्रथमोऽष्टाक्षरः पादो द्वितीयः पादः सप्ताक्षरः तृतीयः पादः षडक्षरः सा प्रतिष्ठा नाम गायत्री । “ त्वमग्ने व्रतपा असि ” (कासं ४.५.८) इति ॥८॥

द्वौ षट्कौ सप्तकश्चेति ह्रसीयसी (५.२.९) ॥

यस्याः प्रथमद्वितीयौ पादौ षडक्षरौ तृतीयश्च सप्ताक्षरः सा ह्रसीयसी नाम गायत्री । [द्र. प्रेष्ठमु प्रियाणां– ऋसं ८.१०.३.१०] इत्यादि ॥९॥

इति पादविभागेन नव गायत्र्य ईरिताः ॥

[**इति द्वितीयः खण्ड**]

[**अथ तृतीयः खण्डः**]

द्वितीयमुष्णिक् । त्रिपदान्त्यो द्वादशकः (५.३.१) ॥

उष्णिहो द्वितीयत्वम् । त्रिपदा पादत्रययुक्ता । आद्यौ पादावष्टाक्षरौ तृतीयो द्वादशाक्षरो यस्या सा उष्णिक् । “ उषस्तच्चित्रम् ” (कासं ३३.२.२) इत्याद्याः । “ अग्ने वाजस्य ” (कासं १६.५.१७) इति ॥१॥

---

2. H1 om. सप्तकाः, B1 om. यस्याः त्रयः पादाः
10. B1 damaged from सा ... सा (L. 11)
14. H1 om. पादः
19. B1 अष्टौ for नव

आद्यश्चेत् पुरउष्णिक् (५.३.२) ॥

आद्यः पादो द्वादशाक्षरः, द्वितीयतृतीयपादावष्टाक्षरौ यदि सा पुरउष्णिक् । “ अप्स्वन्तरमृतम् ” (कासं १०·२·३) इति ॥२॥

मध्यमश्चेत् ककुप् (५.३.३) ॥

आद्यतृतीयौ पादावष्टाक्षरौ, मध्यमो द्वादशाक्षरो यदि सा ककुप् नामोष्णिक् । “ भद्रो नः ” (कासं १६·५·२०) इत्याद्या ॥३॥

त्रैष्टुभजागतचतुष्काः ककुब्न्यङ्कुशिरा (५.३.४) ॥

यस्याः आद्यः पादः एकादशाक्षरो द्वितीयः पादो द्वादशाक्षरस्तृतीयः पादश्चतुरक्षरः सा ककुब्न्यङ्कुशिरोष्णिक् ॥४॥

एकादशिनोः परः षट्कस्तनुशिरा (५.३.५) ॥

यस्याः आद्यौ पादावेकादशाक्षरौ तृतीयः पादः षडक्षरः सा तनुशिरा नामोष्णिक् ॥५॥

मध्ये चेत् पिपीलिकमध्या (५.३.६) ॥

यस्याः आद्यतृतीयौ पादावेकादशाक्षरौ मध्यमः षडक्षरो यदि सा पिपीलिकमध्या नामोष्णिक् । “ अग्ने स्वाहा कृणुहि ” (कासं २९·२·१२) इत्यादि ॥६॥

आद्यः पञ्चकस्त्रयोऽष्टका साऽनुष्टुब्गर्भा (५.३.७) ॥

यस्याः आद्यः पादः पञ्चाक्षरो द्वितीयतृतीयचतुर्था अष्टाक्षराः सा अनुष्टुब्गर्भोष्णिक् । “ पितुं नु स्तोषम् ” (कासं ३३·१·२) इति ॥७॥

चतुःसप्तकोष्णिगेव (५.३.८) ॥

या सप्ताक्षरैश्चतुर्भिः पादैर्युक्ता सा उष्णिगेव । “ कश्यपस्य त्र्यायुषं जमदग्नेः ” (कासं ३.९·४) इत्यादि ॥८॥

इति पादभेदादेवमष्टा उष्णिह उक्ताः ॥

[इति तृतीयः खण्डः]

---

4. B1 after ककुप् adds नामोष्णिक्
6. B1 after नः adds ये नामस्तु; H1 एनास्मिन् सु
7. H1 शिखा for शिरा
14. B1 om. नाम
16. B1 द्वितीयस्तृतयिश्चतुर्थः
12. H1 after चतुर्भिः adds वा

[अथ चतुर्थः खण्डः]

तृतीयमनुष्टुप् चतुष्पदा (५.४.१) ॥

बृहतीपर्यन्तमनुष्टुबधिकार इति ज्ञापयितुमनुष्टुबिति । सर्वं चैवं चतुष्पदा इति । या चतुर्भिरष्टाक्षरैः पादैर्युक्ता सा अनुष्टुप्, उच्यते इति शेषः । " या ओषधीः " (कासं १३·६·१) इत्यादि ॥१॥

पञ्च पञ्चकाः षट्कश्चैको महापदपङ्क्तिः (५.४.२) ॥

यस्याः पञ्चाक्षराः पञ्च पादाः षट्क एकः पादः षडक्षरः सा महापदपङ्क्तिर्नामानुष्टुप् । " अयं ते योनिभिः " (कासं ३·३·४) इति ॥२॥

जागतावष्टकश्च कृतिः (५·४·३) ॥

यस्याः आद्यौ पादौ द्वादशाक्षरौ, तृतीयोऽष्टाक्षरः सा कृतिः नामानुष्टुप् । " चित्रावसो " (कासं ३·३·१०) इति ॥३॥

मध्ये चेदष्टकः पिपीलिकमध्या (५.४.४) ॥

यस्याः आद्यतृतीयपादौ द्वादशाक्षरौ मध्यमः पादो यद्यष्टाक्षरः सा पिपीलिकमध्यानुष्टुप् । " उपायामगृहीतोऽसि हरिरासि " (कासं ८·७·१) इत्याद्या ॥४॥

दशक एकादशको विराट् (५.४.५) ॥

जागतयोः पादयोर्मध्ये दशाक्षरः पादः एकादशाक्षरो वा यस्याः सा विराडनुष्टुप् । " एष ते रुद्र भागः " (कासं ३·८·१) इति ॥५॥

नवकयोर्मध्ये जागतः काविराट् (५·४·६) ॥

सा पिपीलिका इति केचित् पठन्ति ॥६॥

नवदशत्रयोदशैर्नष्टरूपी वर्गः (५.४.७) ॥

आद्यः पादो नवाक्षरो द्वितीयो दशाक्षरस्तृतीयस्त्रयोदशाक्षरः । एतैः पादैर्युक्ता नष्टरूप्यनुष्टुप् ॥ " रूपेण वः " (कासं ९·२·५) इति ॥७॥

---

4. B1 वेदितव्या for उच्यते
7. B1 om. नाम
9. H1 श्रुतिः for कृतिः
10. B1 यस्याम् for यस्याः
13. B1 पिपीलिका° for पिपीलिक°
16. B1 om. यस्याः
18. B1 om. काविराट्
19. H1 om. सा पिपीलिकेति
20. H1 नवक° for नव° B1 °रूपा वर्गा for °रूपी वर्गः
22. B1 रूपा for °रूपी

दशकास्त्रयो विराट् । एकादशाक्षरा वा त्रयो विराडिति कश्चित् (५.४.८) ॥

दशाक्षरा वा यस्यास्त्रयः पादा एकादशाक्षरा वा त्रयः सा विराट् । " आ प्यायध्वम् " (कासं १.१.२) इति ॥८॥

एवं पादभेदेनाष्टावनुष्टुभः ॥

[इति चतुर्थ खण्डः]

[अथ पञ्चमः खण्डः]

चतुर्थं बृहती तृतीयो द्वादशकः (५.५.१) ॥

चतुर्थं छन्दः बृहती । यस्या आद्यावष्टाक्षरौ पादौ तृतीयो द्वादशाक्षरश्चतुर्थोऽष्टाक्षरश्चेति सा बृहती । " अग्ने सम्राट् " (कासं ३.४.३) इति ॥१॥

आद्यश्चेत् पुरस्ताद्बृहती (५.५.२) ॥

यस्याः आद्यः पादो द्वादशाक्षरः द्वितीयादयस्त्रयः पादा अष्टाक्षराश्चेत् सा पुरस्ताद्बृहती । " परिमास " (?) इत्यादि ॥२॥

द्वितीयश्चेन्न्यङ्कुसारिण्युरोबृहती स्कन्धोग्रीवी वा (५.५.३) ॥

यस्या आद्योऽष्टाक्षरः पादः द्वितीयो द्वादशाक्षरस्तृतीयचतुर्थावष्टाक्षरौ । महर्षीणां मतभेदेन नामत्रयवती । पिङ्गलस्य मते न्यङ्कुसारिणी । यास्कस्य मते उरोबृहती । क्रौष्टुकेर्मते स्कन्धोग्रीवी इति नामत्रयवती (पिंसू ३.२८,२९,३०) । " आपो देवीः " (कासं १३.३.६) इति ॥३॥

अन्त्यश्चेदुपरिष्टाद्बृहती (५.५.४) ॥

यस्याः आदितस्त्रयः पादाः अष्टाक्षराश्चतुर्थो द्वादशाक्षरश्चेत् सा उपरिष्टाद्बृहती । " ऊर्ध्व ऊ षु णः " (कासं १२.४.५) इति ॥४॥

अष्टिनोर्मध्ये दशकौ विष्टारबृहती (५.५.५) ॥

अष्टिनोर्मध्ये यस्या आद्यचतुर्थौ पादौ अष्टाक्षरौ द्वितीयतृतीयौ दशाक्षरौ चेत् सा विष्टारबृहती । " सत्रस्य ऋद्धिः " (कासं ८.५२) इति ॥५॥

---

2. H1 om. वा त्रयः सा विराट्
4. H1 °भेदात् for °भेदेन
9. H1 after सा adds खलु
15. B1 om. मत°
16. H1 स्कन्ध° for स्कन्धो°
23. H1 om. सत्रस्य ऋद्धिः

त्रिजागतोर्ध्वबृहती (५.५.६) ॥

यस्याः द्वादशाक्षरास्त्रयः पादाः सा ऊर्ध्वबृहती । “ अग्नेऽअभ्यावर्तिन्नभि ” (कासं १३.१.८) इति ॥६॥

त्रयोदशिनोर्मध्येऽष्टकः पिपीलिकमध्या (५.५.७) ॥

यस्या आद्यतृतीयौ पादौ त्रयोदशाक्षरौ मध्यमोऽष्टाक्षरः पादश्चेत् सा पिपीलिकमध्या नाम बृहती । “ त्वमग्ने ” इति ॥७॥

नवकाष्टकैकादशाष्टिनो विषमपदा (५.५.८) ॥

यस्याः आद्यः पादो नवाक्षरः, द्वितीयोऽष्टाक्षरः तृतीय एकादशाक्षरश्चतुर्थोऽष्टाक्षरः सा विषमपदा नाम बृहती । “ अग्ने गृहपतेऽभिद्युम्नम् ” (कासं ३.४.४) इति ॥८॥

चतुर्णवका बृहत्येव (५.५.९) ॥

यस्याः नवाक्षराश्चत्वारः पादाः सा बृहत्येव । एवं पादभेदात् बृहत्यो नव कीर्तिताः ॥९॥

[इति पञ्चमः खण्डः]

[अथ षष्ठः खण्डः]

पञ्चमं पङ्क्तिः पञ्चपदा (५.६.१) ॥

पञ्चमं छन्दः पङ्क्तिरिति । यस्या अष्टाक्षराः पञ्च पादा सा पङ्क्तिरित्युच्यते । “ अव रुद्रम् ” (कासं ३.८.२) इति ॥१॥

अथ चतुष्पदा विराड्दशका (५.६.२) ॥

अथ चतुष्पदा पङ्क्तिरुच्यते इति शेषः । दशका दशाक्षरैश्चतुर्भिर्युक्ता सा विराट् पङ्क्तिः । “ आ विश्वतः ” (कासं १२.२.१३) इति ॥२॥

अयुजौ जागतौ सतोबृहती (५.६.३) ॥

यस्या आद्यतृतीयौ पादौ द्वादशाक्षरौ द्वितीयचतुर्थावष्टाक्षरौ सा सतोबृहती नाम पङ्क्तिः । “ इरज्यन्नग्ने ” (कासं १३.७.८) इति ॥३॥

---

2. B1 om. त्रयः पादा; B1 om. अग्ने ... इति [L.3]
4. B1 पिपीलिका° for पिपीलिक°
6. B1 om. नाम
8. B1 after अष्टाक्षरः adds पादः
9. B1 om. अग्ने ... इति
11. H1 om. एवं .. कीर्तिताः । [L. 12]
19. B1 विशेषः for शेषः; H1 B1 दशकैः for दशका

व्युजौ चेद्विपरीता (५·६·४) ॥

यस्या आद्यतृतीयावष्टाक्षरौ द्वितीयचतुर्थौ द्वादशाक्षरौ सा विपरीता नाम पङ्क्तिः ॥४॥

आद्यौ चेत् प्रस्तारपङ्क्तिः (५.६.५) ॥

यस्या आद्यौ पादौ द्वादशाक्षरौ तृतीयचतुर्थौ पादावष्टाक्षरौ सा प्रस्तारपङ्क्तिः । " ऊर्जं बिभ्रत् " (कासं ३.४.५) इति ॥५॥

परतश्चेदास्तारपङ्क्तिः (५.६.६) ॥

यस्या आद्यौ पादावष्टाक्षरौ तृतीयचतुर्थौ द्वादशाक्षरौ सा आस्तारपङ्क्तिः । " द्रापे अन्धसस्पते " (कासं १७.८.१) इति ॥६॥

मध्ये चेद्विष्टारपङ्क्तिः (५.६.७) ॥

यस्या आद्यन्तौ पादावष्टाक्षरौ द्वितीयतृतीयौ द्वादशाक्षरौ सा विष्टारपङ्क्तिः । " अग्ने तव श्रवः " (कासं १३.७.५) इति ॥७॥

आद्यन्त्यौ चेत् संस्तारपङ्क्तिः (५.६.८) ॥

यस्या आद्यन्त्यौ पादौ द्वादशाक्षरौ द्वितीयतृतीयपादावष्टाक्षरौ सा संस्तारपङ्क्तिः । " ऊर्जो नपातम् " (कासं २९.५.१२) इति ॥८॥

पादभेदादष्टौ पङ्क्तयः उक्ताः ॥

[इति षष्ठः खण्डः ।]

[अथ सप्तमः खण्डः ।]

षष्ठं त्रिष्टुप् त्रैष्टुभपदा (५.७.१) ॥

एकादशाक्षरैश्चतुर्भिः पादैर्युक्ता सा त्रिष्टुप् । " चक्षुषः पिता " (कासं १८.३.१) इति ॥१॥

द्वौ तु जागतौ यस्याः सा जागते जगती (५·७·२) ॥

यस्या द्वादशाक्षरौ पादौ द्वौ एकादशाक्षरौ च द्वौ पादौ सा जागते सूक्ते " जगती " इत्युच्यते । " त आ यजन्त " (कासं १८·३·४) इति ॥२॥

[त्रिष्टुभे त्रिष्टुब् ।] वैराजौ जागतौ चाभिसारिणी (५.७.३) ॥

यस्या आद्यौ पादौ दशाक्षरौ तृतीयचतुर्थौ द्वादशाक्षरौ सा अभिसारिणी नाम त्रिष्टुप् ॥३॥

---

6. The Motilal edition has स. अ. अन्त्यौ for परतः
12. B1 om. आद्यन्त्यौ ... संस्तारपङ्क्तिः । (L. 13); H1 आद्यन्त्ये for आद्यन्त्यौ
15. H1 ईरिताः उद्दिष्टाः for उक्ताः
22. H1 om. च

नवकौ वैराजस्त्रिष्टुभश्च द्वौ वा वैराजौ नवकस्त्रिष्टुभश्च विराट्स्थाना (५.७.४) ॥

यस्या आद्यौ पादौ नवाक्षरौ तृतीयो दशाक्षरश्चतुर्थ एकादशाक्षरः सा विराट्स्थाना । " स्वस्ति नः इन्द्रः " (कासं २७.११.६) इत्यादि । अथवा यस्या दशाक्षरौ द्वौ पादौ तृतीयश्च नवाक्षरश्चतुर्थ एकादशाक्षरः सा विराट्स्थानैव ॥४॥

एकादशिनस्त्रयोऽष्टकश्च विराड्रूपा (५.७.५) ॥

यस्या एकादशाक्षरास्त्रयः पादा अष्टाक्षरोऽन्त्यः पाद सा विराड्रूपा त्रिष्टुप् ॥५॥

द्वादशिनस्त्रयोऽष्टकश्च ज्योतिष्मती (५.७.६) ॥

यस्या द्वादशाक्षरास्त्रयः पादा एकोऽष्टाक्षरः पादः सा ज्योतिष्मती नाम त्रिष्टुप् ॥६॥

नवकयोर्मध्ये जागतौ सा विराट् (५.७.७) ॥

यस्या आद्यन्तौ पादौ नवाक्षरौ द्वितीयतृतीयपादौ द्वादशाक्षरौ सा विराड् नाम त्रिष्टुप् ॥७॥

यतोऽष्टकस्ततो ज्योतिः (५.७.८) ॥

यतः यत्रेत्यर्थः । ततस्तेन । पुरस्ताद्वा मध्ये वा उपरिष्टाद्वा यत्राष्टाक्षरः पादो युक्तस्तेन पुरस्ताज्ज्योतिः मध्ये ज्योतिरुपरिष्टाज्ज्योतिरिति चोच्यते ॥८॥

चत्वारोऽष्टका जागतश्च महाबृहती (५.७.९) ॥

यस्याश्चत्वारोऽष्टाक्षराः पादाः द्वादशाक्षर एकः पादः सा महाबृहती । " देवं बर्हिः सरस्वती " (कासं २३.६.१) इति ॥९॥

मध्ये जागतश्चेद्यवमध्या (५.७.१०) ॥

यस्या अष्टाक्षराणां पादानां मध्ये द्वादशाक्षरः पञ्चसंख्यापूरकः पादः सा यवमध्या नाम त्रिष्टुप् ॥१०॥

---

2. B1 om. सा ... °स्थाना
3. B1 from स्वस्ति .. इत्यादि after °स्थाना (L. 4); H1 om. अथवा; H1 before द्वौ adds वा
4. B1 तौ for सा;B1 om. एव
9. The Motilal edition of स. अ. om. the Sūtra 5.7.7 and the commentary thereon. [L. 11]
14. H1 उच्यते एतेऽष्टौ ज्योतिरिति वोच्यते for मध्ये ... चोच्यते
16. B1 अष्टकाः for अष्टाक्षराः

आद्यौ दशकावष्टकास्त्रयः पङ्क्त्युत्तरा विराट्पूर्वा वा (५.७.११) ॥

यस्या आद्यौ पादौ दशाक्षरौ अष्टाक्षरास्त्रयः पादाः सा पङ्क्त्युत्तरा नाम त्रिष्टुप् । विराट्पूर्वा नाम त्रिष्टुबिति [वा] ॥११॥

पादभेदात् द्वादश त्रिष्टुभ उक्ताः ॥

[इति सप्तमः खण्डः]

[अथ अष्टमः खण्डः]

सप्तमं जगती जागतपदा (५·८·१) ॥

द्वादशाक्षरैश्चतुर्भिः पादैर्युक्ता सा जगती। " युञ्जते मनः " (कासं ५.५.१) इति ॥१॥

अष्टिनस्त्रयः स्वौ च द्वौ महासतो बृहती (५·८·२) ॥

यस्या अष्टाक्षरास्त्रयः पादाः द्वौ द्वादशाक्षरौ पादौ सा महासतो नाम बृहती । " आहं पितॄन् " (कासं २१.४.७) इति ॥२॥

अष्टकौ सप्तकः षट्को दशको नवकश्च महापङ्क्तिः (५.८.३) ॥

यस्या द्वावष्टाक्षरौ आदौ अथ सप्ताक्षरः अथ षडक्षरः अथ दशाक्षरः अथ नवाक्षरः सा महापङ्क्तिः ॥३॥

षडष्टका वा महापाङ्क्तिः (५.८.४) ॥

वेति प्रकार विकल्पार्थः । यस्या अष्टाक्षराः षट् पादाः साऽपि महापङ्क्तिः । " एजतु दशमास्यः " (कासं ९.५.१) इति ॥४॥

पादभेदाच्चतस्रो जगत्य उक्ताः ॥

[इति अष्टमः खण्डः]

अन्यत्र प्रगाथं निरूपयति । प्रग्रथ्यते संमेल्यते छन्दसा छन्द इति प्रगाथः ।

" **बृहतीसतोबृहत्यौ बार्हतप्रगाथः** " **इति ।**

आदौ बृहती ततः सतोबृहती इति छन्दोद्वयं मिलितं प्रगाथं विद्यात् ।

" **ककुप् चेत पूर्वा काकुभः प्रगाथः** " **इति ।**

बृहतीस्थाने ककुप् चेत् सा काकुभः प्रगाथः ।

---

2. H1 after दशाक्षरौ Trans. सा अभिसारिणी ... नाम त्रिष्टुप्; (P. 35 L 25 to P. 36 L. 8)

13. H1 पादौ for आदौ

“ अनुष्टब्गायत्र्यौ चानुष्टुभः प्रगाथः ”

इत्यादि वेदितव्यम् । अतिजगत्याद्यतिधृत्यन्तोत्तरसप्तवर्गे अक्षरसंख्यया अतिजगत्यादिसंज्ञाविशेषा वेदितव्याः ॥

एवं श्रीभगवतः सर्वज्ञस्य कात्यायनस्याचार्यस्य
कृतेर्वाजसनेयकानुक्रमणिकायाः पञ्चमाध्यायस्य प्रतिपदविवरणमिति ॥

एवंलक्षणलक्षितानि छन्दांसि तत्तन्मन्त्रेषु विवक्षितैर्योज्यानि अक्षरसंख्यानुरूपेणेति । अतः तु “ इषे त्वा ” इत्यस्य द्विपदस्य मन्त्रस्य त्र्यक्षरत्वाद् दैव्यनुष्टुप् । श्रुत्या शाखाच्छेदने विनियुक्तः—“ तामाच्छिनत्ति ” इत्यादिकया । अतः ^{v}इषे अन्नाय ^{v}त्वा । युष्मदो द्वितीयैकवचनस्य स्थाने त्वा इति । त्वां छिनद्मीत्यध्याहारेण वाक्यसंपूर्तिः कार्या । ‘ तामाच्छिनत्ति इषे त्वा ’ इति । इष इच्छायाम् इत्यस्य क्विबन्तं इडिति रूपं वृष्ट्याद्यन्नपर्यन्तं वा इति । तत्र चतुर्थी ‘ इषे ’ इति । व्युत्पत्तिद्वारेण शब्दार्थपरिज्ञानमभ्युदयहेतुः इति श्रुतिर्दर्शयति— “ तत्प्रणीतानां प्रणीतात्वं प्रति ह तिष्ठति य एवमेतत् प्रणीतानां प्रणीतत्वं वेद ” (शब्रा १२.९.३.८) इत्यादिका । स्वरादिकमपि प्रतिमन्त्रं तत्तल्लक्षणवाक्येभ्यो ज्ञातव्यमेवम् ।

स्वरो वर्णोऽक्षरं मात्रा तत्प्रयोगोऽर्थ एव च ।
मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे ॥ (वर्णरत्नप्रदीपिका ८) इति वचनात् ॥

‘ ऊर्जे त्वा ’ इति शाखासंनमने विनियुक्तोऽयम् । ऋषिच्छन्दोदैवतमस्यापि पूर्ववत् । ‘ ऊर्ज बलप्राणनयोः ’ इत्यस्य धातोः क्विबन्तस्य रूपमूर्गिति । धातूनामनेकार्थत्वात् देवादियोग्यमन्नमूर्क् । “ ऊर्गिति वै देवाः ” (शब्रा १०.५.२.२०) इति श्रुतेः । तत्र चतुर्थी ^{v}ऊर्जे प्राणाय ^{v}त्वा शाखां त्वां संनमयामीति वाक्यशेषः । ^{v}वायवः ^{v}स्थ इति वत्सं शाखयोपस्पृशति । अस्य वायुर्देवता । दैवी बृहती छन्दः । शाखया वत्सोपस्पर्शने विनियोगः । यथा वायुर्वृष्ट्यादिद्वारेण गवामाप्यायक एवं यूयमपि प्रस्तुतिद्वारेण गवामाप्यायका भवतेत्यर्थः । वा गतिगन्धनयोः ।

---

2. H1 om. °विशेषाः
3. B1 after वेदितव्याः adds इति
4. B1 इति for एवम्
6. H1 °पूर्वेण for रूपेण
7. H1 उपपदो for द्विपदस्य; B1 देवी for दैवी
8. H1 युष्मच्छन्द° for युष्मदो
10. H1 पुष्ट्या for वृष्ट्या; B1 वा इट् for वा इति
11. H1 उपश्रुतिः, B1 इति श्रुतिः; for श्रुति
18. H1 देवैः for देवाः
19. B1 om. शाखां त्वां

वातीति वायुः । सर्वसंस्कारार्थं पूजार्थं वायव इति बहुवचनम् । अस भुवि इत्यस्य रूपं ' स्थ ' इति । तद्वत्सं मातॄणामेकां तच्छाखयोपस्पृशति । ' देवो वः सविता ' इत्ययमैन्द्रः । दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिकान्तिगतिष्वित्यस्य रूपम् । देवनादिगुणयुक्तः ^{v}देवः इति । ^{v}सविता, षूङ् प्राणिप्रसव इति । सर्वस्य प्राणिमात्रस्य प्रसवकर्ता परमेश्वरः सवितेन्द्रः युष्मदोऽन्वादेशे रूपं ^{v}वः युष्मान् पशून् । अर्पयति संगतिकर्मा । ^{v}प्रार्पयतु संगमयतु । ^{v}श्रेष्ठतमाय ^{v}कर्मणे यज्ञायेति । "यज्ञो वै श्रेष्ठतमं कर्म" (काशब्रा २.६.३.४) इति श्रुतेः प्रशस्ततमाय । कर्मणे इति तादर्थ्ये चतुर्थी । यज्ञार्थं श्रीभगवत्पूजार्थमित्यर्थः ॥ १ ॥

आ प्या॑यध्वमघ्न्या॒ इन्द्रा॑य भा॒गं प्र॒जाव॑तीरनमी॒वा अ॑य॒क्ष्माः ।
मा व॑ स्ते॒न ई॑शत॒ माघशं॑ꣳसः ॥ २ ॥

आ । प्या॒य॒ध्व॒म् । अ॒घ्न्याः । इन्द्रा॑य । भा॒गम् । प्र॒जाव॑ती॒रिति॑ प्र॒जाऽव॑तीः । अ॒न॒मी॒वाः । अ॒य॒क्ष्माः । मा । वः॒ । स्ते॒नः । ई॒श॒त॒ । मा । अ॒घशं॑ꣳस॒ इ॒त्य॒घऽशं॑ꣳसः ॥२॥ ध्रुं॥

सा– हे ^{v}अघ्न्याः गावः । गोवधस्योपपातकरूपत्वाद्धन्तुमयोग्या अघ्न्या इत्युच्यन्ते । तथाविधा यूयम् ^{v}इन्द्राय ^{v}भागम् इन्द्रदेवतामुद्दिश्य संपादयिष्यमाणदधिहेतुरूपं क्षीरम् ^{v}आप्यायध्वं सर्वास्वपि गोषु प्रभूतं कुरुत । स्फायी प्यायी वृद्धाविति धातुः । ^{v}वः युष्मान् अपहर्तुं ^{v}स्तेनः चोरः ^{v}मा ^{v}ईशत ईश्वरः समर्थो मा भूत् । कीदृशीर्युष्मान् ? ^{v}प्रजावतीः बह्वपत्याः । ^{v}अनमीवाः, अम रोग इति धातुः, कृमिदुष्टत्वादिस्वल्परोगरहिताः । ^{v}अयक्ष्माः क्षयव्याध्यादिप्रबलरोगरहिताः । ^{v}अघशꣳसाः अघेन तीव्रपापेन भक्षणादिना शंसो घातको व्याध्यादिरपि ^{v}मा हिंसको भूत् ॥२॥

आ– आ प्यायध्वम् । इन्द्रो देवता । अस्यानुष्टुप् (छन्दः) । हे ^{v}अघ्न्याः । अघ्न्याः इति गोनाम सुविदितम् । गावः सवित्रा संगमिताः सत्यः यूयमपि ^{v}इन्द्राय वि[ष्णवे] परमेश्वराय । इन्दतीतीन्द्रः । श्रीभगवान् विष्णुरेवेन्द्रः तस्मै । इन्द्रार्थे यो भागस्तं ^{v}भागम् ^{v}आप्यायध्वम् । ओप्यायी वृद्धौ । णिचो लोपः । आप्यायत । कथं भूताः ? ^{v}प्रजावतीः प्रजावत्यो जीवद्वत्साः । ^{v}अनमीवाः, अम रोगे, अमीवा सामान्यतो व्याधिः । स न विद्यते यासां तास्तथोक्ताः । ^{v}अयक्ष्माः । यक्ष्मा तु रोगाणां राजा । स न विद्यते यासां ताः । सर्वथा

---

7. H1 om. तादर्थ्ये
12. M2 om. गोवधस्य° … रूपत्वात्
13. M2 °देवताप्रीत्यर्थं for देवतामुद्दिश्य and om. संपादायिष्यमाण°; S1 C °भूतं for °रूपं
 C V1 before सर्वास्वपि add समन्ताद्वर्धयध्वम्
14. P1 M2 प्रकुरुत for कुरुत; M2 ओप्यायी for स्फायी प्यायी; P चौरो for चोरः
16. M2 om. °व्याधि°; S1 C °प्र° for °प्रबल°

रोगशून्याः । अथवा– अयनं अयः गमनम् । क्ष्मा भूः । तस्यां गमनं घासार्थं यासां ताः । अनिवारितगोप्रचारा इत्यर्थः । किं च – ‘ मा व स्तेन ईशत ’ । ^{v}वः युष्माकं ^{v}स्तेनः । अत्र व्यत्ययः । स्तेना इति चौराः । मा प्रतिषेधे । युष्माकं स्तेनाः ^{v}मा ^{v}ईशत ईशनं मा कुर्युरित्यर्थः । ^{v}मा ^{v}अघशंसः अघं पापं यः शंसति । वृकादिभिश्चाण्डालादिभिर्वा भक्षणार्थं व्यर्थं मा ईशत व्यत्ययः ॥ २ ॥

ध्रुवा अस्मिन् गोपतौ स्यात बह्वीः ।
यजमानस्य पशून् पाहि वसोः पवित्रमसि ॥ ३ ॥ (१) ॥

ध्रुवाः । अस्मिन् । गोपता इति गोपतौ । स्यात । बह्वीः ।
यजमानस्य । पशून् । पाहि । वसोः । पवित्रम् । असि ॥ गां ॥३॥(१)॥

सा– किं च यूयं ^{v}गोपतौ गवां युष्माकं पत्यौ ^{v}अस्मिन् यजमाने ^{v}ध्रुवाः शाश्वतिकाः ^{v}बह्वीः बहुविधाः ^{v}स्यात भवत ॥

नन्वध्यापकाः ‘श्रेष्ठतमाय कर्मणे’ इत्येतावत एव प्रथमकण्डिकां समापयन्ति । ‘आप्यायध्वम्’ इत्यादिना तु द्वितीयकण्डिकामारभन्ते । तयोर्भिन्नकण्डिकयोरेकमन्त्रत्वेन व्याख्यानमयुक्तमिति चेत् । नायं दोषः । माणवकानामावर्तनसौकर्याय कण्डिकाविच्छेदस्य बुद्धिमद्भिरध्यापकैः कल्पितत्वात् । यथा बह्वृचानां तत्र तत्र सूक्तमध्येऽपि वर्गविच्छेदः कल्पितः, यथा वा तैत्तिरीयकाणां वाक्यमध्येऽपि पञ्चाशत्पदसंख्यया विच्छेद आवृत्तिसौकर्याय कल्पितः, तद्वदत्राप्यवगन्तव्यम् ॥

कण्वस्त्वेतस्य मन्त्रस्य विनियोगं मन्त्रभागानां व्याख्यानं च विवक्षित्वेत्थं पठति – “अथ धेनुमुपस्पृशति देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे” इति । सोऽयं विनियोगः । “सविता वै देवानां प्रसविता । सवितृप्रसूतो यज्ञं संभरन्” इति, प्रथमभागव्याख्यानम् । “श्रेष्ठतमाय कर्मण इति । यज्ञो वै श्रेष्ठतमं कर्म । यज्ञाय हि तस्मादाह श्रेष्ठतमाय कर्मणे” इति द्वितीयभागव्याख्यानम् । “आप्यायध्वमघ्न्या इन्द्राय भागमिति । स यथैवादो देवतायै हविर्गृह्णन्नादिशत्येवमेवैतद्देवताया आदिशति

10. M2 om. बह्वीः ... स्यात (L. 11)
12. M2 om. ननु ... समापयन्ति ।
13. M2 om. कण्डिकयोर् ... °सौकर्याय (L. 14); S1 V1 °खण्डकयोर्; S1 for °कण्डिकयोर्
14. S1 C. खण्डिका° for कण्डिका°; M2 °विभेद° for विच्छेदस्य
15. M2 विभेदः for वर्गविच्छेदः; P1 M2 om. वा
16. V1 S1 कल्पते; C कल्प्यते for कल्पितः
17. P1 M2 तस्य for एतस्य, V1 om. मन्त्रभागानां ... इत्थं
19. M2 from सवितृ° ... upto उपगूहतीति is damaged and cannot be read. [P41 L. 6]
21. C यथैवादौ for यथैवादः

यथाहेन्द्राय भागम् " इति तृतीयभागव्याख्यानम्। "प्रजावतीरनमीवा अयक्ष्मा इति नात्र तिरोहितमिवास्ति " इति चतुर्थभागव्याख्यानम्। " मा व स्तेन ईशत माघशꣳस इति मा वः काश्चन नाष्ट्रा ईशतेत्येवैतदाह " इति पञ्चमभागव्याख्यानम्। नाष्ट्रा नाशकारिण्य इत्यर्थः। "ध्रुवा अस्मिन् गोपतौ स्यात बह्वीरित्यनपक्रमिण्योऽस्मिन् यजमाने बह्व्यः स्यातेत्येवैतदाह " इति षष्ठभागव्याख्यानम् (काशब्रा २.६.३.४) ॥

शाखा देवता बृहती परमेष्ठी। कात्यायनः – " यजमानस्य पशूनित्यग्न्यगारस्यान्यतरस्य पुरस्ताच्छाखामुपगूहति (काश्रौ ४.२.११) इति। हे पलाशशाखे, त्वमुन्नतप्रदेशे स्थित्वा प्रतीक्षमाणा सती 'यजमानस्य 'पशून् अरण्ये संचरतश्चोरव्याघ्रादिभयात् 'पाहि रक्ष। यद्यप्यचेतना शाखा तथापि तदभिमानिनीं देवतामुद्दिश्यैवमभिधातुं शक्यते। यथा शास्त्रज्ञा अचेतनेऽपि शालग्रामे शास्त्रदृष्ट्या विष्णुसंनिधिमभिप्रेत्य तं विष्णुं संबोध्यावाहनादीन् षोडशोपचाराननुतिष्ठन्ति। तद्वदनया शाखादेवतया रक्षितत्वादेव गावो निरुपद्रवाः सत्यः सायंकाले पुनः समागच्छन्ति। सोऽयमर्थस्तित्तिरिणा समाम्नातः– " यजमानस्य पशून् पाहीत्याह। पशूनां गोपीथाय। तस्मात् सायं पशव उपसमावर्तन्ते " (तैब्रा ३.२.१) इति। कण्वेनापि विनियोगपुरःसरं मन्त्राभिप्राय आम्नायते– " अथाहवनीयागारस्य वा गार्हपत्यागारस्य वा पूर्वार्धे उपगूहति यजमानस्य पशून् पाहीति। ब्रह्मणैवैतद्यजमानस्य पशून् गुप्तये परिददाति " (काशब्रा २.६.३.४) इति। एतद्ब्रह्मणैव एतेन मन्त्रेणैव रक्षार्थं शाखाभिमानिदेवतायै समर्पयतीत्यर्थः। कात्यायनः– " वसोः पवित्रम् इति पवित्रमस्यां बध्नाति कुशौ। त्रिवृद्वा " (काश्रौसू ४.२.१५,१६) इति। 'असि' इति मन्त्रपाठस्य शेषः। हे दर्भमय पवित्र, वसोः इन्द्रदेवताया निवासहेतोः पयसः शोधकं पवित्रमसि। अनेन मन्त्रेण तूष्णीं पवित्रं कृत्वा पर्णशाखायां बध्नीयात्। द्वौ कुशौ कुशत्रयं वा पवित्रमित्युच्यते। तदेतद्विस्पष्टं तित्तिरिणा समाम्नातम् " त्रिवृत्पलाशशाखायां दर्भमयं भवति। त्रिवृद्धि प्राणः। त्रिवृतमेव प्राणं मध्यतो यजमाने दधाति। सौम्यः पर्णः सयोनित्वाय। साक्षात् पवित्रं दर्भाः " (तैब्रा ३.२.३,४) इति। आपस्तम्बोऽपि विस्पष्टमेतदवोचत्–" त्रिवृद्दर्भमयं पवित्रं कृत्वा वसूनां पवित्रमसीति शाखायाꣳ शिथिलमवसजति मूले मूलान्यग्रेऽग्राणि न ग्रन्थिं करोति " (आपश्रौ १.६.८) इति। कण्वेन तु मन्त्र एवं व्याख्यातः– " तस्यामेव पवित्रं करोति वसोः पवित्रमसीत्येतावतैव यज्ञो वै वसुर्यज्ञस्य पवित्रमसीत्येवैतदाह " (काशब्रा २.६.३.४) इति। तस्या एव पलाशशाखाया एव संबन्धि एतावतैव पादत्रयरूपेण मन्त्रेणैव यज्ञशब्देन तदीयहविर्द्रव्यरूपं क्षीरं लक्ष्यत इत्यवगन्तव्यम् ॥३॥ (१) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे काण्वसंहितायां
प्रथमेऽध्याये प्रथमोऽनुवाकः ॥ १ ॥

---

6. C V1 S1 om. शाखा … परमेष्ठी
10. C V1 S1 संबोधन° for संबोध्य; M2 om. संबोध्य; M2 °(उ)पचारादीन् for (उ)पचारान्
12. M2 om. यजमानस्य … °पाठस्य शेषः (L. 17)
13. C V1 om. वा
16. P1 after वसोः ins. वायव्युष्णिक् परमेष्ठी
18. P1 om. कृत्वा
19. M2 om. इत्युच्यते
22. P1 om. न
27. V1 P1 प्रथम° for प्रथमे

आ— ध्रुवा अस्मिन् । ऐन्द्रयेकपदा त्रिष्टुप् । किं च [v]ध्रुवा [v]अस्मिन् [v]गोपतौ गवां पतौ युष्माकं यजमाने, ध्रुवाः शाश्वतिकाः [v]स्यात भवत । [v]बह्वीः बह्वयश्च । शाखामुपगूहति— ‘यजमानस्य’ इति । शाखा देवता बृहती । यजमानस्य [v]यजमानसंबन्धिनः [v]पशून् प्रकृतान् गोवत्सान् वत्सं वा दोहाङ्गभवान् [v]पाहि गोपाय । शाखायाः पवित्रं करोति— ‘वसोः पवित्रम्’ इति । वायव्योष्णिक् । वसोर्वासयितुर्यज्ञस्य पवित्रम् । अत्र यज्ञशब्दो यज्ञसाधनभूते पयसि । पयसः पवनं भवतीत्यर्थः ॥ ३ ॥ (१) ॥

[इति प्रथमेऽनुवाकः]

[अथ द्वितीयोऽनुवाकः]

सा— प्रथमेऽनुवाके पलाशशाखाप्रयुक्ता मन्त्रा उक्ताः। द्वितीये दोहनप्रयुक्ता मन्त्रा उच्यन्ते—

द्यौरसि पृथिव्यसि मातरिश्वनो घर्मोऽसि ।
विश्वधाः परमेण धाम्ना ॥१॥

द्यौः । असि । पृथिवी । असि । मातरिश्वनः । घर्मः । असि ।
विश्वधा इति विश्वऽधाः । परमेण । धाम्ना ॥ धं ॥ १ ॥

सा— कात्यायनः— “द्यौरसीति स्थाल्यादानम्” (काश्रौ ४.२.१९) इति । यस्यां स्थाल्यां दुग्धं क्षीरं प्रक्षिप्यते तस्याः स्वीकारार्थोऽयं मन्त्रः । तत्पाठस्तु— ‘द्यौरसि पृथिव्यसि’ इति । हे स्थालि, मृज्जलाभ्यां निष्पन्ना त्वं जलहेतुवृष्टिप्रदद्युलोकरूपा [a]असि । द्युसंबन्धात् तद्रूपत्वमस्यामुपचर्यते । तथा पृथिव्याः सकाशादुद्धृतया मृदा निष्पन्नत्वात् पृथिवीरूपत्वम् । इममेवाभिप्रायं तित्तिरिर्विस्पष्टयति— “द्यौरसि पृथिव्यसीत्याह । दिवश्च ह्येषा पृथिव्याश्च संभृता यदुखेत्येवमाह” (तैब्रा ३.२.३.२) इति ॥

---

15. P1 after पाठस्तु adds उखा देवता गायत्री
16. P1 Trans. तद्रूपत्वम् after अस्याम, (S1 V1 P1 अस्याः for अस्याम्), S1 V1 C °वर्ण्यते for °चर्यते
17. S1 C V1 °रूपा त्वम् for °रूपत्वम्
18. P1 तस्मात् for last इति; P1 after second इति ins. (on the upper margin of folio 10

a) कण्वोऽपि स उखामादत्ते द्यौरसि पृथिव्यसीत्युपस्तौत्येवैनामेतन्महयत्येवं मातरिश्वनो घर्मोऽसीति यज्ञमेवैतत्करोति यथा घर्मं प्रवृञ्ज्यादेवं प्रवृणक्ति विश्वधाः परमेण धाम्ना । दृꣳहस्व माह्वार्मा ते यज्ञपतिर्ह्वार्षीदित्यत्रैनामेतदाशिथिलामेव करोति मा ते यज्ञपतिर्ह्वार्षीदित्यह्वला मवैतद्यजमानायाशास्त इत्युक्तवान्

कात्यायनः– “ मातरिश्वन इत्यधिश्रयति ” (काश्रौ ४.२.२०) इति । तमेव विनियोगमापस्तम्बः स्पष्टीचकार– “ गार्हपत्यादुदीचोऽङ्गारान्निरुह्य मातरिश्वनो घर्मोऽसीति तेषु कुम्भीमधिश्रयति ” (आपश्रौ १.१२.१) इति । पाठस्तु- ‘ मातरिश्वनो घर्मोऽसि । विश्वधाः परमेण धाम्ना दृꣳहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ’ इति । मातर्यन्तरिक्षे श्वसिति निःश्वासचेष्टां करोतीति मातरिश्वा वायुः । घृ क्षरणदीप्त्योरिति धातुः । घर्मो दीपकः । अन्तरिक्षलोकः संचारस्थानप्रदानेन वायोर्दीपकोऽभिव्यञ्जको भवति । हे कुम्भ, तवोदरेऽप्यन्तरिक्षरूपस्यावकाशस्य वायुसंचारस्य सद्भावात् त्वमपि वायोरभिव्यञ्जकोऽसि । एतदेवाभिप्रेत्य तित्तिरिराह–“ मातरिश्वनो घर्मोऽसीत्याह । अन्तरिक्षं वै मातरिश्वनो घर्मः । एषां लोकानां विधृत्यै ” (तैब्रा ३.२.३.२) इति । पूर्वमन्त्रे ‘ द्यौरसि पृथिव्यसि ’ इति लोकद्वयरूपत्वं कुम्भस्योक्तम् । अत्र तु ‘ मातरिश्वनो घर्मोसि ’ इत्यन्यरिक्षलोकरूपत्वमुच्यते । तस्मादेषां त्रयाणां लोकानां स्वात्मनि विशेषेण धारणाय कुम्भः शक्नोतीत्यर्थः । किं च, ^{v}परमेण ^{v}धाम्ना उत्तमेन बहुक्षीरधारणसामर्थ्यरूपेण तेजसा ^{v}विश्वधाः सर्वजगद्धारकवृष्टिरूपोऽयं कुम्भः । अनेन कुम्भेन घृतं क्षीरमिन्द्रोद्देशेन हुतं सत् आदित्यद्वारेण वृष्टिः संपद्यते । तथा च स्मर्यते–

> “ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
> आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥ ” (मनुस्मृ ३.७६) इति ॥

वृष्टिरूपेण विश्वधारकत्वं तित्तिरिणा समाम्नातम्– “ विश्वधाया असि परमेण धाम्नेत्याह । वृष्टिर्वै विश्वधायाः वृष्टिमेवाव रुन्द्धे ” (तैब्रा ३.२.३.२) इति ॥ १ ॥

* * *

आ-- उखामादत्ते– ‘ द्यौरसि ’ इति । उखा देवता, गायत्री च्छन्दः । सा यद्दिवोऽवयवभूतेनोदकेन क्रियत इति । (? तेन) द्यौरित्युच्यते । यत् पृथिव्या अवयवभूतया मृदा क्रियते तेन ‘ पृथिव्यसि ’ इति स्तौति । ‘ मातरिश्वनः ’ इत्यधिश्रयति । उखा । मातरिश्वा वायुः । मातर्यन्तरिक्षे श्वसितीति मातरिश्वा । तस्य संबन्धी त्वं ^{v}घर्मः असि । त्रयो घर्मा अग्निवायुसूर्यदेवत्याः । अत्र यो घर्मो वायुदेवत्यः स त्वमिति । यतश्च त्वं वायुरतो विश्वधा असि सर्वतो (? स्य) धारयिता असि भवसि । किं च, ^{v}परमेण ^{v}धाम्ना स्वरूपेण ^{v}विश्वधा असि इति संबन्धः ॥१॥

* * *

दृꣳहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ।
वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् ॥२॥

* * *

दृꣳहस्व । मा । ह्वाः । मा । ते । यज्ञपतिरिति यज्ञऽपतिः ।
ह्वार्षीत् । वसोः । पवित्रम् । असि । शतधारमिति शतऽधारम् ।
वसोः । पवित्रम् । असि । सहस्रधारमिति सहस्रऽधारम् ॥ दृं ॥२॥

---

3. S1 C before पाठः add तत् ; P1 after पाठस्तु adds उखा देवता यजुः परमेष्ठी ।
19. S1 V1 after second इति ins उखाम्

सा– हे कुम्भ, ᵛदृंहस्व । त्वन्निष्ठस्य क्षीरस्य गलनं वारयितुं दृढो भव । अन्यथा भग्नस्य तव छिद्रेण क्षीरं गलेत् । दृह दृहि वृद्धाविति धातुर्यद्यपि वृद्ध्यर्थस्तथापि दार्ढ्ये सति भङ्गाभावेन चिरमवस्थानाद् दार्ढ्यं नाम कालवृद्धिरेव भवति । किं च, हे कुम्भ, ᵛमा ᵛह्वाः कुटिलो मा भव । ह्वृ कौटिल्य इति धातुः । यदि कुम्भः कुटिलो भवेत् तदानीं अवाङ्मुखे तिर्यङ्मुखे वा सति तत्र स्थितं क्षीरं गलेत् । अतः क्षीरधारणाय दार्ढ्यमकौटिल्यं चोच्यते । तदाह तित्तिरिः–“ दृंहस्व मा ह्वारित्याह धृत्यै ” (तैब्रा ३.२.३) इति । किं च, ᵛते ᵛयज्ञपतिः त्वत्संबन्धी यजमानो ᵛमा ᵛह्वार्षीत् कुटिलो मा भूत् । त्वन्निष्ठस्य क्षीरस्यास्कन्दनेन अनुष्ठानाविघ्न एव यजमानस्याकौटिल्यम् । तच्च त्वदीयेन दार्ढ्येन कौटिल्याभावेन च भविष्यति । कात्यायनः –“ वसोः पवित्रमिति पवित्रमस्यां करोत्युदग्वा ” (काश्रौ ४·२·२१) इति । अस्यां कुम्भ्यां स्थापनीयस्य पवित्रस्य प्रागग्रत्वं सामान्यतः प्राप्तमिति सिद्धवत्कृत्वोदगग्रत्वविकल्प उच्यते । तच्च प्रागग्रत्वं बौधायनो दर्शयति–“ तस्यां प्राचीनाग्रं शाखापवित्रं निदधाति ” (बौश्रौ १.३) इति । आपस्तम्बस्तु सायंदोहप्रातर्दोहभेदेन प्रागग्रत्वोदगग्रत्वयोर्व्यवस्थामभिप्रेत्याह– “ तस्यां प्रागग्रं शाखापवित्रमत्यादधात्युदक् प्रातः ” (आपश्रौ १·१२·३) इति । एवमेवाभिप्रायं तित्तिरिर्दर्शयति– “ प्राक् सायमधिनिदधाति । तिर्यक् प्रातः ” (तैब्रा ३·२·३.४) इति । पाठस्तु– ‘ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् ’ इति । हे शाखापवित्र, ᵛवसोः इन्द्रदेवताया निवासहेतोः पयसः ᵛपवित्रं शोधकम् ᵛअसि । पवित्रेण व्यवधाने सति क्षीरेण सह कुम्भ्यां पततां तृणपर्णादीनां प्रतिबध्यमानत्वात् पवित्रस्य क्षीरशोधकत्वम् । न च क्षीरमप्येवं प्रतिबध्यत इति शङ्कनीयम् । सूक्ष्मैः पवित्रच्छिद्रैः कुम्भ्यां पतन्तीनां क्षीरधाराणां शतसहस्रसंख्याकानां सद्भावाच्छोदकत्वमादर्तुं ‘ वसोः पवित्रम् ’ इति द्विरुक्तिः ॥ २ ॥

आ– ‘ दृंहस्व मा ह्वाः ’ इति । उखा देवता । द्विपदा गायत्री । ᵛदृंहस्व । धामानि त्रीणि भवन्ति– स्थानानि नामानि जन्मानीति च । उत्कृष्टेन ‘ घर्मोऽसि ’ इत्यादिना नाम्नाभिहिता सती आत्मानं दृंहस्व । तृहि [दृह] दृहि वृद्धाविति यद्यपि वृद्ध्यर्थोऽयं धातुस्तथापि मन्त्रेषु दृढीकरणार्थः । दृढीकुर्वित्यर्थः । ᵛमा ᵛह्वाः । ह्वृ कौटिल्ये । कौटिल्यं मा कार्षीः । दृढीभूतायामपि लुठितायां पयःस्कन्दनं भवति । तन्मा भूदित्येवम् [उच्यते । ᵛते] तव ᵛयज्ञपतिः ᵛअधिकारात् मा ह्वार्षीत् ॥

---

3. P1 S1 after च add तथा

10. P1 before तच्च (on the upper margin folio 10 b) – ins. कण्वोऽपि अथ पवित्रमधिनिदधाति तत् प्रागधिनिदध्यात् । प्राची हि देवानां दिगथो उदगधि निदध्याद् यं वाव पवित्रं योऽयं पवते एष हीमां लोकाँस्तिर्यङ् पवते तस्मादुदगेवाधि निदध्यात् सोऽधिनिदधाति वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारमिति यज्ञो वै वसुर्यज्ञस्य । पवित्रमसीत्येवैतदाह शतधारं सहस्रधारमित्युपस्तुत्यैवैन-देतन्महयत्येव इत्याह

13. P1 before तिर्यक् adds तत्प्राणापानयोः रूपम्; P1 after पाठस्तु adds वायुदेवत्या गायत्री ।

तस्यां पवित्रं निदधाति— ‘वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्’ इति । वायुदेवत्या गायत्री । ᵛवसोः संबन्धि ᵛपवित्रं पावनहेतुः । ᵛसहस्रधारम् । अभ्यासे भूयांसमर्थं मन्यन्ते । अनन्तधारमित्यर्थः ॥३॥

दे॒वस्त्वा॑ सवि॒ता पु॑नातु॒ वसोः॑ प॒वित्रे॑ण श॒तधा॑रेण ।
सु॒प्वा॒ काम॑धुक्षः ॥३॥

दे॒वः । त्वा॒ । स॒वि॒ता । पु॒ना॒तु॒ । वसोः॑ । प॒वित्रे॑ण । श॒तधा॑रे॒णेति॑ श॒तऽधा॑रेण ।
सु॒प्वेति॑ सु॒ऽप्वा॑ । काम् । अ॒धु॒क्षः॒ ॥ झं ॥३॥

सा– कात्यायनः– “देवस्त्वेत्यासिच्यमाने जपति” (काश्रौ ४.२.२३) इति । पाठस्तु– ‘देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण । सुप्वा’ इति । दोहनादूर्ध्वं कुम्भ्यां सिच्यमान हे क्षीर, त्वां प्रेरकः ᵛदेवः पूर्वोक्तनीत्या ᵛशतधारेण ᵛवसोः ᵛपवित्रेण ᵛपुनातु शोधयतु । ᵛसुप्वा इति पवित्रविशेषणम् । सुष्ठु पुनातीति सुपूः । तस्य तृतीया ‘सुप्वा’ इति ॥

कात्यायनः – “कामधुक्ष इति प्रश्नः” (काश्रौ ४.२.२४) इति । एकस्यां गवि दुग्धायां दोग्धारं प्रत्यध्वर्युः पृच्छेत्– हे दोग्धः, विद्यमानानां गवां मध्ये ᵛकां गाम् ᵛअधुक्षः दुग्धवानसि ॥ ३ ॥

आ– पयस्यासिच्यमाने जपति– ‘देवस्त्वा सविता’ इति । पयोदेवत्या गायत्री । ᵛसविता ᵛदेवः त्वां ᵛपुनातु दोषान् पृथक् करोतु । केन ? ᵛवसोः ᵛपवित्रेण ᵛशतधारेण । वसोरग्निष्टोमयज्ञस्य संबन्धिना आविकेन पवित्रेणे [त्यर्थः] । सुष्ठु शोभनं पुनातीति सुपूः । तेन ᵛसुप्वा साधुपवनेन पवित्रेण त्वां पुनातु । ‘कामधुक्षः’ इति प्रश्नः । प्रश्नात्मिका देवता । गवां मध्ये ᵛकां गां त्वम् ᵛअधुक्षः । दुह प्रपूरणे । दुग्धवानसि ॥३॥

सा वि॒श्वायुः॒ सा वि॒श्वक॑र्मा॒ सा वि॒श्वधा॑याः ।
इन्द्र॑स्य त्वा भा॒गꣳ सोमे॒नात॑नक्मि॒ विष्णो॑ ह॒व्यꣳ र॑क्षस्व ॥४॥(२)॥

सा । वि॒श्वायु॒रिति॑ वि॒श्वऽआ॑युः । वि॒श्वक॒र्मेति॑ वि॒श्वऽक॑र्मा । वि॒श्वधा॑या॒ इति॑ वि॒श्वऽधा॑याः ।
इन्द्र॑स्य । त्वा॒ । भा॒गम् । सोमे॑न । आ । त॒न॒क्मि॒ । विष्णो॒ इति॒ विष्णो॑ । ह॒व्यम् । र॒क्ष॒स्व ॥
थीं ॥४॥(२)॥

---

8. P1 before जपति ins. दोग्ध्रा क्षीरे

11. P1 after सुपूः ins. (at the left hand margin folio 10^{b}):
भाषितपुंस्कत्वात् पवित्रविशेषणत्वेऽपि पुंस्त्वम् ।

सा–कात्यायनः – " प्रोक्ते सा विश्वायुरित्याह " (काश्रौ ४.२.२५) इति। दोग्ध्रा अमुमिति गोनाम्नि प्रोक्ते कथिते सति ' सा विश्वायुः ' इति मन्त्रमध्वर्युर्दोग्धारं प्रति ब्रूयात्। तस्य मन्त्रस्यायमर्थः– या गौस्त्वया दुग्धा मया च पृष्टा ʼसा गौर्विश्वायुःशब्देनाभिधीयते। विश्वमायुर्यस्याः इति विग्रहः। यजमानस्य संपूर्णमायुः प्रयच्छतीत्यर्थः। कात्यायनः–" एवमितरे उत्तराभ्याम् " (काश्रौ ४.२.२.६) इति। यथा प्रथमा गौः पृष्टा एवम् इतरे द्वितीयतृतीये गावौ तत्तदोहनादूर्ध्वं ' कामधुक्षः ' इति मन्त्रेण प्रष्टव्ये। दोग्ध्रा पुरुषेणोत्तरे पूर्ववद्गोनाम्नि कथिते सत्यध्वर्युरुत्तराभ्यां ' सा विश्वकर्मा सा विश्वधायाः ' इति मन्त्राभ्यां क्रमेणोत्तरं ब्रूयात्। या द्वितीया गौः ʼसा ʼविश्वकर्मा इत्युत्तरम्। क्षीरदधिनवनीताज्यैः साध्यानि विश्वानि कर्माणि यस्या गोः सन्ति सा गौः विश्वकर्मा। या तृतीया गौः ʼसा ʼविश्वधाया इति तत्प्रश्नस्योत्तरम्। डुधाञ् धारणपोषणयोरिति धातुः। क्षीरदध्यादिहविर्भुज इन्द्रादिदेवान् विश्वान् सर्वान् दधाति पुष्णातीति विश्वधा। विश्वधैव विश्वधायाः। यद्वा– धेट् पान इति धातुः। विश्वान् सर्वानिन्द्रादीन् हव्यं क्षीररूपं धापयति पाययतीति विश्वधायाः ॥

कात्यायनः– " उद्वास्यातनक्ति प्राग्घुतशेषेणेन्द्रस्य त्वा " (काश्रौ ४.२.३३) इति। कथितं क्षीरमग्नेः साकाशाद्बहिर्बहिरुत्तरत उद्वास्य मन्दोष्णे क्षीरे सायंकालीनाग्निहोत्रानन्तरवर्तिना यवागुशेषेण दधिनिष्पत्त्यर्थमातञ्चनं कुर्यात्। यवागुशेषस्यातञ्चनसाधनत्वमापस्तम्बः स्पष्टमाह – " अमावास्यायाꣳ रात्र्याꣳ स्वयं यजमानो यवाग्वाऽग्निहोत्रं जुहोति। अग्निहोत्रोच्छेषमातञ्चनार्थं निदधाति " (आपश्रौ १.११.१) इति। तित्तिरिणाप्याम्नातम्– " अग्निहोत्रोच्छेषणमभ्यातनक्ति यज्ञस्य संतत्यै " (तैसं २.५.३) इति। पाठस्तु– ' इन्द्रस्य त्वा भागꣳ सोमेनातनच्मि ' इति। हे क्षीर, ʼइन्द्रस्य ʼभागं त्वां सोमवल्लीरसेन ʼआतनच्मि। तञ्चतिधातुः कठिनीकरणार्थः। दधिनिष्पत्तये कठिनीकरोमीत्यर्थः। यद्यप्यातञ्चनहेतुर्यवागुशेषः, न तु सोमस्यापि, मनोभावनया तस्य सोमत्वं संपद्यते। यथा कश्चित् पुरुष आनुकूल्येन भावितो बन्धुर्भवति, प्रातिकूल्येन भावितः शत्रुर्भवति, यथा वा भक्ष्यं भोज्यं च विषवत्त्वेन भावितं वमनं करोति, अमृतत्वेन भावितं जीर्णं सत् बलहेतुर्भवति। तदुक्तं वासिष्ठरामायणे–

---

1. P1 after प्रोक्ते ins. गौर्देवता यजुः; V1 S1 C पूर्वोक्ते प्रष्ट्रा for दोग्ध्रा... °नाम्नि (L 2)
2. V1 S1 C om. कथिते; V1 S1 C मन्त्रेणोत्तरं दोग्धा for मन्त्रम् ... प्रति
3. V1 S1 C मया for त्वया; V1 S1 C त्वया for मया
4. P1 after उत्तराभ्याम् ins. प्रतिमन्त्रम्;
5. V1 S1 C after यथा add सा; S1 trans. प्रथमा after गौः
6. V1 S1 C दोग्धा पुरुषोऽपि for दोग्ध्रा ... अध्वर्युर्
7. V1 S1 C after गौः add त्वया पृष्टा; P1 (आ) द्यैः for (आ) ज्यैः
8. P1 after तृतीया गौः ins. त्वया पृष्टा
10. V1 S1 C om. विश्वधा। विश्वधैव
13. P1 V1 सकाशात् for साकाशाद्; P1 °होमशेषेण दध्ना for (अ) नन्तरवर्तिना
15. V1 C (उ) च्छेषेण, S1 (उ) च्छेषण for (उ) च्छेषं
17. P1 after पाठस्तु adds एन्द्रं यजुः
19. P1 before यवागु° ins. दधिशेषो
20. P1 विषत्वेन for विषवत्त्वेन
21. S1 वसिष्ठ° for वासिष्ठ°

" बन्धुत्वे भावितो बन्धुः परत्वे भावितः परः ।
विषामृतदशेवेह स्थितिर्भावनिबन्धिनी " ॥ इति ॥

तथात्रापि यवागुशेषस्य भावनया सोमत्वम् । तदेतत् तित्तिरिणा समाम्नातम्– " सोमेन त्वाऽऽतनच्मीन्द्राय दधीत्याह । सोममेवैनत् करोति " (तैब्रा ३·२·३) इति । एतावता प्रयासेन सोमत्वसंपादने प्रयोजनं च तेनैवाम्नातम्–" यो वै सोमं भक्षयित्वा । संवत्सरं सोमं न पिबति पुनर्भक्ष्योऽस्य सोमपीथो भवति । सोमः खलु वै सांनाय्यम् । य एवं विद्वान् सांनाय्यं पिबति अपुनर्भक्ष्योऽस्य सोमपीथो भवति " (तैब्रा ३·२·३) इति । मन्त्रगतस्येन्द्रसंबन्धकथनस्य सोमत्वकथनस्य च तात्पर्यं कण्वेनाम्नातम्– " स आतनक्तीन्द्रस्य त्वा भागं सोमेनातनच्मीति स यथैवादो देवतायै हविर्गृह्णन्नादिशत्येवमेवैतद्देवताया आदिशति यदाहेन्द्रस्य त्वा भागमिति सोमेनातनच्मीति स्वदत्येवैनं तत् " (काशब्रा २·६·३.११) इति ॥

कात्यायनः– " सोदकेनापिदधात्यमृन्मयेण विष्णो हव्यम् " (काश्रौ ४·२·३४) इति । 'रक्षस्व' इति मन्त्रशेषः । सर्वत्र सृष्टौ पालने संहारे च ब्रह्माविष्णुमहेश्वरा अभिमानिदेवताः । अतो विष्णुं संबोध्य हविषो रक्षा प्रार्थ्यते । पिधानपात्रस्योदकयुक्तस्याभिप्रायः कण्वेनाम्नातः– " उदन्वता कंसेन वा चमसेन वाऽमृन्मयेनापिदधाति वज्रो वा आपो वज्रमेवास्यैतदुपरिष्टादभिगोप्तारं करोति " (काशब्रा २·६·३·११) इति । अमृन्मयेनेत्यस्य मृन्मयवर्जनस्याभिप्रायस्तित्तिरिणा समाम्नातः– " न मृन्मयेनापिदध्यात् । यन्मृन्मयेनापिदध्यात् । पितृदेवत्यं स्यात् । अयस्पात्रेण वा दारुपात्रेण वाऽपिदधाति । तद्धि सदेवमुदन्वद्भवति । आपो वै रक्षोघ्नीः । रक्षसामपहत्यै " (तैब्रा ३·२·३) इति ॥ ४ ॥

इति प्रथमाध्याये द्वितीयोनुवाकः ॥ २ ॥

आ– 'अमुम्' इत्युक्ते सति ' सा विश्वायुः ' इत्यध्वर्युराह । त्रीणि गव्यानि यजूंषि । ^{v}सा गौः ^{v}विश्वायुः । विश्वस्य जगतः आयुरिति विश्वायुः । आयुषो दात्री । द्वितीयामाह– ' सा विश्वकर्मा ' इति । ^{v}सा गौः विश्वस्य जगतः कर्मकर्त्री । तृतीयामाह– ' सा विश्वधायाः ' इति । ^{v}सा गौर्विश्वस्य धाया इति । धयतेर्णिजन्तस्य सान्तं रूपम् । विश्वस्य धारयित्री । यज्ञादेव सर्वाः प्रजाः सं (? उत्) पद्यन्ते आयुर्भोजनसहिताः ॥

आतनक्ति ' इन्द्रस्य त्वा ' इति । ऐन्द्रं यजुः । ^{v}इन्द्रस्य ^{v}त्वा भागं पयः । ^{v}त्वा त्वां सोमेन दध्ना ^{v}आतनच्मि । तञ्चतिः कठिनीकरणार्थः । दधिभावमापादयामीत्यर्थः । अपिदधाति ' विष्णोः ' इति । पयोदैवतं यजुः । ^{v}विष्णो सर्वत्र व्याप्तरूप, ^{v}हव्यं हविर्भागं ^{v}रक्षस्व ॥४॥

[इति द्वितीयोऽनुवाकः]

---

3. P1 before यवागू॰ ins. दधि॰
4. S1 V1 C एतत् for एनत्
5. S1 V1 C ॰भक्ष्यस्य for ॰भक्ष्योऽस्य
19. H1 om. विश्वस्य .. विश्वायुः; H1 पात्री for दात्री
21. H1 om. यज्ञादेव ... आतनक्ति (L 23)
24. H1 om. अपिदधति; B1 ॰दधामि for ॰दधति

[अथ तृतीयोऽनुवाकः]

सा– द्वितीये दोहनमन्त्रा उक्ताः । तृतीये हविर्वापनमन्त्रा उच्यन्ते ।

अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् ।
इदमहमनृतात् सत्यमुपैमि ॥१॥

अग्ने । व्रतपत इति व्रतऽपते । व्रतम् । चरिष्यामि । तत् । शकेयम् । तत् । मे । राध्यताम् ।
इदम् । अहम् । अनृतात् । सत्यम् । उप । एमि ॥ कं ॥१॥

सा– कात्यायनः – "अपरेणाहवनीयं प्राङ्तिष्ठन्नग्निमीक्षमाणोऽप उपस्पृश्य व्रतमुपैत्यग्ने व्रतपत इदमहमिति वा" (काश्रौ २·१·११) इति । तयोर्विकल्पितयोर्मन्त्रयोः प्रथममन्त्रपाठस्तु– 'अग्ने व्रतपते व्रतं चरिष्यामि तत् ᵛशकेयं तन्मे राध्यताम्' इति । व्रतस्यानुष्ठेयस्य कर्मणः पते पालक हे ᵛअग्ने, त्वदनुज्ञया ᵛव्रतं ᵛचरिष्यामि कर्मानुष्ठास्यामि । ᵛतच्छकेयं तत्कर्मानुष्ठातुं त्वत्प्रसादात् शक्तो भूयासम् । ᵛतत् ᵛमे राध्यतां, मदीयं तत् कर्म निर्विघ्नं सत् फलपर्यन्तं साध्यताम् । एतस्य मन्त्रस्य तात्पर्यं कण्वेनाम्नातम् – "स आहवनीयमीक्षमाणो व्रतमुपैत्यग्ने व्रतपत इति व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतामित्यग्निर्वै देवानां व्रतपतिस्तस्मा एवैतद् व्रतं चरिष्यन् प्राह तस्मै निवेदयति तच्छकेयं तन्मे राध्यताम्" (काशब्रा २·१·१·२) इति । नात्र तिरोहितमिवास्तीति । तित्तिरिणाप्येतदाम्नातम्–"व्रतेन वै मेध्योऽग्निर्व्रतपतिर्ब्राह्मणो व्रतभृद्व्रतमुपैष्यन् ब्रूयादग्ने व्रतपते व्रतं चरिष्यामीत्यग्निर्वै देवानां व्रतपतिस्तस्मा एवं प्रतिप्रोच्य व्रतमालभते" (तैसं १·६·७·२) इति ॥

द्वितीयमन्त्रपाठस्तु– 'इदमहमनृतात् सत्यमुपैमि' इति । अनृतं मनुष्यजन्म, शीघ्रविनाशित्वात् । यथा बोधमात्रेण शीघ्रं निवर्तमानाः स्वप्नगजादयोऽनृता इत्युच्यन्ते, तद्वत् । सत्यं देवजन्म, बहुकालस्थायित्वात् । यथा जागरणगजादयस्तद्वत् । ᵛअहं यजमानोऽस्मात् ᵛअनृतात् मनुष्यजन्मनः उद्धृत्य ᵛसत्यं देवताशरीरम् ᵛउपैमि प्राप्नोमि । तत् ᵛसत्यम् अनुष्ठीयमानकर्मरूपेण प्रत्यक्षमिति मन्वानः ᵛइदम् इति विशिनष्टि । सत्यानृतयोर्दैवमानुषजन्मपरत्वं मन्वानः तैत्तिरीयः कंचिन्मन्त्रं स्वयमेव व्याचष्टे– "अनृतात् सत्यमुपैमि । मानुषाद्दैव्यमुपैमि । दैवीं वाचं यच्छामि" (तैब्रा १·२·१·१५) इति । कण्वेनाप्ययमर्थ आम्नातः – "द्वयं वा इदं न तृतीयमस्ति सत्यं चैवानृतं च । ततः सत्यं देवा अनृतं मनुष्याः स उपेयादिदमहमनृतात् सत्यमुपैमीति तन्मनुष्येभ्यो देवानुपावर्तते" (काशब्रा २·१·१·४) इति । अथवा लोकप्रसिद्धे एव सत्यानृते ग्रहीतव्ये । 'नानृतं वदेत्' इत्यनृतवाचो निषेधस्य कर्माचरणे श्रुतत्वात् ।

---

8. C S1 om. विकल्पितयोर्
11. C S1 मन्त्रणस्य for मन्त्रस्य
14. P1 व्रते वै for व्रतेन वै
17. P1 after °पाठस्तु adds : अग्निर्देवता त्रिष्टुप्
20. P1 om. सत्यं°
21. P1 °मनुष्य° for °मानुष°; P1 मन्त्रः for मन्त्रं
22. V1 दैवम् for दैव्यम्
23. C S1 om. ततः

सत्यवचनं प्राप्नोमीति मन्त्रार्थः। अत एव कात्यायनः–“इदमहमिति वा सत्यवादी” इति व्रतोपायनं विधाय पश्चादेवमाह–“अतः कर्माङ्गमुत्तरं सत्यवदनम्” (काश्रौ २·१·११,१३) इति। यतः सत्यवादी व्रतमुपेतवान् 'अतः कारणात् तदुत्तरे कर्मकाले यत् सत्यवदनं तत् कर्माङ्गमित्यर्थः ॥ १ ॥

आ– व्रतमुपैति–‘अग्ने व्रतपते’। अग्निदेवत्याऽनुष्टुप्। अगि रगि लगि गत्यर्थाः। अगेः रूपमग्निरिति। “अगेर्निर्नलोपश्च” (उसू ४.५१) इति निप्रत्ययान्तोऽग्निशब्दः। अग्रे नयनादप्यग्निः। तत्संबोधनम्। सर्वज्ञ हे भगवन् ᵛअग्ने ᵛव्रतपते। ᵛव्रतं कर्म विहितं सत्यादिकं ᵛचरिष्यामि। ᵛतत् च कर्तुं तव प्रसादात् ᵛशकेयम्। यथा तव प्रसादात् शक्नुयां तथा संपादयेत्यभिप्रायः। ᵛतत् व्रतं ᵛमे मम ᵛराध्यतां निरन्तरायतया फलपर्यन्तं साध्यताम्। ᵛअनृतात् असत्यात् कर्मादेरिदं त्वत्साक्षिकम्। ᵛसत्यम् ᵛउपैमि उपगच्छामि ॥१॥

कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति ।
कर्मणे वां वेषाय वाम् ।।२।।

कः। त्वा। युनक्ति। सः। कस्मै। तस्मै। कर्मणे। वाम्। वेषाय। वाम् ॥ पं ॥२॥

सा– उक्तप्रकारेण व्रतमुपेत्य ततो ब्रह्मवरणं कृत्वा तेन ब्रह्मणानुज्ञातो यज्ञपात्रप्रोक्षणार्थमपां प्रणयनं कुर्यात्। तदाह कात्यायनः–“ब्रह्मन्नपः प्रणेष्यामि यजमान वाचं यच्छेत्याह। अनुज्ञात उत्तरेणाहवनीयं संप्रति निदधाति कस्त्वा युनक्ति” (काश्रौ २·३·२,३) पाठस्तु–‘कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति’ इति। अत्र मन्त्रे प्रयुञ्जानोऽध्वर्युर्यज्ञस्यारम्भकर्म [ण्या]त्मनः कर्तृत्वमपनीय प्रजापतेर्यज्ञकर्तृत्वं प्रश्नोत्तररूपाभ्यां मन्त्रवाक्याभ्यां प्रतिपादयति। प्रणीतानामपां धारक हे पात्र, त्वां 'कः पुरुषः 'युनक्ति, आहवनीयस्योत्तरभागे स्थापयतीति प्रश्नः। तच्छब्दः प्रसिद्धार्थवाची। सर्वेषु वेदेषु जगन्निर्वाहकत्वेन प्रसिद्धो यः प्रजापतिरसि 'सः एव परमेश्वरः, हे पात्र, त्वां 'युनक्ति इत्युत्तरम्। पुनरपि 'कस्मै प्रयोजनाय त्वां 'युनक्ति इति प्रश्नः। 'तस्मै प्रजापतये तत्प्रीत्यर्थं त्वां 'युनक्ति इत्युत्तरम्। सर्वकर्मणां परमेश्वरप्रीत्यर्थं भगवद्गीतास्वर्जुनं प्रति भगवतोक्तम्–

“सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः।
मत्प्रसादादवाप्नोषि शाश्वतं पदमव्ययम् ॥ (भगी १८·५६)

---

1. V1 S1 °वादो, C °वाद° for °वाचो; C °करणे, V1 °वारणे for (आ) चरणे;
   C V1 S1 °वदनाद् for °वचनाद्; C V1 S1 °वदनं for °वचनं
6. B1 after संबोधनम् adds क्रियते एतत्; H1 after हे ins. महेश्वर
7. H1 शकेयं for शक्नुयां
9. B1 before अनृतात् adds इदं व्रतम्; B1 द्रष्टृस्त्वं for इदं त्वत्°; H1 तत् for त्वत्
16. P1 on the left hand margin writes प्रति for कर्म (आरम्भं प्रति)
18. S1 V1 C °भागं for °भागे
23. S1 C अवाप्नोति for अवाप्नोषि; V1 P1 after अव्ययम् ins. इति

यत्करोषि यदश्नासि यज्जुहोसि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ (भगी ९.२७) इति ।
ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ " (भगी ४.२४) इति च ॥

तस्य मन्त्रस्य प्रजापतिपरत्वेन व्याख्यानं कण्वेनाप्याम्नायते– " स प्रणयति कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्तीत्येताभिरनिरुक्ताभिर्व्याहृतिभिरनिरुक्तो वै प्रजापतिः प्रजापतिर्यज्ञस्तत्प्रजापतिमेवैतद्यज्ञं युनक्ति " (काशब्रा २·१·१·१०) इति । व्याहृतियुक्ताश्चतस्रो मन्त्रवाक्यरूपास्तासु किंशब्दतच्छब्दाभ्यां साधारणार्थवाचिभ्यामेव देवता व्यवह्रियते । न त्वीदृग्गुणयुक्ता नामविशेषेणानेनोपेतेति विस्पष्टं निःशेषेणोच्यते । तस्मादेवासामनिरुक्तत्वम् । एताभिर्व्याहृतिभिः प्रणयतीत्यन्वयः । व्याहृतयो यद्वदनिरुक्तास्तद्वत् प्रजापतिरप्यनिरुक्तः । चतुर्मुखाद्यवतारस्वीकारात् पूर्वं सर्वजगत्कारणभूतः प्रजापतिरीदृश इति निर्वक्तुमशक्यत्वात् । अत एव बृहदारण्यके सृष्टेः पुरा प्रजापतिरूपस्यास्पष्टत्वमाम्नातम्– " तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यामेव व्याक्रियत " (बृउ १·४·७) इति । यदा भूतभौतिकरूपसर्वजगद्विषयनामरूपाकारेण प्रजापतिस्वरूपं व्याकृतं विस्पष्टं भवति, तदानीं यज्ञरूपेणापि व्याक्रियते तत् । तथा सत्येतदेनेन मन्त्रेण प्रजापतिरूपमेव यज्ञं युनक्ति अनुतिष्ठति । तित्तिरिणाप्येतदेवाम्नातम्– " कस्त्वा युनक्ति स त्वा युनक्त्वित्याह प्रजापतिर्वै कः प्रजापतिनैवैनं युनक्ति " (तैसं १·६·८) इति । अनन्तरभावी प्रयोगः कण्वेनैवमाम्नातः– " परिस्तीर्य द्वन्द्वं पात्राण्युदाहरत्यग्निहोत्रहवणीं च शूर्पं च स्फ्यं च कपालानि च शम्यां च कृष्णाजिनं चोलूखलमुसले दृषदुपले तद्दश दशाक्षरा वै विराड्विराड्वै यज्ञो विराजमेवैतद्यज्ञमभि संपादयति " (काशब्रा २·१·२.१) इति । तित्तिरिणाप्येवमाम्नातम्– " यज्ञायुधानि संभरति यज्ञो वै यज्ञायुधानि यज्ञमेव संभरति यदेकमेकं संभरेत् पितृदेवत्यानि स्युर्यत् सह सर्वाणि मानुषाणि द्वेद्वे संभरति याज्यानुवाक्ययोरेव रूपं करोत्यथो मिथुनमेव यो वै दश यज्ञायुधानि वेद मुखतोऽस्य यज्ञः कल्पते स्फ्यश्च कपालानि चाग्निहोत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या चोलूखलं च मुसलं च दृषच्चोपला चैतानि वै दश यज्ञायुधानि " (तैसं १·६·८) इति ॥

---

2. CV1 S1 after इति add च

5. C om. °पर°; P1 व्याख्यानत्वेन for व्याख्यानं and om. कण्वेन; P1 after आम्नायते in the upper margin adds
प्रयोजनमाह काण्वः। देवान्ह वै यज्ञं तन्वानानसुररा क्षसा निररक्षुर्न यक्षध्व इति। तस्माद्रक्षाꣳसि ततो ह देवा एतं वज्रं ददृशुर्यदापो वज्रो वा आपस्तस्मद्ग्रे नयन्ति निम्नं त [...] न्नोपतिष्ठन्ते निर्दहन्ति। तत्तमुग्रञ्छꣳस्तेन नाष्ट्रादक्षाꣳस्यपहत्य तस्यामये नाष्ट्रे निवाते यज्ञमतन्वत तेऽधो वा एष यजमान इति । तथोत्तरतः सादने हेतुमाह। योषा उ वा आपा [...] ग्निर्मिथुनमेवैतत् प्रजननं क्रियत एवꣳ हि मिथुनं क्लृप्तमुत्तर [तः] स्त्री पुमांसमुपशेते तस्मादुत्तरतः सादयतीति ।

8. P1 ताः । ननु for तासु; C S1 om. °(अ)र्थ°; P1 om. तु and तादृग् for ईदृग्

14. P1 om. एतद् and एतेन for एनेन; P1 before मन्त्रेण adds वृत्तेन

18. C S1 V1 before यज्ञो add खलु वै

19. C V1 S1 आम्नाय for आम्नातम्; C V1 S1 om. सं;

20. C V1 S1 संभरेत्त्रित्रि° for संभरेत् पितृ; C V1 S1 एवं for एष

कात्यायनः –" कर्मणे वामिति शूर्पाग्निहोत्रहवण्यादाय " (काश्रौ २·३·१०) इति। पाठस्तु– 'कर्मणे वां वेषाय वाम्' इति। हे अग्निहोत्रहवणि, हे शूर्प, 'वां युवां 'कर्मणे कर्मार्थम् आदद इति शेषः। विष्लृ व्याप्ताविति धातुः। वेषो व्याप्तिः। शूर्पोचितकर्मसु व्याप्त्यर्थं 'वां युवामादद इति। शकटस्थितानां व्रीहीणां हविरर्थं शूर्पस्थाग्निहोत्रहवण्यां ग्रहणं पृथक्करणं प्रोक्षणाद्युदकधारणमित्येवमादयोऽग्निहोत्रहवण्या एव व्यापाराः। व्रीहिनिर्वापधारणमुलूखले व्रीहिप्रक्षेपः पुनरुद्धरणं चेत्यादयः शूर्पोचितव्यापाराः। कण्वेनैतन्मन्त्रव्याख्यानमाम्नायते– "सोऽग्निहोत्रहवणीं च शूर्पं चादत्ते कर्मणे वां वेषाय वामिति यज्ञो वै कर्म यज्ञाय वामित्येवैतदाह वेषाय वामिति वेवेष्टीव हि यज्ञमिति " (काशब्रा २·१·२·३) ॥ २ ॥

आ–अपः प्रणयति–' कस्त्वा युनक्ति ' इति। प्राजापत्या गायत्री। अत्राध्वर्युर्यज्ञस्यारम्भकर्मणि आत्मनः कर्तृत्वमपनीय प्रजापतेर्यज्ञकर्तृत्वमाह–' कस्त्वा ' इति। अत्र चत्वारि सर्वनामानि। तत्र प्रथमतृतीये प्रश्नभूते। द्वितीयचतुर्थे प्रतिप्रश्नभूते। ' कस्त्वा युनक्ति, ' त्वां ᵛकः ᵛयुनक्ति इति पृष्टे ' स त्वा युनक्ति ' इत्याह। हे यज्ञपते, मनुष्यः सन् यस्तु यज्ञः प्रजापतिः ᵛस त्वां ᵛयुनक्ति। ᵛकस्मै प्रयोजनाय ᵛयुनक्ति इति पृष्टे अध्वर्युराह – ᵛतस्मै ᵛत्वा ᵛयुनक्ति ' इति। सर्वजगदुत्पत्यादिकारणत्वेन यः प्रसिद्धस्तन्नाम [वाची] तच्छब्दः। अतः तस्मै यज्ञात्मने प्रजापतये। यज्ञार्थमित्यर्थः ॥

शूर्पं चाग्निहोत्रहवणीं चादत्ते–' कर्मणे वाम् ' इति। स्रुक्शूर्पदेवत्यं यजुः। ᵛकर्मणे यज्ञकर्मणे ᵛवां युवां स्रुक्शूर्पौ। अहम् ' आददे ' इति शेष.। ' वेषाय वाम् ' [इति]। विष्लृ व्याप्तावित्यस्य रूपं वेष इति। तस्मै 'वेषाय यज्ञव्याप्त्यर्थं युवाम् आदद इति च।

प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो
निष्टप्तꣳ रक्षो निष्टप्ता अरातयः। उर्वन्तरिक्षमन्वेमि ॥३॥

प्रत्युष्टमिति प्रतिऽउष्टम्। रक्षः। प्रत्युष्टा इति प्रतिऽउष्टाः। अरातयः।
निष्टप्तम्। निस्तप्तमिति निःऽतप्तम्। रक्षः। निष्टप्ताः। निस्तप्ता इति निःऽतप्ताः। अरातयः।
उरु। अन्तरिक्षम्। अनु। एमि ॥ द्रिं ॥३॥

---

1. P1 before पाठस्तु adds शूर्पस्रुक्दैवत्यं यजुः।
3. S1 V1 C om. इति
4. S1 C °हवण्यारचित° for हवण्या एव [L, 5]
8. H1 om. प्राजा...युनक्ति इति (L. 14)
11. H1 om. हे यज्ञपते...सन्
13. B1 om. अतः
15. H1 om. स्रुक्

सा– कात्यायनः– “प्रतपनं प्रत्युष्टं निष्टप्तमिति वा” (काश्रौ २.३.११) इति। पाठस्तु– ‘प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातयः’ इति। उष् दाह इति धातुः। अनेनाग्निहोत्रहवणीशूर्पयोः प्रतापनेनात्र स्थितं ^{v}रक्षः ^{v}प्रत्युष्टम्। राक्षसजातिः प्रत्येकं दग्धा। रा दान इति धातुः। हविषो दक्षिणाया वा दानं रातिः। तस्याः प्रतिबन्धकाः ^{v}अरातयः ते च ^{v}प्रत्युष्टाः प्रत्येकं दग्धाः। तप सन्ताप इति धातुः। शूर्पादौ निगूढं ^{v}रक्षः ^{v}निष्टप्तं निःशेषेण संतप्तम्। ^{v}अरातयः च ^{v}निष्टप्ताः। अनयोर्मन्त्रयोर्विकल्पः कण्वेनाम्नातः–“स प्र तपति प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातय इति वा निष्टप्तꣳ रक्षो निष्टप्ता अरातय इति वा” (काश २.१.२.४) इति। पुनरपि “देवा ह वै यज्ञं तन्वाना असुररक्षसानामासङ्गाद्बिभयां चक्रुः” (काशब्रा २.१.२.५) इत्यादिना मन्त्रतात्पर्यमाख्यातम्॥

कात्यायनः– “गच्छत्युर्वन्तरिक्षम्” (काश्रौ २.३.१२) इति। ‘अन्वेमि’ इति मन्त्रशेषः। ^{v}उरु विस्तीर्णम् ^{v}अन्तरिक्षम् अवकाशम् ^{v}अन्वेमि अनुसृत्य गच्छामि। गच्छतः पुरुषस्य पार्श्वयोरुभयोरवस्थितं रक्षः मन्त्रेणानेन निराक्रियते। तमेतमभिप्रायं कण्व आह– “उर्वन्तरिक्षमन्वेमीति प्रैत्यन्तरिक्षं वा अनु रक्षश्चरति यथाऽयं पुरुषोऽमूल उभयतः परिच्छिन्नो ब्रह्मणैवैतदुभयमनाष्ट्रमन्तरिक्षं कुरुते” (काशब्रा २.१.२.६) इति। ब्रह्मणैव मन्त्रेणैव एतदुभयं दृश्यमानं पार्श्वद्वयगतमन्तरिक्षमनाष्ट्रं नाशकरक्षोरहितं कुरुत इत्यर्थः॥ ३॥

आ– तौ प्रतपति– ‘प्रत्युष्टꣳ रक्षः’ इति। द्वे रक्षोघ्ने। ^{v}प्रत्युष्टम्। उष् दाहे। प्रतिदग्धं ^{v}रक्षः। यज्ञविघ्नकारी राक्षसः। ^{v}अरातयः। रा दाने। रातिर्दानं न विद्यते येषां ते अरातयः। दानविरोधिनश्च ^{v}प्रत्युष्टाः। अनेन च निष्टप्तम्। तप संतापे। ^{v}निष्टप्तं नितरां तप्तम्। ^{v}रक्षः ^{v}निष्टप्ताः ^{v}अरातयः च। न तु यज्ञसाधनमित्यभिप्रायः। उक्तमन्यत्। गच्छति ‘उर्वन्तरिक्षम्’ इति। ब्रह्म रक्षोघ्नं यजुः। यद्यपि रक्षोभिराकुलम् अन्तरिक्षं तथापि अनेन यजुषा तत् परिहृत्य ^{v}उरु विस्तीर्णं कृत्वा ^{v}अन्तरिक्षम् ^{v}अन्वेमि गच्छामि॥

धूर॑सि॒ धूर्व॒ धूर्व॑न्तं॒ धूर्व॒ तं यो॒ऽस्मान् धूर्व॑ति।
धूर्व॒ तं यं व॒यं धूर्वा॑मः॥४॥

धूः। अ॒सि॒। धूर्व॑। धूर्व॑न्तम्। धूर्व॑। तम्। यः। अ॒स्मान्। धूर्व॑ति।
धूर्व॑। तम्। यम्। व॒यम्। धूर्वा॑मः॥ स्युं॥४॥

---

1. V1 S1 C च for वा; P1 after पाठस्तु adds राक्षोघ्नं यजुः।
3. C S1 om. अनेन . दग्धा
5. P1 निरूढं for निगूढं
8. P1 अत्र for मन्त्र°
9. P1 before गच्छति adds ब्रह्म रक्षोघ्नं यजुः।
20. B1 उक्तहविस्तीर्णे for उरु विस्तीर्णं

सा– कात्यायनः– " श्रपणस्य पश्चादनस्तिष्ठत् समङ्कि धूरसीति धूरभिमर्शनम् " (काश्रौ २.३.१२,१३) इति । श्रपणस्य पुरोडाशपाकहेतोर्गार्हपत्यस्य पश्चादनः शकटं व्रीहियुक्तं तिष्ठति । तच्च समङ्कि समीचीनकृत्स्नाङ्गोपेतं तस्य धुरं बलीवर्दवहनयोग्यं युगप्रदेशं 'धूरसि' इति मन्त्रेण स्पृशेदित्यर्थः । बौधायनोऽप्याह – "जघनेन गार्हपत्यमग्निष्ठमनो भवति । तस्योत्तरां धुरमभिमृशति धूरसि" (बौश्रौ १.४) इति । आपस्तम्बोऽप्याह–" उर्वन्तरिक्षमन्विहीति शकटायाभिव्रजति । अपरेण गार्हपत्यं प्रागीषमुदगीषं वाऽनड्वाहयुगं शकमटवस्थितं भवति व्रीहिमद् यवमद्वा । धूरसीति दक्षिणां युगधुरमभिमृशति उत्तरां वा " (आपश्रौ १.१७.५) इति । पाठस्तु– 'धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति । धूर्व तं यं वयं धूर्वामः' इति । व्रीहिरूपहविर्धारकशकटसंबन्धिनो युगस्य बलीवर्दवहनप्रदेशे कश्चित् हिंसकोऽग्निः शास्त्रदृष्टोऽस्ति, तं प्रार्थयते । तुर्वी थुर्वी दुर्वी धुर्वी हिंसार्थाः इति धातुः । हे वह्ने, त्वं ^{v}धूः ^{v}असि हिंसकोऽसि । तस्मात् ^{v}धूर्वन्तं हिंसन्तं पाप्मानं ^{v}धूर्व विनाशय । किं च ^{v}यः राक्षसादिर्यागविघ्नेन ^{v}अस्मान् ^{v}धूर्वति हिंसितुमुद्युक्तोऽस्ति ^{v}तम् अपि ^{v}धूर्व विनाशय । ^{v}यं चालस्यादिरूपं वैरिणं ^{v}वयम् अनुष्ठातारः ^{v}धूर्वामः हिंसितुमुद्युक्ताः ^{v}तम् अपि ^{v}धूर्व विनाशय । पूर्वोक्तशकटसंबन्ध्यग्न्यतिक्रमणनिमित्तमपराधमपह्नोतुमग्न्याधारभूतस्य शकटस्य धुरमनेन मन्त्रेण स्पृशेत् । सोऽयमभिप्रायः कण्वेन मन्त्रविनियोगपुरःसरमेवमाम्नायते– " स धुरमभिमृशति धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति । धूर्व तं यं वयं धूर्वाम इत्यग्निर्वा एष धुर्यस्तमतिक्रमिष्यन् भवति तस्मा एवैतन्निह्नुतः "(काशब्रा २.१.२.१०) इति । तित्तिरिणाप्येवमाम्नातम् – " धूरसीत्याह । एष वै धुर्योऽग्निः । तं यदनुपस्पृश्यातीयात् । अध्वर्युं यजमानं च प्रदहेत् । उपस्पृश्यात्येति । अध्वर्योश्च यजमानस्य चाप्रदाहाय । धूर्व तं योऽस्मान् धूर्वति । तं धूर्व यं वयं धूर्वाम इत्याह । द्वावेव पुरुषौ । यं चैव धूर्वति । यश्चैनं धूर्वति । तावुभौ शुचाऽर्पयति " (तैब्रा ३.२.४) इति । शोकेन योजयतीत्यर्थः ॥ ४ ॥

आ– धुरमभिमृशति । 'धूरसि' इति । धूर्देवता गायत्री । अनसोऽवयवः धूः । ^{v}धूः ^{v}असि इति धुर्यमग्निं स्तौति । तुर्वी थुर्वी दुर्वी धुर्वी हिंसार्थाः । धुर्वतेर्वधकर्मणो धूर्वणक्रियानिमित्तं हि तन्नाम । अतो ब्रवीमि । धूर्वन्तमिति सामान्यतः । ^{v}धूर्वन्तं हिंसन्तं ^{v}धूर्व

---

5. P1 अन्वेहि for अन्विहि
6. P1 प्रागग्रमुदगग्रं for प्रागीषमुदगीषं;P1 om. यवमद् ; S1 व्रीहिमवद् ;
   V1 व्रीहिमंघवद् for व्रीहिमद्यववद्
7. P1 उत्तरां च for उत्तरां वा; P1 after पाठस्तु adds धूर्देवत्या गायत्री ।
9. P1 उर्वी प्युर्वी for तुर्वी थुर्वी; V1 S1 C मुर्वी for थुर्वी
10. C V1 om. किं च
11. V1 C S1 om. अस्ति; V1 S1 C वा for च
13. P1 °भूत° for °भूतस्य; P1 स्पृश्यते for स्पृशेत्
15. S1 V1 C एतम् for एष धूर्यस्तम्
16. V1 S1 C अनु° for अनुप°
18. P1 वाच for एव; P1 शुचा यं यन्ति for शुचार्पयति
21. H1 मध्यम् for धुर्यम्

त्वं हिन्धि । ᵛयः ᵛअस्मान् ᵛधूर्वति हिनस्ति ᵛतं ᵛधूर्व अस्मद्यज्ञादिविरोधिनं । ᵛयं पुरुषं ᵛवयं ᵛधूर्वामः हिंस्मः ᵛतम् अपि ᵛधूर्व ॥

दे॒वाना॑मसि॒ सस्नि॑तमं॒ वह्नि॑तमं॒ पप्रि॑तमं॒ जुष्ट॑तमं दे॒वहू॑तमम् ।
अह्रु॑तमसि हवि॒र्धानं॒ दृꣳह॑स्व॒ मा ह्वा॒र्मा ते॑ य॒ज्ञप॑तिर्ह्वार्षीत् ।। ५ ।।

दे॒वाना॑म् । अ॒सि॒ । स॒स्नि॑तम॒मिति॒ स॒स्निऽतमम् । वह्नि॑तम॒मिति॒ व॒ह्निऽतमम् ।
प॒प्रि॑तम॒मिति॒ प॒प्रिऽतमम् । जुष्ट॑तम॒मिति॒ जुष्ट॑ऽतमम् । दे॒व॒ऽहू॑तम॒मिति॑ दे॒वऽहू॑तमम् ।
अह्रु॑तम् । अ॒सि॒ । ह॒वि॒र्धान॒मिति॑ ह॒विः॒ऽधान॑म् । दृꣳह॑स्व ।
मा । ह्वाः॒ । मा । ते॒ । य॒ज्ञप॑ति॒रिति॑ य॒ज्ञऽप॑तिः । ह्वा॒र्षी॒त् ।। ञ्जै ।।५।।

सा– कात्यायनः– " देवानामित्युपस्तम्भनस्य पश्चादीषाम् " (काश्रौ २.३.१४) इति । स्पृशेति शेषः । शकटस्य दीर्घं काष्ठमीषा । तदग्रस्य भूमिस्पर्शो मा भूदित्याधारत्वेन स्थापितं काष्ठमुपस्तम्भनम् । तस्य पाश्चात्यभागे तामीषां स्पृशेत् ॥ बौधायनः–" अनोऽभिमन्त्रयते त्वं देवानाम् " (बौश्रौ १·४) इति । आपस्तम्बः– " त्वं देवानामसि सस्नितममित्युत्तरामीषामालभ्य जपति " (आपश्रौ १.१७.६) इति । पाठस्तु– ' देवानामसि सस्नितमं वह्नितमं पप्रितमं जुष्टतमं देवहूतमम् । अह्रुतमसि हविर्धानं दृꣳहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ' इति । ᵛदेवानाम् ᵛअसि अग्न्यादीनां संबन्धि भवसि । हे शकट, त्वमिति शेषः । तदेव शकटं ' सस्नितमम् ' इत्यादिना विशेष्यते । ष्णा शौचे इति धातुः । ᵛसस्नितमम् अतिशयेन शुद्धम् । यद्वा–ष्णै वेष्टने इति धातुः । दार्ढ्याय चर्मादिभिरतिशयेन वेष्टितम् । वह प्रापणे । ᵛवह्नितमं व्रीहिरूपस्य हविषोऽतिशयेन प्रापकम् । प्रा पूरण इति धातुः । ᵛपप्रितमं व्रीहिभिरतिशयेन पूरितम् । जुषी प्रीतिसेवनयोरिति धातुः । ᵛजुष्टतमं देवानामतिशयेन प्रियम् । ह्वेञ् स्पर्धायां शब्दे चेति धातुः । ᵛदेवहूतमं देवानामतिशयेनाह्वातृ । व्रीहिभिः पूर्णं शकटं दृष्ट्वा देवा आहूता इव शीघ्रमागच्छन्ति । ह्वृ कौटिल्ये इति धातुः । तस्य " ह्रु ह्वरेश्छन्दसि " (पा ७.२.३१) इति सूत्रेणोकाररेफसहित-ह्रुकारादेशः । ᵛअह्रुतम् अकुटिलम् । आरोहणेऽपि भङ्गभीतिर्नास्तीत्यर्थः । डुधाञ् धारणपोषणयोरिति धातुः । ᵛहविर्धानं व्रीहिरूपस्य हविषो धारकं पोषकं वा । ᵛअसि इत्येतत् सस्नितमादिभिः पदैः प्रत्येकं संबध्यते । ᵛदृꣳ हस्व इत्यादिकं पूर्ववद्व्याख्येयम् । कण्वः– " अथेषामभिमृशति देवानामसि सस्नितमं वह्नितमं पप्रितमं जुष्टतमं देवहूतममह्रुतमसि हविर्धानं दृꣳहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीदित्यन

---

1. H1 om. °आदि°
13. P1 after पाठस्तु adds अनोदेवत्या जगती ।
15. V1 S1 C विशिष्यते for विशेष्यते
16. P1 चर्मादिना for चर्मादिभिः
17. V1 S1 C before प्रापकम् ins प्रधान°
18. S1 C प्रियतमम् for प्रियम्
19. S1 V1 C आह्वातारम् for आह्वातृ
2.2 P1 च for वा

एवैतदुपस्तौतीति । मा ते यज्ञपतिर्ह्वार्षीदित्यह्वलामेवैतद्यजमानायाशास्ते" (काशब्रा २.१.२.११) इति । अह्वलामकौटिल्यमित्यर्थः ॥

आ– अनस उपस्तम्भनमभिमृशति ' देवानामसि ' इति । अनोदेवत्या जगती । अनः शकटम् । देवानामग्न्यादीनामनस्त्वं वह्नितममसि । वह प्रापणे । वह्निर्वोढा । तत्रापि श्रेष्ठं ᵛवह्नितमम् । ᵛसस्नितमम् । स्नौ वेष्टने । चर्मादिना वेष्टिततमम् । आवृततमं च वह्नितमम् । ५
ᵛपप्रितमम् । प्र पूरणे । हविर्द्रव्यैः पप्रितमं पूर्णतमम् । देवैः ᵛजुष्टतमम् । जुषी प्रीतिसेवनयोः । अभिप्रेततमं सेविततमम् । ᵛदेवहूतमम् । देवानाह्वयतीति देवहूः । तेषां श्रेष्ठम् । ᵛअह्रुतम् असि । "ह्रु ह्वरेश्छन्दसि" (पा ७.२.३१) इति ह्वरतेः लुठनार्थस्य ह्रु इत्यादेशः । न ह्रुतम् अह्रुतम् अलुठितं पूर्णम् असि । ᵛहविर्धानं हविषां निधानम् असि । अतः ᵛदृꣳहस्व आत्मानं दृढीकुरु । ममारुरुक्षतः अवहितो भव । " मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् " इति १०
व्याख्यातम् ॥

विष्णु॑स्त्वा क्रमतामु॒रु वा॒ता॒याप॑हत॒ꣳ रक्षो॒ यच्छ॑न्ता॒ं पञ्च॑ ।
दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे॑ऽश्विनो॑र्बा॒हुभ्यां॑ पू॒ष्णो हस्ता॑भ्याम् ॥ ६ ॥

विष्णुः॑ । त्वा॒ । क्र॒म॒ता॒म् । उ॒रु । वाता॑य । अप॑हत॒मित्यप॑ऽहतम् । रक्षः॑ । यच्छ॑न्ताम् । पञ्च॑ ।
दे॒वस्य॑ । त्वा॒ । स॒वि॒तुः । प्र॒स॒व इति॑ प्र॒ऽस॒वे । १५
अ॒श्विनोः॑ । बा॒हुभ्या॒मिति॑ बा॒हुऽभ्या॑म् । पू॒ष्णः । हस्ता॑भ्याम् ॥ णै ॥६॥

सा– कात्यायनः– " विष्णुस्त्वेत्यारोहणम् " (काश्रौ २.३.१५) इति । पाठस्तु– " विष्णुस्त्वा क्रमताम् " इति । हे शकट, विष्णुर्व्यापको यज्ञः ᵛत्वा ᵛक्रमतां त्वां पादेनाक्रम्यारोहतु । अङ्गेषु प्रधानेषु च सर्वत्रानुगतत्वाद्यज्ञेषु व्याप्तिः ।

कण्वः– " अथाधिरोहति विष्णुस्त्वा क्रमतामिति । यज्ञो वै विष्णुः स इमां देवेभ्यो विक्रान्तिं २०
विचक्रमे " (काशब्रा २.१.२.१२) इति । अग्न्यादिदेवार्थं– शकटारोहणरूपामिमां विक्रान्तिं कृतवानित्यर्थः । आपस्तम्बोऽपि विनियोगं विस्पष्टमाह– " विष्णुस्त्वाऽक्रꣳस्तेति सव्ये चक्रे दक्षिणं पादमत्याधाय " (आपश्रौसू १.१७.७) इति । ' अक्रꣳस्त ' इति शाखान्तरपाठः ॥

---

5. H1 after वह्नितमम् ins. असि
6. B1 हविषा for हविर्द्रव्यैः; H1 om. देवैः
8. H1 लवनार्थस्य for लुठनार्थस्य
17. P1 after पाठस्तु adds अनोदैवत्यं यजुः ।
22. V1 S1 C om. विनियोगं
23. P1 V1 आक्रꣳस्तेति for अक्रꣳस्तेति; P1 शाखान्तरस्य for शाखान्तर°

कात्यायनः– " वातदैवत्यं यजुः । प्रेक्षत उरु वातायेति हविष्यान् " (काश्रौ २.३.१६) इति । पुरोडाशरूपहविर्योग्यान् व्रीहीनित्यर्थः । हे शकट, 'वाताय त्वदन्तर्वर्तिव्रीहिषु वायुसंचाराय 'उरु विस्तीर्णं, भवेति शेषः । शकटस्थव्रीहीणां तृणादिभिराच्छादितत्वेन संकुचितस्थाने च वायुर्न प्रविशति तस्मादाच्छादनमपनीय वायुर्यथा प्रविशति तथा स्थानस्य संकोचं परित्यजेदित्यर्थः । अनेनैवाभिप्रायेणापस्तम्बो मन्त्रमेवमन्यथा विनियुङ्क्ते– " उरु वातायेति परीणाहमपच्छाद्य " (आपश्रौ १.१७.९) इति । परीणाहमावरकं तृणादि । यच्छकटं व्रीहीन् वहति तद्व्रीहीणामुपरितृणादिभिरावृतं भवति । तत्र वायुरूपस्य प्राणस्याप्रवेशात् प्राणरहितमिव तद्भवति । अतोऽनेन मन्त्रेण वायुरूपप्राणायावकाशः क्रियते । तदाह कण्वः – " उरु वातायेत्यनः प्रेक्षते । प्राणो वै वातः परिवृत्तमिव वा इदं यदनो ब्रह्मणैव " (काशब्रा २.१.२.१२) इति । उरु विस्तृतं 'प्राणाय वाताय करोतीति । किं च वायुप्रवेशरहितं वस्तु सर्वमपि आवरणरूपवरुणदेवताकं भवति । वरुणश्च बन्धकारित्वाद्यज्ञनिरोधकः । तन्निवृत्त्यर्थोऽयं मन्त्रः । तदाह तित्तिरिः –" यद्वै किं च वातो नाभि वाति । तत् सर्वं वरुणदेवत्यम् । उरु वातायेत्याह । अवारुणमेवैनत् करोति " (तैब्रा ३.२.४) इति ॥

कात्यायनः – " अपहतमिति निरस्यत्यन्यत् । अविद्यमानेऽभिमृशेत " (काश्रौ २.३.१७-१८) इति । यदि व्रीहिभ्योऽन्यत् तृणपर्णादिकं तत्रावतिष्ठेत् तदनेन मन्त्रेण निरस्येत् । तृणादेरभावे मन्त्रेण व्रीहीन् स्पृशेत् । पाठस्तु– ' अपहतं रक्षः ' इति । यज्ञविघातिनो रक्षसस्तृणादिषूपगूढत्वेनावस्थितिसंभवात् तृणादिकमेव रक्ष इत्युच्यते । तच्चानेन मन्त्रेण 'अपहतं निराकृतम् । तमेतमभिप्रायं कण्व आह–" अपहतं रक्ष इति । तृणं वा किंचिद्वा निरस्यति । यज्ञादेवैतन्नाष्ट्रा रक्षांस्यपहन्ति " (काशब्रा २.१.२.१२) इति ।

कात्यायनः – " यच्छन्तामित्यालभते " (काश्रौ २.३.१९) इति । अङ्गुलिदैवत्यं यजुः । पञ्चेति मन्त्रशेषः । पञ्चसंख्याका अङ्गुलयो हविर्यच्छन्ताम् । व्रीहिरूपं हविर्यच्छन्तु । पञ्चशब्दस्य अङ्गुलिविषयत्वं कण्वो दर्शयति– 'यच्छन्तां पञ्चेत्याभिनिदधाति । पाङ्क्तो वै यज्ञः पञ्चेमा अङ्गुलयो यज्ञमेवैतदत्र दधाति " (काशब्रा २.१.२.१२) इति । पञ्चसंख्याकैर्हविर्भिरुपेतत्वाद्यज्ञस्य पाङ्क्तत्वम् । अयमर्थः प्रश्नोत्तराभ्यामग्निष्टोमप्रकरणे तित्तिरिणाऽऽम्नातः –" ब्रह्मवादिनो वदन्ति नर्चा न यजुषा पङ्क्तिराप्यतेऽथ किं यज्ञस्य पाङ्क्तत्वमिति । धानाः सक्तवः परिवापः पुरोडाशः पयस्यानेन पङ्क्तिराप्यते तद्यज्ञस्य पाङ्क्तत्वम् " इति (तैसं ६.५.११) । तस्मादत्रापि पञ्चसंख्याका इमा अङ्गुलयः पाङ्क्तत्वसंपादनेनेदं हविर्यज्ञमेव संपादयन्ति । पञ्चाङ्गुलियुक्तेन मुष्टिना व्रीहीन् गृह्णीयादित्ययमर्थ उक्तो भवति । अत एवापस्तम्ब आह– " यच्छन्तां पञ्चेति मुष्टिं गृहीत्वा स्रुचि मुष्टिमोप्य " (आपश्रौ १.१७.११) इति ।

कात्यायनः–" देवस्य त्वेति गृह्णात्याग्नेयं चतुरो मुष्टीनेवमग्नीषोमीयम् । यथादेवतमन्यत् " (काश्रौसू२.३.२०.२२) इति । सावित्रं यजुः । पाठस्तु– ' देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं हविर्गृह्णामि ' इति । 'सवितुः देवस्य प्रेरकस्य परमेश्वरस्य 'प्रसवे प्रेरणे सति तेन प्रेरितोऽहमग्निदेवतायै 'जुष्टं प्रियं व्रीहिरूपं 'हविः गृह्णामि । ग्रहणसाधनयोः स्वकीयबाह्वोरश्विबाहुभावना

---

4. S1 V1 C तथातथा for तथा
14. P1 तृणादिकं for तृणपर्णादिकं
15. P1 after पाठस्तु adds राक्षोघ्नं यजुः; P1 om. उप°
18. V1 S1 C om. अङ्गुलिदैवत्यं यजुः ।
22. C भवान्ति for वदन्ति
23. C V1 S1 om. सक्तवः
28. V1 S1 C om. सावित्रं यजुः ।

कार्या । तयोऽस्तु पूषहस्तभावनेत्यभिप्रेत्य 'अश्विनोः' इत्यादिकमुक्तम्; एवम् अग्नीषोमाभ्यां व्यासक्तदेवाभ्यां जुष्टं हविर्गृह्णामि ॥

तमेतं मन्त्रं कण्वो विनियोगपूर्वकं व्याचष्टे–"स गृह्णाति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । अग्नये जुष्टं गृह्णामीति वा यथादेवतं वा" (काशब्रा२.१.२.१३) इति।सोऽयं विनियोगः। "सविता वै देवानां प्रसविता तस्मादाह देवस्य त्वा सवितुः प्रसव इति" (काशब्रा २.१.२.१३) इति। तदिदं प्रथमभागव्याख्यानम्। यः सवितृशब्दाभिधेयोऽस्ति सोऽयं देवानां मध्ये प्रसविता प्रेरको देवः। यद्वा– देवानामप्येष प्रेरकः। तस्मात् सवितृप्रसवितृप्रसव इत्युक्तिरुचितेत्यर्थः। "अश्विनोर्बाहुभ्यामित्यश्विना उ वै देवानामध्वर्यू तस्मादाह अश्विनोर्बाहुभ्यामिति" (काशब्रा २.१.२.१३) इति। तदिदं द्वितीयभागव्याख्यानम्। देवकर्तृके यागेऽश्विनोरध्वर्युत्वात् तदीयबाहुचिन्तनमस्याध्वर्योर्युक्तमित्यर्थः। "पूष्णो हस्ताभ्याम् इति पूषा वै देवानां भागदुघोऽशनं पाणिभ्यामुपनिधाता तस्मादाह पूष्णो हस्ताभ्याम्" (काशब्रा २.१.२.१३) इति। तदिदं तृतीयभागव्याख्यानम्। पूषाख्यो देवः स्वकीयपाणिभ्यां देवानामाभरणं धारणोचिते तत्र तत्र शरीरभागे भूषणं स्थापयति। तस्मात् तदीयहस्तत्वचिन्तनमुचितमित्यर्थः। अंसमणिबन्धयोर्मध्यभागो दीर्घदण्डाकारो बाहुशब्दार्थः। पञ्चाङ्गुलियुक्ताग्रभागो हस्तशब्दार्थ इति विवेकः। 'सत्यं देवा अनृतं मनुष्याः सत्येनैवैतद् गृह्णाति' इति। तदिदं पूर्वोक्तभागत्रये देवतास्मरणस्योपपादनं देवानां सत्यरूपत्वात् तदनुस्मरणेन हविर्ग्रहणरूपमनुष्ठानं फलपर्यवसायित्वात् सत्यं भवति। देवतास्मरणाभावे मनुष्याणामनृतरूपत्वात् तत्कर्तृकमनुष्ठानं फलशून्यत्वादनृतं भवतीत्यर्थः ॥६॥

आ– अन आरोहति–'विष्णुस्त्वा' इति। अत्राप्यनोदेवत्यं यजुः। ^{v}विष्णुः ^{v}त्वा त्वां शकटम् आ ^{v}क्रमताम् आरोहताम्। प्रेक्षते हविष्यान्–'उरु वाताय' इत्यादि 'हव्यं रक्षस्व' इत्यन्तम्। यजुः हव्यदैवतम्। ^{v}उरु ^{v}वाताय महद्वाताय प्राणाय त्वां करोमीति प्रेक्षते। हविर्द्रव्यं निरस्यति– 'अपहतम्' इति। हविषः सकाशात् ^{v}रक्षः ^{v}अपहतम्। हन हिंसागत्योः। अत्र गतौ वर्तते। अपगतमस्माद्धविषो रक्षः। तच्चालभते–'यच्छन्तां पञ्च' इति। यम उपरमे। हविष्यं त्वां ^{v}पञ्च पञ्चागुलयः ^{v}यच्छन्तां निबध्नन्तु। तद्गृह्णाति– 'देवस्य त्वा' इति। ^{v}देवस्य ^{v}सवितुः ^{v}प्रसवे अनुज्ञायां वर्तमानोऽहम् ^{v}अश्विनोः ^{v}बाहुभ्यां ^{v}पूष्णः ^{v}हस्ताभ्याम्; न स्वाभ्याम्। अश्विनौ हि देवानामध्वर्यू ॥६॥

अ॒ग्नये॒ जुष्टं॑ गृह्णाम्य॒ग्नीषोमा॑भ्यां॒ जुष्टं॑ गृह्णामि ।
भूताय॑ त्वा॒ नारा॑तये॒ स्व॑र॒भिविख्यैषम् ॥७॥

---

6. V1 S1 C अस्तु for अस्ति
9. V1 S1 C om. इदं
12. V1 S1 C °भागो for भागे
19. B1 प्रोक्षते for प्रेक्षते; B1 अप° for हविर्
20. H1 om. हन . रक्षः (L. 21)
23. H1 om. न स्वाभ्याम् ... अध्वर्यू [L 24]

अ॒ग्नये॑ । जुष्ट॑म् । गृ॒ह्णा॒मि॒ । अ॒ग्नीषोमा॑भ्याम् । जुष्ट॑म् । गृ॒ह्णा॒मि॒ ।
भू॒ताय॑ । त्वा॒ । न । अरा॑तये । स्वः॑ । अ॒भि॒विख्ये॑ष॒मित्य॑भि॒ऽविख्ये॑षम् ॥ कां ॥७॥

सा– " अथ यदमुष्मै जुष्टं गृह्णामीति देवताया आदिशति सर्वा वै देवता अध्वर्युं हविर्गृह्णन्तमुपतिष्ठन्ते मम नाम ग्रहीष्यति मम नाम ग्रहीष्यतीति ताभ्य एवैतत् सर्वाभ्यः सहस्वतीभ्योऽसमदं करोति " (काशब्रा २.१.२.१४) इति । तदिदम् ' अग्नये त्वा जुष्टम् ' इत्यादेश्चतुर्थभागस्य तात्पर्यम् । अमुष्मा इति नाम उपलभ्यते । अग्न्यादिनाम्ने देवतायै प्रियं हविर्यदादिशति एतत् एतेनादेशनेन सहस्वतीभ्यो वा भवतीभ्यस्ताभ्य एवाग्न्यादिभ्यः सर्वाभ्यो देवताभ्योऽसमदं सर्वासां देवतानां कलहाभावं करोति । मदेन सह वर्तत इति समदः कलहः तस्याभावोऽसमदः । यदाऽध्वर्युर्हविर्गृह्णाति, तदानीं हे अध्वर्यो, त्वं ममैव ग्रहीष्यसीति वदन्त्यः सर्वा देवतास्तमध्वर्युं सेवन्ते । तदानीं नामविशेषमनुच्चार्य हविषि गृहीते सति मदमात्सर्ययुक्तानां देवतानां परस्परं कलहो भवेत् । इदमग्न्यर्थमिदमग्नीषोमार्थमिति विशेषनामग्रहणे सति कलहो न भवतीत्यर्थः । तदेतत् सर्वं मन्त्रव्याख्यानं संगृह्य तित्तिरिराह– " देवस्य त्वा सवितुः प्रसव इत्याह प्रसूत्यै । अश्विनोर्बाहुभ्यामित्याह । अश्विनौ हि देवानामध्वर्यू आस्ताम् । पूष्णो हस्ताभ्यामित्याह यत्यै । अग्नये जुष्टं निर्वपामीत्याह । अग्नय एवैनाञ्जुष्टं निर्वपति " (तैब्रा ३·२·४) इति । एनान् व्रीहीनित्यर्थः ॥

अनोदेवत्यं यजुः । कात्यायनः – " भूताय त्वेति शेषाभिमर्शनम् " (काश्रौ २·३·२३) इति । ' नारातये ' इति मन्त्रशेषः । शकटेऽवस्थित हे व्रीहिशेष, त्वां ᵛभूताय भवनाय यागान्तराणां ब्राह्मणभोजनस्य च पुनरपि सद्भावाय परिशेषयामीति शेषः । ᵛअरातये ᵛन कर्मण्यदानाय न शेषयामि ॥

एतदेवाभिप्रेत्य कण्व आह– " स एतेन यजुषा यथापूर्वं गृहीत्वा प्रत्यभिमृशति । भूताय त्वा नारातय इति । यत एवेदꣳ हविर्गृह्णाति तदेवैतेन पुनराप्याययति " (काशब्रा २·१·२·१५) इति । एतेन पूर्वोक्तेन ' अग्नये जुष्टम्' इत्यादिना यजुषा अग्नेरग्नीषोमयोश्च क्रममनुल्लङ्घ्य हविर्गृहीत्वा शकटस्थं मन्त्रेण प्रत्यभिमृशेत् । यत एव शकटस्थात् देवतार्थं पृथक्कृत्य इदं हविः गृहीतं तदेव शकटस्थम् एतेन प्रत्यभिमर्शनेन पुनराप्याययति भूयोऽभिवर्धयतीत्यर्थः ॥

---

3. C S1 V1 अमुष्यै जुष्टं गृह्णाति for अमुष्मै जुष्टं गृह्णामीति
4. C ग्रहीष्यसि; V1 गृहीष्यासि for ग्रहीष्यति; C V1 S1 om. first मम नाम ग्रहीष्यति; V1 S1 C समदं for असमदं
6. V1 S1 C अमुष्या इति for अमुष्मा इति
7. V1 S1 C भवन्तीभ्यः for भवतीभ्यः V1 C S1 समदं for असमदं
8. C V1 S1 °भावं for °अभावं; C V1 S1 भावः समदः for अभावः असमदः
10. C om. देवतानां
13. P1 om. अग्नये जुष्टं निर्वपामीत्याह ।
15. C V1 S1 om. अनोदेवत्यं यजुः ।
17. P1 om. पुनरपि; V1 C S1 च for first न; V1 S1 C om. second न
18. P1 तेन for एतेन
19. V1 S1 C गृह्णन्ति for गृह्णाति; V1 S1 C om. इति

कात्यायनः – " स्वरिति प्राङीक्षते " (काश्रौ २·३·२४) इति । 'अभिविख्येषम्' इति मन्त्रशेषः । स्वर्गहेतुर्यज्ञः 'स्वर्' इत्यनेन पदेन विवक्ष्यते । ख्या प्रकथन इति धातुः । ᵛअभिविख्येषम् अभितो विशेषेण ख्यापयेयं, पश्येयमित्यर्थः । अनेन मन्त्रेण प्राङ्मुखो यज्ञभूमिं वीक्षते ॥

कण्वोऽप्याह– " स्वरसि विख्येषमिति प्राङ्वीक्षते परिवृतमिव वा अस्येदं चक्षुर्भवति निरुद्धमिव यज्ञ उ वै स्वरहर्देवाः सूर्योऽग्निस्तस्मादाह स्वरभिविख्येषम् " (काशब्रा २.१.२.१५) इति । शकटमारूढवतोऽस्याध्वर्योरिदं चक्षुः परितो वेष्टितमिव सर्वतो निरुद्धमिव भवति । तत्परिहाराय यज्ञभूमिः सर्वा द्रष्टव्या । यज्ञ एव स्वरादिभिः पञ्चभिः शब्दैस्तत्र तत्र विवक्ष्यते । तस्माद्यज्ञदर्शनविवक्षया 'स्वरभिविख्येषम्' इति मन्त्रं प्राहेत्यर्थः ॥

आपस्तम्बस्तु मन्त्रद्वयेन विस्पष्टमाह – " स्वरभिव्यख्यमिति प्राङ् प्रेक्षते । सुवरभिविख्येषमिति सर्वं विहारमनुवीक्षते " (आपश्रौ १.१८.३,४) इति ॥

तित्तिरिरप्याह " तमसीव वा एषोऽन्तश्चरति । यः परीणहि । सुवरभिविख्येषं वैश्वानरं ज्योतिरित्याह । सुवरेवाभि विपश्यति । वैश्वानरं ज्योतिः " (तैब्रा ३.२.४) इति ॥७॥

आ– [ताभ्याम्] अनुगृहीतः सन् ᵛअग्नये ᵛजुष्टम् । जुषी प्रीतिसेवनयोः । रुचितमभिप्रेतं ᵛगृह्णामि । एतदुक्तं भवति । 'देवस्य त्वा' इति देवेन सवित्रा प्रसूतो योऽग्निः [स भवति] सर्वेश्वरः सर्वात्मा । अतस्तस्याशनं हविष्यादिकं तद्योग्यमेव भवितुमर्हति । तच्च मनुष्येण ग्रहीतुमशक्यमतोऽहं सावित्रं प्रसवमास्थाय अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् अनुगृहीतः सन् अग्नये रुचितं हविष्यं त्वां गृह्णामि । [तथा] ᵛअग्नीषोमाभ्यां ᵛजुष्टं रुचितं त्वां ᵛगृह्णामि इत्युक्तं भवति ॥

" भूताय त्वेति शेषाऽभिमर्शनम् " (काश्रौ २·३·२३) इति । ᵛभूताय भवनाय त्वां परिशेषयामीति शेषः । ᵛन ᵛअरातये न त्वदानाय । " स्वरिति प्राङीक्षते " (काश्रौ २·३·२४) इति । स्वरिति ᵛस्वःशब्देन यज्ञोऽभिधीयते । अहर्देवाः सूर्यश्च । " यज्ञ उ वै स्वरहर्देवाः सूर्यः " (काशब्रा २·१·२·१५) इति श्रुतेः । ख्या प्रकथने । अभि व्याख्यातम् । ᵛअभिविख्येषं पश्येयमित्यर्थः ॥७॥

---

1. V1 S1 C प्राग्वीक्षते for प्राङीक्षते; P1 after इति adds यज्ञदेवत्यं यजुः ।
3. S1 °भूमिर्विक्ष्यते for °भूमिं वीक्षते
4. V1 S1 C प्राग् for प्राङ्
6. P1 सर्व° for सर्वतो; V1 S1 C निरुद्धमेव for निरुद्धमिव
7. P1 om. one तत्र
14. B1 °मतम् for °प्रेतम्; B1 after प्रेतम् adds देवेभ्यः सवित्रा प्रसूतः; H1 om. एतदुक्तं सवितुः
16. B1 आदाय for आस्थाय
20. H1 प्राचक्षते for प्राङीक्षते
21. B1 after सूर्यश्च adds एतेऽपि स्वःशब्देनोच्यन्ते
23. H1 om. पश्येयम्

दृꣳहन्तां दुर्यीः पृथिव्यामुर्वन्तरिक्षमन्वेमि ।
पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थे ।
अग्ने हव्यꣳरक्षस्व ॥८॥ (३) ॥

दृꣳहन्ताम् । दुर्याः । पृथिव्याम् । उरु । अन्तरिक्षम् । अनु । एमि ।
पृथिव्याः । त्वा । नाभौ । सादयामि । अदित्याः । उपस्थ इत्युपऽस्थे ।
अग्ने । हव्यम् । रक्षस्व ॥८॥ (३) ॥

सा–कात्यायनः – “ दृꣳहन्तामित्यवरोहति ” (काश्रौ २.३.२५) इति । ‘ दुर्याः पृथिव्याम् ’ इति मन्त्रशेषः । ‘पृथिव्यां वर्तमानाः ये ‘दुर्याः, दुरो द्वाराण्यर्हन्तीति दुर्याः गृहाः, ते ‘दृꣳहन्तां दृढा भवन्तु । अनेन मन्त्रेण शकटादवरोहेत् । हविर्गृहीत्वोत्तरतोऽध्वर्योर्भारेण गृहाणामदार्ढ्यशङ्का संभाव्यते । तामनेन मन्त्रेण तत्समाधानं [च] कण्वो दर्शयति– “ दृꣳहन्तां दुर्याः पृथिव्यामिति गृहा वै दुर्यास्ते हैत ईश्वरो यजमानस्य योऽस्यायमध्वर्युर्यज्ञेन चरति तꣳ हविर्गृहीत्वा यन्तमनु प्रच्योतोस्ते हेश्वरो विक्षोब्धोस्तानेवैतदस्यां प्रतिष्ठायां दृꣳहति तथो यजमानस्य गृहा न विक्षोभन्ते ” (काशब्रा २.१.२.१५) इति । गृहा एवात्र दुर्यशब्देनाभिधीयन्ते । अस्य यजमानस्य योऽयमध्वर्युर्यज्ञमनुतिष्ठति तमध्वर्युं हविर्गृहीत्वा गच्छन्तमनु न एते गृहाः प्रच्योतुं समर्थाः । तस्यैव व्याख्यानं विक्षोब्धोरीश्वरा इति । तानेव विक्षोब्धुमुद्युक्तान् गृहानेतेन मन्त्रेण पृथिव्यां दृढीकरोति । ततो यजमानस्य गृहाः क्षोभं न प्राप्नुवन्तीत्यर्थः । हविर्ग्रहणस्याचारादावपि संभवादयमध्वर्युः किं करिष्यतीत्यविज्ञाय लोकद्वयस्य भीत्या कम्पः संभाव्यते, तन्निवारणार्थोऽयं मन्त्रः । तदाह तित्तिरिः– “ द्यावापृथिवी हविषि गृहीत उदवेपेताम् । दृꣳहन्तां दुर्या द्यावापृथिव्योरित्याह । गृहाणां द्यावापृथिव्योर्धृत्यै ” (तैब्रा ३.२.४) इति । अस्य मन्त्रस्य शकटारोहणहेतुत्वमापस्तम्बोऽपि दर्शयति– “ दृꣳहन्तां दुर्या द्यावापृथिव्योरिति प्रत्यवरोह्य ” (आपश्रौ १.१८.४) इति ॥

कात्यायनः – “ गच्छत्युर्वन्तरिक्षमिति ” (काश्रौ २.३.२६) इति । ‘ अन्वेमि ’ इति मन्त्रशेषः । पूर्वमपि व्याख्यातोऽयं मन्त्रः ’ ॥

कात्यायनः – “ श्रपणस्य पश्चात् सादयति पृथिव्यास्त्वेति ” (काश्रौ २.३.२७) इति । पाठस्तु– ‘ पृथिव्यास्त्वा नाभौ सादयाम्यदित्याः उपस्थे । अग्ने हव्यꣳ रक्षस्व ’ इति । हे हविः, त्वां

---

1. P1 before दृꣳहन्ताम् adds पृथिवीदैवत्यं यजुः ।
8. P1 om. दुरो द्वाराण्यर्हन्तीति दुर्याः
9. P1 रोहणम् for रोहेत; P1 om. हविर्... भारेण; P1 शङ्कामनुष्ठानेन for शङ्का संभाव्यते । तामनेन
10. S1 V1 C om. गृहा . वै प्रतिष्ठायां (L. 12)
12. S1 V1 C दृꣳहन्तामीश्वरा for दृꣳहति ततो; P1 om. गृहा... °धीयन्ते [L 13]
14. S1 V1 C प्रोद्योतुं for प्रच्योतुं; V1 S1 C विबक्षोब्धो for विक्षोब्धोः
19. V1 S1 C om. ततो
20. P1. before गच्छति adds अन्तरिक्षदैवत्यं यजुः ।
23. P1 after पाठस्तु adds पृथिवीदैवत्यं यजुः ।

^{v}पृथिव्याः ^{v}नाभौ मध्ये ^{v}सादयामि स्थापयामि । तस्यैव व्याख्यानम् ‘ अदित्याः ’ इति । यथा सुप्तं बालं पुत्रं माता स्वाङ्के स्थापयति एवमहमिदं हविः ^{v}अदित्याः ^{v}उपस्थे भूम्या अङ्के, सादयामीत्यनुवर्तते । हे ^{v}अग्ने, तव समीपे स्थापितमिदं ^{v}हव्यं ^{v}रक्षस्व । सुप्तं पुत्रमिव बाधकेभ्योऽसुरेभ्यः पालयस्व । सोऽयमर्थः सर्वोऽपि ‘ मध्यं वै नाभिर्मध्यमभयम् ’ इत्यादौ ब्राह्मणे द्रष्टव्यः। तित्तिरिरपि व्याचष्ट– “ अदित्यास्त्वोपस्थे सादयामीत्याह । इयं वा अदितिः । अस्या एवैनदुपस्थे सादयति । अग्ने हव्यꣳ रक्षस्वेत्याह गुप्त्यै ” (तैब्रा ३.२.४) इति । कण्वः– “ मध्यं वै नाभिर्मध्यमभयं तस्मादाह पृथिव्यास्त्वा नाभौ सादयामीत्यदित्या उपस्थ इत्युपस्थ इवाभाषीदिति वै तदाहुर्यत् सुगुप्तं भवति सुगुप्तमसदिति अग्ने हव्यꣳ रक्षस्वेति तदग्नये चैवैतद्धविर्गुप्तये परिददात्यस्यै च पृथिव्यै ” (काशब्रा २.१.२.१६) इति ॥८॥(३)॥

इति प्रथमाध्याये तृतीयोऽनुवाकः ॥३॥

आ–“ दृꣳहन्तामित्यवरोहति ” (काश्रौ २·३·२५) इति । दुर्याः गृहाणि । दुराणि अर्हन्तीति दुरार्हाः ^{v}दुर्याः ^{v}पृथिव्यां भूम्यां ^{v}दृꣳहन्ताम् दृढीभवन्तु । “ गच्छति उर्वन्तरिक्षमन्वेमि ” (काश्रौ २·३·२६) इति । व्याख्यातम् । ‘ पृथिव्यास्त्वा ’ इति हविरासादयति । ^{v}पृथिव्याः ^{v}नाभौ मध्ये अगाधस्थाने त्वां हविरासादयामि । ^{v}अदित्याः देवमातुः ^{v}उपस्थे उत्सङ्गे । हे भगवन्, ^{v}अग्ने ^{v}हव्यम् आसादितं हविः ^{v}रक्षस्व ॥८॥ (३) ॥

[इति तृतीयोऽनुवाकः]

[अथ चतुर्थोऽनुवाकः]

सा– तृतीयेऽनुवाके हविर्ग्रहणविषया मन्त्रा उक्ताः । चतुर्थेऽनुवाके हविःप्रोक्षणविषया मन्त्रा उच्यन्ते—

प॒वित्रे॑ स्थो वैष्ण॒व्यौ॑ स॒वि॒तुर्वः॑ प्र॒स॒व उत्पु॑नामि ।
अच्छि॑द्रेण प॒वित्रे॑ण॒ सूर्य॑स्य र॒श्मिभिः॑ ॥१॥

प॒वि॒त्रे॒ इति॑ प॒वित्रे॑ । स्थः॒ । वै॒ष्ण॒व्यौ॑ । स॒वि॒तुः । वः॒ । प्र॒स॒व इति॑ प्र॒ऽस॒वे । उत् । पु॒ना॒मि॒ । अच्छि॑द्रेण । प॒वित्रे॑ण । सूर्य॑स्य । र॒श्मि॒भि॒रिति॑ र॒श्मिऽभिः॑ ॥ टिं ॥१॥

---

1. V1 S1 C om. स्थापयामि
6. V1 S1 C om. कण्वः...गुप्तये इति [L 8]
10. B1 H1 दुर्याः दुराणि गृहाणि for दुर्याः गृहाणि । दुराणि
11. H1 om. गच्छति
13. B1 अल्प° for अगाध°; H1 om. त्वां; B1 आसादयति for आसादयामि
14. B1 om. हव्यम्; H1 om. हविः

सा–कात्यायनः – "कुशौ समावप्रशीर्णाग्रावनन्तर्गर्भौ कुशैश्छिनत्ति पवित्रे स्थ इति । त्रीन् वा" इति (काश्रौ २.३.३१-३२)। त्रिभिः कुशैः सहितेन हस्तेन छिन्द्यात् । अत एवापस्तम्बो विस्पष्टमाह "तृणं काष्ठं वाऽन्तर्धाय छिनत्ति न नखेन" (आश्रौ १.११.८) इति । 'वैष्णव्यौ' इति मन्त्रशेषः । नपुंसकस्य व्यत्ययेनात्र स्त्रीलिङ्गत्वम् । हे ᵛपवित्रे शोधके कुशद्वयरूपे, युवां वैष्णवे यज्ञसंबन्धिनी ᵛस्थः । 'यज्ञो वै विष्णुः' इति श्रुतेः । तदेतदाह कण्वः– "स वै पवित्रे एव करोति पवित्रे स्थो वैष्णव्याविति । यज्ञो वै विष्णुर्यज्ञिये स्थ इत्येवैतदाह" (काशब्रा २.१.३.१) इति ॥

कात्यायनः – "हविर्ग्रहण्यामपः कृत्वा ताभ्यामुत्पुनाति सवितुर्व इति" (काश्रौ २.३.३३) इति । हविः पूर्वं गृहीतं ययाऽग्निहोत्रहवण्या सा हविर्ग्रहणी । तस्यामपः स्थापयित्वा पवित्राभ्यामुत्पुनीयात् । पाठस्तु – 'सवितुर्वः प्रसव उत्पुनामि । अच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः' इति । ᵛसवितुः प्रेरकस्य ᵛप्रसवे प्रेरणे सति हे आपः, ᵛवः युष्मान् ᵛउत्पुनामि उत्कर्षेण शोधयामि । ᵛअच्छिद्रेण ᵛपवित्रेण छिद्ररहितेन शोधकेन वायुस्वरूपेण । तथा ᵛसूर्यस्य ᵛरश्मिभिः शुद्धिहेतुभिरुत्पुनामीति पूर्वत्रान्वयः । वायोः सूर्यस्य रश्मीनां च पादप्रक्षालनाद्युपहतभूमिशुद्धिहेतुत्वं प्रसिद्धम् । एतदेवाभिप्रेत्य कण्वोप्याह–"अच्छिद्रेण पवित्रेणेत्यच्छिद्रं वा अयं पवित्रं योऽयं पवते तस्मादाहाच्छिद्रेण पवित्रेणेति । सूर्यस्य रश्मिभिरित्येते वा अपिपवितारो यत्सूर्यस्य रश्मयस्तस्मादाह सूर्यस्य रश्मिभिरिति" (काशब्रा २.१.३.३) इति । पवित्रयोरपां शोधकत्वे उत्तमत्वमपां तदभावं च कण्व आह– "वृत्रो ह वा इदꣳ सर्वं वृत्वा शिश्ये यदिदमन्तरा द्यावापृथिव्यौ तस्माद्वृत्रो नाम तꣳ हेन्द्रो जघान स हतोऽप एव पूतिः सर्वतोऽभिप्रसुस्राव सर्वतो ह्ययꣳ समुद्रस्तमु हैका आपो बीभत्सां चक्रिरे ता एनमुपर्युपर्यतिपुप्लुविरे ते दर्भास्तास्ता अनापूयिता आपोऽस्तीतरासु सꣳसृष्टं यदेना वृत्रः पूतिरभिप्रास्रवत् स यदेवासु तत्र किंचित् सꣳसृष्टं भवति तदेवैताभ्यां पवित्राभ्यामपहन्त्यथ मेध्याभिः" (काशब्रा २.१.३.२) इति ॥ १॥

आ– पवित्रे छिनत्ति – 'पवित्रे स्थः' इति ॥ लिङ्गोक्तदेवतमिदं यजुः । ᵛपवित्रे पवनक्रियाशीले युवां ᵛस्थः भवथः । वैष्णव्ये इति प्राप्ते वैष्णव्यौ इति लिङ्गव्यत्ययः ।

'वैष्णव्यौ' इति । विष्णुदेवत्ये ᵛस्थः भवतः । अप उत्पुनाति–'सवितुर्वः' इति । देवो देवता । ᵛसवितुः ᵛप्रसवे वर्तमानोऽहं ᵛसूर्यस्य ᵛरश्मिभिः शुद्धाः ᵛवः युष्मान् अपः ᵛअच्छिद्रेण वायुरूपेण ᵛपवित्रेण उत्पुनामि ॥१॥

---

1. P1 om. त्रीन् वा [L 2]
2. P1 before त्रिभिः add लिङ्गोक्तदैवत्यं यजुः । V1 S1 C om. हस्तेन
6. P1 after इति adds ते द्वे भवतोऽयं वाव पवित्रं योऽयं पवते स वा अयमेक एवैव पवते सोऽयं पुरुषोन्तः प्रविष्टः प्राङ् च प्रत्यङ् च तौ प्राणोदानौ तदवास्यैवानुमात्रां तस्माद् द्वे त्वेव भवतस्त्रीणि स्युरित्याहुर्व्यान एव तृतीय इति तस्माद् द्वे त्वेव भवतः इति ॥
9. P1 after पाठस्तु adds दैवी बृहती सावित्रम् ।
12. V1 S1 C सूर्य for सूर्यस्य
13. V1 S1 C om. अच्छिद्रं
15. V1 S1 C om. पवित्रयोरपां...मेध्याभिरिति ॥ (L. 19).
20. B1 °दैवत्ये for °देवतं; B1 om. यजुः
21. H1 हविरासदयामि । युवां वैष्णव्यौ अत्र for युवां...वैष्णव्याविति
22. B1 यज्ञो वै विष्णुर्यज्ञिये स्थः इति अतः यः for वैष्णव्यौ...अपः; B1 आपो for देवो

देवीरापो अग्रेगुवो अग्रेपुवः ।
अग्र इममद्य यज्ञं नयत सुधातुं यज्ञपतिं देवायुवम् ।।२।।

देवीः । आपः । अग्रेगुव इत्यग्रेऽगुवः । अग्रेपुव इत्यग्रेऽपुवः ।
अग्रे । इमम् । अद्य । यज्ञम् । नयत ।
सुधातुमिति सुऽधातुम् । यज्ञपतिमिति यज्ञऽपतिम् । देवायुवम् । देवयुवमिति देवऽयुवम् ॥ प्तिं २ ॥

सा– कात्यायनः – "सव्ये कृत्वा दक्षिणेनोदिङ्गयति देवीराप इति" (काश्रौ २·३·३४) इति । उत्पूताभिरद्भिः पूरितं पात्रं सव्ये हस्ते स्थापयित्वा मन्त्रमुच्चारयन् दक्षिणेन हस्तेन पात्रमूर्ध्वं चालयेत् । अब्दैवत्यं यजुः । पाठस्तु– 'देवीरापो अग्रेगुवो अग्रेपुवः । अग्र इममद्य यज्ञं नयत सुधातुं यज्ञपतिं देवायुवम् । युष्मा इन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्ये' इति । ᵛदेवीः ᵛआपः हे द्योतनात्मिका आपः, यूयम् ᵛअद्य अस्मिन् दिने ᵛइमम् इदानीं प्रवर्तमानं ᵛयज्ञं कर्मविशेषम् ᵛअग्रे ᵛनयत पुरतः प्रवर्तयत, यथा विघ्नो न भवति तथा कुरुतेत्यर्थः । कथंभूता आपः ? ᵛअग्रेगुवः पुरतो निम्नदेशं प्रति गमनशीलाः । ᵛअग्रेपुवः यस्मिन् पूर्वभागे गच्छन्ति तस्मिन्नपहतिनिवारणेन शोधनशीलाः । यज्ञप्रवर्तनाय ऊर्ध्वं ᵛयज्ञपतिं यजमानं अग्रे नयतेत्यनुवर्तते । फलभोगाय प्रेरयत । कथं भूतं यज्ञपतिम् ? ᵛसुधातुं सुष्ठु दक्षिणादिना यज्ञस्य पोषकम् । ᵛदेवायुवम् । यु मिश्रण इति धातुः । देवान् यौति यज्ञादिना मिश्रीकरोतीति देवायुः । यद्वा– देवान् कामयत इति देवायुः । "इदंयुः इदं कामयमानः" (निरुक्त ६.३१) इति यास्केनोक्तत्वात् । तं देवायुवं नयत ॥ २ ॥

आ– 'देवीरापः' इत्यप उदिङ्गयति । यजुः [अब्-] देवत्यम् । हे देव्यः ᵛआपः ᵛअग्रेगुवः । अग्रे समुद्रं गच्छन्तीति क्विप्प्रत्ययान्तस्य गमेः रूपम् । ᵛअग्रेपुवः इति । अग्रे प्रथमं पिबन्तीति, पा पाने इति पिबतेः क्विप्प्रत्ययान्तस्य रूपम् । "अग्रेगुव इति यत्प्रथमाः सोमस्य राज्ञो भक्षयन्ति" (काशब्रा २·१·३·५) इति श्रुतेः । ᵛअग्रे उत्कृष्टे स्वर्गे ᵛइमं दर्शपूर्णमासाख्यं

---

7. P1 पूताभिः for उत्पूताभिः
8. V1 S1 C om. अब्दैवत्यं यजुः ।
10. P1 दिवसे for दिने
11. V1 S1 C om. इत्यर्थः
12. C V1 पूर्वमागच्छन्ति for पूर्वभागे गच्छन्ति
14. P1 V1 S1 C देवायुवम् (the syllable व in देव was lengthened in the Saṁhitā for the sake of metre and in padapāṭha it is no longer retained. Yet all the above mss. have retained the dīrgha.)
16. देवायुवम् See Fn. 14 above; C S1 वायुवं for देवायुवं
17. H1 om. यजुः [अब्-] देवत्यम्
18. B1 क्त°; H कु° for क्विप्°
19. H1 B1 कू° for क्विप्; H1 om. यत्प्रथमाः

^{v}यज्ञम् ^{v}अद्य इदानीं सुनिष्पन्नं स्वफलप्रदानाय ^{v}नयत । णीञ् प्रापणे । प्रापयत । पश्चात् तद्भोगाय ^{v}यज्ञपतिं नयत । सुधातुम् । सुदक्षिणादिना यज्ञस्य पोषकं पुष्कलदक्षिणं ^{v}सुधातुम् । ^{v}देवायुवं देवान् कामयत इति [देवयुस्तम्] । "इदंयुः इदं कामयमानः" (निरुक्त ६.३१) इति यास्कः । यु मिश्रणे । देवान् यौति यज्ञादिना मिश्रीकरोतीति देवायुः । छान्दसो दीर्घः । तं देवायुवम् एवंविधं यज्ञपतिं नयत ॥२॥

युष्मा इन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्ये प्रोक्षिता स्थ ।
अग्नये त्वा जुष्टं प्रोक्षाम्यग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि ॥ ३ ॥

युष्माः । इन्द्रः । अवृणीत । वृत्रतूर्य इति वृत्रऽतूर्ये ।
यूयम् । इन्द्रम् । अवृणीध्वम् । वृत्रतूर्य इति वृत्रऽतूर्ये । प्रोक्षिता इति प्रऽउक्षिताः । स्थ ।
अग्नये । त्वा । जुष्टम् । प्र । उक्षामि । अग्नीषोमाभ्याम् । त्वा । जुष्टम् । प्र । उक्षामि ॥ ३ ॥

सा– 'युष्माः' इति आकारश्छान्दसः । हे आपः, युष्मान् ^{v}इन्द्रः देवः ^{v}वृत्रतूर्ये वृत्रवधे निमित्तभूते सति ^{v}अवृणीत सहकारित्वेन प्रार्थितवान् । ^{v}यूयम् अपि ^{v}वृत्रतूर्ये निमित्ते तम् ^{v}इन्द्रम् ^{v}अवृणीध्वं सहकारित्वेन प्रार्थितवत्यः । सोऽयमर्थः सर्वोऽपि "स उदिङ्गयति देवीरापः" (काशब्रा २.१.३.५) इत्यादिना कण्वेन विस्पष्टमूचे । इन्द्रस्यापां च परस्परवरणप्रसिद्धिं तित्तिरिर्दर्शयति– "वृत्रꣳ ह हनिष्यन्निन्द्र आपो वव्रे । आपो हेन्द्रं वव्रिरे" (तैब्रा ३.२.५) इति । कात्यायनः–"प्रोक्षिता स्थेति तासां प्रोक्षणम्" (काश्रौ २.३.३५) इति । अब्देवत्यं यजुः । हे आपः, यूयं मदीयमनोभावनया ^{v}प्रोक्षिताः भवत । प्रोक्षणं नाम प्रकर्षेण सेचनम् । तच्चान्यद्रव्यस्याद्भिः संभवति । अपां तु न केनाप्यन्यद्रव्येण तत् संभवति । तस्मान्मानसोपचारेण तासां प्रोक्षणम् । तमेतमभिप्रायं कण्वो दर्शयति–"प्रोक्षिता स्थेति तदेताभ्यो निह्नुते" (काशब्रा २.१.३.५) इति । अपलपत्युपचरतीत्यर्थः । तित्तिरिस्तु मन्त्रपाठेन तमुपचारं दर्शयति– "प्रोक्षिताः स्थेत्याह । तेनापः प्रोक्षिताः" (तैब्रा ३.२.५) इति ॥

कात्यायनः –"हविषश्चाग्नये त्वाऽग्नीषोमाभ्यां त्वेति । यथादेवतमन्यत्" (काश्रौ २.३.३६-३७) इति । 'हविषश्च' इत्यत्र प्रोक्षणमित्यनुवर्तते । अत्र देवताद्वयसंबन्धिनो हविषो यथा प्रोक्षणम् एवमन्यदपि हविस्तत्तद्देवतामनतिक्रम्य प्रोक्षणीयम् ॥ अग्निरग्नीषोमौ देवते यजुषी ॥ पाठस्तु– 'अग्नये त्वा जुष्टं प्रोक्षाम्यग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि' इति ॥ स्पष्टोऽर्थः ॥ ३ ॥

---

11. P1 V1 युष्मेति for युष्मा इति
13. C तम् for सः, V1 S1 om. first सः
14. S1 V1 C कण्वो . उवाच for कण्वेन...ऊचे ।
16. C V1 S1 om. अब्देवत्यं यजुः ।
17. C अन्येन, S1 अन्यत्र for अन्य°
18. V1 C S1 एतत् for तत्
23. S1 V1 C °देवतानाम् for देवताम्; V1 S1 C om. अग्नि...यजुषी ।

आ– 'युष्मा इन्द्रः' । अब्देवत्या गायत्री । ['युष्माः' इति] छान्दसं पदम् । युष्मान् ᵛइन्द्रः ᵛअवृणीत । किमर्थम्? ᵛवृत्रतूर्ये । तूर्यतिर्वधकर्मा । वृत्रतूर्ये वृत्रवधार्थम् । यूयं च वृत्रतूर्ये निमित्ते तत्साहाय्यार्थं तथास्त्विति इन्द्रमवृणीध्वं वृतवत्यः । तासामपां प्रोक्षणं– 'प्रोक्षिता स्थ' इति । आपो देवताः । उक्ष सेचने । ᵛप्रोक्षिताः ᵛस्थ यूयं प्रोक्षिता भवथ । हविः प्रोक्षति – 'अग्नये जुष्टम्' इति । अग्निरग्नीषोमौ देवते यजुषी । ᵛअग्नये । "रुच्यर्थानां प्रीयमाणः" (पा १·४·३३) इति चतुर्थी । ᵛजुष्टं रुचितं ᵛत्वा त्वां ᵛप्रोक्षामि । ᵛअग्नीषोमाभ्यां ᵛजुष्टं रुचितं त्वां ᵛप्रोक्षामि ॥ ३ ॥

दैव्या॑य॒ कर्म॑णे शुन्धध्वं देवय॒ज्यायै॑ ।
यद्वोऽशु॑द्धः परा॒ज॒घानै॒तद्व॒स्तच्छु॑न्धामि ॥४॥ (४) ॥

दैव्या॑य । कर्म॑णे । शु॒न्ध॒ध्व॒म् । दे॒व॒य॒ज्याया॒ इति॑ दे॒व॒ऽय॒ज्यायै॑ । यत् । व॒ः । अशु॑द्धः । प॒रा॒ज॒घानेति॑ प॒रा॒ऽज॒घान॑ । ए॒तत् । व॒ः । तत् । शु॒न्धा॒मि॒ ॥ जि ॥ ४ ॥ (४) ॥

सा– कात्यायनः – "पात्राणि दैव्यायेति" (काश्रौ २·३·३८) इति । कृष्णाजिनोलूखलादीनि यज्ञपात्राणि 'दैव्याय' इति मन्त्रेण प्रोक्षेत् । पात्रदेवत्यानुष्टुप् । पाठस्तु– 'दैव्याय कर्मणे शुन्धध्वं देवयज्यायै । यद्वोऽशुद्धः पराजघानैतद् वस्तच्छुन्धामि' इति । ᵛदैव्याय अग्न्यादिदेवसंबन्धिने ᵛकर्मणे ᵛशुन्धध्वम् । हे यज्ञपात्राणि, शुद्धानि भवत । तदेव कर्म विशिष्यते । ᵛदेवयज्यायै देवसंबन्धिन्यै यागक्रियायै । किं च ᵛवः युष्माकं संबन्धि ᵛयत् ᵛअङ्गम् ᵛअशुद्धः नीचजातिस्तक्षादिः ᵛपराजघान पराहतं कृतवान्, छेदनतक्षणादिकाले स्वकीयहस्तपादस्पर्शरूपमशुचित्वं कृतवान्, ᵛतत् ᵛएतत् ᵛवः युष्माकमङ्गं ᵛशुन्धामि प्रोक्षणेन शुद्धं करोमि । तमिममर्थम्– "अथ पात्राणि प्रोक्षति दैव्याय" (काशब्रा २·१·३·७) इत्यादिना कण्वः प्रोक्तवान् ॥ ४ ॥ (४) ॥

इति प्रथमेऽध्याये चतुर्थोऽनुवाकः ॥ ४ ॥

आ– पात्राणि प्रोक्षति– 'दैव्याय कर्मणे' इति । पात्रदेवत्यानुष्टुप् । ᵛदैव्याय देवसंबन्धिने ᵛकर्मणे कर्मार्थं ᵛशुन्धध्वम् । शुधि शुद्धौ । शुद्धा भवन्तु । ᵛदेवयज्यायै देवयागाय

---

2. H1 तुर्वतिर् for तूर्यतिर्
3. H1 after वृतवत्यः adds भवथ
7. H1 त्वेति for त्वां
14. C प्रोक्षयेत् for प्रोक्षेत्; V1 S1 C om. पात्रदेवत्यानुष्टुप् ।
21. P1 om. प्रथमेऽध्याये; V1 after इति adds सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कण्वसंहितायां; C प्रथम for प्रथमे

सपवित्राभिरद्भि शुन्धध्वम् । किं च ᵛयत् ᵛवः युष्माकम् ᵛअशुद्धः अशुचिस्तक्षादिः ᵛपराजघान पराहतिं [कृत-] वान्, यत् कलुषमुपहतिं कृतवान् ᵛतत् ᵛएतत् वः कलुषं ᵛशुन्धामि शोधयामि अपनयामि ॥४॥ (४)॥

[इति चतुर्थोऽनुवाकः]

[अथ पञ्चमोऽनुवाकः]

सा– चतुर्थेऽनुवाके प्रोक्षणमन्त्रा उक्ताः । पञ्चमे त्ववघातमन्त्रा उच्यन्ते –

शर्मा॒स्यव॑धूत॒ꣳ रक्षोऽव॑धूता॒ अरा॑तयः ।
अदि॑त्या॒स्त्वग॑सि॒ प्रति॒ त्वाऽदि॑तिर्वे॑त्तु ॥ १ ॥

शर्म॑ । अ॒सि॒ । अव॑धूत॒मित्यव॑ऽधूतम् । रक्षः॑ । अव॑धूता॒ इत्यव॑ऽधूताः । अरा॑तयः ।
अदि॑त्याः । त्वक् । अ॒सि॒ । प्रति॑ । त्वा॒ । अदि॑तिः । वे॒त्तु ॥ र्नी ॥ १ ॥

सा– कात्यायनः – " शर्मासीति कृष्णाजिनादानम् " (काश्रौ २.४.१) इति । हे कृष्णाजिन, त्वमुलूखलस्य धारणार्थं ᵛशर्म सुखहेतुः ᵛअसि । अजिनस्य चर्मेति मनुष्यनाम । शर्मेति दैवं नाम । अतो मन्त्रे शकारः पठितः । सोऽयमर्थः –" तदादत्ते शर्मासीति कृष्णस्य वा एतच्चर्म " (काशब्रा २.१.३.९) इत्यादिना ब्राह्मणेन स्पष्टीकृतः ॥

कात्यायनः – " अपेत्य पात्रेभ्योऽवधूनोत्यवधूतमिति " (काश्रौ २.४.२) इति । तदेतदापस्तम्बोऽपि– " उलूखलादि पात्रेभ्योऽपसृत्य दूरदेशे कृष्णाजिनमवधूनुयात् " [इति] । राक्षसं यजुः । पाठस्तु– ' अवधूतꣳ रक्षोऽवधूता अरातयः ' इति । धूञ् कम्पन इति धातुः । कृष्णाजिने गूढं ᵛरक्षः ᵛअवधूतं कृष्णाजिनस्य कम्पनेन भूमौ पातितम् । एवमेव ᵛअरातयः अपि पातिताः ।

कात्यायनः – " प्रत्यग्ग्रीवमास्तृणात्यदित्यास्त्वगिति " (काश्रौ २.४.३) इति । तदेतदापस्तम्बोऽपि स्पष्टमाह– " अदित्यास्त्वगसीत्युत्तरेण गार्हपत्यमुत्करदेशे वा प्रतीचीनग्रीवमुत्तरलोमोपस्तृणाति " (आपश्रौ १.१९.४) इति । कृष्णाजिनदैवत्यं यजुः । पाठस्तु– ' अदित्यास्त्वगसि प्रति त्वाऽदितिर्वेत्तु ' इति । हे कृष्णाजिन, त्वम् ᵛअदित्याः भूमिदेवतायाः त्वग्रूपम् ᵛअसि । ततः ᵛअदितिः भूमिस्त्वां प्रतिगृह्य मदीयेयं त्वगित्येव ᵛवेत्तु जानातु । एतस्याभिप्रायं कण्वः –" तत्प्रत्यग्ग्रीवमुपस्तृणाति "

---

1. H1 यत् नोऽस्माकम् for यद्वो युष्माकम्
2. H1 तदेतच्चतु:; B1 तदेतत्त्व for तदेतत् वः
11. P1 before शर्मा° adds अजिनदेवत्यं यजुः ।
12. P1 दैवतं for दैवं
16. P1 om. राक्षसं यजुः ।
20. V S1 C °लोम्नोप° for °लोमोप°
23. P1 om. जानातु

(काशब्रा २.१.३.१०) इत्यादिना स्पष्टमुक्तवान् । तित्तिरिश्च संगृह्याह– " इयं वा अदितिः " (तैब्रा ३.२.६) इत्यादिना ॥

ननु चर्मान्तराणि परित्यज्य कृष्णाजिने कः पक्षपातः इति चेत् । यज्ञपुरुषसंबन्धित्वरूपत्वादिति ब्रूमः । पुरा कदाचिद्यज्ञपुरुषः केनाऽपि निमित्तेन देवेभ्योऽपरक्तोऽन्यत्र जगाम । तदानीं स्वकीयवेषप्रच्छादनाय कृष्णमृगोऽभूत् । देवास्तु तदेतद्विज्ञाय तस्य मृगस्य त्वचमुत्क्षिप्य जगृहुः । तस्मात् तत्र पक्षपातो युक्तः । सोऽयमर्थः सर्वोऽपि– " अथ कृष्णाजिनमादत्ते यज्ञस्य वै सर्वत्वाय " (काशब्रा २.१.३.८) इत्यादिना कण्वब्राह्मणेन प्रपञ्चितः । तित्तिरिश्चैतमर्थं संजग्राह– " यज्ञो देवेभ्यो निलायत । कृष्णो रूपं कृत्वा । यत् कृष्णाजिने हविरध्यवहन्ति । यज्ञादेव तद्यज्ञं प्रयुङ्क्ते । हविषोऽस्कन्दाय " (तैब्रा ३.२.५) इति । कथंचिदुलूखलादधः पतितेष्वपि व्रीहिषु कृष्णाजिनेनावरुद्धत्वेन भूमिस्पर्शाभावादस्कन्नमेव हविर्भवतीत्यर्थः ॥ १ ॥

आ– कृष्णाजिनमादत्ते–' शर्मासि ' इति । कृष्णाजिनदैवत्यं यजुः । ' चर्मासि ' इति प्राप्ते चकारस्य शकारत्वं ' शर्मासि ' [इति] । कृष्णाजिनमवधूनोति– ' अवधूतम् ' इति । राक्षसं यजुः । धूञ् कम्पने । vरक्षः अवकम्पितम् । vअवधूताः अवकम्पिताश्च vअरातयः अदानशीलाः । कृष्णाजिनमास्तृणाति – ' अदित्यास्त्वगसि ' इति । कृष्णाजिनदैवत्यं यजुः । vअदित्याः पृथिव्यास्त्वं vत्वक् भवसि । अतो वेत्तु । विद ज्ञाने । vअदितिः vत्वा त्वां vप्रति vवेत्तु प्रतिजानातु ॥१॥

अद्रि॑रसि वान॒स्प॒त्यो ग्रावा॑ऽसि पृ॒थुबु॑ध्नः ।
प्रति॒ त्वाऽदि॑त्या॒स्त्वग्वे॑त्तु॒ ॥ २ ॥

अद्रि॑ः । अ॒सि॒ । वा॒न॒स्प॒त्यः । ग्रावा॑ । अ॒सि॒ । पृ॒थु॒बु॑ध्न॒ इति॑ पृ॒थु॒ऽबु॑ध्नः ।
प्रति॑ । त्वा॒ । अदि॑त्याः । त्वक् । वे॒त्तु॒ ॥ द्यां ॥ २ ॥

सा–कात्यायनः – " निदधात्युलूखलमद्रिरसि ग्रावाऽसीति वा । प्रति त्वेत्युभयोः " (काश्रौ– २.४.४,५) इति । विकल्पितयोर्द्वयोर्मन्त्रयोः ' प्रति त्वा ' इति शेषो योजनीय इत्यर्थः । उलूखलदैवत्यं यजुः । पाठस्तु–' अद्रिरसि वानस्पत्यो ग्रावाऽसि पृथुबुध्नः । प्रति त्वाऽदित्यास्त्वग्वेत्तु ' इति । हे उलूखल, त्वं यद्यपि 'वानस्पत्यः दारुमयस्तथाऽपि दृढत्वात् 'अद्रिः 'असि पाषाणोऽसि 'पृथुबुध्नः स्थूलमूलः । मुसलघातोपद्रवेण चाञ्चल्यराहित्याय मूलस्य स्थूलत्वम् । हे उलूखल, तथाविधस्त्वं 'ग्रावा 'असि

---

7. V1 C S1 यज्ञे for यज्ञो; P1 लिलायत for निलायत
8. V1 यज्ञा यज्ञादेव दत्तसंज्ञं for first यज्ञादेव तद्यज्ञं
12. H1 एव for first अव°
13. H1 om. अदानशीलाः
22. P1 om. द्वयोः; V1 S1 C om. उलूखलदैवत्यं यजुः । [L23]
25. P1 V1 मुशल° for मुसल°

दार्व्येन पाषाणसदृशोऽसि । ᵛअदित्याः ᵛत्वक्, अधस्तादास्तीर्णा कृष्णाजिनरूपा भूमेर्या त्वगस्ति सा त्वां प्रतिगृह्य ᵛवेत्तु स्वकीयत्वेन जानातु । अत्र द्वयोर्मन्त्रयोः साधारणवाक्यशेषं पृथग्योजयित्वा कण्वो विस्पष्टं दर्शयति– " स प्रतिगृह्णात्यद्रिरसि वानस्पत्यः प्रति त्वाऽदित्यास्त्वग्वेत्त्विति वा ग्रावासि पृथुबुध्नः प्रति त्वाऽदित्यास्त्वग्वेत्त्विति वा " (काशब्रा २·१·३·१२) इति । दारुमयस्य पाषाणत्वाभिधानमुपचरितम् । एतत् तित्तिरिर्दर्शयति– " अद्रिरसि वानस्पत्य इत्याह । ग्रावाणमेवैनत् करोति " (तैब्रा ३·२·५) इति । तमिममुपचारम्– " यथा वा अदः सोमं ग्रावभिः " (काशब्रा २.१.३.१२) इत्यादिना कण्वः प्रपञ्चयामास ॥ २ ॥

आ–तस्मिन्निदधाति उलूखलम्–' अद्रिरसि ' इति । अद्रिर्ग्रावोलूखलदैवत्यं यजुः । अद्रिणा व्रीह्यादिकमवहन्तीति ᵛअद्रिः त्वं भवसि, ᵛवानस्पत्यः च । वनस्पतेर्विकारो वानस्पत्यः ᵛअसि । ᵛग्रावा ᵛअसि । हन्ति व्रीह्यादिकमनेनेति ग्रावा त्वमसि । ᵛपृथुबुध्नः बृहन्मूलश्च । अतस्त्वा ᵛअदित्याः ᵛत्वक् कृष्णाजिनं ᵛत्वा त्वाम् ᵛप्रति ᵛवेत्तु प्रतिजानातु ॥२॥

अ॒ग्नेस्त॒नूर॑सि वा॒चो वि॒सर्ज॑नम् ।
दे॒ववी॑तये त्वा गृह्णामि ॥ ३ ॥

अ॒ग्नेः । त॒नूः । अ॒सि॒ । वा॒चः । वि॒सर्ज॑न॒मिति॑ वि॒ऽसर्ज॑नम् ।
दे॒ववी॑तय॒ इति॑ दे॒वऽवी॑तये । त्वा॒ । गृ॒ह्णा॒मि॒ ॥ जो ॥ ३ ॥

सा– कात्यायनः – " हविरावपत्यग्नेस्तनूरिति " (काश्रौ २.४.६) इति । अग्निदैवत्यं यजुः । पाठस्तु– ' अग्नेस्तनूरसि वाचो विसर्जनम् । देववीतये त्वा गृह्णामि ' इति । हे हविः, त्वम् ᵛअग्नेः आहवनीयस्य ᵛतनूः शरीरम् ᵛअसि । यतस्तत्र क्षिप्तं हविरग्निर्भवति अतो हविरग्नेस्तनूः । किं भूतं हविः ? ᵛवाचः ᵛविसर्जनम् । अतः ᵛदेववीतये देवानां तर्पणाय ᵛगृह्णामि आवपामीत्यर्थः । तित्तिरिरपि एवमाह– " देववीतये त्वा [गृह्णामीत्याह] । देवताभिरेवैतत् समर्धयति " (तैब्रा ३.२.५) इति । अथवा पूर्वमपां प्रणयनकाले नियमितायाः यजमानवाचो हविरावपनकाले विसर्गो भवति । तस्मादिदं हविर्ग्रहणं वाचो विसर्जनमित्युच्यते । तदाह कण्वः– " यां वा अमूं वाचं यच्छति हविर्ग्रहीष्यन्नत्र वै तां विसृजते । तस्मादाह वाचो विसर्जनमिति " (काशब्रा २.१.३.१३) इति ॥ ३ ॥

---

3. V1 S1 C °गृह्णातु for °गृह्णाति°
4. C S1 °चरति । तमेतं for चरितम् । एतत् [l. 5]
9. B1 असि for च
10. H1 om. ग्रावासि; H1 घ्नन्ति for हन्ति
16. V1 S1 C om. अग्निदैवत्यं यजुः ।
19. V1 S1 C om. तित्तिरिरपि ... त्वा [l. 20]
20. P1 om. एवं
22. P1 om. अत्र

आ– अथ हविरावपति–‘ अग्नेः तनूरसि ’ इति । अत्र हविर्देवता । अत्राग्निशब्देनाहवनीयोऽग्निरुच्यते । तत्र प्रक्षिप्तं हविरग्निर्भवति । अतः ᵛअग्नेः ᵛतनूः शरीरम् ᵛअसि इत्युच्यते । यद्वा– अग्निशब्देन यस्यै देवतायै हविर्गृह्यते सा लक्ष्यते । तस्या अपि हविस्तनूर्भवतीति । ᵛवाचः ᵛविसर्जनम् । यस्मिन् हविषि क्षिप्ते अध्वर्युणा वाग्विसृज्यते तद्धविर्वाचो विसर्जनम् । ᵛदेववीतये देवानां तर्पणाय ᵛत्वा ᵛगृह्णामि आवपामीत्यर्थः ॥ ३ ॥

बृ॒हन् ग्रावा॑ऽसि वानस्प॒त्यः स इ॒दं दे॒वेभ्यः॑ ।
ह॒व्यꣳ श॑मीष्व सु॒शमि॑ शमीष्व॒ हवि॑ष्कृ॒देहि॑ ॥ ४ ॥

बृ॒हन् । ग्रावा॑ । अ॒सि॒ । वा॒न॒स्प॒त्यः । सः । इ॒दम् । दे॒वेभ्यः॑ ।
ह॒व्यम् । श॒मी॒ष्व॒ । श॒मि॒ष्वेति॑ शमिष्व । सु॒शमीति॑ सु॒ऽशमि॑ । श॒मी॒ष्व॒ । श॒मि॒ष्वेति॑ शमिष्व ।
हवि॑ष्कृत् । हवि॑ःकृ॒दिति॒ हवि॑ःऽकृत् । आ । इ॒हि॒ । घ्युं ॥ ४ ॥

सा– कात्यायनः – “ बृहद् ग्रावेति मुसलमादत्ते ” (काश्रौ २.४.११) इति । ‘ असि वानस्पत्यः ’ इति मन्त्रशेषः । हे मुसल, त्वं ᵛवानस्पत्यः दारुमयस्तथाऽपि ᵛग्रावा ᵛअसि । दार्ढ्येन पाषाणसदृशोऽसि । तथा दीर्घत्वेन ᵛबृहन् महानसि ॥

कात्यायनः –“ स इदमित्यवदधाति ” (काश्रौ २.४.१२) इति । पाठस्तु– ‘ स इदं देवेभ्यो हव्यꣳ शमीष्व सुशमि शमीष्व ’ इति । हे मुसल, ᵛसः त्वं ᵛदेवेभ्यः अग्न्यादिदेवोपकारार्थं च ᵛइदं ᵛहव्यं व्रीहिरूपं ᵛशमीष्व शमय । भक्षणविरोध्युग्रतुषापनयनेन शान्तं कुरु । तस्यैव पदस्य व्याख्यानं ‘सुशमि शमीष्व’ इति । सुष्ठु शान्तं यथा भवति तथा शमय । शान्तिर्द्विविधा । बाह्यतुषापनयनादेका । सेयं प्रथमावघातेन संपद्यते । अन्तःस्थितस्य ईषद्रक्तवर्णस्य मालिन्यस्यापनयनादपरा शान्तिः । सेयं फलीकरणेन संपद्यते । तमेतमुभयविधं तण्डुलसंस्कारं कुर्वित्यर्थः । अत एव कण्वो व्याचष्टे– “ हव्यं सꣳस्कुरु साधु सꣳस्कृतमित्येवैतदाह ” (काशब्रा २.१.३.१४) इति ॥

कात्यायनः – “ हविष्कृदेहीति त्रिराह्वयति ” (काश्रौ २.४.१३) इति । यजमानस्य पत्नी वा अन्यो वा यः कोऽपि देवानामर्थे भक्त्या व्रीहीन् सम्यगवहन्ति । तस्य संबोधनेनाह्वानं क्रियते । ᵛहविष्कृत ᵛएहि आगच्छ । तदेतत् तित्तिरिर्व्याचष्टे– “ हविष्कृदेहीत्याह । य एव देवानाꣳ हविष्कृतः । तान् ह्वयति ।

---

1. H1 om. अथ
2. H1 अत्र for तत्र; H after भवति ins. इति
4. B1 before वाचः adds अथवा
11. P1 after कात्यायनः adds (at the margin) मुसलदैवत्यं यजुः ।
14. V1 after कात्यायनः (at the margin) adds मुसलदैवत्यं यजुः ।
15. V1 मुशल for मुसल
16. S1 C °नयन° for °नयनेन; P1 V1 यदस्य for पदस्य
18. V1 S1 C °द्रव्य° for °रक्त°
22. V1 S1 C तत्° for तस्य

त्रिर्ह्वयति । त्रिषत्या हि देवाः ” (तैब्रा ३.२.५) इति। त्रिवारमुक्तमर्थं देवाः सत्यं मन्यन्त इत्यर्थः ॥ ४ ॥

आ– मुसलमादत्ते– ‘ बृहन् ग्रावाऽसि ’ इति । मुसलदैवत्यम् । ^{v}बृहन् ^{v}ग्रावा ^{v}असि, इति । दीर्घत्वापेक्षं बृहत्त्वम् । हन्तृत्वापेक्षं ग्रावत्वम् । दीर्घग्रावा त्वमसि । वनस्पतेर्विकारश्च ^{v}वानस्पत्यः । ‘ सः इदम् ’ इत्यत्रदधाति । इदमपि मुसलदैवत्यम् । ^{v}सः त्वं ^{v}देवेभ्यः [देवानाम]र्थाय ^{v}इदं हविः ^{v}शमीष्व । शाम्यतिः संस्कारार्थः । ^{v}सुशमि इति क्रियाविशेषणम् । एतत् सुसंस्कृतं यथा भवति तथा ^{v}शमीष्व संस्कारं कुरुष्व । त्रिराह्वयति– ‘ हविष्कृदेहि ’ इति । अत्र अधिदैवतं वाक्, अधियज्ञं पत्नी देवता । हविः करोतीति ^{v}हविष्कृत् ^{v}एहि आगच्छ । “ अधिदैवं वाक्, अधियज्ञं पत्नी ” (कात्या-सर्वानु- १.४) इति ॥४॥

कु॒क्कु॒टो॑ऽसि॒ मधु॑जिह्व॒ इष॒मूर्ज॒मा व॑द ।
व॒यꣳ सं॑घा॒तेसं॑घाते जेष्म ॥ ५ ॥

कु॒क्कु॒टः । अ॒सि॒ । मधु॑जिह्व॒ इति॒ मधु॑ऽजिह्वः । इष॑म् । ऊर्ज॑म् । आ । व॒द॒ ।
व॒यम् । सं॒घा॒ते सं॑घात॒ इति॑ सं॒घा॒तेऽसं॑घाते । जे॒ष्म॒ ॥ छं ॥ ५ ॥

सा– कात्यायनः – “ आहन्त्यन्यो दृषदुपले कुक्कुटोऽसीति । त्रिः शम्यया द्विर्दृषदं सकृदुपलाम् ” (काश्रौ २.४.१५) इति । अन्यशब्देनात्राग्नीध्रो विवक्षितः । पेषणसाधने द्वे शिले दृषदुपले । शम्याशब्देनारत्निप्रमाणं दारुमयं यज्ञायुधमुच्यते । तया शम्ययाऽऽग्नीध्रो दृषदं द्विवारं समाहन्यात्, उपलां सकृत् समाहन्यात् । तमिमं प्रयोगं त्रिवारमावर्तयते । तदेतदापस्तम्बोऽपि विस्पष्टमाह– “ दृषदुपले समाहन्ति । द्विर्दृषदि सकृदुपलायां त्रिः संचारयन् नवकृत्वः संपादयति ” (आपश्रौ १.२०.३) इति ॥ पाठस्तु– ‘ कुक्कुटोऽसि मधुजिह्व इषमूर्जमावद । वयꣳ संघातेसंघाते जेष्म ’ इति । हे शम्यारूप यज्ञायुधविशेष, त्वं ^{v}कुक्कुटः ^{v}मधुजिह्वः ^{v}असि । असुराः क केत्येवं तान् हन्तुमन्विच्छन् यः पुमानटति सर्वत्र संचरति सोऽयं कुक्कुटः । यद्वा–कुक्कुटाख्यपक्षिवद् ध्वनिविशेषम् असुर-भीत्यर्थं यः करोति सोऽयं कुक्कुटः इत्युपचर्यते । मधुजिह्वनामा कश्चिद्देवानां भृत्यः । मधुरभाषिणी जिह्वा यस्येति तद्व्युत्पत्तिः । तन्नामकं देवताभृत्यं

---

1. P1 त्रिषला; V1 विषव्या for त्रिषत्याः
4. H1 om. हन्तृत्वापेक्षं ग्रावत्वम् ।
6. B1 H1 शम्नातिः for शाम्यतिः
9. B1 after इति adds क्रियते
14. P1 after उपले ins. वाग्दैवत्यं यजुः ।
15. V1 S1 C om. अत्र; S1 पोषण° for पेषण°
17. V1 S1 C आवर्तयेत् for आवर्तयते
22. V1 S1 C °नामकः for °नामा

कण्वो दर्शयति–" मधुजिह्वो वै स देवेभ्य आसीत् " (काशब्रा २.१.३.२०) इति ॥ तद्रूप हे यज्ञायुध, त्वमसुरान् पराभावयन् यजमानस्य ^{V}इषम् ^{V}ऊर्जम् ^{V}आवद । अन्नं रसं च यथा समागच्छति तथा शब्दं कुरु । त्वदीयशब्देनासुरेषु पराभूतेषु तदीयमन्नं रसं च यजमानः सर्वतः प्राप्नोति । ततो यजमानसंबन्धिनः ^{V}वयं ^{V}संघातेसंघाते असुरैः सह क्रियमाणे तस्मिन् तस्मिन् युद्धे ^{V}जेष्म जितवन्तः । कदाचिदपि नास्माकं पराजय इति भावः । सम्यगसुरा हन्यन्ते यत्रेति संघातो युद्धम् । यज्ञायुधशब्देनासुराणां पराभव इति तित्तिरिः संगृह्य दर्शयति– " मनोः श्रद्धादेवस्य यजमानस्यासुरघ्नी वाक् । यज्ञायुधेषु प्रविष्टाऽऽसीत् । तेऽसुरा यावन्तो यज्ञायुधानामुद्वदतामुपाशृण्वन् । ते पराभवन् " (तैब्रा ३.२.५) इति । श्रद्धालुत्वेन यागं कुर्वतो मनोः प्रभावादिदं संपन्नम् । इममेवार्थम्– " मनोर्ह वा .." (काशब्रा २.१.३.१७) इत्याद्युपाख्याने कण्वः प्रपञ्चयामास ।। ५ ॥

आ– दृषदुपले आहन्ति–'कुक्कुटः ' असि इति । वाग्देवता । कुत्सितं शब्दमसुरघ्नम् असुराणां कवत इति कुक्कुटः । अथवा असुरघ्नीं वाचमुपादाय असुराः क्क क्क इत्येवं यस्त्वटति स कुक्कुटः । अत्र संप्रसारणादौ कृते कुक्कुट इति भवति । असुराणां ^{V}कुक्कुटः त्वम् ^{V}असि । देवानां ^{V}मधुजिह्वः असि । मधुररसप्रदत्वात् । अतः ^{V}इषं वृष्टिम् ^{V}ऊर्जम् अन्नम् ^{V}आ आभिमुख्येन ^{V}वद । सहायभूतेन त्वया ^{V}वयं च ^{V}संघातेसंघाते । संपूर्वस्य हन्तेः संघातः संग्रामः समुदायो वाऽभिधेयः । वीप्सार्थं द्विर्वचनम् । संघातेसंघाते शत्रून् ^{V}जेष्म जयेम, संग्रामं संग्रामं वा ॥ ५ ॥

वर्षवृ॑द्धमसि प्रति॑ त्वा वर्षवृ॑द्धꣳ वेत्तु ।
परा॑पूतꣳ रक्षः प्रति॑पूता अरा॑तयः ॥६॥

वर्षवृ॑द्धमिति॑ वर्षऽवृ॑द्धम् । असि । प्रति॑ । त्वा । वर्षवृ॑द्धमिति॑ वर्षऽवृ॑द्धम् । वेत्तु ।
परा॑पूतमिति परा॑ऽपूतम् । रक्षः । प्रति॑पूता इति प्रति॑ऽपूताः । अरा॑तयः ॥ दं ॥ ६ ॥

---

3. C भवदीय° for त्वदीय°
4. P1 Trans न before कदा° and om. अपि
7. P1 यन्तो for यावन्तो°
9. V1 S1 C उपाख्यानेन for उपाख्याने
10. B1 H1 कुक्कुटं for कुत्सितं; B1 Trans. शब्दं after असुरघ्नं
11. B1 H1 कवतीति for कवत इति; H1 B1 कु कु for क्क क्क
14. H1 om. वयं च

सा– कात्यायनः – " वर्षवृद्धमसीति शूर्पमादत्ते " (काश्रौ २.४.१६) इति । आदानप्रकारं बौधायनः स्पष्टीचकार– " अवहत्योत्तुषान् कृत्वोत्तरतः शूर्पमुपयच्छति " (बोश्रौ १.६) इति । हे शूर्प, त्वं ᵛवर्षवृद्धं वृष्टिगतजलेनाभिवृद्धम् ᵛअसि । वर्षवृद्धवेणुदलैरिषीकाग्रशलकाभिर्नडाख्यतृणशलाकाभिर्वा शूर्पस्य निर्मितत्वात् । तदेतत् कण्व आह– " वेणूनां वा नळानां वेषीकाणां वा " (काशब्रा २.१.३.२१) इति ॥

कात्यायनः – " प्रति त्वेति हविरुद्वपति " (काश्रौ २.४.१७) इति । ' वर्षवृद्धं वेत्तु ' इति मन्त्रशेषः । हे हविः, ᵛवर्षवृद्धं त्वां प्रतिगृह्य ᵛवेत्तु स्वकीयत्वेन जानातु । अत्र ज्ञातृत्वं शूर्पस्य द्रष्टव्यम् । हविर्हेतूनां व्रीहीणां यवानां वा वर्षवृद्धत्वं प्रसिद्धम् । अत एवात्र कण्व आह– " व्रीहयो वा यवा वा " (काशब्रा २.१.३.२१) इति । मन्त्रद्वये वृद्धशब्देन समृद्धिर्द्योत्यत इति तित्तिरिराह–" वर्षवृद्धमसि प्रति वा वर्षवृद्धं वेत्त्वित्याह । वर्षवृद्धा वा ओषधयः । वर्षवृद्धा इषीकाः समृद्ध्यै " (तैब्रा ३.२.५) इति ॥

कात्यायनः – " परापूतमिति निष्पुनाति " (काश्रौ २.४.१८) इति । ' रक्षः प्रतिपूता अरातयः ' इति मन्त्रशेषः । तुषेषु निरूढं ᵛरक्षः ᵛपरापूतं निराकृतं शूर्पेण तुषेषु परापूतेषु तैः सह रक्षसो भूमौ पतनात् ᵛअरातयः हविर्दानप्रतिकूला आलस्यादिशत्रवश्च ᵛप्रतिपूताः प्रतिकूलाः सन्तो निराकृताः ॥६॥

आ–शूर्पमादत्ते–' वर्षवृद्धम् असि ' इति । शूर्पदेवत्यम् । ᵛवर्षवृद्धम् वृष्टया वृद्धम् ᵛअसि । हविरुद्वपति–' प्रति त्वा वर्षवृद्धम् ' इति । हविर्देवता । ᵛवर्षवृद्धं त्वां [ᵛप्रति ᵛवेत्तु] प्रतिजानातु । निष्पुनाति– ' परापूतम् ' इति । ' परापूतम् ', ' अपहतम् ' इति च द्वे राक्षसे । ᵛरक्षः ᵛपरापूतं पराक्षिप्तम् । ᵛअरातयः ᵛप्रतिपूताः पराक्षिप्ताः ॥ ६ ॥

अप॑हत॒ꣳ रक्षो॑ वा॒यु॒र्वो॒ वि वि॑नक्तु ।
दे॒वो व॑ः स॒वि॒ता प्रति॑ गृह्णा॒तु॒ हिर॑ण्यपा॒णि॒रच्छि॑द्रेण पा॒णिना॑ ॥७॥ (५)॥

अप॑हत॒मित्यप॑ऽहतम् । रक्षः॑ । वा॒युः । व॒ः । वि । वि॒न॒क्तु॒ ।
दे॒वः । व॒ः । स॒वि॒ता । प्रति॑ । गृ॒ह्णा॒तु॒ ।
हिर॑ण्यपा॒णि॒रिति॒ हिर॑ण्यऽपाणिः । अच्छि॑द्रेण । पा॒णिना॑ । श्रुं ॥७॥ (५)॥

---

2. P1 V1 S1 C अवाहन्या° for अवहत्यो°; P1 उत्तरे तत्; S1 C V1 उत्तरेत् for उत्तरतः; S1 C °गच्छति for °यच्छति
3. V1 S1 C om. त्वं
6. P1 before प्रति adds पूर्ववत्
7. P1 after हविः adds शूर्प
8. P1 om. first वा
11. P1 ins राक्षसं यजुः । on the margin with an indicative mark above परा°
12. P1 °भूतेषु for °पूतेषु

सा – कात्यायनः – “ अपहतमिति तुषान्निरस्यति ” (काश्रौ २.४.१९) इति । भूमौ पतितांस्तुषान् दूरे निःसारयेत् । ‘ रक्षः ’ इति मन्त्रशेषः । तुषेषु निगूढं यत् ᵛरक्षः तत् ᵛअपहतं दूरेऽपनीय मारितम् ॥

कात्यायनः – “ वायुर्व इति अपविनक्ति ” (काश्रौ २.४.२०) इति । कण्वोऽपि– “ अपविनक्ति वायुर्वो विविनक्तीति ” (काशब्रा २.१.३.२३) इति । हे तण्डुलाः, ᵛवः युष्मान् शूर्पचालनेन निष्पन्नः ᵛवायुः देवः ᵛविविनक्तु कणेभ्यः पृथक्करोतु । तमेतं पृथक्कारम्– “ अयं वाव वायुर्योऽयं पवते ” (काशब्रा २.१.३.२३) इत्यादिना कण्वः स्पष्टीचकार ॥

कात्यायनः – “ देवो व इति पात्र्यामोप्याभिमन्त्रयते ” (काश्रौ २.४.२१) इति । पाठस्तु– ‘ देवो वः सविता प्रति गृह्णातु हिरण्यपाणिरच्छिद्रेण पाणिना ’ इति । हे तण्डुलाः, ᵛवः युष्मान् ᵛहिरण्यपाणिः अङ्गुलीयकाद्याभरणयुक्तपाणिः ᵛसविता ᵛदेवः ᵛअच्छिद्रेण ᵛपाणिना अङ्गुलिविश्लेषरहितेन स्वकीयेन हस्तेन ᵛप्रतिगृह्णातु स्वीकरोतु । पात्र्यां यदा प्रक्षिप्यते तदा भूमौ स्कन्दनं मा भूदिति स्वकीयेन पाणिना पालयत्वित्यर्थः । तमेतमभिप्रायं तित्तिरिराह– “ अन्तरिक्षादिव वा एते प्रस्कन्दन्ति । ये शूर्पात् । देवो वः सविता हिरण्यपाणिः प्रतिगृह्णात्वित्याह प्रतिष्ठित्यै हविषोऽस्कन्दाय ” (तैब्रा ३.२.५) इति ॥७॥ (५) ॥

इति प्रथमेऽध्याये पञ्चमोऽनुवाकः ॥

आ– तुषान्निरस्यति–‘ अपहतम् ’ इति । ᵛअपहतम् । हन्तिर्गत्यर्थः । अपगतं ᵛरक्षः । तण्डुलान् विविनक्ति ‘ वायुर्वः ’, ‘ देवो वः ’ इति च तण्डुलदेवत्ये । ᵛवः तण्डुलान् युष्मान् ᵛवायुः ᵛविविनक्तु पृथक्करोतु । व्रीहितुषादिभ्यः पात्र्यामोप्य तण्डुलानभिमन्त्रयेत– ‘ देवो वः ’ इति । ᵛवः युष्मान् तण्डुलान् ᵛहिरण्यपाणिः हिरण्मयपाणिः ᵛसविता ᵛदेवः ᵛअच्छिद्रेण अशिथिलेन ᵛपाणिना हस्तेन ᵛप्रतिगृह्णातु ॥ ७ ॥ (५) ॥

[इति पञ्चमोऽनुवाकः]

---

1. P1 ins. राक्षसं यजुः । with an indication above अप°
2. P1 after तत् ins. अपि
3. P1 ins. वायुदेवतं यजुः । with an indication above वायुर्
5. S1 V1 वातः शूर्पो°; C वातः सूर्यो° for वाव वायुर्यो°
7. P1 ins. on the margin with makings above देवो°, तण्डुलदैवत्यं यजुः ।
9. V1 C S1 om. पाणिना
10. V1 C S1 पाणिना for हस्तेन
11. P1 शूर्पे ते for शूर्पात्
14. P1 om. इति प्रथमेऽध्याये
15. B1 Trans. हन्तिर्गत्यर्थः after °गतं
17. H1 करोति for °करोतु
18. H1 after युष्मान् adds हि

[अथ षष्ठोऽनुवाकः]

सा– पञ्चमेऽवघातमन्त्रा उक्ताः । षष्ठे कपालोपधानमन्त्रा उच्यन्ते—

धृष्टिरस्यपाग्ने अग्निमामादं जहि ॥
निष्क्रव्यादꣳ सेधा देवयजं वह ॥ १ ॥

धृष्टिः । असि । अप । अग्ने । अग्निम् । आमादमित्यामऽअदम् । जहि ।
निः । क्रव्यादमिति क्रव्यऽअदम् । सेध । आ । देवयजमिति देवऽयजम् । वह ॥ ठी ॥ १ ॥

कात्यायनः – " धृष्टिरसीत्युपवेषमादाय " (काश्रौ २.४.२६) इति । पलाशशाखाया मूलदेशे छिन्नः काष्ठभाग उपवेषः । तथा चापस्तम्बः– " मूलतः शाखां परिवास्योपवेषं करोति " (आपश्रौ १.६.६) इति । ञिधृषा प्रागल्भ्य इति धातुः । हे उपवेष, त्वं ʼधृष्टिः प्रगल्भः ʼअसि इति । तीक्ष्णानङ्गारान्नितस्ततोऽपनेतुं प्रभुत्वादस्य धृष्टत्वम् । तदाह कण्वः– " यद्वा एनेनाग्निं धृष्णूऽपचरति तस्माद्वाव धृष्टिः ' (काशब्रा २.१.४.२) इति ॥

कात्यायनः – " अपाग्न इत्यङ्गारान् प्राचः करोति " (काश्रौ २.४.२६) इति । ' उपवेषेण ' इति शेषः । तच्च कण्वो दर्शयति– " तेनाङ्गारान् प्राच उदूहत्यपाग्ने अग्निमामादं जहि निष्क्रव्यादꣳ सेधेति " (काशब्रा २.१.४.३) इति । आमम् अपक्वमत्तीत्यामादकोऽग्निर्लौकिकः । शव दाहे । क्रव्यं मांसमत्तीति क्रव्यादपरोऽग्निः । तावुभौ यागयोग्यौ न भवतः । यः पुनराहुत्याधारः स यागयोग्यः । तथाविधांस्त्रीनङ्गारान् गार्हपत्यात् प्राग्भागे पृथक्कृत्य तेषां मध्ये यागयोग्यताहीनौ द्वौ वर्जयितुं गार्हपत्यं संबोध्योच्यते– हे ʼअग्ने गार्हपत्य, ʼआमादम् ʼअग्निम् ʼअप ʼजहि । छन्दसि " व्यवहिताश्च " (पा. १.४.८२) इति सूत्रेणोपसर्गस्याक्रियासंबन्धः । परित्यज । तथा ʼक्रव्यादम् अग्निं ʼनिषेधः निःशेषेण दूरे गमय ॥

कात्यायनः – " आ देवयजमित्यङ्गारमाहृत्य " (काश्रौ २.४.२७) इति । ' वह ' इति मन्त्रशेषः । हे गार्हपत्य, ʼदेवयजं देवानां यागयोग्यं तृतीयमङ्गारम् ʼआवह स्वसमीपे समानय ॥ १ ॥

---

2. V1 S1 C °मन्त्रविषया उक्ताः for °मन्त्रा उक्ताः
7. P1 with a mark on धृष्टिः ins. in the margin उपवेषदेवतं यजुः ।
10. V1 S1 C प्रागल्भ्यम् for धृष्टत्वम्
12. P1 with a mark on अप° ins. in the margin अग्निदैवतं यजुः । S1 C अग्नय for अग्न°
13. P1 तं for तत्; P1 उद्वहति for उदूहन्ति
14. V1 S1 C कव for शव°
15. P1 om. भवतः
16. P1 °पत्य° for °पत्यात्; V1 S1 C °कृत्वा for °कृत्य; V1 S1 C रहितौ for °हीनौ;
17. P1 after गार्हपत्य ins. in brackets प्राग्भावे पृथक्कृत्य; V1 S1 C om. छन्दसि … °संबन्धः । [L 18]
19. P1 with marking on आ ins. आग्नेयं यजुः ।

आ – उपवेषमादत्ते– ‘ धृष्टिरसि ’ इति । उपवेषदेवत्यम् । ञिधृषा प्रागल्भ्ये । अनेन धृष्टमग्निमुपचरतीति ᵛधृष्टिः उपवेषः ᵛअसि । अङ्गारान् प्राचः करोति– ‘ अपाग्ने ’ इति । ‘ अपाग्ने ’, ‘ आ देवयजम् ’ इति च द्वे आग्नेये । हे भगवन् ᵛअग्ने, ᵛआमादम्, आममत्तीत्यामात्, तमामादं मनुष्यादेर्भोगार्थान्नादिपाचकम् ᵛअग्निम् ᵛअपजहि । जहातिस्त्यागार्थः । ‘ निष्क्रव्यादꣳ सेध ’ इति । ᵛक्रव्यादं क्रव्यमामिषमत्तीति क्रव्यात् । तं शवदाहकमग्निम् । सेधतिरपि यागार्थः । ᵛनिः निश्चयेन ᵛसेध त्यज । अङ्गारमाहरति– ‘ आ देवयजम् ’ इति । देवा अ(य ?)स्मिन्निज्यन्ते स देवयाट् । तं ᵛदेवयजम् अग्निम् ᵛआवह आनय ॥ १ ॥

ध्रु॒वम॑सि पृथि॒वीं दृ॑ꣳह ।
ब्र॒ह्म॒वनि॑ त्वा क्षत्र॒वनि॑ सजात॒वन्युप॑दधामि द्वि॒ष॒तो व॒धाय॑ ॥२॥

ध्रु॒वम् । अ॒सि॒ । पृ॒थि॒वीम् । दृ॒ꣳह॒ । ब्र॒ह्म॒वनीति॑ ब्र॒ह्म॒ऽवनि॑ । त्वा॒ । क्ष॒त्र॒वनीति॑ क्ष॒त्र॒ऽवनि॑ । स॒जा॒त॒वनीति॑ स॒जा॒त॒ऽवनि॑ । उप॑ । द॒धा॒मि॒ । द्वि॒ष॒तः । व॒धाय॑ ॥ टिं ॥२॥

सा – “ कपालेनावच्छादयति ध्रुवमसीति ” (काश्रौ २.४.२७) इति । देवयजमङ्गारं कपालेनावच्छादयेत् । पाठस्तु– ‘ ध्रुवमसि पृथिवीं दृꣳह । ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि द्विषतो वधाय ’ इति । हे कपाल, त्वं ᵛध्रुवं स्थिरम् ᵛअसि । अङ्गारस्योपरि वर्तमानमपीतस्ततो न पतसि । ᵛपृथिवीं भूमिं ᵛदृꣳह दृढीकुरु । पुरोडाशपाकवेलायां त्वया व्यवधाने सति भूमेरत्यन्तं दाहकृतं शैथिल्यं न भविष्यति । किं च ब्रह्मवनित्वादिविशेषणैर्विशिष्टं त्वाम् ᵛउपदधामि । देवयागहेतावङ्गारे स्थापयामि । किमर्थम् ? ᵛद्विषतः यागविघातरूपं द्वेषं कुर्वतः असुरस्य पाप्मनो वा ᵛवधाय हिंसार्थम् । वन षण संभक्ताविति धातुः । ब्रह्मणा ब्राह्मणेन वन्यते पुरोडाशनिष्पत्त्यर्थं सम्यक् क्रियत इति ᵛब्रह्मवनि । तथा ᵛक्षत्रवनि ᵛसजातवनि इति पदद्वयं योज्यम् । सजाताः समानकुले जाता यजमानस्य ज्ञातयः ॥ २ ॥

आ– अग्निं कपालेनावच्छादयति–‘ ध्रुवमसि ’ इति । षण्णां यजुषां कपालानि देवताः । त्रिभिः कपालैस्त्रीन् लोकान् यजमानो जयति । चतुर्थेन दिशः । यश्चैषु संस्क्रियते पुरोडाशः

---

2. H1 धृष्टिम् for धृष्टिः; B1 °विषा° for °वेष°; B1 after करोति ins. इति
4. H1 भोगार्थम् for भोगार्थ°; H1 om. निष्क्रव्यादं सेधेति [L5]
5. B1 om. क्रव्यम्; H1 °दाहादिकम् for °दाहकम्
12. P1 with marking on कपालेन ins. कपालदेवत्यं यजुः ।
13. P1 °च्छादयति for °च्छादयेत्
14. P1 मध्यस्थकपाल for कपाल
19. S1 C आज्ञातयः for ज्ञातयः

सोऽप्याधारवशात् त्रिलोकविग्रह एव भूत्वा देवताः प्रीणातीति प्रकरणार्थः । ध्रुव गतिस्थैर्ययोरित्यस्य रूपं ᵛध्रुवम् इति । स्थिरं त्वम् ᵛअसि । तत एव ᵛपृथिवीं ᵛदृꣳह दृढीकुरु । किं च इत्थंभूतं त्वामहम् ᵛउपदधामि । ᵛब्रह्मवनि । यत् कपालं ब्रह्म वनोति ब्रह्म संभजते तत् कपालं ब्रह्मवनि । तत् ᵛत्वा उपदधामि । एवं क्षत्रं यद्वनोति तत् ᵛक्षत्रवनि । समानजातान् यद्वनोति तत् ᵛसजातवनि । उपदधामीत्यनुषङ्गः । ᵛद्विषतः शत्रोः ᵛवधाय त्वामुपदधामि ॥ २ ॥

अग्ने॒ ब्रह्म॑ गृभ्णीष्व ध॒रुण॑मस्य॒न्तरि॑क्षं दृꣳह ।
ब्र॒ह्म॒वनि॑ त्वा क्षत्र॒वनि॑ सजात॒वन्युप॑ दधामि द्वि॒षतो॑ व॒धाय॑ ।
ध॒र्त्रम॑सि॒ दिवं॑ दृꣳह ।
ब्र॒ह्म॒वनि॑ त्वा क्षत्र॒वनि॑ सजात॒वन्युप॑दधामि द्वि॒षतो॑ व॒धाय॑ ॥३॥

अग्ने॑ । ब्रह्म॑ । गृ॒भ्णी॒ष्व॒ । ध॒रुण॑म् । अ॒सि॒ । अ॒न्तरि॑क्षम् । दृ॒ꣳह॒ ॥
ध॒र्त्रम् । (अ॒सि॒ ।) दिव॑म् । (दृ॒ꣳह॒) ॥ औ ॥ ३ ॥

सा – कात्यायनः – " सव्याऽङ्गुल्याऽशून्येऽङ्गारं निदधात्यग्ने ब्रह्मेति " (काश्रौ २.४.३०) इति । कपालस्योपरि द्रव्यान्तराभावात् तद्देशस्य शून्यत्वम् । ' गृभ्णीष्व ' इति मन्त्रशेषः । निधीयमानाङ्गाररूप हे ᵛअग्ने, ब्रह्मवत् प्रौढकर्मेदानीमस्माभिरनुष्ठीयमानं परब्रह्म वा ᵛगृभ्णीष्व गृह्णीष्व नाशकानां रक्षसां वधेनानुगृह्णीष्व । अत एव कण्व आह– " अग्निर्हि नाष्ट्राणाꣳ रक्षसामपहन्ता " (काशब्रा २.१.४.४) इति ।

कात्यायनः – " धरुणमिति पश्चात् " (काश्रौ २.४.३१) इति ।। पूर्वस्थापितस्य कपालस्य पश्चिमभागे ' धरुणम् ' इति मन्त्रेण कपालं स्थापयेत् । पाठस्तु– ' धरुणमस्यन्तरिक्षं दृꣳह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि द्विषतो वधाय ' इति । हे द्वितीय कपाल, ᵛधरुणं पुरोडाशस्य धारकम् ᵛअसि । अतस्त्वम् ᵛअन्तरिक्षं दृढीकुरु । पुरोडाशपाकवेलायामुत्पन्नया ज्वालयाऽन्तरिक्षलोकस्योपद्रवो यथा न भवति, तथा कुरु । यद्यप्येतत् कपालं ज्वालान्तरिक्षयोर्मध्ये व्यवधायकं न भवति तथाप्यन्तरिक्षदार्ढ्यार्थं कपालदेवता प्रार्थ्यते । अन्यत् पूर्ववत् ॥

---

1. B1 आधारतया for आधारवशात्; B1 °स्थैर्ये for स्थैर्ययोः
2. B1 असि for इति; B1 स्थितम् for स्थिरम्; B1 om. किं च
4. B1 om. यद्; H1 °जान् for °जातान्
12. P1 with marking on निदधाति ins. in the margin कपालदैवतं यजुः ।
14. V1 S1 C om. परब्रह्म वा
17. P1 before धरुणम् adds पूर्ववत्; S1 C पूर्वं for पूर्व°
18. S1 V1 C before मन्त्रेण adds पश्चादिति
20. P1 उत्पन्न for उत्पन्नया

कात्यायनः –“ पुरस्ताद्धर्त्रमिति ” (काश्रौ २.४.३२) इति । प्रथमकपालस्य पूर्वभागे ‘ धर्त्रम् ’ इति मन्त्रेण कपालं स्थापयेत् । पाठस्तु– ‘ धर्त्रमसि दिवं दृꣳह । ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युप दधामि द्विषतो वधाय ’ इति । हे तृतीयकपाल, ᵛधर्त्रं पुरोडाशस्य त्वं धारकम् ᵛअसि । शेषं पूर्ववद्व्याख्येयम् । ज्वालाऽग्रेण दाहाभावो द्युलोकस्य दार्ढ्यम् ॥ ३ ॥

आ– सव्याऽ[ङ्गुल्या] शून्येङ्गारं निदधाति– ‘ अग्ने ब्रह्म ’ इति । इदमाग्नेयम् । हे भगवन् ᵛअग्ने, ᵛब्रह्म ब्राह्मणं ᵛगृभ्णीष्व । अनुगृह्णीष्व । छान्दसो भकारः । “ हृग्रहोर्भश्छन्दसि ” (पा वा ३.१.८४) इति पाणिनिस्मृतेः । ᵛधरुणम् धारकम् ᵛअसि अतस्त्वम् ᵛअन्तरिक्षं ᵛदृꣳह । ‘ ब्रह्मवनि ’ इति व्याख्यातम् । ‘ धर्त्रं धारयितृ त्वम् ᵛअसि । अतः ᵛदिवं ᵛदृꣳह ॥ ३ ॥

विश्वाभ्यस्त्वाऽऽशाभ्य उप दधामि द्विषतो वधाय ।
चित स्थोर्ध्वचितो भृगूणामङ्गिरसां तपसा तप्यध्वम् ॥४॥ (६) ॥

विश्वाभ्यः । त्वा । आशाभ्यः । उप । दधामि । द्विषतः । वधाय ।
चितः । स्थ । ऊर्ध्वचित इत्यूर्ध्वऽचितः । भृगूणाम् । अङ्गिरसाम् । तपसा । तप्यध्वम् ॥ डुं ॥४॥
॥ (६) ॥

सा– कात्यायनः – “ विश्वाभ्य इति दक्षिणतः ” (काश्रौ २.४.३३) इति । मध्यमकपालस्य दक्षिणभागे ‘विश्वाभ्यः’ इति मन्त्रेण चतुर्थं कपालमुपदध्यात । पाठस्तु–‘ विश्वाभ्यस्त्वाऽऽशाभ्य उप दधामि द्विषतो वधाय ’ इति । हे चतुर्थकपाल, त्वां ᵛविश्वाभ्यः सर्वाभ्यः ᵛआशाभ्यः दिग्भ्यः सर्वदिग्दार्ढ्यार्थम् ᵛउपदधामि । अन्यत पूर्ववत् । ‘ आशाभ्यः ’ इति पदस्य तात्पर्यं कण्वो दर्शयति– “ चतुर्थमस्ति वा न वा तस्मादाह विश्वाभ्यस्त्वाऽऽशाभ्यः” (काशब्रा २.१.४.१०) इति । सर्वासु श्रुतिषु “ त्रय इमे लोकाः ” इति श्रुतत्वात् । पृथिव्यादिलोकत्रयं प्रसिद्धम् । कस्यांश्चिच्छ्रुतौ ‘ भूलोकभुवर्लोकस्वर्लोकमहर्लोकजनलोकतपोलोकसत्यलोकम् ’ इति सप्तानां लोकानां समाहारः श्रूयते । अतो महर्लोकादयः किं स्वर्गलोकस्यावयवा उतान्यच्चतुर्थं स्थानमिति शेषानिश्चयात् लोकविशेषनामधेयमनुच्चार्य साधारण्येन ‘ आशाभ्यः ’ इति श्रुतमित्यर्थः ॥

---

1. P1 with marking on पुर° ins. on the margin कपालदैवतं यजुः ।
3. V1 C S1 om. हे तृतीयकपाल ... असि ।
6. B1 om. गृभ्णीष्व । अनु°; H1 om. हृ ... स्मृतेः । [L 13]
15. V1 C S1 मध्य° for मध्यम°
20. V1 S1 C भूमौ for श्रुतौ
21. V1 S1 C जनो° for जन°; P1 om. सत्यलोकम्; V1 S1 C °सत्यलोकानाम् for °सत्यलोकम्
22. V1 S1 C विशेष° for शेष ।

कात्यायनः – "समं विभज्य द्वे दक्षिणत एवमुत्तरतश्चित स्थेति" (काश्रौ २.४.३४) इति । अष्टौ कपालानि पुरोडाशार्थम् । कपालचतुष्टयस्य स्थापितत्वात् अवशिष्टं यत् कपालचतुष्टयं तत् द्वेधा विभज्य, दक्षिणोत्तरयोर्दिशोः 'चित स्थ' इति मन्त्रेणोपदध्यात् । 'ऊर्ध्वचितः' इति मन्त्रशेषः । चिञ् चयन इति धातुः । तस्य क्विबन्तस्य 'चितः' इति बहुवचनम् । हे कपालविशेषाः, चत्वारो यूयं 'चितः 'स्थ प्रथमकपालस्योपचयकारिणो भवथ । तथैव 'ऊर्ध्वचितः उत्तरकालोपहितानां द्वितीयादिकपालानामप्युपकारिणो भवथ ॥

कात्यायनः – "भृगूणामित्यङ्गारैरभ्यूहति" (काश्रौ २.४.३८)इति । कपालान्यङ्गारैराच्छादयेदित्यर्थः । पाठस्तु–'भृगूणामाङ्गिरसां तपसा तप्यध्वम्' इति । हे कपालानि, यूयं भृगूनामकानामङ्गिरोनामकानां च देवर्षीणां तपोरूपेणानेनाग्निना 'तप्यध्वं तप्तानि भवत । अस्याग्नेस्तदीयतपोरूपत्वं भावयेदित्यर्थः । कण्वोऽपि– "एतद्वै तेजिष्ठं तेजो यद्भृग्वङ्गिरसाम्" (काशब्रा २.१.४.११) इति । एतदेवाभिप्रेत्य तित्तिरिराह– "भृगूणामङ्गिरसां तपसा तप्यध्वमित्याह । देवतानामेवैनानि तपसा तपन्ति" (तैब्रा ३-२.७) इति ॥ ४॥ ॥ (६)॥

इति प्रथमाऽध्याये षष्ठोऽनुवाकः ॥ ६ ॥

आ–^{v}विश्वाभ्यः ^{v}आशाभ्यः दिग्भ्यस्त्वाम् ^{v}उपदधामि । इतराणि कपालानि उपदधाति । ^{v}चितः ^{v}स्थ । चिञ् चयने, चित इति बहुवचनं पूर्वकपालोपहितविषयम् । चितानि स्थ भवत । ^{v}ऊर्ध्वचितः ऊर्ध्वं पश्चादुपहितकपालेषु चितो भवथ इत्यर्थः । अङ्गारैरभ्यूहति – 'भृगूणाम्' । भृगोरपत्यानि बहूनि भृगवः । तथाऽङ्गिरसः । तेषां ^{v}भृगूणाम् ^{v}अङ्गिरसां च ^{v}तपसा यूयं कपालानि ^{v}तप्यध्वम् ॥ ४ ॥ (६) ॥

[इति षष्ठोऽनुवाकः]

---

1. P1 with marking above स्थेति ins. on the margin पूर्ववत्
2. V1 S1 C अष्टा for अष्टौ
4. V1 S1 C om. तस्य and चित इति
7. P1 with marking above भृगूणाम् ins. on the margin पूर्ववत्
9. P1 om. च
10. V1 S1 C om. कण्वोऽपि ... अङ्गिरसामिति
11. V1 तपसां for तपसा
12. V1 S1 C तरन्ति for तपन्ति
13. P1 om. इति प्रथमाध्याये
15. B1 °वचने for °वचनम्

[अथ सप्तमोऽनुवाकः]

षष्ठे कपालोपधानविषया मन्त्रा उक्ताः । सप्तमे पेषणविषया मन्त्रा उच्यन्ते ।

शर्मास्यवधूतꣳ रक्षोऽवधूता अरातयः ।
अदित्यास्त्वगसि प्रति त्वाऽदितिर्वेत्तु ॥१॥

[शर्म । असि । अवधूतमित्यवऽधूतम् । रक्षः । अवधूता इत्यवऽधूताः । अरातयः ।
अदित्याः । त्वक् । असि । प्रति । त्वा । अदितिः । वेत्तु ॥ र्मों ॥ १ ॥]

सा- कात्यायनः – "कृष्णाजिनमादत्ते पूर्ववत्" (काश्रौ २.५.२) इति । पूर्वं यथाऽवघातार्थं कृष्णाजिनप्रयोगस्तद्वदत्राऽपि पेषणार्थं तत्प्रयोगस्तदर्थानां त्रयाणां मन्त्राणाम् । पाठस्तु- 'शर्मास्यवधूतꣳ रक्षोऽवधूता अरातयः । अदित्यास्त्वगसि प्रति त्वाऽदितिर्वेत्तु' इति । पूर्ववद्व्याख्येयम् । कण्वस्तु मन्त्रत्रय-विनियोगं स्पष्टमुदाजहार- "स कृष्णाजिनमादत्ते शर्मासीति तदवधूनोत्यवधूतꣳ रक्षोऽवधूता अरातय इति । तत्प्रत्यग्ग्रीवमुपस्तृणात्यदित्यास्त्वगसि प्रति त्वाऽदितिर्वेत्त्विति" (काशब्रा २·१·४·१२) इति ॥१॥

आ– 'शर्मासि' इति व्याख्यातम् ॥ १ ॥

धिषणाऽसि पर्वती प्रति त्वाऽदित्यास्त्वग्वेत्तु ।
दिव स्कम्भन्यसि धिषणासि पार्वतेयी प्रति त्वा पर्वती वेत्तु ॥२॥

धिषणा । असि । पर्वती । प्रति । त्वा । अदित्याः । त्वक् । वेत्तु ।
दिवः । स्कम्भनी । असि । धिषणा । असि । पार्वतेयी । प्रति । त्वा । पर्वती । वेत्तु ॥ षों ॥२॥

सा- कात्यायन : –"तस्मिन् दृषदं धिषणाऽसीति"(काश्रौसू २.५.३) इति । तस्मिन् कृष्णाजिने पेषणाधारभूतां शिलां स्थापयेत् । पाठस्तु- 'धिषणाऽसि पर्वती प्रति त्वादित्यास्त्वग्वेत्तु' इति । हे कृष्णाजिनस्थिते दृषत , त्वं पर्ववत्वात् पर्वताज्जातत्वाद्वा 'पर्वती पर्वतनामधेया असि । तथा 'धिषणा पेषणव्यापारस्य धारिकाऽपि 'असि । यद्वा- षणु दाने । धीः कर्मविषया बुद्धिः । तां सनोतीति धिषणा । ह्रस्वश्छान्दसः । यत एवमतः 'अदित्याः अनवखण्डितायाः पृथिव्याः 'त्वक् कृष्णाजिनं त्वां दृषदं 'प्रतिवेत्तु प्रतिजानातु । पृथिव्या आच्छादकत्वात् कृष्णाजिनं पृथिवीत्वगिति भूमेस्त्वगियं प्रतिवेत्तु प्रतिगृह्य त्वदवस्थानं जानातु । 'वेत्तु' इत्यस्य पदस्याभिप्रायं कण्वो दर्शयति–" प्रति त्वाऽदित्यास्त्वग्वेत्त्विति संज्ञा-

---

11. V1 S1 C om. प्रति ... वेत्तु
18. V1 S1 C पेषणाधारभूते हे शिले for हे ... दृषत् [L 19]
19. V1 S1 C पर्वती पर्वतात्मिका कृष्णाजिनरूपा for पर्ववत्वात् ... पर्वती; V1 S1 C om. पर्वतनामधेयासि । ... पृथिवीत्वागिति ... (L. 22)
23. V1 S1 C अनुजानातु for जानातु

मेवैतद् दृषदे च कृष्णाजिनाय च वदति नेदन्योऽन्यꣳ हिनसात इति " (काशब्रा २.१.४.१४) इति। एतदेतेन मन्त्रेण दृषदश्च कृष्णाजिनस्य च संज्ञामेव वदति, संमतिमेव ब्रूते । किमर्थम् ? दृषत्कृष्णाजिने परस्परं न हिनसात नैव हिंसां कुरुतामित्येतदर्थम् ॥

कात्यायनः – "पश्चाच्छम्यामुपोहत्युदीचीं दिव इति" (काश्रौ २.५.४) इति । दृषदः पश्चिमभागस्थोन्नत्यायाधस्तादुदगग्रां शम्यां स्थापयेत् । पाठस्तु– 'दिव स्कम्भन्यसि' इति । काष्ठरूपे हे शम्ये, त्वं 'दिवः द्युलोकस्य 'स्कम्भनी 'असि । अधःपतनवारणाय स्तम्भनकारिणी भवसि । शम्याया द्युलोकस्तम्भनहेतुत्वं तित्तिरिर्दर्शयति– "द्यावापृथिवी सहास्ताम् । ते शम्यामात्रमेकमहर्व्यैताꣳ शम्यामात्रमेकमहः" (तैब्रा ३.२.६) इति । अयमर्थः – पुरा प्रजापतिना सृष्टे द्यावापृथिव्यौ जलकाष्ठवत् परस्परं संश्लिष्टे अभूताम् । ते पश्चादेकस्मिन् दिने शम्याप्रमाणेन परस्परवियुक्ते अभूताम् । प्रतिदिनं तथेति विवक्षया वीप्सोक्ता । तयोः पुनः संश्लेषे यागस्यावकाशो न स्यात् । ततो विश्लेषाय 'दिव स्कम्भन्यसि' इति मन्त्र इति ॥

कात्यायनः – "दृषद्युपलां धिषणासीति" (काश्रौ २.५.५) इति । पेषणहेतुभूतां उपरितनशिलां दृषद्यधस्तनशिलायां स्थापयेत् । पाठस्तु– 'धिषणासि पार्वतेयी प्रति त्वा पर्वती वेत्तु' इति । उपरिभागवर्तिनि हे उपले, त्वं 'पार्वतेयी पर्वत्यभिधाना अधस्तनशिलायाः संबन्धिनी पुत्री बालस्वरूपा 'धिषणा 'असि । पेषणव्यापारस्य धारिका भवसि । अतस्त्वां मातृसमाना 'पर्वती 'प्रतिवेत्तु । पार्वतेयीशब्दस्य यथोक्तमभिप्रायं कण्वो दर्शयति– "कनीयसीव ह्येषा दुहितेव ह्येषा तस्मादाह पार्वतेयीति" (काशब्रा २.१.४.१६) इति । 'प्रति त्वा' इति पदस्याभिप्रायः । 'संज्ञामेव' इत्यादिना (काशब्रा २.१.४.१४) पूर्ववदभिहितः ॥ २॥

आ– कृष्णाजिने दृषदं निदधाति– 'धिषणाऽसि' इति । दृषद्देवत्यम् । Vधिषणा । षणु दाने । धीः कर्मबुद्धिः । तां सनोति ददातीति धिषणा । दृषत् Vपर्वती पर्वतोत्पन्ना त्वम् Vअसि । अतः Vअदित्याः पृथिव्याः Vत्वक् कृष्णाजिनं त्वां दृषदं Vप्रतिवेत्तु प्रतिजानातु । शम्यामुपदधाति– 'दिवः स्कम्भन्यसि' इति । शम्या देवता । स्कभ्नोतिः संस्तम्भकर्मा । Vदिवः अन्तरिक्षस्य Vस्कम्भनी संस्तम्भनी Vअसि । दृषद्युपलामुपदधाति– 'धिषणासि' इति । उपलादैवत्यम् । गायत्री । Vधिषणा बुद्धिदा । Vपार्वतेयी पर्वत्या अपत्यम् । Vत्वा त्वां [हे] पार्वतेयि Vपर्वती, ते माता Vप्रतिवेत्तु ॥ २ ॥

धा॒न्य॑मसि धिनु॒हि दे॒वान् धिनु॒हि य॒ज्ञं धिनु॒हि य॒ज्ञप॑तिम् ।
धि॒नु॒हि मां य॑ज्ञ॒न्य॑म् ।। ३ ।।

धा॒न्य॑म् । अ॒सि॒ । धि॒नु॒हि । दे॒वान् । धि॒नु॒हि । य॒ज्ञम् । धि॒नु॒हि । य॒ज्ञप॑ति॒मिति॑ य॒ज्ञऽप॑तिम् ।
धि॒नु॒हि । माम् । य॒ज्ञ॒न्य॒मिति॑ य॒ज्ञ॒ऽन्य॑म् ॥ श्या ॥ ३ ॥

---

16. P1 om. यथोक्तम्

24. B1 H1 °दैवत्या (corrected as °दैवत्यम्); B1 H1 trans. गायत्री after बुद्धिदा; B1 द्विपदा for बुद्धिदा

सा– कात्यायनः – "धान्यमसीति तण्डुलानोप्य" (काश्रौ २.५.६) इति । ओप्य दृषदि स्थापयित्वा । पाठस्तु– 'धान्यमसि धिनुहि देवान् धिनुहि यज्ञं धिनुहि यज्ञपतिम् । धिनुहि मां यज्ञन्यम्' इति । धिनोति-धातोः प्रीणनार्थस्य धान्यम् इति रूपम् । हे हविः, त्वं ᵛधान्यम् ᵛअसि प्रीणयितृ भवसि । अतः ᵛदेवान् अग्न्यादीन् ᵛधिनुहि प्रीणय । तथा ᵛयज्ञं यज्ञाभिमानिनं देवं ᵛधिनुहि । तथा ᵛयज्ञपतिं यज्ञस्वामिनं यजमानं ᵛधिनुहि । तथा ᵛयज्ञन्यम् यज्ञस्य नेतारं ᵛमाम् अध्वर्युं ᵛधिनुहि । आहुतिद्रव्यस्य स्वल्पत्वेऽपि मन्त्रसामर्थ्येन देवप्रीतिहेतुत्वं युक्तम् । तदाह तित्तिरिः – "धान्यमसि धिनुहि देवानित्याह । एतस्य यजुषो वीर्येण । यावदेका देवता कामयते यावदेका । तावदाहुतिः प्रथते । न हि तदस्ति । यत्तावदेव स्यात् । यावज्जुहोति" (तैब्रा ३.२.६) इति ॥ ३ ॥

आ– दृषदि तण्डुलानावपति– 'धान्यमसि' इति । 'धान्यमसि' इत्यादीनां षण्णां यजुषामपि हविर्देवता । धिनोतेः प्रीणनार्थस्य ᵛधान्यम् इति रूपम् । [हे] धान्य, यतस्त्वं प्रीणनभावः ᵛअसि अतः ᵛदेवान् ᵛधिनुहि । एवमेव ᵛयज्ञं ᵛयज्ञपतिं यज्ञाधिदेवतां ᵛधिनुहि । मां चाधिकारित्वेन यज्ञसंबन्धिनं ᵛयज्ञन्यं ᵛमां च ᵛधिनुहि ॥ ३ ॥

प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धाम् ।
देवो वः सविता प्रति गृह्णातु हिरण्यपाणिरच्छिद्रेण पाणिना ।
चक्षुषे त्वा महीनां पयोऽसि ॥ ४ ॥

प्राणाय । त्वा । उदानायेत्युत् ऽआनाय । व्यानायेति विऽआनाय ।
दीर्घाम् । अनु । प्रसितिमिति प्रऽसितिम् । आयुषे । धाम् ।
चक्षुषे । त्वा । महीनाम् । पयः । असि ॥ दुं ॥ ४ ॥

सा– कात्यायनः – "पिनष्टि प्राणाय त्वेति प्रतिमन्त्रम्" (काश्रौ २.५.६) इति ॥ पाठस्तु– 'प्राणाय त्वोदानाय त्वा व्यानाय त्वा' इति । प्रकर्षेण अनिति मुखे सर्वदा चेष्टत इति श्वासरूपो वायुः प्राणः । उदानित्यूर्ध्वं चेष्टत इत्युत्क्रान्तिजनको वायुरुदानः । व्यानिति व्याप्य चेष्टत इति शरीरव्यापको वायुर्बलहेतुर्व्यानः । हे तण्डुल हे हविः, त्वां ᵛप्राणाय प्राणरक्षार्थं पिनष्मीति शेषः । एवमुत्तरमन्त्रयोः

---

1. P1 with marking above धान्यम् ins. in the margin हविर्दैवत्यं यजुः ।
4. P1 °अभिधानं for °आभिमानिनं
7. V1 S1 C एका देवतां for एका देवता
8. V1 S1 C एतस्याः for एव स्यात्
9. H1 om. धान्यमसीति ।
11. B1 °भवत् for °भावः
21. P1 उदान इति for उदानिति

योज्यम् । कण्व एतत्तात्पर्यमाह– " प्राणाय त्वोदानाय त्वेति तत्प्राणोदानौ दधाति व्यानाय त्वेति तद्व्यानं दधाति दीर्घामनु प्रसितिमायुषे धामिति तदायुर्दधाति देवो वः सविता प्रतिगृह्णातु हिरण्यपाणिरच्छिद्रेण पाणिनेति सुप्रतिगृहीतं हविरसदिति चक्षुषे त्वेति चक्षुर्दधात्यैतद्वै जीवतो भवत्येवमेतज्जीवं देवानां हविर्भवति " (काशब्रा २.१.४.१९) इति ॥

कात्यायनः –" दीर्घामिति कृष्णाजिने प्रोहति " (काश्रौ २.५.७) इति । पिष्टमजिने स्कन्दयेत् । पाठस्तु– ' दीर्घामनु प्रसितिमायुषे धां देवो वः सविता प्रति गृह्णातु हिरण्यपाणिरच्छिद्रेण पाणिना ' इति । षिञ् बन्धन इति धातुः । प्रसितिः प्रबन्धः कर्मसंततिः । ˈआयुषे यजमानस्यायुरभिवृद्ध्यर्थम् । ˈदीर्घाम् अविच्छिन्नां ˈप्रसितिम् ˈअनु कर्मसंततिमनुलक्ष्य त्वां कृष्णाजिने पिष्टं ˈधां धारितवानस्मि । दधातेर्लुङि " बहुलं छन्दस्यमाङ्योगेऽपि " (पा ६.४ ७५) इति अडभावः । सत्यां यजमानस्य आयुर्वृद्धौ कर्मसंततिः प्रवर्तते, नान्यथा । एतदेवाभिप्रेत्य तित्तिरिराह– " दीर्घामनु प्रसितिमायुषे धामित्याह । आयुरेवास्मिन् दधाति " (तैब्रा ३.२.६) इति । ' देवो वः ' इत्यादि मन्त्रशेषः पूर्ववद्व्याख्येयः ॥

कात्यायनः –" चक्षुषे त्वेतीक्षते " (काश्रौ २.५.८) इति । हे हविः, त्वां ˈचक्षुषे यजमानस्य चक्षुरिन्द्रियपाटवाय, पश्यामीति शेषः ॥

कात्यायनः–" पिष्यमाणेषु निर्वपत्यन्यो महीनामित्याज्यम् " (काश्रौ २-५.९) इति । ' पयोऽसि ' इति मन्त्रशेषः । यदाध्वर्युस्तण्डुलान् पिनष्टि तदानीमाग्नीध्र आज्यं निर्वपेत् । हे आज्य, त्वं ˈमहीनां गवां ˈपयः ˈअसि क्षीरमसि । क्षीरेणोत्पादितमसीत्यर्थः । महीशब्दस्य गोवाचकत्वं कण्वो दर्शयति– " मह्यो वा एता एकेन नाम्ना यद्गावः " (काशब्रा २.१.४.२०) इति ॥ ४ ॥

आ– पिनष्टि ' प्राणाय त्वा ' इति । ᵛप्राणाय प्राणदानाय ᵛत्वा त्वां पिनष्मि, न तु हिंसायै । ᵛउदानाय तद्दानाय, ᵛव्यानाय व्यानदानाय, ᵛत्वा पिनष्मि । एतेषां जीवनायेत्येतत् कृष्णाजिने प्रक्षिपति – ' दीर्घामनु प्रसितिम् ' इति । षिञ् बन्धने इत्यस्य रूपं प्रसितिमि- (? रि) ति । प्रसितिशब्देनेह कृष्णाजिनमभिधीयते, न कपालादि । ᵛआयुषे आयुर्दानाय ᵛदीर्घां बृहतीं कृष्णाजिनाख्यां ᵛप्रसितिम् ᵛअनु ᵛधां दधामि । ' देवो वः ' इति व्याख्यातम् । ईक्षते – ' चक्षुषे ' इति । ᵛचक्षुषे चक्षुर्दानाय ᵛत्वा त्वां हविः ईक्षे इति शेषः । आज्यं

---

1. V1 S1 C om. कण्व एतत् ... भवति इति (L. 4)
5. V1 S1 C अक्षि for अजिने
8. V1 S1 C असि for अस्मि; V1 S1 C om. दधातेर् ... अडभावः । (L. 9)
12. P1 with marking obove चक्षुषे ins. on the margin पूर्ववत्; C om. कात्यायनः ...इति शेषः
14. P1 with marking above पिष्य° ins. on the margin आज्यदेवत्यं
17. P1 यजुः । एकेन नाम्ना यद् for एतेनाम्नायाद्
18. H1 om. पिनष्टि प्राणाय त्वेति; H1 पिनष्टि for पिनष्मि
19. H1 पिनष्टिं for पिनष्मि
23. H1 om. ईक्षते; H1 om. इति शेषः; B1 before आज्यं adds अत्र क्षेपणे

गृह्णाति ‘ महीनां पयः ’ इति । आज्यदैवतम् । महीति गोनाम । ᵛमहीनां गवां ᵛपयः । पयःशब्देन चाज्यं लक्ष्यते । अतस्त्वं तत् ᵛअसि ॥ ४ ॥

वे॒दो॑ऽसि वेद॒ येन॒ त्वं दे॑व वेद दे॒वेभ्यो॑ वे॒दोऽभ॑वः ।।
तेन॒ मह्यं॑ वे॒दो भ॑व ।। ५ ।। (७) ।।

वे॒दः । अ॒सि॒ । वे॒द॒ । येन॑ । त्वम् । दे॒व॒ । वे॒द॒ । दे॒वेभ्यः॑ । वे॒दः । अभ॑वः ।
तेन॑ । मह्य॑म् । वे॒दः । भ॒व॒ ॥ लुं ॥ ५ ॥ (७) ॥

सा– कात्यायनः – “ पत्नी वेदं प्रमुञ्चति वेदोऽसीति ” (काश्रौ ३·८·१) इति । पाठस्तु– ‘ वेदोऽसि वेद येन त्वं देव वेद देवेभ्यो वेदोऽभवः । तेन मह्यं वेदो भव ’ इति । अयं मन्त्रः प्रयोगानुसारेणान्यत्रोत्कर्षणीयः । संमार्जनार्थं दर्भमुष्टिना निर्मितः पदार्थो वेदः । तं पदार्थमृगादिवेदात्मना स्तौति । हे ᵛवेद दर्भमुष्टिनिर्मित हे पदार्थ, त्वं ᵛवेदः ᵛअसि । यद्वा– विद ज्ञान इति धातोरुत्पन्नत्वाद् वेदितासीत्यर्थः । ᵛयेन कारणेन ᵛत्वं ᵛवेद सर्वं जानासि । अतो हे ᵛदेव वेद, द्योतनात्मक वेदाख्यपदार्थ, ᵛदेवेभ्यः देवोपकारार्थं ᵛवेदः कर्मोपयुक्ततत्पदार्थवेदनशीलस्त्वम् ᵛअभवः भूतवानसि । ᵛतेन कारणेन ᵛमह्यं मदुपकारार्थमपि ᵛवेदः ᵛभव सत्कर्मादिज्ञापको भूयाः ॥ ५ ॥ (७) ॥

इति प्रथमेऽध्याये सप्तमोऽनुवाकः ॥ (७) ॥

आ– इह यजमानो वेदं बध्नाति । कर्मणोऽन्ते पत्नी वेदं प्रमुञ्चति – ‘ वेदोऽसि ’ इति । वेदो देवता । संमार्जनार्थं दर्भमुष्टिना निर्मितः पदार्थो वेदः । तमपि वेदात्मना स्तौति । विद ज्ञाने । ᵛवेदः वेदिता त्वम् ᵛअसि । ᵛयेन कारणेन ᵛत्वं वेदोऽसि अतस्त्वं यज्ञादिकं ᵛवेद जानासि, हे ᵛदेव । ᵛदेवेभ्यः देवानामिति विभक्तिव्यत्ययः । ᵛवेदः वेदिता अभीष्टार्थप्रकाशकः ᵛअभवः । अनेनैव कारणेन ᵛमह्यं ममापि ᵛवेदः ᵛअभवः भूयाः ॥ ५ ॥ (७) ॥

[इति सप्तमोऽनुवाकः]

---

1. H1 before आज्य° adds आज्यं पय इति
9. V1 S1 C after स्तौति ins इति;
10. V1 S1 C om. हे वेद
11. V1 S1 C देवोऽसि for वेद सर्वं जानासि; P1 om. वेद; V1 S1 C वेदन for वेद°
12. V1 S C ज्ञापक for कर्मोप°...शीलः ।
14. P1 om. प्रथमेऽध्याये
15. H1 om. इह...कर्मणोऽन्ते
16. H1 नष्टमार्जनार्थं for संमार्जनार्थं
17. B1 अनेन for येन; B1 यतः for अतः
18. B1 वेद for देव
19. B1 om. एव; H1 एवमा° for एव

[अथ अष्टमोऽनुवाकः]

सा– सप्तमे पेषणमन्त्रा उक्ताः । अष्टमे पुरोडाशश्रपणमन्त्रा उच्यन्ते—

देवस्यं त्वा सवितुः प्रंसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
सं वंपामि समाप ओषंधीभिः समोषधयो रसेंन ॥
सꣳ रेवतीर्जगंतीभिः सं मधुंमतीर्मधुंमतीभिः पृच्यन्ताम् ।
जनंयत्यै त्वा सꣳ यौमि ॥ १ ॥

[देवस्यं । त्वा । सवितुः । प्रसव इतिं प्रऽसवे । अश्विनोः । बाहुभ्यामितिं बाहुऽभ्याम् ।
पूष्णः । हस्ताभ्याम् ।]
सम् । वपामि । सम् । आपंः । ओषंधीभिः । सम् । ओषंधयः । रसेंन ।
सम् । रेवतीः । जगंतीभिः । सम् । मधुंमतीरिति मधुंऽमतीः ।
मधुंमतीभिरिति मधुंऽमतीभिः । पृच्यन्ताम् ।
जनंयत्यै । त्वा । सम् । यौमि ॥ छौं ॥ १ ॥

सा– कात्यायनः – “पात्र्यां सपवित्रायां पिष्टान्यावपति देवस्य त्वेति” (काश्रौ २.५.१०) इति । पाठस्तु– ‘देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । सं वपामि’ इति । ‘हस्ताभ्याम्’ इत्येतदन्तं पूर्ववद्व्याख्येयम् । ˈसंवपामि एतानि पिष्टानि पात्र्यां सम्यक् प्रक्षिपामि ॥

कात्यायनः – “उपसर्जनीरानयत्यन्यः । पवित्राभ्यां प्रतिगृह्णाति समाप इति” (काश्रौ २.५.१२,१३) इति । पिष्टेषु सेचनीया आपः उपसर्जन्यः । आग्नीध्रस्ता आनयेत । तदानीमध्वर्युः पवित्राभ्यां सहितो मन्त्रेण ताः प्रतिगृह्णीयात । पाठस्तु– ‘समाप ओषधीभिः समोषधयो रसेन । सꣳ रेवतीर्जगतीभिः सं मधुमतीर्मधुमतीभिः पृच्यन्ताम्’ इति । पृची सम्पर्के इति धातुः । ˈओषधीभिः पिष्टरूपाभिः ˈआपः इदानीं प्रतिगृहीतान्युदकानि ˈसं ˈपृच्यन्तां सम्यगेकीभवन्तु । तथा पिष्टाख्याः ˈओषधयः अपि ˈरसेन यथोक्तोदकरसेन ˈसं पृच्यन्ताम् । ˈरेवतीः रेवत्य आपः ˈजगतीभिः पिष्टाख्याभिः ˈसं पृच्यन्ताम । “रेवत्य आपो जगत्य ओषधयः” (काशब्रा २.२.१.२) इति कण्वेनाम्नातम् । ˈमधुमतीः माधुर्योपेताः आपः ˈमधुमतीभिः माधुर्योपेताभिः पिष्टरूपाभिरोषधीभिः ˈसं पृच्यन्ताम । अपामोषधीनां च परस्परप्रीतिहेतुत्वात् संपर्को युक्तः । तदाह तित्तिरिः– “आपो वा ओषधीर्जिन्वन्ति । ओषधयोऽपो जिन्वन्ति । अन्या वा एतासामन्या जिन्वन्ति । तस्मादेवमाह” (तैब्रा ३.२.८) इति । जिन्वन्ति प्रीणयन्तीत्यर्थः ॥

---

2. C श्रपणमन्त्राः, पुरोडाशविषयाः, for पुरोडाशश्रपणमन्त्राः ।
14. P1 with marking above देवस्य ins. on the margin सावित्रं यजुः ।
18. P1 with marking above समाप ins. on the margin अब्दैवत्यं यजुः ।
21. P1 om. रेवतीः
23. P1 om. औषधीभिः

कात्यायनः – “ संयौति जनयत्यै त्वेति ” (काश्रौ २.५.१४) इति । संयवनमपां पिष्टानां च मिश्रीकरणम । पाठस्तु– ‘ जनयत्यै त्वा संयौमि ’ इति । जलपिष्टरूप हे पदार्थद्वय, त्वां ᵛजनयत्यै यजमानस्य प्रजोत्पादनार्थं ᵛसंयौमि सम्यङ्मिश्रीकरोमि । यु मिश्रणामिश्रणयोरिति धातुः । अनयोर्द्रव्ययोर्यथा मिश्रणं तथा शुक्रशोणितमिश्रणेन यजमानस्य प्रजोत्पत्तिर्भवति । एतदेव तित्तिरिर्विशदयति– “ जनयत्यै त्वा संयौमीत्याह । प्रजा एवैतेन दाधार ” (तैब्रा ३.२.८) इति ॥ १ ॥

आ– पात्र्यां पिष्टान्यावपति– ‘ देवस्य त्वा ’ इति । व्याख्यातम् ॥ हविरेकत्र क्षिपति – ‘ संवपामि ’ इति । हविर्देवत्यम् । समित्येकीभावमाचष्टे । ᵛसंवपामि हविरेकत्र क्षिपामि । उपसर्जनीः प्रतिगृह्णाति – ‘ समापः ’ इति । आपो देवता । पृची संपर्के । ᵛसं ᵛपृच्यन्तां संगच्छन्ताम् । ᵛओषधीभिः पिष्टाख्याभिः ᵛआपः संगच्छन्ताम् । ᵛओषधयः पिष्टाख्येन ᵛरसेन उपसर्जनीभिः ᵛसं पृच्यन्तां संगच्छन्ताम् । ᵛरेवतीः रेवत्य आपः ᵛजगतीभिः पिष्टाख्याभिः ᵛसं पृच्यन्ताम् । “ रेवत्य आपो जगत्य ओषधयः ” (काशब्रा २.२.१.२) इति श्रुतेः । ‘ सं मधुमतीर्मधुमतीभिः ’ [इति] । मधुशब्दो मधुररसवचनः । मधुररसवत्यः । ᵛमधुमतीभिः मधुररसवतीभिः पिष्टाख्याभिः ᵛसं पृच्यन्ताम् । पुरोडाशभावाय संयौति । ‘ जनयत्यै त्वा ’ इति, ‘ इदमग्नेः ’ इति च द्वे हविर्देवत्ये । ‘ जनयत्यै त्वा संयौमि ’ । यजमानस्य ᵛजनयत्यै श्रीप्रजापशुभिर्यजमानं जनयितुं त्वां ᵛसंयौमि । यु मिश्रणे । त्वां समिश्रयामि, पुरोडाशस्य वा जनयत्यै त्वा संयौमि ॥ १ ॥

इ॒दम॒ग्नेरि॒दम॒ग्नीषोम॑योरि॒षे त्वा॑ ।
घ॒र्मो॑ऽसि वि॒श्वायु॑रु॒रुप्र॑था उ॒रु प्र॑थस्वो॒रु ते॑ य॒ज्ञप॑तिः प्रथताम् ॥ २ ॥

इ॒दम् । अ॒ग्नेः । इ॒दम् । अ॒ग्नीषोम॑योः । इ॒षे । त्वा॒ ।
घ॒र्मः । अ॒सि॒ । वि॒श्वायु॒रिति॑ वि॒श्वऽआ॑युः । उ॒रुप्र॑थ॒ इत्यु॒रुऽप्र॑थाः । उ॒रु । प्र॒थ॒स्व॒ ।
उ॒रु । ते॒ । य॒ज्ञप॑ति॒रिति॑ य॒ज्ञऽप॑तिः । प्र॒थ॒ता॒म् ॥ ट्रं ॥ २ ॥

सा– कात्यायनः – “ समं विभज्यासंहरिष्यन्नालभत इदमग्नेरिदमग्नीषोमयोरिति ” (काश्रौ २.५.१५) इति । मिश्रीकृतं पिष्टसमूहं समं यथा भवति तथा द्वेधा विभज्य भागद्वयं पुनरमेलयिष्यन्

---

7. B1 वपामि for क्षिपामि
9. B1 om. आपः, B1 om. पिष्टाख्येन
11. H1 संगच्छन्ताम् for संपृच्यन्ताम्, H1 om. ओषधयः
12. B1 मधुरवचनः । मधुमत्यो मधुरवत्यः for मधुररसवचनः । मधुररसवत्यः ।
13. H1 पुरोडाशं पृच्यतावाय for पुरोडाशभावाय
23. V1 S1 C एवमेव for अमेलयिष्यन्

पृथगेव स्पृशेत् । ᵛइदं पिष्टस्य प्रथमार्धम् ᵛअग्नेः अग्निसंबन्धि भवत्विति शेषः । ᵛइदं द्वितीयार्धम् ᵛअग्नीषोमयोः भवतु ॥

कात्यायनः – “ इषे त्वेत्याज्यमधिश्रयति ..” (काश्रौ २.५.१६) इति । आज्यस्य प्रविलापनार्थं तत्पात्रस्याग्नौ स्थापनमधिश्रयणम् । हे आज्य, त्वाम् ᵛइषे इष्यमाणवृष्ट्यर्थमाधिश्रयामीति शेषः । तदेतत् कण्वो विस्पष्टयति– “स इषे त्वेत्यधिश्रयति वृष्टये तदाह यदिषे त्वेति ” (काशब्रा २.२,१.५) इति ॥

कात्यायनः – “ घर्मोऽसीति पुरोडाशम् ” (काश्रौ २.५.१९) इति । ‘ अधिश्रयति ’ इत्यनुवर्तते । ‘ विश्वायुः ’ इति मन्त्रशेषः । घृ क्षरणदीप्त्योरिति धातुः । अतो घर्मशब्दो दीप्यमानं प्रवर्ग्यं ब्रूते । हे पुरोडाश ! त्वं श्रप्यमाणतया ᵛघर्मः ᵛअसि, दीप्यमानत्वात् प्रवर्ग्योऽसि । तथा ᵛविश्वायुः विश्वं कृत्स्नं यजमानसंबन्धि आयुर्यस्य पुरोडाशरूपस्य तत्रा (? वा) इति स त्वं विश्वायुः । एतमभिप्रायं तित्तिरिर्दर्शयति– “ घर्मोऽसि विश्वायुरित्याह । विश्वमेवाऽऽयुर्यजमाने दधाति ” (तैब्रा ३.२.८) इति । प्रवर्ग्यरूपत्वोपचारप्रयोजनं कण्वो दर्शयति– “ अथायमभिवृणक्ति पुरोळाशं घर्मोऽसि विश्वायुरिति यज्ञमेवैनं तत् करोति यथा घर्मं प्रवृञ्ज्यादेवं प्रवृणक्ति ” (काशब्रा २.२.१.६) इति ॥

कात्यायनः – “ उरुप्रथा इति प्रथयति यावत्कपालम् ” (काश्रौ २.५.२०) इति । कपालेष्वधिश्रितं पुरोडाशं कपालपरिमाणमनतिक्रम्य सर्वेषु कपालेषु संश्लेषयितुं प्रसारयेत् । पाठस्तु – ‘ उरुप्रथाः उरु प्रथस्वोरु ते यज्ञपतिः प्रथताम् ’ इति । प्रथ प्रख्याने इति धातुः । हे पुराडाश, त्वं स्वभावतः ᵛउरुप्रथाः उरु विस्तीर्णं यथा भवति तथा प्रथनेन प्रसरणेनोपेतः अतः कारणादिदानीमपि ᵛउरु विस्तीर्णं यथा भवति तथा ᵛप्रथस्व प्रख्यातो भव । किं च, ᵛते ᵛयज्ञपतिः तव यजमानः पुत्रपश्वादिभिः ᵛउरु विस्तीर्णं यथा भवति तथा ᵛप्रथतां प्रख्यातो भवतु ॥ २ ॥

आ– हविरालभते– ‘ इदमग्नेः ’ इति । ᵛइदम् अर्धम् ᵛअग्नेः । ᵛइदम् अर्धम् ᵛअग्नीषोमयोः इति । आज्यमधिश्रयति– ‘ इषे त्वा ’ इति । व्याख्यातम् । पुगेडाशमधिश्रयति ‘ घर्मोऽसि ’ इति । ‘ घर्मोऽसि ’ इत्यादीनां षण्णां यजुषां पुरोडाशो देवता । ᵛघर्मः ᵛअसि प्रवर्ग्यस्त्वमसि । अग्निर्वा विश्वायुः । विश्वस्य सर्वस्य आयुरिति, विश्वं सर्वमायुरस्येति ᵛविश्वायुः । [‘ विश्वायुः ’ इति] “ तदायुर्दधाति ” (माशब्रा १.२.२.७) इति श्रुतिः । पुरोडाशं प्रथयति –‘ उरुप्रथाः ’ इति । प्रथ प्रख्याने । यतस्त्वं स्वभावतः उरु विस्तीर्णं प्रथसे इति ᵛउरुप्रथाः अतस्त्वं ᵛउरु ᵛप्रथस्व ॥ किं च ᵛउरु ᵛते ᵛयज्ञपतिः पुत्रपश्वादिभिः उरु ᵛप्रथतां विस्तारमाप्नोतु प्रख्यातो भवतु ॥ २ ॥

---

3. P1 with marking above इषे ins. on the margin आज्यदैवत्यं यजुः
6. P1 with marking above घर्मो° ins. on the margin आज्यदैवत्यं यजुः
12. P1 यजुः प्रवृञ्ज्यात् for प्रवृज्यत्
16. V1 S1 C om. प्रथनेन ...तथा (L. 17)
17. V1 S1 C om. प्रख्यातो भव, V1 S1 C तथा for किं च; P1 om. तव...पश्वादिभिः, V1 S1 C om. विस्तीर्णं...तथा [L. 18]
19. B1 after इति । adds हविष इदमर्धमग्नेः
20. B1 before पुरोडाशम् adds अधिश्रयामि । अभ्याहरेः
21. B1 before प्रवर्ग्यः add इति
22. H1 om. विश्वं...अस्येति
23. H1 om. तदायुर...श्रुतिः, B1 trans विश्वायु after श्रुतिः; **H1** om. उरुप्रथाः

अ॒ग्निष्टे॒ त्वचं॒ मा हिं॑ꣳसीद॒न्तरि॑तꣳ॒ रक्षो॒न्तरि॑ता॒ अरा॑तयः ।
दे॒वस्त्वा॑ सवि॒ता श्र॑पयतु॒ वर्षि॑ष्ठे॒ऽधि॒ नाके॑ ॥३॥

अ॒ग्निः । ते॒ । त्वच॑म् । मा । हि॒ꣳसी॒त् । अ॒न्तरि॑त॒मित्य॒न्तःऽइ॑तम् । रक्षः॑ । अ॒न्तरि॑ता॒ इत्य॒न्तःऽइ॑ताः । अरा॑तयः । दे॒वः । त्वा॒ । स॒वि॒ता । श्र॒प॒य॒तु॒ । वर्षि॑ष्ठे । अधि॑ । नाके॑ ॥ छों ॥३॥

सा– कात्यायनः – “अग्निष्ट इत्यद्भिरभिमृशति” (काश्रौ २·५·२१) इति । पाठस्तु– ‘अग्निष्टे त्वचं मा हिꣳसीत्’ इति। हे पुरोडाश, श्रपणाय प्रवृत्तः 'अग्निः 'ते 'त्वचं त्वदीयं त्वक्सदृशमुपरितनभागं 'मा 'हिꣳ सीत् मा विनाशयतु । अतिदाहेन मषीभावो विनाशः, सोऽत्र मा भवत्वित्यर्थः । पूर्वमवघातपेषणाभ्यां हविषो य उपद्रवः आसीत्, यः श्रपणेन भविष्यति तत् सर्वमुदकस्पर्शेन शाम्यति । तमिमर्थं – “यदेवास्यावघ्नन्तो वा पिꣳषन्तो वा” (काशब्रा २.२.१.८) इत्यादिना कण्वः स्पष्टीचकार ॥

कात्यायनः – “पर्यग्निकरोत्यन्तरितमिति . सहाज्यम्” (काश्रौ २.५.२२) इति । पाठस्तु – ‘अन्तरितꣳ रक्षोऽन्तरिता अरातयः’ इति । 'अन्तरितं विनाशितम् । व्याख्यातमन्यत् । ज्वलद्भिर्दर्भैः परितो रक्षसां शोधनं पर्यग्निकरणम् । एतस्य पर्यग्निकरणस्य पशौ विहितत्वादत्रापि पर्यग्निकरणेन पुरोडाशः पशुत्वेनोपचर्यते । तदेतदाह तित्तिरिः– “घर्मो वा एषोऽशान्तः । अर्धमासेऽर्धमासे प्रवृज्यते । यत् पुरोडाशः । स ईश्वरो यजमानꣳ शुचा प्रदहः । पर्यग्नि करोति । पशुमेवैनमकः । शान्त्या अप्रदाहाय” (तैब्रा ३·२·८) इति । अयमर्थः – पुरोडाशो योऽस्ति स एव दीप्यमानोऽग्निर्भूत्वा न कदाचिदपि शाम्यति । प्रतिपक्षं तप्तकपालैः संतप्यमानत्वात् । स च तापेन यजमानं प्रदग्धुं समर्थः । तत्र पशूपचारेण पर्यग्निकरणेन पुरोडाशे पशूकृते सति प्रदीपाग्निरूपपरित्यागे न यजमानं प्रदहतीति । किं च पर्यग्निकरणेन रक्षसामत्र प्रवेष्टुं यच्छिद्रं संभावितं तन्निवार्यते । तदेतदाह कण्वः–“अथैनं पर्यग्निकरोत्यच्छिद्रमेवैनमेतत् समन्तमग्निना परिगृह्णाति नेदेनं नाष्ट्रा रक्षाꣳसि प्रमृशानित्यग्निर्हि नाष्ट्राणाꣳ रक्षसामपहन्ता” (काशब्रा २·२.१.१०) इति ॥

कात्यायनः – “देवस्त्वेति श्रपणम्” (काश्रौ २.५.२३) इति । कुर्यादिति शेषः । पाठस्तु – ‘देवस्त्वा सविता श्रपयतु वर्षिष्ठेऽधि नाके’ इति । हे पुरोडाश, 'वर्षिष्ठे अत्यन्तप्रवृद्धे 'नाके द्युलोकवर्तिनि

---

6. V1 S1 C त्वदीयां for त्वदीयं
9. V1 P1 पिꣳषन्तो for पिꣳषतो
12. P1 with marking above अन्त° ins. on the margin रक्षोदैवत्यं यजुः
14. V1 प्रचक्ष्यते S1 C प्रवक्ष्यते for प्रवृज्यते
18. S1 C पशु° for पशू°; V1 C त्यागेन for त्यागे न, V1 C after यजमानं adds न
21. P1 with markig above देव° ins on the margin पुरोडाशदैवतं यजुः

नाकनाम्न्यग्नौ त्वाम् ᵛअधि अधिश्रित्य ᵛसविता ᵛदेवः ᵛश्रपयतु पक्वं करोतु । मनुष्यस्य श्रपणकर्तृत्वं मा भूदित्यभिप्रेत्य ‘ देवस्त्वा ’ इत्युच्यते । तथाह कण्वः– “ न वा एतस्य मनुष्यः श्रपयिता तदेनं देव एव सविता श्रपयतु ” (काशब्रा २·२·१·११) इति । नाकनामकेनाग्निना रक्षांसि हन्यन्ते । तदाह तित्तिरिः– “पुरोडाशं वा अधिश्रितं रक्षांस्यजिघांसन् । दिवि नाको नामाग्नी रक्षोहा । स एवास्माद्रक्षांस्यपाहन्” (तैब्रा ३.२.८) इति ॥ ३ ॥

आ– अद्भिरभिमृशति– ‘ अग्निष्टे ’ इति । पुरोडाशदेवत्यं यजुः । ᵛते ᵛत्वचं ᵛमा ᵛहिंसीत् । ᵛरक्षः ᵛअन्तरितम् अवसानप्राप्तं निरस्तमित्यर्थः । ᵛअरातयः ᵛअन्तरिताः । तं श्रपयति– ‘ देवस्त्वा ’ इति । ᵛवर्षिष्ठे उत्कृष्टे ᵛनाके स्वर्गे ᵛअधि उपरि स्थितः ᵛसविता ᵛदेवः ᵛत्वा त्वां ᵛश्रपयतु अतिशयेन श्रपणं करोतु ॥ ३ ॥

मा भे॒र्मा॑ सं वि॑क्था॒ अत॑मेरुर्य॒ज्ञोऽत॑मेरु॒र्यज॑मानस्य प्र॒जा भू॑यात् ।
त्रि॒ता॑य त्वा द्वि॒ता॑य त्वैकु॒ता॑य त्वा ॥ ४ ॥ (८) ॥

मा । भे॒ः । मा । सम् । वि॒क्था॒ः । अत॑मेरुः । य॒ज्ञः । अत॑मेरुः । यज॑मानस्य । प्र॒जेति॑ प्र॒ऽजा । भू॒या॒त् । त्रि॒ता॑य । द्वि॒ता॑य । ए॒कु॒ता॑य । त्वा॒ ॥ ड़ ॥ ४ ॥ (८) ॥

सा – कात्यायनः – “ मा भेरित्यालभते ” (काश्रौ २.५.२४) इति । पाठस्तु – ‘ मा भेर्मा सं विक्थाः ’ इति । हे पुरोडाश, ᵛमा ᵛभेः भयं मा कार्षीः । ᵛमा ᵛसंविक्थाः चलनं मा कार्षीः । ञिभी भय, ओविजी भयचलनयोरिति धातुद्वयं क्रमेण योज्यम् । योऽयं पुरोडाशो मनुष्येणाध्वर्युणा कृतस्तमिमं मनुष्य एव स्पृशति । ततो भयचलनयोरभावः । तमेतमभिप्रायं कण्वो दर्शयति– “ सोऽभिमृशति मा भेर्मा संविक्था इति मा भैषीर्मा संविक्था यं त्वाऽमानुषं सन्तं मानुषोऽभिमृशामीत्येवैतदाह ” (काशब्रा २.२.१.१२) इति ॥

---

1. P1 तन्नाम्नि for नाकनाम्नि; V1 S1 C om. अधि;
   P1 S1 C before मनुष्यस्य adds स च and V1 सत्व°; Mahīdhara, whose commentary is closely identical with Sāyaṇa's says मनुष्यस्य श्रपणे कर्तृत्वं ... स च त सत्व has no place in the sentence and might have crept in due to the oversight of the scribe. But could be सत्य° ?
2. S1 V1 C तद्, P1 तदेतद् for तथा, M तथा च तस्य for न वा एतस्य, V1 एतं for एनं
4. P1 C S1 अजिघांसत for अजिघांसन्
6. B1 after यजुः । adds पर्यग्निं करोति । अन्तरितामिति । B1 तव for ते
8. H1 om. तं श्रपयति; B1 स्वर्गम् for स्वर्गे
16. S1 V1 C om. क्रमेण योज्यम्; P1 om. योऽयं

कात्यायनः – " अतमेरुरिति शृतावभिवासयति भस्मना वेदेनोपवेषेण वा " (काश्रौ २.५.२५) इति। शृतिः पाकः तस्मिन्निमित्तभूते सति सम्यक् पाकसिद्ध्यर्थमाच्छादयेत्। पाठस्तु- ' अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयात् ' इति। तमु ग्लाने* इति धातुः। ताम्यतीति तमेरुः। औणादिक एरुप्रत्ययः। अतमेरुः ग्लानिरहितः यज्ञः यागहेतुः पुरोडाशो यस्मात् तस्मादेतदभिवासनेन यजमानस्य प्रजा पुत्रपौत्रादिः अतमेरुः ग्लानिरहितः भूयात्। कण्वोऽभिवासनफलमाह– ' अथाभिवासयति नेन्नग्न इव सुषितः शयाता इति नेदेनमुपरिष्टान्नाष्ट्रा रक्षांस्यवपश्यान् (काशब्रा २.२.१.१३) इति। अस्याभिवासनस्य प्रयोजनं तित्तिरिः स्पष्टमाह– " मस्तिष्को वै पुरोडाशः। तं यन्नाभिवासयेत्। आविर्मस्तिष्कः स्यात्। अभिवासयति। तस्माद्गुहा मस्तिष्कः। भस्मनाऽभिवासयति। तस्मान्मांसेनास्थि छन्नम्। वेदेनाभिवासयति। तस्मात् केशैः शिरश्छन्नम् " (तैब्रा ३.२.८) इति। शिरस्यवस्थितो मेदसः खण्डो मस्तिष्कः। गुहा गूढः आच्छन्नः। मेदःस्थानीयस्य मस्तिष्कस्य मांसस्थानीयं तस्याच्छादकम्। तस्यापि केशस्थानीया वेदगतदर्भा आच्छादका इत्यर्थः।

कात्यायनः – " पाव्याङ्गुलिप्रक्षालनमाप्त्येभ्यो निनयत्यभितप्य प्रत्यगसंस्यन्दमानं त्रिताय त्वेति प्रतिमन्त्रम् " (काश्रौ २.५.२६) इति। तमेतं विनियोगं बौधायनः स्पष्टमाह– " अत्रैतत्पात्रीसंक्षालनं गार्हपत्यादङ्गारेणाभितप्य हृत्वान्तर्वेदि प्रतीचीनं तिसृषु लेखासु निनयति " (बौश्रौसू १.१०) इति। आपस्तम्बोऽप्याह– " अङ्गुलिप्रक्षालनं पात्रीनिर्णेजनं चोल्मुकेनाभितप्य स्फ्येनान्तर्वेदि तिस्रो लेखा लिखति प्राचीरुदीचीर्वा। तास्वसंस्यन्दयंस्त्रिर्निनयति प्रत्यगपवर्गम् " (आपश्रौ १.२५.१४-१५) इति। पाठस्तु– ' त्रिताय त्वा द्विताय त्वैकताय त्वा ' इति। हे पाव्यङ्गुलिप्रक्षालनोदक, त्वां त्रितनाम्ने देवाय निनयामि, तथा त्वां द्वितनाम्ने निनयामि, तथा त्वामेकतनाम्ने निनयामि। एतेषां त्रयाणां देवानामुत्पत्तिप्रकारस्तित्तिरिणा समाम्नातः– " देवा वै हविर्भूत्वाऽब्रुवन्। कस्मिन्निदं म्रक्ष्यामह इति। सोऽग्निरब्रवीत्। मयि तनूः संनिधद्ध्वम्। अहं वस्तं जनयिष्यामि...। ते देवा अग्नौ तनूः संन्यदधत। तस्मादाहुः। अग्निः सर्वा देवता इति। सोऽङ्गारेणापः। अभ्यपातयत्। तत एकतोऽजायत। स द्वितीयमभ्यपातयत्। ... ततो द्वितोऽजायत। स तृतीयमभ्यपातयत्। ततस्त्रितोऽजायत। यदद्भ्योऽजायन्त। तदाप्यानामाप्यत्वम्। यदात्मभ्योऽजायन्त। तदात्म्यानामात्म्यत्वम्। ते देवा आप्त्येष्वमृजत " (तैब्रा

---

1. V1 S1 C after वेदेन ins. वा
* धातुपाठे (१२०३) तमु काङ्क्षायां पठितः।
3. V1 S1 C om. ताम्यतीति . एरुप्रत्ययः [L 4]
4. V1 S1 C om. यस्मात्
5. V1 S1 C om. कण्वः
7. P1 यत्नात्, V1 S1 C यत्र° for यन्न°
8. P1 V1 S1 C M1 तस्मान्न° for भस्मना
9. P1 भिन्नम् for first & second छन्नम्
16. P1 om. सं°
17. P1 after पाठस्तु– adds त्रितद्वितैकतदैवतं यजुः।
19. V1 S1 C M1 देवान् for देवाः
21. V1 S1 C M1 अभ्यपालयत् for अभ्यपातयत्।
23. V1 S1 C P1 M1 आप्त्यानाम् for आप्यानाम्; V1 S1 C M1 अप्त्यत्वम् for आप्यत्वम्; V1 S1 C M1 om. यदात्मभ्यो ..आत्म्यत्वम्;
    V1 S1 C M1 तदेव for ते देवाः; V1 S1 C M1 मृक्षत for अजमृत

३.२.८) इति । देवाः पूर्वं व्रीह्यवघातादिना हविः संपाद्य बीजवधादिपापलेपः कस्मिन् पुरुषे मार्जनीय इति विचार्याग्निवचनेन स्ववीर्यमग्नौ स्थापितवन्तः । ततः सोऽग्निः सर्ववीर्यधारिणाङ्गारेणाऽद्देवतामभिलक्ष्य तद्वीर्यमपातयत् । तस्मादुत्पन्नानामेकतादिनामकानां देवविशेषाणामापो मातरः देवतात्मानः पितर इत्याप्त्यनामकत्वं च युक्तम् । कण्वोऽपि – " चतुर्धा विहितो ह वा अयमग्निरग्र आस " (काशब्रा २.२.१.१५) इत्यादिना बहुधा प्रपञ्चयामास ॥ ४ ॥ (८) ॥

[इति प्रथमाध्याये अष्टमोऽनुवाकः]

आ– पुरोडाशमभिमृशति– ' मा भेर्मा ' इति । मा भेः । ञिभी भये । ^{v}मा ^{v}भेः भयं मा कार्षीः । ओविजी भयचलनयोः । ^{v}मा ^{v}संविक्थाः चलनं मा कार्षीः, न चलितव्यमित्यर्थः । पुरोडाशमभिवासयति– ' अतमेरुः ' इति । तमु आभिकाङ्क्षायाम् । तमनशीलस्तमेरुर्न तमेरुः [अतमेरुः], इतरविषयाकाङ्क्षाविरोधी निराकाङ्क्षः । सर्वाकाङ्क्षापूरको वा ^{v}अतमेरुः ^{v}यज्ञः । अथवा तमु ग्लाने । सर्वग्लानिरहितो वा अतमेरुः । अतः ^{v}यजमानस्य अपि ^{v}प्रजा ^{v}अतमेरुः ^{v}भूयात् । पात्र्यङ्गुलिप्रक्षालनमाप्त्येभ्यो निनयति– ' त्रिताय त्वा ' इति । ' त्रिताय त्वा ' इत्यादीनां त्रितो द्वित एकतः क्रमेण देवता ज्ञेयाः । ^{v}त्रिताय ^{v}त्वा निनयामि । ^{v}द्विताय ^{v}त्वा निनयामि । ^{v}एकताय ^{v}त्वा निनयामि ॥ ४ ॥ (८) ॥

[इति अष्टमोऽनुवाकः]

[अथ नवमोऽनुवाकः]

सा – अष्टमे पुरोडाशमन्त्रा उक्ताः । नवमे वेदिमन्त्रा उच्यन्ते ।

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे॒ऽश्विनो॑र्बा॒हुभ्यां॑ पूष्णो हस्ता॑भ्याम् ।
आ द॑देऽध्व॒रकृतं॑ दे॒वेभ्यः॑ ।
इन्द्र॑स्य बा॒हुर॑सि॒ दक्षि॑णः स॒हस्र॑भृष्टिः श॒तते॑जाः ।
वा॒युर॑सि ति॒ग्मते॑जा द्वि॒ष॒तो व॒धः ॥१॥

---

2. P1 om. अग्नि°; P1 om. अव्°
6. P1 om. प्रथमाध्याये
11. B1 तमेरुर्यज्ञः for first अतमेरुः; B1 om. अपि
12. B1 आप्त्येभ्यो for आप्येभ्यो
13. H1 त्रित द्वितैकताक्रमेण for त्रितो द्वित एकतः क्रमेण

[देवस्य । त्वा । सवितुः । प्रसव इति प्रऽसवे । अश्विनोः ।
बाहुभ्यामिति बाहुऽभ्याम् । पूष्णः । हस्ताभ्याम् ।]
आ । ददे । अध्वरकृतमित्यध्वरऽकृतम् । देवेभ्यः ।
इन्द्रस्य । बाहुः । असि । दक्षिणः ।
सहस्रभृष्टिरिति सहस्रऽभृष्टिः । शततेजा इति शतऽतेजाः ।
वायुः । असि । तिग्मतेजा इति तिग्मऽतेजाः । द्विषतः । वधः ॥ ध्रूः ॥ १ ॥

सा– कात्यायनः – “ देवस्य त्वेति स्फ्यमादाय ” (काश्रौ २.६.६) इति । स्फ्यशब्देन दारुमयोऽरत्निप्रमाणः खननहेतुर्यज्ञायुधविशेष उच्यते । कण्वोऽपि तत्स्वीकारं विधत्ते– “ तमादत्ते देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आ ददेऽध्वरकृतं देवेभ्य इति ” (काशब्रा २.२.२.३) इति । तदेतत् ‘ देवस्य त्वा ’ इत्यादिकं ‘ हस्ताभ्याम् ’ इत्येतदन्तं पूर्वमेव व्याख्यातम् । देवेभ्यः देवोपकारार्थम् । अध्वरकृतं वेदिखननादिद्वारेण अध्वरं यज्ञं करोतीत्यध्वरकृत् । अत एव कण्व आह– “ यज्ञो वा अध्वरो यज्ञकृतं देवेभ्य इत्येवैतदाह ” (काशब्रा २.२.२.४) इति । तादृशं स्फ्यम् आददे स्वीकरोमि । स्फ्यस्य वज्रांशत्वात् खननादिसामर्थ्यमस्ति । तस्य वज्रांशत्वं तित्तिरिराह– “ इन्द्रो वृत्राय वज्रं प्राहरत् । स त्रेधा व्यभजत् । स्फ्यस्तृतीयं रथस्तृतीयं यूपस्तृतीयम् ” (तैसं ५.२.६) इति । कण्वस्तु– “ इन्द्रो ह वै यत्र वृत्राय ” (काशब्रा २.२.२.१) इत्यादिना स्फ्यस्य वज्रचतुर्थांशत्वं प्रपञ्चयामास ॥

कात्यायनः – “ सतृणं सव्ये कृत्वा दक्षिणेनालभ्य जपतीन्द्रस्य बाहुरिति ” (काश्रौ २.६.६) इति । सतृणं केनचित् तृणेन सहितं स्फ्यमित्यर्थः । पाठस्तु– ‘ इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजाः । वायुरसि तिग्मतेजा द्विषतो वधः ’ इति । वज्रांशरूप स्फ्य, त्वं इन्द्रस्य दक्षिणः बाहुः असि । तेन बाहुना धृतत्वात् तत्समानवीर्योपेतत्वाद्वा तद्रूपत्वोपचारः । अनेनोपचारेण तद्बाहुसमानवीर्यत्वं कण्वो दर्शयति– “ एष वै वीर्यवत्तमो यदिन्द्रस्य बाहुर्दक्षिणस्तद्वीर्यमेवास्मिन्नेतद्दधाति यदाहेन्द्रस्य बाहुरसि दक्षिण इति ” (काशब्रा २.२.२.५) इति । कथंभूतः स्फ्यः ?

---

7. P1 with marking above देवस्य ins. on the margin स्फ्यदैवत्यं यजुः ।
10. P1 om. तदेतद्
12. V1 S1 C M1 वा वे तद् for एवैतद्
15. V1 S1 C M1 वज्रे for वज्र°
16. P1 with marking above °मास ins. on the margin कण्वः । इन्द्रो वै यत्र वृत्राय वज्रं प्रजहार स ह प्रहृतो वज्रश्चतुर्धा बभूव यावद्वा स्फ्यस्तृतीयं वा यावद्वा यूपस्तृतीयं वा यावद्वा रथस्तृतीयं वा यावद्वा स्फ्यस्तृतीयं वा यावद्वा शरस्तृतीयं वा यदशीर्यत तस्मा […] नामैवं स वज्रश्चतुर्धाभवत्ततोद्वासां ब्राह्मणा यज्ञे चरन्ति स्फ्येन च यूपेन च रथेन च शरेण च राजन्यबन्धवः संग्रामे इति ।
17. S1 C M1 after बाहुर् ins. असि
18. P1 with marking above इन्द्रस्य ins. on the margin वज्रदैवत्यं यजुः ।
22. V1 M1 S1 C om. एतद्

^{V}सहस्रभृष्टिः । भृष्टिर्भर्जनं पाको मारणमित्यर्थः । सहस्रसंख्यानां शत्रूणां भृष्टिर्यस्यासौ सहस्रभृष्टिः । यथा वज्रोऽसुराणां मारकस्तथा स्फ्योऽपि पाप्मनां विनाशकः । ^{V}शततेजाः । यथा शतसंख्याका धारा भवन्ति दीप्यमानाः तथा स्फ्यस्यापि वज्रांशत्वाच्छततेजस्त्वोपचारः । ^{V}वायुः ^{V}असि ^{V}तिग्मतेजाः । न केवलमिन्द्रसदृशः किंतु वायुसदृशोऽप्यसि । यथा वायुस्तीक्ष्णामग्निज्वालामुत्पादयँस्तिग्मतेजास्तथा स्फ्योऽपि वक्ष्यमाणस्तम्बच्छेदरूपं तीव्रं कर्म कुर्वंस्तिग्मतेजा इत्युच्यते । ^{V}द्विषतः ^{V}वधः । अनुष्ठानद्वेषिणोऽसुरादेर्वधहेतुः ॥१॥

आ– स्फ्यमादत्ते–' देवस्य त्वा ' इति । व्याख्यातम् । ' आददे ', ' इन्द्रस्य बाहुरसि ' इति द्वे स्फ्यदेवत्ये । ^{V}आददे गृह्णामि । अध्वरं करोतीत्यध्वरकृत्, तम् ^{V}अध्वरकृतम् ^{V}देवेभ्यः अर्थाय । आलभ्य जपति– ' इन्द्रस्य ' इति । ^{V}इन्द्रस्य ^{V}दक्षिणः ^{V}बाहुः त्वम् ^{V}असि । ^{V}सहस्रभृष्टिः, भृष्टिर्धारा, बहुधारः । ^{V}शततेजाः । तेजतिरुत्साहे । बहूनि तेजांसि यस्य सः शततेजाः । ^{V}वायुः त्वम् ^{V}असि ^{V}तिग्मतेजाः । [तिग्मं तेजः] उत्साहो यस्य स तिग्मतेजाः । द्विषतः । द्विष अप्रीतौ । ^{V}द्विषतः शत्रोः वधकः ^{V}असि ॥१॥

पृ॒थि॒व्यै वर्मा॑सि॒ पृथि॑वि देवयजनि ।
ओष॑ध्यास्ते॒ मूल॒ं मा हि॑ꣳसिषम् ॥२॥

पृ॒थि॒व्यै । वर्म॑ । अ॒सि॒ । पृथि॑वि । दे॒व॒य॒ज॒नीति॑ देवऽयजनि ।
ओष॑ध्याः । ते॒ । मूल॑म् । मा । हि॒ꣳसि॒ष॒म् ॥ कं ॥ २ ॥

सा– कात्यायनः – " तेन स्तम्बयजुर्हरिष्यन् ... । वेद्यां तृणं निदधात्युदक् पृथिव्यै वर्मासीति " (काश्रौ २.६.१४,१५) इति । हे तृण, त्वं ^{V}पृथिव्यै वेदिस्थानरूपाया भूमेः ^{V}वर्म ^{V}असि । कवचस्थानम् असि । यथा कवचेन शस्त्रप्रहारोपद्रवः परिह्रियते तथा स्फ्येन वेदिखननावसरे भूम्युपद्रवस्तृणेन परिह्रियते ॥

कात्यायनः – " पृथिवि देवयजनीति तृणेऽन्तर्हिते प्रहरति " (काश्रौ २.६.१६) इति । ' ओषध्यास्ते मूलं मा हिꣳसिषम् ' इति मन्त्रशेषः । हे ^{V}देवयजनि, देवयागाश्रयभूते ^{V}पृथिवि, ^{V}ते त्वदीयायाः ^{V}ओषध्याः तृणरूपायाः ^{V}मूलं ^{V}मा ^{V}हिꣳसिषं मा विनाशयामि । अत्र ' देवयजनि ' इति

---

1. V1 M1 S1 C om. first भृष्टिर्
5. M1 °भेद°. P1 °[आ] धाद° for °छेद°
10. B1 भृष्टिद्वार, H1 भृष्टिद्वारा– both readings are corrupt. We have therefore corrected the passage as above. Uvvaṭa whom Ānandabodha follows, explains सहस्रभृष्टिः सहस्रभारः which does not seem to be correct since स्फ्य, the spade used for digging here is compared with the Thunderbolt of Indra–see Sāyaṇa– यथा वज्रोऽसुराणां मारकस्तथा स्फ्योऽपि
11. B1 after उत्साहो ins. तेज एव
17. P1 with marking above पृथिव्यै ins on the margin वेदिदैवत्यं यजुः ।

विशेषणेन वान्तिलोहिताभ्यामापादितमशुचित्वं निवार्यते। तदाह तित्तिरिः– " विषाद्वै नामासुर आसीत्। सोऽबिभेत् । यज्ञेन मा देवा अभिभविष्यन्तीति। स पृथिवीमभ्यवमीत्। साऽमेध्याऽभवत् । अथो यदिन्द्रो वृत्रमहन्। तस्य लोहितं पृथिवीमनु व्यधावत्। साऽमेध्याऽभवत्। पृथिवि देवयजनीत्याह। मेध्यामेवैनां देवयजनीं करोति। ओषध्यास्ते मूलं मा हिंसिषमित्याह। ओषधीनामहिंसायै " (तैब्रा ३.२.९) इति। विषमत्ति भक्षयतीति विषात्। अत एवासुर एतन्नामकः ॥ २ ॥

आ– प्रहरति ' पृथिव्यै वर्म ' इति। वेदिर्देवता। ^{v}पृथिव्यै ^{v}वर्म ^{v}असि पृथिव्या वर्म सारभूतं योग्यभयावरणं वृतस्थानं वर्मासि। अतो वेदिः ' पृथिवी ' इति संबोध्यते। हे ^{v}पृथिवि। देवा इज्यन्ते यस्यां सा तत्संबोधनं [देवयजनीति]। हे ^{v}देवयजनि, ^{v}ते तव संबन्धिन्याः ^{v}ओषध्याः ^{v}मूलं ^{v}मा ^{v}हिंसिषम्। [पुरुष-] व्यत्ययः। वज्रेण मा प्रहरतु ॥२॥

व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान
देव सवितः परमस्यां पृथिव्याꣳ शतेन पाशैः।
योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ॥ ३ ॥

व्रजम्। गच्छ। गोष्ठानम्। गोस्थानमिति गोऽस्थानम्।
वर्षतु। ते। द्यौः। बधान। देव। सवितरिति सवितः।
परमस्याम्। पृथिव्याम्। शतेन। पाशैः।
यः। अस्मान्। द्वेष्टि। यम्। च। वयम्।
द्विष्मः। तम्। अतः। मा। मौक् ॥ च्व्यः ॥ ३ ॥

सा– कात्यायनः – " व्रजं गच्छेति पुरीषमादत्ते " (काश्रौ २.६.१७) इति। स्फ्यस्य प्रहारेण निष्पन्ना या धूलिः सा पुरीषमित्युच्यते। ' गोष्ठानम् ' इति मन्त्रशेषः। हे पुरीष, त्वं ^{v}व्रजं ^{v}गच्छ। व्रजन्ति

---

1. V1 S1 P1 C चातिलोहिताभ्याम्, M1 चातिलोहितशत्रुणा for वान्तिलोहिताभ्याम्; M1 उपपादितम for आपादितम्
2. V1 S1 C M1 अमेध्यो° for अमेध्या°
6. H1 om. वर्मेति...पृथिव्यै।
7. B1 वृतं for वृत°
9. B1 मा विनाशिषं वज्रेण प्रहरन् for पुरुष°...प्रहरतु
19. P1 C V1 S1 इयं for या

गच्छन्ति गावोऽवस्थातुं यस्मिन् देशे स देशो व्रजः । तं व्रजं प्रति गच्छ । ^{v}गोष्ठानम् गवां स्थानम् । इदानीमवस्थितिर्यत्र [देशे] स व्रजो गोष्ठानम् । एवं वर्तमानं गोभिरुपेतं तदीयदेशं गच्छ ॥

कात्यायनः – " वर्षतु त इति वेदिं प्रेक्षते " (काश्रौ २.६.१८) इति । ' द्यौः ' इति मन्त्रशेषः । हे वेदे, ^{v}ते त्वदर्थं ^{v}द्यौः द्युलोकाभिमानी देवः ^{v}वर्षतु जलसेचनं करोतु । वृष सेचन इति धातुः । खननोपद्रवपरिहारो वर्षणस्य प्रयोजनम् । तदाह कण्वः –" यत् खनति तदद्भिः सꣳरोहयति । तदद्भिः शमयति " (काशब्रा २.२.२.९) इति ॥

कात्यायनः – " बधानेत्युत्करे करोति " (काश्रौ २.६.१९) इति । उत्करो नाम वेदेरुत्तरभागे तृणधान्यादिपरित्यागप्रदेशः । खननसमानीतां धूलिं तस्मिन्नुत्करे परित्यजेत् । पाठस्तु– ' बधान देव सवितः परमस्यां पृथिव्याꣳ शतेन पाशैर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ' इति । हे ^{v}सवितः प्रेरक ^{v}देव, ^{v}परमस्यां ^{v}पृथिव्यां ^{v}शतेन ^{v}पाशैः शतसंख्याभिर्बन्धनरज्जुभिः ^{v}बधान । अस्मद्विरोधिनोऽसुरस्याऽऽनीतायां धूल्यां निगूढस्य बन्धनं कुरु । भूमेरन्तिमप्रदेशे योऽन्धतामिस्रो नरकोऽस्तीति [श्रूयते] तस्मिन् बधानेत्यर्थः । तथाह कण्व –" देवमेवैतत् सवितारमाहान्धे तमसि बधानेति यदाह परमस्यां पृथिव्याम् " (काशब्रा २.२.२.९) इति । अत्र बन्धनीयः ^{v}यः शत्रुः ^{v}अस्मान् ^{v}द्वेष्टि ^{v}यं च बन्धनीयं शत्रुं ^{v}वयं ^{v}द्विष्मः ^{v}तम् एतमुभयविधमपि ^{v}अतः अस्मादन्धतामिस्रनरकात् ^{v}मा ^{v}मौक् कदाचिदपि मा मुञ्च ॥ ३ ॥

आ– पुरीषमादत्ते–' व्रजं गच्छ ' इति । पुरीषदैवतम् । व्रज्यत इति व्रजम् । अवस्थातुं व्रजन्ति गच्छन्ति यत् स्थानं गावस्तद् व्रजं (? जः) गोवाटो [वा] उच्यते । गोस्थानं गोभिः परिवृतं स्थानं गच्छेति । वेदिं प्रेक्षते – ' वर्षतु ' इति । ^{v}ते तव ^{v}द्यौः द्युलोकः ^{v}वर्षतु । वृष सेचने । सेचनं करोतु । उत्करे करोति–' बधान ' इति । सवितृदेवत्यम् । हे ^{v}सवितः ^{v}देव । ^{v}यः शत्रुः ^{v}अस्मान् ^{v}द्वेष्टि तं शत्रुम् । ^{v}परमस्या ^{v}पृथिव्यां भूमेरन्त्यस्थाने अन्धतामिस्रो नाम यो नरकस्तस्मिन् ^{v}शतेन ^{v}पाशैः बहुभिः पाशैः ^{v}बधान । ^{v}यं ^{v}च ^{v}वयं ^{v}द्विष्मः तम् अपि बधान । किं च ^{v}तम् ^{v}अतः ^{v}मा ^{v}मौक्, तं शत्रुमस्मादन्धतमसः सकाशात् ^{v}मा ^{v}मौक् । मुच्लृ मोक्षणे । मा मुञ्च ॥ ३ ॥

---

2. S1 V1 C M1 यस्य व्रजस्य, P1 यस्तं व्रजस्य for यत्र [देशे] the readings are corrupt, which, we have corrected as above; M1 गोष्ठं स एव वर्तमानः; V1 C S1 गोष्ठान एव वर्तमानः । for गोष्ठानम् । एवं वर्तमानं
3. P1 with marking above वर्षतु ins. on the margin वेदिदैवत्यं यजुः ।
16. B1 om. पुरीषम् ..गच्छेति ।
18. B1 °वृत्तं for °वृतं
19. B1 before सेचनं adds तव; H1 om. उत्करे करोति
21. B1 after बधान adds योऽस्मान् द्वेष्टि

अपाररुं वध्यासं पृथिव्यै देवयजनात् ।
व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्याꣳ शतेन पाशैः ।
योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ।
अररो दिवं मा पप्तो द्रप्सस्ते द्यां मा स्कन् ।
व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्याꣳ शतेन पाशैः । ५
योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ॥ ४ ॥

अप । अररुम् । वध्यासम् । पृथिव्यै । देवयजनादिति देवऽयजनात् ।
[व्रजम् । गच्छ । गोष्ठानम् । गोस्थानमिति गोऽस्थानम् । वर्षतु । ते । द्यौः । बधान ।
देव । सवितरिति सवितः । परमस्याम् । पृथिव्याम् । शतेन । पाशैः ।
यः । अस्मान् । द्वेष्टि । यम् । च । वयम् । द्विष्मः । तम् । अतः । मा । मौक् ।]] १०
अररो इत्यररो । दिवम् । मा । पप्तः । द्रप्सः । ते । द्याम् । मा । स्कन् ॥ ध्युं ॥ ४ ॥

सा– कात्यायनः – “ अपाररुमिति द्वितीयं प्रहरणादि ” (काश्रौ २ ६.२१) इति । पाठस्तु– ‘ अपाररुं वध्यासं पृथिव्यै देवयजनात् ’ इति । अररुनामको योऽसुरः पृथिव्यां वेदिस्थाने गूढाशये सुप्तस्तमेतमसुरं ‘पृथिव्यै ‘देवयजनात् पृथिव्याः संबन्धिनो देवयजनाख्यात वेदिस्थानात् ‘अपवध्यासम् । अपनीय यथा हतो भवति तथा करवाणि । अनेन मन्त्रेण द्वितीयवारं पूर्ववत् प्रहरेत् । तदेतदररुभयं १५ तित्तिरिर्दर्शयति– “ अररुर्वै नामासुर आसीत् । स पृथिव्यामुपम्लुप्तोऽशयत । तं देवा अपहतोऽररुः पृथिव्या इति पृथिव्या अपाघ्नन् ” (तैब्रा ३.२.९) इति । कण्वोऽपि – “ अररुर्ह वै नाम ” (काशब्रा २.२.२.१०) इत्यादिना दर्शयति स्म । ‘ व्रजम ’ इत्यादिमन्त्रत्रयप्रयोगः पूर्ववत् । पाठस्तु– ‘ व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्याꣳ शतेन पाशैः । योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ’ इति । पूर्ववद् व्याख्येयम् ॥ २०

कात्यायनः – “ प्रहरणादि । अभिन्यस्यत्यग्नीदुत्करमररो दिवमिति ” (काश्रौ २.६.२१.२२) इति । प्रहरणेन निष्पन्नां शत्रूणां धूलिमाग्नीध्र उत्करदेशे परित्यजेत् । ‘ मा पप्त ’ इति मन्त्रशेषः । हे

---

13. P1 with marking above अप° ins. on the margin सुरदैवतं यजुः ।
14. P1 सप्तमेतम्. S1 M1 V1 वृतमेतम् C वृतस्तमेतम् for सुप्तस्तमेतम्
16. P1 °लुप्तो°, C V1 S1 °प्लुतो° for म्लुप्तो°
18. V1 S1 C M1 om. स्म
21. P1 after इति । adds पूर्ववत्; P1 with markig above °त्यजेत् ins स्थिता (? तो) न्युब्जपाणिभ्यामभिमृशतीति याज्ञिकाः ।

ᵛअररो ᵛदिवं यागफलरूपं द्युलोकं ᵛमा ᵛपप्तः प्राप्तो मा भूः ।

कात्यायनः – ‘ द्रप्सस्त इति तृतीयम् ’ (काश्रौ २.६.२३) इति । प्रहरतीत्यनुवर्तते । ‘ द्यां मा स्कन् ’ इति मन्त्रशेषः । हे वेदिदेवते ᵛते पृथिवीरूपायास्तव द्रप्स उपजीव्यो रसः ᵛद्यां द्युलोकं ᵛमा ᵛस्कन् मा स्कन्दतु मा गच्छतु । स्कन्दिर् गतिशोषणयोरिति धातुः । उत्तरमन्त्रत्रयपाठस्तु– ‘ व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्याᳬ शतेन पाशैः । योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ’ इति । विनियोगो व्याख्यानं च पूर्ववत् ॥ ४ ॥

आ– द्वितीयं प्रहरति – ‘ अपाररुम ’ इति । ‘ अपाररुम् ’, ‘ अररो ’ इति द्वे आसुरे । अररुरसुरः । तमसुरं ᵛपृथिव्यै पृथिव्याः संबान्धिनः देवयजनात् सकाशात् ᵛअप अपनीय ᵛवध्यासम् । वध हिंसायाम् । ‘ व्रजं गच्छ ’ इति । व्याख्यातम् । अग्नीदभिनिदधाति– ‘ अररो दिवम् ’ इति । हे ᵛअररो, त्वं ᵛदिवं द्युलोकं ᵛमा ᵛपप्तः । पत्लृ गतौ । मा पप्तः मा गमः । तृतीयं प्रहरति ‘ द्रप्सस्ते ’ इति । वेदिर्देवता । ᵛते तव पृथिव्या उपजीव्यो यः रसः स ᵛद्रप्सः ᵛद्यां द्युलोकं ᵛमा ᵛस्कन् । स्कदिर्गतिशोषणयोः । मा स्कन्दन्तु । ‘ व्रजं गच्छ ’ इति पूर्ववत् ॥ ४ ॥

गा॒य॒त्रेण॑ त्वा॒ छन्द॑सा॒ परि॑ गृह्णा॒मि त्रैष्टु॑भेन त्वा॒ ।
छन्द॑सा॒ परि॑ गृह्णा॒मि जाग॑तेन त्वा॒ छन्द॑सा॒ परि॑ गृह्णामि
सु॒क्ष्मा चासि॑ शि॒वा चा॑सि स्यो॒ना चासि॑ सु॒पदा॑ चासि।
ऊर्ज॑स्वती॒ चासि॒ पय॑स्वती च ॥५॥

गा॒य॒त्रेण॑ । त्वा॒ । छन्द॑सा । परि॑ । गृ॒ह्णा॒मि॒ । त्रैष्टु॑भेन । त्रैस्तु॑भे॒नेति॒ त्रैऽस्तु॑भेन । [त्वा॒ ।
छन्द॑सा । परि॑ । गृ॒ह्णा॒मि॒ ।] जाग॑तेन । त्वा॒ । छन्द॑सा । परि॑ । गृ॒ह्णा॒मि॒ ।
सु॒क्ष्मा । च॒ । असि॑ । शि॒वा । च॒ । अ॒सि॒ । स्यो॒ना । च॒ । असि॑ ।
सु॒षदा॑ । सु॒सदेति॑ सु॒ऽसदा॑ । च॒ । अ॒सि॒ ।
ऊर्ज॑स्वती । च॒ । असि॑ । पय॑स्वती । च॒ ॥ रोः ॥ ५ ॥

सा– कात्यायनः – “ पूर्वं परिग्राहं परिगृह्णाति दक्षिणतः पश्चादुत्तरतश्च स्फ्येन गायत्रेणेति प्रतिमन्त्रम् ” (काश्रौ २.६.२५) इति । यस्मात् भूप्रदेशात् अररुर्निष्कासितस्तस्मिन् प्रदेशे वेदेरियत्ता निश्चेतुं दक्षिणादिदिक्त्रये स्फ्येन रेखात्रयं कुर्यात् । सोऽयं पूर्वः परिग्राहः । पाठस्तु – ‘ गायत्रेण त्वा छन्दसा परिगृह्णामि त्रैष्टुभेन त्वा छन्दसा परिगृह्णामि जागतेन त्वा छन्दसा परिगृह्णामि ’ इति । हे

---

1. P1 with marking above पप्तः ins. पत्लृ गताविति धातोर्लुङि ‘ पतेः पुम् ’ (पा. ६.१.१९) इति पुमागमे रूपम् ।
8. H1 पृथिव्यर्थं यज्विने for पृथिव्याः संबान्धिनः
24. C V1 S1 M1 स्रुवेण for स्फ्येन; M1 दिक्परिग्रहः for परिग्राहः P1 with marking above गायत्रेण ins. त्रीणि वैष्णवानि यजूंषि छन्दोदैवतानि ।

वेदे, त्वां गायत्र्यादिछन्दस्त्रयरूपतया भावितेन स्फ्येन दिक्त्रये 'परिगृह्णामि। ततश्च छन्दोदेवताः दिक्त्रये त्वामसुरेभ्यः पालयिष्यन्ति । पूर्वस्यां दिश्याहवनीयाग्निरेव पालकोऽस्तीत्यभिप्रायः । पुरा कदाचिदसुराणां विजये सत्यषा पृथिवी कृत्स्नाऽपि तेषामेव स्वभूताऽसीत् । देवानां तु भूम्यंशः कोऽपि स्वभूतो नाभूत् । किं तु यो देवो यत्र यदोपविष्टो यावद्दूरं पश्यति तत्र तावान् देशस्तस्य देवस्य तदा स्वाधीनोऽभवत् । ततो देवा असुरानयाचन्त । युष्मदधीनायामस्यां पृथिव्यां कोऽप्यंशो नियतोऽपेक्षितः । तत्र तत्र कियत् स्थानमस्मभ्यं दास्यथेति । ततोऽसुरा यावद्भवद्भिः परिगृहीतं तावद्दास्याम इत्यवोचन् । तस्मादयं वेदपरिग्राहः । तमिमर्थं तित्तिरिराह– " असुराणां वा इयमग्र आसीत् । यावदासीनः परापश्यति । तावद्देवानाम् । ते देवा अब्रुवन् । अस्त्वेव नोऽस्यामपीति । कियं नो दास्यथेति । यावत् स्वयं परिगृह्णीथेति " (तैब्रा ३.२.९) इति । कण्वस्तु– " देवाश्च ह वा असुराश्चोभये प्राजापत्या अस्पर्धन्त " (काशब्रा २.२.३.१) इत्यादिना वेदपरिग्राहतात्पर्यं प्रपञ्चयामास ॥

कात्यायनस्तु– " उत्तरं परिग्राहं परिगृह्णाति सुक्ष्मा स्योनोर्जस्वतीति प्रतिमन्त्रं पूर्ववत् " (काश्रौ २.६.३१) इति । वेदिखननात् पुरा क्रियमाणः पूर्वपरिग्राहः । पश्चात् क्रियमाण उत्तरपरिग्राहः । तस्मिन्नुत्तरपरिग्राहे पूर्वपरिग्राहवद्दक्षिणादिदिक्त्रयं स्फ्येन रेखात्रयं कुर्यात् । मन्त्रत्रयपाठस्तु– ' सुक्ष्मा चासि शिवा चासि स्योना चासि सुषदा चासि । ऊर्जस्वती चासि पयस्वती च ' इति । हे वेदे, त्वं खननेन संपादिता सती 'सुक्ष्मा 'शिवा इत्यत्रविधगुणयुक्ता भवसि । क्ष्मा भूमिः । शोभना क्ष्मा सुक्ष्मा । खननेन पाषाणादिदोषराहित्यसंपादनं पृथिव्याः शोभनत्वम् । उग्रस्य भूमौ निगूढस्यासुरस्य निष्कासनेन शान्तत्वम् । गुणद्वयस्यान्योन्यसमुच्चयार्थौ चकारौ । सोऽयं प्रथमो मन्त्रः । 'स्योना सुखरूपा । स्योनशब्दस्य सुखनामसु पाठात् । 'सुषदा सम्यगुपवेशनयोग्या । सुष्ठु सीदन्ति देवा अस्याम् इति व्युत्पत्तेः । चकारौ पूर्ववत् । सोऽयं द्वितीयो मन्त्रः । ऊर्क्शब्दो माधुर्यादिरसवाची । पयःशब्दो रसहेतोर्जलस्य क्षीरस्य च वाचकः । तदुभययुक्ता 'असि । चकारौ पूर्ववत् । सोऽयं तृतीयो मन्त्रः । अन्तेऽपि ' असि ' इत्यनुवर्तते । पूर्वपरिग्राहेण वेदिरूपां पृथ्वीं लब्ध्वोत्तरपरिग्राहेण यथोक्तगुणयुक्तां देवा अकुर्वन् । सोऽयमर्थः – " इमामेवतत् पृथिवीं संविद्य सुक्ष्मां शिवामकुर्वत " (काशब्रा २,२.३.१०) इत्यादिना विस्पष्टं कण्वेनोदाहृतः ॥ ५ ॥

---

1. C M1 V1 S1 om. च
3. M1 V1 S1 C भूम्यंशको° for भूम्यंशः को°
6. P1 om. one तत्र; M1 अवधिः for भवद्भिः
7. P1 °ग्रहः for °ग्राहः; P1 °मृशति for °पश्यति
8. M1 C V1 S1 after नो ins. अन्यः
10. P1 M1 V1 °ग्रह° for °ग्राह°
11. P1 °ग्रहं for °ग्राहं
12. P1 °ग्रहः for first °ग्राहः; P1 S1 °ग्रहः for second ग्राहः
13. P1 with marking above सुक्ष्मा ins. on the margin वेदिदेवतानि त्रीणि यजूंषि ।
15. P1 च for शिवा
16. P1 निष्काशनेन for निष्कासनेन
20. C V1 S1 द्वितीयो for तृतीयो; P1 with marking above असि ins. on the margin अनुवृत्तिः पाठभावादवगन्तव्या ।

आ– पूर्वं परिग्राह परिगृह्णाति ‘ गायत्रेण ’ इति । ‘ गायत्रेण ’ इत्यादीनि त्रीणि वैष्णवानि । त्वा-शब्देन विष्णुरुच्यते । ᵛगायत्रेण ᵛछन्दसा ᵛत्वा विष्णुं ᵛपरिगृह्णामि । ᵛत्रैष्टुभेण ᵛछन्दसा ᵛत्वा विष्णुं यज्ञं ᵛपरिगृह्णामि । ᵛजागतेन ᵛछन्दसा ᵛत्वा विष्णुं ᵛपरिगृह्णामि । उत्तरं परिग्राहं परिगृह्णाति । तत्र पूर्वेण परिग्राहेण विष्णुं यज्ञं परिगृह्य तेनेमां पृथिवीं लब्ध्वा चोत्तरेण परिग्राहेण वक्ष्यमाणैर्गुणैर्देवा अयोजयन् । ‘ सुक्ष्मा चासि ’ इति । ‘ सुक्ष्मा चासि ’ इत्यादीनां त्रयाणां वेदिर्देवता । क्ष्मा भूः । सुशोभना भूः ᵛसुक्ष्मा त्वम् ᵛअसि । ᵛशिवा शान्ता ᵛच ᵛअसि । स्योनमिति सुखनाम । सुखरूपा त्वम् ᵛअसि । ᵛसुषदा, शोभनं यस्यां सीदन्तीति सुषदा ᵛच ᵛअसि । ᵛऊर्जस्वती अन्नवती ᵛच ᵛअसि । पयोविकारैः रसैश्च रसवती ᵛपयस्वती ॥५॥

पु॒रा क्रू॒रस्य॑ वि॒सृपो॑ विरप्शिन्नुदा॒दाय॑ पृथि॒वीं जी॒वदा॑नुम् ।
यामैर॑यँश्च॒न्द्रम॑सि स्व॒धाभि॒स्तां धीरा॑सो अनु॒दिश्य॑ यजन्ते ।
द्वि॒ष॒तो व॒धो॑ऽसि ॥ ६ ॥ (९) ॥

पु॒रा । क्रू॒रस्य॑ । वि॒सृप॒ इति॑ वि॒ऽसृपः॑ । वि॒र॒प्शि॒न्निति॑ विऽरप्शिन् ।
उ॒दा॒दायेत्यु॑त्ऽआ॒दाय॑ । पृ॒थि॒वीम् । जी॒वदा॑नु॒मिति॑ जी॒वऽदा॑नुम् ।
याम् । ऐर॑यन् । च॒न्द्रम॑सि । स्व॒धाभिः॑ । ताम् । धीरा॑सः ।
अ॒नु॒दिश्येत्य॑नु॒ऽदिश्य॑ । य॒ज॒न्ते॒ ।
द्वि॒ष॒तः । व॒धः । अ॒सि॒ ॥ म्रों ॥ ६ ॥ (९) ॥

सा– कात्यायनः – “ पुरा क्रूरस्येत्यनुमार्ष्टि ” (काश्रौ २.६.३२) इति । वेदेरुपरीत्यर्थः । पाठस्तु– ‘ पुरा क्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीवदानुम् । यामैरयंश्चन्द्रमसि स्वधाभिस्तां धीरासो अनुदिश्य यजन्ते ’ इति । अत्रेयमाख्यायिका मन्त्रेणाभिप्रेता । कदाचित किल देवानामसुरैः सह संग्रामः प्राप्तः । तत्र ब्रह्मादयो देवा इत्थं संमन्त्रेदं चक्रुः । देवासुरसंग्रामे सति तेषां रुधिरादिभिरियं भूर्दूषिता देवयजनानर्हा भविष्यति । अतो भुवः सूक्ष्मरूपं सारभूतमादाय चन्द्रमण्डले स्थापयिष्याम इति । तामिमामाख्यायिकां– “ देवा ह वा असुरैः संग्रामं संनिधास्यन्तः ” (काशब्रा २.२.३.१७)

---

1. H1 om. परिग्राहं and गायत्रेणेति
4. B1 लक्ष्य for लब्ध्वा
5. H1 om. first सुक्ष्मा चासीति
6. B1 सुक्ष्मा चासि शोभना भूस्त्वमसि for सुशोभना...त्वमसि; H1 चासि for त्वमसि
7. B1 H1 सुखरूपस्योना, for सुखरूपा त्वमसि; B1 om. इति
8. H1 om. च H1 om. अन्नवती
22. P1 after इति ins. इति; V1 C M1 S1 संनिधास्यत for संनिधास्यन्त

इत्यादिना कण्वो दर्शयामास। अस्मिन् मन्त्रे क्रूरशब्दः संग्रामवाची। तत्र कण्वेनैवमाम्नातम्– "संग्रामो वै क्रूरः संग्रामे हि क्रूरमिव क्रियते हतोऽश्वो हतः पुरुषः शेते" (काशब्रा २.२.३.१८) इति। क्रूरशब्दस्य 'विसृपः' इति विशेषणम्। विविधं सर्पन्ति योधा अस्मिन्निति विसृप् संग्रामः। 'विसृपः क्रूरस्य' इति पञ्चम्यर्थे षष्ठ्यौ। तथा सति 'विसृपः क्रूरस्य पुरा' इत्युक्ते युद्धात् पूर्वम् इत्युक्तं भवति। तदुक्तं कण्वेन– "पुरा संग्रामादित्येवैतदाह" (काशब्रा २.२ ३.१८) इति। 'विरप्शिन्' इति महतः परमेश्वरस्य संबोधनम्। *महन्नामसु विरप्शिन् अद्भुत इति पठितत्वात्। 'जीवदानुं जीवस्य दात्रीं 'यां 'पृथिवीम् 'उदादाय अत्यन्तसारभूतां पृथिवीं संक्षिप्योद्धृत्यादाय 'चन्द्रमसि 'ऐरयन् चन्द्रमण्डले देवाः प्रक्षिप्तवन्तः। केन साधनेन प्रक्षिप्तवन्त इति तदुच्यते– 'स्वधाभिः। यद्यपि स्वधाशब्दोऽन्ननामसु पठितस्तथाऽपि तेन स्वधाशब्देन तत् साधनभूता वेदत्रयगता मन्त्रविद्या उच्यन्ते। पृथिव्याः सारांशस्य वेदत्रयरूपेण साधनेन यत् स्थापनं तत् कण्वेनैव व्याख्यातम्– "उदादाय पृथिवीं जीवदानुमिति यद्वयस्या जीवनममन्यन्त तच्चन्द्रमसि न्यदधत यामैरयंश्चन्द्रमसि स्वधाभिरिति यामदधुश्चन्द्रमसि ब्रह्मणेत्येवैतदाह" (काशब्रा २.२.३.१८) इति। चन्द्रमण्डले मृगरूपः कृष्णवर्णो यः कलङ्को दृश्यते सोऽयं भूमेः सारांशः। पुरा द्यावापृथिव्यौ सहैवावस्थिते सत्यौ यदा परस्परं वियुज्येते स्म तदानीमन्योन्यसारांशं यज्ञयोग्यमन्योन्यं स्वरूपेण स्थापितवत्यौ। तत्र भूमेः सारांशश्चन्द्रमसि दृश्यमानः कृष्णं रूपमित्येवं तित्तिरिराह– "द्यावापृथिवी सहास्तां ते वियती अब्रूतामस्त्वेव नौ सह यज्ञियमिति यदमुष्या यज्ञियमासीत तदस्यामदधात् त ऊषा अभवन् यदस्या यज्ञियमासीत् तदमुष्यामदधात् तददश्चन्द्रमसि कृष्णम्" (तैसं ५.२.३) इति। 'धीरासः धीराः बुद्धिमन्तो यजमानाः 'तां चन्द्रमसि स्थितां कृष्णवर्णां भूमिम् 'अनुदिश्य उद्दिश्य वेद्यामस्यां विद्यत इति कथयित्वा 'यजन्ते यागं कुर्वन्ति। अनेन 'पुरा क्रूरस्य' इति मन्त्रेण खातायां वेद्यामस्यां लोष्टकृतवैषम्यपरिहाराय समीकरणरूपं संमार्जनं कुर्यात्। हे विरप्शिन् इत्यस्य परमेश्वरस्य संबोधनस्यानुगृहाणेति महान्वयः कर्तव्यः।

---

1. P1 before इत्यादिना adds °स्ते होचुर्यन्त यदस्याः पृथिव्या अनामृतं देवयजनमिति तच्चन्द्रमसि निदधामहा इति। तथा यदि नोऽसुररक्षसान्याभिभवेयुर्; P1 om. अस्मिन्मन्त्रे
4. P1 षष्ठी for षष्ठ्यौ
 * [द्र. निघण्टु ३.३.२२, २३]
6. C V1 after °नामसु add पाठात् and M1 भावात्
8. M1 S1 V1 तेन for केन; V1 M1 S1 C om. स्वधा°
10. C V1 S1 M1 यद्वा for यद्धि
11. P1 अमन्यत, M1 S1 अन्यं न for अमन्यन्त; V1 M1 S1 C यामधुश् for यामदधुश्
13. M1 V1 सहसैव for सहैव; P1 M1 V1 S1 om. स्म
14. C M1 S1 V1 अन्यान्य for अन्योन्यम्; P1 M1 S1 V1 स्वरूपे for स्वरूपेण;
 C M1 S1 V1 कृष्ण° for कृष्णं
15. P1 सहस्येते, C V1 S1 सहास्या ते for सहास्तां V1 om. वियती; P1 अस्येवगौ, M1 C V1 S1 अस्येव नौ for अस्त्वेव नौ; C M1 V1 S1 तस्याम् for तदस्याम्
17. C V1 चन्द्रमः° for चन्द्रमसि; M1 C V1 C1 om. अनुदिश्य
19. P1 om. अस्यां
20. C V1 M1 S1 तु for अनु

कात्यायनः – “ द्विषतो वध इति स्फ्यमुदञ्चं प्रहरति ” (काश्रौ २.६ ४२) इति परित्यजेदित्यर्थः । यथा चापस्तम्बः –“ उत्करे स्फ्यमुदस्यति द्वेष्यं मनसा ध्यायन् ” (आपश्रौ २.३,१३)। इति । ‘ असि ’ इति मन्त्रशेषः । हे स्फ्य, त्वं ᵛद्विषतः शत्रोः ᵛवधः ᵛअसि हिंसकोऽसि । यं द्विष्यात् यं द्वेष्यं प्रहरामि इत्येवं प्रहरणकाले मनसा भावयेत् । तदेतत् कण्व आह– “ अथोदञ्चं स्फ्यं प्रहरत्यमुष्मै त्वा वज्रं प्रहरामीति यं द्विष्याद्वज्रो वै स्फ्यस्तृणुते हैवैनेन ” (काशब्रा २.२.३.२१) इति ॥६॥ (९)

इति प्रथमाध्याये नवमोऽनुवाकः ।

आ– वेदमनुमार्ष्टि ‘ पुरा क्रूरस्य ’ इति । चान्द्रमसी त्रिष्टुप् । अत्रेयमाख्यायिका मन्त्रेणाभिप्रेता । कदाचित् किल देवानामसुरैः [सह] संग्रामः प्राप्तः । तत्र ब्रह्मादयो देवा इत्थं समर्थ्येदं चक्रुः । देवासुरसंग्रामे सति तेषां रुधिरादिभिरियं भूर्दूषिता देवयजनानर्हा भविष्यति । अतः (भुवः) सूक्ष्मरूपमादाय चन्द्रमण्डले स्थापयिष्याम इति । ‘ पुरा क्रूरस्य ’ इति । क्रूरशब्दः संग्रामवचनः । पञ्चम्यर्थे षष्ठी । ᵛपुरा ᵛक्रूरात् संग्रामात् प्राक् । विविधं सर्पति योद्धा अस्मिन्निति संग्रामो विसृप् । तस्मात् ᵛविसृपः संग्रामात् पुरा च । ‘ विरप्शिन् ’ इति महन्नाम । स च विष्णुर्यज्ञो वेदित्वमापन्नः । स हि त्रिभिर्वेदैर्निर्वर्त्यमानो विविधं रूपं शब्दं करोतीति विरप्शी, तत् संबोधनं, हे ᵛविरप्शिन् विष्णो, शृणु । ᵛजीवदानुं जीवस्य दात्रीं ᵛपृथिवीं विस्तीर्णां देवाः ᵛउदादाय सारभूतां संक्षिप्य उद्धृत्य आदाय ᵛचन्द्रमसि चन्द्रमण्डले ᵛस्वधाभिः तिसृभिर्विद्याभिः सूर्यलक्षणेन ब्रह्मणा सहितां ᵛयां पृथिवीम् ᵛऐरयन् । ईर गतौ । अयमिह स्थापनार्थः । स्थापितवन्तः । ᵛतां पृथिवीं ᵛधीरासः मेधाविनः अनुदृश्य दर्शनेन संराधापि ᵛयजन्ते इति । स्फ्यमुदञ्चं प्रहरति –‘ द्विषतो वधः’ इति । आभिचारिकदैवतं यजुः । द्वेष्टुः ᵛवधः वधकः ᵛअसि ॥६॥ (९) ॥

[इति नवमोऽनुवाकः]

---

1. P1 with marking above द्विषतो ins. आभिचारिकदैवतं यजुः ।
2. C V1 S1 (आ) ध्याय for ध्यायन्
4. M1 C V1 S1 अङ्गुष्ठौ for अमुष्मै
5. M1 C V1 S1 प्रहराम for प्रहरामि; V1 M1 S1 स स्तृणुते, C संस्तृणुते for स्फ्य स्तृणुते; V1 C M1 S1 एतान् for एनेन
6. P1 om इति प्रथमाध्याये
9. B1 उक्षिता for दूषिता; B1 °यजनार्हा न for यजनानर्हा
11. H1 After पुरा adds प्राक्
12. B1 after इति adds संबोधितम्
13. H1 निवृत्तिमापन्नो for निर्वर्त्यमानो
15. B1 उत् for उद्धृत्य; H1 अधि for सूर्य°
17. B1 अनुदिश्य for अनुदृश्य; From the commentary one reading accepted by आनन्दबोध seems to be अनुदृश्य. The reading found in TS too.
18. H1 °चारिकं स्फ्यदैवतं for °चारिकदैवतं

[अथ दशमोऽनुवाकः]

सा– नवमे वेदिविषया मन्त्राः उक्ताः । दशमे जुह्वादिष्वाज्यग्रहणार्था मन्त्रा उच्यन्ते –

प्रत्यु॑ष्ट॒ꣳ रक्ष॒ः प्रत्यु॑ष्टा॒ अरा॑तयो॒ निष्ट॑प्त॒ꣳ रक्षो॒ निष्ट॑प्ता॒ अरा॑तयः ।
अनि॑शितोऽसि सपत्न॒क्षिद्वा॒जिनं॑ त्वा वा॒जेध्या॒यै॒ सं मा॑र्ज्मि ।
प्रत्यु॑ष्ट॒ꣳ रक्ष॒ः प्रत्यु॑ष्टा॒ अरा॑तयो॒ निष्ट॑प्त॒ꣳ रक्षो॒ निष्ट॑प्ता॒ अरा॑तयः ।
अनि॑शितासि सपत्न॒क्षिद्वा॒जिनीं॑ त्वा वा॒जेध्या॒यै॒ सं मा॑र्ज्मि ॥१॥

[प्रत्यु॑ष्ट॒मिति॒ प्रति॑ऽउष्टम् । रक्षः॑ । प्रत्यु॑ष्टा॒ इति॒ प्रति॑ऽउष्टाः । अरा॑तयः । निष्ट॑प्तम् । निस्त॑प्त॒मिति॒ निःऽत॑प्तम् । रक्षः॑ । निष्ट॑प्ताः । निस्त॑प्ता॒ इति॒ निःऽत॑प्ताः । अरा॑तयः ।]
अनि॑शित॒ इत्यनि॑ऽशितः । अ॒सि॒ । स॒प॒त्न॒क्षिदिति॑ स॒प॒त्न॒ऽक्षित् ।
वा॒जिन॑म् । त्वा॒ । वा॒जे॒ध्याया॒ इति॑ वा॒ज॒ऽइ॒ध्यायै॑ । सम् । मा॒र्ज्मि॒ ।
अनि॑शि॒तेत्यनि॑ऽशिता । अ॒सि॒ । स॒प॒त्न॒क्षिदिति॑ स॒प॒त्न॒ऽक्षित् ।
वा॒जिनी॑म् । त्वा॒ । वा॒जे॒ध्याया॒ इति॑ वा॒ज॒ऽइ॒ध्यायै॑ । सम् । मा॒र्ज्मि॒ ॥ कैः ॥१॥

कात्यायनः – “स्रुवं प्रतप्य पूर्ववत्” (काश्रौ २.६.४६) इति । यथाग्निहोत्रहवण्याः ‘प्रत्युष्टम्’ इति मन्त्रेण प्रतापः पूर्वमुक्तस्तथा स्रुवस्यापि ‘प्रत्युष्टम्’ इति प्रतापः कार्य इत्यर्थः । पाठस्तु– ‘प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टसं रक्षो निष्टप्ता अरायतः’ इति । पूर्ववद् व्याख्येयम् । अनेन मन्त्रेण स्रुवस्य प्रतपनं कण्वोऽपि दर्शयति– “स स्रुवमादाय प्रतपति प्रत्युष्टम्” (काशब्रा २.२.४.४) इति ॥

कात्यायनः – “वेदाग्रैरन्तरतः प्राक् संमार्ष्ट्यनिशित इति” (काश्रौ २.६.४६) इति । प्रतप्तं स्रुवं वामहस्ते धृत्वा दक्षिणहस्तेन वेदाग्रैः प्रागवमानं यथा भवति तथा संमृज्यात् । पाठस्तु– ‘अनिशितोऽसि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै संमार्ज्मि’ इति । हे स्रुव, त्वम् 'अनिशितः 'असि । शो तनूकरणे इति धातुः । निशितो नितरां तीक्ष्णः, अतथाभूतोऽनिशितः । कुतः ? अस्मद्विषये त्वमनिशितः उपद्रवकारी न भवसीत्यर्थः । 'सपत्नक्षित सपत्नानामस्मच्छत्रूणां क्षयहेतुः । क्षिणु हिंसायाम इति धातुः । 'वाजिनं यजनहेतुत्वादन्नवन्तं त्वां स्रुवं 'संमार्ज्मि सम्यक् शोधयामि । मृजू शुद्धौ इति धातुः । किमर्थम् ? 'वाजेध्यायै । ञी इन्धी दीप्तौ इति धातुः । वाजस्यान्नस्य इध्यायै दीप्त्यै प्रकाशनार्थम् । शोधितेन स्रुवेणाज्ये हुते सति अग्निर्दीप्यते । तया दीप्त्या तदाहुतिफलभूतमन्नं प्रकाशितं भवतीत्यर्थः ॥

कात्यायनः – “प्रतप्य प्रतप्य प्रयच्छति । अनिशितेति स्रुचः” (काश्रौ २.६.४६.४७) इति । जुहूपभृद्ध्रुवास्तिस्रः स्रुचः । ताः प्रत्येकं ‘प्रत्युष्टम्’ इति मन्त्रेण प्रतप्य तेषां स्थापनार्थमन्यस्य हस्ते प्रयच्छेत् । जुह्वादीनां स्त्रीलिङ्गत्वात् तद्विशेषणस्यापि ‘अनिशिता’ इति पदस्य स्त्रीलिङ्गत्वम् । पाठस्तु–

---

13. V1 M1 S1 C before स्रुवं add : आहृत्य
15. P1 with marking above प्रत्युष्ट ins. राक्षोघ्नं यजुः ।
20. V1 S1 C M1 om. अतथाभूतोऽनिशितः ।

'प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातयः । अनिशितासि सपत्नक्षिद्वाजिनीं त्वा वाजेध्यायै संमार्ज्मि' इति । पूर्ववद् व्याख्येयम् ॥ स्रुवस्य पुरुषरूपत्वात् प्रथमतः संमार्जनम् । स्रुचां स्त्रीरूपत्वात् पश्चात् संमार्जनम् । तदिदं कण्व आह– "स वै स्रुवमग्रे संमार्ष्टि वृषा वै स्रुवो योषाः स्रुचः" (काशब्रा २·२·४·६) इति । तित्तिरिरप्याह– "स्रुचः संमार्ष्टि । स्रुवमग्रे । पुमाꣳसमेवाभ्यः सꣳश्यति मिथुनत्वाय । अथ जुहूम् । अथोपभृतम् । अथ ध्रुवाम्" (तैब्रा ३·३·१) इति । आभ्यो जुह्वादिरूपयोषार्थं सꣳश्यति सम्यक् तीक्ष्णीकरोति ॥ १ ॥

आ– 'प्रत्युष्टम्' इति व्याख्यातम् । स्रुवं संमार्ष्टि– 'अनिशितोऽसि' इति । स्रुवो देवता । ᵛअनिशितः । शो तनूकरणे । न निशितः अनिशितस्त्वम् ᵛअसि । तथापि यतस्त्वं ᵛसपत्नक्षित् सपत्नान् क्षिणोतीति सपत्नक्षित् । अतः ᵛवाजिनं; वाजशब्दोऽत्र यज्ञवचनः, यज्ञो हि देवानामन्नं, तद् योऽर्हति स वाजी । तं वाजिनं, त्वां ᵛसंमार्ज्मि । मृजू शुद्धौ । इन्धी दीप्तौ । वाजस्यान्नस्य इध्यायै संदीप्त्यै ᵛवाजेध्यायै प्रवृद्ध्यै यज्ञोज्ज्वलनार्थं संशोधयामि ॥

स्रुचं प्रतपति– 'प्रत्युष्टम्' इति । व्याख्यातम् । स्रुचं संमार्ष्टि– 'अनिशिताऽसि' इति । स्रुग्देवता । स्त्रीलिङ्गत्वात् । 'अनिशिता वाजिनीम्' इति स्थितम् ॥ १ ॥

अदि॑त्यै रास्ना॑सीन्द्रा॒ण्यै स॒ंनह॑नम् ।
विष्णो॑र्वे॒ष्पो॑ऽस्यू॒र्जे त्वाऽद॑ब्धेन त्वा॒ चक्षु॒षाऽव॑पश्यामि ॥ २ ॥
अ॒ग्नेर्जि॒ह्वा॑सि सु॒भूर्दे॒वेभ्यः॑ ।
धाम्ने॑धाम्ने भव॒ यजु॑षेयजुषे ।
स॒वि॒तुस्त्वा॑ प्रस॒व उत्पु॑ना॒म्यच्छि॑द्रेण प॒वित्रे॑ण॒ सूर्य॑स्य र॒श्मिभिः॑ ।
स॒वि॒तुर्वः॑ प्रस॒व उत्पु॑ना॒म्यच्छि॑द्रेण प॒वित्रे॑ण॒ सूर्य॑स्य र॒श्मिभिः॑ ॥ ३ ॥

अदि॑त्यै । रास्ना॑ । अ॒सि॒ । इ॒न्द्रा॒ण्यै । स॒ंनह॑न॒मिति॑ स॒म्ऽनह॑नम् ।
विष्णोः॑ । वे॒ष्पः । अ॒सि॒ । ऊ॒र्जे । त्वा॒ । अद॑ब्धेन । त्वा । चक्षु॑षा । अव॑ । प॒श्या॒मि॒ ॥ खुं ॥ २ ॥

---

1. P1 with marking above प्रत्युष्टं ins. on the margin स्रुग्दैवतं यजुः ।
4. P1 स्रुवं for स्रुचः, C V1 S1 सुममग्रे for स्रुवमग्रे
5. M1 जुह्वादिपोषरूपयागार्थं, C V1 जुह्वादिपोषरूपयोषर्थं S1 जुह्वादिपोषरूपपोषार्थं for जुह्वादिरूपयोषार्थं [L, 6]
8. B1 om. यतस्
11. B1 यज्ञो ज्वालनार्थं for यज्ञोज्ज्वलनार्थं°
12. H1 om. स्रुवं प्रतपति; B1 स्रुवं for स्रुचं
15. M1 वेश्यो° for वेष्पो । [अत्र पाठभेदविषये द्रश्यतां – पं. युधिष्ठिर मीमांसकैः संपादितः 'माध्यन्दिन-संहितायाः पदपाठः', प्रथमं परिशिष्टं – पृ. ६३२-६३४]

अग्नेः । जिह्वा । असि । सुभूरिति सुऽभूः ।
देवेभ्यः । धाम्नेधाम्न इति धाम्नेऽधाम्ने । भव । यजुषेयजुष इति यजुषेऽयजुषे ।
सवितुः । त्वा । सवितुः । वः ॥ द्विं ॥ ३ ॥

सा– “ पत्नीं संनह्यति प्रत्यग्दक्षिणत उपविष्टां गार्हपत्यस्य मुञ्जयोक्त्रेण त्रिवृता परिहरत्यधीवासोऽदित्यै रास्नेति ” (काश्रौ २·७·१) इति । प्रत्यग्दक्षिणतो नैर्ऋत्यां दिशि अधीवासो वस्त्रस्योपरि परिहरति परितो वेष्टयेत् । पाठस्तु– ‘ अदित्यै रास्नासीन्द्राण्यै संनहनम् ’ इति । हे रज्जो, त्वम् अदित्यै भूम्याः रास्ना असि रशना भवसि । अथवा इन्द्राण्यै इन्द्रपत्न्याः संनहनं वस्त्रस्योपरि सम्यग्बन्धनहेतुपौवर्णदामस्थानीयम् । ‘ असि ’ इत्यनुवर्तते । तमेतं मन्त्रं तित्तिरिः सम्यक् व्याचष्टे– “ अदित्यै रास्नाऽसीत्याह । इयं वा अदितिः । अस्या एवैनद्रास्नां करोति । इन्द्राण्यै संनहनमित्याह । इन्द्राणी वा अग्रे देवतानाꣳ समनह्यत । साऽर्ध्नोत ” (तैब्रा ३·२·२) इति ॥

कात्यायनः – “ दक्षिणं पाशमुत्तरे प्रतिमुच्योर्ध्वमुद्गूहति विष्णोर्वेष्प इति । न ग्रन्थिं करोति ” (काश्रौ २·७·२-३) इति । ‘ असि ’ इति मन्त्रशेषः । रज्जोरुत्तरपाशे प्रतिमुच्योर्ध्वमुत्कृष्यमाण हे दक्षिणपाश, त्वं विष्णोः व्यापकस्य यज्ञस्य वेष्पः असि व्यापकोऽसि । विष्लृ व्याप्तौ इति धातुः । यद्वा– वेष्टनरूपोऽसि । वेष्ट वेष्टन इति धातुः । छान्दसः पकारादेशः ॥

कात्यायनः – “ ऊर्जे त्वेत्याज्यमुद्वास्य ” (काश्रौ २·७·४) इति । हे आज्य, त्वं विलापनाय पूर्वं वह्नावधिश्रितम् । त्वामिदानीं ऊर्जे अधिकपाकाभावेन स्वादुतमरसलाभाय वह्निप्रदेशाद् बहिरुद्वासयामीति शेषः ॥

कात्यायनः – “ पत्नीमवेक्षयत्यदब्धेनेति ” (काश्रौ २·७·४) इति । पाठस्तु– ‘ अदब्धेन त्वा चक्षुषाऽवपश्याम्यग्नेर्जिह्वासि सुभूर्देवेभ्यः । धाम्नेधाम्ने भव यजुषेयजुषे ’ इति । दभ्नातिधातुर्हिंसार्थः । हे आज्य, अदब्धेन हिंसारहितेन चक्षुषा त्वाम् अवपश्यामि । अवाचीनं यथा भवति तथाऽधोमुखी सती पश्यामि । किं चाज्यमग्नौ यदा जुह्वति तदाग्नेर्जिह्वेव ज्वालोत्पद्यते । अतस्तन्निमित्तत्वात् अग्नेः जिह्वा त्वम्

---

7. V1 C M1 S1 भूम्यां for भूम्याः

11. M1 वेष्य° for वेष्प°, M1 कांटदेशाद् for करोति, P1 with marking above करोति ins. on the margin वैष्णवं यजुः ।

13. M1 वेष्यो° for वेष्पो° ... M1 C V1 S1 om. व्यापकोऽसि ।

15. P1 with marking above ऊर्जे ins on the margin आज्यदैवतं यजुः; V1 S1 C M1 त्वां for त्वं

16. M1 °लाभाद् for लाभाय

18. P1 with marking above पत्नीम् ins. on the margin आज्यदैवतं यजुः । Sāyaṇa includes first two lines of the following Mantra indicating that he assumed these lines as Part of No. 2, contrary to the Kāṇva tradition as we have now before us. Ānandabodha too seems to have accepted this line –an obvious influence of dominant popularity of “ Mādhayndina Śākhā. ”

20. V1 S1 C M1 °मुखः सन् for °मुखी सती

21. P1 with marking above पश्यामि ins. on the margin सादब्धेन च चक्षुषावपश्यामीति श्रुतेः ।

ᵛअसि। सा च जिह्वा सुष्ठु भवनीति ᵛसुभूः। तच्च सुष्ठु भवनं ᵛदेवेभ्यः देवोपकारार्थम्। एवंविध त्वं ᵛधाम्ने ᵛधाम्ने तत्तद्यागफलोपभोगस्थानसिद्ध्यर्थं ᵛयजुषेयजुषे ᵛभव तत्तद्यागसिद्धये योग्यं भव। 'फलेन युज्यते' इति व्युत्पत्त्या यजुःशब्दो यागवाची। तदेतदभिप्रेत्य कण्व आह– "भव यजुषेयजुष इति सर्वस्मै यज्ञाय देवेभ्य एधीत्यवैतदाह" (काशब्रा २·२·४·१६) इति॥

कात्यायनः– "सवितुस्त्वेत्याज्यमुत्पुनाति। प्रोक्षणीश्च पूर्ववत्" (काश्रौ २·७·७-८) इति। पाठस्तु– 'सवितुस्त्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः' इति। हे आज्य, ᵛसवितुः ᵛप्रसवे वर्तमानस्त्वाम् ᵛउत्पुनामि। 'अच्छिद्रेण' इत्यादिशेषश्च "पवित्रे स्थ" (कासं १·३·१) इत्यनुवाके व्याख्यातः, तस्मात् सुज्ञः। सोऽयमाज्योत्पवनमन्त्रः। 'सवितुर्वः' इत्यादिकस्तु प्रोक्षणीनामपामुत्पवनार्थो मन्त्रः। स च 'पवित्रे स्थ' इत्यनुवाके एव गतः। तस्मात् सूत्रकारेण– "प्रोक्षणीश्च पूर्ववत्" (काश्रौ २·७·८) इत्युक्तम्॥ २-३॥

आ– पत्नीं संनह्यति– 'अदित्यै रास्नासि' इति। अदित्याः संबन्धिनी या ᵛरास्ना। णम प्रह्वत्वे शब्दे च। रसो नम्यते यया सा रास्ना त्वम् ᵛअसि। यद्वा– रास्ना रसना। ᵛइन्द्राण्यै इन्द्राण्याः ᵛसंनहनम्। णह बन्धने इत्यस्य रूपम्। संनहनमसि। ऊर्ध्वमुदूहति– 'विष्णोर्वेष्पोऽसि' इति। ᵛविष्णोः यज्ञस्य ᵛवेष्पः ᵛअसि। विष्लृ व्याप्तौ। वेष्ट वेष्टने। अनयो रूपम्। विष्णोर्यज्ञस्य व्यापनं वेष्टनं वा त्वमसि। आज्यमुद्वासयति– 'ऊर्जे त्वा' इति। 'ऊर्जे त्वा' इत्यादीनां त्रयाणां यजुषामाज्यं दैवतम्। 'ऊर्जे त्वा' इति व्याख्यातम्॥

पत्न्याज्यमवेक्षते– 'अदब्धेन' इति। दम्नोतिः हिंसार्थः। ᵛअदब्धेन हिंसारहितेन ᵛचक्षुषा ᵛत्वा त्वाम् ᵛअत्र अत्राचीनं ᵛपश्यामि। किं च यदा चाज्यमग्नौ जुह्वति तदा अग्नेर्जिह्वेव ज्वाला उत्पद्यते। अतस्तन्निमितत्वात् ᵛअग्नेः ᵛजिह्वा ᵛसुभूः शोभनभवनम् ᵛअसि। ᵛदेवेभ्यः

---

1. M1 om. सा च...°सिद्ध्यर्थं [L 2]

6. P1 with marking above सवितुस् ins. on the margin सावित्र्युष्णिग्यजुर्वा।

7. P1 M1 वर्तमानं, V1 S1 C वर्तमान which we have corrected as वर्तमानस्, because it should be an epithet of the subject अहं and not of the object आज्यम्. The sentence means : "Being in the command of the Sun, O Ājya, I purify thee" therefore वर्तमान cannot be applied to Ājya as its epithet. Vide also commentary on देवस्य त्वा सवितुः (१.३.६); V1 S1 C M1 विशेषः for °शेषश्च

8. P1 om. तस्मात् सुज्ञः, V1 om. सुज्ञः, M1 S1 सूत्रः for सुज्ञः.

12. B1 सा रसना for सा रास्ना

16. B1 H1 उद्वासयामि for इति

18. H1 इतिवत् for इव;

19. B1 उत्पद्यन्ते for उत्पद्यते

अर्थाय उपाकृत्युरकारार्थम् । ‘धाम्नेधाम्ने यजुषेयजुषे’ इति । धामानि त्रीणि भवन्ति – स्थानानि नामानि जन्मानि (चेति) । वीप्सार्थं द्विवचनम् । मम यज्ञस्य यावन्ति स्थानानि भवन्ति यजूंषि तावन्ति व्याप्नुहीत्यर्थः ॥

आज्यमुत्पुनाति– ‘सवितुस्त्वा’ इति । ᵛसवितुः ᵛप्रसवे वर्तमानः त्वाम् ᵛउत्पुनामि । अन्यद्व्याख्यातम् । प्रोक्षणीरुत्पुनाति– ‘सवितुर्वः’ इति । व्याख्यातम् ॥ २-३ ॥

तेजो॑ऽसि शु॒क्रम॑स्य॒मृत॑मसि॒ धाम॒ नामा॑सि ।
प्रि॒यं दे॒वाना॒मना॑धृष्टं देव॒यज॑नम् ॥ ४ ॥

तेजः॑ । अ॒सि॒ । शु॒क्रम् । [अ॒सि॒ ।] अ॒मृत॑म् । [अ॒सि॒ ।] धाम॑ । नाम॑ । अ॒सि॒ ।
प्रि॒यम् । दे॒वाना॑म् । अना॑धृष्टम् । दे॒व॒यज॑न॒मिति॑ दे॒व॒ऽयज॑नम् ॥ कां ॥ ४ ॥

सा– कात्यायनः – “आज्यमवेक्षते तेजोऽसीति” (काश्रौ २·७·९) इति । पाठस्तु– ‘तेजोऽसि शुक्रमस्यमृतमसि’ इति । हे आज्य, त्वं ᵛतेजः ᵛअसि । त्वम् अविनाशिशरीरकान्तिहेतुत्वात् तेजः । त्वं ᵛशुक्रम् ᵛअसि दीप्तमसि । स्निग्धस्वरूपत्वात् दीप्तिमत्त्वम् । ᵛअमृतम् ᵛअसि विनाशरहितमसि । बहुदिनावस्थानेऽप्योदनादिवत् पर्युषितत्वादिदोषाभावादविनाशित्वम् ॥

कात्यायनः – “स्रुवेणाज्यग्रहणम् । चतुर्जुह्वां धाम नामेति सकृन्मन्त्रः” (काश्रौ २·७·११-१२) इति । पाठस्तु– ‘धाम नामासि । प्रियं देवानामनाधृष्टं देवयजनम्’ इति । हे आज्य, त्वं ᵛधाम स्थानम् ᵛअसि । धीयते स्थाप्यते देवैश्चित्तवृत्तिरत्रेति धामशब्दव्युत्पत्तिः । तदेव पुनर्नामादिभिश्चतुर्भिर्विशेषैर्विशेष्यते । नामयति सर्वाणि भूतानि आत्मानं प्रति प्रणतानि करोतीत्याज्यस्य नामत्वम् । एतच्चाज्यापेक्षणं सर्वेषु मनुष्येषु प्रसिद्धम् । तथैवाज्यं ᵛदेवानां ᵛप्रियम् । तत्प्रियत्वं च तित्तिरिः स्पष्टीचकार– “प्रजापतिर्देवेभ्यो यज्ञान् व्यादिशत् स आत्मन्नाज्यमधत्त तं देवा अब्रुवन्नेष वाव यज्ञो यदाज्यमप्येव नोऽत्रास्त्विति” (तैसं २·६·३) इति । यदा प्रजापतिर्यज्ञहवींषि देवेभ्यो विभज्य ददौ तदानीमाज्यं स्वकीयत्वेन स्वीचकार । तद् दृष्ट्वा देवा यज्ञे सारभूतं हविराज्यमेवेति वदन्तोऽस्माकमप्याज्ये भागोऽस्त्वित्यपेक्षितवन्त इत्यर्थः । तच्चेदमाज्यम् ᵛअनाधृष्टं गतसारत्वदोषेण कदाचिदप्यतिरस्कृतम् । एतदपि प्रश्नोत्तराभ्यां तित्तिरिर्दर्शयति– “ब्रह्मवादिनो वदन्ति कस्मात् सत्याद्यातयामान्यन्यानि हवींष्ययातयाम-

---

1. B1 उपस्कृत्योप° for उपाकृत्युप°; B1 after भवन्ति adds ऋग्यजुः सामानि
2. B1 धामानि for स्थानानि
3. P1 with marking above तेजो° ins. on the margin आज्यदैवतं यजुः ।
11. V1 S1 C M1 अविनाश° for अविनाशि°
17. V1 S1 C M1 विशिष्यते for विशेष्यते
18. C S¹ V1 उपेक्षणं, M1 अवेक्षणं for अपेक्षणं
19. C V1 S1 आदिशत् for व्यादिशत्
20. C V1 S1 च for अत्र

मोऽज्यमिति प्राजापत्यमिति ब्रूयादयातयामा हि देवानां प्रजापतिरिति " (तैसं २·६·३) इति। चरुपुरोडाशादीनि चिरावस्थानेन यातयामानि गतसाराणि । आज्यं तु न तथा । तत्र प्रजापतिदेवताकत्वमित्यर्थः । अथवा वज्ररूपत्वादनाधृष्टं रक्षोभिरतिरस्कृतम् । तदाह कण्वः – " वज्रो वा आज्यं तस्मादाहानाधृष्टम् " (काशब्रा २·३·१·१५) इति । तित्तिरिरप्याह– " घृतं वै देवा वज्रं कृत्वा सोममघ्नन् " (तैसं ६·२·२) इति । तथेदमाज्यम् । ᵛदेवयजनं देवानुद्दिश्य यागसाधनम् । तच्च प्रसिद्धमेव ॥ ४ ॥

आ– आज्यमवेक्षते– ' तेजोऽसि ' इति । आज्यं देवता । ᵛतेजः ᵛअसि ᵛशुक्रम् ᵛअसि ᵛअमृतम् ᵛअसि । यो ह्येतद्भक्षयति ददाति जुहोति वा तस्य तेजःप्रभृतीनि भवन्तीति वाक्यार्थः । यद्वा– स्वत एवैतद्गुणयुक्तमाज्यम् । " आज्येन जुहोति तेजो वा आज्यम् " (तैसं ५·४·८) इति । शुक्रम् असि सर्वप्रसववीर्यमसि । अमृतम् असि अमृतसमरसमसि । एवंविधगुणयुक्तमाज्यम् इति । स्रुवं वीक्षमाणः आज्यं गृह्णाति– ' धाम नामासि ' इति । आज्यदेवत्यम् । ᵛधाम स्थानमायतनं, धीयतेऽस्मिन्निति धाम । ᵛनाम ᵛअसि । णम प्रह्वत्वे शब्दे च । सर्वाणि भूतानि आत्मानं प्रति नामयतीत्यतो नाम । ᵛप्रियं ᵛदेवानाम् इष्टमभिप्रेतम् । ᵛअनाधृष्टम् अनाधर्षितं रक्षोभिः । ᵛदेवयजनं देवा इज्यन्ते अनेनेति देवयजनम् । एवंविधमाज्यमिति स्तुवन् गृह्णाति ॥ ४ ॥

यस्ते प्राणः पशुषु प्रविष्टो देवानां॑ विष्ठामनु यो वितस्थे ।
आत्मन्वान्त्सोम घृतवान् हि भूत्वाऽग्निं गच्छ स्वर्यजमानाय विन्द ॥५॥ (१०) ॥

यः । ते । प्राणः । पशुषु । प्रविष्ट इति प्रऽविष्टः ।
देवानाम् । विष्ठाम् । विस्थामिति विऽस्थाम् । अनु । यः । वितस्थ इति विऽतस्थे ।
आत्मन्वानित्यात्मन्ऽवान् । सोम । घृतवानिति घृतऽवान् । हि । भूत्वा ।
अग्निम् । गच्छ । स्वः । यजमानाय । विन्द ॥ म्लं ॥ ५ ॥ (१०) ॥

हरिः ॐ ॥

इषे त्वा तिस्रः ॥ ३ ॥ द्यौरसि चतस्रः ॥ ४ ॥ अग्ने व्रतपते अष्ट ॥ ८ ॥ पवित्रे

---

5. C V1 S1 सोम मघ्नवान्निति, P1 सोममवघ्नन्निति for सोममघ्नन्निति
7. H1 om. इति । आज्यं देवता: B1 शुक्रस्त्वम् for शुक्रमसि [L 8]
8. H1 रक्षति for भक्षयति
9. H1 om. आज्येन...वीक्षमाणः [L. 11]
11. H1 om. आज्यदेवत्यम्; H1 after स्थानम् ins. अन्नम्
13. B1 om. अतो; H1 after °प्रेतम् adds. देवानाम्
14. H1 after first यजनम् ins. असि; H1 om. एवं . गृह्णाति

स्यश्चतस्रः ॥ ४ ॥ शर्मासि सप्त ॥ ७ ॥ धृष्टिरसि चतस्रः ॥ ४ ॥ शर्म पञ्च ॥ ५ ॥ देवस्य त्वा चतस्रः ॥ ४ ॥ द्वितीयो देवस्य त्वा षट् ॥ ६ ॥ प्रत्युष्टं पञ्च ॥ ५ ॥ दशानुवाकेषु पञ्चाशत् ॥ इषे देवस्य समाः पञ्चाशत् ॥ ५० ॥

इति शुक्लयजुर्वेदकाण्वसंहितायां प्रथमोऽध्यायः ॥ १ ॥

॥ हरिः ॐ ॥

सा– अनन्तरमन्त्रस्तु– ‘यस्ते प्राणः’ इत्यादिकः प्रयोगानुसारेणोपरिष्टादुत्कर्षणीयः । अत एव कात्यायनस्तद्विनियोगमुत्तरत्रैवमुवाच – “पुरोडाशावभिघार्योद्वास्योपस्तीर्णे निधायानक्ति यस्ते प्राणः” (काश्रौ २·८·१४) इति । पाठस्तु–‘ यस्ते प्राणः पशुपु प्रविष्टो देवानां विष्ठामनु यो वितस्थे। आत्मन्वान्त्सोम घृतवान् हि भूत्वाऽग्निं गच्छ स्वर्यजमानाय विन्द ’ इति । हे ʼसोम, श्रेष्ठतया सोमसमान हे पुरोडाश, ʼते तव प्राणः जीवनहेतुः प्राणसदृशः ʼयः आज्यपदार्थः ʼपशुपु गवादिपु ʼप्रविष्टः क्षीरमध्ये प्रविष्ट इव निगूढः । किं च ʼयः आज्यपदार्थः ʼदेवानाम् इन्द्रादीनां ʼविष्ठाम् अनु विशेषेण यागभूमौ स्थितिमनुसृत्य ʼवितस्थे स्वयमपि वेद्यामासादितं सद्विशेषेण तिष्ठति । ‘तेन’ इति अध्याहारः । तादृशेनाज्यपदार्थेन त्वयि प्रक्षिप्तेन ʼघृतवान् घृतयुक्तः ʼआत्मन्वान् भूत्वा जीवात्मयुक्त इव श्रेष्ठो भूत्वा ʼअग्निं ʼगच्छ आहुतिप्रक्षेपवेलायामाहवनीयाग्निं प्राप्नुहि । यद्वा– उद्देश्यमग्निदेवतां प्राप्नुहि । प्राप्य च ʼयजमानाय यजमानोपकारार्थं ʼस्वः ʼविन्द स्वर्गं लभस्व । हि-शब्दो घृताक्तपुरोडाशस्य यथोक्तफलसाधनत्वप्रसिद्धिं द्योतयति । उपरिष्टादधस्ताच्च घृतोपेतस्य पुरोडाशस्य स्वर्गप्राप्तिहेतुत्वं तित्तिरिराह – “उपरिष्टादभ्यज्याधस्तादुपानक्ति सुवर्गस्य लोकस्य समष्ट्यै” (तैसं २·६·३) इति ॥ ५ ॥ (१०) ॥

इति प्रथमाऽध्याये दशमोऽनुवाकः ॥ (१०) ॥

अथ विनियोगसंग्रहः–

ये दर्शपूर्णमासाङ्गमन्त्रास्तेऽध्याययोर्द्वयोः ।
उक्ता हविश्च यजमानमर्थावध्याययोस्तयोः ॥

---

1. C शर्मासि पुनः for second शर्म
2. C om. द्वितीयो and after त्वा adds पुनः
3. In the Ms of Padapāṭha belonging to Dingre देवा for देवस्य; after पञ्चाशत् ॥ ५० ॥ it adds इति शुक्लयजुःकाण्वपदसंहितायां प्रथमोऽध्यायः ॥ १ ॥ श्रीविठ्ठलार्पणमस्तु ॥
4. C प्रथमशाखायां प्रथमदशके for शुक्लयजुर्वेदकाण्व°
10. V1 C S1 °हेतुप्राण° for °हेतुः प्राण°
14. P1 उद्देश्याम् for उद्देश्यम्
15. M1 °साधनत्वे for °साधनत्व°
17. P1 समाप्त्या for समष्ट्यै
20. M1 S1 C om. ये दर्श° ...स्तयोः ॥
21. P1 यज्ञ° for यजमान°

आद्ये दशानुवाकाः स्युस्तेषामर्थो विविच्यते ।
शाखापवित्रनिष्पत्तिर्दोहनग्रहणे क्षणे ॥

अवघातः कपालानि पेषणं श्रपणं तथा ।
वेदिराज्यग्रहश्चैतेऽनुवाकार्थाः प्रकीर्तिताः ॥

इषे शाखां छिनत्त्यूर्जे मार्ष्टि वायेति वत्सकम् ।
स्पृष्ट्वा देवः स्पृशेद्गां च यज शाखोपगूहनम् ॥

वमोः शाखां पवित्रं स्यात षण्मन्त्रा अनुवाकगाः ।
द्यौः स्थालीं समुपाधाय वह्नां मा तेत्यधिश्रयेत् ॥

वमोः पवित्रमाधाय देवस्त्वा सेचने जपेत् ।
कामेति पृच्छेन् सा विश्वा त्रिभिस्तत्रोत्तरं वदेत् ॥

इन्द्रान्तं च निदध्यात तद्विष्णोर्दश समीरिताः ।
अग्ने यनेदमित्येतौ विकल्पेते व्रतग्रहे ॥

कस्त्वोदपात्रमादध्यात् कर्म शूर्पान्ययोर्ग्रहः ।
प्रतपेत प्रत्यु निष्टेति धूरग्ने प्रतिधूर्धुरम् ॥

स्पृशेद्देवा स्पृशेदीषां विष्णुरारुह्य वीक्षते ।
उर्वित्यथ त्यजेदन्यद्यच्छन्तां संस्पृशेद्धविः ॥

देव गृह्णाति शेषं तु भू स्पृष्ट्वा स्वरितीक्षते ।
दृंहावारुह्योऽनुगच्छेत पृथिव्याः स्थापयेद्भुवि ॥

अनवाके तृतीयेऽस्मिन्नुक्ता एकोनविंशतिः ।
दर्भौ छिन्द्यात पवित्रे स्थ उत्पुनाति सवीत्यपः ॥

हस्तेन चालयेद्देवीः प्रोक्षणापां प्रोक्षणं भवेत् ।
अग्नये त्वा हविः प्रोक्ष्य दैव्या पात्रोक्षणं भवेत् ॥

अनवाके चतुर्थेऽस्मिन् षण्मन्त्रा उदिताः खलु ।
शर्मेत्यजिनमादाय अवधूनोत्यवेति तत् ॥

---

1. C V1 S1 आद्यो for आद्ये; C V1 S1 °वाकाख्यस्, M1 °वाकाख्ये for °वाकाः स्युस्
6. C V1 S1 M1 यज्ञ° for यज°
9. C S1 आधाने for आधाय
11. P1 M1 चानि° for च नि°
12. M1 विकल्पेन, C S1 विकल्पेत V1 विकल्प्येते for विकल्पेते
13. M1 C V1 S1 शून्यान्ययो for शूर्पान्ययोर्
14. C प्रत्युष्टनिष्टेति, M1 V1 प्रत्युतिष्ठेति for प्रत्यु निष्टेति; M1 दुरग्र° V1 S1 धुरग्र° C धुरग्रं for धूरग्रे
15. M1 दिशु दारुण्य for विष्णुरारुह्य
16. V1 M1 C S1 om. अथ; M1 C S1 V1 अन्यान् for अन्यद्
20. M1 दर्भान् for दर्भौ; C अतः for अपः M1 सदीतयः for सवीत्यपः
22. C S1 देव्या पात्रेक्षणं, M1 वेद्या मात्रेक्षणं, V1 देव्या पात्रेक्षणं for दैव्या पात्रोक्षणं

अदि स्तृणाति चर्मोलूखले मन्त्रौ विकल्पितौ ।
तस्मिन् हविः क्षिपेदग्नेर्मुशलग्रहणं बृहन् ॥
स इन्त्यवदधात्येतद्धविः पत्नीमिहाह्वयेत ।
आ हन्याद् दृषदौ कुक्कु वर्ष शूर्पपरिग्रहः ॥
प्रति त्वा हविरुद्धापो निष्पुनाति परेत्यतः ।
तुषान्निरस्येदपह वायुर्वस्ताद्विवेचनम ॥
देवः पाव्यां हविः स्थाप्यं मन्त्राः षोडश निर्मिताः ।
उपवेषग्रहो धृष्टिरपाङ्गारवियोजनम् ॥
पुनः स्वीकार आदेव कपालं स्थापयेद् ध्रुवम् ।
अग्नेऽङ्गारं समारोप्य धरु धर्त्रमिति ब्रूयात् ॥
प्रत्यक्प्राची कपाले द्वे विश्वा दक्षिणतस्तथा ।
चित्त उत्तरतोऽङ्गारैरभ्यूहत्यूहति त्रिषु ॥
अनुवाके तु षष्ठेऽस्मिन् दश मन्त्रा उदीरिताः ।
शर्मावधूनादित्यास्त्वगित्येते पूर्ववत् त्रयः ॥
धिषेति दृषदं तत्र स्थापयेद्दिव इत्यतः ।
शम्यामधः स्थापयित्वा स्थापयेद्धिषणोपलाम् ॥
समोप्य तण्डुलान् धान्यं पिष्यात् प्राणेति तत् त्रिभिः ।
दीर्घां कृष्णाजिने प्रोहेच्चक्षुषे पिष्टमीक्षते ॥
महीनामाज्यनिर्वापो वेदो वेदं प्रमुञ्चति ।
अनुवाके सप्तमेऽस्मिन् मन्त्राः प्रोक्ताश्चतुर्दश ॥
पिष्टावापो देव पाव्यां समापो जलमानयेत् ।
जन संयोति तद् द्वेधा स्पृशेदिदमिदं द्वयम् ॥
इषे त्वाऽऽज्यमधिश्रित्य पुरोडाशं च घर्मतः ।
उरु तं प्रथयेदग्निरद्भिस्तस्याभिमर्शनम् ॥
अन्तः पर्यग्निकरणं देवस्त्वा श्रपयेद्धविः ।
मा भेः स्पृष्ट्वाऽतमं भस्म नीत्वाऽऽप्त्यापस्थितात्रयात् ॥
निनयेत् क्षालनजलं मन्त्रा षोडश वर्णिताः ।
देवस्य स्फ्यं समादत्त इडां लभ्य जपेदमुम् ॥
तृणं पृथिव्यै संस्थाप्य पृथिवी प्रहरेदिदम् ।
व्रजं पुरीषमादत्ते वर्षं चेदिमवेक्षते ॥

---

1. C अदित्यास्तृणादि, M1 V1 S1 अदिस्तृणादि for अदिस्तृणाति; M1 S1 C V1 च for मन्त्रौ
7. P M1 V1 S1 स्थाप्य for स्थाप्यं
12. P1 after त्रिषु ins. इति
22. M1 स्फ्येन for जन; M1 C S1 V1 द्वयात् for द्वयम्
23. C M1 S1 V1 श्रपेत्यतः for च घमतः
27. C M1 S1 V1 निलये for निनयेत्
29. C V1 S1 पृथिवि, P पृथिव्यां° for पृथिवी

वर्षोत्करे न्यसेत् पांसुर्द्वितीयप्रहृतिद्वयम् ।
वजं त्रयः पूर्ववत् स्युराग्नीध्रस्तं पुनर्न्यंसेत् ॥
तृतीयप्रहृतिर्द्दृष्टुः पूर्ववत् स्युर्व्रजं त्रयः ।
वेदेः पूर्वपरिग्राह्यो गायत्रेण त्रिभिर्भवेत् ॥
उत्तरस्तु परिग्राह्यः सुक्ष्मा चेत्यादिभिस्त्रिभिः ।
अनुमार्ष्टि पुरा वेदिं द्विषतः स्फ्यं परित्यजेत् ॥
नवमे ह्यनुवाकेऽस्मिंश्चतुर्विंशतिरीरिताः ।
स्रुवं तपेत् प्रत्यु निष्ट संमृज्यादनिशीत्यतः ॥
पुनः प्रत्युस्त्रिभिस्तापो मार्जनं च स्रुचीष्यते ।
अदित्यै नह्यते पत्नीं विष्णास्तत्पांशुगूहनम् ॥
ऊर्जे त्वाऽऽज्यमुद्वास्यादब्धे पत्नीमवेक्षयेत् ।
सवितुस्त्वाऽऽज्यमुत्पूय प्रोक्षणीः शोधयेत् सवि ॥
तेजोऽस्याज्यमवेक्ष्याथ जुह्वां गृह्णीत धामनी ।
यस्तेऽनक्ति पुरोडाशं मन्त्राः पञ्चदशेरिताः ॥
वेदार्थस्य प्रकाशेन तमो हार्दं निरोधयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक–श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे काण्वसंहितायां प्रथमोऽध्यायः ॥१॥

* * *

आ– पुरोडाशावभिघार्योद्वास्योपस्तीर्णे निधायानक्ति–' यस्ते प्राणः ' इति । पुरोडाशो देवता । हे पुरोडाश यस्ते प्राणः । ᵛते पुरोडाशस्य तव ᵛयः ᵛप्राणः प्राणिति प्राणयतीति [वा] प्राणः । प्राणाख्येन्द्रियाणां चक्षुरादीनां तदधिष्ठानभूतानां हि ᵛदेवानाम् ।

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीवासुदेवसूरि-पूज्यपाद-परमकारुण्यासादित-श्रीकृष्ण-भक्तिसाम्राज्यस्य श्रीमज्जातवेदभट्टोपाध्यायस्य सूनु [ना] चतुर्वेदि-श्रीमदानन्दबोध-भट्टोपाध्यायेन विरचिते काण्ववेदमन्त्रभाष्यसंग्रहे प्रथमोऽध्यायः ॥ १ ॥

---

1. C V1 S1 वषोत्करे; M1 वधूत्करे for वर्षोत्करे; M1 प्रहरस्त्वया V1 C S1 प्रह्वातिस्त्वया for प्रहृतिद्वयम्
2. C V1 S1 M1 after स्युर् ins. अररोऽ°
7. C (अ) पि, M1 तु for हि
12. C M1 S1 V1 सविः for सवि
13. C M1 V1 S1 धामना for धामनी
15. C M1 V1 निरोधयेत् for निरोधयन्
17. C M1 V1 S1 after वैदिक° ins. °बुक्क° and delete it after वीर
21. H1 °भुताय for °भूतानां; B1 om. हि देवानाम्

द्वितीयोऽध्यायः

[अथ प्रथमोऽनुवाकः]

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

प्रथमेऽध्याये हविःसंपादनोपयुक्ता मन्त्रा उक्ताः । द्वितीये तेन हविषा यजनोपयुक्ता मन्त्रा उच्यन्ते । तत्र प्रथमेऽनुवाके संस्कृतायां वेद्यां स्रुचामासादनमुच्यते । तत्रादौ तावदिध्मादीनां प्रोक्षणमुच्यते–

कृष्णो॑ऽस्याखरे॒ष्ठो॒ऽग्नये॑ त्वा॒ जुष्टं॒ प्रोक्षा॑मि॒ वेदि॑रसि ब॒र्हिषे॑ त्वा॒ जुष्टां॒ प्रोक्षा॑मि ।
ब॒र्हिर॑सि स्रु॒ग्भ्यस्त्वा॒ जुष्टं॒ प्रोक्षा॑मि ॥ १ ॥

कृष्ण॑ः । अ॒सि॒ । आ॒ख॒रे॒ष्ठः । आ॒ख॒रे॒स्थ इत्या॑ख॒रे॒ऽस्थः । अ॒ग्नये॑ । त्वा॒ । जुष्ट॑म् । प्र । उ॒क्षा॒मि॒ ।
वेदि॑ः । अ॒सि॒ । ब॒र्हिषे॑ । त्वा॒ । जुष्टा॑म् । प्र । उ॒क्षा॒मि॒ ।
ब॒र्हिः॑ । आ॒सि॒ । स्रु॒ग्भ्य इति॑ स्रु॒क्ऽभ्यः । त्वा॒ । जुष्ट॑म् । प्र । उ॒क्षा॒मि॒ ॥ त्रिः ॥ १ ॥

सा– कात्यायनः – “ इध्मं प्रोक्षति विस्रस्य वेदिं च बर्हिः प्रतिगृह्य वेद्यां कृत्वा पुरस्ताद्ग्रन्थि कृष्णोऽसीति प्रतिमन्त्रम् ” (काश्रौ २·७·१६) इति । योऽयमिध्मः पूर्वं दर्भैर्बद्धस्तं विस्रस्य प्रोक्षेत् । बर्हिस्तु प्रतिगृह्य तदीयग्रन्थि पूर्वस्यां दिशि यथा भवति तथा वेद्यां निधाय प्रोक्षेत् । पाठस्तु– ‘ कृष्णोऽस्याखरेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामि वेदिरसि बर्हिषे त्वा जुष्टं प्रोक्षामि । बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि ’ इति । हे इध्म, त्वं 'कृष्णः 'असि । अन्तोदात्तः कृष्णशब्दो वर्णवाची । अत एव–

“ ख॒ड्गो वैश्वदे॒वः श्वा कृ॒ष्णः ” (कासं २६·८·५)

तथा

“ कृ॒ष्णं वास॑ः ” (तैसं १.८.१); कृ॒ष्णं रूपम् ”

इत्यादावन्तोदात्त आम्नातः । अयं तु कृष्णशब्द आद्युदात्तत्वान्मृगवाची । तस्मादत्र कृष्णमृगो-

---

3. P1 before यस्य adds ॐ श्रीमद्दिगम्बराय नमः
5. C M1 S1 यजनाय, V1 यजमान° for यजन°
14. C V1 S1 प्रोक्षयेत्, M1 प्रोक्षयति for प्रोक्षेत्
15. C V1 S1 M1 प्रोक्षयेत् for प्रोक्षेत्; P1 with marking above कृष्णो° ins. on the margin अस्मिन्नध्यायेऽपि परमेष्ठी प्राजापत्यो देवा वा ऋषयः । यजुःष्वपि छन्दोऽस्तीति कात्यायनोक्तमार्गेण छन्द ऊहनीयम् । तत्र कृष्णोऽसीति इध्मदेवत्या बृहती यजुर्वा ।
18. V1 M1 C S1 om. खड्गोः ...कृष्णः
21. C M1 S1 om. तु

ऽसीत्यर्थः। यज्ञात्मको देवः कदाचिदपि केनापि निमित्तेन स्वशरीरगोपनाय कृष्णमृगस्य रूपं कृत्वा देवेभ्योऽपसृत्य निगूढोऽभवत्। ततो वने गत्वा वनस्पतीन् यज्ञयोग्यान् प्राविशत्। प्रविश्य खरे कठिने वृक्षे सर्वत्रावतस्थौ। तदेतदभिप्रेत्य 'कृष्णः' इति 'आखरेष्ठः' इति च द्वयमुच्यते। तदेतत् तित्तिरिर्दर्शयति– "यज्ञो देवेभ्यो निलायत। कृष्णो रूपं कृत्वा। स वनस्पतीन् प्राविशत्। कृष्णोऽस्याखरेष्ठोऽग्नये त्वा" (तैब्रा ३·३·६)। अतो वनस्पतिजन्य इध्मोऽग्नेः प्रियो भवति। तस्माद् हे इध्म, ᵛअग्नये ᵛजुष्टं प्रियं ᵛत्वा शुद्ध्यर्थं जलेन ᵛप्रोक्षामि। सोऽयमाद्यो मन्त्रः। हे वेदे, त्वमसुरसकाशाद् देवैर्लब्धत्वात् ᵛवेदिः ᵛअसि। लाभवाचिविदधातुनिष्पन्नत्वात् त्वं वेदिनामयुक्ताऽसि। एतच्च नाम तित्तिरिर्दर्शयति – "यदिमामविन्दन्त तद्वेद्यै वेदित्वम्" (तैसं ६·२·४) इति। अतस्तादृशीं त्वां ᵛबर्हिषे ᵛजुष्टां बर्हिर्धारणयोगितया प्रियां ᵛप्रोक्षामि। बर्हिषः प्रजारूपत्वाद्वेदेश्च पृथ्वीरूपत्वात् बर्हिर्धारकत्वं युक्तम्। तदाह तित्तिरिः –"प्रजा वै बर्हिः। पृथिवी वेदिः। प्रजा एव पृथिव्यां प्रतिष्ठापयति" (तैब्रा ३·३·६) इति। सोऽयं द्वितीयो मन्त्रः। हे दर्भ, त्वं ᵛबर्हिः ᵛअसि। प्रभूतत्वाद्वेदिवृंहणसमर्थमसि। अतः स्रुग्भ्यः ᵛजुष्टं स्रुचां धारणोपयोगित्वेन प्रियं त्वां ᵛप्रोक्षामि। अयं तृतीयः। स्रुचां यजमानसदृशत्वाद्यजमानस्य प्रजानां मध्येऽवस्थातुं युक्तत्वात् प्रजारूपे बर्हिषि यजमानस्यावस्थातुमुचितम्॥ १॥

आ– इध्मं प्रोक्षति–'कृष्णोऽसि' इति। अस्मिन्नध्यायेऽपि परमेष्ठी प्राजापत्यो देवा वा ऋषयः। यजुःष्वपि छन्दोऽस्ति चेत् पूर्वत्रोक्तमार्गेण छन्द ऊहनीयम्। 'कृष्णोऽसि' इति इध्मदेवत्यं यजुः बृहती। खण्डिकायाः इध्मप्रोक्षणे विनियोगः। सर्वत्र मन्त्रवाक्याभिधेया स्तुतिभाजो हविर्भाजो वा देवता ब्राह्मणवाक्यविहिता वा देवता [इति] यथायोग्यं ज्ञातव्यम्। अन्तोदात्तः कृष्णशब्दो वर्णवचनः। आद्युदात्तस्तु कृष्णशब्द कृष्णमृगवचनः। "यज्ञो ह वै देवेभ्योऽपचक्राम। स कृष्णो भूत्वा चचार" (काशब्रा २·२·३ ८) इति श्रुतेः। अत्र कृष्णमृगवचनः। कृष्णमृगो यज्ञसाधनत्वाद्यज्ञ इत्युच्यते। अतोऽत्रापीध्ममूलः ᵛकृष्णः ᵛअसि इति श्रूयते। 'आखरेष्ठः' इति। आ अध्यर्थे। आहवनीयाख्ये खरे आ अधि उपरि तिष्ठतीति ᵛआखरेष्ठः। आखरे स्थितः त्वं कृष्णमृगोऽसि। अतः ᵛअग्नये त्वां ᵛजुष्टम् अभिमतम् अभिरुचितं त्वां ᵛप्रोक्षामि। वेदिं प्रोक्षति– 'वेदिरसि' इति। वेदिः देवता। विद लाभे इत्यस्य रूपम्। वेदिरिति पुरुषार्थलाभहेतुर्वैदिकलक्षणसंपन्नो देशः। ᵛवेदिः ᵛअसि ᵛबर्हिषे। "अग्निर्जातवेदा वैश्वानरः .... बर्हिः" (द्र. निघण्टु ५.१.१-३; ५.२.६) इति वचनात् जातवेदसे बर्हिषे ᵛजुष्टं त्वां ᵛप्रोक्षामि। बर्हिः प्रोक्षति-'बर्हिरसि' इति। प्रसिद्धो बर्हिर्देवता। ᵛबर्हिः त्वम् ᵛअसि। अतः ᵛस्रुग्भ्यः ᵛजुष्टं ᵛत्वा त्वां बर्हिषा ᵛप्रोक्षामि॥ १॥

---

1. P1 Against यज्ञात्मकः on the margin अत एव कृष्णो मृगसंयोगे इति कात्यायनकृत- प्रातिशाख्ये उक्तम्। (द्र. वाप्रा २.२५)
4. P1 निलीयत, C V1 S1 निलीयन् for निलायत; P1 C V1 S1 कृष्णं for कृष्णो
5. M1 प्रियतमः for प्रियः
6. M1 तच्छुद्ध्यर्थं for त्वा शुद्ध्यर्थं; S1 लब्धो for लब्धत्वात्
14. H1 before इध्मं adds गणाधिपतये नमः। श्रीगुरुभ्यो नमः ॐ...H1 om. अपि.
16. B1 om. यजुः
26. B1 बर्हिः for बर्हिषा

अदि॑त्यै॒ व्युन्द॑नमसि॒ विष्णो॑ स्तु॒पो॑ऽसि ।
ऊर्ण॑म्रदसं त्वा स्तृणामि स्वास॒स्थां दे॒वेभ्य॑: ।।२।।

अदि॑त्यै । व्युन्द॑न॒मिति॑ वि॒ऽउन्द॑नम् । अ॒सि॒ । विष्णो॑: । स्तु॒पः । अ॒सि॒ ।
ऊर्ण॑म्रद॒समित्यूर्ण॑ऽम्रदसम् । त्वा॒ । स्तृ॒णा॒मि॒ ।
स्वा॒स॒स्थामिति॑ सु॒ऽआ॒स॒स्थाम् । दे॒वेभ्य॑: ॥ एं ॥ २ ॥

सा– कात्यायनः – "शेषं मूलेपूपसिञ्चति अदित्यै व्युन्दनम्" (काश्रौ २·७·१७) इति । 'असि' इति मन्त्रशेषः। हे प्रोक्षणशेषोदक त्वम् ᵛअदित्यै भूम्याः ᵛव्युन्दनम् ᵛअसि विशेषेण क्लेदनसाधनमसि । उन्दी क्लेदने इति धातुः । दर्भमूलसेचनं कण्व उपपादयति– "अथ याः परिशिष्टाः प्रोक्षण्यो भवन्ति ताभिर्बर्हिषो मूलान्युप निनयत्यदित्यै व्युन्दनमसीतीयं वा अदितिरोषधयो वै बर्हिरस्या एवैतत् पृथिव्या ओषधीनां मूलान्युपोनत्ति तस्मादिमा आर्द्रमूला ओषधयः" (काशब्रा २·३·५·४) इति ॥

कात्यायनः – "बर्हिर्विस्रंस्य पुरस्तात् प्रस्तरग्रहणं विष्णोरिति" (काश्रौ २·७·१८) इति । 'स्तुपोऽसि' इति मन्त्रशेषः । दर्भमुष्टिरूप हे प्रस्तर, त्वं ᵛविष्णोः व्यापकस्य यज्ञस्य ᵛस्तुपः ᵛअसि केशसंघातरूपशिखेव दर्भसंघातरूपोऽसि । स्त्यै ष्ट्यै शब्दसंघातयोः इति धातुः । औणादिको डुप्प्रत्ययः*। तदाह कण्वः – "अथ विस्रस्य पुरस्तात् प्रस्तरं गृह्णाति विष्णोः स्तुपोऽसीति। यज्ञो वै विष्णुरयमु वै स्तुपो यच्छिखा तमेवैतद्यज्ञे दधाति" (काशब्रा २·३·२·६) इति ॥ २ ॥

कात्यायनः – "वेदिं स्तृणात्यूर्णम्रदसमिति" (काश्रौ २·७·१९) इति । पाठस्तु– 'ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थां देवेभ्यः' इति । हे वेदे, त्वां ᵛस्तृणामि दर्भैराच्छादयामि । कथंभूतां त्वाम् ? ᵛऊर्णम्रदसम् ऊर्णमिव मृद्वीम् । यथा प्रभोरुपवेष्टुं कम्बलं बहुपुटयुक्तत्वेन संकोच्य भूमावास्तृणन्ति, सा च भूः काठिन्यं परित्यज्य मृदुर्भवति तथा दर्भैराच्छादिता मृदुः संपद्यते । ᵛदेवेभ्यः ᵛस्वासस्थां देवोपकारार्थं सुखेनासितुं स्थानभूताम् । एतदेव कण्व आह– "स्वासस्थां देवेभ्यः ... इत्येवैतदाह" (काशब्रा २·३·२·१०) इति ॥ २ ॥

---

6. P1 with marking above उप° ins. on the margin लिङ्गोक्तदैवतं यजुः ।
8. V1 M1 C S1 om. उन्दी क्लेदने इति धातुः ।
9. C V1 S1 यैर्वरस्या for वै बर्हिरस्या
10. C S1 M1 आर्ध°, V1 अर्ध° for आर्द्र°
11. P1 with marking above ग्रहणं ins. on the margin प्रास्तरं यजुरार्षं प्रजापतेः
12. P1 with marking above °रूप ins. on the margin बर्हिषः पूर्वभागात्°
13. C V1 S1 M1 before °शिखा ins. दर्भः; P1 om. औणादिको डुप्प्रत्ययः,
* [उणादिषु डुप् नास्ति । 'स्तुवो दीर्घश्च' (उ ३·२५) इत्यनेन तु स्तौतेः स्तूपः व्युत्पद्यते ।]
14. P1 इयम् for अयम्
16. P1 with marking above वेदिं ins. on the margin वेदिदैवतं यजुः ।
19. V1 S1 C M1 ऋजुर् for मृदुर्

आ– प्रोक्षणीशेषं मूलेषूपासिञ्चति– ‘अदित्यै व्युन्दनम्’ इति । लिङ्गोक्तदेवत्यानि यजूंषि । ᵛअदित्यै, षष्ठ्यर्थे चतुर्थी, अदित्याः । दो अवखण्डने इत्यस्य रूपं दितिः । न दितिः अदितिः । तस्या अनवखण्डितायाः पृथिव्याः ᵛव्युन्दनम् । उन्दी क्लेदने । उदकसेचनम् ᵛअसि । प्रस्तरं गृह्णाति– ‘विष्णोः स्तुपोऽसि’ इति । ᵛविष्णोः यज्ञस्य ᵛस्तुपः । स्त्यै ष्ट्यै शब्दसंघातयोरिति स्त्यायते रूपं स्तुपः । शिखासंघातः ᵛअसि । वेदिं स्तृणाति- ‘ऊर्ण [म्रदस] म्’ इति । वेदिर्देवता । ᵛऊर्णम्रदसं ऊर्णमिव त्वां मृद्वीं कर्तुं मृदुत्वमापादयितुं त्वां वेदिं ᵛस्तृणामि । स्तृञ् आच्छादने । आच्छादयामि । ᵛस्वासस्थाम् । सु शोभनतया यस्यामास्यन्ते स्थीयन्त इति स्वासस्था वेदिः । यद्वा साधुः मर्यादया यस्यामासीदन्ति सा तथोक्ता । ᵛत्वा त्वां स्तृणामि ᵛदेवेभ्यः अर्थाय ॥ २ ॥

भूप॑तये॒ स्वाहा॒ भुव॑नपतये॒ स्वाहा॑ भूता॒नां॑ प॑तये॒ स्वाहा॑ ।
ग॒न्ध॒र्वस्त्वा॑ वि॒श्वाव॑सुः परि॑ दधातु॒ विश्व॒स्यारि॑ष्ट्यै ॥ ३ ॥
यज॑मानस्य परि॒धिर॑स्य॒ग्निरि॒ळ ई॑ळि॒तः ।
इन्द्र॑स्य बा॒हुर॑सि॒ दक्षि॑णो॒ विश्व॒स्यारि॑ष्ट्यै ।
यज॑मानस्य परि॒धिर॑स्य॒ग्निरि॒ळ ई॑ळि॒तः ।
मि॒त्रावरु॑णौ त्वोत्तर॒तः परि॑ धत्तां ध्रु॒वेण॒ धर्म॑णा॒ विश्व॒स्यारि॑ष्ट्यै ।
यज॑मानस्य परि॒धिर॑स्य॒ग्निरि॒ळ ई॑ळि॒तः ॥ ४ ॥

भूप॑तय॒ इति॒ भूऽप॑तये । स्वाहा॑ । भुव॑नपतय॒ इति॒ भुव॑नऽपतये । भूतानां॑म् । प॑तये । स्वाहा॑ ।
ग॒न्ध॒र्वः । त्वा॒ । वि॒श्वाव॑सुः । वि॒श्वव॑सु॒रिति॑ वि॒श्वऽव॑सुः ।
परि॑ । द॒धा॒तु । विश्व॑स्य । अरि॑ष्ट्यै ॥ डीं ॥ ३ ॥
यज॑मानस्य । प॒रि॒धिरिति॑ प॒रि॒ऽधिः । अ॒सि॒ । अ॒ग्निः । इ॒ळः । ई॒ळि॒तः ।
इन्द्र॑स्य । बा॒हुः । अ॒सि॒ । दक्षि॑णः । [विश्व॑स्य । अरि॑ष्ट्यै ।]
मि॒त्रावरु॑णौ । त्वा॒ । उ॒त्त॒र॒तः । परि॑ । ध॒त्ता॒म् । ध्रु॒वेण॑ । धर्म॑णा ॥ खैं ॥ ४ ॥

---

1. H1 om. प्रोक्षणीशेषं
5. B1 om. स्तुपः
6. H1 B1 ऊर्णं for ऊर्ण°
7. H1 स्वासस्थम for स्वासस्थाम्

सा– 'भूपतये स्वाहा' इत्यादीनां त्रयाणां मन्त्राणां प्रयोगानुसारेणान्यत्रोत्कर्षः कर्तव्यः। अत एवान्यत्र कात्यायन आह– "स्कन्नमभिमृशति भूपतये स्वाहेति" (द्र. काश्रौ २५.२.२६) इति। तमेतं विनियोगं कण्वो विस्पष्टं प्रपञ्चयामास– "तदभिमृशति भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेत्येतानि वै तेषामग्नीनां नामानि भूपतिर्भुवनपतिर्भूतानां पतिरिति" (काशब्रा २.३.२.१६) इति। भूपत्यादयस्त्रयोऽग्नेर्भ्रातरः। स्वाहाशब्दो देवान् प्रति दानवाची निपातः। अत एव बृहदारण्यके श्रूयते– "देवा उपजीवन्ति। स्वाहाकारं च वषट्कारं च" (बृउ ५.८.१) इति। हविषो ग्रहणकाले परिधिभ्यो बहिर्यद्धविः स्कन्नं तद्धविर्भूपत्यादिनामकेभ्योऽग्निभ्रातृभ्यस्त्रिभ्यो दत्तमिति मन्त्राणामर्थः। एतेऽग्निभ्रातरो देवेभ्यो हव्यं वहन्तो यदा मृतास्तदानीमग्निः स्कन्नं हविर्भ्रातृभ्यो भवत्विति वरं वृतवान्। तमिममर्थमाह तित्तिरिः– "अग्नेस्त्रयो ज्यायाꣳसो भ्रातर आसन् ते देवेभ्यो हव्यं वहन्तः प्रामीयन्त" इत्यारभ्यान्ते स्पष्टमुवाच–"सोऽब्रवीद्वरं वृणै यदेव गृहीतस्याहुतस्य बहिःपरिधि स्कन्दात् तन्मे भ्रातृणां भागधेयमसदिति तस्माद्यद्गृहीतस्याहुतस्य बहिःपरिधि स्कन्दति तेषां तद्भागधेयं तानेव तेन प्रीणाति" (तैसं २.६.६) इति ॥

कात्यायनः – "परिधीन् परिदधात्यार्द्रानेकवृक्षीयान् बाहुमात्रान् पालाशवैकङ्कतकार्ष्मर्यबैल्वान्। पूर्वालाभे पूर्वालाभ उत्तरान् खादिरौदुम्बरान् वा मध्यमदक्षिणोत्तरान् गन्धर्व इति प्रतिमन्त्रम्" (काश्रौ २.८.१) इति। प्रथममन्त्रपाठस्तु– 'गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिळ ईळितः' इति। हे प्रथमपरिधे, द्युलोकावस्थितं सोमं रक्षितुं सोमस्य पार्श्वे विश्वस्मिन् सर्वस्मिन् प्रदेशे वसतीति ᵛविश्वावसुः एतन्नामकः ᵛगन्धर्वः। तथा च श्रुत्यन्तरम्– "विश्वावसुꣳ सोमगन्धर्वम्" (तैब्रा ४.११.७) इति। ᵛत्वा प्रादेशत्रयपरिमितां समिधं त्वां ᵛपरिदधातु आहवनीयस्य पश्चिमभागे सर्वतः स्थापयतु। किमर्थम्? ᵛविश्वस्य ᵛअरिष्ट्यै। रिषतिर्हिंसार्थः। आहवनीयस्थानरूपस्य विश्वस्य हिंसाराहित्याय। परिधेरभावे सति असुराः प्रविश्य हिंसां कुर्वन्ति। किं च ᵛयजमानस्य ᵛपरिधिः ᵛअसि। यजमानमसुरेभ्यो रक्षितुं पश्चिमदिशि सर्वतः स्थापितोऽसि। किं च 'अग्निः इळः ईळितः'। 'असि' इत्यनुवर्तते। आहवनीयस्याग्नेः प्रथमो ज्येष्ठभ्राता भूपतिनामधेयः ᵛअग्निः तद्रूपोऽसि। स चाग्निः ᵛइळः। स्तुतियोग्यस्तस्मात् ᵛईळितः होत्रादिभिः स्तुतः। ईड स्तुताविति धातुः ॥

---

2. P1 with marking above °मृशति ins. on the margin त्रीण्याग्नेयानि यजूंषि।
4. M1 च for वै
5. C S1 निपातितः for निपातः
7. C S1 M1 om. त्रिभ्यो
10. P1 वृणैव देवा°, C V1 S1 वृणैग्रं यदेवा° for वृणै यदेव; C S1 V1 °गृहीतं स्याद्धुतस्य बहिः परिधिः for गृहीतस्याहुतस्य बहिःपरिधि
11. C V1 S1 M1 गृहीतं स्यात् तद्धुतस्य for गृहीतस्याहुतस्य; °परिधिः for °परिधि
13. V1 S1 C M1 om. आर्द्रान्...°औदुम्बरान् वा (L 14)
14. V1 M1 S1 °उत्तरात् for °उत्तरान्
15. P1 with marking above गन्धर्वस् ins. on the margin परिधिदैवतं यजुः।
16. V1 S1 C M1 om. हे प्रथमपरिधे
19. M1 °हिंसार्थकः for हिंसार्थः
21. M1 C V1 S1 स्थाप्यता° for स्थापितो°
23. P1 om. इति धातुः

द्वितीयमन्त्रपाठस्तु– ‘ इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै । यजमानस्य परिधिरस्यग्निरिळ ईळितः ’ । हे द्वितीयपरिधे, त्वम् ^{v}इन्द्रस्य ^{v}दक्षिणः ^{v}बाहुः ^{v}असि । रक्षायां समर्थत्वादिन्द्रबाहुत्वोपचारः । ‘ विश्वस्य ’ इत्यादि व्याख्यातम् । अत्राग्निशब्देन द्वितीयभ्राता भुवनपतिनामको विवक्षितः ॥

तृतीयमन्त्रपाठस्तु– ‘ मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा विश्वस्यारिष्ट्यै । यजमानस्य परिधिरस्यग्निरिळ ईळितः ’ इति । हे तृतीयपरिधे, त्वां ^{v}मित्रावरुणौ एतन्नामकौ देवौ ^{v}ध्रुवेण स्थिरेण ^{v}धर्मणा धारणेन पोषणेन वा ^{v}उत्तरतः उत्तरस्यां दिशि ^{v}परिधत्तां परितः स्थापयताम् । ‘ विश्वस्य ’ इत्यादि पूर्ववत् । अत्राग्निशब्देन ‘ भूतानां पतिः ’ इत्येतन्नामकस्तृतीयो भ्राता विवक्षितः ॥ ३–४ ॥

आ– स्कन्नमभिमृशति– ‘ भूपतये स्वाहा ’ इति । एतानि त्रीणि यजूंषि आग्नेयानि । प्रसिद्धस्याग्नेर्भ्रातरस्त्रयः सन्ति । तेषामेते भागाः देवैः कल्पिताः । ^{v}भूपतये प्रथमव्याहृतिपतये अग्न्यर्थं स्वाहाऽऽह्वानं, हा अहा सु शोभनं आ आसनम् अहा ^{v}स्वाहा । ^{v}भुवनपतये जगत्पतये ^{v}स्वाहा । भूतानाम् अधिपतिः योऽग्निस्तस्मै ^{v}स्वाहा ॥ ३ ॥

परिधीन् परिदधाति– ‘ गन्धर्वस्त्वा ’ इति । ‘ गन्धर्वस्त्वा ’ इत्यादीनां त्रयाणां यजुषां परिधयो देवताः । ^{v}विश्वावसुः विश्वमावसतीति विश्वावसुः ^{v}गन्धर्वः ^{v}त्वा परिधिं त्वां ^{v}परिदधातु सर्वतः स्थापयतु । ^{v}विश्वस्य ^{v}अरिष्ट्यै विश्वास्याविनाशाय । रिषतिर्हिंसार्थः । किं च, न केवलमाहवनीयस्य परिधिः किंतु ^{v}यजमानस्य अपि ^{v}परिधिः । परितो धीयत इति परिधिः ^{v}असि । किं च ^{v}अग्निः असि, आहवनीयस्य भ्राता योऽग्निः सोऽसि । अतः ^{v}इळः । ईड स्तुतौ । स्तोता होत्राभिप्रायेण । ^{v}ईळितः स्तुतश्च । दक्षिणं परिधिं परिदधाति–‘ इन्द्रस्य बाहुरसि ’ इति । ^{v}इन्द्रस्य ^{v}दक्षिणः ^{v}बाहुः इव परिधे त्वं स्थितः ^{v}असि । व्याख्यातमन्यत् । उत्तरं परिधिं परिदधाति । ^{v}मित्रावरुणौ [वाय्व्–] आदित्यौ ^{v}त्वा ^{v}उत्तरतः ^{v}परिधत्तां ^{v}त्वां ^{v}ध्रुवेण स्थैर्ययुक्तेन ^{v}धर्मणा क्रियासूक्ष्मरूपेण धर्मणा । व्याख्यातमन्यत् ॥ ४ ॥

वी॒तिहो॑त्रं त्वा कवे द्यु॒मन्त॒ꣳ समि॑धीमहि । अग्ने॑ बृ॒हन्त॑मध्व॒रे ॥ ५ ॥

वी॒तिहो॑त्र॒मिति॑ वी॒तिऽहो॑त्रम् । त्वा॒ । क॒वे॒ । द्यु॒मन्त॒मिति॑ द्यु॒ऽमन्त॑म् । सम् । इ॒धी॒म॒हि॒ । अग्ने॑ । बृ॒हन्त॑म् । अ॒ध्व॒रे ॥ रौ ॥ ५ ॥

सा– कात्यायनः – “ प्रथमं परिधिꣳ समिधोपस्पृश्य वीतिहोत्रमित्यादधाति ” (काश्रौ २·८·२) इति । पाठस्तु– ‘ वीतिहोत्रं त्वा कवे द्युमन्तꣳ समिधीमहि । अग्ने बृहन्तमध्वरे ’ इति ॥ कविः क्रान्तदर्शी, सर्वज्ञ इत्यर्थः । तथाविध हे ^{v}अग्ने, त्वाम् ^{v}अध्वरे यागे निमित्तभूते सति ^{v}समिधीमहि ।

---

10. B1 स्वाहा । हानं हानं हा अहा for स्वाहाऽऽह्वानं हा अहा.

अनेनाघारनामकसमिध ऊर्ध्वस्थापनेन सम्यग्दीपयामः । कथंभूतं त्वाम् ? ᵛवीतिहोत्रम् । इष् गताविति धातुः । इतिर्गतिः । विविधा इतिर्व्याप्तिः । समृद्धिरित्यर्थः । वीतये होत्रं होमो यस्याग्नेरिति विग्रहः । एतमेवार्थं तित्तिरिर्दर्शयति– " वीतिहोत्रं त्वा कव इत्याह । अग्निमेव होत्रेण समर्द्धयति " (तैब्रा ३·३·६) इति । ᵛद्युमन्तं स्वत एव द्योतनोपेतं, ᵛबृहन्तं बृहद्यागवर्तित्वेन ॥ ५ ॥

आ– आहवनीये इध्मकाष्ठमादधाति– ' वीतिहोत्रम् ' इति । आग्नेयं गायत्रम् । वी गतिव्याप्तिप्रजननकान्त्यसनखादनेषु । वीतिरत्राभिलाषवचनः । वीतिः होत्रे यस्य सः वीतिहोत्रः । अथवा विविधा ईतिर्गतिर्वीतिः, प्रशास्त्रादिषु होतृकर्मसु वीतिर्यस्य सः वीतिहोत्रः, तम् । हे भगवन् ᵛअग्ने ᵛकवे क्रान्तदर्शिन् । अतीतानागतविप्रकृष्टविषयं युगपत् ज्ञानं यस्य सः, तत्संबोधनं कवे [इति] । ᵛवीतिहोत्रं ᵛद्युमन्तं दीप्तिमन्तं त्वां ᵛसमिधीमहि । इन्धी दीप्तौ । संदीपयामः । ᵛअध्वरे यज्ञे । अनेनेध्मकाष्ठेन ᵛबृहन्तं वर्धमानं समिधीमहि ॥ ५ ॥

स॒मिद॑सि॒ सूर्य॑स्त्वा पु॒रस्ता॑त् पा॒तु कस्या॑श्चिद॒भिश॑स्त्यै ।
स॒वि॒तुर्बा॒हू स्थः॑ ॥ ६ ॥

स॒मिदिति॑ स॒म्ऽइत् । अ॒सि॒ । सूर्यः॑ । त्वा॒ । पु॒रस्ता॑त् । पा॒तु॒ ।
कस्याः॑ । चि॒त् । अ॒भिश॑स्त्या॒ इत्य॒भिऽश॑स्त्यै ।
स॒वि॒तुः । बा॒हू इति॑ बा॒हू । स्थ॒ः । ढि ॥ ६ ॥

सा– " अनुस्पृश्य द्वितीयां समिदसीति " (काश्रौ २·८·३) इति । द्वितीयामाघारसमिधमादधतीत्यनुवर्तते । हे आघारसमिद्, अग्नेः समिन्धनेन दीप्यमाना भवसि ॥

कात्यायनः – " सूर्यस्त्वेति जपत्याहवनीयमीक्षमाणः " (काश्रौ २·८·४) इति । पाठस्तु– ' सूर्यस्त्वा पुरस्तात् पातु कस्याश्चिदभिशस्त्यै ' इति । हे आहवनीय, त्वां ᵛपुरस्तात् पूर्वस्यां दिशि ᵛसूर्यः ᵛकस्याश्चित् ᵛअभिशस्त्यै सर्वस्या अभिहिंसायाः ᵛपातु रक्षतु । या काचिद्धिंसा प्रसक्ता तां सर्वां परिहरत्वित्यर्थः । चतुर्थी पञ्चम्यर्थे द्रष्टव्या । इतरस्मिन् दिक्त्रये परिधित्रयेण रक्षा भवति । पूर्वस्यां तु परिध्यभावेऽपि

---

1. V1 S1 C M1 om. °नामक°; V1 S1 M1 C दीपयामि; for दीपयामः; P1 with marking above दीपयामः ins. on the margin इत्यर्थः । छन्दसीश्यनुवर्तमाने इदन्तो मसीतीकारागमः ।
6. B1 °लाषः for °लाषवचनः
16. P1 with marking above first द्वितीयां ins. on the margin आग्नेयं यजुः ।
17. V1 C M1 S1 om. आघार°; M1 V1 C S1 पूर्वभागे स्थाप्यमाना for समिन्धनेन दीप्यमाना
19. P1 with marking above सूर्यस् in on the margin आहवनीयदैवतं यजुः ।
20. C V1 S1 अपि for second अभि; P1 परिरक्षतु for रक्षतु ।
21. P1 with marking above चतुर्थी ins. on the margin सुपां सुलुगिति सूत्रेण.

सूर्यो रक्षकः । इममेवार्थं कण्व आह– “ परिधय इमेऽभितो गुप्तये परिहिता भवन्ति । सूर्यमेवास्यैतत् पुरस्तादभि गोप्तारं करोति ” (काशब्रा २·३·२·२३) इति ॥

कात्यायनः – “ बर्हिषस्तृणे तिरश्ची निदधाति सवितुरिति ” (काश्रौ २·८·५) इति । ‘ बाहू स्थः ’ इति मन्त्रशेषः । वेद्यामास्तीर्णस्य प्रागग्रस्य दर्भस्योपरि पुनरास्तरिष्यमाणस्य प्रस्तरस्य सांकर्यपरिहाराय तृणद्वयं तिर्यङ् निदध्यात् । हे तृणे, युवामुभे ᵛसवितुः प्रेरकस्य देवस्य ᵛबाहू ᵛस्थः दक्षिणोत्तरबाहुस्थानीये भवथः ॥ ६ ॥

आ– द्वितीयमादधाति– ‘ समिदसि ’ इति । ᵛसमित् इन्धनम् ᵛअसि । समिद्रूपेण अग्निः स्तूयते । आहवनीयमीक्षमाणो जपति–‘ सूर्यस्त्वा ’ इति । आहवनीयो देवता । सु ईरणात् ᵛसूर्यः ᵛत्वा आहवनीयं ᵛपुरस्तात् ᵛपातु गोपयतु, “ सूर्यमेवास्यैतत् पुरस्तादभि गोप्तारं करोति ” (काशब्रा २·२·३·२३) इति श्रुतेः । कस्मादिति ? ᵛकस्याश्चित् ᵛअभिशस्त्यै । यः कश्चिदभिशापस्तस्मादित्यर्थः । बर्हिस्तृणे तिरश्ची निदधाति– ‘ सवितुर्बाहू ’ इति । विधृतिदेवते । अनेन प्रस्तरधारणादिकर्मणा ᵛसवितुः ᵛबाहू इव ᵛस्थः भवथः ॥ ६ ॥

ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्यः।
आ त्वा वसवो रुद्रा आदित्याः सदन्तु ॥ ७ ॥

उर्णम्रदसमित्यूर्णऽम्रदसम् । त्वा । स्तृणामि । स्वासस्थामिति सुऽआसस्थाम् । देवेभ्यः ।
आ । त्वा । वसवः । रुद्राः । आदित्याः । सदन्तु ॥ झां ॥ ७ ॥

सा– कात्यायनः– “ तयोः प्रस्तरः स्तृणात्यूर्णम्रदसमिति ” (काश्रौ २·८·१०) इति । पाठस्तु– ‘ ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्यः ’ इति । पूर्ववद्व्याख्येयम् ॥

कात्यायनः – “ अभिनिदधात्या त्वा वसवः ” (काश्रौ २·८·११) इति । “ सव्याङ्गुल्याऽशून्ये ” (द्र. आपश्रौ २·८·१२) इति । ‘ प्रस्तरम् ’ इत्यनुवर्तते । आस्तीर्णं प्रस्तरं तद्वद्रहिते शून्यस्थाने वामाङ्गुल्या प्रसारयेत् । पाठस्तु– ‘ आ त्वा वसवो रुद्रा आदित्याः सदन्तु ’ इति । प्रस्तरस्य सवनत्रयाभिमानिनस्त्रयो वस्वादयो देवगणास्त्वामासादयन्तु सर्वतः प्रसारयन्तु । तमेतमर्थं कण्वः स्पष्टमाह–

---

1. C M1 S1 V1 पुरोगां for अभिगोप्तारं
3. P1 with marking obove निदधाति ins. विधृतिदैवतं यजुः ।
4. P1 आस्तीर्ण° for आस्तरिष्य°
18. P1 with marking above ऊर्ण° ins. प्रस्तरदेवतं यजुः P1 V1 ऊर्ण ऊर्ण°; M1 S1 व्याख्यातम्, C व्याख्यानम् for व्याख्येयम्.
22. P1 with marking above वस्वादयो ins. on the margin वसवः प्रातः सवनं रुद्रा माध्यन्दिनं सवनमादित्यास्तृतीयसवनामित्यन्यत्रोक्तेः; P1 परिरक्षयन्तु for प्रसारयन्तु; V1 S1 C M1 om. तमेतम्...भवति इति [P 111 L 2]

“आ त्वा वसवो रुद्रा आदित्याः सदन्त्वित्येते वै त्रयो देवा यद्वसवो रुद्रा आदित्या एते त्वा सीदन्त्वित्येवैतदाह तदेव सव्यः पाणिरधि निहितो भवति” (काशब्रा २·३·२·२५) इति ॥७॥

आ– तयोः प्रस्तरं स्तृणाति ‘ ऊर्णम्रदसम् ’ इति । ‘ ऊर्णम्रदसम् ’, ‘ आ त्वा ’ इति द्वे प्रस्तरदेवत्ये । ᵛऊर्णम्रदसम् ᵛऊर्णामिव मृदुभूतं ᵛत्वा त्वां ᵛस्तृणामि । ᵛस्वासस्थं सु साधु अस्मिन् आसीदन्तीति स्वासस्थः, तं ᵛदेवेभ्यः । प्रस्तरमभिनिदधाति– ‘ आ त्वा वसवः ’ इति । ᵛत्वा प्रस्तरं त्वां सवनदेवताः ᵛवसवः ᵛरुद्राः ᵛआदित्याः ᵛआसदन्तु आसीदन्तु ॥ ७ ॥

घृ॒ताच्य॑सि जु॒हूर्नाम॒ सेदं प्रि॒येण॒ धाम्ना॑ प्रि॒ये सद॑सि सीद ।
घृ॒ताच्य॑स्युप॒भृन्नाम॒ सेदं प्रि॒येण॒ धाम्ना॑ प्रि॒ये सद॑सि सीद ।
घृ॒ताच्य॑सि ध्रु॒वा नाम॒ सेदं प्रि॒येण॒ धाम्ना॑ प्रि॒ये सद॑सि सीद ।
प्रि॒येण॒ धाम्ना॑ प्रि॒ये सद॑सि सीद ॥८॥

घृ॒ताची॑ । अ॒सि॒ । जु॒हूः । नाम॑ । सा । इ॒दम् । प्रि॒येण॑ । धाम्ना॑ । प्रि॒ये । सद॑सि । सी॒द॒ ।
[घृ॒ताची॑ । अ॒सि॒ ।] उ॒प॒भृदित्यु॑प॒ऽभृत् । [नाम॑ । सा । इ॒दम् । प्रि॒येण॑ । धाम्ना॑ । प्रि॒ये । सद॑सि । सी॒द॒ ।]
[घृ॒ताची॑ । अ॒सि॒ ।] ध्रु॒वा । [नाम॑ । सा । इ॒दम् । प्रि॒येण॑ । धाम्ना॑ । प्रि॒ये । सद॑सि । सी॒द॒ ।]
प्रि॒येण॑ । धाम्ना॑ । प्रि॒ये । सद॑सि । सी॒द॒ ॥ कों ॥ ८ ॥

सा- कात्यायनः – **“जुहूं प्रतिगृह्य निदधाति घृताचीत्येवमितरे । उत्तराभ्यां प्रतिमन्त्रम्” (काश्रौ २·८·१२,१३) इति । प्रथममन्त्रपाठस्तु– ‘ घृताच्यसि जुहूर्नाम सेदं प्रियेण धाम्ना प्रिये सदसि सीद ’ इति । हे जुहु, त्वं घृतमञ्चतीति ᵛघृताची घृतपूर्णा ᵛअसि भवसि । ᵛजुहूः ᵛनाम जुहूरित्येतत् तव नामधेयम् । हूयते अनयेति व्युत्पत्तेः । ᵛसा त्वम् ᵛइदं प्रस्तरस्योर्ध्वं स्थानम्, अधितिष्ठेति शेषः । उक्तस्यैव व्याख्यानं ‘ प्रियेण ’ इत्यादिकम् । ᵛप्रियेण देवानां प्रीतिहेतुना ᵛधाम्ना आज्यरूपेण तेजसा । सहेति शेषः । “एतद्ध देवानां प्रियं धाम यदाज्यम्” (काशब्रा २·३·१·१५) इति हि श्रुतिः । ᵛप्रिये ᵛसदसि प्रस्तरस्योपरि प्रियस्थाने ᵛसीद प्राप्नुहि उपविशेत्यर्थः ॥**

द्वितीयमन्त्रपाठस्तु– ‘ घृताच्यस्युपभृन्नाम सेदं प्रियेण धाम्ना प्रिये सदसि सीद ’ इति । उप जुह्वाः समीपे स्थित्वा बिभर्त्याज्यं धारयतीति ᵛउपभृत् । व्याख्यातमन्यत् ॥

---

6. H1 प्रसवं for प्रस्तरं
18. P1 with marking above घृता° ins. on the margin जुहूदैवतं यजुः ।
19. P1 हे जुहूः for हे जुहु

तृतीयमन्त्रपाठस्तु – ‘ घृताच्यसि ध्रुवा नाम सेदं प्रियेण धाम्ना प्रिये सदसि सीद ’ इति । ध्रुव गतिस्थैर्ययोरिति धातुः । यथा होमार्थं जुहूपभृतोस्तदा चलनं तद्वदस्याश्चलनाभावेन स्थिरत्वात् ^{V}ध्रुवा इति नाम । “ घृताची हि ध्रुवा हि ” (काशब्रा २·३·२·२७) इति कण्वश्रुतेः । व्याख्यातमन्यत् ॥

कात्यायनः – “ प्रियेण धाम्नेति हवींषि वेद्यां कृत्वा ” (काश्रौ २·८·१९) इति । कण्वोऽप्याह– “ प्रियेण धाम्ना प्रिये सदसि सीदेत्येवान्यानि हवींष्यासादयति ” (काशब्रा २·३·२·२७) इति । आग्नेयः पुरोडाश इत्यादीन्यन्यानि । मन्त्रस्तु पूर्ववदेकैकं हविः संबोध्य व्याख्येयः ॥ ८ ॥

आ– जुहूं निदधाति ‘ घृताच्यसि ’ इति । घृताच्यादीनां त्रयाणां जुहूपभृद्ध्रुवाः क्रमेण देवता ज्ञातव्याः । अञ्चू गतिपूजनयोः । घृतमञ्चति यस्यां स्रुचि, घृतं वा अच्यते यया स्रुचा सा घृताची जुहूः इति नाम । क्रियाभिप्रायमेतत् । हूयते अनयेति जुहूः । ‘ सेदं प्रियेण ’ इति तदः-श्रवणात् यदोऽध्याहारः । या त्वं ^{V}घृताची ^{V}असि ^{V}जुहूः त्वं ^{V}नाम, ^{V}सा ^{V}इदं प्रियं सदः स्थानम् आ ^{V}सीद अधि तिष्ठ । ^{V}प्रियेण ^{V}धाम्ना सहिता, आज्यसहितेत्यर्थः । “ एतद्वै देवानां प्रियं धाम यदाज्यम् ” (काशब्रा २·३·१·१५) इति श्रुतेः । अतः ^{V}प्रिये ^{V}सदसि स्थाने सीद । षद्लृ विशरणगत्यवसादनेष्वित्यस्य रूपम् ॥

उपभृतं सादयति– ‘ घृताच्यस्युपभृन्नाम ’ इति । भृञ् भरणे । उपभरणात् उपभृत् । व्याख्यातमन्यत् । ध्रुवां सादयति– ‘ घृताच्यसि ध्रुवा ’ इति । ध्रुव गति हविस्थैर्ययोरित्यस्य रूपम् । ^{V}ध्रुवा स्थिरा । व्याख्यातमन्यम् ॥

अन्यद्धविः सादयति – ‘ प्रियेण धाम्ना ’ इति । हविर्दैवत्यम् । ‘ प्रियेण ’ इति व्याख्यातम् ॥ ८ ॥

ध्रु॒वा अ॑सदन्नृ॒तस्य॒ योनौ॒ ता विंष्णो पाहि ।
पा॒हि य॒ज्ञं पा॒हि य॒ज्ञप॑तिं पा॒हि मां य॑ज्ञ॒न्य॑म् ॥ ९ ॥

---

1. P1 with marking above घृता° ins. in the margin ध्रुवादेवतं यजुः ।
2. P1 om. इति धातुः
3. C M1 S1 V1 om. घृताची...कण्वश्रुतेः ।
4. P1 with marking above प्रियेण ins. in the margin हविर्दैवतं यजुः ।
5. C S1 M1 om. इत्येव
6. C M1 V1 S1 तत् for तु
8. H1 after स्रुचि adds घृताची
9. B1 H1 जुहूरसि which we have correted as जुहूः इति
11. H1 नाम्ना for नाम.
16. B1 after रूपं adds ध्रुवेति ।

स्रुगासादनमन्त्राः]

ध्रु॒वा । अ॒स॒द॒न् । ऋ॒तस्य॑ । योनौ॑ । ता । वि॒ष्णो॒ इति॑ विष्णो । पा॒हि॒ ।
पा॒हि । य॒ज्ञम् । पा॒हि । य॒ज्ञप॑ति॒मिति॑ य॒ज्ञऽप॑तिम् ।
पा॒हि । माम् । य॒ज्ञ॒न्य॑मिति॑ य॒ज्ञ॒ऽन्य॑म् ॥ ल्युं ॥ ९ ॥ (१) ॥

सा– कात्यायनः – " ध्रुवा असदन्निति सर्वाण्यालभते " (काश्रौ २.८.१९) इति । पाठस्तु– ' ध्रुवा असदन्नृतस्य योनौ ता विष्णो पाहि । पाहि यज्ञं पाहि यज्ञपतिम् ' इति । Vऋतस्य अवश्यंभाविफलोपेतत्वेन सत्यस्य यज्ञस्य Vयोनौ स्थाने सर्वे हविर्विशेषाः Vध्रुवा Vअसदन् आवश्यकत्वेन तत्र स्थिराः अतिष्ठन् । हे Vविष्णो, व्यापक यज्ञपुरुष, Vता Vपाहि तान् हविर्विशेषान् रक्ष । अन्यत् पुरैव व्याख्यातम् ॥

कात्यायनः – " पाहि मामित्यात्मानम् " (काश्रौ २.८.२०) इति । ' आलभते ' इति सूत्रशेषः । ' यज्ञन्यम् ' इति मन्त्रशेषः । स च मन्त्रः पूर्वमेव व्याख्यातः ॥ ९ ॥ (१) ॥

इति द्वितीयेऽध्याये प्रथमोऽनुवाकः ॥ १ ॥

आ– हवींष्यभिमृशति ' ध्रुवा असदन् ' इति । ' ध्रुवा असदन् ', ' पाहि माम् ' इति च द्वे वैष्णव्ये । एकमन्त्रपक्षे वैष्णव्य [म] नुष्टुब् वा । तदःसंबन्धाद्यदोऽध्याहारः । यानि हवींषि Vध्रुवा ध्रुवाणि आवश्यकानि Vऋतस्य यज्ञस्य Vयोनौ उत्सङ्गे Vअसदन् स्थितान्यभवन्, Vविष्णो हविरादिषु व्यापनशील, Vता तानि हवींषि Vपाहि रक्ष । Vपाहि Vयज्ञम् । किं च Vपाहि Vयज्ञपतिं यजमानं पाहि ।

अध्वर्युरात्मानमुपस्पृशति –' पाहि माम् ' इति । यज्ञं नयतीति यज्ञनीः, तं Vयज्ञन्यं यज्ञस्य नेतारमध्वर्युं Vमां च Vपाहि ॥ ९ ॥ (१) ॥

[द्वितीयाध्याये प्रथमोऽनुवाकः ।]

---

4. P1 with marking above ध्रुवा ins. on the margin: वैष्णवं यजुः ।
6. C V1 S1 M1 om. तत्र.
8. P1 सूत्र°
10. P1 M1 द्वितीया° for द्वितीये°
12. B1 वैष्णवे for वैष्णव्ये
13. B1 om. उत्सङ्गे
14. B1 om. किंच...यज्ञन्यं [L 16]
17. B1 मां पाहि for मां च पाहि

[अथ द्वितीयोऽनुवाकः]

सा– प्रथमेऽनुवाके इध्मप्रोक्षणमारभ्य स्रुगासादनोपयुक्ता मन्त्रा उक्ताः। द्वितीये स्रुच्याघारविषया मन्त्रा उच्यन्ते—

अग्ने॑ वाजजि॒द्वाजं॑ त्वा सरि॒ष्यन्तं॑ वाज॒जित॒ꣳ सं मा॑र्जि ।
नमो॑ दे॒वेभ्यः॑ स्व॒धा पि॒तृभ्यः॑ सु॒यमे॑ मे भूयास्तम् ॥ १ ॥
अस्कं॑न्नम॒द्याज्यं॑ दे॒वेभ्य॒ः सं॑भ्रियासम् ।
अ॑ङ्घ्रिणा विष्णो॒ मा त्वाऽव॑ क्र॑मिषम् ॥ २ ॥

अग्ने॑ । वा॒ज॒जि॒दिति॑ वाजऽजित् । वाज॑म् । त्वा॒ । स॒रि॒ष्यन्त॑म् ।
वा॒ज॒जि॒तमिति॑ वा॒ज॒ऽजित॑म् । सम् । मा॒र्जि॒ ।
नम॑ः । दे॒वेभ्य॑ः । स्व॒धा । पि॒तृभ्य॒ इति॑ पि॒तृऽभ्य॑ः ।
सु॒यमे॒ इति॑ सु॒ऽयमे॑ । मे॒ । भू॒या॒स्त॒म् ॥ टुं ॥ १ ॥
अस्क॑न्नम् । अ॒द्य । आज्य॑म् । दे॒वेभ्य॑ः । सम् । भ्रि॒या॒स॒म् ।
अ॑ङ्घ्रिणा । वि॒ष्णो॒ इति॑ विष्णो । मा । त्वा॒ । अव॑ । क्र॒मि॒ष॒म् । किं ॥ २ ॥

कात्यायनः – " इध्मसंनहनैरनुपरिधि संमार्ष्ट्यग्ने वाजजिदिति त्रिस्त्रिः परिक्रामम् " (काश्रौ ३·१·१३) इति । पाठस्तु– ' अग्ने वाजजिद्वाजं त्वा सरिष्यन्तं वाजजितꣳ संमार्ज्मि ' इति । हे 'वाजजित 'अग्ने, वाजमन्नं जयतीति वाजजित् । तथाविध हे अग्ने, त्वां 'संमार्ज्मि शोधयामि । कथंभूतं त्वाम्? 'वाजं 'सरिष्यन्तम् अन्नमुद्दिश्य गमिष्यन्तम् । अन्नसंपादनोपयुक्तम् 'वाजजितम् अन्नमुद्दिश्य जयोपेतम्, अन्नप्रतिबन्धनिवारकमित्यर्थः ॥

कात्यायनः – " अपरमाहवनीयादञ्जलिं करोति नमो देवेभ्यः " (काश्रौ ३·१·१५) इति । ये देवा अनुष्ठानमनुगृह्णन्ति तेभ्यो नमस्कारोऽस्तु ॥

कात्यायनः – " स्वधा पितृभ्य इति दक्षिणत उत्तानम् " (काश्रौ ३·१·१५) इति । पुरा प्राङ्मुखो देवनमस्कारार्थमञ्जलिं कृतवान् । इदानीं पितृनमस्कारार्थं दक्षिणामुख उत्तानं पाणिद्वयं कुर्यात् । ये पितरः पालका सन्ति तेभ्यः 'स्वधा अस्तु । स्वधाशब्दो निपातः । स च पितॄनुद्दिश्य देयद्रव्यस्य पिण्डादेर्दाने वर्तते । अतो यद्देयं तद्दास्याम इत्यर्थः । अनेन मन्त्रद्वयेन देवाश्च पितरश्चोपचर्यन्ते । तदाह

---

3. M1 °विषयो for °विषया
14. C M1 V1 S1 °संनहनम् for संनहनैर्
15. P1 with marking above अग्ने ins. in the margin आग्नेयं यजुः ।
19. P1 with marking above नमो ins. in the margin दैवदैवत्यं यजुः ।
21. P1 with marking above स्वधा ins. in the margin पितृदैवत्यं यजुः ।
23. C S1 M1 निपातितः for निपातः

कण्वः – “ अथ स्रुचाऽऽघारयिष्यन्नग्रेण स्रुचोरञ्जलिं निदधाति नमो देवेभ्यः स्वधा पितृभ्य इति देवेभ्यश्चैवैतत् पितृभ्यश्च निह्नुते आर्त्विज्यं करिष्यन् ” (काशब्रा २·४·२·७) इति । निह्नुते अपलपति उपचरतीत्यर्थः ॥

कात्यायनः –“ सुयमे म इति जुहूपभृतावादाय ” (काश्रौ ३·१·१६) इति । पाठस्तु– ‘ सुयमे मे भूयास्तमस्कन्नमद्याज्यं देवेभ्यः संभ्रियासम् ’ इति । हे जुहूपभृतौ, ^{v}मे मदर्थं ^{v}सुयमे सुष्ठु नियते ^{v}भूयास्तं भवतम् । यथा युवयोः स्थितमाज्यं न स्कन्दति तथा धारयतमित्यर्थः । तथा सत्यहम् ^{v}अद्य अस्मिन् कर्मानुष्ठानदिवसे ^{v}देवेभ्यः देवतोपकारार्थम् ^{v}आज्यं युवयोः स्थितं घृतम् ^{v}अस्कन्नं भूमौ यथा न स्कन्दति तथा ^{v}संभ्रियासं सम्यक् पोषणं करवाणि । ‘ अस्कन्नम् ’ इत्यादेरभिप्रायं कण्वो दर्शयति– “ अविक्षुब्धमद्येमं यज्ञं देवेभ्यस्तनवा इत्येवैतदाह ” (काश्रौ २·४·३·७) इति ॥

कात्यायनः – “ दक्षिणातिक्रामत्यङ्घ्रिणा विष्णाविति ” (काश्रौ ३·१·१६) इति । पाठस्तु– ‘ अङ्घ्रिणा विष्णो मा त्वाऽवक्रमिषम् ’ इति । हे ^{v}विष्णो व्यापक यज्ञपुरुष, त्वाम् ^{v}अङ्घ्रिणा पादेन ^{v}मा ^{v}अवक्रमिषम् अवक्रमणं मा कार्षम् । पादेनाक्रमणदोषो मे मा भूदित्यर्थः । एतमेवार्थं कण्वो दर्शयति– “ यज्ञो वै विष्णुस्तमेतदतिक्रमिष्यन् भवति तस्मा एवैतन्निह्नुते मा त्वाऽवक्रमिषमिति ” (काशब्रा २·४·२·८) इति । १–२ ॥

आ– अग्निसंमार्गं करोति– ‘ अग्ने वाजजित् ’ इति । आग्नेयं यजुः । हे ^{v}अग्ने ^{v}वाजजित् वाजस्यान्नस्य जेतः । ^{v}वाजं यज्ञं ^{v}सरिष्यन्तम् । सृ गतौ इत्यस्य रूपम् । यज्ञं त्वां प्रापयिष्यन्तम् । ^{v}वाजजितम् अन्नस्य जेतारं ^{v}त्वां ^{v}संमार्ज्मि । मृजू शुद्धौ । संशोधयिष्यामि ।

अञ्जलिं करोति–‘ नमो देवेभ्यः ’ इति । दैव्यं [यजुः] । देवनादिगुणयुक्तेभ्यः ^{v}देवेभ्यः ^{v}नमः ॥

दक्षिणत उत्तानं पाणिं करोति– ‘ स्वधा पितृभ्यः ’ इति । पितृदेवत्यम् । डुधाञ् धारण-पोषणयोरित्यस्य रूपं ‘ स्वधा ’ इति । स्वकीयान् पितॄन् धत्ते धारयति पोषयति पुष्णाति च– ‘ स्वधा पितृभ्यः ’ इति । पा रक्षणे । सर्वतः पान्ति रक्षन्तीति पितरः, तेभ्यः ॥

जुहूपभृतावादत्ते ‘ सुयमे मे ’ इति । स्रुचौ देवते । ^{v}सुयमे । यम उपरमे । साधु यमने । पर्णमयी जुहूः । आश्वत्थी उपभृत् । ते ^{v}मे मम सुयमे ^{v}भूयास्तम् । भू सत्तायाम् । भवतम् । यथाऽज्यं सुसंयताभ्यां स्रुग्भ्यां [न स्कन्दति तथा धारयतमित्यर्थः] ॥ १]

^{v}अद्य आस्मिन् कर्मणि ^{v}देवेभ्यः अर्थाय ^{v}आज्यम् आज्योपलक्षितं यज्ञम् । ^{v}अस्कन्नम् ।

---

1. C S1 V1 °घारक्रुष्यन् , M1 °घाराक्रुष्यन् for °घारयिष्यन्.
7. C S1 V1 M1 °दिने for °दिवसे
15. H1 after आग्नेयं adds हविः
16. H1 om. सृ गतौ…प्रापयिष्यन्तम्
18. H1 om. दैव्यम्

स्कन्दिर् गतिशोषणयोरित्यस्य रूपं स्कन्नमिति । स्कन्दनादिदोषरहितम् अस्कन्नम् । ^{v}संभ्रियासं, भृञ् भरणे इत्यस्य रूपम् । साङ्गं यज्ञं संबिभृयाम् ॥

दक्षिणातिक्रामति– ‘ अङ्घ्रिणा विष्णो ’ इति । वैष्णवम् । अङ्घ्रेर्गत्यर्थस्य रूपम् । अङ्घ्रिः पादः । तेन ^{v}अङ्घ्रिणा पादेन । हे ^{v}विष्णो यज्ञ, ^{v}त्वा त्वां ^{v}मा ^{v}अवक्रमिषम् । क्रमु पादविक्षेपे । अव अवाचीनं क्रमिषं पादविक्षेपं न कुर्याम् ॥२॥

वसु॑मती॑मग्ने ते छा॒यामुप॑स्थेषं॒ विष्णो॒ः स्थान॑मसि ।
इ॒त इन्द्रो॑ वी॒र्य॑मकृणोदू॒र्ध्वो॑ऽध्व॒र आस्था॑त् ॥ ३ ॥
अग्ने॒ वेर्हो॒त्रं वेर्दू॒त्य॑म् । अव॑तां त्वा॒ द्यावा॑पृथि॒वी ।
अव॒ त्वं द्यावा॑पृथि॒वी ॥ ४ ॥
स्वि॒ष्ट॒कृद्दे॒वेभ्य॒ इन्द्र॒ आज्ये॑न ह॒विषा॒ भू॒त् स्वाहा॑ ।
सं ज्योति॑षा॒ ज्योतिः॑ ॥ ५ ॥

वसु॑मती॒मिति॒ वसु॑ऽमतीम् । अ॒ग्ने॒ । ते॒ । छा॒याम् । उप॑ । स्थे॒ष॒म् ।
विष्णोः॑ । स्थान॑म् । अ॒सि॒ ।
इ॒तः । इन्द्रः॑ । वी॒र्य॑म् । अ॒कृ॒णो॒त् । ऊ॒र्ध्वः । अ॒ध्व॒रः । आ । अ॒स्था॒त् ॥ ङे ॥ ३ ॥
अग्ने॑ । वेः । हो॒त्रम् । वेः । दू॒त्य॑म् । अव॑ताम् । त्वा॒ । द्यावा॑पृथि॒वी इ॒ति॒ द्यावा॑पृथि॒वी ।
अव॑ । त्वम् । द्यावा॑पृथि॒वी इ॒ति॒ द्यावा॑पृथि॒वी ॥ छां ॥ ४ ॥
स्वि॒ष्ट॒कृदिति॑ स्वि॒ष्ट॒ऽकृत् । दे॒वेभ्यः॑ । इन्द्रः॑ । आज्ये॑न । ह॒विषा॑ । भू॒त् । स्वाहा॑ ।
सम् । ज्योति॑षा । ज्योतिः॑ ॥ गं ॥ ५ ॥

सा– कात्यायनः – “ परिधीनपरेण संचरो होष्यतः । सव्येनेतो दक्षिणेनामुतः । वसुमतीमित्यवस्थाय ” (काश्रौ ३.१.१७–१९) इति । परिधीनां पश्चिमभागः संचरदेशः । ततो होमायोद्युक्तस्य सव्येन पादेनेतोऽस्मात् स्थानात् यजतिदेशं गच्छति । अमुतो यजतिदेशात् प्रत्यागच्छन् दक्षिणेन पादेन प्रत्यागच्छति । इतः परिधेः पश्चिमदिश्यवस्थानं दक्षिणेन पादेनामुतः पूर्वस्यां दिश्यवस्थानमित्यर्थः । पाठस्तु– ‘ वसुमतीमग्ने ते छायामुप स्थेषं विष्णोः स्थानमसि ’ इति । हे ^{v}अग्ने, ^{v}ते तव ^{v}छायां ^{v}वसुमतीं यथा पुरुषस्य छाया समीपवर्तिनी तद्वत् तव समीपवर्तिनीं भूमिम् ^{v}उपस्थेषं उपतिष्ठेयं सेवेय । उपपूर्वस्तिष्ठतिः सेवार्थे वर्तते । स एव वाचिकः सेवाप्रकारः स्पष्टीक्रियते । ^{v}विष्णोः ^{v}स्थानम् ^{v}असि । हे वसुमति,

---

2. H1 संबिभृषम् for संबिभृयम्
3. H1 om. वैष्णवम्
20. V1 S1 C M1 संचार° for संचर°;
21. C M1 V1 S1 om. इतोऽस्मात् ...प्रत्यागच्छति ।
24. P1 om. उपतिष्ठेयं; M1 P1 सेवेयं for सेवेय

त्वं यज्ञस्य स्थानं भवसि, अत्र स्थित्वा यागः कर्तुं शक्यत इत्यर्थः। आहवनीयसमीपवर्तित्वादस्या भूमेर्यज्ञस्थानत्वं युक्तम्। तदाह कण्वः – “यज्ञो वै विष्णुर्यज्ञस्य वा एतदन्तिकं तिष्ठति तस्मादाह विष्णोः स्थानमसीति” (काशब्रा २·४·२·९) इति॥

कात्यायनः – “इत इन्द्र इति जुहोति” (काश्रौ ३·२·१) इति। पाठस्तु– ‘इत इन्द्रो वीर्यमकृणोदूर्ध्वोऽध्वर आस्थात्। अग्ने वेर्होत्रं वेर्दूत्यम्। अवतां त्वा द्यावापृथिवी। अव त्वं द्यावापृथिवी। स्विष्टकृद्देवेभ्य इन्द्र आज्येन हविषा भूत् स्वाहा’ इति। पूर्वस्मिन् मन्त्रे यज्ञसंबन्धि यत् स्थानमुक्तं तदेव देवानां विजयहेतुत्वादितःशब्देन परामृश्यते। देवयजनव्यतिरिक्तभूमेरसुराधीनतया तत्र देवानां पराजयेऽपि यज्ञप्रदेशः पराजयरहितः। अत एव तित्तिरिराह– “विष्णोः स्थानमसीत्याह। यज्ञो वै विष्णुः। एतत् खलु वै देवानामपराजितमायतनम्। यद्यज्ञः। देवानामेवापराजित आयतने तिष्ठति” (तैब्रा ३·३·७)इति। तथाविधात् ᵛइतः अस्माद्देवयजनस्थानात् स्वकीयभूबलोपेताद्युद्धार्थमुद्युक्तः ᵛइन्द्रः ᵛवीर्यम् ᵛअकृणोत्, वीरस्य कर्म वीर्यं शत्रुवधरूपमकरोत्। इन्द्रेण वीर्ये कृते सति शत्रुप्रयुक्तविघ्नाभावात् ᵛअध्वरः यज्ञः ᵛऊर्ध्वः ᵛआस्थात् उन्नतोऽवस्थितः। यस्मादध्वरो निर्विघ्नोऽवस्थितस्तस्मात् कारणात् हे ᵛअग्ने, त्वं ᵛहोत्रं होतुः कर्म ᵛवेः विद्धि जानीहि। तथा ᵛदूत्यं देवसंबन्धिदूतकर्म ᵛवेः विद्धि। होतृत्वदेवदूतत्वयोरग्निसंबन्धित्वं कण्वो दर्शयति– “अग्ने वेर्होत्रं वेर्दूत्यमित्युभयं ह वा एतदग्निर्देवानां होता च तद्दूतश्च तदुभयं विद्धि। यद्देवानामसीत्येवैतदाह” (काशब्रा २·४·२·१०) इति। ईदृशं त्वामग्निमुभे ᵛद्यावापृथिवी देवते ᵛअवतां पालयताम्। हे अग्ने, ᵛत्वम् अपि ᵛद्यावापृथिवी लोकद्वयदेवते ᵛअव पालय। इत्थमन्योन्यपालने सति ᵛदेवेभ्यः देवोपकारार्थम् ᵛइन्द्रः ᵛआज्येन ᵛहविषा अस्माभिर्दत्तेन ᵛस्विष्टकृत् ᵛभूत्, सुष्ठु इष्टं करोतीति स्विष्टकृत्, तादृशो भवतु। यद्यदस्माभिरिज्यते तत्तदिष्टं सर्वं वैकल्यरहितं करोतु। ᵛस्वाहा, इन्द्रं देवमुद्दिश्येदमाज्यं दत्तम्॥

कात्यायनः – “उत्तराघारमाघार्यासꣳस्पर्शयत् स्रुचावेत्य जुह्वा ध्रुवाꣳ समनक्ति सं ज्योतिषेति” (काश्रौ ३·२·२) इति। ‘ज्योतिः’ इति मन्त्रशेषः। अत्र गच्छतामित्यध्याहर्तव्यम्। ध्रुवायां स्थितमाज्यरूपं यज्ज्योतिस्तेन ᵛज्योतिषा सह जुह्वा सिच्यमानमाज्यरूपं ᵛज्योतिः ᵛसं गच्छताम्। आघारशेषाज्यस्य ध्रौवाज्यस्य च संगमनं तित्तिरिर्दर्शयति– “शिरो वा एतद्यज्ञस्य [यदाघारः]। आत्मा ध्रुवा। आघारमाघार्य ध्रुवाꣳ समनक्ति आत्मन्नेव यज्ञस्य शिरः प्रतिदधाति” (तैब्रा ३·३·७) इति। आत्मशब्देनात्र गलादधस्तनो देहभागः विवक्षितः। कण्वोऽपि– “तद्ध्रुवायां समनक्ति शिरो वा एतत्” (काशब्रा २·४·२१) इत्यादिना तथैव अवोचत्॥ ३-५॥

आ– ‘वसुमतीम्’ इत्यवस्थायोपतिष्ठते। इदमाग्नेयं यजुः। हे भगवन् ᵛअग्ने, ᵛते तत्र

---

4. P1 with marking above इत ins. in the margin ऐन्द्रं यजुः।
7. V1 S1 C M1 °दिक्° for °इतः°; P1 °यज्ञ° for °यजन°
10. P1 भूबलोपेतो, M1 भूम्युपेताद् for भूबलोपेताद्
11. V1 C S1 M1 om. वीर्यम्; P1 °वीर्य° for °विघ्न°
12. V1 S1 C M1 उन्नताव° for उन्नतोऽव° P1 C S1 निर्विघ्ने for निर्विघ्नो;
    V1 M1 C S1 चेत् for होत्रम्
21. V1 S1 M1 C आगच्छताम् for गच्छताम्
23. C V1 S1 उपपादयति for दर्शयति
24. P1 C आत्मने च for आत्मन्नेव

^{v}छायाम् । छायाशब्दोऽत्र आश्रयवचनः । ^{v}वसुमतीं युष्मत्पादच्छायां युष्मत्पादाश्रयम् ^{v}उपस्थेषम् उपतिष्ठेयम् । ^{v}विष्णोः यज्ञस्य ^{v}स्थानम् ^{v}असि । अत्र स्थितैर्यागः क्रियत इति । अत्र स्थितो जुहोतीति ॥

'इत इन्द्रः' इति । इदमैन्द्रं यजुः । ^{v}इतः अस्माद्यजतिस्थानात् उत्थायेति शेषः । ^{v}इन्द्रः ^{v}वीर्यं, वीरस्य कर्म वीर्यम्, ^{v}अकृणोत् । कृञ् हिंसाकरणयोः । कृतवान् । किं च— ^{v}ऊर्ध्व ^{v}अध्वरः ^{v}आस्थात् । इतश्च यजातिस्थानात् ऊर्ध्वः उत्कृष्टः प्रगुणो यज्ञः आस्थात् आस्थितः । अध्वर्युयागाभिप्रायमेतत् ॥

'अग्ने वेर्होत्रम्' इति । लिङ्गोक्तदेवत्या गायत्री । हे श्रीभगवन् ^{v}अग्ने, ^{v}वेः ^{v}होत्रं मम कर्तव्यम् । होत्रं होतुः कर्म वहनं त्वं वेः । विद ज्ञाने । विद्धि जानीहि । त्वमवगतार्थो भव । [^{v}वेः] ^{v}दूत्यं, दूतस्य कर्म दूत्यं, त्वं वेः । "अग्निर्देवानां होता च दूतश्च" (काशब्रा २·४·२·१०·) इति श्रुतेः । 'अवतां त्वा द्यावापृथिवी' स्वकर्मणि प्रवृत्तं त्वां ^{v}द्यावापृथिवी ^{v}अवताम् । अव रक्षणे । पालयेतां द्यावापृथिव्यौ । अग्ने, ^{v}त्वम् अपि द्यावापृथिव्यौ ^{v}अव पालय ॥

^{v}स्विष्टकृत्, साधु इष्टं करोतीति स्विष्टकृत् । ^{v}इन्द्रः ^{v}देवेभ्यः अन्येभ्यः सकाशात् प्रथमं स्विष्टकृदिन्द्रः ^{v}आज्येन, अज गतिक्षेपणयोः इत्यस्य रूपमाज्यम्, तेन आज्येन ^{v}हविषा हवनेन ^{v}भूत् भूयात्, ^{v}स्वाहा एतत् स्वाहुतमस्तु ॥

जुह्वा ध्रुवा॰ समनक्ति— 'सं ज्योतिषा' इति । आज्यदेवत्यम् । आज्येन ज्योतिः ^{v}सं गच्छताम् ॥ ३—५ ॥

अत्रं पितरो मादयध्वं यथाभागमावृ॑षायध्वम् ।
अमी॑मदन्त पितरो॑ यथाभागमावृ॑षायिषत ॥ ६ ॥

अत्र॑ । पितरः । मादयध्वम् ।
यथाभागमिति॑ यथाऽभागम् । आ । वृषायध्वम् । वृषयध्वमिति॑ वृषऽयध्वम् ।
अमी॑मदन्त । पितर॑ः । यथाभागमिति॑ यथाऽभागम् । आ । अवृषायिषत ॥ ठं ॥ ६ ॥

---

6. H1 om. आस्थितः;
7. B1 अध्वर्युः for अध्वर्यु°; H1 भाग° for याग°
8. H1 om. मम कर्तव्यं । होत्रं [L8]
9. H1 हवं तं त्वं for वहनं ... जानीहि त्वं, B1 अध्वरार्थी, H1 अध्वरार्थे, ·we have corrected this as अवगतार्थो
11. H1 स्वकर्मणा for स्वकर्माणि
14. B1 इति for तेन
15. B1 आहनम्, H1 अज्ञानम्– we have corrected it as स्वाहुतम्

सा– अथोत्तरस्य प्रयोगस्यायं क्रमः – प्रयाजा आज्यभागो प्रधानयागस्तच्छेषप्राशनं चेति । तत्र प्राशनार्थं हविश्चतुर्धा कृत्वेदं ब्रह्मण इदꣳ होतुरिदमध्वर्योरिदमग्नीध इत्यृत्विग्भ्य आदिशेत् । तदानीं यजमानो मन्त्रं जपेत् । तदाह कात्यायनः – "अत्र पितर इति यजमानो जपति" (काश्रौ ३·४·१६) इति । पाठस्तु– 'अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्' इति । हे ʼपितरः, यूयम् ʼअत्र अस्मिंश्चतुर्धा विभज्यादिश्यमाने ʼमादयध्वं हृष्टा भवत । ततो हविषि ʼयथाभागं स्वं स्वं भागमनतिक्रम्य ʼआवृषायध्वं समन्ताद्वृषवदाचरत । यथा वृषो घासं स्वाभीष्टं प्राप्य तृप्तिपर्यन्तं स्वीकरोति तद्वत् स्वीकुरुत । यद्यप्येतान् भागानृत्विजो भक्षयन्ति न तु पितरस्तथापि तद्दर्शनेन पितॄणां तृप्तिर्भवति । "न वै देवा अश्नन्ति न पिबन्त्येतद्देवा अमृतं दृष्ट्वा तृप्यन्ति" इति श्रुत्यन्तरात् ॥

कात्यायनः – "विसृज्यामीमदन्त" (काश्रौ ३·४·१७) इति । 'जपति' इत्यनुवर्तते । पाठस्तु– 'अमीमदन्त पितरो यथाभागमावृषायिषत' इति । यान् पितॄन् प्रति स्वीकुरुतेत्युक्तं ते ʼपितरः ʼअमीमदन्त भृशं हृष्टवन्तः, ʼयथाभागम् ʼआवृषायिषत स्वं स्वं भागमनतिक्रम्य स्वीकृतवन्तः । पूर्वमन्त्रेण भागान् स्पृष्ट्वा जपेत् । इमं तु विसृज्य जपतीति विशेषः ॥ ६ ॥

आ– 'अत्र पितरः' इति । पिण्डपितृयज्ञे विनियुक्तोऽयं मन्त्रः । अस्यान्त्यानुवाके व्याख्यां करिष्यामः ॥ ६ ॥

उप॑हूता पृथि॒वी मा॒तोप॒ मां पृ॑थि॒वी मा॒ता ह्व॑यताम् ।
अ॒ग्निराग्नी॑ध्रा॒त् स्वाहा॑ ॥ ७ ॥

उप॑हू॒तेत्युप॑ऽहूता । पृ॒थि॒वी । मा॒ता । उप॑ । माम् । पृ॒थि॒वी॑ । मा॒ता । ह्व॒य॒ता॒म् ।
अ॒ग्निः । आग्नी॑ध्रात् । स्वाहा॑ ॥ कां ॥ ७ ॥

सा– कात्यायनः – "एकैकमाहरति । द्यावापृथिव्योरुपह्वानेऽग्नीधे षडवत्तं प्राश्नात्युपहूता पृथिवीति" (काश्रौ ३·४·१८–२०) इति । यदा होता द्यावापृथिव्योराह्वानं करोति तदानीमाग्नेय-पुरोडाशमग्नीषोमीयपुरोडाशं चैकैकमाग्नीध्राय षडवत्तं संपाद्याहरेत् । स च 'उपहूता' इति मन्त्रेण प्राश्नीयात् । पाठस्तु– 'उपहूता पृथिवी मातोप मां पृथिवी माता ह्वयताम् । अग्निराग्नीध्रात् स्वाहा' इति । 'उपहूतो द्यौष्पितोप मां द्यौष्पिता ह्वयताम् । अग्निराग्नीध्रात् स्वाहा' इति [च] । येयं ʼपृथिवी दृश्यते सेयं जगतः ʼमाता ʼउपहूता अभ्यनुज्ञाता मातृत्वेनास्माभिर्भाविता । सा च ʼमाता ʼपृथिवी ʼमां

---

1. P1 before प्रयोगस्य ins. मन्त्र°
4. P1 with marking above अत्र ins. in the margin पितृदैवत्यं यजुः ।
6. C V1 S1 M1 आचरध्वम् for आचरत
7. S1 C om. तद्
13. H1 अन्यान्त्यानुपवादिकेन व्याख्यानम्, B1 अम्यांव्यनुवाके व्याख्याम्, we have corrected this as अस्यान्त्यानुवाके व्याख्यां
22. P1 with marking above उप ins. in the margin पृथिवीदेवत्या गायत्री ।
23. V1 S1 M1 C om. इति

हविःशेषभक्षणायोद्यतं ᵛउप ᵛह्वयताम् अनु जानातु । ᵛआग्नीध्रात् एतन्नामकादार्त्विज्यात् कर्मणो हेतोः ᵛअग्निः अहं च वह्निस्वरूपः सन् भक्षयामीति शेषः । तस्मात् ᵛस्वाहा । मदीयमुखाग्नाविदं हविः सुहुतमस्तु । प्रथमपुरोडाशभक्षणेऽयं मन्त्रः ॥ ७ ॥

आ – अग्नीत् प्राश्नाति– ‘ उपहूता पृथिवी ’ इति । पृथिवीदेवत्या भुरिग्गायत्री । पृथुत्वात् ᵛपृथिवी ᵛमाता जगतः निर्मात्री ᵛउपहूता । ह्वेञ् स्पर्धायाम् । अभ्यनुज्ञाता सा ᵛपृथिवी ᵛमाता ᵛमाम् ᵛउप ᵛह्वयतां भक्षणाय अभ्यनुजानातु । अहं तु ᵛअग्निः सन् ᵛआग्नीध्रात् कर्मणोऽनपगतः सन् भक्षयामि । ᵛस्वाहा सुहुतमस्तु ॥ ७ ॥

उप॑हूतो॒ द्यौष्पि॒तोप॒ मां द्यौष्पि॒ता ह्व॑यताम् ।
अ॒ग्निराग्नी॑ध्रा॒त् स्वाहा॑ ॥ ८ ॥

उप॑हूत॒ इत्युप॑ऽहूतः । द्यौः । पि॒ता । उप॑ । माम् । द्यौः । पि॒ता । ह्व॒य॒ता॒म् ।
अ॒ग्निः । आग्नी॑ध्रात् । स्वाहा॑ ॥ द्यां ॥ ८ ॥

सा– ‘ उपहूतो द्यौः ’ इत्यादिकस्तु द्वितीयपुरोडाशशेषभक्षणे मन्त्रः । ᵛद्यौः द्युलोकाभिमानिनी देवता, ᵛपिता, सर्वस्य जगतः पालकत्वात् पिता ᵛउपहूतः अस्माभिश्च पितृत्वेनाभ्यनुज्ञातः । ᵛद्यौः ᵛपिता द्युलोकरूपः स पिता ᵛमां भक्षणायोद्यतम् ᵛउपह्वयतां अभ्यनुजानातु । ‘ अग्निः ’ इत्यादिकं पूर्ववत् ॥८॥

आ– द्वितीयं प्राश्नाति– ‘ उपहूतो द्यौः ’ इति । द्युदेवत्या गायत्री । ᵛपिता, पा रक्षणे, पाता । ᵛद्यौः ᵛउपहूतः अभ्यनुज्ञातः । एवंभूतः ᵛपिता ᵛद्यौः ᵛमाम् ᵛउप ᵛह्वयताम् । भक्षणाय अभ्यनुजानातु । अहं तु ᵛअग्निः सन् ᵛआग्नीध्रात् कर्मणोऽनपगतो भक्षयामीति शेषः । ᵛस्वाहा सुहुतमस्तु ॥ ८ ॥

म॒यीदमिन्द्र॑ इन्द्रि॒यं द॑धात्व॒स्मान् रायो॑ म॒घवा॑नः सचन्ताम् ।
अ॒स्माक॑ꣳ सन्त्वा॒शिषः॑ स॒त्या नः॑ सन्त्वा॒शिषः॑ ।
अग्ने॑ वाजजि॒द्वाजं॑ त्वा ससृ॒वाꣳसं॑ वाज॒जित॒ꣳ संमा॑र्ज्मि ॥ ९ ॥

---

1. S1 C before अनु° ins. अभि°
2. V1 S1 M1 C om. च, M1 S1 V1 C after हविः ins स्वाहा
3. V1 S1 C M1 om. अयम्
4. H1 अग्नि त्वाश्नाति for अग्नीत् प्राश्नाति
5. H1 विनिर्मिता इति for जगतो निर्मात्री
6. B1 °ह्वयन्ती for ह्वयतां, B1 कर्मणानुप°, H1 कर्मणे न अप– this we have corrected as कर्मणोऽनप
12. C भक्षणं for भक्षणे; C S1 V1 M1 °मानी for मानिनी
16. H1 om. अभि°; B1 om. भक्षणाय

मयि॑ । इ॒दम् । इन्द्र॑ः । इ॒न्द्रि॒यम् । द॒धा॒तु॒ । अ॒स्मान् । राय॑ः । म॒घवा॑न॒ इति॑ म॒घऽवा॑नः । स॒च॒न्ता॒म् ।
अ॒स्माक॑म् । स॒न्तु॒ । आ॒शिष॒ इत्या॒ऽशिष॑ः । स॒त्याः । न॒ः । स॒न्तु॒ । आ॒शिष॒ इत्या॒ऽशिष॑ः ।
अग्ने॑ । वा॒जा॒जि॒दिति॑ वाजऽजित् । वाज॑म् । त्वा॒ । स॒सृ॒वाꣳसमिति॑ स॒सृ॒ऽवाꣳस॑म् ।
वा॒ज॒जि॒तमिति॑ वा॒ज॒ऽजित॑म् । सम् । मा॒र्ज्मि॒ ॥ स्फः ॥ ९ ॥ (२) ॥

सा– "आशासाने मयीदमिति यजमानो जपति" (काश्रौ ३·४·२१) इति । यदा होता मन्त्रमाशीर्विषयं प्रयुङ्क्ते तदा यजमानो जपेत् । पाठस्तु– 'मयीदमिन्द्र इन्द्रियं दधात्वस्मान् रायो मघवानः सचन्ताम् । अस्माकꣳ सन्त्वाशिषः सत्या नः सन्त्वाशिषः' इति । ᵛइन्द्रः परमेश्वरः ᵛइदम् अस्मदपेक्षितम् ᵛइन्द्रियम् इन्द्रवद्वीर्यं ᵛमयि यजमाने ᵛदधातु स्थापयतु । किं च ᵛरायः धनानि दैवमानुषभेदेन द्विविधानि ᵛमघवानः धनवन्तश्चास्मान् यजमानान् ᵛसचन्तां समन्व(?व)यन्तु सेवन्ताम् । षच सेवने । किं च ᵛअस्माकं यजमानानाम् ᵛआशिषः अभीष्टार्थस्याशंसनानि ᵛसन्तु विद्यन्ताम् । किं च ᵛनः अस्माकम् ᵛआशिषः पूर्वोक्ताः ᵛसत्याः ᵛसन्तु अवितथा भवन्तु ॥

कात्यायनः – "संमार्ष्टि पूर्ववदपरिक्रामꣳ सकृत् सकृत् ससृवाꣳसम्" (काश्रौ ३·५·४) इति । पूर्वमिध्मसंनहने यथा 'अग्ने वाजजित्' इति मन्त्रेण संमार्गः कृतस्तत्परिक्रम्य त्रिः संमार्जनम् । अत्र तु परिक्रमणं विना संमार्जनम् इति शेषः । तथा मन्त्रपाठेऽपि पूर्वत्र 'सरिष्यन्तम्' इति । अत्र तु 'ससृवाꣳसम्' इति विशेषः । पाठस्तु– 'अग्ने वाजजिद्वाजं त्वा ससृवाꣳसं वाजजितꣳ संमार्ज्मि' इति । ᵛवाजं ᵛससृवाꣳसम् अन्नमुद्दिश्य गतवन्तं, संपादितवन्तमित्यर्थः । अन्यत् पूर्ववत् ॥ ९ ॥ (२) ॥

इति द्वितीयेऽध्याये द्वितीयोऽनुवाकः ॥

आ–यजमानो जपति– 'मयीदम्' इति । यजमानाशीःपरिग्रहणम् । ᵛइन्द्रः । इदि परमैश्वर्ये । परमैश्वर्यसंपन्नो भगवानिन्द्रः ᵛ**इदम्** अपेक्षितम् ᵛइन्द्रियम् इन्द्रे भवं वीर्यं ᵛमयि यजमाने ᵛदधातु स्थापयतु । किं च ᵛरायः धनानि दैवमानुषभेदेन द्विविधानि । ᵛमघवानः

---

6. P1 with marking above मयि ins. in the margin ऐन्द्रं यजुः
9. V1 S1 C M1 समयन्तु for समन्वयन्तु
10. P1 C S1 om. षच सेवने
12. P1 with marking above संमार्ष्टि ins. in the margin तद्यजमानो जपति मयीदमिन्द्र इन्द्रियं दधात्वित्यारभ्य सत्या नः सन्त्वाशिष इत्यन्तं प्रतीकमुक्त्वा आशिषामेवैष प्रतिग्रह इति कण्वोऽप्येवमेवोक्तवान्
13. P1 संनहनैः for संनहने
14. S1 om. तु.
15. V1 M1 S1 C after विशेषः ins. इत्यर्थः, P1 with marking above अग्ने ins. आग्नेयं यजुः ।
16. P1 om. संपादितवन्तम्
17. P1 om. इति द्वितीयेऽध्याये
19. H1 after इदं adds सद् (? असद्)

मघं धनं विद्यते येषां ते मघवानः धनिनः च vअस्मान् । षच समवाये । अस्य रूपं vसचन्तां समवयन्तु सेवन्ताम् । किं च vअस्माकम् vआशिषः, अभीष्टार्थशंसनानि आशिषः vसन्तु । ताश्च vआशिषः vसत्याः अवितथाः भवन्तु ॥

अग्निसंमार्गं करोति– ‘अग्ने वाजजित्’ इति । आग्नेयम् । व्याख्यातोऽयं मन्त्रः । सृ गतावित्यस्य रूपं vससृवांसं, vवाजं ससृवन्तं (? वासं) प्रापयन्तम् इति ॥ ९ ॥(२)॥

[इति द्वितीयेऽध्याये द्वितीयोऽनुवाकः]

[अथ तृतीयोऽनुवाकः]

सा– द्वितीये स्रुच्याधारविषया मन्त्रा उक्ताः । तृतीये ‘देव सवितः’ इत्यादयो मन्त्रा ब्रह्मसंबन्धिप्रयोगे उच्यन्ते ।

देव॑ सवितरे॒तं त्वा॑ वृणते॒ बृह॒स्पतिं॑ ब्र॒ह्माण॑म् ।
तद॒हं मन॑से॒ प्रब्र॑वीमि ॥ १ ॥
मनो॑ गाय॒त्र्यै गा॑य॒त्री त्रि॒ष्टुभे॑ त्रि॒ष्टुब्जग॑त्यै॒ जग॑त्यनु॒ष्टुभे॑ ।
अ॒नु॒ष्टुप् प्र॒जाप॑तये प्र॒जाप॑ति॒र्विश्वे॑भ्यो दे॒वेभ्यः॑ ॥ २ ॥
बृह॒स्पति॑र्दे॒वानां॑ ब्र॒ह्माऽऽहं म॑नु॒ष्या॑णाम् ।
भूर्भुव॒ः स्व॒र्निर॑स्तः पा॒प्मेद॒महं बृह॒स्पते॒ः सद॑सि सीदा॑मि ॥३॥

देव॑ । स॒वि॒त॒ः । ए॒तम् । त्वा॒ । वृ॒ण॒ते॒ । बृह॒स्पति॑म् । ब्र॒ह्माण॑म् ।
तत् । अ॒हम् । मन॑से । प्र । ब्र॒वी॒मि॒ ॥ शिं ॥ १ ॥
मन॑ः । गा॒य॒त्र्यै । गा॒य॒त्री । त्रि॒ष्टुभे॑ । त्रि॒स्तुभ॒ इति॑ त्रि॒ऽस्तुभे॑ ।
त्रि॒ष्टुप् । त्रि॒स्तुबिति॑ त्रि॒ऽस्तुप् । जग॑त्यै । जग॑ती । अ॒नु॒ष्टुभे॑ । अ॒नु॒स्तुभ॒ इत्य॑नु॒ऽस्तुभे॑ ।
अ॒नु॒ष्टुप् । अ॒नु॒स्तुबित्य॑नु॒ऽस्तुप् । प्र॒जाप॑तय॒ इति॑ प्र॒जाऽप॑तये ।
प्र॒जाप॑ति॒रिति॑ प्र॒जाऽप॑तिः । विश्वे॑भ्यः । दे॒वेभ्य॑ः ॥ धीं ॥ २ ॥
बृह॒स्पति॑ः । दे॒वाना॑म् । ब्र॒ह्मा । अ॒हम् । म॒नु॒ष्या॑णाम् ।
भूः । भुव॑ः । स्व॑ः । निर॑स्त॒ इ॒ति॒ निःऽअ॑स्तः । पा॒प्मा ।
इ॒दम् । अ॒हम् । बृह॒स्पते॑ः । सद॑सि । सी॒दा॒मि॒ ॥ खूं ॥ ३ ॥

---

1. H1 समवाये यन्तु for समवयन्तु
2. B1 सविनयाः for अवितथाः

तत्र कात्यायनः – "ब्रह्माणं वृणीते" (काश्रौ २·१·१८) इत्यारभ्य प्रयोगं ब्रुवन्– "देव सवितः" (काश्रौ २·१·१९) इत्युदाजहार । पाठस्तु – 'देव सवितरेतं त्वा वृणते बृहस्पतिं ब्रह्माणम् । तदहं मनसे प्रब्रवीमि । मनो गायत्र्यै गायत्री त्रिष्टुभे त्रिष्टुब्जगत्यै जगत्यनुष्टुभे । अनुष्टुप् प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यः । बृहस्पतिर्देवानां ब्रह्माऽहं मनुष्याणाम् । भूर्भुवः स्वः' इति । हे ᵛसवितः ᵛदेव, ᵛएतं ᵛत्वा सवितृरूपं त्वां ᵛबृहस्पतिं ᵛब्रह्माणं बृहस्पतिरूपं ब्रह्मनामकमृत्विजं ᵛवृणते याज्ञिका वरणं कुर्वन्ति । सवितृशब्दाभिधेयः परमेश्वर एव बृहस्पतिरूपेण अवतारं कृत्वा अस्मद्यागे ब्रह्मा अभवदिति भावयन्तीत्यर्थः । ᵛतत् सर्वम् ᵛअहम् अनुष्ठाता ᵛमनसे मनोऽभिमानिदेवाय ᵛप्रब्रवीमि प्रकर्षेण कथयामि । तच्च ᵛमनः ᵛगायत्र्यै गायत्रीदेवतायै प्रब्रवीतीति शेषः । स चोत्तरेष्वपि पञ्चसु वाक्येषु द्रष्टव्यः । गायत्रीत्रिष्टुब्जगत्यनुष्टुप्प्रजापतिविश्वेदेवमुखेभ्यो ब्रह्मा प्रख्यातः । स च ब्रह्मा ᵛदेवानां यागे ᵛबृहस्पतिः अभूत् । ᵛमनुष्याणां यागे तु ᵛअहं ᵛब्रह्मा भवामि । इत्थं भूर्भुवःस्वराख्येषु त्रिषु लोकेषु ब्रह्मप्रसिद्धिर्द्रष्टव्या । सोऽयं मन्त्रो वृतेन ब्रह्मणा जपितव्यः ॥

कात्यायनः – "ब्रह्मसदनात् तृणं निरस्यति निरस्तः पाप्मा...इति" (काश्रौ २·१·२३) इति । योऽयं ᵛपाप्मा यज्ञविघाताय असुररूपेण निगूढः सोऽयं ᵛनिरस्तः निराकृतः ॥

कात्यायनः – "इदमहं बृहस्पतेः सदसि सीदामि" (काश्रौ २·१·२४) इति, "ब्रह्मसदन आहवनीयमभिमुख उपविशति" (काश्रौ २·२·१) इति । 'इदम्' इत्यङ्गुल्या निर्दिशन् ब्रह्मेत्थं ब्रूते– ᵛअहं मनुष्याणां ब्रह्मा ᵛबृहस्पतेः देवसंबन्धिब्रह्मणः ᵛसदसि स्थाने ᵛसीदामि उपविशामि ॥ १-३ ॥

आ– इत उत्तरं ब्रह्मकर्म प्रतिष्ठान्तं बृहस्पतिराङ्गिरसोऽपश्यत् । अतस्तेषां मन्त्राणां बृहस्पतिर्ऋषिः इत्यवान्तरविशेषोऽत्र ऋषिविषयो द्रष्टव्यः । 'देव सवितः' इति ब्रह्माणं वृणुते । ब्रह्मदेवत्योष्णिक् । हे ᵛदेव ᵛसवितः सर्वस्य प्रसवकर्तः ᵛएतं ᵛबृहस्पतिं ᵛत्वा त्वां ᵛब्रह्माणं ᵛवृणते, स्वकर्मणः साद्गुण्येनान्यानुष्ठानसिद्ध्यर्थम् । "तस्मादेवंविधमेव ब्रह्माणं कुर्वीत । नानेवं विधम्" इति श्रुतेः । एतत्प्रशंसार्थमाह– ᵛतत् अहं ᵛमनसे मनसोऽधिपतये च ᵛप्रब्रवीमि ॥१॥

---

2. C after सवितः ins. उक्त्वा, M1 S1 V1 उक्त°; V1 वृणुते for वृणते
5. P1 after °रूपं adds ब्रह्माणं
6. P1 कुर्वन्तः for कुर्वन्ति; C M1 V1 S1 °अभिधः for °अभिधेयः
7. C M1 V1 S1 om. अभवद्; V1 S1 C M1 मनुष्याणां for अनुष्ठाता
8. C S1 V1 प्रब्रवीमि for प्रब्रवीति
12. P1 with marking above निरस्तः ins. पाप्मदैवतं यजुः ।
14. C M1 S1 om. ब्रह्म°...विशतीति [L 15]
16. P1 बृहस्पतिर् for बृहस्पतेर्ः; M1 °संबन्धी for °संबन्धि; M1 ब्रह्मास्मि अहं for ब्रह्मणः
18. B1 om. अत्र; B1 °विशेषो for °विषयो
20. B1 om. वृणते; B1 सद्गुणेनानुष्ठानेन सिद्ध्यर्थं for साद्गुण्येन ... सिद्ध्यर्थम्; B1 तस्या दिवं विदम् for तस्मादेवंविधम्
21. H1 om. च प्र°

'मनो गायत्र्यै' इति । लिङ्गोक्तदेवत्या पङ्क्तिः । ^{v}मनः ^{v}गायत्र्यै प्राणानां परिपालयित्र्यै देवतायै प्रब्रवीति । किमिति ? एवंविधो ब्रह्मेति । ^{v}गायत्री ^{v}त्रिष्टुभे ब्रवीति । ^{v}त्रिष्टुप् ^{v}जगत्यै ब्रवीति । ^{v}जगती अपि ^{v}अनुष्टुभे ब्रवीति । ^{v}अनुष्टुप् अपि ^{v}प्रजापतये ब्रवीति । ^{v}प्रजापतिः ^{v}विश्वेभ्यः ^{v}देवेभ्यः ॥२॥

किं च 'बृहस्पतिर्देवानाम्' इति । लिङ्गोक्तदेवत्या बृहती । ^{v}बृहस्पतिः ^{v}देवानां ^{v}ब्रह्मा । यत एवंगुणो बृहस्पतिरत एव तदधिष्ठित एव ^{v}अहं ^{v}मनुष्याणां ब्रह्मा भवेयम् इति विशेषः ।

ब्रह्मोपवेशने विशेषमाह— 'भूर्भुवः सुवः' इति व्याहृतिभिः । पाप्मा अप्रतिपत्त्यन्यथाप्रतिपत्तिहेतुः । ^{v}पाप्मा पापम् । ^{v}इदं पापकारणं तमःक्रोधादिना । ^{v}निरस्तः निराकृतः । अतः ^{v}अहं ^{v}बृहस्पतेः ^{v}सदसि ब्रह्मणः स्थाने ^{v}सीदामि उपविशामीत्यर्थः ॥३॥

मि॒त्रस्य॑ त्वा॒ चक्षु॑षा॒ प्रती॑क्षे ।
दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे॒ऽश्विनो॑र्बा॒हुभ्यां॑ पूष्णो हस्ता॑भ्याम् ।
प्रति॑ गृह्णामि पृथि॒व्यास्त्वा॒ नाभौ॑ सादया॒म्यदि॑त्या उ॒पस्थे॑ ॥
दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे॒ऽश्विनो॑र्बा॒हुभ्यां॑ पूष्णो॑ हस्ता॑भ्याम् ॥४॥
आ द॑दे॒ऽग्नेष्ट्वा॒ऽऽस्ये॑न॒ प्राश्ना॑मि॒ बृह॒स्पते॒र्मुखे॑न ।
या अ॒प्स्व॒न्तर्दे॒वता॒स्ता इ॒दꣳ श॑मयन्तु ॥५॥
स्वाहा॑कृतं ज॒ठर॒मिन्द्र॑स्य गच्छ ।
घा॒सिनो॑ मे॒ मा सं॑पृक्था ऊ॒र्ध्वो मे॒ नाभेः॑ सीद ॥६॥
इन्द्र॑स्य त्वा ज॒ठरे॑ सादयामि ।
प्र॒जाप॑ते॒र्भा॒गो॒ऽस्यूर्ज॑स्वा॒न् पय॑स्वान् ॥७॥
प्रा॒णा॒पा॒नौ मे॑ पाहि समानव्या॒नौ मे॑ पाह्युदानव्या॒नौ मे॑ पाहि ।
ऊर्ग॒स्यूर्ज॒ं मयि॑ धे॒ह्यक्षि॑तिरसि॒ मा मे॑ क्षेष्ठा अ॒मुत्रा॒मुष्मिँ॑ल्लो॒क इ॒ह च॑ ॥८॥

---

1. H1 प्राणपरिपालयितृ for प्राणानां परिपालयित्र्यै
2. B1 om. किमिति; H1 प्रब्रवीमि for ब्रवीति
5. H1 देवतानां for first & second देवानां
6. B1 शेषः for विशेषः
7. B1 व्याहृतिः for व्याहृतिभिः
8. H1 °कारणां for °कारणं

मि॒त्रस्य॑ । त्वा॒ । चक्षु॑षा । प्रति॑ । ई॒क्षे॒ ।
[दे॒वस्य॑ ....]
प्रति॑ । गृ॒ह्णा॒मि॒ । [पृ॒थि॒व्याः ....] ॥ एँ ॥४॥
आ । द॒दे॒ । अ॒ग्नेः । त्वा॒ । आ॒स्ये॑न । प्र । अ॒श्ना॒मि॒ । बृ॒ह॒स्पतेः॑ । मु॒खे॑न ।
याः । अ॒स्वित्य॒प्ऽसु । अ॒न्तः । दे॒वताः॑ । ताः । इ॒दम् । श॒म॒य॒न्तु॒ ॥ क्रैं ॥५॥
स्वाहा॑कृ॒तमि॒ति स्वाहा॑ऽकृतम् । ज॒ठर॑म् । इन्द्र॑स्य । ग॒च्छ॒ ।
घा॒सिना॑ । मे॒ । मा । सम् । पृ॒क्थाः॒ । ऊ॒र्ध्वम् । मे॒ । नाभेः॑ । सी॒द॒ ॥ खीं ॥६॥
इन्द्र॑स्य । त्वा॒ । ज॒ठरे॑ । सा॒द॒या॒मि॒ ।
प्र॒जाप॑ते॒रिति॑ प्र॒जाऽप॑तेः । भा॒गः । अ॒सि॒ । ऊर्ज॑स्वान् । पय॑स्वान् ॥ खौं ॥७॥
प्रा॒णा॒पा॒नौ॑ । मे॒ । पा॒हि॒ । स॒मा॒न॒व्या॒नौ॑ । [मे॒ । पा॒हि॒ ।]
उ॒दा॒न॒व्या॒नौ॑ । [मे॒ । पा॒हि॒ ।]
ऊर्क् । अ॒सि॒ । ऊर्ज॑म् । मयि॑ । धे॒हि॒ । अक्षि॑तिः । अ॒सि॒ । मा । मे॒ । क्षे॒ष्ठाः॒ ।
अ॒मुत्र॑ । अ॒मुष्मि॑न् । लो॒के । इ॒ह । च॒ ॥ ष्यः ॥८॥

सा- कात्यायनः - "मित्रस्य त्वा...इति प्राशित्रं प्रतीक्षते" (काश्रौ २.२.१५) इति । 'चक्षुषा प्रतीक्षे' इति मन्त्रशेषः । हे प्राशित्रभाग, त्वां ᵛमित्रस्य एतन्नामकस्य देवस्य ᵛचक्षुषा ᵛप्रतीक्षे सम्यक् पश्यामि ॥

कात्यायनः - "देवस्य त्वेति प्रतिगृह्णाति" (काश्रौ २.२.१६) इति । पाठस्तु- 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । प्रतिगृह्णामि ......' [इति । ᵛप्रतिगृह्णामि] स्वीकरोमीत्यर्थः । व्याख्यातमन्यत् ॥

कात्यायनः - "पृथिव्यास्त्वेति सादयति" (काश्रौ २.२.१७) इति । पाठस्तु- 'पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थे' इति । सोऽयं मन्त्रः "अग्ने व्रतपते" (कासं १.३) इत्यनुवाके व्याख्यातः ।

कात्यायनः - "पुनरादाय देवस्य त्वेत्यनामिकाऽङ्गुष्ठाभ्याम्" (काश्रौ २.२.१८) इति । पाठस्तु- 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे' इति । असावप्यसकृद् व्याख्यातो मन्त्रः ॥

कात्यायनः - "अग्नेष्ट्वेति प्राश्नाति दन्तैरनुपस्पृशन्" (काश्रौ २.२.१८) इति । पाठस्तु- 'अग्नेष्ट्वाऽऽस्येन प्राश्नामि बृहस्पतेर्मुखेन' इति । हे प्राशित्र, त्वाम् ᵛअग्नेः ᵛआस्येन अग्निदेवतासंब-

---

14. V1 P1 with marking above मित्रस्य ins. in the margin
    मित्रदैवतं यजुः; V1 प्रतीक्षे for प्रतीक्षते
15. C S1 प्रतीक्षते for first प्रतीक्षे; S1 C M1 V1 after °नामकस्य ins. अनुग्राहकस्य
17. P1 with marking above देवस्य ins. in the margin :- सावित्रं यजुः
23. P1 with marking above देवस्य ins. in the margin :- सावित्रं यजुः

न्धिना मुखेन तथा बृहस्पतिसंबधिना ˈमुखेन च ˈप्राश्नामि भक्षयामि। अतो मदीयमुखस्योपद्रवो नास्तीत्यभिप्रायः ॥

पुरा कदाचिद्देवानां यागे बृहस्पतिः प्राशित्रं प्रतिगृह्णन् भक्षयंश्च मां हिंसिष्यतीति भीतः सन् हिंसापरिहाराय ‘देवस्य त्वा’ इति मन्त्रेण प्रतिगृह्य ‘अग्नेष्ट्वा’ इति मन्त्रेण प्राशितवानित्येतादृशं मन्त्रद्वयाभिप्रायं तित्तिरिरित्थमाह– “सोऽबिभेत् प्रतिगृह्णन्तं मा हिꣳसिष्यतीति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रति गृह्णामीत्यब्रवीत् सवितृप्रसूत एवैनद्ब्रह्मणा देवताभिः प्रत्यगृह्णात् सोऽबिभेत् प्राश्नन्तं मां हिꣳसिष्यतीत्यग्नेस्त्वाऽऽस्येन प्राश्नामीत्यब्रवीन्न ह्यग्नेरास्यं किं चन हिनस्ति” (तैस २.६.८) इति ॥

कात्यायनः – “नाभिमा लभते या अप्स्वन्तः” (काश्रौ २.२.२०) इति। पाठस्तु– ‘या अप्स्वन्तर्देवतास्ता इदꣳ शमयन्तु। स्वाहाकृतं जठरमिन्द्रस्य गच्छ। घसिना मे मा संपृक्था ऊर्ध्वं मे नाभेः सीद। इन्द्रस्य त्वा जठरे सादयामि’ इति। ˈअप्सु ˈअन्तः जलेषु मध्ये ˈयाः ˈदेवताः सन्ति ˈताः देवताः ˈइदं प्राशित्रं ˈशमयन्तु शान्तं कुर्वन्तु। भक्षितं सन् ममोदरे कमप्युपद्रवं यथा न करोति तथा कुर्वन्तु। हे प्राशित्र, ˈस्वाहाकृतं मया स्वाहाकारपूर्वकम् इन्द्राय समर्पितं तस्य ˈइन्द्रस्य ˈजठरं ˈगच्छ। अतो ममोपद्रवो न भविष्यति। [घसिना]। घस्लृ अदने इति धातुः। ˈमे ˈघसिना मदीयेन अदनेन भक्षणेन ˈमा ˈसंपृक्थाः संपर्कं मा कुरु दन्तस्पर्शं मा कुर्वित्यर्थः। ˈमे मदीयाया ˈनाभेः ˈऊर्ध्वं ˈसीद उपरिभागे तिष्ठ। ˈइन्द्रस्य परमेश्वरस्य ˈजठरे ˈत्वा ˈसादयामि त्वां स्थापयामि ॥

कात्यायनः – “अन्वाहार्यमभिघार्योद्वास्यान्तरा ब्रह्मयजमानौ हृत्वा वेद्यां निधायालभते प्रजापतेर्भागः” (काश्रौ ३.४.३०) इति। पाठस्तु– ‘प्रजापतेर्भागोऽस्यूर्जस्वान् पयस्वान्। प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यानौ मे पाहि। ऊर्गस्यूर्जं मयि धेह्यक्षितिरसि मा मे क्षेष्ठा अमुत्रामुष्मिंल्लोक इह च’ इति। हे अन्वाहार्य, त्वं ˈप्रजापतेः प्रजापालकस्य देवस्य ˈभागः ˈअसि। कथंभूतो भागः? ˈऊर्जस्वान् रसयुक्तः, ˈपयस्वान् क्षीरसारेण आज्येनोपेतः। तथाविध त्वं, ˈमे यजमानस्य मम वा ˈप्राणापानौ ˈपाहि ऊर्ध्वाधोवृत्ती वायुविशेषौ रक्ष। भुक्तस्यान्नस्य सर्वेष्ववयवेषु समत्वेन नयनहेतुर्वायुः समानः। शरीरं व्याप्य वर्तमानो वायुर्व्यानः। तौ ˈसमानव्यानौ ˈमे मदीयौ ˈपाहि। उत्क्रान्तिहेतुरुदानः। ˈउदानव्यानौ ˈमे मदीयौ ˈपाहि। समानोदानाभ्यां सह व्यानस्य द्विरभिधानं शरीरव्याप्तिदर्शनार्थम्। किं च त्वम् ˈऊर्क् ˈअसि रसरूपोऽसि। अतः ˈमयि मदीये यजमाने ˈऊर्जं ˈधेहि रसं स्थापय। किं च

---

4. V1 S1 C M1 एतादृश° for एतादृशं
5. P1 with marking above तित्तिरिर् ins. in the margin :– कण्वः तत्प्राश्नात्यग्नेष्ट्वास्येन प्राश्नामीत्यग्निं वै न किं च हिनस्ति तथैवैनं न हिनस्ति तन्नदद्भिः खादेन्नेन्म इदꣳ रुद्रियं तदतो हिनसदिति। अत एव, दन्तैरनुपस्पृशन्निति कात्यायन आह, C °गृह्णꣳस्तं for °गृह्णन्तं; C M V1 मा for मां.
7. C प्राश्नंस्तं for प्राश्नन्तं
9. P1 with marking above second या ins. in the margin:– लिङ्गोक्तदेवतं यजुः।
13. C M1 V1 S1 before मया add त्वां; C M1 V1 S1 after समर्पितं add भूत्वा।
20. P1 om. देवस्य
21. V1 S1 C M1 om. मम वा
22. P1 M1 °वृत्ति° for °वृत्ती
25. V1 S1 C M1 om. मदीये

ब्रह्मसंबन्धिप्रयोगे मन्त्राः]

त्वम् ᵛअक्षितिः ᵛअसि क्षयरहितोऽसि । अतः ᵛमे मदर्थम् ᵛअमुत्र ᵛइह ᵛच परलोकैतल्लोकयोः ᵛमा ᵛक्षेष्ठाः क्षयं मा प्राप्नुहि । ‘अमुत्र’ इत्यस्यैव व्याख्यानम् ‘अमुष्मिल्लोके’ इति । ‘मा मे क्षेष्ठाः अमुत्र’ इत्यस्य मन्त्रभागस्य तात्पर्यं तित्तिरिर्दर्शयति– “क्षीयते वा अमुष्मिꣳल्लोकेऽन्नमितःप्रदानꣳ ह्यमुष्मिꣳल्लोके प्रजा उपजीवन्ति यदेवमभिमृशत्यक्षितिमेवैनद्गमयति नास्यामुष्मिꣳल्लोकेऽन्नं क्षीयते” (तैसं १.७.३) इति । स्वर्गलोके भुज्यमानमन्नं भोगेन क्षीयते । पुनःसंपादनहेतोः कृषिक्रियादेस्तत्राभावादस्मिन्नेव भूलोके हविःस्वरूपेण देवेभ्यो यदन्नं दीयते तदेव फलरूपेण स्वर्गे लब्ध्वा प्रजा उपजीवन्ति । यदप्यत्र ब्राह्मणेभ्यो दीयते तदप्यमुत्रोपजीवति । एवं सति मन्त्रेणात्रान्वाहार्यमभिमृशति चेत् तदानीम् एतदन्नमक्षितिं प्रापयति । तस्य पुरुषस्य स्वर्गेऽन्नक्षयो नास्तीत्यर्थः ॥ ४-५ ॥

आ– प्राशित्रं प्रेक्षते ‘ मित्रस्य त्वा ’ इति । ᵛमित्रस्य ᵛचक्षुषा ᵛत्वा त्वां ᵛप्रतीक्षे । तं प्राशित्रं गृह्णाति– ‘ देवस्य त्वा ’ इति । व्याख्यातम् । ‘ प्रतिगृह्णामि ’ इत्याद्यपि व्याख्यातम् ॥४॥

प्राश्नाति– ‘ आ ददे अग्नेष्ट्वाऽऽस्येन ’ इति । प्राशित्रदैवतमानुष्टुभम् । ᵛअग्नेः संबन्धिना ᵛआस्येन मुखेन ᵛबृहस्पतेः ᵛमुखेन ᵛत्वा प्राशित्रं त्वाम् । अश भोजने । ᵛप्राश्नामि भक्षयामि । ‘ या अप्सु ’ इति । ᵛअन्तः अन्तःस्थिताः ᵛयाः ᵛदेवताः ᵛताः देवताः ᵛइदं प्राशितं प्राशित्रं ᵛशमयन्तु शान्तिं गमयन्तु ॥५॥

प्राशित्रं प्रार्थयते– ‘ स्वाहाकृतम् ’ इति । लिङ्गोक्तदेवत्योष्णिक् । ᵛस्वाहाकृतं स्वाहाकारेण कृतं प्राशित्रम् । ᵛइन्द्रस्य इन्द्रदेवतात्मकस्य ᵛजठरम् अन्नादिपरिपाकस्थानं ᵛगच्छ । ᵛघसिना । घस्ल अदन इत्यस्य रूपम् । ᵛमे मदीयेन घसिना अदनेन ᵛमा ᵛसंपृक्थाः । पृची संपर्के । दन्तसंस्पर्शनं मा गम इत्यर्थः । ‘ ऊर्ध्वं मे नाभेः सीद ’ । ᵛमे मदीयायाः ᵛनाभेः ᵛऊर्ध्वं उपरिस्थानं ᵛसीद ॥६॥

किं च ‘ इन्द्रस्य त्वा ’ इति । लिङ्गोक्तदेवत्या गायत्री । ᵛइन्द्रस्य परमैश्वर्ययुक्तस्य भगवतः ᵛजठरे ᵛत्वा त्वां ᵛसादयामि तव सदनं करोमि । त्वं तु ᵛप्रजापतेः जनिमतां सर्वेषां

---

1. V1 S1 C M1 °लोके for °लोकै°
4. P1 यदैवम् for यदेवम् ।
5. M1 °लब्धे for °लोके; M1 C भोगे for भोगेन
6. P1 °रूपस्वर्गे for °रूपेण स्वर्गे V1 S1 C M1 om. अत्र
8. P1 °जीवन्ति; for °जीवति; C om. अन्न°
10. B1 गृह्णामि for गृह्णाति
11 H1 अग्नि° for अग्नेः
13. H1 अन्तःस्थाः for अन्तःस्थिताः; B1 om. प्राशितं
15. B1 प्रार्थयेत् for प्रार्थयते ।
19. H1 °देवता for °देवत्या
20. H1 निवसदनं, B1 नवसदनं– This we have corrected as तव सदनं; B1 om. सर्वेषां

परिपालकस्य ᵛभागः ᵛअसि । ᵛऊर्जस्वान् विशिष्टान्नवान् ᵛपयस्वान् रसवांश्च यो भागः सोऽसि ॥७॥

‘ प्राणापानौ मे ’ इति । लिङ्गोक्तदेवत्या जगती । यस्मादेवंरूपस्तस्मात् ᵛमे ᵛप्राणापानौ ᵛपाहि । प्रपूर्वस्य अनः प्राणने इत्यस्य रूपं प्राण इति । प्रकर्षेण अनति प्राणाति इति वा प्राणः । अवाग्वृत्तिरपानः । तौ मदीयौ पाहि । समत्वेन अत्तीति (अनतीति ?) समानः । विशेषेण अपानोदानस्पर्शित्वेनानतीति व्यानः, तौ । ऊर्ध्वमनतीत्युदानः व्यानश्च, तौ ᵛपाहि । ᵛऊर्क् ᵛअसि त्वं रसरूपोऽसि । ᵛऊर्जं ᵛमयि ᵛधेहि । ᵛअक्षितिः । क्षि निवासगत्योरित्यस्य [रूपं क्षितिः । अक्षितिरसि ।] निवासस्थानशून्योऽसि । अतः ऊर्जं मयि धेहि । ᵛअमुत्र ᵛअमुष्मिन् ᵛलोके ᵛइह ᵛच ᵛमा ᵛमे ᵛक्षेष्ठाः । अतः मे मदीयमूर्जं मद्व्यतिरिक्तेषु स्थानेषु मा क्षेष्ठाः निवासं मा कार्षीः । क्षि निवासगत्योरिति ॥ ८ ॥

ए॒षा ते॑ अग्ने स॒मित् त॒या वर्ध॑स्व॒ चा च॑ प्यायस्व ।
व॒र्धि॒षी॒महि॑ च व॒यमा च॑ प्यासिषीमहि ॥९॥

ए॒षा । ते॒ । अ॒ग्ने॒ । स॒मिदिति॑ स॒म्ऽइत् । तया॑ । वर्ध॑स्व । च॒ । आ । च॒ । प्या॒य॒स्व॒ ।
व॒र्धि॒षी॒महि॑ । च॒ । व॒यम् । आ । च॒ । प्या॒सि॒षी॒म॒हि॒ ॥ मे ॥ ९ ॥

सा– कात्यायनः –“ एषा त इति होताऽनुमन्त्रयते ” (काश्रौ ३·५·२) इति । पाठस्तु– ‘ एषा ते अग्ने समित् तया वर्धस्व चा च प्यायस्व । वर्धिषीमहि च वयमा च प्यासिषीमहि ’ इति । हे ᵛअग्ने, ᵛते तव ᵛसमित् ᵛएषा इन्धनहेतुः काष्ठविशेषो यः प्रक्षिप्यते ᵛतया समिधा त्वं ᵛवर्धस्व वृद्धिं गच्छ ᵛआप्यायस्व ᵛच अस्मानपि सर्वतो वृद्धिं प्रापय । तथा च सति त्वत्प्रसादात् ᵛवयं ᵛवर्धिषीमहि वृद्धिं प्राप्नुयामः । ᵛआप्यासिषीमहि ᵛच अस्मदीयपुत्रपश्वादीन् सर्वतोऽभिवृद्धान् करवाम ॥ ९ ॥

आ– ‘ एषा ते अग्ने ’ इति । इतः प्रभृति प्रकृतमार्षम् । इदमाग्नेयम् । यस्या अनुष्टुप् । समिदनुमन्त्रणे विनियोगः । हे भगवन् ᵛअग्ने, ᵛएषा ᵛते पुरतः प्रतीयमाना ᵛसमित् समिन्धनम् ।

---

1. B1 विशिष्टानन्नवान् for विशिष्टान्नवान् ; H1 योजनीयो for यो
7. B1 om. अक्षितिः ... धेहि (L. 8), H1 before निवास° ins. अन्यत्र तव योज्य°
9. H1 द्वैतिरिक्ते तत्स्थानेषु for मद्व्यतिरिक्तेषु ... स्थानेषु
15. P1 with marking above first इति ins. in the margin : अग्नीधे समिधमादधाति सति; P1 with marking above एषा ins. in the margin आग्नेय्यनुष्टुप् ।
17. P1 अयं for यः
19. C S1 करवामः; M1 करिष्यामः; for करवाम
20. H1 om. ते

संपूर्वस्य इन्धी दीप्तावित्यस्य रूपं ^{v}समित्। ^{v}तया हुतया समिधा ^{v}वर्धस्व ^{v}आप्यायस्व च। चकारो भिन्नक्रमः। 'आप्यायस्व च' इति। किं च त्वत्प्रसादात् ^{v}वयं ^{v}च ^{v}वर्धिषीमहि पुत्रपश्वादिभिः; ^{v}आ ^{v}च ^{v}प्यासिषीमहि ॥८॥

ए॒तत् ते॑ देव सवित॒र्य॒ज्ञं प्राहु॒र्बृह॒स्पत॑ये ब्र॒ह्मणे॑ ।
ते॑न य॒ज्ञम॑व॒ ते॑न य॒ज्ञप॑ति॒ं ते॑न॒ माम॑व ॥१०॥
मनो॒ ज्योति॑र्जुषता॒माज्य॑स्य॒ बृह॒स्पति॑र्य॒ज्ञमि॒मं त॑नोतु ।
अरि॑ष्टꣳ य॒ज्ञꣳ समि॒मं द॑धातु॒ विश्वे॑ दे॒वास॑ इ॒ह मा॑दयन्ता॒मों३ प्रति॑ष्ठ ॥११॥

ए॒तत् । ते॒ । दे॒व॒ । स॒वि॒तः॒ । य॒ज्ञम् । प्र । आ॒हुः॒ । बृह॒स्पत॑ये । ब्र॒ह्मणे॑ ।
ते॑न । य॒ज्ञम् । अ॒व॒ । ते॑न । य॒ज्ञप॑ति॒मिति॑ य॒ज्ञऽप॑तिम् । ते॑न । माम् । अ॒व॒ ॥ खै ॥१०॥
मन॑ः । ज्योति॑ः । जु॒ष॒ता॒म् । आज्य॑स्य । बृह॒स्पति॑ः । य॒ज्ञम् । इ॒मम् । त॒नो॒तु॒ ।
अरि॑ष्टम् । य॒ज्ञम् । सम् । इ॒मम् । द॒धा॒तु॒ । विश्वे॑ । दे॒वास॑ः । इ॒ह । मा॒द॒य॒न्ता॒म् ।
ॐ । प्र । ति॒ष्ठ॒ ॥ हः ॥११॥

सा– कात्यायनः –"एतत् त इति समिदामन्त्रितः प्रसौति" (काश्रौ २.२.२१) इति। समिधमाधातु^{M}नुज्ञाप्रदानाय अध्वर्युणा संबोधितो ब्रह्मा मन्त्रेणानुजानीयात्। पाठस्तु– 'एतन् ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे। तेन यज्ञमव तेन यज्ञपतिं तेन मामव। मनो ज्योतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोतु। अरिष्टꣳ यज्ञꣳ समिमं दधातु विश्वे देवास इह मादयन्तामों३ प्रतिष्ठ' इति। हे ^{v}सवितः ^{v}देव, ^{v}ते तुभ्यम् ^{v}एतत् एवमिदानीं क्रियमाणं ^{v}यज्ञं ^{v}प्राहुः यजमानाः कथयन्ति, अनुज्ञापयन्तीत्यर्थः। किं च त्वया प्रेरितो देवानां यज्ञे यो ब्रह्मा तस्मै ^{v}ब्रह्मणे ^{v}बृहस्पतये प्राहुः। ^{v}तेन कारणेन त्वं ^{v}यज्ञम् ^{v}अव पालय, तथा ^{v}तेन एव कारणेन ^{v}यज्ञपतिं यजमानम्, अवेत्यनुवर्तते। तथा ^{v}तेन एव कारणेम ^{v}माम् ^{v}अव ब्रह्माणं पालय। किं च ते ^{v}मनः ^{v}आज्यस्य संबन्धि ^{v}ज्योतिः ^{v}जुषतां दीप्यमानरूपं सेवताम्। यज्ञसंबन्धिन्याज्ये त्वदीयं चित्तं स्थापयेत्यर्थः। किं च ^{v}बृहस्पतिः ^{v}यज्ञं ^{v}इमं ^{v}तनोतु विस्तारयतु। ततः ^{v}इमं ^{v}यज्ञम् ^{v}अरिष्टं हिंसारहितं कृत्वा सः ^{v}संदधातु इडाभक्षणार्थमविच्छिन्नं करोतु। किं च ^{v}विश्वे ^{v}देवासः

---

1. H1 स्तुतया; B1 °हूतया for हुतया।
13. C प्रस्तौति for प्रसौति
14. V1 S1 C M1 om. अध्वर्युणा
17. P1 om. एवम्
18. P1 before प्राहुः adds यज्ञं
20. V1 C S1 M1 अध्वर्यु for ब्रह्माणं; C S1 M1 आज्य° for आज्यस्य; M1 C V1 S1 दीप्यमानं for दीप्यमान°
21. S1 C M1 om. तत इमं ... करोतु (L. 22)
22. P1 om. सः and trans. संदधातु after अविच्छिन्नं

सर्वे देवाः ^{v}इह यज्ञकर्मणि ^{v}मादयन्तां हर्षं कुर्वन्ताम् । एवं प्रार्थितः सविता देवः 'ॐ३ प्रतिष्ठ' इति अनुज्ञां प्रयच्छति । ॐ इत्यङ्गीकारार्थः, तथाऽस्तु । ^{v}प्रतिष्ठ प्रणवं कुरु । समिदाधानकाले यजमानस्याभिप्रेतं प्रयाणमवगत्य सविता देवोऽङ्गीकृत्य प्रयातुं प्रेरयतीत्यर्थः ॥ ११ ॥ (३) ॥

द्वितीयेऽध्याये तृतीयोऽनुवाकः ॥

आ-समिदामन्त्रितः प्रसौति- 'एतत् ते देव सवितः' इति । वैश्वदेवी बृहती । हे ^{v}देव ^{v}सवितः, यदध्वर्युराह- 'ब्रह्मन् प्रस्थास्यामि' इति, तम् ^{v}एतद् एनं ^{v}यज्ञं ^{v}ते तव संबन्धिनं ^{v}प्राहुः । अत्र वचनव्यत्ययः । प्राह ब्रवीति । किं च ^{v}बृहस्पतये ^{v}ब्रह्मणे प्राह । बृहस्पतिः देवानां ब्रह्मा । तदधिष्ठित एवायं मानुषो ब्रह्मत्वं करोति । ^{v}तेन कारणेन ^{v}यज्ञं ^{v}अव पालय, ^{v}तेन ^{v}यज्ञपतिं, ^{v}तेन ^{v}माम् ^{v}अव रक्ष ॥ १० ॥

किं च- 'मनो ज्योतिः' इति । ज्योतिर्देवता, त्रिष्टुप् यजुः । ते ^{v}मनः ^{v}ज्योतिः ^{v}जुषतां सेवताम् ^{v}आज्यस्य संबन्धि ज्योतिः (? जूतिः) । जवतेर्गतिकर्मणो जूतिरिति । अतीतानागतवर्तमानकालेषु पदार्थेषु यद् गतं [सा] ज्यो (? जू) तिः । किं च ^{v}बृहस्पतिः ^{v}यज्ञम् ^{v}इमं ^{v}तनोतु विस्तारयतु । 'अरिष्टम्' । रिषतिर्हिंसार्थः । ^{v}अरिष्टम् अविनष्टम् ^{v}इमं ^{v}यज्ञं कृत्वा ^{v}संदधातु इलाभक्षणायेति शेषः । किं च ^{v}विश्वे ^{v}देवासः विश्वेदेवाः ^{v}इह यज्ञकर्मणि ^{v}मादयन्ताम् हर्षं कुर्वन्ताम् । ^{v}ओम् अवतेराप्नोतेर्वा ओङ्कारः, इहाभ्युपगमार्थः । ^{v}प्रतिष्ठ प्रकर्षेण तिष्ठ ॥ ११ ॥ (३) ॥

[इति द्वितीयेऽध्याये तृतीयोऽनुवाकः]

---

2. P1 om. प्रणवं ... अङ्गीकृत्य – [L. 3]
7. H1 देवतानां for देवानां
8. H1 करोमि for करोति
11. B1 जयते for जवते; B1 जुहुसति for जूतिरिति
12. B1 परार्थेषु for पदार्थेषु; B1 परं ज्योतिमानः; H1 यत् गतज्योतिमिति – readings in both mss. are corrupt; आनन्दबोध who follows the commentary of महीधर in places almost verbatim, simply copied what is said by महीधर here. He fergot that KS reads ज्योतिः in place of जूतिः, hence the explanation of जूतिः given by महीधर cannot be imported when he has to explain ज्योतिः. His lapses become too obvious which bring him no credit.
14. B1 इलाक्षणेऽयं विशेषः; H1 इलाभक्षणयोरिति शेषः – readings in both are corrupt, which we have hence corrected as इलाभक्षणायेति शेषः
15. B1 इहापि युगपत् कर्मार्थः; H1 इहात्यपगत्यर्थः- readings in both are corrupt, which we have hence corrected as इहाभ्युपगमार्थः

अथ चतुर्थोऽनुवाकः

सा– तृतीये ब्रह्मसंबन्धिमन्त्रा उक्ताः। चतुर्थे सुग्व्यूहनादिमन्त्रा उच्यन्ते।

अ॒ग्नीषोम॑यो॒रुज्जि॑ति॒मनूज्जे॑षं॒ वाज॑स्य मा प्रस॒वेन॒ प्रोहा॑मि ।
अ॒ग्नीषो॒मौ॑ तमप॑नुदतां॒ यो॒ऽस्मान् द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मो वाज॑स्यैनं प्रस॒वेनापो॑हामि ।
इ॒न्द्रा॒ग्न्योरु॒ज्जि॑ति॒मनूज्जे॑षं॒ वाज॑स्य मा प्रस॒वेन॒ प्रोहा॑मि ।
इ॒न्द्रा॒ग्नी तमप॑नुदतां॒ यो॒ऽस्मान् द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मो वाज॑स्यैनं प्रस॒वेनापो॑हामि ॥१॥

अ॒ग्नीषोम॑योः । उज्जि॑ति॒मित्युत्ऽजि॑तिम् । अनु॑ । उत् । जे॒ष॒म् ।
वाज॑स्य । मा॒ । प्र॒स॒वेनेति॑ प्र॒ऽस॒वेन॑ । प्र । ऊ॒हा॒मि॒ ।
अ॒ग्नीषोमौ॑ । तम् । अप॑ । नु॒द॒ता॒म् । यः । अ॒स्मान् । द्वेष्टि॑ । यम् । च॒ । व॒यम् । द्वि॒ष्मः ।
वाज॑स्य । ए॒न॒म् । प्र॒स॒वेनेति॑ प्र॒ऽस॒वेन॑ । अप॑ । ऊ॒हा॒मि॒ ।
इ॒न्द्रा॒ग्न्योः । [उत् । —]
इ॒न्द्रा॒ग्नी इती॑न्द्रा॒ग्नी । [तम् । अप॑ । — ऊ॒हा॒मि॒ ।] ॥ ध्योः ॥ १ ॥

कात्यायनः – “जुहूपभृतौ व्यूहति । अग्नीषोमयोरिति जुहूं प्राचीं दक्षिणेनोत्तानेन । अग्नीषोमौ तमितीतरेणेतरां नीचा प्रतीचीम् । यथादेवतमन्यत्” (काश्रौ ३·५·१७-२०) इति । जुहूपभृतोर्व्यूहनं नाम परस्परविपरीतत्वेन अपनोदनम् । तत्र उत्तानेन दक्षिणहस्तेन जुहूं प्राचीं प्रथममन्त्रमुच्चारयन्नपनुदेत् । वामहस्तेन न्यग्भूतेनोपभृतं प्रतीचीं द्वितीयमन्त्रमुच्चारयन्नपनुदेत् । तृतीयचतुर्थमन्त्राभ्यामैन्द्राग्नयागे पूर्वोक्ताग्नीषोमीययागवज्जुहूपभृतोर्व्यूहनं कुर्यात् । प्रथममन्त्रपाठस्तु – ‘अग्नीषोमयोरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामि’ इति । ᵛअग्नीषोमयोः द्वितीयपुरोडाशदेवतयोः ᵛउज्जितिम् ᵛअनु अविघ्नेन हविःस्वीकाररूपमुत्कृष्टं जयमनुसृत्य ᵛउज्जेषं यजमानोऽहमुत्कृष्टजयं प्राप्तवानस्मि । ᵛवाजस्य अन्नस्य पुरोडाशदेवतायाः ᵛप्रसवेन अभ्यनुज्ञया ᵛमा ᵛप्रोहामि मां यजमानं जुहूपधारिणं प्रोत्साहयामि । यद्यप्यूहतिधातुर्वितर्कार्थस्तथाऽपि उपसर्गवशात् उत्साहवाची भवति ॥

---

1. V1 S1 C M1 °षोमीयम् for षोमौ तम् – [L 2]
15. C M1 अपोदनम् for अपनोदनम्; P1 with marking above जुहूं ins. in the margin :– स प्राञ्चमेव यजमानमुदूहतीति कण्वोक्तेः C V1 S1 M1 अप उदेत् for अपनुदेत्
16. P1 with marking above प्रतीचीं ins. in the margin – अपाञ्चं तमपोहति यो यजमानायारातीयतीति तदुक्तेः; C V1 S1 M1 अप उदेत् for अपनुदेत्, P1 इन्द्राग्नी for ऐन्द्राग्न°
19. V1 उत्कृष्टरूपं for उत्कृष्टजयं
20. VI C M1 S1 पुरोडाशादेः for पुरोडाशदेवतायाः;
P1 with marking above यजमानं ins. in the margin :– यजमानमुदूहतीति कण्वोक्तेः ।
21. P1 after भवति adds अथामावास्यायामिन्द्राग्न्योरुज्जितिमिति कण्वोक्तेर्दर्शयागेऽयं मन्त्रः।

द्वितीयमन्त्रपाठस्तु– ‘ अग्नीषोमौ तमपनुदतां॰ योऽस्मान् द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामि ’ इति । ᵛयः शत्रुरसुरादिः ᵛअस्मान् ᵛद्वेष्टि अस्मदीययज्ञविनाशाय द्वेषं करोति, ᵛयं ᵛच अन्यमालस्यादिरूपमस्मदीयानुभावविरोधिनं शत्रुं ᵛवयं ᵛद्विष्मः विनाशनोद्योगं कुर्मः, उभयविधं ᵛतं शत्रुम् ᵛअग्नीषोमौ देवौ ᵛअपनुदतां निराकुर्वताम् । अहमपि ᵛएनं द्विविधं शत्रुमुपभृद्रूपं ᵛवाजस्य ᵛप्रसवेन पुरोडाशदेवताया अभ्यनुज्ञया ᵛअपोहामि निराकरोमि ॥

तृतीयचतुर्थमन्त्रद्वयपाठस्तु– ‘ इन्द्राग्न्योरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामि । इन्द्राग्नी तमपनुदतां योऽस्मान् द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामि ’ इति । अग्नीषोममन्त्रवत् तौ व्याख्येयौ । ऐन्द्राग्नपुरोडाशानुष्ठाने तावेतौ स्रुग्व्यूहनमन्त्रौ ॥ १ ॥

आ जुहूपभृतौ व्यूहति । तत्र जुह्वा यजमानसंस्तवः । ‘ अग्नीषोमयोः ’ इत्यादीनां चतुर्णां लिङ्गोक्तानि देवतानि । ᵛअग्नीषोमयोः प्रधानदेवतयोः । ᵛउज्जितिम्, जि जिये, उज्जितिम् उत्कृष्टजयम् ᵛअनु पश्चात् यजमानोऽहं ᵛउज्जेषम् ऊर्ध्वं जयेयम् । किं च ᵛवाजस्य अन्नस्य पुरोडाशादेः ᵛप्रसवेन अभ्यनुज्ञया कारणभूतया ᵛमा माम् आत्मानं ᵛप्रोहामि । वह प्रापणे । उपभृतं प्रतीचीं प्रेरयति । ᵛअग्नीषोमौ प्रधानहविर्भागौ (जौ ?) । ᵛतं शत्रुम् । सर्वत्र ब्राह्मणानां पाप्मैकशत्रुरित्यभिप्रायः । तं शत्रुम् अग्नीषोमौ ᵛअपनुदताम् । नुद प्रेरणे इत्यस्य रूपम् । अपगमयताम् । ᵛयः ᵛअस्मान् ᵛद्वेष्टि । द्विष अप्रीतौ । ᵛयं ᵛच ᵛवयं ᵛद्विष्मः तं चापि ᵛएनं शत्रुं ᵛवाजस्य ᵛप्रसवेन कारणभूतेन ᵛअपोहामि अर्वाचीनं प्रेरयामीत्यर्थः । ‘ इन्द्राग्न्योः ’ इत्याद्युत्तरौ मन्त्रौ समानार्थतया व्याख्यातौ ॥ १ ॥

वसुभ्यस्त्वा रुद्रेभ्यस्त्वाऽऽदित्येभ्यस्त्वा ।
संजानाथां द्यावापृथिवी मित्रावरुणौ त्वा वृष्ट्याऽवताम् ॥ २ ॥

वसुभ्य इति वसुऽभ्यः । त्वा । रुद्रेभ्यः । आदित्येभ्यः ।
सम् । जानाथाम् । द्यावापृथिवी इति द्यावापृथिवी ।
मित्रावरुणौ । त्वा । वृष्ट्या । अवताम् ॥ जी. ॥ २ ॥

सा– कात्यायनः – “ जुह्वा परिधीननक्ति यथापूर्वं वसुभ्य इति प्रतिमन्त्रम् ” (काश्रौ ३.५.२४) इति । पाठस्तु– ‘ वसुभ्यस्त्वा रुद्रेभ्यस्त्वाऽदित्येभ्यस्त्वा ’ इति । हे मध्यपरिधे, ᵛवसुभ्यः वसुदेवताप्रीत्यर्थं

---

6. C1 S1 M1 °तुरीय° for °चतुर्थ°
8. S1 M1 C V1 व्याख्यातौ for व्याख्येयौ
11. B1 यजमानं for यजमानोऽहं
13. B1 om. अग्नीषोमौ ... शत्रुम
15. H1 om. एनं
16. H1 om. °आदि°
24. P1 with marking above first वसुभ्य° ins. in the margin– परिधिदेवतानि त्रीणि यजूंषि ।

स्रुग्व्यूहनादिमन्त्राः]

^{v}त्वा त्वां मध्यमपरिधिरूपमनज्मीति शेषः । एवं दक्षिणोत्तरपरिधिमन्त्रौ व्याख्येयौ । परिधित्रयाञ्जनेन सवनत्रयदेवताः प्रीयन्त इत्यभिप्रायः ॥

कात्यायनः – " संजानाथामिति प्रस्तरादानम् (काश्रौ ३·६·३) इति । पाठस्तु– ' संजानाथां द्यावापृथिवी मित्रावरुणौ त्वा वृष्ट्याऽवताम् ' इति । ^{v}द्यावापृथिवी द्युलोकभूलोकदेव्यौ ^{v}संजानाथाम् आदीयमानमिमं प्रस्तरं सम्यगवगच्छताम् । हे प्रस्तर, त्वां ^{v}मित्रावरुणौ एतन्नामकौ देवौ ^{v}वृष्ट्यावतां जलवर्षणेन पालयताम् ॥ २ ॥

आ– परिधीननक्ति– ' वसुभ्यस्त्वा ' इति । ' वसुभ्यस्त्वा ' इत्यादीनां त्रयाणां परिधयो देवताः । ^{v}वसुभ्यः देवेभ्योऽर्थाय ^{v}त्वा परिधीननक्ति (ज्मि ?) । ^{v}रुद्रेभ्यः अर्थाय त्वामनक्मि (ज्मि ?) । ^{v}आदित्येभ्यः अर्थाय त्वां परिधिमनज्मि । एतदुक्तं भवति । इत्थंभूता यूयं येन युष्मदभ्यञ्जनेन सवनदेवतानां तृप्तिरिति ॥

प्रस्तरमादत्ते– ' संजानाथाम् ' इति, ' व्यन्तु वयः ' इति [च] । द्वे प्रस्तरदेवत्ये । यजुषी बृहत्यौ । ^{v}द्यावापृथिवी द्यावापृथिव्यौ युवां ^{v}संजानाथाम् अवगतार्थे भवतम् । किं च ^{v}मित्रावरुणौ, मित्रावरुणशब्दाभ्यामध्यात्मप्राणोदानावुच्येते । तत्रापि प्राणरूपापन्नो वायुः । तौ च प्रस्तररूपापन्नं यजमानं ^{v}त्वा त्वां ^{v}वृष्ट्या ^{v}अवताम् । " यजमानो वै प्रस्तरः " (शब्रा १·८·१·४४) इति श्रुतेः ॥ २ ॥

व्यन्तु॒ वयो॑ रि॒प्तो रिहा॑णा म॒रुतां॒ पृष॑तीं गच्छ ।
व॒शा पृश्नि॑र्भू॒त्वा दिवं॑ गच्छ॒ ततो॑ नो॒ वृष्टि॒मा व॑ह ॥ ३ ॥

व्यन्तु॑ । वयः॑ । रि॒प्तः । रिहा॑णाः । म॒रुता॑ँ । पृष॑तीम् । ग॒च्छ॒ ।
व॒शा । पृश्नि॑ः । भू॒त्वा । दिव॑म् । ग॒च्छ॒ । तत॑ः । न॒ः । वृष्टि॑म् । आ । व॒ह॒ ॥ श्रें ॥ २ ॥

सा– कात्यायनः – " अनक्त्येनं व्यन्तु वय इति । अग्रं जुह्वाम् । उपभृति मध्यम् । मूलमितरस्याम् " (काश्रौ ३·६·४-७) इति । इतरस्याम् इतरा ध्रुवा तस्यामित्यर्थः । पाठस्तु– ' व्यन्तु वयो रिप्तो रिहाणाः ' इति । ^{v}वयः पक्षिणः ^{v}रिप्तः । व्यत्ययेन लकारस्य रेफः । लिप्तमित्यर्थः । ^{v}रिहाणाः प्रस्तरगतमाज्यलेपं लिहानाः ^{v}व्यन्तु गच्छन्तु । वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु ॥

---

1. C अनक्मि, S1 अनक्ति for अनज्मि
4. C V1 S1 द्युलोकदेव्यौ; M1 द्यावापृथिव्यौ द्युलोके देव्यौ for द्युलोकभूलोकदेव्या
8. B1 अनक्ति for अनक्मि
9. H1 अनक्ति; B1 अनाग्मि for अनज्मि
12. B1 यजुर् for यजुषी; B1 om. द्यावापृथिवी
22. V1 S1 C M1 after खादनेषु ins. इति धातुः; P1 with marking above °खादनेषु ins. in the margin :– सोऽनक्ति व्यन्तु वय इति एवैनदेतत् कृत्वा स्यान्मनुष्यलोकाद्देवलोकमभ्युत्पातयतीति कण्वश्रुतेः प्रस्तरस्य पक्षिरूपत्वम् ।

कात्यायनः – “ मरुतामिति नीचैर्हृत्वा तृणमादायानुप्रहरति ” (काश्रौ ३·६·८) इति । एकं तृणं प्रस्तरात् पृथक्कृत्य तं च प्रस्तरं नीचैरौन्नत्यं यथा न भवति तथा धृत्वा वह्नौ प्रहरेत् । पाठस्तु– ‘ मरुतां पृषतीं गच्छ । वशा पृश्निर्भूत्वा दिवं गच्छ । ततो नो वृष्टिमावह ’ इति । हे प्रस्तर, त्वं ^{v}मरुतां मरुन्नामकानां देवानां संबन्धिनीं ^{v}पृषतीं वाहनरूपामश्वां चित्रवर्णां ^{v}गच्छ प्राप्नुहि वायुवाहनवद्वेगेन गच्छेत्यर्थः । वशा पृश्निर्भूत्वा । ^{v}वशा स्वाधीना ^{v}पृश्निः अल्पतनुर्गौः ^{v}भूत्वा तद्रूपत्वं प्राप्य ^{v}दिवं ^{v}गच्छ द्युलोकं प्राप्नुहि । कामधेनुवत् तृप्तिकरी भूत्वा स्वर्गं गच्छेत्यर्थः । ^{v}ततः स्वर्गप्राप्तेरूर्ध्वं ^{v}नः अस्मदर्थं ^{v}वृष्टिम् ^{v}आवह भूलोके समानय ॥ ३ ॥

आ– तत्रानक्ति– ‘ व्यन्तु वयः ’ इति । ^{v}वयः वयोरूपाणि गायत्र्यादीनि छन्दांस्यभिधीयन्ते । वेतिर्गत्यर्थः । वयोरूपाणि छन्दांसि ^{v}व्यन्तु गच्छन्तु । प्रस्तरमादायेति शेषः । [मरुतां पृषतीम् । बृहती] प्रस्तर देवत्या । आहुतिपरिमाणं त्रिभिः पादैराह । तमेव प्रस्तरं ^{v}रिहाणाः लिहानाः ^{v}रिप्तः लिप्तः भागश आस्वादयन्तः हविरास्वादयन्तो व्यन्त्विति संबन्धः । त्वं च ^{v}मरुतां ^{v}पृषतीं मरुतां वाहनमगच्छः । ‘ वशा पृश्निः भूत्वा दिवं गच्छ ’ । “ इयं वै वशा पृश्निर्यदिदमस्यां मूलि चामूलं चान्नाद्यं प्रतिष्ठितम् । तेनेयं वशा पृश्निः ” (शब्रा ५·१·३·३) इति श्रुतिः । पृथिवीसंबन्धिभिर्भोगैर्द्युलोकं तर्पयेत्युक्तं भवति ॥ ३ ॥

च॒क्षु॒ष्पा अ॑सि॒ चक्षु॑र्मे पाहि ।
यं प॑रि॒धिं प॒र्यध॑त्था॒ अग्ने॑ देव प॒णिभि॑र्गु॒ह्यमा॑नः ॥ ४ ॥
तं त॑ ए॒तमनु॒ जोषं॑ भराम्ये॒ष नेत् त्वद॑पचे॒तया॑तै ।
अ॒ग्नेः प्रि॒यं पाथोऽपी॑तम् ॥ ५ ॥

---

2. V1 C B1 M1 कृत्वा for °कृत्य
3. S1 पृषतीर् for पृषतीं
4. P1 with marking above पृषतीं ins in the margin :– कण्वस्तु देवलोको वै मरुतां पृषतीं गच्छेत्येवैतदाहेत्यूचे ।
5. M1 सर्वधीरा for स्वाधीना M1 V1 S1 C om. भूत्वा
6. P1 तृप्तिर् for तृप्तिकरी
9. B1 om. गच्छन्तु, B1 H1 प्रस्तरदेवेभ्यश्चतुर्थः पादः आग्नेयः । This is obviously corrupt. We have, therefore corrected this as मरुतां ... प्रस्तरदेवत्या and deleted चतुर्थः पादः आग्नेय which is not applicable to the verse under comment. आनन्दबोध without a second thought, copied it from महीधर. In VS the 4th पाद i. e. चक्षुष्पा अग्ने is of course आग्नेय. But this in KS comes only in the beginning of the following verse.
12. B1 °गत्यः for अगच्छः
13. H1 प्रतिष्ठितः for प्रतिष्ठितम्
14. H1 श्रुतेः for श्रुतिः

च॒क्षु॒ष्पाः । च॒क्षुः॒पा इति॑ च॒क्षुः॒ऽपाः । अ॒सि॒ । चक्षुः॑ । मे॒ । पा॒हि॒ ।
यम् । प॒रि॒धिमिति॑ प॒रि॒ऽधिम् । प॒र्यध॑त्था॒ इति॑ प॒रि॒ऽअध॑त्थाः ।
अग्ने॑ । दे॒व॒ । प॒णिऽभि॒रिति॑ प॒णिऽभिः॑ । गु॒ह्यमा॑नः ॥ थिंन ॥ ४ ॥
तम् । ते॒ । ए॒तम् । अनु॑ । जोष॑म् । भ॒रा॒मि॒ ।
ए॒षः । न । इत् । त्वत् । अ॒प॒चे॒तया॑ता॒ इत्य॑प॒ऽचे॒तया॑तै ।
अ॒ग्नेः । प्रि॒यम् । पाथः॑ । अपि॑ । इ॒त॒म् ॥ गें ॥ ५ ॥

स्रा– " चक्षुष्पा इत्यात्मानमालभते " (काश्रौ ३·६·१५) इति । पाठस्तु– ' चक्षुष्पा असि चक्षुर्मे पाहि ' इति । हे अग्ने, त्वं ᵛचक्षुष्पाः ᵛअसि त्वदीयज्वालया अन्धकारं निवर्त्य चक्षुषः पालकोऽसि । अतः ᵛमे मदीयं ᵛचक्षुः ᵛपाहि । प्रस्तरप्रहरणेन प्रसक्तं चक्षुष उपद्रवं परिहरेत्यर्थः । तमेतमभिप्रायं तित्तिरिर्दर्शयति– " यावद्वा अध्वर्युः प्रस्तरं प्रहरति । तावदस्य चक्षुर्मीयते । चक्षुष्पा अग्नेऽसि चक्षुर्मे पाहीत्याह । चक्षुरेवात्मन् धत्ते " (तैब्रा ३.३.९) इति ॥

कात्यायनः – " परिधीननु प्रहरति यं परिधिमिति प्रथमम् " (काश्रौ ३·६·१७) इति । पाठस्तु– ' यं परिधिं पर्यधत्था अग्ने देव पणिभिर्गुह्यमानः । तं त एतमनु जोषं भराम्येष नेत् त्वदपचेतयातै ' इति । हे आहवनीय ᵛअग्ने, त्वं ᵛपणिभिः प्राणिभिश्चेतनात्मकैः असुरैः ᵛगुह्यमानः । गुहू संवरणे । संव्रियमाणः संरुध्यमानः सन् ᵛयं ᵛपरिधिं पश्चिमदिशि ᵛपर्यधत्थाः असुरोपद्रवनिवारणाय परिस्थापितवानसि, ᵛते तव ᵛजोषं प्रियं ᵛतम् ᵛएतम् परिधिं ᵛअनु ᵛभरामि अनुक्रमेण हरामि, वह्नौ प्रक्षिपामि । ᵛएषः परिधिस्त्वत्तः सकाशादपगतः सन् ᵛअपचेतयातै ᵛन एव चेतयतु । चिती संज्ञाने । त्वत्तोऽपगन्तुं मा जानात्वित्यर्थः ॥

कात्यायनः – " इतरौ च युगपदग्नेः प्रियमिति " (काश्रौ ३·६·१७) इति । दक्षिणोत्तरपरिधी मन्त्रेण युगपत् प्रहरेत् । पाठस्तु– ' अग्नेः प्रियं पाथोऽपीतम् ' इति । हे दक्षिणोत्तरपरिधी, युवाम् ᵛअग्नेः आहवनीयस्य ᵛप्रियं अभिप्रेतं ᵛपाथः अन्नम् ᵛअपि ᵛइतम् अपिगतम् । " अन्नमपि पाथ उच्यते " (नि ६·७) इति यास्कः । अग्नेरन्नं भवद्भ्यां प्राप्यतामित्यर्थः ॥ ४-५ ॥

---

7. P1 with marking above second चक्षुषा ins. in the margin:– आग्नेयं यजुः
8. P1 with marking above हे अग्ने ins. in the margin चक्षुष्पा अग्ने असीति माध्यन्दिन- पाठादग्निरत्र संबोध्य; C after निवर्त्य adds चक्षुष्पाः; M1 V1 S1 चक्षुष्पाः for चक्षुषः ।
12. P1 om. प्रथमम्
13. P1 with marking above यं ins. in the margin परिधिदेवता त्रिष्टुप्
14. V1 S1 C M1 after संवरणे ins. इति धातुः; P1 संचरणे for संवरणे
17. V1 S1 C M1 after संज्ञाने ins. इति धातुः
20. P1 हरेत् for प्रहरेत्; P1 with marking above अग्नेः ins. in the margin आग्नेयं यजुः
21. P1 with marking above °गतम् ins. in the margin– अवामग्नेरन्नमित्यवगच्छतामिति वा ।

आ— ‘ चक्षुष्पा ’ इति । आग्नेयी । हे भगवन्नग्ने, यतः स्वभावतः ^{v}चक्षुष्पाः चक्षुषो रक्षकः अतः ^{v}चक्षुः ^{v}मे ^{v}पाहि गोपाय । परिधीननुप्रहरति— ‘ यं परिधिम् ’ इति । परिधिर्देवता त्रिष्टुप् । हे भगवन् ^{v}अग्ने आहवनीय, ^{v}यं ^{v}परिधिं पर्यधत्थाः परिहितवानसि । हे ^{v}देव, ^{v}पणिभिः असुरैः प्रतिपक्षरूपैः ^{v}गुह्यमानः । गुहू संवरणे । संव्रियमाणः संरुध्यमानः ॥ ४ ॥

^{v}तम् ^{v}एतम् परिधिं ^{v}ते तव ^{v}जोषम् अभिप्रेतम् ^{v}अनु ^{v}भरामि अनुहरामि; एष नेत् त्वदपचेतयातै । ^{v}एषः परिधिः । ^{v}न धिक् । नेत् निपातौ । त्वत् त्वत्तः सकाशात् ^{v}अप कथंचिदनपगतः सन् ^{v}चेतयातै । आशंसा (? का) यां पञ्चमो लकारः । चिती संज्ञाने । चेतयतु ॥

इतरावनुसमस्यति ‘ अग्नेः प्रियम् ’ इति । इदं यजुराग्नेयम् । अग्नेः संबन्धि प्रियमभिप्रेतम् । ^{v}पाथः इत्यन्ननाम । अन्नम् ^{v}अपि ^{v}इतम् अपगतम् ॥ ५ ॥

संस्रवभागाः स्थेषा बृहन्तः प्रस्तरेष्ठाः परिधयश्च देवाः ।
इमाँ वाचमभि विश्वे गृणन्त आसद्यास्मिन् बर्हिषि मादयध्वꣳ स्वाहा वाट् ।
घृताची स्थो धुर्यौ पातꣳ सुम्ने स्थः सुम्ने मा धत्तम् ॥ ६ ॥ (४) ॥

संस्रवभागा इति संस्रवऽभागाः । स्थ ।
इषा । बृहन्तः । प्रस्तरेष्ठाः । प्रस्तरेस्था इति प्रस्तरेऽस्थाः । परिधयः इति परिऽधयः । च । देवाः ।
इमाम् । वाचम् । अभि । विश्वे । गृणन्तः ।
आसद्येत्याऽसद्य । अस्मिन् । बर्हिषि । मादयध्वम् । स्वाहा । वाट् ।
घृताची इति घृताची । स्थः । धुर्यौ । पातम् ।
सुम्ने इति सुम्ने । स्थः । सुम्ने । मा । धत्तम् ॥ ग्न्योः ॥ ६ ॥

सा— कात्यायनः — “ संस्रवभागा इति संस्रवान् जुहोति ” (काश्रौ ३·६·१८) इति । पाठस्तु— ‘ संस्रवभागाः स्थेषा बृहन्तः प्रस्तरेष्ठाः परिधयश्च देवाः । इमां वाचमभि विश्वे गृणन्तः आसद्यास्मिन् बर्हिषि मादयध्वꣳ स्वाहा वाट् ’ इति । हे ^{v}विश्वेदेवाः एतन्नामकाः सर्वे देवाः, यूयं ^{v}संस्रवभागाः स्थ । विलीनमाज्यं

---

4. H1 हू संरक्षणे for गुहू संवरणे
5. B1 ते एनं for तमेतं; B1 अजोषं for जोषं
6. B1 इन्धननेन निपातो; H1 न धिक् नेत् निपातो for न धिक् नेत् निपातौ, H1 अपराधं for अप कथं (L. 6).
7. B1 सन्नं चेतयानैः; H1 सन् चेतयाते for सन् चेतयातै
20. P1 with marking above संस्रव° ins. in the margin जुहूपभृतावादाय.
21. M1 संस्राव° for संस्रव°
22. M1 संस्राव° for संस्रव°

सम्यक् स्रवतीति व्युत्पत्त्या सꣳस्रव इत्युच्यते। स एव भागो येषां विश्वेषां देवानां ते सꣳस्रवभागाः, तथाविधा भवत। ᵛइषा इष्यमाणेन सꣳस्रवलक्षणेनान्नेन ᵛबृहन्तः महान्तः ᵛस्थ। किं च ᵛप्रस्तरेष्ठाः प्रस्तरस्थायिनो ये देवाः, ᵛपरिधयः ᵛच परिधिमापन्नाश्च ये ᵛदेवाः सन्ति ते विश्वे सर्वे देवाः ᵛइमां मदीयां ᵛवाचम् ᵛअभिगृणन्तः सर्वत्र वर्णयन्तः, अयं यजमानः सम्यग्यजतीत्येवं सर्वेषां देवानामग्रे कथयन्तो यूयम् ᵛआसद्य अत्रोपविश्य ᵛअस्मिन् ᵛबर्हिषि एतस्मिन् मदीये यज्ञे ᵛमादयध्वं हृष्टा भवत। ᵛस्वाहा इति ᵛवाट् इति एतौ शब्दौ हविर्दानार्थौ। सर्वथा दत्तमित्येवमादरं दर्शयितुं शब्दद्वयप्रयोगः। ननु बृहदारण्यके 'स्वाहा वषट्' इति शब्दद्वये दैविकहविर्दानमाम्नातम्। "देवा उपजीवन्ति स्वाहाकारं च वषट्कारं च" (शब्रा १४.५.८.१) इति श्रुतेः। न तु वाडित्ययं शब्दो दानार्थः श्रुतः। नैष दोषः। वषडित्यस्यैव प्रत्यक्षत्वपरिहाराय वौषडिति वाडिति च शब्दान्तरेण प्रयुज्यमानत्वात्। तदेव तित्तिरिणा विस्पष्टमुक्तम्- "यद्वषट्कुर्याद्यातयामाऽस्य वषट्कारः स्याद्यन्न वषट्कुर्याद् रक्षाꣳसि यज्ञꣳ हन्युर्वडित्याह परोक्षमेव वषट् करोति नास्य यातयामा वषट्कारो भवति न यज्ञं रक्षाꣳसि घ्नन्ति" (तैसं ५.१.५) इति। ननु विश्वेषां देवानां नास्ति सꣳस्रवभागत्वम्। किं तु वस्वादीनामेव। तथा च तित्तिरिणोक्तम्- "वसवो वै रुद्रा आदित्याः सꣳस्रवभागाः" (तैब्रा ३ ३.९) इति। नायं दोषः। विश्वशब्देन वस्वादीनामपि विवक्षितत्वात्। वस्वादीन् प्रकृत्य विश्वशब्दवाच्यत्वमपि तित्तिरिणैवोक्तम्- "एते हि विश्वे देवाः" (तैब्रा ३.३.९) इति॥

कात्यायनः - "घृताची इति धुरि निदधाति" (काश्रौ ३.६.१९) इति। शकटस्य या धूस्तस्यां जुहूपभृतौ निदध्यात्। पाठस्तु- 'घृताची स्थो धुर्यौ पातꣳ सुम्ने स्थः सुम्ने मा धत्तम्' इति। हे जुहूपभृतौ, युवां ᵛघृताची घृतमञ्चतः प्राप्नुत इति घृताच्यौ ᵛस्थः भवथः। तथाविधे युवां ᵛधुर्यौ अनड्वाहौ। धुरमर्हत इति तद्व्युत्पत्तेः। ᵛपातं रक्षतम्। किं च युवां ᵛसुम्ने ᵛस्थः सुखरूपे भवथः। सुम्नमिति सुखनाम। तस्मात् ᵛसुम्ने सुखे ᵛमा मां ᵛधत्तम् आस्थापयतम्॥ ६॥ (४)॥

इति द्वितीयेऽध्याये चतुर्थोऽनुवाकः॥ ४॥

---

3. P1 om. first ये; V1 C M1 S1 om. second ये
7. V1 S1 C M1 °द्वयं for °द्वये
8. C V1 नैव for नैषः
9. C M1 S1 V1 om. वौषडिति; C M1 S1 V1 इत्येवं for इति च
10. P1 with marking above यद् ins. in the margin:- तद्यथा वषट्कृतꣳ स्वाहाकृतꣳ हुतमेवं भवतीति कण्वेनाप्युक्तम्; P1 °कार$^{\text{स्य}}$ for °कारः स्यात्
11. S1 C अन्यस्य for अस्य
12. C M1 om. च
16. P1 after निदधाति ins. अनसि चेद्ग्रहणं स्फ्ये पात्र्यां चेदिति
17. P1 with marking above घृताची ins. in the margin - जुहूपभृद्दैवतं यजुः
18. P1 om. युवां
19. V1 S1 C M1 om. सुम्नम् ... नाम
20. P1 सुम्ने for सुम्नम्; V1 S1 C M1 आधत्तम् for धत्तम्
21. C M1 S1 तुरीयो° for चतुर्थो°

आ– जुहूपभृद्भ्यां संस्रवान् जुहोति ‘ संस्रवभागाः ’ इति । सोमशुष्मो वैश्वदेवी त्रिष्टुप् । यज्ञे संस्रवः भागो येषां ते संस्रवभागा विश्वेदेवाः । यद्यपि यूयं vसंस्रवभागाः स्थ तथाऽपि vइषा अन्नेन संस्रवलक्षणेनान्नेन vबृहन्तः महान्तो जाताः । किं च vप्रस्तरेष्ठाः प्रस्तरस्थायिनो ये vपरिधयः vच परिधिभवाः vदेवाः तानुपसंवदे प्रत्यक्षीकृत्य ब्रवीमि । vइमां मदीयां vवाचम् vअभिगृणन्तः वर्णयन्तो विश्वे सर्वे vआसद्य स्थित्वा vअस्मिन् vबर्हिषि यज्ञे vमादयध्वम् । ‘ स्वाहा वाट् ’ इति यजुः । यज्ञो देवता । vवाट् वषट्कारः परोक्षः ॥

‘ घृताची ’ इति धुरि स्रुचौ निदधाति । घृताची इति स्रुचौ देवते । घृतमञ्चति ययोः स्रुचोस्ते घृताच्यावि [ति] । परिणामे घृताची इति च । ते vस्थः भवतम् । ते ब्रवीमि– ‘ धुर्यौ पातम् ’ इति । अनड्वाहौ पातम् । किं च सुम्न । सुम्न [म्] इति सुखनाम । यस्मात् सुखरूपे vस्थः भवथस्तस्मात् vसुम्ने सुखे vमा मां vधत्तं स्थापयतम् ॥ ६ ॥ (४) ॥

[इति द्वितीयेऽध्याये चतुर्थोऽनुवाकः ॥]

[अथ पञ्चमोऽनुवाकः]

चतुर्थे स्रुग्व्यूहनादिमन्त्रा उक्ताः । पञ्चमे स्रुक्स्रुवप्रग्रहादिमन्त्रा उच्यन्ते –

अग्ने॑ऽदब्धायोऽशीतम पा॒हि मा॑ दि॒द्योः
पा॒हि प्रसि॑त्यै पा॒हि दुरि॑ष्ट्यै पा॒हि दु॑रद्म॒न्यै ।
अ॒वि॒षं॑ नः॑ पि॒तुं॑ कृ॑णु सुषदा॒ योनौ॒ स्वाहा॒ वाट् ॥ १ ॥

अग्ने॑ । अ॒द॒ब्धा॒यो॒ इत्य॑दब्धऽआयो । अ॒शी॒त॒म॒ । पा॒हि । मा॒ । दि॒द्योः ।
पा॒हि । प्रसि॑त्या॒ इ॒ति॒ प्रऽसि॑त्यै । दुरि॑ष्ट्या॒ इ॒ति॒ दुःऽइ॑ष्ट्यै । [पाहि ।]
दु॒र॒द्म॒न्या इति॑ दुः॒ऽअ॒द्म॒न्यै ।
अ॒वि॒षम् । न॒ः । पि॒तुम् । कृ॒णु॒ ।
सु॒षदा॑ । सु॒सदेति॑ सु॒ऽसदा॑ । योनौ॑ । स्वाहा॑ । वाट् । श्रौं ॥ १ ॥

---

2. B1 before तथाऽपि adds ते तव
3. H1 °स्थाने for °स्थायिनो and om. ये
4. H1 भवताद्देवास्थानुपसिंचत् for °भवा ... संवदे, B1 इत्थं मां for इमां
7. B1 स्रुवौ for स्रुचौ in both places
8. B1 स्रुवो° for स्रुचो°; H1 सति for °विति; H1 om. स्थः
13. C S1 M1 तुरीये for चतुर्थे

कात्यायनः – “स्रुक्स्रुवं प्रगृह्णात्यग्नेऽदब्धायविति” (काश्रौ ३·७·१७) इति । पाठस्तु– ‘अग्नेऽदब्धायोऽशीतम पाहि मा दिद्योः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्यै । अविषं नः पितुं कृणु सुषदा योनौ स्वाहा वाट्’ इति । दम्नोतिर्हिंसाकर्मा । आयुरिति मनुष्यनाम । अदब्धमायुरहिंसितो मनुष्यो यजमानरूपो यस्याग्नेः सोऽयम् अदब्धायुः । अश भोजने । ᵛअशीतम भोक्तृतम । यद्वा– अशूङ् व्याप्तौ । व्यापकतम । उक्तविशेषणद्वययुक्त हे ᵛअग्ने । दिद्युः इति वज्रनाम । तस्माच्छत्रुप्रयुक्ताद्वज्रसमादायुधात् मां ᵛपाहि । ᵛप्रसित्यै, बन्धनहेतुजालविशेषः प्रसितिः, तस्याः शत्रुप्रयुक्तायाः मां ᵛपाहि, दुरिष्टिः अशास्त्रीयो यागस्ततो मां ᵛपाहि । दुरद्मनी दुर्भोजनं तस्मान्मां ᵛपाहि । पितुरित्यन्ननाम । ᵛनः अस्मदीयमन्नम् ᵛअविषं विषरहितं कुरु । योनिः इति गृहनाम । ᵛसुषदा सुष्ठु सदने सम्यगवस्थानयोग्ये ᵛयोनौ गृहे, मां स्थापय इति शेषः । ‘स्वाहा वाट्’ इत्येतदुभयं पूर्ववद्व्याख्येयम् ॥ १ ॥

* * *

आ– स्रुक्स्रुवं प्रतिगृह्णाति– ‘अग्नेऽदब्धायो’ इति । विराट्स्थाना त्रिष्टुप् यजुराग्नेयं गार्हपत्यम् । हे भगवन् ᵛअग्ने ᵛअदब्धायो । दम्नातिर्हिंसाकर्मा । आयुरिति मनुष्यनाम । अदब्धः अनवखण्डितः आयुर्मनुष्ययजमानो यस्य सः तथोक्तः, तत्संबोधनम् ᵛअदब्धायो । यद्वा – अग्निरेवानवखाण्डितायुः, तत्संबोधनम् ᵛअशीतम । अश भोजने, अशू व्याप्तौ, द्वाभ्यामप्येवं रूपं भवति । आशितृतम अतिशयेन भोक्तः । व्यापक । ᵛदिद्योः, दो अवखण्डन इत्यस्य रूपम् । दिद्युरिति च वज्रनाम । तस्मात् ᵛमा मां ᵛपाहि । ᵛप्रसित्यै प्रसित्या जालविशेषात् मां ᵛपाहि । ᵛदुरिष्ट्यै दुर्यागात् ᵛपाहि । ᵛदुरद्मन्यै, अद्मेत्यन्ननाम, दुर्भोजनात् ᵛपाहि । ᵛअविषं विषरहितम् । ᵛपितुम् अन्नं ᵛनः अस्माकं ᵛकृणु । सुषदा साधुसदने । योनिरिति गृहनाम । साधुसदने गृहे स्थितानां ᵛनः अस्माकम् एतद् भवतु । अन्यद्व्याख्यातम् ॥ १ ॥

* * *

अ॒ग्नये॑ सꣳवे॒शप॑तये॒ स्वाहा॒ सर॑स्वत्यै यशोभ॒गिन्यै॒ स्वाहा॑ ।
उ॒लूख॑ले॒ मुस॑ले॒ यच्च॒ शूर्पे॑ आशि॒श्लेष॑ दृ॒षदि॒ यत् क॒पाले॑ ॥ २ ॥
उ॒त्प्रुषौ॑ वि॒प्रुषः॒ सं जु॑होमि स॒त्याः स॑न्तु यज॑मानस्य॒ कामाः॒ स्वाहा॑ ।

---

2. P1 with marking above अग्ने ins. in the margin :– गार्हपत्यमाग्नेयं यजुः ।
4. V1 S1 C M1 after भोजने ins. इति धातुः; P1 with marking above अशीतम ins. in the margin :– प्रकृतिदीर्घोऽयं काण्वानामिति प्रातिशाख्ये
5. V1 S1 C M1 after व्याप्तौ ins. इति धातुः
6. V1 C M1 S1 °ज्वाला° for °जाल°
7. S1 अशास्त्रियो for अशास्त्रीयो
8. S1 V1 C M1 om. अन्नम्
9. P1 with marking above गृहे ins. in the margin आत्मनि सुषदा योनाविति तदात्मन्याहेति कण्वश्रुतेरात्मन्यन्नहोम उच्यते
10. B1 अन्ता गार्हपत्या– we have corrected this as आग्नेयं गार्हपत्यम् [L 11]
16. B1 H दुर्योगात् for दुर्यागात्; B1 om. दुर्भोजनात् पाहि ।

आप्यायतां ध्रुवा हविषा घृतेन यज्ञंयज्ञं प्रति देवयद्भ्यः ।
सूर्याया ऊधो अदित्या उपस्थे उरुधारा पृथिवी यज्ञे अस्मिन् ॥ ३ ॥

अग्नये । संवेशपतय इति संवेशऽपतये । स्वाहा ।
सरस्वत्यै । यशोभगिन्या इति यशःऽभगिन्यै । स्वाहा ।
उलूखले । मुसले । यत् । च । शूर्पे । आशिश्लेषेत्याऽशिश्लेष । दृषदि । यत् । कपाले ॥ टूं ॥२॥
उत्प्रुष इत्युत्ऽप्रुषः । विप्रुष इति विऽप्रुषः । सम् । जुहोमि ।
सत्याः । सन्तु । यजमानस्य । कामाः । स्वाहा ।
आ । प्यायताम् । ध्रुवा । हविषा । घृतेन ।
यज्ञंयज्ञमिति यज्ञंऽयज्ञम् । प्रति । देवयद्भ्य इति देवयत्ऽभ्यः ।
सूर्यायाः । ऊधः । अदित्याः । उपस्थ इत्युपऽस्थे ।
उरुधारेत्युरुऽधारा । पृथिवी । यज्ञे । अस्मिन् ॥ प्यूः ॥ ३ ॥

सा– "दक्षिणाग्नौ जुहोत्यग्नय इति सरस्वत्या इति च" (काश्रौ ३.७.१८) इति । प्रथममन्त्रपाठस्तु– 'अग्नये संवेशपतये स्वाहा' इति । स्त्रीपुंसयोरभिलाषपूर्वकमेकत्र शयनं संवेशः, तस्य पतिः योऽग्निस्तस्मै ᵛस्वाहा हविर्दत्तम् ॥

द्वितीयमन्त्रपाठस्तु– 'सरस्वत्यै यशोभगिन्यै स्वाहा' इति । जीवतः पुरुषस्य प्रशंसा यशस्तस्य यशसो भगिनी वाग्रूपा सरस्वती तथाविधायै हविर्दत्तम् ॥

कात्यायनः – "उलूखले......इति पिष्टलेपान् जुहोति" (काश्रौ ३.७.१९) इति । पाठस्तु– 'उलूखले मुसले यच्च शूर्प आशिश्लेष दृषदि यत् कपाले । उत्प्रुषो विप्रुषः संजुहोमि सत्याः सन्तु यजमानस्य कामाः स्वाहा' इति । उलूखलादिषु पञ्चसु तत्तद्व्यापारकाले यद्यदीषद्धविः ᵛआशिश्लेष सर्वतः श्लिष्टमभूत् । किं च ᵛउत्प्रुषः शूर्पपाताः, ᵛविप्रुषः हविर्द्रव्यस्य बिन्दवो ये सन्ति तत्सर्वं स्रुच्यादाय ᵛसंजुहोमि, यथा नावशिष्यते तथा सम्यग् जुहोमि । तेन होमेन ᵛयजमानस्य ᵛकामाः ᵛसत्याः ᵛसन्तु यत् कामितं तत् सर्वं लभताम् ॥

कात्यायनः – "अवदायावदाय ध्रुवामभिघारयत्याप्यायताम्" (काश्रौ ३.३.१२) इति । ध्रुवायामवस्थितं घृतं यदा यदा होतुमवद्यति तदा तदा तां ध्रुवामभिघारयति पुनर्घृतेन पूरयेत् । पाठस्तु– 'आप्यायतां ध्रुवा हविषा घृतेन यज्ञंयज्ञं प्रति देवयद्भ्यः । सूर्याया ऊधो अदित्या उपस्थ

---

13. P1 with marking above अग्नये ins. in the margin आग्नेयं यजुः; P1 तत्° for तस्य
18. P1 with marking above उलूखले ins. in the margin – उलूखलादिदेवत्या त्रिष्टुप् प्रगाथास्पार्षा (?)
20. C M1 S1 V1 om. स्रुच्यादाय
21. C M1 om. सं°
25. P1 with marking above आप्या° ins. in the margin :– ध्रुवादेवत्या गायत्री प्रगाथार्षा

उरुधारा पृथिवी यज्ञे अस्मिन्' इति । ᵛदेवयद्भ्यः देवान् अग्न्यादीन् यन्ति प्राप्नुवन्ति यष्टुमित्येवं विग्रहे सति देवयन्तो यजमानास्तेभ्यस्तदुपकारार्थं ᵛयज्ञंयज्ञं ᵛप्रति यदा यदा यजनमुपस्थितं तदा तदा ᵛहविषा ᵛघृतेन हविष्कृत्तिसिद्ध्यर्थं संस्कारयुक्तेनाज्येन ᵛध्रुवा स्थापिता स्रुक् ᵛआप्यायतां सर्वतः पूर्यताम् । ᵛअदित्याः ᵛउपस्थे पृथिव्या उत्सङ्गे या सूर्या धेनुरस्ति । सुष्ठु ईरणं तृणभक्षणार्थं गमनं पुनरपि दोहनार्थं गृहगमनं यस्या धेनोरस्ति सा धेनुः सूर्या । तस्याः ऊधः ᵛस्तनानां मूलभागः क्षीरपूर्णः, आप्यायताम् इत्यनुवर्तते, वर्धतामित्यर्थः । ᵛअस्मिन् ᵛयज्ञे अस्माभिरनुष्ठीयमाने ᵛपृथिवी या देवयजनरूपा विद्यते सेयं ᵛउरुधारा बहुविधाज्यधारोपेता भवत्विति शेषः । तथा सति न कदाचिदियं ध्रुवा रिक्ता भवति । तदेतद्ध्रुवाया आप्यायनमन्वयव्यतिरेकाभ्यां तित्तिरिर्दर्शयति– "ध्रुवां वै रिच्यमानां यज्ञोऽनु रिच्यते यज्ञं यजमानो यजमानं प्रजा ध्रुवामाप्यायमानां यज्ञोऽन्वा प्यायते यज्ञं यजमानो यजमानं प्रजा आ प्यायतां ध्रुवा घृतेनेत्याह ध्रुवामेवाऽऽप्याययति तामाप्यायमानां यज्ञोऽन्वा प्यायते यज्ञं यजमानो यजमानं प्रजाः" (तैसं १·७·५) इति ॥ २-३ ॥

आ– दक्षिणाग्नौ जुहोति– 'अग्नये संवेशपतये' इति । अग्निर्देवता त्रिष्टुप् । ᵛसंवेशपतये, स्त्रीपुंसयोरभिलाषपूर्वकमेकत्रशयनं संवेशः, तस्य पतिः संवेशपतिः, तस्मै । ᵛसरस्वत्यै ᵛयशोभगिन्यै । जीवतः प्रशंसा यशः, तस्य भगिनी स्वसा, तस्यै यशोभगिन्यै ᵛस्वाहा । 'उलूखले मुसले' इति । [ᵛउलूखले] व्रीह्यादीनामवहननसमये ᵛयत् यावन्मात्रं ᵛआशिश्लेष संश्लिष्टं स्थितं भवति । ᵛमुसले ᵛच यत् आशिश्लेष, ᵛशूर्पे च यत् आशिश्लेष । वे (पे ?) षणे (ण° ?) समये ᵛयत् ᵛदृषदि आशिश्लेष, पुरोडाशश्रपणादिसमये ᵛकपाले यत् आशिश्लेष ॥ २ ॥

'उत्प्रुषः' इति नानादेवत्यस्त्रैष्टुभप्रगाथः । त्रिष्टुब्गायत्र्यौ मिलिते इति । ᵛउत्प्रुषः ऊर्ध्वं याताः ᵛविप्रुषः हविर्द्रव्यबिन्दवः । एवं परिशिष्टानि तानि एकीकृत्य ᵛसत्याः सन्तु । ᵛयजमानस्य ᵛकामाः । स्वाहेत्यनुसंधायाग्नीध्रः 'जुहोमि' इति तज्जुहोति । ᵛघृतेन ᵛहविषा ᵛध्रुवा ध्रुवाख्या स्रुक् । ᵛआप्यायताम् आप्यायनं प्राप्नुयात् । ᵛयज्ञंयज्ञं ᵛप्रति सर्वयज्ञेषु । 'देवयद्भ्यः'

---

1. P1 घृतादीन् for अग्न्यादीन् ।
2. P1 om. one यदा; V1 S1 C M1 यजमानम् for यजनम्; P1 om. one तदा
3. V1 S1 C M1 हविष्ट्व° for हविष्कृत्; C S1 V1 M1 after ध्रुवा add स्थितेन
5. C V1 S1 °पूर्णं पयः for °पूर्णः
6. V1 S1 C M1 before वर्धताम् add सर्वतो
7. V1 S1 C M1 om. °आज्य°
9. C oms. ध्रुवा ... प्रजाः (L 11)
14. H1 यच्च for यशः and om. भगिनी ... यशो°; B1 मुशले for मुसले;
15. B1 ययवत् for यत् यावन्°
16. B1 om. पेषणसमये ... आशिश्लेष (L 17)
20. H1 आग्नीध्रे for आग्नीध्रो

इति । दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिकान्तिगतिषु । स्वयं दीव्यन्तो देवाः । परेषामपि देवनादिगुणानापादयन्तो देवयन्तः । तेभ्यः ᵛदेवयद्भ्यः सकाशात् ᵛअदित्याः पृथिव्याः ᵛउपस्थे उत्सङ्गे ᵛसूर्यायाः गोः ᵛऊधः । वत्सेन स्नुतप्रस्रवत्क्षीरस्य प्रथमनिवासावयवस्थानमूधः । आप्यायताम् ᵛअस्मिन् ᵛयज्ञे ᵛउरुधारा । उरु बहुप्रकारेण सर्वासां प्रजानामपेक्षितफलं ताभ्यो राति ददातीत्युरुधारा ᵛपृथिवी अस्मिन् यज्ञे आप्यायताम् ॥ ३ ॥

देवा गातुविदो गातुमित्वा गातुमित ।
मनसस्पत इमं देव यज्ञꣳ स्वाहा वाते धाः ॥ ४ ॥

देवाः । गातुविद इति गातुऽविदः । गातुम् । इत्वा । गातुम् । इत ।
मनसः । पते । इमम् । देव । यज्ञम् । स्वाहा । वाते । धाः ॥ द्युं ॥४॥

सा– कात्यायनः – “समिष्टयजुर्जुहोति देवा गातुविद इति” (काश्रौ ३·८·४) इति । पाठस्तु– ‘देवा गातुविदो गातुमित्वा गातुमित । मनसस्पत इमं देव यज्ञꣳ स्वाहा वाते धाः’ इति । कै गै शब्द इति धातुः । गीयते नानाविधैर्वैदिकशब्दैः प्रतिपाद्यत इति गातुर्यज्ञः । तं विन्दन्ति जानन्तीति ᵛगातुविदः । तादृशा हे ᵛदेवाः, ᵛगातुम् ᵛइत्वा अस्मदीयो यज्ञः प्रवृत्त इति विदित्वा । एतिधातोर्गत्यर्थस्य ज्ञानार्थत्वमुपचर्यते । ᵛगातुम् ᵛइत तं यज्ञं गच्छत । यद्वा गातुर्गन्तव्यो मार्गः । अस्मदीयेन यज्ञेन तुष्टाः सन्तः स्वकीयं मार्गं गच्छत । हे ᵛमनसः ᵛपते, देवान् यष्टुमस्मदीयस्य मनसः प्रेरक पालक परमेश्वर, ᵛइमम् अनुष्ठितं ᵛयज्ञं ᵛस्वाहा त्वद्धस्ते ददामि । त्वं तं च यज्ञं ᵛवाते ᵛधाः वायुरूपे देवे स्थापय । यज्ञोपक्रमे ‘वाताद्यज्ञः प्रयुज्यताम्’ (तैब्रा ३.७.४) इति मन्त्रेण वातस्य यज्ञप्रवर्तकत्वमुक्तम् । अतः समाप्तावपि वाते यज्ञस्थापनमुचितम् । तदेतत् तित्तिरिर्दर्शयति– “ब्रह्मवादिनो वदन्ति । स त्वा अध्वर्युः स्यात् । यो यतो यज्ञं प्रयुङ्क्ते । तदेनं प्रतिष्ठापयतीति । वाताद्वा अध्वर्युर्यज्ञं प्रयुङ्क्ते । देवा गातुविदो गातुं वित्त्वा गातुमितेत्याह । यत एव यज्ञं प्रयुङ्क्ते । तदेनं प्रतिष्ठापयति” (तैब्रा ३·३·९) इति ॥ ४ ॥

---

1. B1 देवयन्तो for स्वयं दीव्यन्तो
4. H1 अस्मद् for आस्मिन्
11. P1 with marking above देवा ins. in the margin – वातदेवत्या मनसस्पत्यार्षा विराडनुष्टुप्
12. P1 after गै adds रै
16. C M1 S1 V1 प्रेरणेन for प्रेरक; M1 S1 V1 C देव for त्वं तं च यज्ञं and trans. धाः after देवे
19. M1 S1 V1 C योऽयं पवते for यो यतो
20. C V1 S1 इत्वा for वित्वा

आ– समिष्टयजुर्जुहोति–‘ देवा गातुविदः ’ इति । मनसस्पतिर्वातदेवत्याऽनुष्टुप् । हे ᵛदेवाः ᵛगातुविदः, गातुरिति यज्ञनाम, यज्ञविदः, युष्मत्प्रसादात् यज्ञविदो भवन्तु । ᵛगातुं यज्ञं त्वा ᵛइत्वा विदित्वा ᵛगातुं यज्ञम् ᵛइत । इण् गतौ । गच्छत । एवं देवान् यथायथं विसृज्येदानीं मनसस्पतिमाह– हे ᵛमनसः ᵛपते । मनसोऽधिपतिश्चन्द्रमाः । ᵛदेव इमं ᵛयज्ञं ᵛवाते वातरूपे ᵛधाः धारय । वाते हि यज्ञोऽवतिष्ठते ।।४।।

सं ब॒र्हिर॑ङ्क्ताᳫं ह॒विषा॑ घृ॒तेन॒ समा॑दि॒त्यैर्वसु॑भि॒ः सं म॒रुद्भि॑ः ।
समिन्द्रो॑ वि॒श्वदे॑वेभिरङ्क्तां दि॒व्यं नभो॑ गच्छतु॒ यत् स्वाहा॑ ॥ ५ ॥

सम् । ब॒र्हिः । अ॒ङ्क्ता॒म् । ह॒विषा॑ । घृ॒तेन॑ ।
सम् । आ॒दि॒त्यैः । वसु॑भि॒रिति॒ वसु॑ऽभिः । सम् । म॒रुद्भि॒रिति॑ म॒रुत्ऽभि॑ः ।
सम् । इन्द्र॑ः । वि॒श्वदे॑वे॒भिरिति॑ वि॒श्वऽदे॑वेभिः । अ॒ङ्क्ता॒म् ।
दि॒व्यम् । नभ॑ः । ग॒च्छ॒तु॒ । यत् । स्वाहा॑ ॥ ट्रों ॥५॥

सा– कात्यायनः – “ बर्हिः सं बर्हिरिति ” (काश्रौ ३.८.५) इति । जुहोतीत्यनुवर्तते । पाठस्तु– ‘ सं बर्हिरङ्क्ताᳫं हविषा घृतेन समादित्यैर्वसुभिः सं मरुद्भिः । समिन्द्रो विश्वदेवेभिरङ्क्तां दिव्यं नभो गच्छतु यत् स्वाहा ’ इति । ᵛइन्द्रः देवः हविःसंस्कारयुक्तेन ᵛघृतेन ᵛबर्हिः दर्भं ᵛसमङ्क्तां सम्यग्अञ्जनोपेतं करोतु । स च इन्द्रः केवलो न भवति, किं तु ᵛआदित्यैः ᵛवसुभिः च द्विविधैर्गणदेवैः सहितः । ‘ समङ्क्ताम् ’ इत्यनुवर्तते । तथा ᵛमरुद्भिः गणदेवैः सहितः समङ्क्ताम् । तथा ᵛविश्वदेवेभिः विश्वनामकैश्च गणदेवैः सहितः समङ्क्ताम् । यदेभिर्देवैरक्तं तदित्यध्याहारः । नभ इत्यादित्यनामसु पठ्यते (द्र. निघण्टु १.४.६, निरुक्त २१४) । तदक्तं बर्हिः ᵛदिव्यं द्युलोके वर्तमानं ᵛनभः ᵛगच्छतु आदित्यं प्राप्नोतु, ᵛस्वाहा इदं हविर्देवोद्देशेन दत्तम् ॥ ५ ॥

आ– बर्हिर्जुहोति– ‘ सं बर्हिः ’ इति । बर्हिर्देवता विराड्रूपा त्रिष्टुप् । बर्हिरिति द्वितीया । ᵛआदित्यैः ᵛवसुभिः ᵛमरुद्भिः ᵛबर्हिः ᵛसमङ्क्ताम् । केन ? ᵛहविषा ᵛघृतेन । [कः ?] ᵛइन्द्रः ।

---

1. H1 त्रिष्टुप् for अनुष्टुप्
3. B1 om. इत्वा
5. H1 वा for हि
13. P1 with marking above सं ins. in the margin ऐन्द्री विराड्रूपा त्रिष्टुप् ।
16. C M1 P1 S1 V1 विश्वे for first विश्व°
17. C एतन्द्रिरेव, M1 एतन्द्रिशिव; V1 यतन्द्रिरेवं for यदेभिर्; M1 उक्तं, P1 अङ्क्तां for अक्तं
18. C M1 S1 V1 उक्तं for अक्तं
21. B1 after बर्हिः adds अङ्क्तां

ᵛविश्वदेवेभिः विश्वेदेवैश्च सह इन्द्रः बर्हिः समङ्क्ताम् । यत् अक्तं ᵛदिव्यं दिवि भवम् । नभः इत्यादित्यनाम (निरुक्त २.१४) । दिव्यं ᵛनभः आदित्यज्योतिः ᵛगच्छतु । स्वाहा । अस्य चाह नमोऽस्तु ॥५॥

कस्त्वा वि मुंञ्चति स त्वा वि मुंञ्चति कस्मैं त्वा वि मुंञ्चति
तस्मैं त्वा वि मुंञ्चति । पोषाय रक्षसां भागोऽसि ॥ ६ ॥

कः । त्वा । वि । मुञ्चति । सः । [त्वा............]
कस्मैं । [त्वा ....] । तस्मैं । [त्वा............] ।
पोषाय । रक्षसाम् । भागः । असि ॥ सां ॥६॥

सा– कात्यायनः – " वेद्यां प्रणीता निनयति परीत्य कस्त्वेति " (काश्रौ ३.८.६) इति । परीत्य होमस्थानात् प्रत्यावृत्येत्यर्थः । पाठस्तु– ' कस्त्वा विमुञ्चति स त्वा विमुञ्चति कस्मै त्वा विमुञ्चति तस्मै त्वा विमुञ्चति । पोषाय ' इति । पूर्वाध्याये ' अग्ने व्रतपते ' (कासं १.३) इत्यनुवाके ' कस्त्वा युनक्ति ' इत्ययं यज्ञयोगमन्त्रः प्रजापतिदेवत्यो यथा व्याख्यातस्तथैवायं यज्ञविमोकमन्त्रो व्याख्येयः । किमर्थोऽयं यज्ञविमोकः ? ᵛपोषाय यजमानं पोषयितुम् । एतस्य विमोकस्याभावे यजमानोऽप्रतिष्ठितः स्यात् । विमोके त्वसौ प्रतितिष्ठति । तदुभयं तित्तिरिर्दर्शयति– " यो वै यज्ञं प्रयुज्य न विमुञ्चत्यप्रतिष्ठानो वै स भवति कस्त्वा युनक्ति स त्वा वि मुञ्चत्वित्याह प्रजापतिर्वै कः प्रजापतिनैवैनं युनक्ति प्रजापतिना वि मुञ्चति प्रतिष्ठित्यै " (तैसं १.७.६) इति ॥

कात्यायनः – "पुरोडाशकपालेन कणानपास्यत्यधः कृष्णाजिनꣳ रक्षसामिति" (काश्रौ ३.८.७) इति । ' भागोऽसि ' इति मन्त्रशेषः । हे कणसमूह, त्वं ᵛरक्षसाम् अपेक्षितः ᵛभागः ᵛअसि । तेषां नीचजातित्वान्निकृष्टकणरूपो भागोऽसीति । रक्षसां भागदानम् – " देवाश्च ह वा असुराश्चोभये प्राजापत्या अस्पर्धन्त त एतस्मिन्नेव यज्ञे प्रजापतावस्पर्धन्तास्माकमयꣳ स्यात् " इति उपक्रम्य " पापिष्ठेन भागेनासुरान्निरभजन्नस्ना पशोः फलीकरणैर्हविर्यज्ञस्य " (काशब्रा २.८.३.२७) इति काण्वब्राह्मणेऽभिहितम् ॥ ६ ॥

---

10. P1 with marking above कस्त्वा ins. in the margin – प्राजापत्यं यजुः ।
15. C P1 V1 S1 प्रतिनैवैनं after प्रजापतिनैवैनं
17. P1 with marking above अधः ins. in the margin :– सव्यहस्तस्थकृष्णाजिनेनाच्छाद्योत्करे निरस्येत्
18. P1 with marking above रक्षसाम् ins. in the margin – राक्षसं यजुः ।
19. P1 जीव° for नीच°; P1 निष्कृष्ट° for निकृष्ट°; V1 S1 C M1 युक्तः for असीति; V1 S1 C M1 om. रक्षसां ... अभिहितम् (L. 22)

आ– प्रणीता निनयति– ‘ कस्त्वा विमुञ्चति ’ इति । प्राजापत्यं व्याख्यातम् । अत्र त्वयं विशेषः । तत्र यज्ञं युनक्ति, इह तु विमुञ्चति । ᵛपोषाय यजमानस्य पोषणायेति शेषः । कणानपास्यति– ‘ रक्षसां भागोऽसि ’ इति । राक्षसदेवत्यं यजुः । ᵛरक्षसां कणलक्षणः ᵛभागः ᵛअसि ॥६॥

वेषोऽस्युपवेषो द्विषतो ग्रीवा उप वेविड्ढि ।
वेशाँ अग्ने सुभग धारयेह ॥ ७ ॥
ऋद्धाः कर्मण्या अनपायिनो यथाऽसन् ।
जुहोमि त्वा सुभग सौभगाय पुरुतमं पुरुहूत श्रवस्यन् ॥ ८ ॥ (५) ॥

वेषः । असि । उपवेष इत्युपऽवेषः । द्विषतः । ग्रीवाः । उप । वेविड्ढि ।
वेशान् । अग्ने । सुभगेति सुऽभग । धारय । इह ॥ ध्रि ॥७॥
ऋद्धाः । कर्मण्याः । अनपायिन इत्यनपऽअयिनः । यथा । असन् ।
जुहोमि । त्वा । सुभगेति सुऽभग । सौभगाय ।
पुरुतमम् । पुरुतममिति पुरुऽतमम् । पुरुहूतेति पुरुऽहूत । श्रवस्यन् । टिं ॥ ८ ॥ (५) ॥

सा– कात्यायनः – “ मूलादुपवेषं करोति वेषोऽसीति ” (काश्रौ ४·२·१२) इति । यदा पलाशशाखां छित्वा ‘ यजमानस्य पशून् पाहि ’ (कासं १.१.३) इति गृह्णति, तदानीमेव तस्याः शाखाया मूलात् काष्ठभागं छित्त्वा तेन भागेनोपवेषनामकम् अङ्गारापनयनसाधनं कुर्यादित्यर्थः । पाठस्तु– ‘ वेषोऽस्युपवेषो द्विषतो ग्रीवा उप वेविड्ढि । वेशाँ अग्ने सुभग धारयेह । ऋद्धाः कर्मण्या अनपायिनो

---

2. B1 om. तत्र ... शेषः
3. H1 om. इति; H1 om. यजुः; H1 after असि ins. इति ।
14. C V1 S1 M1 व्यूहति for गृह्णति, and om. तदानीम् ... इत्यर्थः । (L 15)
16. P1 with marking above वेषो ins. in the margin उपवेषदेवत्यं यजुः; V1 C M1 S1 after वेविड्ढि ins. इति and then the commentary begins – वेष इति कर्मनाम । हे शाखामूल त्वं वेषोऽसि कर्मात्मको भवसि । तथा उपवेशोऽसि वेषस्य समीपगत उपकारी भवसि । द्विषतो द्वेषं कुर्वतो राक्षसादेर्ग्रीवा गलप्रदेशानुप वेविड्ढि समीपमागत्यातिशयेन प्रविश ॥ उत्तरं मन्त्रं लिङ्गानुसारेणापि यथास्थानं विनियोज्य तत्राद्येन मन्त्रेणाग्निं प्रार्थयते । पाठस्तु वेशां अग्ने सुभग धारयेहेति । सुभग, शोभनभाग्यसंपन्न हे अग्ने इह अस्मिन् कर्माणि वेशान् धारय हविषां प्रवेशान् पोषय ॥ द्वितीयमन्त्रेण पयोलक्षणं हविः स्तुवन् जुहोति । पाठस्तु– ऋद्धाः कर्मण्या अनपायिनो यथासन् । जुहोमि त्वा सुभग सौभगाय पुरुतमं पुरुहूत श्रवस्यन्निति रुद्धाः अग्निमावृत्य स्थिताः कर्मण्याः कर्माणि पूजार्हा देवा अनपायिनः कदाचिदप्यपगताः तथा सन् येन प्रकारेण भवन् भवतीत्यर्थः । तथा हे सुभग शोभनभाग्योपेत पुरुहूत बहुभिर्यजमानैराहूत वह्ने त्वां श्रवस्यन् स्तुवन् सौभगाय यजमानस्य सौभाग्यसिद्ध्यर्थं पुरुतमम् अतिशयेन प्रभूतं हविर्जुहोमि ॥

यथासन्’ इति। वेष इति कर्मनाम। हे पर्णशाखामूल, यतस्त्वं ᵛवेषः ᵛअसि। विष्लृ व्याप्तौ। अग्निकर्मसु व्याप्तोऽसि, अतः ᵛउपवेषः उपवेषनामकोऽसि। अग्निकर्मण्युपकारकत्वात्। अपि च ᵛद्विषतः। जातावेकवचनम्। यज्ञद्वेषिणामसुरराक्षसादीनां ᵛग्रीवाः गलप्रदेशान् ᵛउप समीपमागत्य ᵛवेविद्धि अतिशयेन छेदनार्थं प्रविश। विश प्रवेशन इति धातोर्यङ्लुगन्तस्य मध्यमैकवचनम्। तथा ᵛसुभग शोभनभाग्यसंपन्न हे ᵛअग्ने उपवेष। अगमगन्तारमङ्गारादिकमन्यत्र नयतीति वाऽग्निव्याप्तत्वाद्वा अग्नित्वमुपवेषस्य ज्ञेयम्। ᵛवेशान् अग्नौ प्रवेशान् व्यापारान् ᵛधारय पोषय। ᵛइह दर्शपूर्णमासादियज्ञे। किं च ᵛऋद्धाः ज्ञानादिगुणसमृद्धाः। अत एव ᵛकर्मण्याः यज्ञकर्मणि साधव ऋत्विजः त्वत्प्रसादेन अग्नेः सकाशात् ᵛअनपायिनः कदाचिदप्यनपगता ᵛयथा येन प्रकारेण ᵛअसन् भवेयुस्तथा त्वमस्मान् कुरु। यत्तदोर्नित्यसंबन्धात् तथेत्यध्याहार्यम्। अस भुवीत्यस्य “लेटोऽडाटौ” (पा ३.४.९४) इत्यटि “इतश्च लोपः परस्मैपदेषु” (पा ३.४.९७) इति इकारलोपे च ‘असन्’ इति रूपम्॥

कात्यायनः – “परिधिभिः सहोपवेषं जुहोति जुहोमि त्वा” (काश्रौ ४·२·४३) इति। पाठस्तु–‘जुहोमि त्वा सुभग सौभगाय पुरुतमं पुरुहूत श्रवस्यन्’ इति। हे ᵛपुरुहूत पुरुभिर्वेदमन्त्रैराहुत ᵛसुभग ऋजुत्वादिभाग्योपेतोपवेष। श्रवस्यतिः स्तोत्रकर्मा। पुरुहूतत्वादिगुणविशिष्टं भवन्तं ᵛश्रवस्यन् स्तुवन्नहं ᵛसौभगाय यजमानस्य सौभाग्याभिवृद्ध्यर्थं ᵛपुरुतमम्। दीर्घश्छान्दसः। अतिशयेन प्रभूतं त्वां ᵛजुहोमि॥ ७-८॥ (५)॥

इति द्वितीयेऽध्याये पञ्चमोऽनुवाकः॥

आ– मूलादुपवेषं करोति– ‘वेषोऽसि– इति। उपवेषदेवत्या गायत्री। ‘वेषः’ इति कर्मनाम। कर्मात्मकः ᵛअसि। ᵛउपवेषः कर्मोपकारी च। ᵛद्विषतः यज्ञविद्वेषं कुर्वतो राक्षसादेः ᵛग्रीवाः गलप्रदेशान् ᵛउप ᵛवेविद्धि। उप समीपमागत्य वेविद्धि अत्यर्थं प्रविश। विश प्रवेशने। ग्रीवां प्रविश्य निष्पीड्य च भिन्धीत्यर्थः। अग्निं प्रार्थयते– ‘वेशान्’ इति। श्रीभगवन् ᵛअग्ने, हे ᵛसुभग शोभनभाग्यसंपन्न, ᵛइह होमाधिकरणभूते त्वयि ᵛवेशान् हविषां प्रवेशान् ᵛधारय ॥७॥

पयोलक्षणं हविः स्तुवन् जुहोति– ‘ऋद्धाः कर्मण्याः’ इति। हविर्देवत्या बृहती। रुधिर् आवरणे। रुद्धाः अग्निमावृत्य स्थिताः। ᵛकर्मण्याः कर्मणि संपूजार्हाः देवाः रुद्धाः आवृताः। ᵛअनपायिनः ᵛयथा ᵛअसन् अभवन् भवन्ति, ᵛसुभग सुष्ठु भगसंपन्न, ᵛपुरुहूत बहुभिराहूत,

---

1. P1 वेषयति for वेष इति।
4. P1 om. इति ... °ध्याये [L 16]
17. H1 after करोति ins. इति उपवेश देवत्यत्वं
18. B1 यज्ञे for यज्ञ°
19. H1 आगम्य for आगत्य
20. H1 om. च: B1 हन्धी°, H1 भिन्दी° for भिन्धी°
23. आनन्दबोध reads ऋद्धाः as रुद्धाः and interprets accordingly. In some of the Mss. with Sāyaṇa’s commentary too, we find this reading and the same explanation which is evidently an interpolation. B1 om. कर्मण्याः; B1 वृद्धाः for रुद्धाः

पुरुतमं महत्तमं हविस्त्वां ᵛश्रवस्यन् स्तुवन् ᵛजुहोमि । कस्मै ? ᵛसौमगाय परमैश्वर्यसंपन्नाय देवाय देवतार्थं जुहोमि । यद्वा-- अस्य यजमानस्य सौभाग्यसिद्ध्यर्थम् इति ॥८॥(५)॥

[इति पञ्चमोऽनुवाकः]

[अथ षष्ठोऽनुवाकः]

सा– पञ्चमे स्रुक्स्रुवप्रग्रहादिमन्त्रा उक्ताः । षष्ठे याजमानमन्त्रा उच्यन्ते ।

सꣳ वर्च॑सा॒ पय॑सा॒ सं त॒नू॒भि॒रग॑न्महि॒ मन॑सा॒ सꣳ शि॒वेन॑ ।
त्वष्टा॑ सु॒दत्रो॒ वि द॑धातु॒ रायो॒ऽनु॑ मार्ष्टु त॒न्वो॒ यद्वि॑लि॑ष्टम् ॥१॥

सम् । वर्च॑सा । पय॑सा । सम् । त॒नूभिः॑ ।
अग॑न्महि । मन॑सा । सम् । शि॒वेन॑ ।
त्वष्टा॑ । सु॒दत्र॒ इति॑ सु॒ऽदत्रः॑ । वि । द॒धा॒तु॒ । राय॑ः ।
अनु॑ । मा॒र्ष्टु॒ । त॒न्व॑ः । यत् । विलि॑ष्ट॒मिति॒ विऽलि॑ष्टम् ॥ झौ ॥१॥

कात्यायनः – “ पूर्णपात्रं निनयति परीत्य संततम् । यजमानोऽञ्जलिना प्रतिगृह्णाति सं वर्चसेति । मुखं विमृष्टे ” (काश्रौ ३.८.८-१०) इति । पाठस्तु– ‘ सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन । त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ’ इति । ᵛवर्चसा ब्रह्मवर्चसेन ᵛसमगन्महि वयं संगता भवामः । तथा ᵛपयसा क्षीरादिरसेन, समगन्महीत्यनुवर्तते । ᵛतनूभिः अनुष्ठानक्षमैः शरीरावयवैः समगन्महि । ᵛशिवेन समीचीनेन कर्मश्रद्धायुक्तेन ᵛमनसा समगन्महि । किं च ᵛसुदत्रः ᵛत्वष्टा शोभनदानोपेतः त्वष्टृनामको देवः ᵛरायः धनानि ᵛविदधातु संपादयतु । ᵛतन्वः शरीरस्य अस्मदीयस्य ᵛयत् ᵛविलिष्टं विशेषेण न्यूनमङ्गं यत् अस्ति तदिति शेषः । ᵛअनुमार्ष्टु न्यूनत्वपरिहारेणानुकूलं कृत्वा शोधयतु ॥ १ ॥

आ– इत उत्तरं याजमानम् । पूर्णपात्रं प्रतिगृह्णाति– ‘ सं वर्चसा ’ इति । त्वाष्ट्री त्रिष्टुप् । ᵛवर्चसा ब्रह्मवर्चसेन ᵛसमगन्महि । ᵛपयसा, कार्यशब्देनात्र कारणमभिधेयम्, पयसा गोभिः ।

---

1. H1 om. पुरुतमं
2. B1 जुहोति for जुहोमि; B1 °अस्मद् for अस्य
15. M1 C S1 °प्रग्रहाः for °प्रग्रहादि°
16. V1 S1 C M1 कर्मणा for कर्म°
17. C M1 S1 V1 त्वष्टा for त्वष्टृ°
18. M1 om. अस्मदीयस्य; C M1 S1 V1 अतिशयेन for इति शेषः
21. H1 om. अत्र

ᵛतनूभि. भार्यापुत्रादिभिः समगन्महि। ᵛमनसा च ᵛशिवेन शान्तेन यज्ञमुपगच्छतः [पुरुषस्य] सर्वमेवैतद्ु (द ?) पैति वर्चःप्रभृति। अतोऽनेन पुनराप्यायति। किं च ᵛत्वष्टा ᵛसुदत्रः कल्याणदानः ᵛविदधातु ᵛरायः धनानि। ᵛअनुमार्ष्टि (ष्टु ?) सक्ष (शोध ?) यतु। ᵛतन्वः शरीरस्य ᵛयत् ᵛविलिष्टं विन- (श्लि ?) ष्टम् ॥१॥

यज्ञ शं च त उप च।
शिवे मे सं तिष्ठस्वारिष्टे मे सं तिष्ठस्व
स्विष्टे मे सं तिष्ठस्व ॥२॥

यज्ञ। शम्। च। ते। उप। च।
शिवे। मे। सम्। तिष्ठस्व। अरिष्टे। [मे। सम्। तिष्ठस्व।]
स्विष्ट इति सुऽइष्टे। मे। सम्। तिष्ठस्व ॥ यूं ॥२॥

सा- कात्यायनः -"यज्ञ शं च त इति वेदिमालभते" (द्र. काश्रौ ३.६.२१) इति। पाठस्तु- 'यज्ञ शं च त उप च। शिवे मे सं तिष्ठस्वारिष्टे मे सं तिष्ठस्व स्विष्टे मे सं तिष्ठस्व' इति। 'शम्' इति सुखम्। 'उप' इति उपचयोऽभिवृद्धिः। चकारावन्योन्यसमुच्चयार्थौ। अस्त्वित्यध्याहारः। हे ᵛयज्ञ, ᵛते तव ᵛशं सुखमस्तु ᵛउप ᵛच अभिवृद्धिरप्यस्तु। किं च ᵛमे मम यजमानस्य ᵛशिवे शान्तिनिमित्तं ᵛसंतिष्ठस्व, हे यज्ञ शान्तो भव। ᵛअरिष्टे ᵛमे, अरिष्टिरहिंसा, तन्निमित्तं मे मम एतत्सिद्ध्यर्थं ᵛसंतिष्ठस्व। तथा ᵛस्विष्टे अभीष्टे ᵛसंतिष्ठस्व ॥ २ ॥

आ- यजमानः वेदिमालभते - 'यज्ञ शं च' इति। उद्दालादिपञ्चार्षेयं यजुः। यज्ञो देवता। ᵛशं ᵛच सुखं ᵛते तुभ्यं सुखमस्तु। ᵛउप ᵛच, उपसर्गः, चकारस्तु समुच्चये। 'उप च' इत्यनेनोपचयः। अभिवृद्धिरस्तु। किं च ᵛशिवे मे मम शान्तिनिमित्तं ᵛसंतिष्ठस्व। ᵛअरिष्टे, रिष्टिर्हिंसार्थः, अरिष्टे यज्ञस्याविनाशनिमित्तं ᵛसंतिष्ठस्व। ᵛस्विष्टे, साधु इष्टं स्विष्टम्, तन्निमित्ते ᵛमे मम ᵛसंतिष्ठस्व समाप्तिपर्यन्तमिति ॥२॥

दिवि विष्णुर्व्यक्रंस्त जागतेन छन्दसा ततो निर्भक्तः।
योऽस्मान् द्वेष्टि यं च वयं द्विष्मः।

---

1. B1 तनुत्राभिः. This we have corrected as भार्यापुत्रादिभिः
3. H1 संमार्ष्टि for अनुमार्ष्टि
12. With marking above यज्ञ ins. in the margin- औद्दालकयज्ञदैवतं यजुः।
14. C M1 S1 V1 om. शं; C M1 S1 V1 om. उप च; C M1 S1 om. मम
15. C M1 S1 V1 om. अरिष्टिर°
21. B1 तस्मिन् for तन्°

अ॒न्तरि॑क्षे॒ विष्णु॒र्व्य॑क्रꣳस्त॒ त्रैष्टु॑भेन॒ छन्द॑सा॒ ततो॒ निर्भ॑क्तः ।
यो॒ऽस्मान् द्वे॒ष्टि यं च॑ व॒यं द्वि॒ष्मः ।
पृ॒थि॒व्यां विष्णु॒र्व्य॑क्रꣳस्त गाय॒त्रेण॒ छन्द॑सा॒ ततो॒ निर्भ॑क्तः ।
यो॒ऽस्मान् द्वे॒ष्टि यं च॑ व॒यं द्वि॒ष्मः ॥ ३ ॥

दि॒वि । विष्णु॑ः । वि । अ॒क्र॒ꣳस्त॒ । जाग॑तेन । छन्द॑सा ।
तत॑ः । निर्भ॑क्त॒ इ॒ति॒ निःऽभ॑क्तः ।
यः । अ॒स्मान् । द्वेष्टि॑ । यं । च॒ । व॒यम् । द्वि॒ष्मः ।
अ॒न्तरि॑क्षे । त्रैष्टु॑भेन । त्रैस्तु॑भे॒नेति॒ त्रैस्तु॑भेन ।
पृ॒थि॒व्याम् । गा॒य॒त्रेण॑ ॥ च्व्यौं ॥३॥

सा– कात्यायनः – "विष्णुक्रमान् क्रमते दिवि विष्णुरिति प्रतिमन्त्रम्" (काश्रौ ३.८.११) इति । विष्णुपादत्वबुद्ध्या स्वकीयपादस्य भूमौ प्रक्षेपा विष्णुक्रमाः । प्रथममन्त्रपाठस्तु– 'दिवि विष्णुर्व्यक्रꣳस्त जागतेन छन्दसा ततो निर्भक्तः । योऽस्मान् द्वेष्टि यं च वयं द्विष्मः' इति । विष्णुशब्दाभिधेयो यज्ञपुरुषः ˇजागतेन जगतीच्छन्दोरूपेण स्वकीयपादेन ˇदिवि द्युलोके ˇव्यक्रꣳस्त विशेषेण क्रमणं कृतवान् । तथा सति ˇततः द्युलोकान्निर्भक्तं भागरहितं कृत्वा शत्रुर्निःसारितः । कोऽसौ शत्रुः ? ˇयः ˇअस्मान् द्वेष्टि यश्चास्माभिर्द्विष्यते, द्विविधोऽप्यसौ शत्रुः ।

द्वितीयतृतीयमन्त्रयोः पाठस्तु– 'अन्तरिक्षे विष्णुर्व्यक्रꣳस्त त्रैष्टुभेन छन्दसा ततो निर्भक्तः । योऽस्मान् द्वेष्टि यं च वयं द्विष्मः । पृथिव्यां विष्णुर्व्यक्रꣳस्त गायत्रेण छन्दसा ततो निर्भक्तः । योस्मान् द्वेष्टि यं च वयं द्विष्मः' इति । एतौ द्वौ मन्त्रौ प्रथममन्त्रवद्व्याख्येयौ ।

अत्र "क्षपसरणतो ह वा अग्रे देवा यजन्तो जिग्युर्दिवमेवाग्रेऽथान्तरिक्षम्" (काशब्रा २.८.४.७) इति व्युत्क्रमेण देवजयोक्तेः मनुष्यजयोऽपि तादृश एवोच्यते । यद्वा– "यज्ञो वै विष्णुः स इमां देवेभ्यो विक्रान्तिं विचक्रमे इमामेव प्रथमेन पदेन पस्पाराथेदमन्तरिक्षं दिवं तृतीयेन" (काशब्रा २.१.२.१२) इति उक्तत्वात् पृथिव्यादिक्रमो वा ज्ञेयः कण्वब्राह्मणात् । अत एव "विष्णुक्रमान् क्रमते दिवि विष्णुरिति प्रतिमन्त्रम् । पृथिव्यामितीत ऊर्ध्वौ वा" (काश्रौ ३.८.११-१२) इति कात्यायन ऊचे ॥३॥

आ– विष्णुक्रमान् क्रमते– 'दिवि विष्णुः' इति । 'दिवि विष्णुः' इत्यादीनि त्रीणि यजूंषि वैष्णवानि । ˇदिवि द्युलोके ˇविष्णुः यज्ञो मदीयः ˇव्यक्रꣳस्त । क्रमु पादविक्षेपे ।

---

10. V1 S1 M1 C अनुक्रमते for क्रमते
11. P1 with marking above दिवि ins. in the margin – त्रीणि वैष्णवानि यजूंषि ।
12. C M1 V1 °अभिधः for °अभिधेयः [L. 14]
16. C S1 °तृतीययोः मन्त्र° for °तृतीयमन्त्रयोः
17. C S1 after द्विष्मः add इति
19. C S1 M1 V1 om. अत्र ... ऊचे (L. 23)

विक्रान्तवान् । केन ? ^{V}जागतेन ^{V}छन्दसा । ततः द्युलोकात् – ^{V}निर्भक्तः निर्भक्त (गत ?)-भागः कृतः ^{V}यः ^{V}अस्मान् ^{V}द्वेष्टि हिनस्ति ^{V}यं ^{V}च ^{V}वयं द्विष्मः हिंस्मः ॥ अनेनोत्तरावपि विष्णुक्रममन्त्रौ व्याख्यातौ ॥३॥

अस्मादन्नादस्यै प्रतिष्ठाया अगन्म स्वः ।
सं ज्योतिषाऽभूम ॥ ४ ॥

अस्मात् । अन्नात् । अस्यै । *प्रतिष्ठायै । प्रतिस्थाया इति प्रतिऽस्थायै ।
अगन्म । स्वरिति स्वः ।
सम् । ज्योतिषा । अभूम ॥ ध्रौं ॥४॥

सा– कात्यायनः – " अस्मादन्नादिति भागमवेक्षते " (काश्रौ ३·८·१३) इति । यो यजमानस्य हविर्भागस्तमवेक्षते । ^{V}अस्मात् पुरतो वर्णितात् ^{V}अन्नात् यजमानसंबन्धिहविर्भागात् । 'निर्भक्तः' इत्यादिको वाक्यशेषोऽनुवर्तनीयः ।

कात्यायनः – " अस्यै प्रतिष्ठाया इति भूमिम् " (काश्रौ ३·८·१४) इति । इत आरभ्य पञ्चसु मन्त्रविनियोगेषु 'अवेक्षते' इति पदमनुवर्तते । ^{V}अस्यै पुरतो दृश्यमानायै ^{V}प्रतिष्ठायै प्रतिष्ठाहेतोर्यज्ञभूमेः । 'निर्भक्तः' इत्यादिकं पूर्ववदनुवर्तनीयम् ।

कात्यायनः – " अगन्म स्वरिति प्राक् " (काश्रौ ३·८·१५) इति । पूर्वस्यां दिश्यवस्थितः स्वर्गलोकः स्वरित्यभिधीयते । तं लोकम् ^{V}अगन्म यज्ञानुष्ठानेन वयं प्राप्तवन्तः ॥

कात्यायनः – " सं ज्योतिषेत्याहवनीयम् " (काश्रौ ३·८·१६) इति । 'अभूम' इति मन्त्रशेषः । ^{V}ज्योतिषा आहवनीयलक्षणेन ^{V}समभूम वयं संगता अभूम ॥ ४ ॥

---

6. *वैदिकसंशोधनमण्डले स्थितयोः लिखितपुस्तकयोः (xerox क्र. ५७; ६८) मध्ये–
' प्रतिष्ठायाः । प्रतिस्थायाः इति प्रतिऽस्थायाः । '
इति पाठो दृश्यते । द्रष्टव्यमत्र पं. युधिष्ठिरमीमांसकैः संपादितः माध्यन्दिनपदपाठः – पृष्ठम् २३ – तत्रत्या टिप्पणी च ।

9. P1 with marking above अस्माद् ins. in the margin भागदैवतं यजुः ।

10. C M1 S1 V1 वर्तितात् for वर्णितात्

12. P1 with marking above अस्यै ins. in the margin – भूदैवतं यजुः ।

13. M1 after पदम् ins. अनुवर्तनीयम्; P1 पुरो for पुरतो

15. P1 with marking above अगन्म ins. in the margin स्वर्दैवतं यजुः

17. P1 with marking above सं ज्योतिषा ins. in the margin आहवनीयदैवतं यजुः

19. P1 with marking above ज्योतिषा ins. in the maring सं ज्योतिषाभूमेति सं देवैरभूमेत्येवैतदाहेति कण्वोक्तैर्देवैः संगता वयामित्यर्थः

आ– भागमवेक्षते– ‘ अस्मादन्नात् ’ इति। भागो देवता। ᵛअस्मात् ᵛअन्नात् अस्मात् यज्ञभागात्, ‘ निर्भक्तः ’ इति अनुषङ्गः। भूमिमवेक्षते– ‘ अस्यै प्रतिष्ठायै ’ इति। भूमिर्देवता। अस्याः भूमेः प्रतिष्ठायाः, ‘ निर्भक्तः ’ इत्यनुषङ्गः। प्राडीक्षते– ‘ अगन्म स्वः ’ इति। [ᵛस्वर्–] दैवतम्। अनेन कर्मणा ᵛअगन्म गताः स्मः स्वर्गम्। आहवनीयमवेक्षते– ‘ सं ज्योतिषा ’ इति। आहवनीयं दैवतम्। ᵛसम् इत्येकीभावमाचष्टे। ᵛज्योतिषा आहवनीयलक्षणेन ज्योतिषा ᵛसमभूम एकीभूताः [स्मः] ॥४॥

स्व॒यं॒भूर॑सि॒ श्रेष्ठो॑ र॒श्मिर्व॑र्चो॒दा अ॑सि॒ वर्चो॑ मे देहि।
सूर्य᳚स्या॒वृत॒मन्वाव॑र्ते ॥५॥

स्व॒यं॒भूरिति॑ स्व॒यं॒ऽभूः। अ॒सि॒। श्रेष्ठः॑। र॒श्मिः।
व॒र्चो॒दा इति॑ व॒र्चः॒ऽदाः। अ॒सि॒। वर्चः॑। मे॒। दे॒हि॒।
सूर्य᳚स्य। आ॒वृत॒मित्या॒ऽवृत॑म्। अनु॑। आ। व॒र्ते॒ ॥ द्रुं ॥५॥

सा– कात्यायनः – “ स्वयंभूरिति सूर्यम् ” (काश्रौ ३·८·१७) इति। ‘ असि श्रेष्ठो रश्मिः ’ इति मन्त्रशेषः। हे सूर्य, त्वं ᵛस्वयंभूः स्वतःसिद्धः ᵛश्रेष्ठः अत्यन्तप्रशस्तः ᵛरश्मिः ᵛअसि दीप्तिरूपोऽसि ॥

कात्यायनः– “ वर्चोदा इति यं वा कामं कामयते ” (काश्रौ ३·८·१८) इति। तं काममुद्दिश्य सूर्यमवेक्षत इति शेषः। पाठस्तु– ‘ वर्चोदा असि वर्चो मे देहि ’ इति। तेजोवाचिना वर्चःशब्देनापेक्षितः कामः सर्वोऽप्युपलक्ष्यते। हे सूर्य, त्वं ᵛवर्चोदाः, यतः अपेक्षितफलप्रदः ᵛअसि, अतः ᵛमे मह्यं ᵛवर्चः ᵛदेहि अपेक्षितं प्रयच्छ।

कात्यायनः– “ सूर्यस्येत्यावर्तते प्रदक्षिणम् ” (काश्रौ ३.८.१९) इति। ‘ आवृतमन्वावर्ते ’ इति मन्त्रशेषः। ᵛसूर्यस्य संबन्धि ᵛआवृतं यदावर्तनमस्ति तदनुसृत्याहमपि ᵛआवर्ते प्रादक्षिण्येनावर्तनं करोमि ॥ ५ ॥

आ– सूर्यमवेक्षते– ‘ स्वयंभूः ’ इति ‘ सूर्यस्य ’ इति च। द्वे सौरे। एकमन्त्रपक्षे सूर्यदेवत्योष्णिक्। ᵛस्वयंभूः ᵛअसि। अकृतकस्त्वं भवसि, ᵛश्रेष्ठः प्रशस्यतमः ᵛरश्मिः आदित्यस्य रश्मयः सप्त प्रसिद्धाः। तत्र चतसृषु दिक्षु चत्वारो रश्मयः। एकोऽधस्तादेक उपरिष्टात्।

---

4. B1 ईक्षते for अवेक्षते
12. P1 with marking above स्वयंभू° ins. in the margin सूर्यदैवतं यजुः।
14. V1 C M1 S1 om. first इति and वा; V1 S1 C M1 om. तं
16. C V1 S1 M1 om. यतः
18. C V1 S1 M1 om. कात्यायनः; C V1 S1 M1 अनुवर्तते for आवर्तते
19. C V1 S1 M1 om. अहम्
21. H1 उदैक्षत for अवेक्षते; B1 सूर्यभूरसीति for स्वयं … सूर्यस्येति; H1 सौरौ for सौरे
23. B1 om. सप्त

मण्डलशरीराभिमानी हिरण्यगर्भाख्यः स पुरुषः सप्तमो रश्मिः । तदभिप्रायोऽयं श्रेष्ठो रश्मिरिति । अतस्तं त्वां ब्रवीमि– ‘ वर्चोदा असि वर्चो मे देहि ’ इति। यतश्च स्वभावतः ᵛवर्चोदाः ब्रह्मवर्चसस्य दाता, अतः ᵛवर्चः ᵛमे मह्यं ᵛदेहि । आवर्तते - ‘ सूर्यस्य ’ इति । वृतु वर्तने । आवर्तनमावृतत्वम्। ᵛआवृतम् सूर्यवर्तनम् ᵛअनु अहम् ᵛआवर्ते ॥ ५॥

अग्ने गृहपत सुगृहपतिरहं त्वया गृहपत्या भूयासम् ।
सुगृहपतिस्त्वं मया गृहपत्या भूयाः ॥ ६ ॥
अस्थूरि णो गार्हपत्यानि सन्तु शतꣳ हिमाः ।
तिग्मेन नस्तेजसा सꣳशिशाधि सूर्यस्यावृतमन्वा वर्ते ॥ ७ ॥

अग्ने । गृहपत इति गृहऽपत । सुगृहपतिरिति सुऽगृहपतिः । अहम् ।
त्वया । गृहपत्येति गृहऽपत्या । भूयासम् ।
सुगृहपतिरिति सुऽगृहपतिः । त्वम् । मया । गृहपत्येति गृहऽपत्या । भूयाः ॥ विं ॥६॥
अस्थूरि । नः । गार्हपत्यानीति गार्हऽपत्यानि । सन्तु । शतम् । हिमाः ।
तिग्मेन । नः । तेजसा । सम् । शिशाधि ।
सूर्यस्य । आवृतमित्याऽवृतम् । अनु । आ । वर्ते ॥ जें ॥७॥

सा– कात्यायनः – “ गार्हपत्यमुपतिष्ठतेऽग्ने गृहपत इति ” (काश्रौ ३.८.२१) इति । पाठस्तु– ‘ अग्ने गृहपते सुगृहपतिरहं त्वया गृहपत्या भूयासम् । सुगृहपतिस्त्वं मया गृहपत्या भूयाः । अस्थूरि णो गार्हपत्यानि सन्तु ’ इति । ᵛगृहपते अस्मदीयगृहस्य पालक हे ᵛअग्ने, ᵛगृहपत्या गृहपालकेन ᵛत्वया त्वत्प्रसादेनेत्यर्थः, ᵛअहम् अपि ᵛसुगृहपतिः सुष्ठु गृहस्य पालकः ᵛभूयासम् । तथा ᵛत्वम् अपि ᵛगृहपत्या ᵛमया मदीयसेवयेत्यर्थः, गृहपतिः ᵛभूयाः गृहपालको भव । एवं सति ᵛनः अस्माकं ᵛगार्हपत्यानि गृहपतिभ्यां स्त्रीपुरुषाभ्यां निष्पाद्यानि कर्माणि । स्थूरिशब्देनास्थूलमनुष्ठानानभ्यासलक्षणमभिधीयते । तद्रहितं यथा भवति तथा सम्यगनुष्ठितानि भवन्त्वित्यर्थः ॥

---

1. H1 °गर्भाख्यपुरुषः for °गर्भाख्यः स पुरुषः; B1 after इति adds – यतः श्रेष्ठो रश्मिरसि

4. B1 आवर्तते for आवर्ते

15. P1 with marking above गार्ह° ins. in the margin.– कण्वः स उपतिष्ठतेऽग्ने गृहपते इति सुगृ ... भूया इति । नात्र तिरोहितमिवास्ति । अस्थूरि णो गार्हपत्यानि सन्त्वित्यनार्तानि नो गार्हपत्यानि सन्त्वित्येवैतदाह । शतꣳ हिमा इति शतवर्षाणि जीव्यासमित्येवैतदाह शतꣳ हिमा इति तदु न परादिशेदुतो ह परशतानि वर्षाणि मनुष्या जीवन्तीति ।

16. P1 with marking above अग्ने ins. in the margin – गार्हपत्यदैवत्या बृहती ।

20. P1 with marking above स्थूरि° ins. in the margin – भाष्यान्तरे तु अन्यतरच्छकटं स्थूरीत्युच्यते । तन्नञा प्रतिषिध्यते । अस्थूरीति लुप्तोपमानम् । यथोभययुक्तशकटकार्यालमेवं नोऽस्माकं गार्हपत्यानि गृहपतिभ्यां संयुक्तानि कर्माणि सन्त्विति ।

कात्यायनः –“ शतꣳ हिमा इति ब्रूयात् ” (काश्रौ ३.८.२२) इति । पाठस्तु–‘ शतꣳ हिमाः । तिग्मेन नस्तेजसा सꣳशिशाधि ’ इति । हे सूर्य, ᵛशतꣳ ᵛहिमाः शतसंख्याकानि वर्षाणि । “ शतꣳ हिमा इति शतं वर्षाणि जीव्यासमित्येवैतदाह ” (काशब्रा २.८.४-१२) इति कण्वः । हिमशब्दो हेमन्तर्तुमाचष्टे । तथा च तित्तिरिर्व्याचष्टे–“शतꣳ हिमा इत्याह शतं त्वा हेमन्तानिन्धिषीयेति वावैतदाह” (तैसं १.५.८) इति । हिमशब्दसूचितैर्हेमन्तैस्तद्युक्ताः संवत्सरा लक्ष्यन्ते । शतसंवत्सरेषु निरन्तरं ᵛनः अस्मान् ᵛतिग्मेन तीक्ष्णेन ᵛतेजसा अनुष्ठानादिप्रकाशनेन ᵛसंशिशाधि सम्यक् शिक्षय ॥

कात्यायनः – “ सूर्यस्येत्यावर्तते प्रदक्षिणम् ” (काश्रौ ३.८.२३) इति । ‘ आवृतमन्वावर्ते ’ इति मन्त्रशेषः पूर्ववद् व्याख्येयः ॥ ६-७ ॥

आ– गार्हपत्यमुपतिष्ठते– ‘अग्ने गृहपते’ इति । गार्हपत्यदेवत्या बृहती । हे भगवन् ᵛअग्ने, हे ᵛगृहपते, ᵛगृहपत्या गृहाणां पालयित्रा ᵛत्वया सहायभूतेन ᵛअहं ᵛसुगृहपतिः ᵛभूयासं भवेयम् । हे अग्ने, ᵛमया सहायभूतेन गृहपतिना ᵛत्वं गृहपतिः ᵛभूयाः गृहपतिर्भवेः ॥६॥

एवमनेन प्रकारेण ‘ अस्थूरि णः ’ इति । अन्यतरतः [युक्तं] शकटं स्थूरीत्युच्यते । तन्नञा प्रतिषिध्यते ‘ अस्थूरि ’ इति । लुप्तोपमानम् । यथोभयतो युक्तं शकटमेवं ᵛनः अस्माकं ᵛगार्हपत्यानि गृहपतिभ्यां संयुक्तानि कर्माणि ᵛसन्तु । ᵛशतं ᵛहिमाः शतं वर्षाणि ᵛतिग्मेन तीक्ष्णेन ᵛतेजसा ᵛनः अस्मान् ᵛशिशाधि । शासु अनुशिष्टौ । शिक्षय । अथावर्तते – ‘ सूर्यस्यावृतम् ’ इति । इदं व्याख्यातम् ॥७॥

उ॒रु वि॑ष्णो॒ वि क्र॑मस्वो॒रु क्षया॑य नस्कृधि ।
घृ॒तं॑ घृ॑तयो॑ने पिब॒ प्रप्र॑ य॒ज्ञप॑तिं तिर ॥ ८ ॥
ततो॑ऽसि॒ तन्तु॑र॒स्यनु॑ मा तनुहि ।
अ॒स्मिन् य॒ज्ञे॒ऽस्याꣳ सा॑धुकृ॒त्याया॑म॒स्मिन्न॒न्ने॒ऽस्मिँल्लो॒के ॥ ९ ॥

उ॒रु । वि॒ष्णो॒ इति॑ विष्णो । वि । क्र॒म॒स्व॒ । उ॒रु । क्षया॑य । न॒ः । कृ॒धि॒ ।
घृ॒तम् । घृ॒त॒यो॒न॒ इति॑ घृतऽयोने । पि॒ब॒ ।
प्रप्रेति॒ प्रऽप्र॑ । य॒ज्ञप॑ति॒मिति॑ य॒ज्ञऽप॑तिम् । ति॒र॒ । तुम् ॥८॥

---

1. P1 with marking above second शतं ins. in the margin – लिङ्गोक्तदैवतं यजुः
2. V1 C M1 S1 om. second शतं ... आहेति कण्वः [L 3]
4. S1 C M1 V1 ता हेमन्तातिष्विवायेति for त्वा हेमन्तानिन्धिषीयेति
6. C M1 S1 V1 संशाधि for संशिशाधि
12. B1 अन्यतरः for अन्यतरतः ।
13. B1 °उभययुक्तं for °उभयतो युक्तं
15. H1 B1 तथा for अथ, H1 आवर्ते for आवर्तते

त॒तः॑ । अ॒सि॒ । तन्तुः॑ । अ॒सि॒ । अनु॒ । मा॒ । त॒नु॒हि॒ ।
अ॒स्मिन्। य॒ज्ञे । अ॒स्याम्। सा॒धु॒कृ॒त्याया॒मिति॑ सा॒धु॒ऽकृ॒त्यायाम्॑ ।
अ॒स्मिन्। अन्ने॑ ।अ॒स्मिन्। लो॒के॑ ॥ खं ॥९॥

सा– कात्यायनः – "गच्छति प्राङुरु विष्णविति" (काश्रौ ३.८.२४) इति । पाठस्तु– 'उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर ॥ ततोऽसि तन्तुरस्यनु मा तनुहि । अस्मिन् यज्ञेऽस्यां साधुकृत्यायामस्मिन्नन्नेऽस्मिंल्लोके' इति । हे ᵛविष्णो, ᵛउरु ᵛविक्रमस्व महद्यथा भवति तथा यज्ञविघातकासुरविनाशेन पराक्रमं कुरु । ᵛनः अस्माकं ᵛक्षयाय निवासार्थम् ᵛउरु ᵛकृधि विस्तीर्णं स्थानं कुरु । हे ᵛघृतयोने, घृतमेव योनिर्ज्वालोत्पत्तिकारणं यस्यासौ घृतयोनिरग्निः । तथा च मन्त्रान्तरमन्यत्राम्नातम्– "घृतप्रतीको घृतयोनिरेधि" (कासं ३५.४.१५) इति । अतः अग्निरूप हे विष्णो, ᵛघृतं ᵛपिब, पीत्वा च ᵛयज्ञपतिं यजमानं ᵛप्रप्र ᵛतिर प्रकर्षेण वर्धय । तिरधातुर्वृद्ध्यर्थः । ᵛततः ᵛअसि, हे विष्णो, त्वं विस्तृतोऽसि । तथा ᵛतन्तुः ᵛअसि ब्रह्मादिसंततिरूपोऽसि । ᵛअनु ᵛमा ᵛतनुहि विस्तृतं त्वद्रूपमनुसृत्य ममाप्यभीष्टप्रदानेन विस्तारय । कस्मिन् विषय इत्याकाङ्क्षायामुच्यते । ᵛअस्मिन् अनुष्ठीयमाने ᵛयज्ञे, तथा ᵛअस्यां शिष्टैरनुष्ठीयमानायां ᵛसाधुकृत्यायां विद्याविनयादिरूपक्रियायां, तथा ᵛअस्मिन् ᵛअन्ने दृश्यमाने भोज्यवस्तुनि, तथा ᵛअस्मिन् ᵛलोके इदानीं वर्तमाने बन्धुभृत्यादियुक्ते मनुष्यलोके । एतेषु सर्वेषु विषयेषु मां वर्धयेत्यर्थः ॥ ८-९ ॥

आ– आहवनीये जुहोति– 'उरु विष्णो' इति । वैष्णव्यनुष्टुप् । हे ᵛविष्णो । विष्लृ व्याप्तौ । ᵛउरु महत् ᵛविक्रमस्व व्याप्नुहि । देवयानाभिप्रायं त्रिलोकाभिप्रायं वा । ᵛउरु विस्तीर्णं शरीरं [यथा भवति तथा] ᵛक्षयाय, क्षि निवासगत्योः, निवसाय महद्ब्रह्मगृहनिवासाय ᵛनः अस्मान् ᵛकृधि कुरु । किं च ᵛघृतयोने, ᵛघृतं ᵛपिब । ᵛप्रप्र ᵛयज्ञपतिम् । प्र पूरणे । यज्ञपतिं पूरय । यज्ञपतिं ᵛतिर । तिरतिर्वृद्ध्यर्थः । यजमानं पुत्रपश्वादिभिर्वर्धय ॥८॥

यत एवमतः 'ततोऽसि' इति । विष्णुदेवत्यानुष्टुप् । ᵛततः त्वम् ᵛअसि । तनु विस्तारे । स्वरूपतोऽतिविस्तृतोऽसि । ᵛतन्तुः ᵛअसि ब्रह्मादिसंततिरूपोऽसि अतस्त्वामहमिह प्रार्थये– 'अनु

---

5. P1 with marking above उरु ins. in the margin – वैष्णवमनुष्टुप् ।
6. M1 ends with साधुकृत्या ...; C S1 V1 क्रमस्व for विक्रमस्व
9. P1 V1 अग्निः for एधि
11. C V1 S1 तिरति° for तिर°
13. P1 before अस्मिन् adds तथा
14. P1 °युवत्यादि° for °भृत्यादि°
16. B1 trans. हे विष्णो after व्याप्तौ [L 17]
18. H1 om. महद्ब्रह्म गृह निवासाय
20. B1 om. तिर
22. B1 om. तन्तुरसि

मा तनुहि ' इति। ᵛअनु त्वं ᵛमा ᵛतनुहि विस्तारय अभीष्टप्रदानेन। कस्मिन् विषय इत्याकाङ्क्षायामाह– ᵛअस्मिन् [ᵛयज्ञे] यज्ञविषये मां तनुहि। ᵛअस्यां ᵛसाधुकृत्यायां सदाचारलक्षणायाम्, ᵛअस्मिन् ᵛअन्ने विषये मां तनुहि। ᵛअस्मिन् ᵛलोके इह मानुषे लोके भोगस्थाने मां तनुहि इति संबन्धः ॥९॥

इदं मे कर्मेदꣳ वीर्यं पुत्रोऽनु संतनोतु ।
अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मेऽराधि ।
इदमहꣳ य एवास्मि स एवास्मि ॥१०॥ (६) ॥

इदम् । मे । कर्म । इदम् । वीर्यम् । पुत्रः । अनुसंतनोत्वित्यनुऽसंतनोतु ।
अग्ने । व्रतपत इति व्रतऽपते । व्रतम् । अचारिषम् ।
तत् । अशकम् । तत् । मे । अराधि ।
इदम् । अहम् । यः । एव । अस्मि । सः । एव । अस्मि ॥ जुः ॥१०॥ (६)॥

सा– कात्यायनः – " पुत्रस्य नाम गृह्णाति इदं मे इति। आत्मनः ... " (द्र. काश्रौ ३.८.२५-२६) इति। स्वस्य यः पुत्रस्तन्नामोच्चारयेत्। पाठस्तु– 'इदं मे कर्मेदं वीर्यं पुत्रोऽनुसंतनोतु' इति। ᵛइदम् इदानीमनुष्ठीयमानं ᵛमे मदीयं ᵛकर्म यदस्ति, यदपि ᵛइदं ᵛवीर्यम् एतत्कर्मफलमस्ति, तदुभयं ᵛपुत्रः अस्मदीयो देवदत्ताख्यः ᵛअनुसंतनोतु अनुक्रमेण संततं करोतु ॥

कात्यायनः – " व्रतं विसृजते येनोपेयात् " (काश्रौ ३.८.२९) इति। आदौ व्रतोपायनकाले येन विकल्पितेन ' अग्ने व्रतपत इदमहम् ' इति व्रतं स्वीकृतं समाप्तावपि तदनुसारेण द्वयोरन्यतरेण व्रतं विसृजेत्। अत्रायं प्रथममन्त्रे पाठविशेषः – ' अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मेऽराधि ' इति। ᵛव्रतपते व्रतस्य कर्मणः पालक हे ᵛअग्ने, ᵛव्रतम् ᵛअचारिषम् कर्मानुष्ठितवानस्मि। ᵛतत् ᵛअशकं त्वदनुग्रहात् तत्कर्म कर्तुं शक्तोऽभूवम्। त्वया च ᵛमे मदीयं ᵛतत् कर्मफलम् ᵛअराधि साधितम् ॥

द्वितीयमन्त्रपाठविशेषस्तु– ' इदमहं य एवास्मि स एवास्मि ' इति। उपक्रमवेलायाम् ᵛइदं व्रतं ᵛअहं करिष्य इति संकल्प्य ᵛयः स्थितः ᵛअस्मि ᵛसः ᵛएव अहमिदानीं त्वत्प्रसादात् संकल्पितकर्मसमाप्तिं कृत्वा स्थितः ᵛअस्मि ॥ १० (६) ॥

इति द्वितीयेऽध्याये षष्ठोऽनुवाकः ॥ ६ ॥

---

13. P1 with marking above इदं ins. in the margin– लिङ्गोक्तदेवती जगती
14. P1 अस्ति for यदस्ति
17. P1 after इति adds वा
18. P1 with marking above अग्ने ins. in the margin– आग्नेयी त्रिपदाऽनुष्टुप्
20. S1 V1 तदनु° for त्वदनु°; C S1 कर्मशक्तो° V1 तत्कर्मशक्तो° for तत्कर्म कर्तुं शक्तो°;
    C S1 अभवम् for अभूवम्
21. C S1 V1 om. °विशेष°
22. P1 चरिष्य° for करिष्य°

आ– ‘ इदं मे कर्म ’ इति लिङ्गोक्तदेवत्या जगती मन्त्रैकपक्षे। मन्त्रभेदपक्षे तु विष्णुदैवत्यं यजुः। ᵛइदं ᵛमे ᵛकर्म इदं मदीयं [कर्म], ᵛइदं ᵛवीर्यं च ᵛपुत्रः ᵛअनुसंतनोतु। सततं विस्तारयतु। व्रतं विसृजति– ‘ अग्ने व्रतपते ’ इति। आग्नेयी त्रिपदाऽनुष्टुप्। हे भगवन् ᵛव्रतपते ᵛअग्ने, ᵛव्रतं विशिष्टं कर्माख्यम् ᵛअचारिषं चरितवानस्मि। ᵛतत् ᵛअशकं तत् कर्तुं शक्तोऽस्मि। ᵛतत् ᵛमे ᵛअराधि मे कर्मफलमपि त्वया अराधि। राध साध संसिद्धौ। राद्धं सिद्धं जातम्।

द्वितीयो व्रतविसर्गमन्त्रः उत्तरोऽर्धर्चः। ‘ इदमहं य एव ’ इति। हे अग्ने, त्वत्समक्षम् ᵛइदं व्रतम् ᵛअहं करिष्य इति ᵛयः स्थितः ᵛअस्मि ᵛसः अहमिदानीं संकल्पितकर्मसमाप्तिं कृत्वा स्थितः ᵛअस्मि ॥ १० ॥ (६) ॥

[इति षष्ठोऽनुवाकः]

[अथ सप्तमोऽनुवाकः]

सा– षष्ठे याजमानमन्त्रा उक्ताः। तावता दर्शपूर्णमासेष्टिः समाप्ता। अथ सप्तमे पिण्डपितृयज्ञमन्त्रा उच्यन्ते–

अग्नये कव्यवाहनाय स्वाहा
सोमाय पितृमते स्वाहा।
अपहता असुरा रक्षांꣳसि वेदिषदः ॥ १ ॥

अग्नये। कव्यवाहनायेति कव्यऽवाहनाय। स्वाहा।
सोमाय। पितृमत इति पितृऽमते। स्वाहा।
अपहता इत्यपऽहताः। असुराः। रक्षांꣳसि। वेदिषदः। वेदिसद इति वेदिऽसदः ॥दं॥ १॥

कात्यायनः – “ सारतण्डुलमपूर्णं श्रपयित्वाऽभिघार्योद्वास्य मेक्षणेन जुहोत्यग्नय इति सोमायेति च ” (काश्रौ ४-१-७) इति। पाठस्तु– ‘ अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहा ’

---

3. H1 विस्तारयतात् for विस्तारयतु; H1 after विसृजति ins. इति; H1 त्रिष्टुप् for त्रिपदानुष्टुप्।
7. H1 om. व्रत°
21. P1 with marking above अग्नये ins. in the margin– प्रजापतेरार्षं आग्नेयं यजुर्द्वयम्।

इति । पितृणामग्निः कव्यवाहननामकः । तथा च तित्तिरिणा समाम्नातम् – “ त्रयो वा अग्नयो हव्यवाहनो देवानां कव्यवाहनः पितृणाꣳ सहरक्षा असुराणाम् ” (तैसं २.५.८) इति । कवयः क्रान्तदर्शिनः पितरस्तेषां संबन्धि कव्यं हविः । तद्वोढुमधिकारो यस्यास्ति स कव्यवाहनः । तस्मै ᵛअग्नये ᵛस्वाहा हविर्दत्तम् । पितृमान् पितृसंयुक्तस्तस्मै ᵛसोमाय सोमनामकाय देवाय ᵛस्वाहा हविर्दत्तम् ॥

कात्यायनः – “ दक्षिणेनोल्लिखत्यपहता इति ” (काश्रौ ४.१.८) इति । पाठस्तु– ‘ अपहता असुरा रक्षाꣳसि वेदिषदः ’ इति । वेद्यां सीदन्तीति ᵛवेदिषदः तथाविधाः ᵛअसुराः ᵛअपहताः वेदेः सकाशादपनीय वारिताः । वेद्याः ᵛरक्षाꣳसि अपहतानि । असुरत्वं रक्षस्त्वं चेत्येनौ देवविरोधिजातिविशेषौ ॥ १ ॥

आ– इतः परं पिण्डपितृयज्ञिया मन्त्राः । ‘ अग्नये कव्यवाहनाय ’ इत्यादिपिण्डपितृयज्ञमन्त्राणां प्रजापतिर्ऋषिः । ‘ अग्नये ’, ‘ सोमाय ’ च इति द्वे यजुषी [अग्नि-]देवते । अग्नौ जुहोति । ᵛअग्नये ᵛकव्यवाहनाय । कवयः क्रान्तदर्शिनः पितरस्तेषां संबन्धि हविः कव्यम् । तद्वोढुमधिकारो यस्य सः कव्यवाहनः । तस्मै कव्यवाहनाय । ᵛसोमाय ᵛपितृमते । पितृयुक्तः पितृमान्, तस्मै । “ वषट्कारेण वा स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयते ” इति लिङ्गादिमौ मन्त्रौ दैवौ । उल्लिखति — ‘ अपहताः ’ इति । आसुरं यजुः । ᵛअपहताः अस्मात् स्थानात् अपगताः । असुषु रमन्तीति ᵛअसुराः ᵛरक्षाꣳसि च । वेद्यां सीदन्तीति ᵛवेदिषदः ॥१॥

ये रू॒पाणि॑ प्रति॒मु॒ञ्चमा॑ना॒ असु॑रा॒: सन्त॑: स्व॒धया॒ चर॑न्ति ।
प॒रा॒पुरो॑ नि॒पुरो॒ ये भर॑न्त्य॒ग्निष्टाँल्लो॒कात् प्र णु॑दात्य॒स्मात् ॥२॥

ये । रू॒पाणि॑ । प्र॒ति॒मु॒ञ्चमा॑ना॒ इति॑ प्र॒ति॒ऽमु॒ञ्चमा॑नाः ।
असु॑राः । सन्त॑ः । स्व॒धया॑ । चर॑न्ति ।
प॒रा॒पु॒र इति॑ प॒रा॒ऽपुर॑ः । नि॒पु॒र इति॑ नि॒ऽपुर॑ः । ये । भर॑न्ति ।
अ॒ग्निः । तान् । लो॒कात् । प्र । नु॒दा॒ति॒ । अ॒स्मात् । ग्रँ ॥२॥

सा “ उल्मुकं परस्तात् करोति ये रूपाणीति ” (काश्रौ ४.१.९) इति । पाठस्तु– ‘ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति । परापुरो निपुरो ये भरन्त्यग्निष्टांल्लोकात् प्र णुदात्य-

---

1. C S1 कव्यवाह° for कव्यवाहन°
4. C V1 S1 om. सोमाय
5. P1 with marking above second अप° ins in the margin– आसुरं यजुः ।
10. B1 इति च for च इति
15. B1 °हताः for °गताः
22. P1 with marking above ये ins. in the margin– त्रिष्टुप् कव्यवाहनाग्निदेवत्या प्रजापतिरार्षी ।

स्माद्' इति। ᵛअसुराः देवविरोधिनः ᵛसन्तः ᵛये ᵛस्वधया पैतृकनिमित्तेन ᵛरूपाणि ᵛप्रतिमुञ्चमानाः पितृसमानरूपाणि स्वीकुर्वन्तः ᵛचरन्ति पितृयज्ञस्थाने संचरन्ति। ᵛपरापुरः पराक्रान्तान् देहान्, स्थूलशरीराणीत्यर्थः। ᵛनिपुरः न्यग्भूतान् देहान्, सूक्ष्मशरीराणीत्यर्थः। ᵛये स्वयमसुराः सन्तः अपि स्वकीयमसुरत्वं प्रच्छाद्य तानि द्विविधानि पितृशरीराणि ᵛभरन्ति धारयन्ति। ᵛतान् असुरान् ᵛअग्निः उल्मुकरूपः ᵛअस्मात् लोकात् पितृयज्ञस्थानात् ᵛप्रणुदाति प्रकर्षेणापसारयति। कण्वः– "अथोल्मुकं दक्षिणतो निदधाति यद्ध वा अनिधायोल्मुकं पितृभ्यो ददत्यसुररक्षसानि हैषां तद्विमथ्नते स यदुल्मुकं निदधात्यसुररक्षसानामेवापहतये। स निदधाति ये रूपाणि" (काशब्रा १.३.३.१२-१३) इति उल्मुकनिधानमावश्यकमाह ॥ २ ॥

आ– उल्मुकं परस्तात् करोति– 'ये रूपाणि' इति। त्रिष्टुप् कव्यवाहनोऽग्निर्देवता। ᵛये ᵛअसुराः ᵛरूपाणि पितृणां रूपाणि स्वात्मनि ᵛप्रतिमुञ्चमानाः। मुच्लृ मोक्षणे। प्रतिपूर्वो मुञ्चतिः बन्धनार्थे वर्तते। पितृरूपाण्यात्मनि बध्नन्तः असुराः ᵛसन्तः पितृरूपमास्थाय स्थिताः। किमर्थम्? ᵛस्वधया पितृणां नामहेतुभूतेन अस्माभिरेतद् स्वादितव्यमिति ᵛचरन्ति संचरन्ति। किं च ᵛपरापुरः पुरः शरीराणि पराक्रान्ताः परापुरः, महान्ति शरीराणि। ᵛनिपुरः सूक्ष्माणि शरीराणि। ᵛये ᵛभरन्ति ये बिभ्रति धारयन्ति ᵛतान् असुरान् ᵛअग्निः ᵛप्रणुदाति। छान्दसं पदम्। ᵛअस्मात् पितृलोकात् स्थानात् प्रणुदतु ॥२॥

अत्र॑ पितरो मादयध्वं यथाभा॒गमा वृ॑षायध्वम् ।
अमी॑मदन्त पि॒तरो॑ यथाभा॒गमाऽवृ॑षायिषत ॥ ३ ॥

[अत्र॑ । पि॒त॒र॒ः । मा॒द॒य॒ध्व॒म् ।
य॒था॒भा॒गमिति॑ य॒था॒ऽभा॒गम् । आ । वृ॒षा॒य॒ध्व॒म् । वृ॒ष॒य॒ध्व॒मिति॑ वृषऽयध्वम् ।
अमी॑मदन्त । पि॒तर॑ः । य॒था॒भा॒गमिति॑ य॒था॒ऽभा॒गम् । आ । अ॒वृ॒षा॒यि॒ष॒त ॥ न ॥ ३ ॥]

सा– कात्यायनः "अत्र पितर इत्युक्त्वोदङ्ङास्त आ तमनात्। आवृत्यामीमदन्तेति जपति" (काश्रौ. ४.१.१३-१४) इति। आ तमनात् ग्लानिपर्यन्तम्। पाठस्तु–' अत्र पितरो मादयध्वं यथाभागमा-

---

2. P1 om. दरापुरः
4. V1 S1 C om. पितृ°
5. V1 S1 C om. कण्वः ... आह (L. S)
10. B1 om. पितृणां रूपाणि
12. B1 om. चरन्ति
21. S1 आतमम् for आ तमनात्
22. P1 with marking above अत्र ins. in the margin– मन्त्रद्वयं पितृदैवत्यं द्विपदाबृहतीछन्दस्कं प्राजापत्यार्षम्।

वृषायध्वम् । अमीमदन्त पितरो यथाभागमाऽवृषायिषत ’ इति । तदिदं मन्त्रद्वयम् ‘अग्ने वाजजित’ (कासं २.२.१) इत्यनुवाके यथा व्याख्यातं तथैवात्रापि व्याख्यातव्यम् ॥ ३ ॥

आ– उदङ्ङास्ते – ‘ अत्र पितरः ’ इति । अत्र पूर्वार्धर्चस्त्वेको मन्त्रः पितृदेवत्यः, द्विपदा बृहती । ^{v}अत्र अस्मिन् बर्हिषि, हे ^{v}पितरः, ^{v}मादयध्वम् । किं च ^{v}यथाभागं स्वभागानतिक्रमेण ^{v}आवृषायध्वम् एतान् पिण्डान् यथाभागं स्वेच्छया अश्नीतेत्यर्थः । आवृत्य ‘ अमीमदन्त ’ इति जपति । ‘ अमीमदन्त ’ इति पितृदेवत्या द्विपदा बृहती । [^{v}अमीमदन्त] हर्षं प्राप्तवन्तः ^{v}पितरः ^{v}यथाभागम् ^{v}आऽवृषायिषत अशितवन्तः ॥ ३ ॥

नमो॑ वः पित॒रः शुष्मा॑य॒ नमो॑ वः पित॒रस्तप॑से ।
नमो॑ वः पित॒रो॒ यज्जी॒वं॑ तस्मै॒ नमो॑ वः पित॒रो॒ रसा॑य ।
नमो॑ वः पितरो घो॒राय॑ म॒न्यवे॑ स्व॒धायै॑ वः पित॒रो॒ नम॑ः ।
ए॒तद्वः॑ पित॒रो॒ वासो॑ गृ॒हान् नः॑ पितरो दत्त ॥४॥

नम॑ः । व॒ः । पि॒त॒र॒ः । शुष्मा॑य । तप॑से ।
यत् । जी॒वम् । तस्मै॑ । रसा॑य ।
घो॒राय॑ । म॒न्यवे॑ । स्व॒धायै॑ । व॒ः । पि॒त॒र॒ः । नम॑ः ।
ए॒तत् । व॒ः । पि॒त॒र॒ः । वास॑ः । गृ॒हान् । न॒ः । पि॒त॒र॒ः । द॒त्त ॥ श्रीः ॥४॥

सा–कात्यायनः– “ नमो व इत्यञ्जलिं करोति ” (काश्रौ ४.१.१५) इति । पाठस्तु- ‘ नमो वः पितरः शुष्माय नमो वः पितरस्तपसे । नमो वः पितरो यज्जीवं तस्मै नमो वः पितरो रसाय । नमो वः पितरो घोराय मन्यवे स्वधायै वः पितरो नमः ’ इति । हे ^{v}पितरः, ^{v}वः युष्मत्संबन्धिने ^{v}शुष्माय बलाय वैर्यभिभवसामर्थ्याय ^{v}नमः नमस्कारोऽस्तु । उत्तरेष्वपि पञ्चसु मन्त्रेषु ‘ नमो वः पितरः ’ इति पदं पूर्ववद् योज्यम् । ^{v}तपसे वैरिषु प्रयुक्ताय संतापाय । ^{v}यत् ^{v}जीवम् अस्मदीयं जीवनं भवद्भिरनुगृहीतमस्ति ^{v}तस्मै जीवनाय । ^{v}रसाय भवत्प्रसादलब्धाय पयोघृतादिरूपाय । ^{v}घोराय

---

1. P1 V1 S1 °जिति for °जित् इति [L 2]
3. B1 °देवत्ये for °देवत्य°
4. H1 om. अत्र
16. P1 with marking above नमो second ins. in the margin– षड् यजूंषि लिङ्गोक्तदैवत्यानि प्राजापत्यार्षाणि ।
18. C V1 S1 om. वः

शत्रुवधत्वेन तीव्राय ᵛमन्यवे क्रोधाय। ᵛस्वधायै भवदीयान्नाय। “स्वधो वै पितॄणामन्नम्” (शब्रा १३.८.१.४) इति श्रुतेः। शुष्मादीनां नमस्कारेण स्वस्यानुग्रहाय तत्संपत्तिः प्रार्थिता भवति ॥

कात्यायनः– “एतद्व इत्युपास्यति सूत्राणि प्रतिपिण्डम्। ऊर्णादशा वा। वयस्युत्तरे यजमानलोमानि वा” (काश्रौ ४.१.१६-१८) इति ॥ पाठस्तु- ‘एतद्वः पितरो वासो गृहान् नः पितरो दत्त’ इति। हे ᵛपितरः ᵛवः युष्माकम् ᵛएतत् ᵛवासः मया दीयमानमिदं सूत्रमेव वस्त्रम्। हे ᵛपितरः, तुष्टा यूयं ᵛनः अस्मभ्यं ᵛगृहान् सर्वोपकरणसहितान् ᵛदत्त प्रयच्छत ॥४॥

आ– ‘नमो वः’ इत्यञ्जलिं करोति। ‘नमो वः’ इत्यादीनां षण्णां लिङ्गोक्तदेवताः। “षट्कृत्वो नमस्करोति षड् वा ऋतव ऋतवो वै पितरः” (काशब्रा १.३.३.२०) इति श्रुतेः। हे ᵛपितरः, ᵛवः युष्मत्संबन्धिने ᵛरसाय रसभूताय ᵛनमः। वसन्ते हि मध्वादयो रसाः सन्तीत्येवं नमस्क्रियते। वक्ष्यमाणा अपि मन्त्रा एवं व्याख्येयाः। ᵛशुष्माय। शुष्ममिति बलनाम। ᵛवः युष्मत्संबन्धिने शुष्माय बलरूपाय ᵛनमः। ᵛतपसे। तप संतापे। युष्मत्संबन्धिने संतापहेतुभूताय ᵛतपसे ᵛनमः। ᵛयत् ᵛजीवम्। जीवं जीवनहेतुभूतं, ᵛतस्मै युष्मत्संबन्धिने जीवाय ᵛनमः। ᵛनमः ᵛवः ᵛपितरः ᵛघोराय विषमाय ᵛमन्यवे। मन्युः क्रोधः। ᵛवः युष्मत्संबन्धिने क्रोधरूपाय ᵛनमः। ᵛस्वधायै। “स्वधो वै पितॄणामन्नम्” (शब्रा १३.८.१.४) इति श्रुतेः। पित्रन्नरूपाय ᵛनमः। प्रतिमन्त्रं नमःशब्दः पितृशब्दश्च नियमार्थः। सूत्राणि ददाति– ‘एतद्वः’ इति। पित्र्या द्विपदा गायत्री। हे ᵛपितरः, ᵛवः युष्माकमेतत् ᵛवासः परिधानम्। हे ᵛपितरः, ᵛगृहान्, स्त्रीपुत्रपौत्रादयो गृहा इत्युच्यते, तत् ᵛनः अस्मभ्यं ᵛदत्त प्रयच्छत ॥४॥

उदायुषा स्वायुषोत्पर्जन्यस्य धामभिः ।
उदस्थाममृताँ अनु ।। ५ ।।

उत्। आयुषा। स्वायुषेति सुऽआयुषा। उत्। पर्जन्यस्य। धामभिरिति धामऽभिः।
उत्। अस्थाम्। अमृतान्। अनु ॥ च्यं ॥ ५ ॥

सा– कात्यायनः– “उदायुषेत्युत्थानम्” (काश्रौ ७.९.३) इति। पाठस्तु ‘उदायुषा स्वायुषोत्पर्जन्यस्य धामभिः। उदस्थाममृताँ अनु’ इति। प्रथमः आयुःशब्दोऽन्नवाची। द्वितीयो

---

4. P1 with marking above एतद् ins. in the margin– पित्र्या द्विपदा गायत्री प्राजापत्यार्षा।
5. P1 तथा for तुष्टाः
9. B1 after श्रुतेः adds व्याख्यातम्
13. B1 before घोराय ins. रसाय
17. B1 om. इति; B1 उच्यन्ते for उच्यते; H1 अस्माकं for अस्मभ्यं

जीवनवाची । ᵛस्वायुषा शोभनमायुर्जीवनं येन भवति तत् स्वायुः । तथाविधेन स्वायुषा अन्नेन युक्तोऽहं ᵛउदस्थाम् उत्थितोऽस्मि । तथा ᵛपर्जन्यस्य वृष्टिहेतोर्मेघस्य संबन्धिभिः ᵛधामभिः स्थानविशेषैर्युक्तोऽहमुदस्थाम् । ᵛअमृतान् मरणरहितान् पितॄन् अनुसृत्य तत्सेवार्थमुदस्थाम् ॥५॥

आ– ‘ उदायुषा ’ इति उत्तिष्ठति । ‘ उदायुषा ’ इति पितृदेवत्या गायत्री । ᵛउदायुषा, आयुरित्यन्ननाम, उत्कृष्टेनान्नेन । ᵛस्वायुषा स्वकीयेनान्नेन पितृणां योग्येनान्नेन तृप्ताः सन्तः ᵛउत् ᵛपर्जन्यस्य संबन्धिभिरुत ᵛधामभिः स्थानैरुपलक्षितान् ᵛअमृतान् युष्मान् ᵛअनु सह अहम् ᵛउदस्थाम् इति संबन्धः । उदस्थाम् उपातिष्ठम् । अनु उदस्थाम् उत्थितोऽस्मि ॥ ५ ॥

आ ध॑त्त पितरो॒ गर्भं॑ कुमा॒रं पुष्क॑रस्रजम् ।
यथे॒ह पुरु॒षोऽस॑त् ॥ ६ ॥

आ । ध॒त्त॒ । पि॒त॒रः॒ । गर्भ॑म् । कु॒मा॒रम् । पुष्क॑रस्रज॒मिति॒ पुष्क॑रऽस्रजम् ।
यथा॑ । इ॒ह । पुरु॑षः । अस॑त् ॥ खं ॥ ६ ॥

सा- “ आधत्तेति मध्यमपिण्डं पत्नी प्राश्नाति पुत्रकामा ” (काश्रौ ४.१.२२) इति । पाठस्तु– ‘ आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् । यथेह पुरुषोऽसत् ’ इति । हे ᵛपितरः, ᵛपुष्करस्रजम् अश्विभ्यां समानम् । अश्विनौ देवौ पुष्करस्रजौ पद्ममालिनौ देवानां भिषजौ । तत्साम्यकथनेन रोगरहितमित्युक्तं भवति । तथाविधं ᵛकुमारं पुरुषरूपं ᵛगर्भम् ᵛआधत्त संपादयत । ᵛइह अस्मिन्नेव ऋतौ ᵛपुरुषः देवपितृमनुष्याणामपेक्षितार्थस्य पूरयिता ᵛयथा ᵛअसत् येन प्रकारेण भूयात् तथा धत्तेति पूर्वत्र संबन्धः ॥६॥

आ– मध्यमं पिण्डं पत्नी प्राश्नाति पुत्रकामा - ‘ आधत्त ’ इति । पित्र्या गायत्री । हे ᵛपितरः ᵛगर्भम् ᵛआधत्त प्रतिष्ठापयत । ᵛकुमारं पुत्रभावयोग्यं पुरुषगर्भम् । ᵛपुष्करस्रजं पद्ममालिनम् । अश्विनौ पुष्करस्रजौ । अश्विभ्यां पुत्रोपमानं क्रियते । अश्विनाविव स्थितमित्यर्थः । ᵛयथा एषः ᵛपुरुषः, यथा येन प्रकारेण ᵛइह अस्मिन्नेव क्र (ऋ. ?) तौ पुरुषः पूरयिता देवपितृमनुष्याणामपेक्षितार्थस्य ᵛअसत् भूयात् तथा आधत्तेति संबन्धः ॥ ६ ॥

---

3. V1 C S1 अस्थाम् for second उदस्थाम्.
4. H1 °तिष्ठते for °तिष्ठति
6. H1 ततः for सन्तः ।
7. H1 om सह ।
13. V1 S1 C after अश्विभ्यां add देवाभ्यां
18. B1 om. पुरुष°

ऊर्जं वहन्तीरमृतँ घृतं पयः कीलालँ परिस्रुतम् ।
स्वधा स्थ तर्पयत मे पितॄन् ॥ ७ ॥ (७) ॥

ऊर्जम् । वहन्ती । अमृतम् । घृतम् । पयः । कीलालम् । परिस्रुतमिति परिऽस्रुतम् ।
स्वधाः । स्थ । तर्पयत । मे । पितॄन् ॥ ग्यं ॥ ७ ॥ (७) ॥

[कृष्णोऽसि नव ॥९॥ अग्ने वाजजिन्नव ॥९॥ देव सवितरेकादश ॥११॥ अग्नीषोमयोः षट् ॥६॥ अग्नेऽदब्धायोऽष्ट ॥८॥ सँ वर्चसा दश ॥१०॥ अग्नये कव्यवाहनाय सप्त ॥७॥

सप्तानुवाकेषु षष्टिः ॥६०॥ कृष्ण इमं मे षष्टिः ॥६०॥]

इति शुक्लयजुर्वेद-काण्वसंहितायां द्वितीयोऽध्यायः ॥२॥

॥ हरिः ॐ ॥

सा– कात्यायनः – "ऊर्जमित्यपो निषिञ्चति" (काश्रौ ४·१·१९) इति । पाठस्तु– 'ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् । स्वधा स्थ तर्पयत मे पितॄन्' इति । हे आपः, यूयं 'स्वधाः 'स्थ पित्र्यहविःस्वरूपा भवथ । अतः 'मे 'पितॄन् 'तर्पयत । कथंभूता आपः ? 'परिस्रुतं 'वहन्तीः पुष्पेभ्यो निःसृतं सारं वहन्त्यः । तच्च सारं त्रिविधम् ऊर्जशब्देन घृतशब्देन पयःशब्देन चाभिधेयम् । तत्रोर्जशब्दः अन्नगतं स्वादुत्वमभिधत्ते । घृतपयसी प्रसिद्धे । तच्च 'घृतम् 'अमृतं मधुरम् । 'पयः अपि 'कीलालम् । कील बन्धने । कीलनं कीलो बन्धः । तमलति वारयतीति कीलालम् । अलं वारणपर्याप्त्योरिति धातुः । सर्वबन्धनिवर्तकम् । ईदृशस्य त्रिविधस्य सारस्य वहनादपां पितृतर्पकत्वमुपपन्नम् ॥ ७ ॥ (७) ॥

इति द्वितीयेऽध्याये सप्तमोऽनुवाकः ॥ ७ ॥ (७) ॥

अत्र विनियोगसंग्रहः–

सप्तानुवाकाध्यायेऽस्मिन् द्वितीयेऽर्थस्तु वर्ण्यते ।
स्रुचामासादनं स्रुच्याघारो ब्रह्मार्षमन्त्रकाः ॥१॥
स्रुग्व्यूहाद्या स्रुग्ग्रहाश्च याजमान (न्य ?) श्च पैतृकाः ।
कृष्ण इध्मं वेदि वेदिं बर्हिर्वेदिः समुक्षति ॥२॥

---

7. C षष्टि for षष्टिः ।
8. C प्रथमदशके संहितायां for शुक्ल ... संहिताया°
10. P1 with marking above second ऊर्जं ins. in the margin – अब्देवत्या त्रिपदानुष्टुप् प्रजापतेरार्षा ।
12. V1 C S1 om. पुष्पेभ्यो ... वहन्त्यः । [l. 13]
14. C V1 S1 बल° for अन्न°
17. P1 om. इति द्वितीयेऽध्याये
19. P1 सप्तम° for सप्त°; S1 V1 P1 om. अस्मिन्
20. C स्रुगासादनम् for स्रुचासादनम्; P1 ब्रह्मर्ष° for ब्रह्मार्ष°
21. C मानीश्च for मानश्च
22. C वेदि° for वेदि; V1 S1 C बर्हिः for वेदिः; C बर्हि for बर्हिर्

अभिषिञ्चेद्दर्भमूले विष्णोः प्रस्तरधारणम् ।
ऊर्णेति स्तृणुते वेदिं भूत्रिभिः स्कन्नमर्शनम् ॥३॥
गन्धेन्द्रमित्रत्रयतः परिधीन् दिक्त्रये क्षिपेत् ।
आधारसमिधौ वीति समिद्भ्यां क्षिपेत् पुरः ॥४॥
सूर्यो जपेत् स विस्थाप्य तिरश्चीनं तथा द्वयम् ।
प्रस्तरास्तरणं तूर्णमा त्वा तस्य प्रसारणम् ॥५॥
घृतं त्रिभिः ध्रुवाः स्थाप्याः प्रियेऽन्य हविषां स्थितिः ।
हविः स्रुचे ध्रुवा पाहि स चतुर्विंशतिः खलु ॥६॥
अग्ने परिधिसंमार्गौ ह्यञ्जली द्वौ नमः स्वधा ।
स्रुवस्रुचौ समादायाङ्घ्रिणा दक्षिणदिग्गतिः ॥७॥
वसु स्थित्वेत इन्द्रेति होमः सं ज्यो ध्रुवाञ्जनम् ।
अत्रामीमस्वामिजपावुपाग्नेऽग्नीध्रदत्तं ब्रूयात् ॥८॥
मयि स्वामिजपोऽथाग्ने मार्ष्टिमन्त्राश्चतुर्दश ।
देव ब्रह्मा वेदेः स्थाने तृणानि च निरस्यति ॥९॥
इन्द्रब्रह्मोपविष्टः स्यान्मित्रं प्राशित्रमीक्षते ।
देवस्य प्रतिगृह्णाति पृथिव्यास्त्वेति सादयेत् ॥१०॥
देवस्य पुनरादद्यादग्नेष्ट्वा भक्षयेदिदम् ।
पात्रं प्रक्षालने नाभिमन्वाहार्यं स्पृशेत् प्रजा ॥११॥
एषः होता मन्त्रयेत ब्रह्मानुज्ञैतदित्यतः ।
अनुवाके तृतीयेऽस्मिन् मन्त्रा द्वादश वर्णिताः ॥१२॥
अग्नीद्ब्रूयात् स्रुचौ व्यूहेदिन्द्राग्नीद्ब्रयतोऽपि च ।
वसुत्रयेण परिधीनञ्ज्यात् सं प्रस्तरग्रहः ॥१३॥
तमञ्ज्याद्ब्रयन्तु मरुतां प्रहरेच्चक्षुरित्यतः
संस्पृशेदाद्यं परिधिं मध्यमं प्रहरेदथ ॥१४॥

---

3. P1 °त्रयेण for °त्रयतः
4. C V1 S1 समिदाभ्या for समिद्भ्यां
5. P1 समित् for स वि°
6. C om. तु; C S1 मात्रा; V1 यात्रा for आ त्वा
7. P1 स्रुचा स्थाप्य प्रियेण for ध्रुवाः स्थाप्याः प्रियेऽन्य°
8. P1 हविस्रुच्वे ध्रुवश्चेहि for हविः ... पाहि ।
9. P1 नमः for स्वधा
10. P1 स्वधा° for स्रुव°
11. V1 स्थितेत° for स्थित्वेत°; V1 S1 C सत्यो for सं ज्यो
12. V1 S1 C अत्रामीस्वामि° for अत्रामीमस्वामि; P1 उपाग्नेगी दत्तं for उपाग्नेऽग्नीध्रदत्तं
   – metre is defective.
15. V1 S1 C मित्र for मित्रं
18. S1 C प्रक्षाल्य तेनाभि°; V1 प्रक्षाल्तेनाभि° for प्रक्षालनेनाभि°
21. V1 इन्द्राग्नि° for इन्द्राग्नी°

इतरौ प्रहरेदग्नेः संस्रुवं स्रुचद्धोमकः ।
घृता भृतिः स्रुचौ दध्यान्मन्त्राः पञ्चदशेरिताः ॥१५॥
स्रुक्स्रुवप्रग्रहस्त्वग्नेर्होमो ह्यग्रसरद्वयात् ।
लेपान् खलु जुहोत्याप्या ध्रुवामाप्याययेत् सदा ॥१६॥
समिष्टहोमे देवेति सं बर्हिराहुतिर्भवेत् ।
प्रणीता निनयेत् कस्त्वा कणान् रक्षः परित्यजेत् ॥१७॥
उपवेषकृतिर्वेषो वेशानग्निं क्वचिद्भजेत् ।
पयो होमः क्वचिद्वृद्धा मन्त्रा द्वादश वर्णिताः ॥१८॥
मुखं संवर्ध विमृष्टे यज्ञवेदिं स्पृशेत् क्रमात् ।
क्रमाद्विवि त्रयेणास्मादन्नाद्भागमवेक्षते ॥१९॥
अस्यै भूमिमवेक्षेतागन्म प्रागीक्षते तथा ।
संज्यो पूर्वाग्निमीक्षित्वा स्वयं सूर्यमवेक्षते ॥२०॥
वर्चः पश्येद्दार्विं कामी सूर्यावृत्तिः प्रदक्षिणा ।
अग्न इत्यग्निमासीत शतं ब्रूयात् तथा पुनः ॥२१॥
सूर्यप्रदक्षिणावृत्तिरुरु गच्छेदिदं त्विति ।
स्वपुत्रनामग्रहणं पश्चादग्न इदं द्वयोः ॥२२॥
एकेन वा व्रतत्यागो मन्त्रा एकोनविंशतिः ।
अग्ने सोमद्वयाद्धोमोऽपहता दक्षिणोल्लिखेत् ॥२३॥
ये रूपोल्मुकमाधाय अत्रामीमद्वयं जपेत् ।
षड्भिर्नमोऽञ्जलिं कुर्यादेतत् सूत्रमुपास्यति ॥२४॥
उदोत्तिष्ठ मध्यपिण्डमाधत्ताश्नाति तद्वधूः ।
सिञ्चेदूर्जमपो मन्त्राः षोडशात्रोपवर्णिताः ॥२५॥
वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ २६ ॥ ७ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण
सायणाचार्येण विरचिते माधवीये काण्ववेदार्थप्रकाशे द्वितीयोऽध्यायः ॥२॥

---

1. P1 अग्नौ संस्रसस्रंष° for अग्नेः संस्रवं स्रुच°; H1 इतरा for इतरौ; S1 संस्रुवं for संस्रवं
2. V1 घृतभृतिः for घृता भृतिः ।
3. C V1 S1 ग्रग्र° for ह्यग्र° ।
4. P1 लेपान् जुहोत्याधाय for लेपान् ... आप्या
5. C V1 S1 होमौ for होमे
6. P1 रक्ष for रक्षः
9. P1 संव [–] क्रमात् विमृष्टेऽथ यज्ञवेदिं स्पृशेत् for मुखं ... क्रमात्
14. C S1 V1 अग्ने दक्षेत् पश्चिमाग्नि° for अग्न ... आसीत
17. V1 S1 C om. वा; V1 S1 C °संत्यागो for °त्यागो
19. C V1 S1 अत्रामीति for अत्रामीम°
21. C V1 S1 उत्तिष्ठन्° for उत्तिष्ठ; V1 C S1 अथ प्राश्नाति for आधत्ताश्नाति ।
26. C S1 after प्रकाशे add : काण्वसंहिताया भाष्ये, V1 काण्वसंहिताभाष्ये

आ– आपो निषिञ्चति ‘ऊर्जं वहन्तीः’ इति । अब्देवत्या त्रिपदाऽनुष्टुप् छन्दः । हे आपः, ^{v}ऊर्जम् अन्नं ^{v}वहन्तीः वहन्त्यः । नानाविधं ^{v}अमृतं ^{v}घृतं ^{v}पयः । अमृतं मधुरम् । घृतम् आज्यम् । पयः क्षीरम् । ^{v}कीलालम् अन्नमिष्टं कर्तुं समर्थो रसः कीलालम् । ^{v}परिस्रुतम् सर्वतो व्याप्य स्थितम् । “वहन्त्यस्तस्माधावन्मात्र इवान्नस्य रसः सर्वमन्नमवति” (काशब्रा १०.३.५.१२) इत्यादि श्रुतेः । ^{v}स्वधाः ^{v}स्थ । “स्वधा वै पितृणामन्नम्” (माशब्रा १३.५.१.४) इति श्रुतेः । डुधाञ् धारणपोषणयोः । स्वमात्मीयपितृणां धारणं पोषणं धा स्वधा स्थ भवथ । अतः ^{v}मे ^{v}पितॄन् ^{v}तर्पयत पितॄणां प्रीणनं कुरुतेति ॥७॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवसूरिपूज्यपादपरमकारुण्यासादितश्रीकृष्णभक्तिसाम्राज्यस्य श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदिश्रीमदानन्दबोधभट्टोपाध्यायेन विरचिते काण्ववेदमन्त्रभाष्यसंग्रहे द्वितीयोऽध्यायः ॥ ७ ॥ (७) ॥

[इति द्वितीयोऽध्यायः]

---

3. B1 H1 ऋषीकर्तुं. This has been corrected as इष्टं कर्तुं
6. B1 after डुधाञ् adds डुभृञ्; B1 om. धा.
7. B1 तर्पणं for प्रीणनं
8. B1 om. °पूज्य°; B1 °साम्राज्य° for °साम्राज्यस्य
9. B1 °वेदो for °वेद°

तृतीयोऽध्यायः

[अथ प्रथमोऽनुवाकः]

सा- यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

समिधाग्निं दुवस्यत घृतैर्बोधयताऽतिथिम् ।
आऽस्मिन् हव्या जुहोतन ॥ १ ॥

समिधेति सम्ऽइधा । अग्निम् । दुवस्यत । घृतैः । बोधयत । अतिथिम् ।
आ । अस्मिन् । हव्या । जुहोतन ॥ क्य ॥ १ ॥

सा- प्रथमद्वितीययोरध्याययोर्दर्शपूर्णमासेष्टिविषया मन्त्रा उक्ताः । अथ तृतीये आधानविषया मन्त्रा उच्यन्ते । तत्र कात्यायनः - "अमावास्यायामग्न्याधेयम्" (काश्रौ ४·७·१) इत्यादिना कालविशेषादीनि ब्रह्मौदनपाकपर्यन्तान्यनुष्ठेयान्युक्त्वा पश्चादिदमाह- "तं चातुष्प्राश्यं पचत्युद्वास्यासेचनं मध्ये कृत्वा सर्पिरासिच्याश्वत्थीस्तिस्रः समिधो घृताक्ता आदधाति समिधाग्निमिति प्रत्यृचम्" (काश्रौ ४·८·४-५) इति ॥ अस्यार्थः - चतुर्भिर्ऋत्विग्भिः प्राशितुं योग्यमोदनं पक्त्वा बहिरुद्वास्य तस्योदनस्य मध्ये घृतसेचनाय स्थानं निम्नं कृत्वा तत् सर्पिषाऽऽपूर्य तिस्रः समिधस्तस्मिन् सर्पिषि अभ्यज्य तिसृभिर्ऋग्भिरग्नावभ्यादध्यादिति । कण्वोऽपि एतमर्थं दर्शयति- "तस्य सर्पिरासेचनं कृत्वा सर्पिरासिच्याश्वत्थीस्तिस्रः समिधो घृतेनान्वज्य समिद्वतीभिर्घृतवतीभिर्ऋग्भिरभ्यादधाति" (काशब्रा १०·१·४·४) इति । तत्र प्रथमाया ऋचः पाठस्तु- 'समिधाग्निं दुवस्यत घृतैर्बोधयताथिम् । आऽस्मिन् हव्या जुहोतन' इति । सम्यगिध्यते दीप्यते वह्निर्यया काष्ठरूपया सा समित् । तया ¹समिधा ²अग्निं पुरोवर्तिनं ³दुवस्यत परिचरित । दुवस्यतिः परिचरणार्थत्वेन पठितः । ⁴अतिथिम् आतिथ्यकर्मणा पूजनीयमग्निं ⁵घृतैः होष्यमाणैः ⁶बोधयत । प्रज्वालयतेत्यर्थः । ⁷अस्मिन् प्रज्वालितेऽग्नौ ⁸हव्या नानाविधानि हवींषि ⁹जुहोतन, हे अनुष्ठातारः, सर्वतो जुहुत ॥१॥

---

3. P1 before यस्य adds : ॐ श्रीमद्देवदेवाय नमः
9. V1 S1 C after तृतीये ins. अध्याये
11. S1 V1 C उक्तानि for उक्त्वा
14. S1 C1 om. तत् सर्पिषा ... अभ्यादध्यादिति [L 20].
15. V1 S1 C तम् for एतम्
17. P1 with marking above समिधा ins. in the margin : समिधाग्निमित्याद्य आधानमन्त्राः प्राग्ज्योतिषामित्यन्ताः । तत्राद्याश्चतस्र आग्नेय्यो गायत्र्यः । सामान्यतो देवा ऋषयः । प्रजापतिरग्निर्गन्धर्वा वा । विशेषत आद्याया विरूप आङ्गिरस ऋषिरिति । द्वितीयाया वसुश्रुतस्तृतीयाचतुर्थ्योर्भारद्वाज इति; C V1 S1 इन्ध्यते for इध्यते

आ– ' समिधाग्निम् ' इति अग्न्याधानमन्त्राः प्राक् ' अग्निर्ज्योतिः ' इत्येतेभ्यः । देवानामार्षम् । प्रजापतेर्वा, अग्नेर्वा, गन्धर्वाणां वा । तत्र आधाश्वतस्रः । आग्नेय्यो गायत्र्यः । तत्राद्यायाः ऋषिर्विरूपश्चाङ्गिरसः । आश्वत्थीस्तिस्रो घृताक्ताः समिधः ' समिधा ' इत्यादधाति । ᵛसमिधा । इन्धी दीप्तौ । समिध्यते दीप्यते अनयेति समित् । तया समिधा ᵛअग्निं ᵛदुवस्यत । दुवस्यतिः परिचरणार्थः । दुवस्यत परिचरत । ततः परिचर्यमाणमग्निं ᵛघृतैः पूर्णाहुतिसंबन्धिभिर्घृतैः ᵛअतिथिं पूज्यत्वेनातिथ्यधर्मयुक्तं ᵛबोधयत, बुध अवगमने, संदीपयत प्रज्वालयतेत्यर्थः । ᵛआ ᵛअस्मिन् अग्ने ᵛहव्या हव्यानि हवींषि ᵛजुहोतन । जुहोतनेति छान्दसं पदम् । आ जुहुतेत्यर्थः ॥ १ ॥

सुस॑मिद्धाय शो॒चिषे॑ घृ॒तं ती॒व्रं जु॑होतन ।
अ॒ग्नये॑ जा॒तवे॑दसे ॥ २ ॥

सुस॑मिद्धा॒येति॒ सु॒ऽस॑मिद्धाय । शो॒चिषे॑ । घृ॒तम् । ती॒व्रम् । जु॒हो॒त॒न॒ ।
अ॒ग्नये॑ । जा॒तवे॑दस॒ इति॑ जा॒तऽवे॑दसे॒ ॥ रैं ॥ २ ॥

सा– द्वितीयस्याः ऋचः पाठस्तु– ' सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन । अग्नये जातवेदसे ' इति । ᵛसुसमिद्धाय शोभनतया सम्यग्दीप्ताय अत एव ᵛशोचिषे ᵛशोचिष्मते दीप्तिमते⌋ ᵛजातवेदसे, जातं वेत्ति वेदयतीति वा जातवेदाः, तथाविधाय ᵛअग्नये ᵛतीव्रं ᵛघृतं ⌊स्वादुतमं⌋ समग्रं वाऽऽज्यं ᵛजुहोतन जुहुत ॥२॥

आ– तत्र जपति– ' सुसमिद्धाय ' इति । वसुश्रुतः ऋषिः । ᵛसुसमिद्धाय शोभनतया सम्यग्दीप्ताय ᵛशोचिषे, शुचि दीप्तौ, शोचिषे शोचिष्मते दीप्तिमते ᵛजातवेदसे, जातं वेत्ति वेदयतीति जातवेदाः, तस्मै ᵛअग्नये ᵛतीव्रं पटुतरं समग्रं ᵛघृतं गव्यं विहितसंस्कारैः संस्कृतं ᵛजुहोतन, जुहोतनेति छान्दसं पदं, जुहुत ॥ २ ॥

---

1. B1 before समिधा adds : ॐ ब्रह्मणे नमः ॥ ॐ; H1 एभ्यः for एतेभ्यः
2. B1 om. अग्नेर्वा
3. B1 om. समिधः
6. B1 आतिथ्यं for आतिथ्य°; B1 संदीपयन्त, H1 संदीपयती for संदीपयत
7. B1 om. पदम्
14. C शुचिष्मते for शोचिष्मते
15. P1 वेद for वेत्ति
17. B1 वसुः श्रुवाः, H1 वसुस्रुतिः for वसुश्रुतः
18. B1 °दीप्तये for °दीप्ताय; H1 after second शोचिषे adds : समिधाग्निमित्याद्यभिहितगुणे योऽग्निः

तं त्वा॑ स॒मिद्भि॑रङ्गिरो घृ॒तेन॑ वर्धयामसि ।
बृ॒हच्छो॑चा यविष्ठ्य ॥ ३ ॥

तम् । त्वा॒ । स॒मिद्भि॒रिति॑ स॒मित्ऽभिः॑ । अ॒ङ्गि॒र॒ः । घृ॒तेन॑ । व॒र्ध॒या॒म॒सि॒ ।
बृ॒हत् । शो॒च॒ । य॒वि॒ष्ठ्य॒ ॥ ३ ॥

सा– तृतीयस्या ऋचः पाठस्तु– ‘तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि । बृहच्छोचा यविष्ठ्य’ इति । हे ᵛअङ्गिरः । अङ्गतिर्गत्यर्थः । रप्रत्ययो मत्वर्थीयः । तत्तद्यागेषु गतिमन्नग्ने, ᵛतं ᵛत्वा तथाविधं त्वां ᵛसमिद्भिः यज्ञसंबन्धिकाष्ठैः ᵛघृतेन संस्कृताज्येन च ᵛवर्धयामसि प्रवृद्धं कुर्मः । हे ᵛयविष्ठ्य, अतिशयेन युवा यविष्ठः, तत्र साधुर्यविष्ठ्यः, कदाचिदपि स्थविरत्वरहित इत्यर्थः । तथाविध हे अग्ने, ᵛबृहत् ᵛशोच । प्रवृद्धं यथा भवति तथा दीप्यस्व ॥३॥

आ– ‘तं त्वा’ इति । ऋषिर्भरद्वाजः । ‘समिधाग्निम्’ इत्याद्यभ्याहितगुणो योऽग्निः ᵛतं ᵛत्वा त्वाम् हे ᵛअङ्गिरः । अङ्गतिर्गत्यर्थः । रो मत्वर्थीयः । अङ्गिरा इति । तत्संबोधनम् हे अङ्गिरः सर्वज्ञ । ᵛसमिद्भिः याज्ञिककाष्ठैः ᵛघृतेन ᵛवर्धयामसि । छान्दसः “इदन्तो मसिः” (पा. ७.१.४६) इतीकारः । वर्धयामः । ᵛबृहत् । बृहि वृद्धौ इत्यस्य रूपम् । बृहद्ब्रह्मरूपोऽसि । ᵛशोच, शुच दीप्तौ, शोच दीप्यस्व । ᵛयविष्ठ्य, यविष्ठो यवीयान्, सदा युवतमः । इष्ठनि परभूते “स्थूलदूर” (पा. ६.४.१५६) इत्यादिना यविष्ठः, तत्र साधुः यविष्ठ्यः, तत्संबोधनम् यविष्ठ्य ॥ ३ ॥

उप॑ त्वाग्ने ह॒विष्म॑तीर्घृ॒ताची॑र्यन्तु हर्यत ।
जुष॑स्व स॒मिधो॒ मम॑ ॥ ४ ॥

उप॑ । त्वा॒ । अ॒ग्ने॒ । ह॒विष्म॑तीः । घृ॒ताचीः॑ । य॒न्तु॒ । ह॒र्य॒त॒ ।
जु॒षस्व॑ । स॒मिध॒ इति॑ स॒म्ऽइधः॑ । मम॑ ॥ गं ॥ ४ ॥

---

7. V1 S1 C संस्कृताभिस्तव for संस्कृताज्येन; V1 प्रवृद्धिं for प्रवृद्धं.
8. P1 with marking above कदा° ins. in the margin :– युवन्शब्दस्य इष्ठनि परभूते स्थूलदूरयुवेत्यादिना यू इत्यादेशे सति ततः स्वार्थिको यकारस्तद्धितस्तेन यविष्ठ्येति रूपसिद्धिः
9. P1 with marking above दीप्यस्व ins. in the margin शोचतिर्दीप्तिकर्मा
12. B1 H1 अङ्गिरसः for अङ्गिरः; B1 यज्ञ° for याज्ञिक°; H1 om. इदन्तो ... इतीकारः [L 13]
14. B1 वह for बृहत्
15. B1 om. °दूर°

सा- कात्यायनः – "उप त्वेति जपति" (काश्रौ ४·८·६) इति । पाठस्तु– 'उप त्वाऽग्ने हविष्मतीर्घृताचीर्यन्तु हर्यत । जुषस्व समिधो मम' इति । हे अग्ने, हविष्मतीः हविष्मत्यः हविर्युक्ताः घृताचीः घृताच्यः घृतेनाक्ताः एताः समिधः त्वा उपयन्तु त्वां प्रत्युपगच्छन्तु । हर्यत हे कान्तिमान् इत्यर्थः । 'हर्यति आ चके' इति कान्तिकर्मसु (निघण्टु २.६.१०-११) पठितत्वात् । तथाविध हे अग्ने, मम मदीयाः समिधः जुषस्व सेवस्व ॥४॥

आ– 'उप त्वा' इति । भरद्वाजः– सर्वत्र ऋषिविशेषानुक्तौ सामान्यत उक्त एव ऋषिर्ज्ञातव्यः । हे भगवन् अग्ने, हविष्मतीः हविषा युक्ताः हविष्मत्यः । घृताचीः घृताच्यः समिधः । विभक्तिपरिणामः । त्वा त्वामग्निं उपयन्तु त्वां प्रत्युपगच्छन्तु । हर्यत, हर्यतिः प्रेप्साकर्मा । अत्र प्रेप्सामुत्पादयत । अतः मम मदीयाः समिधः जुषस्व सेवस्व ॥ ४ ॥

भूर्भुव॒ः स्व॒र्द्यौ॑रिव भू॒म्ना भूमि॑रिव व॒रि॒म्णा ।
तस्या॑स्ते पृथिवि देवयजनि पृ॒ष्ठे॒ऽग्निम॑न्ना॒दम॒न्ना॒द्या॒या द॑धे ॥ ५ ॥

भूः । भुव॑ः । स्व॑ः । द्यौरि॒वेति॒ द्यौःऽइ॑व । भू॒म्ना । भूमि॑रि॒वेति॒ भूमि॑ःऽइव । व॒रि॒म्णा ।
तस्या॑ः । ते॒ । पृ॒थि॒वि॒ । दे॒व॒य॒ज॒नीति॑ देवऽयजनि । पृ॒ष्ठे ।
अ॒ग्निम् । अ॒न्ना॒दमित्य॑न्न॒ऽअ॒दम् । अ॒न्ना॒द्या॒येत्य॑न्न॒ऽअद्या॑य । आ । द॒धे ॥ प्रै ॥ ५ ॥

सा- कात्यायनः – "दारुभिर्ज्वलन्तमादधाति भूर्भुव इति संभारेषु" (काश्रौ ४·९·१) इति । "भूर्भुवः स्वरिति पूर्ववत्" (काश्रौ ४·९·१६) इति च । अस्यायमर्थः –'आपो हिरण्यम्' इत्यादीन् पञ्च संभारान् संपाद्य स्फ्येनोल्लिखितायां शुद्धायां भूमौ तान् संभारानवस्थाप्य तेषु संभारेषु शुष्ककाष्ठैर्ज्वलन्तमग्निं 'भूर्भुवः' इत्यक्षरत्रयमुच्चारयन्नादध्यात् । तदिदं गार्हपत्याधानम् । तस्मात् प्राच्यां तथैव च संभारेषु 'भूर्भुवः सुवः' इति पञ्चाक्षराण्युच्चारयन्नादध्यात् । तदिदमाहवनीयाधानम् । सोऽयमर्थस्तित्तिरिणा– दर्शितः – "त्रिभिरक्षरैर्गार्हपत्यमादधाति । पञ्चभिराहवनीयम् । अष्टौ संपद्यते । अष्टाक्षरा गायत्री । गायत्रोऽग्निः । यावानेवाग्निस्तमादधे" (तैब्रा १·१·५) इति । अग्नेर्गायत्र्याः सह प्रजापतिमुखादुत्पन्नत्वाद्गायत्रत्वं द्रष्टव्यम् । एतेष्वाधानमन्त्रेषु 'भूः' इति प्रथमा व्याहृतिः । 'भुवः' इति द्वितीया । 'सुवः' इति तृतीया । एतास्तिस्रो व्याहृतयः पृथिव्यादिलोकत्रयनामानि । एतदुच्चारणपुरःसरं प्रजापतिना लोकत्रयस्य सृष्टत्वात् । अत एवाग्निरनुतिष्ठन् लोकत्रयमर्थंकथनेन स्मरेत् । एतासां व्याहृतीनां महिमा

---

6. B1 after अनुक्तौ adds तु
16. P1 with marking above भूर्भुवः ins. in the margin : त्रीणि यजूंषि प्राजापत्यार्षाणि आग्निवायुसूर्यदेवतानि; C S1 V1 अपो हिरण्यमित्यादीनि for आपो ... इत्यादीन्
17. P1 om. शुद्धायां
18. P1 प्राक् for प्राच्यां; V1 S1 C om. च
24. V1 S1 C अनुष्ठितलोकत्रयमर्थनेन for अनुतिष्ठन् ... °कथनेन

भूयान् । तं च कण्वः –" तदाहुर्यन्नर्चा न यजुषा न साम्नाऽग्निराधीयते । केन त्वाऽग्निः"(काशब्रा १.१.४.१०) इत्यादिना बहुधा प्रपञ्चयामास ॥

कात्यायनः – " इध्मपूर्वार्धं गृहीत्वा द्यौरिव भूम्नेत्याह " (काश्रौ ४.९.१७) इति । पाठस्तु– ' द्यौरिव भूम्ना भूमिरिव वरिम्णा । तस्यास्ते पृथिवि देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्यायाया दधे ' इति । देवा इज्यन्ते यस्यां पृथिव्यां सा देवयजनी । तथाविधे हे ▾पृथिवि, ▾तस्याः ▾ते ▾पृष्ठे देवयजनयोग्यायास्तवोपरि च ▾अग्निं गार्हपत्यादिरूपम् ▾आदधे स्थापयामि । किमर्थम् ? ▾अन्नाद्याय अत्तुं योग्यस्यान्नस्य सिद्ध्यर्थम् । कथं भूतमग्निम् ? ▾द्यौः ▾इव ▾भूम्ना, बहोर्भावो भूमा । यथा द्यौर्नक्षत्रादिबहुत्वेन युक्ता तथा ज्वालाबहुत्वेन युक्तम् । किं च ▾भूमिरिव ▾वरिम्णा । वरं श्रेष्ठं तस्य भावो वरिमा । यथा भूमिः सर्वप्राण्याश्रयत्वरूपेण श्रेष्ठत्वेनोपेता तथा सर्ववस्तुशोधकत्वरूपेण श्रेष्ठत्वेनोपेतम् । अत एवान्यत्र क्वचिद्विधिवाक्ये ' अग्नये पावकाय ' इति पावकत्वविशेषणमुक्तम् । मन्त्रान्तरे च "अग्निः शुचिव्रततमः" (तैसं १.३.१४) इत्याम्नातम् ॥५॥

आ– किं च – ' भूर्भुवःस्वः ' इति तिस्रो महाव्याहृतयः । प्रजापतेरार्षम् । अग्निवायुसूर्यदेवत्याः । क्रमेण गार्हपत्याहवनीययोराधानमन्त्राः पृथिव्यन्तरिक्षद्युलोकाभिधायकाः सर्वमन्त्रसारभूताः । इध्मपूर्वार्धं गृहीत्वा यजमानो जपति– ' द्यौरिव भूम्ना ' इति । यजमानाशीर्लिङ्गोक्तदेवत्या बृहती । ऋषिविशेषानुक्तौ तु सर्वत्र पूर्वाभिहित एव ऋषिर्द्रष्टव्यः । सर्वत्र विवक्षितार्थक्रमेणैव व्याख्यातम् । हे ▾पृथिवि [▾देवयजनि], देवा यस्यामिज्यन्ते सा, तत्संबोधनं देवयजनि । यस्याः पृथिव्याः पृष्ठे उपरि अग्निमाधाय यथा बहुत्वादिगुणसंपन्नो भवेयं तथाविधाय ▾तस्याः पृथिव्याः ▾ते तव ▾पृष्ठे । ▾भूम्ना ▾द्यौः ▾इव नक्षत्रादिबहुत्वेन बह्वी द्यौः इव । यद्वा– भूम्ना भूमाख्यब्रह्मणा संबन्धाद् ब्रह्माधिष्ठात्री द्यौरिव भूयासम् । भूमिः ▾इव ▾वरिम्णा, भूमिः यथा सर्वप्राणिनामाश्रयभूतेन श्रेष्ठे(? ष्ठत्वे)न महत्वेन वरीयसी तथा सर्वेषां स्यामिति । वरणीयरूपेण वरिम्णा श्रेष्ठतमेन वरीयांसम् । ▾अन्नादम् अन्नस्यात्तारम् । अस्मिन् त्वाम् ▾आदधे स्थापयामि । ▾अन्नाद्याय अन्नादनाय वाऽन्नभक्षणाय ॥ ५ ॥

---

1. V1 S1 C आदीयते for आधीयते
3. P1 इध्मः for इध्म°
7. P1 with marking above युक्ता ins. in the margin :
   यथा द्यौर्बह्वी नक्षत्रैरित्यादिश्रुतेः
8. C S1 om. वरं श्रेष्ठं
9. C V1 S1 °आश्रय° for आश्रयत्व°
14. H1 इध्मं for इध्म°
15. H1 यजुर् for ऋषि°
17. H1 अभवं for भवेयं
22. B1 बर्हणाय वाम्नं; H1 अन्नादनाय तदर्हणाय चाम्नं for अन्नादनाय वाऽन्नभक्षणाय

आऽयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ।
पितरं च प्रयन्त्स्वः ॥ ६ ॥

आ । अयम् । गौः । पृश्निः । अक्रमीत् । असदत् । मातरम् । पुरः ।
पितरम् । च । प्रयन्निति प्रऽयन् । स्वरिति स्वः ॥ झिं ॥ ६ ॥

सा– "आऽयं गौरिति चोपतिष्ठते सार्पराज्ञीभिः दक्षिणाग्निमादधाति" (काश्रौ ४.९.१८–१९) इति । 'आयं गौः' इत्यादीनां तिसृणामृचां सर्पराज्ञीति नामधेयम् । "अथ सर्पराज्ञ्या ऋग्भिरुपतिष्ठते" (काशब्रा १.१.४.२६) इति कण्वश्रुतेः, सर्पराज्ञा दृष्टत्वात् । ताभिर्ऋग्भिराहवनीयमुपतिष्ठते । दक्षिणाग्निमपि ताभिरेवादध्यात् । तत्र प्रथमाया ऋचः पाठस्तु– 'आऽयं गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः' इति । गच्छतीति ᵛगौः । यज्ञनिष्पत्तये तत्तद्यजमानगृहेषु गन्ता ᵛपृश्निः चित्रवर्णः लोहितशुक्लादिबहुविधज्वालैरुपेतः । तथाविधः ᵛअयं दृश्यमानोऽग्निः ᵛअक्रमीत् सर्वत आहवनीयगार्हपत्यदक्षिणाग्निस्थानेषु क्रमणं पादप्रक्षेपं कृतवान् । यस्मादेवं तस्मात् ᵛपुरः प्राच्यां दिशि ᵛमातरं पृथिवीम् ᵛअसदत् आसीदत् आहवनीयरूपेण प्राप्तवान् । तथा ᵛस्वः ᵛप्रयन् आदित्यरूपेण स्वर्गे संचरन् ᵛपितरं ᵛच द्युलोकमपि असदत् प्राप्तवान् । भूलोकद्युलोकयोर्मातापितृत्वमन्यत्रापि श्रूयते– "द्यौः पिता पृथिवी माता" (द्र. ऋ १.८९.४) इति ॥६॥

आ– 'आऽयं गौः' इत्याद्यास्तृचः सार्पराज्ञार्षं गायत्र आग्नेयः आहवनीयाग्न्युपस्थाने विनियुक्तः । परापररूपेण वाग्निर् (?) अग्निः स्तूयते । 'आऽयं गौः' इति । ᵛअयम् अग्निः ᵛगौः । गम्लृ सृप्लृ गतौ । गच्छतीति गौः । गन्ता । ᵛपृश्निः नानारूपः अग्निरूपो वा ᵛअसदत् अभवत् । ततः पुरस्तात् प्राच्यां दिशि प्रातरादित्यात्मना ᵛमातरं पृथिवीम् ᵛअक्रमीत् ऐश्वर्यरूपेण क्रमते । एवं पृथिवीमनुगृह्य ᵛप्रयन् प्रगच्छन् ᵛस्वः आदित्यः ᵛपितरं द्युलोकं ᵛच अक्रमीत् ॥ ६ ॥

अन्तश्चरति रोचनाऽस्य प्राणादपानती ।
व्यख्यन् महिषो दिवम् ॥ ७ ॥

---

6. C S1 V1 om. अथ ... दृष्टत्वात् (L. 7)
7. P1 with marking above आयं ins. in the margin :–
   आऽयं गौरित्याद्यास्तृचः सार्पराज्यार्षं गायत्र आग्नेय्यः ।
11. C V1 S1 after °स्थानेषु add : सर्वतः
13. C V1 S1 °पितृरूपत्वे for °पितृत्वं; C श्रूयेते for श्रूयते
15. H1 आग्नेय्यः आग्नेयः
16. H1 °युक्ताः for °युक्तः
17. B1 त्राश्मि° for अग्नि°
20. B1 चक्रमानः for च अक्रमीत्

अ॒न्तरित्य॒न्तः । च॒र॒ति॒ । रो॒च॒ना । अ॒स्य । प्रा॒णात् । अ॒पा॒न॒तीत्य॑प॒ऽअ॒न॒ति ।
वि । अ॒ख्य॒त् । म॒हि॒षः । दिव॑म् ॥ ७ ॥

सा– द्वितीयस्या ऋचः पाठस्तु– ‘अन्तश्चरति रोचनाऽस्य प्राणादपानती । व्यख्यन् महिषो दिवम्’ इति । ᵛअस्य अग्नेः ᵛरोचना काचिद्दीप्तिः ᵛअन्तः ᵛचरति । किं कुर्वती ? ‘प्राणात् ᵛअपानती, अन प्राणने, प्राणात् प्राणव्यापारादूर्ध्वमपानव्यापारं कुर्वती । प्राणापानयोर्वायुविशेषयोः प्रेरिकेत्यर्थः । जठराग्निरूपेण प्राणिनामुदरे चरतीति यावत् । सति हि जठराग्नौ जीवनहेतोरौष्ण्यस्य शरीरे सद्भावात् प्राणापानौ प्रवर्तेते । शरीरस्थौष्ण्यस्य पुरुषजीवनत्वमन्यत्र श्रुतम्– “उष्ण एव जीविष्यञ्च्छान्तो मरिष्यन्” (शब्रा ८.७.२.११) इति । महि माहात्म्यं यागकर्तृस्वरूपं सनोति ददातीति ᵛमहिषः अग्निः । स च ᵛदिवं द्युलोकं भोगस्थानं ᵛव्यख्यत् । अनुष्ठातृभ्यो विशेषेण प्रकाशितवान् ॥ ७ ॥

आ– एवमादित्यरूपेणाग्निं स्तुत्वा अथेदानीं वायुरूपेणाग्निं स्तौति– ‘अन्तश्चरति’ इति । ᵛअस्य अग्नेः ᵛरोचना । रुच दीप्तौ । रोचनाख्या वाय्वात्मिका अग्नेः शक्तिः ᵛअन्तः द्यावापृथिव्योरन्तः अन्तरिक्षे ᵛचरति । किं कुर्वाणश्चरति ? ᵛप्राणात् ᵛअपानती सर्वप्राणिषु प्राणाद् अनन्तरम् अपानती अपानव्यापारं कुर्वती चरति । अपानादनन्तरं प्राणती प्राणनव्यापारं कुर्वती चरति । एवं वाय्वादित्यात्मना स्तूयमानः स्तोतॄणां किं करोति तदाह– ‘व्यख्यन् महिषो दिवम्’ इति । महिष इत्यग्निनाम । महि माहात्म्यं सनोति ददाति इति ᵛमहिषः अग्निः । ᵛदिवं भोगस्थानं द्युलोकं ᵛव्यख्यत् । ख्यातिर्ज्ञानार्थः । अस्य फलत्वेन प्रकाशितवानित्यर्थः ॥७॥

त्रि॒ꣳशद्धाम॒ वि रा॑जति॒ वाक् प॑त॒ङ्गाय॑ धीयते ।
प्रति॒ वस्तो॒रह॒ द्युभि॑ः ॥ ८ ॥ (१) ॥

त्रि॒ꣳशत् । धाम॑ । वि । रा॒ज॒ति॒ । वाक् । प॒त॒ङ्गाय॑ । धी॒य॒ते॒ ।
प्रति॑ । वस्तोः॑ । अह॑ । द्यु॒भि॒रिति॑ द्यु॒ऽभिः॑ ॥ स्वा ॥ ८ ॥ (१) ॥

---

4. C S1 V1 after चरति trans. जठराग्नि ... चरति (L 3-4) and om. इति यावत्; (L)
5. C S1 V1 om. अन प्राणने.
7. C S1 V1 शरीरस्य for शरीरस्य°; P1 एष्यच् for जीविष्यन्
8. V1 S1 C महिमा for महि; V1 C S1 मनोति for सनोति
11. B1 om. रुच दीप्तौ । रोचनाख्या; B1 after रोचनाख्या for रोचना सा; H1 अथ for अन्तः
14. H1 after चरति ins. इति, H1 इति for तदाह
16. B1 om. अस्य ... इत्यर्थः

सा– तृतीयस्याः ऋचः पाठस्तु– ‘ त्रिंशद्धाम वि राजति वाक् पतङ्गाय धीयते । प्रति वस्तोरह द्युभिः ’ इति । ^{v}धाम स्थानम् । तच्च ^{v}त्रिंशत् मासगतदिनभेदेन त्रिंशत्संख्याकम् । तदेतत् ^{v}विराजति विशेषेण दीप्यते, आलस्यरहितानां यजमानानामनुष्ठानेन आहवनीयाद्यग्नीनां स्थानं मासगतेषु त्रिंशत्संख्याकेषु दिनेषु विशेषेण शोभत इत्यर्थः । ^{v}पतङ्गाय, पक्षिसदृशोऽग्निः पतङ्गः । यथा पक्षी कश्चिदेकस्मात् स्थानादपरं स्थानं गच्छति तथाऽग्निरपि गार्हपत्यस्थानादाहवनीयस्थानं गच्छतीत्यग्नेः पक्षिसादृश्यम् । तथाविधाग्निप्रीत्यर्थं ^{v}वाक् ^{v}धीयते स्तुतिरूपा वागुच्चार्यते । ^{v}अह इति निपातः पूर्वोक्तनिषेधार्थः । तथा हि अस्या ऋचः पूर्वार्धेऽग्निमाहात्म्यख्यापनाय यद्वाक्यद्वयेनार्थद्वयमुक्तं तावदेव न भवति । किंतु अन्यदपि माहात्म्यमुच्यत इति भावः । ^{v}वस्तोः इत्यहर्नामसु पठितम् । ^{v}प्रतिवस्तोः प्रत्यहम् । ^{v}द्युभिः क्रीडाविशेषैर्द्योतनैर्वा । दीव्यतीति [द्युः]। दीव्यति धातोस्तदर्थवाचित्वात् । अयमग्निः स्तूयत इत्यध्याहारः ॥९॥

इति तृतीयोऽध्याये प्रथमोऽनुवाकः ॥ १ ॥

आ– ‘ त्रिंशद्धाम वि राजति ’ । ‘ त्रिंशत्सु धामसु ’ इति विभक्तिपरिणामः । धामानि त्रयाणि, स्थानानि नामानि जन्मानीति । स्थानान्यत्राभिप्रतानि । अहोरात्रे त्रिंशन्मुहूर्ताः येऽत्र गृह्यन्ते । त्रिंशत्सु स्थानेषु मुहूर्ताख्येषु यज्ञे या स्तुतिलक्षणा ^{v}वाक् ^{v}विराजति शोभते स्तूयमाना सा वाक् ^{v}पतङ्गाय । पतन् गच्छतीति पतङ्गोऽग्निः । स ह्यरण्योः पतन् गार्हपत्यभावं गच्छति गार्हपत्यादाहवनीयादिभावमिति । तस्मै पतङ्गाय ^{v}धीयते अग्न्यर्थमुच्चार्यते । सर्वदेवतासंबन्धिनीभिः स्तुतिभिः सर्वात्मभावेन अग्निरेव स्तूयत इत्यर्थः । ‘ प्रतिवस्तोरह द्युभिः ’ इति । द्युर्भानुर्वस्तोरित्यहर्नामसु (निघण्टु १·९·१-३) पठितम् । ^{v}अह इति निपातो विनिग्रहार्थीयः (निरुक्त १.५) । न केवलं त्रिंशत्सु धामसु विराजति पतङ्गाय धीयते च । किं तर्हि ^{v}प्रातिवस्तोः प्रत्यहं च या स्तुतिलक्षणा या च ^{v}द्युभिः अहोभिरहोऽवयवभूतैः स्वयं वापि स्तुत्या जाता, सा च वाक् पतङ्गाय धीयते । नान्यस्मै देवतायै ॥३॥(१)॥

[इति प्रथमोऽनुवाकः]

---

5. V1 S1 C तद्वद् for तथा
6. V1 S1 C च for वाग्, V1 S1 C om. तथा हि
8. V1 S1 C अर्थः for भावः
9. P1 दीव्यन्ति for दीव्यति, C V1 S1 P1 श्रोत्रन्त° for स्तूयत°
12. H1 धामानि जन्यानि for नामानि जन्मानि
16. B1 °भावं वाग्निर्; H1 भावं नाग्निर्- we have corrected this as °भावेनाग्निर्
17. B1 om. वस्तोर्
19. H1 यद्वा for च या

[अथ द्वितीयोऽनुवाकः]

सा– प्रथमेऽनुवाकेऽग्न्याधानमन्त्रा उक्ताः । द्वितीये त्वग्निहोत्रमन्त्रा उच्यन्ते ।

अग्निज्योतिषं त्वा वायुमतीं प्राणवतीम् ।
स्वर्ग्यां स्वर्गायोपदधामि भास्वतीम् ॥
अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा ॥ १ ॥

अग्निज्योतिषमित्यग्निऽज्योतिषम् । त्वा । वायुमतीमिति वायुऽमतीम् ।
प्राणवतीमिति प्राणऽवतीम् ।
स्वर्ग्यामिति स्वःऽग्याम् । स्वर्गायेति स्वःऽगाय । उप । दधामि । भास्वतीम् ।
अग्निः । ज्योतिः । ज्योतिः । अग्निः । स्वाहा ॥ प्रं ॥ १ ॥

कात्यायनः – "उपविश्य समिधमादधात्यग्निज्योतिषम्" (काश्रौ ४.१४.१३) इति । पाठस्तु– 'अग्निज्योतिषं त्वा वायुमतीं प्राणवतीम् । स्वर्ग्यां स्वर्गायोपदधामि भास्वतीम्' इति । हे समित्, 'स्वर्गाय स्वर्गसिद्ध्यर्थं 'त्वा नानाविधशोषणयुक्तां त्वाम् 'उपदधामि वह्नौ प्रक्षिपामि । कथं भूतां त्वाम्? 'अग्निज्योतिषम् अग्निसंबन्धि ज्योतिर्यस्यां समिध्यतेऽभिव्यज्यते तादृशीम् । शुष्कायाः समिधः अग्निज्वालाहेतुत्वं प्रसिद्धम् । 'वायुमतीं वायुसहाय्योपेताम् । सति हि वायुसाहाय्ये काष्ठेषु ज्वाला पद्वी भवति । 'प्राणवतीं बलवतीम् । "प्राणो वै बलम्" इति श्रुत्यन्तरम् । शुष्कतृणपर्णादिष्विव अग्निज्वाला समिधि सहसा न शाम्यतीत्यर्थः । 'स्वर्ग्याम् अनुष्ठातॄणां स्वर्गहेतुम् । 'भास्वतीम् अग्नेः समिन्धनेन सूर्यवत् प्रकाशोपेताम् ।

कात्यायनः –"प्रदीप्तामभिजुहोत्यग्निर्ज्योतिरिति" (काश्रौ ४.१४.१४) इति । या समित् प्रदीप्तातामभिलक्ष्य जुहुयात् । पाठस्तु– 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा' इति । योऽयम् 'अग्निः देवः स एव 'ज्योतिः दृश्यमानज्योतिःस्वरूपः । यच्चेदं दृश्यमानं 'ज्योतिः तदेव 'अग्निः देवः । देवस्य ज्योतिषश्च कदाचिदपि अवियोगादेकत्वेन प्रतिपादनम् । 'स्वाहा ज्योतीरूपायाग्नये हविः प्रदत्तम् । सोऽयं सायंकालीनोऽग्निहोत्रहोमः ॥१॥

---

11. H1 with marking above अग्नि° ins. in the margin :– अग्निर्ज्योतिषमित्याद्योऽष्टौ होममन्त्रा एषां प्रजापतिः ऋषिः तत्राद्ये द्वे लिङ्गोक्तदेवत्ये बृहत्यौ ।
12. P1 om. त्वा
13. VI S1 C after °ज्योतिषम् add; त्वा वायुमतीम् V1 S1 C समिधि for समिध्यते
14. P1 om. हि
15. P1 शुक्र° for शुष्क° P1 om. इव
20. V1 S1 C दृश्यमानं for दृश्यामान°; V1 S1 C °स्वरूपम् for °स्वरूपः

आ– ‘ अग्निर्ज्योतिषम् ’ इत्यादयः ‘ उप प्रयन्तः ’ इत्यस्मात् प्राक् स्थिता अग्निहोत्रहोममन्त्राः । एषां प्रजापतिर्ऋषिः । लिङ्गोक्तदेवत्ये आद्ये द्वे बृहत्यौ । vअग्निर्ज्योतिषम् अग्नेर्ज्योतिषा ज्योतिषं ज्योतिष्मतीमग्निर्ज्योतिषम् । vवायुमतीं वाय्वात्मकशक्तिमतीम् । vप्राणवतीं प्राणशक्तिमतीम् । vस्वर्ग्यां स्वर्गसाधनयोग्याम् । vभास्वतीं सूर्यात्मिकाम् । एवमग्निवायुसूर्यात्मिकां परां देवताम् । समिधं चाग्न्यात्मिकां चित्यं चितिं चितिसंज्ञानमित्येवमात्मिकां समिधम् vउपदधामि । तथा च श्रुतिः – “ स यथाऽग्निं चित्यमाप्नोति समिधमेतामभ्यादधातीष्टकामेवैतामुपधत्ते तदप्येतदग्निर्ज्योतिषं त्वा वायुमतीं प्राणवतीम् । स्वर्ग्यां॑ऽ स्वर्गायोपदधामि भास्वतीमिति सायं सूर्यज्योतिषं त्वा वायुमतीं प्राणवतीम् । स्वर्ग्यां स्वर्गायोपधामि भास्वतीमिति प्रातरथ यदस्मिन् जुहोति यथा संचिते जुहुयादेवं तत् स सप्तविंशतिशतानि सायंप्रातः समिधोऽभ्यादधात्येतावत्योऽग्नेश्चित्येस्येष्टका इत्येक आहुः ” (काशब्रा ३.१.५) इति । vअग्निः vज्योतिः योऽग्निः स एव ज्योतिः । यत् vज्योतिः स एव vअग्निः इति । कोऽर्थः ? अग्नये ज्योतिषे vस्वाहा सुहुतमस्तु ॥ १ ॥

सूर्य॑ज्योतिषं त्वा वा॒युम॑तीं प्रा॒णव॑तीम् ।
स्व॒र्ग्यां॑ऽ स्व॒र्गायोप॑दधा॒मि भास्व॑तीम् ॥
सूर्यो॒ ज्योति॒र्ज्योति॒ः सूर्य॒ः स्वाहा॑ ॥ २ ॥

सूर्य॑ज्योतिष॒मिति॒ सूर्य॑ऽज्योतिषम् । त्वा॒ । वा॒यु॒म॒ती॒मिति॑ वा॒यु॒ऽम॒ती॑म् ।
प्रा॒णव॑ती॒मिति॑ प्रा॒णऽव॑तीम् ।
स्व॒र्ग्या॒मिति॑ स्व॒ःऽग्याम् । स्व॒र्गाये॒ति॑ स्व॒ःऽगाय॑ । उप॑ । द॒धा॒मि॒ । भास्व॑तीम् ।
सूर्य॑ः । ज्योति॑ः । ज्योति॑ः । सूर्य॑ः । स्वाहा॑ ॥ प्रु ॥ २ ॥

सा– अनयैव रीत्या प्रातःकालेऽपि समिदाधानं होमं च मन्त्रद्वयेन कुर्यादिति कात्यायनेनाभिप्रेतम् । तयोरुभयोर्मन्त्रयोः पाठस्तु– ‘ सूर्यज्योतिषं त्वा वायुमतीं प्राणवतीं स्वर्ग्यां स्वर्गायोपदधामि भास्वतीम् ।

---

1. H1 कृताः for स्थिताः
4. H1 °आधान° for °साधन°; H1 after भास्वतीं adds सूर्यरूपां
8. B1 om. सायं … भास्वतीमिति; B1 अद्य for अथ
9. B1 एवं तत् for एव
11. B1 om. योऽग्नि … यज्ज्योतिः
21. C S1 मन्त्र° for मन्त्रयोः; P1 with marking above सूर्य° ins. in the margin लिङ्गोक्तदेवत्ये द्वे बृहत्यौ ।

सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ' इति । पूर्वोक्ताग्निविषयमन्त्रद्वयवदिदं सूर्यविषयं व्याख्येयम् । कालद्वये मन्त्रद्वयव्यवस्थां कण्वो विस्पष्टं दर्शयति–" स जुहोत्यग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायꣳ सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः " (काशब्रा १.३.१.२१) इति । सूर्यसंबन्धि यत् तेजोऽस्ति तत्सर्वं रात्रावग्निं प्रविशति तस्मात् सायं होमे ' अग्निर्ज्योतिः ' इति मन्त्रो युक्तः । उदयकालेऽप्यग्निसंबन्धि ज्योतिः सूर्यं प्रविशति तस्मात् प्रातः ' सूर्यो ज्योतिः ' इति मन्त्रो युक्तः । तमेतमर्थं तित्तिरिः संगृह्य दर्शयति– " अग्निं वावादित्यः सायं प्रविशति । तस्मादग्निर्दूरान्नक्तं ददृशे । उभे हि तेजसी संपद्येते । उद्यन्तं वावादित्यमग्निरनुसमारोहति । तस्माद्धूम एवाग्नेर्दिवा ददृशे " (तैब्रा २.१.२) इति ॥२॥

आ– ' सूर्यज्योतिषं त्वा ' इत्येवमेत्र द्रष्टव्यः । ᵛसूर्यज्योतिषं सूर्यात्मकज्योतिष्मतीं समिधं समिदवाहितसूर्यात्मिकां देवतां तत्राभिहितचितिं वा चितिदृष्टिदृष्टां समिधं वा ᵛत्वा त्वां ᵛवायुमतीं ᵛप्राणवतीं ᵛस्वर्ग्यां ᵛभास्वतीं त्वाम् ᵛउपदधामि । ᵛस्वर्गाय स्वर्गार्थम् । ' सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ' । सूर्याय ज्योतिषे स्वाहेति । अयमपि होममन्त्रः ॥ २ ॥

स॒जूर्दे॒वेन॑ सवि॒त्रा स॒जू रात्र्येन्द्र॑वत्या ।
जु॒षा॒णो अ॒ग्निर्वे॑तु॒ स्वाहा॑ ॥ ३ ॥

स॒जूरिति॑ स॒ऽजूः । दे॒वेन॑ । स॒वि॒त्रा । स॒जूरिति॑ स॒ऽजूः । रात्र्या॑ । इन्द्र॑व॒त्येतीन्द्र॑ऽवत्या ।
जु॒षा॒णः । अ॒ग्निः । वे॒तु॒ । स्वाहा॑ ॥ ८ ॥ ३ ॥

सा– कात्यायनः–" सजूरिति वा " (काश्रौ ४.१४.१४) इति । जुहोतीत्यनुवर्तते । पूर्वोक्ताभ्याम् ' अग्निर्ज्योतिः सूर्यो ज्योतिः ' इति मन्त्राभ्यां सह ' सजूः ' इत्यादिकं मन्त्रद्वयं होमे विकल्पितमित्यर्थः । तत्र प्रथममन्त्रपाठस्तु– ' सजूर्देवेन सवित्रा सजू राज्येन्द्रवत्या । जुषाणो अग्निर्वेतु स्वाहा ' इति । 'सवित्रा 'देवेन प्रेरकेण परमेश्वरेण सह 'सजूः । जुषी प्रीतिसेवनयोरिति धातुः । समाना जूः प्रीतिर्यस्यासौ सजूः । तथा 'इन्द्रवत्या 'रात्र्या इन्द्रेण देवेनोपेतया रात्रिदेवतया 'सजूः समानप्रीतिः । उक्तगुणद्वयवान् 'अग्निः देवः 'जुषाणः अस्मासु प्रीतियुक्तः सन् 'वेतु अस्मदीयं कर्म प्राप्नोतु । वी गतिव्याप्तिप्रजनकान्त्यसनखादनेष्विति धातुः । 'स्वाहा तथाविधायाग्नये हूयमानमिदं द्रव्यं दत्तम् ॥३॥

आ– ' सजूर्देवेन ' इति लिङ्गोक्तदेवत्या गायत्री । जुषी प्रीतिसेवनयोः । जुषाणः प्रीत्या सह वर्तमानः अग्निः सजूः । ᵛदेवेन ᵛसवित्रा सूर्येण ᵛसजूः समानप्रीतिः समानप्रियवान् ।

---

1. P1 पूर्व° for सूर्य°
4. P1 om. उदय° ... युक्तः [L 17]
9. B1 समित्तपदित for समिदवहित°; B1 तव for तत्र; H1 °न्त्वात्मकं for वा त्वा त्वां
10. B1 om. प्राणवतीं
18. P1 with marking above सजूर् ins. on the margin लिङ्गोक्तदैवत्यं गायत्रं द्वयम् ।
22. P1 om. इति धातुः
23. B1 °देवता for °देवत्या

^vइन्द्रवत्या इन्द्रसंयुक्तया ^vरात्र्या रात्रिदेवतया ^vसजूः । ^vजुषाणः सेवमानः आहुतिमास्वादयन् ^vअग्निः ^vवेतु । वेतिरिह पानार्थः । स्वादनार्थो वा । पिबतु स्वादयतु वा ॥ ३ ॥

सजूर्देवेन सवित्रा सजूरुषसेन्द्रवत्या ।
जुषाणः सूर्यो वेतु स्वाहा ॥ ४ ॥

सजूरिति सऽजूः । देवेन । सवित्रा । सजूरिति सऽजूः । उषसा । इन्द्रवत्येतीन्द्रऽवत्या । ५
जुषाणः । सूर्यः । वेतु । स्वाहा ॥ टं ॥ ४ ॥

सा– द्वितीयमन्त्रपाठस्तु– 'सजूर्देवेन सवित्रा सजूरुषसेन्द्रवत्या । जुषाणः सूर्यो वेतु स्वाहा' इति । अग्निमन्त्रवदयं सूर्यमन्त्रो व्याख्येयः । अत्रोषोदेवता पूर्वोक्तरात्रिदेवतायाः स्थाने योजनीया । अत्राग्निमन्त्रस्य रात्रिमत्त्वं कण्वो व्याचष्टे– "सजूर्देवेन सवित्रेति सवितृमत्प्रसवाय सजू रात्र्येन्द्रवत्येति रात्र्या मिथुनीकरोतीन्द्रो यज्ञस्य देवता सेन्द्रं करोति जुषाणो अग्निर्वेतु स्वाहेति प्रत्यक्षं तस्यै देवतायै १० जुहोति यस्या अग्निहोत्रम्" (काशब्रा १.३.१.२६) इति । सूर्यमन्त्रोऽपि तथैव– "सजूर्देवेन सवित्रेत्येव प्रातः" (काशब्रा १.३.१.२७) इत्यादिना व्याख्यातः ॥४॥

आ– अथ प्रातर्होमः । 'सजूर्देवेन सवित्रा' [इति] । लिङ्गोक्तदेवत्या गायत्री । सर्वप्राणिनां प्रसवकर्त्रा श्रीभगवता सूर्येण समानप्रीतियुक्तो भूत्वा । ^vइन्द्रवत्या इन्द्रयुक्तया ^vउषसा । उषःशब्देन सूर्यप्रदीप्तिरत्रोच्यते । तया युक्तो भूत्वा । ^vजुषाणः आहुतिमास्वादयन् १५ ^vसूर्यः ^vवेतु पिबतु । ^vस्वाहा सुहुतमाह्वानं चास्तु । अयमपि होममन्त्रः ॥ ४ ॥

इह पुष्टिं पुष्टिपतिर्दधात्विह प्रजाꣳ रमयतु प्रजापतिः ।
अग्नये गृहपतये रयिमते पुष्टिपतये स्वाहा ।
अग्नयेऽन्नादायान्नपतये स्वाहा ॥ ५ ॥

इह । पुष्टिम् । पुष्टिपतिरिति पुष्टिऽपतिः । दधातु । २०
इह । प्रजामिति प्रऽजाम् । रमयतु । प्रजापतिरिति प्रजाऽपतिः ।
अग्नये । गृहपतय इति गृहऽपतये । रयिमत इति रयिऽमते । पुष्टिपतय इति पुष्टिऽपतये । स्वाहा ।
अग्नये । अन्नादायेत्यन्नऽअदाय । अन्नपतय इत्यन्नऽपतये । स्वाहा ॥ ५ ॥

---

9. P1 om. इति
10. P1 सेन्द्र° for सेन्द्रं
11. V1 S1 C यस्य for यस्याः
15. H1 प्रभा for प्रदीप्तिर्

सा– कात्यायनः – “ ... पुष्टिकामः । स्थाल्याः स्रुवेणेह पुष्टिम् ... इति गार्हपत्ये ” (काश्रौ ४.१४.२२-२३) इति । जुहोतीत्यनुवर्तते । स च होमः स्थालीरूपेण स्रुवेण कार्यः । पाठस्तु– ‘ इह पुष्टिं पुष्टिपतिर्दधात्विह प्रजाꣳ रमयतु प्रजापतिः । अग्नये गृहपतये रयिमते पुष्टिपतये स्वाहा ’ इति । ^{v}पुष्टिपतिः पुष्टिपालको देवः ^{v}इह कर्मणि ^{v}पुष्टिं ^{v}दधातु पोषणं संपूर्तिं करोतु । ^{v}इह अस्मद्गृहे ^{v}प्रजां पुत्रादिरूपां ^{v}प्रजापतिः प्रजापालको देवः ^{v}रमयतु क्रीडयतु । ^{v}गृहपतये गृहस्य पालकाय ^{v}रयिमते धनवते ^{v}पुष्टिपतये पुष्टिपालकाय ^{v}अग्नये गार्हपत्यदेवाय ^{v}स्वाहा हविर्दत्तम् ।

कात्यायनः – “ अग्नयेऽन्नादाय ...इति दक्षिणाग्नौ ” (काश्रौ ४.१४.२५) इति । जुहोतीत्यनुवर्तते । पाठस्तु– ‘ अग्नयेऽन्नादायान्नपतये स्वाहा ’ इति । अन्नं पुरतः प्राप्तं सर्वमत्तीत्यन्नादः । तथान्नपतिरस्मदीयान्नस्य पालकः । तथाविधाय ^{v}अग्नये ^{v}स्वाहा हविर्दत्तम् ।

आ– ‘ इह पुष्टिम् ’ इति लिङ्गोक्तदेवत्यं यजुः । पुष पुष्टौ । ^{v}इह ^{v}पुष्टिं पोषणं ^{v}पुष्टिपतिः ^{v}दधातु । ^{v}इह ^{v}प्रजां पुत्रादिसंपत्तिम् । सिद्धवत् कृत्वाऽह–^{v}रमयतु क्रीडयतु ^{v}प्रजापतिः इति । ^{v}अग्नये ^{v}गृहपतये ^{v}रयिमते धनवते ^{v}पुष्टिपतये ^{v}स्वाहा । स्वाहेति होमार्थः । ^{v}अग्नये ^{v}अन्नादाय । अन्नमत्तीत्यन्नादः तस्मै । [^{v}अन्नपतये] अन्नस्य पतिस्तस्मै ॥ ५ ॥

अनमित्रं मे अधरागनमित्रमुदक् कृधि ।
इन्द्रानमित्रं पश्चान्मेऽनमित्रं पुरस्कृधि ॥ ६ ॥
इन्द्रः पश्चादिन्द्रः पुरस्तादिन्द्रो अस्माँ२ अभि पातु विश्वतः ।
इन्द्रो जिघांꣳसतां मनांꣳसि विषूचीना व्यस्यतात् ॥ ७ ॥

अनमित्रम् । मे । अधराक् । अनमित्रम् । उदक् । कृधि ।
इन्द्र । अनमित्रम् । पश्चात् । मे । अनमित्रम् । पुरः । कृधि ॥ ञ्जीं ॥ ६ ॥
इन्द्रः । पश्चात् । इन्द्रः । पुरस्तात् । इन्द्रः । अस्मान् । अभि । पातु । विश्वतः ।
इन्द्रः । जिघांꣳसताम् । मनांꣳसि । विषूचीना । वि । अस्यतात् ॥ न्युं ॥ ७ ॥

सा– ‘ अनमित्रं मे, इन्द्रः पश्चात् ’ इति द्वौ मन्त्रौ जपार्थौ द्रष्टव्यौ । तयोः पाठस्तु–‘ अनमित्रं मे अधरागनमित्रमुदक्कृधि । इन्द्रानमित्रं पश्चान्मेऽनमित्रं पुरस्कृधि ’ । ‘ इन्द्रः पश्चादिन्द्रः पुरस्तादिन्द्रोऽस्माꣳ अभि पातु विश्वतः । इन्द्रो जिघाꣳसतां मनाꣳसि विषूचीना व्यस्यतात् ’ इति । हे ^{v}इन्द्र परमैश्वर्य-

---

1. P1 स्थाल्यां for स्थाल्याः; V1 S1 C स्रुवेह for स्रुवेणेह
2. P1 with marking above इह ins. on the margin– लिङ्गोक्तदैवत्यं यजुः ।
10. H1 हविः for यजुः
11. B1 प्राणं for प्रजां
12. H1 om. first स्वाहा; B1 after first स्वाहा ins. इति
22. P1 with marking above second अनमित्रं ins. on the margin– लिङ्गोक्तदैवत्यमनुष्टुप्छन्दस्कं यजुश्चरा बृहती

युक्ताग्ने, ᵛमे मम ᵛअधराक् दक्षिणतः, ᵛअनमित्रं अनस्य प्राणस्य मित्रं रक्षकं ᵛकृधि कुरु । यद्वा– अनमित्रं शत्रुरहितं स्थानं कुरु । तदा नुडागमश्छान्दसः । तथा ᵛउदक् मे उत्तरतः ᵛअनमित्रं ᵛकृधि । ᵛमे मम ᵛपश्चात् पश्चिमतः ᵛअनमित्रम् । कृधीति [अनु] वर्तते । ᵛमे मम ᵛपुरः पूर्वस्यां दिशि ᵛअनमित्रं ᵛकृधि ॥६॥

अयम् ᵛइन्द्रः ᵛपश्चात् पश्चिमदिशि ᵛअस्मान् ᵛअभिपातु सर्वतः पालयतु । तथा ᵛइन्द्रः ᵛपुरस्तात् पूर्वस्यां दिशि अस्मान् अभिपातु । तथेन्द्रः ᵛविश्वतः सर्वासु दिक्षु अस्मानभिपातु । अयम् ᵛइन्द्रः ᵛजिघांसताम् अस्मान् हन्तुमिच्छतां शत्रूणां ᵛमनांसि ᵛविषूचीना विष्वग्गमनानि, उद्दिष्टं स्थानं विहाय अन्यगमनयुक्तानि यथा भवन्ति तथा ᵛव्यस्यतात् । असु क्षेपणे, विशेषेण क्षिपतात् ॥७॥

आ– ‘ अनमित्रम् ’ इति । लिङ्गोक्तदेवत्याऽनुष्टुप् । हे ᵛइन्द्र, ᵛमे मम ᵛअधराक् दक्षिणतः, ᵛअनमित्रम् अनस्य प्राणस्य मित्रमग्निं ᵛकृधि कुरुतात् । ᵛउदक् ममोत्तरतः ᵛअनमित्रम् अग्निं कृधि । ᵛमे मम ᵛपश्चात् पश्चिमतः ᵛअनमित्रं कृधि । मम पुरः पुरस्तात् ᵛअनमित्रं ᵛकृधि ॥ ६ ॥

‘ इन्द्रः पश्चात् ’ इति लिङ्गोक्तदेवत्या बृहती । ᵛअस्मान् ᵛपश्चात् दिशः ᵛइन्द्रः ᵛअभिपातु । ᵛपुरस्तात् देशे अस्मान् ᵛइन्द्रः अभिपातु । ᵛविश्वतः सर्वाभ्यो दिग्भ्यः इन्द्रोऽस्मानभिपातु । ᵛजिघांसताम् अस्मान् हन्तुमिच्छतां शत्रूणां ᵛमनांसि ᵛविषूचीना विषूचीनानि । अञ्चु गतिपूजनयोः विष्वग्गमनानि, उद्दिष्टस्थानं विहाय अन्यथा गमनयुक्तानि यथा भवन्ति तथा ᵛव्यस्यतात् । असु विक्षेपणे । विक्षिपतात् ॥ ७ ॥

स॒मिद॑सि॒ समि॑द्धो मे अग्ने दीदिहि ।
स॒मे॒द्धा ते॑ अग्ने दीद्यासम् ॥ ८ ॥ (२) ॥

स॒मिदिति॑ स॒म्ऽइत् । अ॒सि॒ । समि॑द्ध॒ इ॒ति सम्॒ऽइ॑द्धः । मे॒ । अ॒ग्ने॒ । दी॒दि॒हि॒ ।
स॒मे॒द्धेति॑ स॒म्ऽए॒द्धा । ते॒ । अ॒ग्ने॒ । दी॒द्या॒स॒म् ॥ टं ॥ ८ ॥ (२)

सा– कात्यायनः – “ समिध आदधाति सर्वेषु यथापर्युक्षितं समिदसि ” (काश्रौ ४.१४.३०) इति । पाठस्तु– ‘ समिदसि समिद्धो मे अग्ने दीदिहि । समेद्धा ते अग्ने, दीद्यासम् ’ इति । हे ᵛअग्ने, त्वं

---

1. P1 with marking above दक्षिणतः ins. on the margin– उदक्शब्दसंनिधेरधराक् दक्षिणार्थः
2. V1 S1 C om. तदा...छान्दसः
7. V1 S1 C भवति for भवन्ति; V1 S1 C after क्षेपणे aff इति धातुः
10. H1 after कृधि ins. इति
22. P1 with marking above समिद् ins. on the margin– गौतमो राहुगण ऋषिराग्नेयी गायत्री ।

^{V}समित् ^{V}असि, अस्मदीयकाष्ठप्रक्षेपेण समित् सम्यगिध्यमानो दीप्यमानो भवसि। ^{V}समिद्धः अस्माभिर्दीपितः सन् ^{V}मे मदनुग्रहार्थं ^{V}दीदिहि अतिशयेन दीप्यस्व। दीधीङ् दीप्तिदेवनयोः। हे ^{V}अग्ने, ^{V}ते तव ^{V}समेद्धा सम्यक् दीपयिताऽहं ^{V}दीद्यासम्। त्वत्प्रसादादतिशयेन दीप्तो भूयासम् ॥८॥ (२)

इति तृतीयेऽध्याये द्वितीयोऽनुवाकः ॥

आ– 'समिदसि' इति। अवान्तरभेदेन गौतमो राहूगण ऋषिः। अग्निदेवत्या गायत्री। हे ^{V}अग्ने, ^{V}समित् ^{V}असि। समिध्यत इति समित्। ^{V}मे मम ^{V}समिद्धः दीप्तः ^{V}दीदिहि समिधमारूढः सन्। दीधीङ् दीप्तिदेवनयोरित्याद्यस्य रूपं दीदिहि इति। अतिशयेन दीप्यस्व। हे श्रीभगवन् ^{V}अग्ने, ^{V}ते तव त्वत्प्रसादात् ^{V}समेद्धा सम्यगभिवर्धमानोऽहं ^{V}दीद्यासम्। पुत्रपश्वन्नादिभिः सह ब्रह्मतेजोभिः दीप्तो भवेयम् इति यजमानाशीः ॥ ८ ॥

[इति द्वितीयोऽनुवाकः]

[अथ तृतीयोऽनुवाकः]

सा– द्वितीयेऽग्निहोत्रमन्त्रा उक्ताः। तृतीयेऽग्न्युपस्थानमन्त्रा उच्यन्ते।

उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये।
आरे अस्मे च शृण्वते ॥ १ ॥

उपप्रयन्त इत्युप॑ऽप्रयन्तः। अध्वरम्। मन्त्रम्। वोचेम। अग्नये।
आरे। अस्मे इत्यस्मे। च। शृण्वन्ते ॥ चौ ॥ १ ॥

तस्योपस्थानस्य कर्तव्यताम् –" अग्नौ ह वै देवाः सर्वान् पशून् संनिदधिरे " (काशब्रा १·४·१·१) इत्यादिना कण्वो बहुधा प्रपञ्चयामास।

कात्यायनः – "सायमाहुत्यां हुतायां यजमानोऽग्नी उपतिष्ठते उपप्रयन्त इति" (काश्रौ ४·१२·१) इति। अस्मिन्ननुवाके बहव उपस्थानमन्त्राः। तत्रायं प्रथमो मन्त्रः – 'उपप्रयन्तो अध्वरं

---

1. V1 S1 C om. second समित्
2. V1 S1 C after °देवनयोः ins. इति धातुः
5. B1 गोतमो for गौतमो
6. B1 मया for मे मम
8. B1 ममेद्धाति for सम्यगभि°
17. C S1 om. वै
19. P1 after इति adds अनुवाकेन
20. P1 with marking above उप° ins. on the margin इत आरम्य सुपोषपोषैरित्यन्तं बृहद्देवानामार्षम् आद्याग्नेयी गायत्री।

मन्त्रं वोचेमाग्नये । आरे अस्मे च शृण्वते ' इति । ᵛअध्वरं यज्ञम् ᵛउपप्रयन्तः उपगच्छन्तो वयमनुष्ठातारः ᵛअग्नये अग्निप्रीत्यर्थं ᵛमन्त्रं मननेन त्रातारं शब्दसमूहं ᵛवोचेम ब्रूयाम । कथंभूतायाग्नये ? ᵛआरे दूरे ᵛअस्मे अस्माकं समीपे इति शेषः । ᵛशृण्वते दूरे समीपे ᵛच अस्मदीयं वाक्यं श्रोतुमुद्युक्ताय । अस्य मन्त्रस्य प्राथम्यं कण्वो दर्शयति– " स उपवत्या प्रथमयोपतिष्ठते " (काशब्रा १.४.१.७) इति ॥१॥

आ– ' उपप्रयन्तो अध्वरम् ' इत्यादि ' सुपोषः पोषैः ' इत्यन्तं बृहद्देवानामार्षं यजमानस्याग्न्युपस्थाने विनियुक्तम् । तत्र ' उपप्रयन्तः ' इत्यनुवाके आद्ये द्वे आग्नेय्यौ गायत्र्यौ । ᵛउपप्रयन्तः ᵛअध्वरम्, अध्वरं यज्ञं उपप्रयन्तः । इण् गतौ । उपप्रयन्तो वयम् । ᵛमन्त्रम् । मनु अवबोधने । त्रैङ् पालने । मन्तारं त्रायत इति मन्त्रः । तम् ᵛअग्नये अग्न्यर्थं ᵛवोचेम । वच परिभाषणे । ब्रूयाम । ᵛआरे दूरे, ᵛअस्मे ᵛशृण्वते ᵛच श्रवणं कुर्वते । अस्मन्मन्त्रश्रवणाभिमुखायेत्यर्थः ॥

अ॒ग्निर्मू॒र्धा दि॒वः क॒कुत् पतिः॑ पृथि॒व्या अ॒यम् ।
अ॑पाꣳ रेताꣳसि जिन्वति ॥२॥

अ॒ग्निः । मू॒र्धा । दि॒वः । क॒कुत् । पतिः॑ । पृ॒थि॒व्याः । अ॒यम् ।
अ॒पाम् । रेताꣳ॑सि । जि॒न्व॒ति ॥ हं ॥ २ ॥

सा– अथ द्वितीयः – ' अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति ' इति । ᵛअयं दृश्यमानः ᵛअग्निः ᵛदिवः द्युलोकस्य ᵛमूर्धा शिरःसमानः । यथा शिरः शरीरस्योपरि वर्तते तथाऽयमग्निरहनि स्वतेजसा आदित्ये प्रविष्टत्वादादित्यरूपेण द्युलोकस्योपरि वर्तते । ककुच्छब्दो गवां पृष्ठे गलप्रदेशतः पश्चादवस्थितमुन्नतावयवमाचष्टे । तद्वदयमादित्यरूपोऽग्निः सर्वेषामुपरि वर्तमानत्वात् ᵛककुत् इत्युच्यते । तथा ᵛपृथिव्याः ᵛपतिः पालकः दाहपाकप्रकाशैर्भूलोकवर्तिनामुपकारकत्वात् तादृशोऽग्निरादित्यतुल्यः ᵛअपां द्युलोकाद्वृष्टिरूपेण पतन्तीनां ᵛरेतांसि साराणि व्रीहियवादिरूपेण परिणतानि ᵛजिन्वति प्रीणयति वर्धयतीत्यर्थः । अस्य मन्त्रस्य प्रियोक्तौ तात्पर्यं कण्वः – "यथा याचन् कल्याणं वदेत्" (काशब्रा १·४·१·९) इत्यादिना दर्शयामास ॥२॥

आ– परापररूपेण व्यवस्थितोऽग्निः स्तूयते– ' अग्निर्मूर्धा ' इति । विरूप ऋषिः । यः ᵛअयम् ᵛअग्निः भगवान् ᵛदिवः द्युलोकस्य द्युस्थानस्य च आदित्यात्मना दिविस्थेन ब्रह्मरूपेण च

---

1. P1 उप समीपे प्रयन्तः for उपप्रयन्तः
4. V1 S1 C प्रथमं योप for प्रथमयोप°
5. B1 °देवतानाम् for देवानाम्; B1 यजमान° for यजमानस्य
18. C V1 S1 पृष्ठं for पृष्ठे
20. C V1 S1 °रूपः for °तुल्यः
24. B1 आदित्येन for आदित्य°

ᵛमूर्द्धा भवति । अयमेव च ᵛककुत् । ककुदिति महन्नामसु (निघण्टु द्र. ३.३.१९) पठितम् । अत एवायं महानात्मा जगतः कारणमित्यर्थः । अयमेव ᵛपृथिव्याः ᵛपतिः । तापपाकप्रकाशादिभिरयमग्निः सर्वाः प्रजाः अनुगृह्णातीत्यभिप्रायः । किं च ᵛअपां ᵛरेतांसि ᵛजिन्वति द्युलोकाद् वृष्टिरूपेण निपतन्तीनामपां रेतांसि कारणानि चाहुतिपरिणामरूपाणि जिन्वति । जिन्वतिः प्रीतिकर्मा प्रीणातीत्यर्थः ॥ २ ॥

उ॒भा वा॑मिन्द्राग्नी आहु॒वध्या॑ उ॒भा राध॑सः स॒ह मा॑द॒यध्यै॑ ।
उ॒भा दा॒तारा॑ इ॒षाँ र॑यी॒णामु॒भा वाज॑स्य सा॒तये॑ हुवे वाम् ॥ ३ ॥

उ॒भा । वा॒म् । इ॒न्द्रा॒ग्नी॒ इती॑·द्राग्नी । आ॒हु॒वध्या॒ इत्या॑ऽहु॒वध्यै॑ । उ॒भा । राध॑सः । स॒ह । मा॒द॒यध्यै॑ ।
उ॒भा॑ । दा॒तारौ॑ । इ॒षाम् । र॒यी॒णाम् । उ॒भा । वाज॑स्य । सा॒तये॑ । हु॒वे । वा॒म् ॥३॥

सा– अथ तृतीयः – ‘ उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै । उभा दातारा इषाँ रयीणामुभा वाजस्य सातये हुवे वाम् ’ इति । इन्द्रशब्देनात्राऽऽहवनीयो विवक्षितः, तस्य सर्वज्ञत्वसाधकत्वपरमैश्वर्योपेतत्वात् । अग्निशब्देन गार्हपत्यः, अग्रे नयनात्, तस्य ह्याधानं प्रथमतो भवति । तथाविधौ हि ᵛइन्द्राग्नी आहवनीयगार्हपत्यौ ᵛवाम् ᵛउभा युवामुभौ ᵛआहुवध्यै आह्वातुमिच्छामीति शेषः । किं च, ᵛउभा युवामुभौ ᵛराधसः अन्नाद् हविःस्वरूपाच्च ᵛसह ᵛमादयध्यै युगपदेककर्मणि हर्षयितुमिच्छामीति शेषः । ᵛउभा युवामुभौ ᵛइषाम् इष्यमाणानां ᵛरयीणां धनानां ᵛदातारौ । अतः ᵛवाम् ᵛउभा युवामुभौ ᵛवाजस्य ᵛसातये अस्मभ्यमन्नस्य दानाय ᵛहुवे आह्वयामि । अस्यापि तत्त्वं कण्व इत्थं दर्शयति– “ उभौ मे दातारौ सह सन्तौ दत्तमित्येवैतदाह (काशब्रा १.४.१.१०) इति ॥३॥

आ– ‘ उभा वामिन्द्राग्नी ’ इति । भरद्वाज इन्द्राग्नी देवता (ते?) । त्रिष्टुप् छन्दः । हे ᵛइन्द्राग्नी, ᵛवां युवाम् ᵛउभा उभौ ᵛआहुवध्यै । उत्तमपुरुषैकवचनस्थाने ‘ वध्यै ’ इति प्रत्ययः । आह्वयामि । किमर्थम् इति । ᵛउभा उभौ ᵛराधसः । राधो धनमन्नं वा; तस्य धनस्य हविर्लक्षणस्य । ᵛसह सार्धम् एकस्मिन् प्रदाने युवाम् उभा उभौ ᵛमादयध्यै । माद्यतिर्भोजनार्थः । सहभोजनाय । किमर्थं पुनः सहभोजनायेति ? ᵛउभा ᵛदातारौ ᵛइषां ᵛरयीणाम्, इषामन्नानां रयीणां

---

1. B1 चाककुप् for च ककुत्
2. B1 महानाम्ना, H1 महान्नाम्ना this we have corrected as महानात्मा;
   B1 तापयेके H1, तापवात° this we have corrected as तापपाक°
16. P1 with marking above आह्वयामि ins. on the marking– षणु दाने अनुनासिकं स्यात्
17. S1 C सन्तं for सन्तौ
20. B1 om. उभा; B1 om. वा,

धनानां च । उभौ दातारौ दानस्य कर्तारौ दानशीलौ । अतो यथाभागम् ᵛउभा ᵛसातये । षो (? षण) अन्न (? संभक्ति) कर्मा । अन्नस्योपलब्धये ᵛवां युवां ᵛहुवे आह्वयामि ॥ ३ ॥

अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ।
तं जानन्नग्न आ रोहाथा नो वर्धया रयिम् ॥ ४ ॥

अयम् । ते । योनिः । ऋत्वियः । यतः । जातः । अरोचथाः ।
तम् । जानन् । अग्ने । आ । रोह । अथ । नः । वर्धय । रयिम् ॥ श्रे ॥ ४ ॥

सा– अथ चतुर्थः – ‘अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः । तं जानन्नग्न आ रोहाथा नो वर्धया रयिम्’ इति । हे आहवनीय, ᵛते तव ᵛअयं गार्हपत्यः ᵛयोनिः उत्पत्तिस्थानम् । अत एवायम् ᵛऋत्वियः । उत्पादनयोग्यः काल ऋतुकाल इत्युच्यते । सायं प्रातरादौ तत्रोत्पादकत्वेन तथाविधकालोपेतः । ᵛयतः यस्मात् ऋतुकालोपेतात् गार्हपत्यात् ᵛजातः उत्पन्नस्त्वम् ᵛअरोचथाः कर्मकाले दीप्तिमानभूः । ᵛहे अग्ने, आहवनीय, ᵛजानन् यथोक्तवृत्तान्तमवगच्छन् ᵛतं गार्हपत्यं स्वजनकम् ᵛआरोह कर्मावसाने प्रविश । ᵛअथ अनन्तरं ᵛरयिम् अस्मदर्थं धनं पुनर्यजनकारणं ᵛवर्धय समृद्धं कुरु । एतस्य तात्पर्यं कण्व इत्थं दर्शयति– “पुष्टं वै रयिः स्वं त इदं यदस्माकं पुष्टं तन्नो भूयो भूय एव कुरु तन्नो वर्धयेत्येवैतदाह” (काशब्रा १.४.१.१) इति ॥४॥

आ– ‘अयं ते योनिः’ इति । देवश्रवा ऋषिः । आग्नेयी अनुष्टुप् । अत्र आहवनीयोऽग्निरुच्यते । ᵛअयं गार्हपत्योऽग्निः ᵛते तव आहवनीयाग्नेः ᵛयोनिः उत्पत्तिस्थानम् । ऋतावृतौ काले काले प्राप्ते प्राप्ते भवतीति ᵛऋत्वियः । ᵛयतः यस्माद् गार्हपत्यात् ᵛजातः त्वं पूर्वमप्याधानेष्टिपशुचातुर्मास्यसोमादिष्वङ्गभावो[पेतः] त्वम् ᵛअरोचथाः । रुच दीप्तौ । रोचितवानासि । हे आहवनीय ᵛअग्ने, ᵛतं तव योनिभूतं गार्हपत्याख्यमग्निं ᵛजानन् विद्वान् ᵛआरोह आरोहस्व ....कारेणारोहणं कुरु पुनरुद्धरणाय । ᵛअथ अनन्तरं ᵛनः अस्मान् ᵛवर्धय अतिसमृद्धान् कुरु । ᵛरयिं पुनः पुनस्तव यजनार्थं धनं च वर्धय ॥ ४ ॥

अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥ ५ ॥

---

7. S1 C तुरीयः for चतुर्थः
9. P1 trans अत एवायं after ऋत्वियः [L]
11. C V1 S1 अवगतं for अवगच्छन् तं
15. H1 आग्नेयम् for आग्नेयी; B1 om. अत्र
20. B1 कारणा° for कारेणा°, reading corrupt– verify from the ms B1 om. कुरु
21. H1 यजमानार्थं for यजनार्थं

अयम् । इह । प्रथमः । धायि । धातृभिरिति धातृऽभिः । होता । यजिष्ठः । अध्वरेषु । ईड्यः ।
यम् । अप्नवानः । भृगवः । विरुरुचुरिति विऽरुरुचुः ।
वनेषु । चित्रम् । विभ्वमिति विऽभ्वम् । विशेविश इति विशेऽविशे ॥ ध्रौं ॥ ५ ॥

सा- अथ पञ्चमः – ‘अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः । यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे’ इति । 'अयम् आहवनीयः 'इह कर्मानुष्ठानस्थाने 'प्रथमः मुख्यः सन् 'धातृभिः अधायि आधानकर्तृभिराहितोऽभवत् । कथं भूतोऽयम् ? 'होता देवानामाह्वाता 'यजिष्ठः अतिशयेन यागोपयुक्तः । 'अध्वरेषु सोमयागादिषु 'ईड्यः ऋत्विग्भिः स्तुत्यः । अप्नशब्दः अपत्यनामसु (निघण्टु २.२.७) पठितः । 'अप्नवानः पुत्रवन्तः । अतः 'भृगवः भृगुवंशोत्पन्नाः पूर्वे महर्षयः 'विशेविशे यजमानरूपाय तस्मै तस्मै मनुष्याय, तदुपकारार्थं 'वनेषु ग्रामाद्बहिर्यजनाख्येष्वरण्यप्रदेशेषु 'यम् आहवनीयाख्यमग्निं 'विरुरुचुः विशेषेण दीपितवन्तः । कथंभूतमग्निम् ? 'चित्रं विविधकर्मोपयोगित्वेन विचित्रम् । अत एव 'विभ्वं विभुत्वशक्तियुक्तं यं विरुरुचुः । ‘अयमिह प्रथमः’ इति पूर्वत्रान्वयः । अस्य पूर्ववत् “यथा याचन्’ (काशब्रा १.१.४.१२) इत्यादिना प्रियोक्तिपरत्वं कण्वो दर्शयामास । प्रथमशब्दस्य मुख्यत्वार्थपरत्वं तित्तिरिर्दर्शयति–“अयमिह प्रथमो धायि धातृभिरित्याह । मुख्यमेवैनं करोति” (तैसं १.५.७.) इति ॥५॥

---

5. C S1 °ष्ठाने for °ष्ठानस्थाने; Sāyaṇa wrongly separates प्रथमो धायि here as प्रथमः। अधायि whereas in पदपाठ we see धायि. It may be noted that this verse also occurs in VS (3.15, 15.26, and 33.6), in Ṛ̣V (IV. 7.1), and TS (1.5.5.1) where all the commentators including Uvvaṭa Mahīdhara as also Sāyaṇa strictly follow the पदपाठ. In Ṛ̣V IV. 7.1 Sāyaṇa explains धायि as अधायि निहितः, दधातेः कर्मणि लुङ् । ‘बहुलं छन्दस्यमाङ्योगे°’ (पा ६.४.७५) इत्यडभावः । ‘तिङ्ङतिङः’ (पा ८.१.२८) इति निघातः । In TS Bhāskara as well as Sāyaṇa comments on धायि as धार्यते and keep silence over its derivation, Uvvaṭa धायि डुधाञ् धारणपोषणयोः । निहितः– as Mahīdhara Constantly following Sāyaṇa's foot-steps interprets it– धायि अधायि आधानकर्तृभिः आहितोऽभवत् । “बहुलं छन्दस्यमाङ्योगेऽपि” (पा ६.४.७५) इत्यडभावः । It is strange that Sāyaṇa should go against the tradition and separate प्रथमो धायि as प्रथमः अधायि for which he has no authority.

6. P1 आह्वयिता, C आह्वानाय for आह्वाता

8. P1 C S1 सर्वे for पूर्वे

11. P1 चित्रम् for विचित्रम्

12. P1 अस्याः for अस्य; P1 यथा याचनं for यथा याचन्; C S1 V1 प्रयोक्ते परत्वं for प्रियोक्तिपरत्वं

आ– ‘ अयमिह ’ इत्याग्नेयी वामदेवो जगती । ᵛअयम् आहवनीयोऽग्निः ᵛइह अध्वरे स्थाने ᵛप्रथमः मुख्यः आद्यत्वमभिप्रेतं चेत् । दक्षिणाग्निर्वा । ᵛधायि ᵛधातृभिः अग्निधातृभिरध्वर्युभिरधायि निहितः धृतः । ᵛहोता देवानाह्वाता । ᵛयजिष्ठः यजीयसां श्रेष्ठः । मानुषेभ्यो यष्टृभ्यो यजिष्ठः यष्टृतमः । ᵛअध्वरेषु ᵛईड्यः स्तुत्यः । ᵛयम् ᵛअप्नवानः यम् अग्निमाधाय । अप्न इत्यपत्यनाम, अप्नो येषामस्तीति अप्नवानः । अप्नवत्प्रभृतयो वा । ᵛभृगवः भृगोरपत्यानि च । भृगवः पूर्वे ऋषयः । ᵛविरुरुचुः रुचि दीप्तौ । विविधां दीप्तिं प्राप्तवन्तः । ‘ वनेषु ’ इति । अरण्योराधाराभिप्रायम् । ᵛचित्रं विचित्रं चायनीयम् । ᵛविभ्वं विभुत्वशक्तियुक्तम् । ᵛवनेषु अरण्ये[षु] स्थितं चित्रं विभ्वमग्निम् अप्नवानो भृगवश्च ᵛविशेविशे मनुष्याय, मनुष्याणां पुरुषार्थसिद्धये आधाय विरुरुचुः ॥ ५ ॥

अस्य प्रत्नामनु द्युतं॑ शुक्रं दुदुह्रे अह्रयः ।
पयः सहस्रसामृषिम् ॥ ६ ॥

अस्य । प्रत्नाम् । अनु । द्युतम् । शुक्रम् । दुदुह्रे । अह्रयः ।
पयः । सहस्रसामिति सहस्रऽसाम् । ऋषिम् ॥ खं ॥ ६ ॥

सा– अथ षष्ठः – ‘ अस्य प्रत्नामनु द्युतं॑ शुक्रं दुदुह्रे अह्रयः । पयः सहस्रसामृषिम् ’ इति । ᵛअस्य अग्नेः संबन्धिनीं ᵛप्रत्नां चिरन्तनकालोपेतां ᵛद्युतम् ᵛअनु दीप्तिमनुसृत्य अह्रयः । ह्री लज्जायाम् । लज्जारहिता दोग्धारः । ᵛऋषिम् । ऋषी गतौ । *अर्षति दोहनस्थाने गच्छतीत्यृषिर्गौः । तां गां ᵛशुक्रं ᵛपयः श्वेतवर्णं दुग्धं ᵛदुदुह्रे दुदुहिरे अग्निहोत्रहोमार्थं दुग्धवन्तः । सायं दोहनकाले अग्निसंबन्धिप्रकाशाभावे दुह्यमानं क्षीरं भूमौ पतिष्यतीत्येवं दोग्धृणां लज्जा भवति । सत्यां त्वद्दीप्तौ स्कन्दनशङ्कानुदयाल्लज्जादोषो

---

1. H1 आग्नेयः for आग्नेयी
2. B1 H1 अधायि । धातृभि रग्नि धारय । धातृभिरध्वर्युभिर्, this we have corrected धायि धातृभिः । अग्निधातृभिरध्वर्युभिर् [L 3]
3. B1 om. मानुषेभ्यो ... यजिष्ठ [L 4]
5. B1 अप्नवतः, H1 अप्तवान्, this we have corrected as अप्नवत्°
6. B1 सर्वे for पूर्वे
8. B1 after स्थितं adds चित्रं बिल्वं; H1 चित्रमत्रं विश्वं, we have corrected this as चित्रं विभ्वं
14. P1 with marking above अस्य ins. on the margin अवत्सार आग्नेयी गायत्री
15. V1 S1 C after लज्जायाम् ins. इति धातुः
16. V1 S1 C after गतौ ins. इति धातुः
   * [ऋषी गतौ इति तुदादौ पठितो धातुः सायणाचार्यैः भ्वादौ दृष्टः इति भाति ।]
17. V1 S1 C om. दुग्धं, P1 with marking above दुदुहिरे ins. on the margin इलोपश्छान्दसः
18. P1 om. त्वद्°

नास्तीत्यर्थः । ᵛसहस्रसाम् इत्येतद् गोविशेषणम् । षोऽन्तकर्मणि । सहस्रसंख्याकानि कर्माणि क्षीरदध्याज्यरूपहविःप्रदानेन स्यति समापयतीति सहस्रसा । तादृशीं गां दुग्धवन्त इत्यर्थः । तत्र ‘ सहस्रसाम् ’ इत्येतत्पदतात्पर्यं कण्वो व्याचष्टे– “ एषा वै परमा सनिर्यत् सहस्रसनिः ” (काशब्रा १·४·१·१२) इति ॥६॥

आ– ‘ अस्य प्रत्नाम् ’ इति आग्नेयी गायत्री । अवत्सार ऋषिः । ᵛअस्य एवाग्नेः ᵛप्रत्नाम् । प्रत्नशब्दश्चिरन्तनवचनः । चिरन्तनां ᵛद्युतं दीप्तिम् ᵛअनु गवि अनुषक्तां ᵛशुक्रं शुक्ररूपापन्नं ᵛदुदुह्रे दुदुहिरे ᵛअह्रयः । ह्री लज्जायाम् । लज्जारहिताः अलज्जिता अह्रयः गात्रः । ऊज्ज्वलाः प्रशस्या इत्यर्थः । किं तच्छुक्रमिति ? ᵛपयः । एता गावो यत्क्षरन्ति तत्पयो दुग्धम् । ᵛसहस्रसाम् । षोऽन्तकर्मणि । सहस्रसंख्यानां चातुर्मास्यपशुसोमादीनां समाप्तेः कर्तारं सवितारं संभक्तारम् ᵛऋषिं द्रष्टारं दुदुह्रे दुदुहिरे । गवि स्थितपयसि द्रष्टृत्वमुपचर्यते । एष मन्त्रो गाः तत्पयश्च स्तुवन्नग्निमेव स्तौति ॥ ६ ॥

तनूपा अग्नेऽसि तन्वं मे पाह्यायुर्दा अग्नेऽस्यायुर्मे देहि ।
वर्चोदा अग्नेऽसि वर्चो मे देहि ॥७॥

तनूपा इति तनूऽपाः । अग्ने । असि । तन्वम् । मे । पाहि ।
आयुर्दा इत्यायुःऽदाः । अग्ने । असि । आयुः । मे । देहि ।
वर्चोदा इति वर्चःऽदाः । अग्ने । असि । वर्चः । मे । देहि । द्रौं ॥ ७ ॥

सा– अथ सप्तमः – ‘ तनूपा अग्नेऽसि तन्वं मे पाहि ’ इति । हे ᵛअग्ने, त्वं ᵛतनूपाः ᵛअसि शरीराणां पालकोऽसि । सति ह्युदराग्नौ भुक्तेऽन्ने जीर्णे सति शरीराणि पाल्यन्ते । अतः ᵛमे मम ᵛतन्वं शरीरं ᵛपाहि पालय ॥

अथाष्टमः – ‘ आयुर्दा अग्नेऽस्यायुर्मे देहि ’ इति । हे ᵛअग्ने, त्वं ᵛआयुर्दाः ᵛअसि, आयुषो दाता भवसि । यावन्तं कालं वपुष्युदराग्नेः औष्ण्यमुपलभ्यते तावन्तं कालं न म्रियत इति हि प्रसिद्धम् । अतः ᵛमे मम अपमृत्युपरिहारेण ᵛआयुः ᵛदेहि ॥

अथ नवमः – ‘ वर्चोदाः अग्नेऽसि वर्चो मे देहि ’ इति । हे ᵛअग्ने, त्वं ᵛवर्चोदाः ᵛअसि

---

1. C V1 S1 before सहस्रसाम् add तत्र; C V1 S1 after कर्माणि ins. इति धातुः
4. B1 ऋषयः for ऋषिः
5. H1 अनुगं for अनुगवि; B1 °रूपां for रूपापंन्न
8. H1 सहस्राणां for सहस्रसां
16. V1 S1 C write the whole verse
17. S1 C om. अग्ने

वर्चसो वैदिकानुष्ठानप्रयुक्ततेजसो दाताऽसि । अतः ᵛमे तद् ᵛवर्चः ᵛदेहि । तदेतद् तेज आहिताग्नेर्लोके प्रसिद्धम् ॥७॥

आ– ‘ तनूपा अग्नेऽसि ’ इत्यादीनि त्रीणि यजूंषि आग्नेयानि । विराण्नाम त्रिपदा अनुष्टुप् । ऋषिविशेषानुक्तौ तु सामान्येनाभिहित एव ऋषिः । हे भगवन् ᵛअग्ने, स्वभावत एवाग्निहोत्रिणां ᵛतनूपाः शरीराणां गोप्ता ᵛअसि । अतः ᵛमे मम ᵛतन्वं शरीरं ᵛपाहि । हे भगवन् ᵛअग्ने, स्वभावतस्त्वम् ᵛआयुर्दाः आयुषो दाता ᵛअसि । अतः ᵛआयुः ᵛमे ᵛदेहि । हे भगवन् ᵛअग्ने, ᵛवर्चोदाः तेजसो दाता ᵛअसि । ᵛवर्चः [ᵛमे ᵛदेहि] । यतो दर्शनादेव महानयं ब्राह्मणो विद्वांसस्तपसाऽग्निरिव ज्वलतीति प्रतिपत्तिः । तद्वर्च इत्युच्यते । तन्मे देहि ॥ ७ ॥

अग्ने॒ यन्मे॑ त॒न्वा॑ ऊ॒नं तन्म॒ आ पृ॑ण ।
इन्धा॑नास्त्वा श॒तꣳ हिमा॑ द्यु॒मन्त॒ꣳ समि॑धीमहि ॥ ८ ॥
वय॑स्वन्तो वय॒स्कृत॒ꣳ सह॑स्वन्तः सह॒स्कृत॑म् ।
अग्ने॑ सपत्न॒दम्भ॑न॒मद॑ब्धासो॒ अदा॑भ्यम् ॥ ९ ॥

अग्ने॑ । यत् । मे॒ । त॒न्वाः॑ । ऊ॒नम् । तत् । मे॒ । आ । पृ॒ण॒ ।
इन्धा॑नाः । त्वा॒ । श॒तम् । हिमाः॑ । द्यु॒मन्त॒मिति॑ द्यु॒ऽमन्त॑म् । सम् । इ॒धी॒म॒हि॒ ॥ गें ॥८॥
वय॑स्वन्तः । व॒य॒स्कृत॑म् । व॒य॒.कृत॒मिति॑ व॒य॒ःऽकृत॑म् ।
सह॑स्वन्तः । स॒ह॒स्कृत॑म् । स॒ह॒ःकृत॒मिति॑ स॒ह॒ःऽकृत॑म् ।
अग्ने॑ । स॒प॒त्न॒दम्भ॑न॒मिति॑ स॒प॒त्न॒ऽदम्भ॑नम् । अद॑ब्धासः । अदा॑भ्यम् ॥ णो ॥ ९ ॥

सा– अथ दशमः – ‘ अग्ने यन्मे तन्वा ऊनं तन्म आ पृण ’ इति । हे ᵛअग्ने, ᵛमे ᵛतन्वाः मदीयशरीरस्य ᵛयत् अङ्गं चक्षुरादिरूपं तस्यापि यत् ᵛऊनं दृष्टिपाटवादिरहितं ᵛमे ᵛतत् अङ्गम् ᵛआपृण । सर्वतः पूरय । ‘ चक्षुषा ’ इत्यादिमन्त्रचतुष्टयतात्पर्यं कण्वः– “ यदेवेह वाचा वा कर्मणा वाऽऽयुषो वा ” (काशश्रा १·४·१·१५) इत्यादिना विस्पष्टमुवाच ॥८॥

---

1. V1 S1 C om. एतत्
3. H1 त्रिष्टुप्पदा for त्रिपदा
7. H1 before तेजसो ins. बृहत्
18. P1 with marking above अग्ने ins. on the margin– **आग्नेयं यजुः ।**
19. V1 S1 C om. तस्यापि

अथैकादशः – ' इन्धानास्त्वा शतꣳ हिमा द्युमन्तꣳ समिधीमहि । वयस्वन्तो वयस्कृतꣳ सहस्वन्तः सहस्कृतम् अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम् ' इति । हे ᵛअग्ने, त्वां ᵛशतꣳ ᵛहिमाः अस्मदायुषि विद्यमानान् शतसंख्याकान् संवत्सरान् ᵛसमिधीमहि वयं नैरन्तर्येण दीपयामः सम्यक्। कथंभूता वयम् ? ᵛइन्धानाः त्वदनुग्रहेण दीप्यमानाः ᵛवयस्वन्तः अन्नवन्तः ᵛसहस्वन्तः बलवन्तः, ᵛअदब्धासः केनाप्यहिंसिताः । कथंभूतं त्वाम् ? ᵛद्युमन्तं दीप्तिमन्तं ᵛवयस्कृतं, वयोऽन्नं करोतीति वयस्कृत्, तं; ᵛसहस्कृतं, सहो बलं करोतीति सहस्कृत्, तं; ᵛसपत्नदम्भनं सपत्नानां शत्रूणां हिंसितारम्; ᵛअदाभ्यम् केनापि हिंसितुमयोग्यम् । अत्र ' हिमाः ' इत्येतस्य पदस्य संवत्सरवाचित्वं कण्वो व्याचष्टे– " शतं वर्षाणि जीव्यासमित्येवैतदाह यदाह शतꣳ हिमाः इति " (काशब्रा १·४·१·१६) इति ॥९॥

आ– हे ᵛअग्ने, ᵛमे मम ᵛतन्वाः शरीरस्य ᵛयत् ᵛऊनं न्यूनम् अवखण्डितम् ᵛतत् मम तन्वा ᵛआपृण आपूरय । ᵛइन्धानाः । इन्धी दीप्तौ । संदीप्यमानाः वयं ᵛशतं ᵛहिमाः शतं वर्षाणि ᵛद्युमन्तं त्वामग्निं ᵛसमिधीमहि संदीपयामः ॥८॥

' वयस्वन्तः ' इत्याग्नेय्यनुष्टुप् । हे भगवन् ᵛअग्ने, वयः इत्यन्ननाम । समृद्धान्नवन्तः ᵛवयस्वन्तः, सह इति बल नाम, समग्रबलवन्तः ᵛसहस्वन्तः, ᵛअदब्धासः एवानुपहिंसाः (? सिताः) हिंसारहिताः सन्तो वयं, ᵛवयस्कृतम् अन्नस्य कर्तारम्, ᵛसहस्कृतं सहसो बलस्य कर्तारम्, ᵛसपत्नदम्भनम्, दभ्नोतिर्हिंसार्थः, सपत्नानां शत्रूणां हिंसितारम्, ᵛअदाभ्यम् अदाभ्यश्च (? स्सः) यो हिंसानर्हः । अनुपहिंस्यम् अग्ने त्वा समिधीमहि ॥ ९ ॥

चित्रावसो स्वस्ति ते पारमशीय ।
सं त्वमग्ने सूर्यस्य वर्चसाऽगथाः समृषीणाꣳ स्तुतेन ॥१०॥
सं प्रियेण धाम्ना समहमायुषा सं वर्चसा सं प्रजया सꣳ रायस्पोषेण ग्मिषीय ।
अन्ध स्थान्धो वो भक्षीय मह स्थ महो वो भक्षीय ॥ ११ ॥

चित्रावसो । चित्रवसो इति चित्रऽवसो । स्वस्ति । ते । पारम् । अशीय ।
सम् । त्वं । अग्ने । सूर्यस्य । वर्चसा । अगथाः । [सम्] ऋषीणाम् । स्तुतेन । कीं ॥१०॥
[सम् ।] प्रियेण । धाम्ना । [सम् ।] अहम् । आयुषा ।
[सम् ।] वर्चसा [सम् ।] प्रजयेति प्रऽजया ।
[सम् ।] रायः । पोषेण । ग्मिषीय ।
अन्धः । स्थ । अन्धः । वः । भक्षीय । महः । स्थ । महः । वः । भक्षीय ॥खैं॥११॥

---

12. B1 समृद्धा अन्न °for समृद्धान्न°
14. B1 om. °सहसो कर्तारम् [L 15]
16. B1 हिंसार्ह for हिंसानर्हः

सा– अथ द्वादशः – ‘ चित्रावसो स्वस्ति ते पारमशीय ’ इति । हे ʼचित्रावसो रात्रे, चित्राणि विविधानि चन्द्रनक्षत्रान्धकाररूपाणि वसन्ति यस्यां रात्रौ सा चित्रावसुः । अत एव तित्तिरिराह– “ रात्रिर्वै चित्रावसुः ” (तैसं १·५·७) इति । कण्वोऽपि विस्पष्टमाह– “ रात्रिर्ह वै चित्रावसुरेषा हीमानि चित्राणि संगृह्यैव वसति तस्मान्नक्तं तारकाश्चित्रं ददृशे ” (काशब्रा १·४·१·१७) इति । हे रात्रे, ʼते तव ʼपारं समाप्तिं ʼस्वस्ति क्षेमो यथा भवति तथा ʼअशीय व्याप्तवान् । इह लोके हि रात्रौ, मनुष्येषु निद्राणेषु तस्करा गृहं प्रविशन्ति तद्वदत्र देवयजने रक्षांसि प्रविशन्तीति शङ्कया तन्निवारणार्थं रात्रिदेवतां प्रार्थयते ।

अथ त्रयोदशमन्त्रे किंचिद्विनियोगविशेषमाह कात्यायनः– “ सं त्वमित्युपविश्य ” (काश्रौ ४·१२·४) इति । पूर्वोक्तैर्मन्त्रैरुत्थायोपस्थानम् । अत्र तूपविश्येति विशेषः । पाठस्तु– ‘ सं त्वमग्ने सूर्यस्य वर्चसाऽगथाः समृषीणाꣳ स्तुतेन । सं प्रियेण धाम्ना समहमायुषा सं वर्चसा सं प्रजया सं रायस्पोषेण ग्मिषीय ’ इति । हे ʼअग्ने, ʼत्वं ʼसूर्यस्य ʼवर्चसा सूर्यसंबन्धिना तेजसा ʼसम् ʼअगथाः रात्रौ संगतोऽसि । “अग्निं वावादित्यः सायं प्रविशति” (तैब्रा २·१·२) इति श्रुत्यन्तरं पूर्वमुदाहृतम् । कण्वोऽप्येतदुदाजहार– “ स जपति सं त्वमग्ने सूर्यस्य वर्चसाऽगथा इति यदेनꣳ सूर्यः प्रविशति ” (काशब्रा १·४·१·१८) इति । किं च, ʼऋषीणां मन्त्राणां संबन्धिना ʼस्तुतेन स्तोत्रेण ʼसम् अगथाः । बहवो हि मन्त्रा अग्निं स्तुवन्ति । ʼप्रियेण प्रीतिविशेषेण ʼधाम्ना स्थानेन नाम्ना जन्मना च ʼसम् अगथाः । निरुक्तकारो हि धामानीति शब्दस्य यथोक्तमर्थत्रयं दर्शयति– “ स्थानानि नामानि जन्मानीति च ” (नि ९ २८) इति । यथा त्वमुक्तैर्गुणैः संगतोऽसि, एवम् ʼअहम् अपि त्वत्प्रसादात् ʼआयुषा अपमृत्युदोषरहितेन ʼसं ʼग्मिषीय ʼसंगतः भूयासम् । तथा ʼवर्चसा विद्यैश्वर्यप्रयुक्ततेजसा संग्मिषीय । तथा ʼप्रजया पुत्रादिरूपया संग्मिषीय तथा ʼरायस्पोषेण धनस्य पुष्ट्या संग्मिषीय ॥

अथ चतुर्दशे विशेषं कात्यायन आह– “ गां गच्छत्यन्ध स्थेति ” (काश्रौ ४·१२·५) इति । कण्वोऽप्येतदाह– “ अथ गामुप परैत्यन्ध स्थेति ” (काशब्रा १.४.१.१९) इति । पाठस्तु– “ अन्ध स्थान्धो वो भक्षीय मह स्थ महो वो भक्षीय । ऊर्ज स्थोर्जं वो भक्षीय रायस्पोष स्थ रायस्पोषं वो भक्षीय ” इति । हे गावः, यूयम् ʼअन्धः ʼस्थ अन्नरूपाः स्थ । क्षीराज्यादिरूपस्यान्नस्य जनकत्वादन्नत्वोपचारः । अतो भवत्प्रसादात् ʼवः युष्मत्संबन्धि ʼअन्धः क्षीराज्यादिरूपमन्नं ʼभक्षीय सेवेय । भज सेवायाम् । तथा ʼमहः ʼस्थ पूज्यरूपाः स्थ । मह पूजायाम् । ʼवः युष्माकं पूज्यानां प्रसादादहमपि ʼमहः ʼभक्षीय पूज्यत्वं सेवेय । “ गौर्न पदा स्प्रष्टव्या ” इत्यादिस्मृतेर्गवां पूज्यत्वप्रसिद्धिः । तामेतां प्रसिद्धिं हि-शब्देन तित्तिरिः सूचयति– “ महः स्थ महो वो भक्षीयेत्याह महो ह्येताः ” (तैसं १.५.८) इति ॥१०–११॥

---

1. P1 with marking above first चित्रा° ins. on the margin रात्रिदैवतं यजुः
5. P1 with marking above स्वस्ति ins. on the margin स्वस्तीत्यविनाशिनाम् ।
8. C V1 अत्र for अथ; P1 with marking above सं त्वम् ins. on the margin–
   आग्नेयं सत्वर्षिमाकृतिर्नामानुष्टुप्
16. V1 वा for च
20. C S1 विशेषः for विशेषं
23. V1 C S1 °भूताः for °रूपाः
25. V1 S1 C after सेवायाम् ins. इति धातुः; V1 S1 C after पूजायाम् ins. इति धातुः

आ– ‘ चित्रावसो ’ इति त्रिपदाकृतिर्नामानुष्टुप् रात्रिदेवत्या ॥ सर्वेषामृषीणामार्षं यजुः, कृतिर्नामानुष्टुप् । “ जागतावष्टकश्च कृतिः ” (कायस ५.४.३) इति खण्डिकाभिप्रायेण चित्रावसुरिति रात्रिरुच्यते । चिति रमन्तीति चित्राणि । चित्राणि निवसन्ति यस्यां रात्रौ सा चित्रावसुः । छान्दसो दीर्घः । ‘ चित्रावसो ’ इति तत्संबोधनम् । अत्रापि रात्रिरूपेण अग्निः स्तूयते । हे ᵛचित्रावसो, ᵛस्वस्ति । स्वस्तीत्यविनाशिनाम । सु अस्ति स्वस्ति । ᵛते तव, स्यादिति शेषः । ते ᵛपारम् अन्तम् ᵛअशीय । अशु व्याप्तौ । अश्नुयाम् ॥

हे भगवन्नाहवनीय ᵛअग्ने, ᵛसूर्यस्य संबन्धिना ᵛवर्चसा तेजसा ᵛसमगथाः संगतोऽसि, ᵛसम् ᵛऋषीणाꣳ ᵛस्तुतेन । ऋषीणां मन्त्राणां प्रसिद्धऋषीणां वा स्तुतेन स्तोत्रेण च स ᵛत्वं समगथाः संगतो भवेः ॥१०॥

अथोपविश्य जपति ‘ सं प्रियेण ’ इति । अग्निदेवत्या जगती पञ्चपदा । हे अग्ने, ᵛप्रियेण ᵛधाम्ना प्रियाभिराहुतिभिः । स्थानानि नामानि जन्मानीति त्रयाणि धामानि भवन्ति । अतस्त्वेतैः ᵛसम् अगथाः संगतोऽसि । हे अग्ने, यथा त्वमेतैः संगत एवं त्वत्प्रसादात् ᵛअहम् अपि ᵛसम् ᵛआयुषा अपमृत्युदोषादिरहितेनायुषा ᵛसं ᵛवर्चसा सम्यक्तेजसा ᵛसं ᵛप्रजया सत्पुत्रादिकया, ᵛरायः ᵛपोषेण धनस्य पोषेण च ᵛसंग्मिषीय । गमेरेतद्रूपम् । संगच्छेयम् । समुपसर्गस्य यथायोग्यतयाऽत्रान्वयः कार्यः । आयुःप्रभृतिफलानि संततं मम भवन्त्वित्यर्थः ॥

अथोत्तरार्धर्चेन गामभ्येति– ‘ अन्ध स्थ ’ इति । अन्ध इत्यन्ननाम (निघण्टु २.७) । अन्धःशब्देनान्नवीर्यमुपलक्ष्यते श्रुत्या– “ यानि वो महांसि यानि वो वीर्याणि” (काशब्रा १.४.१.१९) इति । यतो यूयं गावः वीर्यहेतुभूतम् ᵛअन्धः अन्नं ᵛस्थ भवथ अतोऽहं ᵛवः युष्मत्संबन्धि ᵛअन्धः ᵛभक्षीय । भजतेरेतद्रूपम्, न तु भक्षयतेः । भक्षीय भजेय । भज सेवायाम् । ᵛमहः ᵛस्थ । महःशब्देन “ तस्यै श्रुतं तस्यै शरः” (शब्रा ३.३.३.२) इत्यादीनि दश वीर्याण्युच्यन्ते । यतो यूयं महः स्थ अतः ᵛमहः ᵛवः ᵛभक्षीय ॥११॥

---

2. H1 जागतामवष्टकश्च for °वष्ट कश्च
3. H1 °वसोरिति for °वसुरिति
4. B1 after अग्निः ins. एव
8. B1 च for सः
13. H1 om. °दोषादि°
15. B1 एतानि for फलानि
17. H1 अन्धस्यत्र for अन्धःशब्देन
20. B1 रसः for शरः
21. B1 ये वो for यतो

ऊर्ज॒ स्थोर्जं॑ वो भक्षीय रा॒यस्पोषं॑ स्थ रा॒यस्पोषं॑ वो भक्षीय ।
रेव॑ती॒ रम॑ध्वम॒स्मिन् योना॑ अ॒स्मिन् गो॒ष्ठे॒ऽस्मिन् क्षये॒ऽस्मिꣳल्लो॒के ॥१२॥
इ॒हैव स्ते॒तो माऽप॑गात ।
स॒ꣳहि॒तासि॑ वि॒श्वरू॒प्यूर्जा माऽऽ वि॑श गौप॒त्येन॑ ॥१३॥

ऊर्जः॑ । स्थ॒ । ऊर्ज॑म् । व॒ः । भ॒क्षी॒य॒ ।
रा॒यः । पोषः॑ । स्थ॒ । रा॒यः । पोष॑म् । व॒ः । भ॒क्षी॒य॒ ।
रेव॑तीः । रम॑ध्वम् । अ॒स्मिन् । योनौ॑ । [अ॒स्मिन् ।] गो॒ष्ठे । गो॒स्थ इति॑ गो॒ऽस्थे ।
[अ॒स्मिन् ।] क्षये॑ । [अ॒स्मिन् ।] लो॒के ॥ ख्यौं ॥१२॥
इ॒ह । ए॒व । स्त॒ । इ॒तः । मा । अप॑ । गा॒त॒ ।
स॒ꣳ हि॒तेति॑ स॒म्ऽहि॒ता । अ॒सि॒ । वि॒श्व॒रू॒पीति॑ वि॒श्व॒ऽरू॒पी ।
ऊ॒र्जा । मा॒ । आ । वि॒श॒ । गौ॒प॒त्येन॑ । चूं ॥१३॥

सा– तथा 'ऊर्जः 'स्थ बलरूपाः स्थ । गोः संबन्धिक्षीरादेर्बलहेतुत्वात् बलरूपत्वोपचारः । ऊर्ज बलप्राणनयोः । 'वः युष्माकं प्रसादात् 'ऊर्जं 'भक्षीय बलं सेवेय । तथा 'रायः 'पोषः 'स्थ । धनपुष्टिरूपाः स्थ । वैश्या हि क्षीराज्यादिविक्रयेण धनं पुष्णन्ति । अतो धनपुष्टित्वोपचारः । 'वः युष्माकं प्रसादात् 'रायः 'पोषं धनपुष्टिं 'भक्षीय सेवेय॥

अथ पञ्चदशः – 'रेवती रमध्वमस्मिन् योना अस्मिन् गोष्ठेऽस्मिन् क्षयेऽस्मिꣳल्लोके । इहैव स्तेतो माऽपगात ' इति । हे 'रेवतीः । धनहेतुत्वेन रेवत्यो गावः । 'अस्मिन् 'योनौ दृश्यमानेऽग्निहोत्रहविर्दोहनस्थाने 'रमध्वम् क्रीडध्वम् । तथा दोहनादूर्ध्वम् 'अस्मिन् 'गोष्ठे यजमानसंबन्धिनि गोवाटे रमध्वम् । ततो रात्रौ 'अस्मिन् 'क्षये यजमानसंबन्धिनि गृहे रमध्वम् । गोवाटशब्देन गृहाद् बहिर्विश्रम्भेण संचारदेशोऽभिहितः । सर्वदा 'अस्मिन् 'लोके । लोकृ दर्शने । यजमानसंबन्धिदृष्टिविषये । रमध्वम् । किं बहुना ? 'इह 'एव एतस्मिन् यजमानसंबन्धिदृष्टिविषये स्थान एव 'स्त यूयं भवत । 'इतः अस्मद्यजमानस्थानात् 'मा 'अपगात । अपेत्यान्यत्र मा गच्छत । अत्र रेवतीशब्दस्य गोवाचित्वं कण्वो दर्शयति– "पशवो वै रेवन्तस्तस्मादाह रेवती रमध्वमिति" (काशब्रा १·४·१·२०) इति । तित्तिरिश्चैतद्दर्शयति– "रेवती रमध्वमित्याह पशवो वै रेवतीः" (तैसं ६·३·६) इति ॥

षोडशे विशेषमाह कात्यायनः– "सꣳहितेत्यालभते" (काश्रौ ४·१२·६) इति । गामित्यनुवर्तते । कण्वो विस्पष्टमेतदाह– "अथ गामभिमृशति सꣳहिताऽसि" (काशब्रा १·४·१·२१) इति । पाठस्तु– 'सꣳहिताऽसि विश्वरूप्यूर्जा मा विश गौपत्येन ' इति । हे गौः, त्वं 'सꣳहिता 'असि । क्षीराज्यरूप-

---

17. V1 S1 C स्थ for स्त
18. V1 S1 C om. तथा
19. V1 S1 C °संबन्धि° for °संबन्धिनि
20. C V1 S1 after दर्शने add इति धातुः
21. C V1 S1 after °विषये add रमध्वम्; C V1 S1 स्थ for स्त
22. P1 om. अन्यत्र

हविर्दानाय यज्ञकर्मभिः संयुक्ताऽसि । ᵛविश्वरूपी शुक्लकृष्णादिभिर्बहुभी रूपैर्युक्ता सती ᵛऊर्जा क्षीरादिरसैः मे ᵛगौपत्येन बहुविधगोस्वामित्वेन ᵛमा ᵛआविश मां सर्वतः प्रविश । त्वत्प्रसादान्मम बहुविधो रसो बहुविधं गोस्वामित्वं च संपद्यताम् ॥१२-१३॥

आ– ‘ ऊर्जः स्थ ’ इति कृत्स्नमन्त्रस्य पक्षे पङ्क्तिः । भेदे तु लिङ्गोक्तदेवत्या गायत्री । ᵛऊर्जः ᵛस्थ । ऊर्जशब्दो रसवचनः । यतो यूयम् ऊर्जः स्थ अतः ᵛऊर्जः ᵛवः ᵛभक्षीय । ᵛरायः ᵛपोषः ᵛस्थ यतो यूयं धनपुष्टिकराः स्थ अतः ᵛरायः ᵛपोषं धनस्य पोषं ᵛवः ᵛभक्षीय ॥ ‘ रेवती रमध्वम् ’, ‘ इहैव स्त ’, ‘ सꣳहिता ’ इति त्रीणि यजूंषि गव्यानि । आद्यमेतत्– हे ᵛरेवतीः हे रेवत्यः धनवत्यो गावः, ᵛरमध्वम् । रमु क्रीडायाम् । रतिं कुरुत । ᵛअस्मिन् ᵛयोनौ अस्यां गोयूथप्रजनन्यां रमध्वम् । ᵛअस्मिन् ᵛगोष्ठे गोवाटे रमध्वम् । ᵛअस्मिन् ᵛक्षये गृहे । ᵛअस्मिन् ᵛलोके । लोकृ दर्शने । मदीयेऽस्मिन्नवलोकने रमध्वम् ॥

किं च, ᵛइह ᵛएव यजमानगृहे एव ᵛस्त भवत । ᵛइतः यजमानं परित्यज्य इतो गृहात् ᵛमा ᵛअपगात मा गच्छत । गामभिमृशति– ᵛसंहिता ᵛअसि संलग्नाऽसि । यज्ञस्य होमसंबन्धेन संहिताऽसि । अथवा प्राणिनः पयोभिः संदधातीति सꣳहिता । ᵛविश्वरूपी शुक्लकृष्णादिभिर्विश्वरूपैर्विश्वरूपी । ᵛऊर्जा अन्नेन ᵛगौपत्येन गोपतित्वेन च माम् ᵛआविश प्रविश ॥१२-१३॥

उप॑ त्वाऽग्ने दि॒वेदि॑वे॒ दोषा॑वस्तर्धि॒या व॒यम् ।
नमो॒ भर॑न्त॒ एम॑सि ॥१४॥

उप॑ । त्वा॒ । अ॒ग्ने॒ । दि॒वेदि॑व॒ इति॑ दि॒वेऽदि॑वे । दोषा॑वस्त॒रिति॒ दोषा॑ऽवस्तः । धि॒या । व॒यम् । नम॑ः । भर॑न्तः । आ । इ॒मा॒सि॒ ॥ जां ॥१४॥

सा– सप्तदशे विशेषमाह कात्यायनः– “ गार्हपत्यं गत्वोपतिष्ठत उप त्वेति ” (काश्रौ ४.१२.७) इति । कण्वोऽप्याह– “ अथ गार्हपत्यमुप परैत्युप त्वा ” (काशब्रा १.४.१.२२) इति । पाठस्तु– ‘उप त्वाऽग्ने दिवेदिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि ’ इति । हे ᵛदोषावस्तः ᵛअग्ने, दोषा रात्रिस्तस्यामपि वसति अजस्रं धार्यमाणत्वान्नोपशाम्यतीति दोषावस्ता । तथाविध हे गार्हपत्य, ᵛदिवेदिवे प्रतिदिनं ᵛवयं यजमानाः ᵛधिया श्रद्धायुक्तया बुद्ध्या ᵛनमः ᵛभरन्तः नमस्कारं संपादयन्तः ᵛउप समीपे ᵛत्वा ᵛएमसि त्वां प्रत्यागच्छामः ॥१४॥

आ– ‘ उप त्वाऽग्ने ’ इत्यादिना गार्हपत्यमुपतिष्ठते । ‘ उप त्वा ’दितृचमाग्नेयं गायत्रं मधुच्छन्दा वैश्वामित्रः । हे भगवन् ᵛअग्ने, ᵛदिवेदिवे अहन्यहनि ᵛदोषावस्तः । दोषेति रात्रिनाम । (निघण्टु १.७) । वस निवासे । रात्र्यां वसनशीलो दोषावस्ता, तत्संबोधनं दोषावस्तः ।

---

1. P1 यज्ञियैः for यज्ञ°
14. H1 om. च
20. V1 S1 C om. कण्वो° ... इति ।

ᵛधिया बुद्ध्या प्रोत्साहितमनस्काः श्रद्धधानाः ᵛवयं ᵛनमः ᵛभरन्तः । "नमः" इत्यन्ननाम (निघण्टु २.७) । अन्नं बिभ्रतो वयं ᵛत्वा ᵛएमसि । आ इमसि, छन्दसि "इदन्तो मसि" (पा ७.१.४६) इति रूपम् । उपेम उपगच्छेम ॥१४॥

राजन्तमध्वराणां गोपामृतस्य दीदिविम् ।
वर्धमानं स्वे दमे ॥१५॥

राजन्तम् । अध्वराणाम् । गोपाम् । ऋतस्य । दीदिविम् ।
वर्धमानम् । स्वे । दमे ॥ ॐ ॥ १५ ॥

सा– अथाष्टादशः – 'राजन्तमध्वराणां गोपामृतस्य दीदिविम् । वर्धमानं स्वे दमे' इति । ᵛराजतं दीप्यमानम् ᵛअध्वराणां ᵛगोपां यज्ञानां गोप्तारम् । ᵛऋतस्य सत्यवचनलक्षणस्य व्रतस्य ᵛदीदिविं दीपयितारम् ᵛस्वे ᵛदमे अस्मदीये गृहे ᵛवर्धमानं चातुर्मास्यसोमपश्वादिभिरभिवृद्धिं गच्छन्तं त्वामुपैमीत्यनुवर्तते । अत्र वर्धमानशब्दस्य तात्पर्यं कण्वो दर्शयति– "यदस्माकं पुष्टं तं नो भूयो भूम एव कुरु । तन्नो वर्धयेत्येवैतदाह" (काशब्रा १.४.१.२२) इति ॥१५॥

आ– हे भगवन्नग्ने, ᵛराजन्तं दीप्यमानम् ᵛअध्वराणां यज्ञानां ᵛगोपां गोप्तारम् ᵛऋतस्य सत्यवदनलक्षणव्रतस्य ᵛदीदिविं दीपयितारम् । ᵛवर्धमानं चातुर्मास्यपशुसोमादिभिरभिवर्धमानम् । ᵛस्वे ᵛदमे । दम इति गृहनाम । स्वकीये गृहे वर्धमानम् । त्वामुपैमेत्यनुषङ्गः ॥१५॥

स नः पितेव सूनवेऽग्ने सूपायनो भव ।
सचस्वा नः स्वस्तये ॥ १६ ॥

---

1. B1 प्रोत्सवापिमस्काः, H1 प्रोत्साबाइतमनस्काः– we have correctd this as प्रोत्साहितमनस्काः; Uvvaṭa interprets this धिया बुध्या प्रोक्तम्, यतमनस्काः श्रद्धधानाः ... It is not clear what प्रोक्तम् यतमनस्काः in this connection means. Evidently it appears that this portion in Uvvaṭa's commentary is corrupt
8. P1 with marking above राजन्तम् ins. on the आग्नेयं यजुः ।
9. V1 S1 C om. यज्ञानां
10. P1 with marking above दीदिविं ins. on the margin दीव्यतेर्यङ्लुगन्तादौणादिक इकारः इति शब्दसिद्धिः । अध्यात्माधिदेवपक्षेऽप्येवम्; P1 om. °सोम°
11. C S1 उपैत्यनु° for उपैमीत्यनु°; C V1 S1 यदास्माकमिष्टत्वं for यदस्माकं पुष्टं तं
12. V1 वर्धयत्ये° for वर्धयेत्ये°
13. B1 सेव्यमानम् for दीप्यमानम्; B1 om. अध्वराणां यज्ञानां

सः । न॒ः । पि॒तेवे॑ति॑ पि॒ताऽइ॑व । सू॒नवे॑ । अग्ने॑ । सू॒पा॒यन इति॑ सु॒ऽउ॒पा॒य॒नः । भ॒व॒ ।
सच॑स्व । न॒ः । स्व॒स्तये॑ ॥ झां १६ ॥

सा– अथैकोनविꣳशः – स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये' इति । हे ᵛअग्ने गार्हपत्य, अत्र पूर्वोक्तगुणयुक्तस्त्वं ᵛनः अस्माकं ᵛसूपायनः ᵛभव । सुष्ठूपप्राप्तुं शक्यो भव । तत्र दृष्टान्तः – ᵛसूनवे ᵛपितेव । यथा पुत्राय पिता भयं विना सुखेन प्राप्तुं शक्यस्तद्वत् । ᵛनः अस्माकं ᵛस्वस्तये क्षेमाय ᵛसचस्व अनेन कर्मणा समवेतो भव । षच समवाये । यद्वा सचस्व सेवस्व । षच सेवने । अत्र दृष्टान्ततात्पर्यं कण्वो दर्शयति– "यथा पिता पुत्राय सूपचर एवं नः सूपचर एधीत्येवैतदाह" (काशब्रा १·४·१.२३) इति ॥१६॥

आ – हे भगवन् ᵛअग्ने, यस्त्वमेवंगुणः सोऽस्माकं ᵛपितेव ᵛसूनवे पुत्राय पितेव ᵛसूपायनः । अत्र अय, पय, चय गतौ । सुखोपगमनः ᵛभव । किं च, ᵛसचस्व ᵛनः अस्मान् । सच से(व)नेच । सिञ्च सेच (? व, स्व वा । ᵛस्वस्तये स्वस्तीत्यविनाशिनाम । अविनाशाय ॥१६॥

अ॒ग्ने त्वं नो॒ अन्त॑म उ॒त त्रा॒ता शि॒वो भ॑वा वरू॒थ्य॑ः ।
वसु॑र॒ग्निर्वसु॑श्रवा॒ अच्छा॑ नाक्षि द्यु॒मत्त॑मꣳ र॒यिं दा॑ः ॥ १७ ॥

अग्ने॑ । त्वम् । न॒ः । अन्त॑मः । उ॒त । त्रा॒ता । शि॒वः । भ॒व॒ । व॒रू॒थ्य॑ः ।
वसु॑ः । अ॒ग्निः । वसु॑श्रवा॒ इ॒ति॒ वसु॑ऽश्रवाः ।
अच्छ॑ । न॒क्षि॒ । द्यु॒मत्त॑म॒मिति॑ द्यु॒मत्ऽत॑मम् । र॒यिम् । दा॒ः ॥ जै ॥१७॥

सा– अथ विंशः – 'अग्ने त्वं नोऽन्तम उत त्राता शिवो भवा वरूथ्यः' इति । हे ᵛअग्ने गार्हपत्य, ᵛत्वं ᵛनः अस्माकं ᵛअन्तमः अन्तिकतमः सर्वदा समीपवर्ती ᵛभव इत्यन्वयः । ᵛउत अपि च ᵛत्राता पालयिता ᵛशिवः शान्तः ᵛवरूथ्यः । पुत्रपौत्रादिसमूहो वरूथम् । तस्मै हितः वरूथ्यः भव । इमं मन्त्रमारभ्य चतस्र ऋचो द्विपदाः । तासां पुरुषरूपापत्ययाचने तात्पर्यं कण्वो दर्शयति– "पुरुषच्छन्दसं वै द्विपदा द्विपाद्वयं पुरुषः पुरुषान् वा एतद्याचते" (काशब्रा १·४·१·२३) इति ॥

अथैकविंशः– 'वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमꣳ रयिं दाः' इति । हे गार्हपत्याख्य, ᵛवसुः

---

4. S1 C om. अत्र; C V1 S1 सुष्ठूपायं for सुष्ठूप°
6. V1 S1 C after समवाये add इति धातुः; V1 S1 C om. यद्वा...सेवने ।
17. P1 with marking above अग्ने ins. on the margin आग्नेयं यजुः;
    S1 C गार्हपत्याग्ने for अग्ने गार्हपत्य [L 18]
19. P1 वरूथः for वरूथम्
20. V1 S1 C द्विपदां for द्विपदा
21. P1 after हे adds गार्हपत्य; C S1 after गार्हपत्याख्य ins. अग्ने

जनानां वासयिता । ᵛवसुश्रवाः वसुना धनेन श्रवः कीर्तिर्यस्यासौ वसुश्रवाः । धनप्रदोऽयमित्येवमस्य कीर्तिर्महती । ᵛअच्छ निर्मलस्वभाव हे अग्ने, ᵛनक्षि अस्मदीयं होमस्थानं गच्छ । नक्ष गतौ । यदा यदा वयं होष्यामस्तदा तदा समागच्छेत्यर्थः । ᵛद्युमत्तमं दीप्तिमन्तं वर्णविशेषयुक्तं ᵛरयिं धनं ᵛदाः देहि ॥१७॥

आ– द्वे गार्हपत्याग्निदेवत्ये बन्धुः श्रुतबन्धुरेकैकश ऋषी । हे भगवन् ᵛअग्ने, ᵛत्वं ᵛनः ᵛअन्तमः अस्माकं त्वं निकटतमः असि । अति बन्धने । अतः (ऽन्तः) संबन्धस्तत्रश्रेष्ठतमः । अन्तमः ब्रह्मचर्याश्रमप्रभृति देवतात्वेन च स्वमतिनिकटतमः । उत अपि च ᵛत्राता । त्रैङ् पालने । स्वभावत एव सर्वप्राणिनां पालयिताऽसि । अतः ᵛशिवः ᵛभव शान्तो भव । वरूथमिति [गृहनाम] (निघण्टु ३.४) । तस्मै हितो ᵛवरूथ्यः । हे भगवन्नग्ने, ᵛअग्निः त्वं ᵛवसुः असि जनानां वासयिता । त्वं ᵛवसुश्रवाः, वसवः श्रवः यशो यस्य सः वसुश्रवाः, सुकीर्तिर्धनद इत्यर्थः । हे ᵛअच्छ प्रपन्नानां प्राणिनां पापमलं दहन् ᵛन [क्षि] । गृहिणामपि (?) त्वम् अच्छ स्वच्छ निर्मल । न हि कदाचिदपि दोषेण बद्ध्यसे, न लक्ष्यस इत्यर्थः । यद्वा– "अच्छाभेराप्तुमिति शाकपूणिः" (नि ५.२८) । पूज्यत्वेन व्याप्तुं हविषा नक्षीति । किं च– ᵛद्युमत्तमं दीप्तिमन्तं वर्णविशेषवन्तं ᵛरयिं धनं ᵛदाः देहि ॥१७॥

तं त्वा॑ शोचिष्ठ दीदिवः सु॒म्नाय॑ नू॒नमी॑महे॒ सखि॑भ्यः ।
स नो॑ बोधि श्रु॒धी हव॑मुरु॒ष्या णो॑ अघा॒यतः॒ सम॑स्मात् ॥ १८ ॥

तम् । त्वा॒ । शो॒चि॒ष्ठ॒ । दी॒दि॒व॒ इति॑ दीदिऽवः ।
सु॒म्नाय॑ । नू॒नम् । ई॒म॒हे॒ । सखि॑भ्य॒ इति॒ सखि॑ऽभ्यः ।
सः । न॒ः । बो॒धि॒ । श्रु॒भि । हव॑म् ।
उ॒रु॒ष्य । न॒ः । अ॒घा॒य॒तः । अ॒घ॒य॒त इत्य॑घ॒ऽय॒तः । स॒म॒स्मा॒त् ॥ द्रैं ॥१८॥

---

5. B1 देवहुत्या, H1 द्वे हत्ये–readings in both are corrupt. We have therefore corrected them as द्वे गार्हपत्याग्निदेवत्ये
6. B1 अदि for अति; B1 श्रेष्ठः for श्रेष्ठतमः
7. H1 after first च add अन्नात्वेन
8. B1 om. शान्तो भव
10. B1 वसुवत् for वसवः; B1 श्रवो for यशो
11. B1 गृहीनामपि, H1 न गृइनामपि– then blank upto निर्मल [L 12]
12. H1 निर्मिते, B1 निर्मलम् for निर्मल; B1 नक्षि for नहि; B1 वध्यसे for लक्ष्यसे
13. B1 न नक्षीति for नक्षीति
14. H1 om. वर्णविशेषवन्तं

सा- अथ द्वाविंशः – ‘ तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ’ इति । हे ᵛशोचिष्ठ दीप्तिमन्, ᵛदीदिवः सर्वस्य दीपयितः, ᵛतं ᵛत्वा पूर्वोक्तगुणयुक्तं त्वामग्निं ᵛसुम्नाय सुखार्थं ᵛसखिभ्यः अस्मदीयानां सखीनामुपकाराय च ᵛनूनं निश्चयेन ᵛईमहे याचामहे ॥

अथ त्रयोविंशः – ‘ स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात् ’ इति । हे अग्ने, ᵛसः त्वं ᵛनः अस्मान् भवत्सेवकान् ᵛबोधि बुध्यस्व । ᵛहवम् अस्मदीयमाह्वानं ᵛश्रुधि शृणु । समशब्दः सर्वशब्दपर्यायः । अघं पापमस्मानिच्छतीत्यघायत् शत्रुः । ᵛसमस्मात् ᵛअघायतः सर्वस्मादस्मदीयशत्रोः ᵛनः अस्मान् ᵛउरुष्य पालय । उरुष्यतिस्तु रक्षणकर्मा ॥१८॥

आ- ‘ तं त्वा ’ इति । यस्त्वमेवंगुणः ᵛतं ᵛत्वा त्वां ब्रवीमि । हे अग्ने, ᵛशोचिष्ठ । शुची दीप्तौ । दीप्तिमत्तम । ᵛदीदिवः दीप्यस्व । दिवेर्ज्वलनार्थस्य लिटयेतद्रूपं दीदिव इति । ᵛनूनं निश्चयेन ᵛसुम्नाय सुम्नार्थं सुखार्थमेवाऽग्निं त्वाम् ᵛईमहे याचामहे । ᵛसखिभ्यः सखिभ्योऽर्थाय नूनमीमह इत्यनुषङ्गः । ‘ स नो बोधि ’ । यस्त्वमेवंगुणः ᵛसः ᵛनः अस्माकमित्यभिप्रायः । ᵛबोधि अबोधि त्वयाऽवगत इत्यर्थः । अस्मदीयाभिप्रायं बुद्ध्वा च ᵛहवम् अस्मदीयमाह्वानं [ᵛश्रुधि ।] श्रु श्रवणे । शृणु । आह्वानं श्रुत्वा च ᵛउरुष्य ᵛनः अस्मान् उरुष्य । उरुष्यती रक्षणकर्मा । पापं य इच्छति स अघायन् । तस्मात् ᵛअघायतः परस्यानिष्टमिच्छतः अनिष्टं कुर्वतश्च ᵛसमस्मात् सर्वस्मात् नः उरुष्य रक्ष ॥१८॥

इळ॒ एह्यदि॑त॒ एहि॒ काम्य॒ एहि॑ ।
मयि॑ वः का॒म॒धर॑णं भूयात् ॥ १९ ॥

इळे॑ । आ । इ॒हि॒ । अदि॑ते । [आ । इ॒हि॒ ।] काम्ये॑ । आ । इ॒हि॒ ।
मयि॑ । व॒ः । का॒म॒धर॑ण॒मिति॑ का॒म॒ऽधर॑णम् । भू॒या॒त् ॥ कां ॥१९॥

सा- चतुर्विंशे विशेषमाह कात्यायनः – “ गां गच्छतीळ एहीति ” (काश्रौ ४·१२·८) इति । हे ᵛइळे ᵛएहि । हे ᵛअदिते, ᵛएहि आगच्छ । होमस्थानमिति शेषः । इळा मनोर्दुहिता । अदितिर्देवमाता । इळा मनुमिवास्मान् रक्षतु । अदितिरादित्यानिव । अतस्मिंस्तच्छब्दस्तद्धर्मनिर्देशार्थः ॥

[अथ पञ्चविंशः]– कात्यायनः – “ काम्य एहीत्यालभते ” (काश्रौ ४·१२·९) इति । पाठस्तु– ‘काम्य एहि । मयि वः कामधरणं भूयात्’ इति । हे ᵛकाम्ये, सर्वैः कामयितव्ये धेनो, ᵛएहि अस्मद्धोमीयस्थानमागच्छ । ᵛवः युष्माकं गवां ᵛकामधरणम् अपेक्षितफलधारकत्वं यदास्ति तन्मय्यनुष्ठातरि ᵛभूयात्

---

9. H1 दितेः, B1 द्युतेः for दिवेः, H1 इत्येतद् for लिट्येतद्
14. B1 अघयन् for तस्मात्; H1 after परस्य ins. अनिलः
20. P1 with marking above गां ins. on the margin गोदैवतं यजुः ।
21. P1 इडा, V1 इला for इळा
22. V1 S1 C इलां मनुर् for इळा मनुम्
25. V1 S1 C om. °स्थान°

भवस्तु । युष्मत्प्रसादात् अहमभीष्टफलस्य धारयिता भूयासमित्यर्थः । अत्र ‘ मयि वः ’ इत्यस्य तात्पर्यं कण्वो दर्शयति– “ मयि वः कामधरणमित्यहं वः प्रियो भूयासमित्येवैतदाह ” (काशब्रा १·४·१·२४) इति ॥१९॥

आ– गां गच्छति ‘ इळ एहि ’ इति । द्वे गव्ये । हे ᵛइळे, ᵛअदिते, इति गोः संबोधनम् । इला नाम मनोर्दुहिता । अदितिर्देवमाता । इलेव मनोरस्मान् प्रति ᵛएहि । अदितिरिवादित्यानामस्मान् प्रति ᵛएहि । अतस्मिंस्तच्छब्दस्तद्धर्मनिर्देशार्थः । गामभिमृशति– ‘ काम्ये ’ इति । मनुष्याणां कामनार्हा गौः काम्या । हे ᵛकाम्ये, ᵛएहि आगच्छ । ᵛवः युष्माकं ᵛकामधरणम् । कामाः यस्मिन् ध्रियन्ते तत् कामधरणम् । काम्यविषयस्थानं ᵛमयि ᵛभूयात् । अहं वः प्रियो भूयासमित्यर्थः ॥१९॥

सोमानꣳ स्वरणं कृणुहि ब्रह्मणस्पते ।
कक्षीवन्तꣳ य औशिजः ॥ २० ॥

सोमानम् । स्वरणम् । कृणुहि । ब्रह्मणः । पते ।
कक्षीवन्तम् । यः । औशिजः ॥ सों ॥२०॥

सा– अथ षड्विंशः – ‘ सोमानꣳ स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजः ’ इति । षुञ् अभिषवे । तस्मान्मनिन्प्रत्यये नकारान्तः । ᵛसोमानम् अभिषोतारम् । स्वृ शब्दोपतापयोः । ᵛस्वरणं शब्दयितारम् । हे ᵛब्रह्मणस्पते, वेदपालकाग्ने, सोमयागकर्तारं स्तुतिरूपशब्दयुक्तं च मामित्यध्याहारः । ᵛकृणुहि कुरु । तत्रोपमानमुच्यते । ᵛकक्षीवन्तं कक्षीवन्नामकमृषिं यथा सोमयागयुक्तं स्तुतियुक्तं च कृतवानसि तथा मां कुरु । उपमानद्योतनाय इवशब्दोऽत्र लुप्तो द्रष्टव्यः । कोऽसौ कक्षीवानिति सोऽभिधीयते । ᵛयः पुमान् ᵛऔशिजः उशिजः पुत्रः तं कक्षीवन्तम् इति योजनीयम् । सोऽयमर्थो यास्केन स्पष्टीकृतः – “ सोमानां सोतारं प्रकाशनवन्तं कुरु । ब्रह्मणस्पते कक्षीवन्तमिव य औशिजः कक्षीवान् कक्ष्यावान् औशिजः उशिजः पुत्रः ” (नि ६.१०) इति । ‘ सोमानम् ’ इत्येतस्य तात्पर्यं तित्तिरिरपि सूचयति– “ सोमानꣳ स्वरणम् [इत्याह] सोमपीथमेवाऽवरुन्द्धे ” (तैसं १·५·६) इति । अत्र ‘ सोमानम् ’ इत्यादेस्तृचस्य लोकत्रयोपस्थानभावनायां तात्पर्यमाह कण्वः – “ यदाहवनीयमुपतिष्ठते दिवं

---

6. B1 अतस्तास्मं° for अतस्मिꣳ°; B1 °निदर्शनार्थः for निर्देशार्थः
14. P1 with marking above सोमानं ins. on the margin–ब्राह्मणस्पत्यं गायत्रम्
15. V1 S1 C अभिषवन इति धातुः for अभिषवे
18. C दृष्टः for द्रष्टव्यः
20. V1 कृणुहि for कुरु; P1 after कुरु adds. कृणुहि
21. P1 कक्षा° for कक्ष्या°; P1 with marking above उशिजः ins. on the margin उशिक् तस्य मातेति पुराणे ।

तदुपतिष्ठते यद्गार्हपत्यं पृथिवीं तदथैतदन्तरिक्षमुपतिष्ठते तस्माद्ब्राह्मणस्पत्येन तृचेनोपतिष्ठते " (काशब्रा १·४·१·२६) इति ॥२०॥

आ–अग्निमीक्षमाणो जपति– ' सोमानम् ' इति । ' सोमानम् ' इत्यादितृचं ब्राह्मणस्पत्यं गायत्रम् । ब्रह्मणस्पतिर्मेधातिथ्य ऋषिः । बृहस्पतिरेव ब्रह्मणस्पतिः । हे ᵛब्रह्मणस्पते, बृहस्पते, ᵛसोमानम् । षुञ् अभिषवे । "आतो मनिन् क्वनिप् वनिपश्च " (पा ३·२·७४), " अन्येभ्योऽपि दृश्यन्ते " (पा ३·२ ७५) इति मनिनि कृते, द्वितीयैकवचनं ' सोमानम् ' इति भवति । सोमानं सोतारमिति पर्यायः (? यौ) । सोमानम् सोतारमभिषवकर्तारम् । ᵛस्वरणम् । स्वृ शब्दोपतापयोः । स्वरणं शब्दयितारम् । सोमानं सोतारं देवानां स्तोतारं [च] मां ᵛकृणुहि कुरु धनप्रदाने । कम् इवेति ? ᵛकक्षीवन्तम् । लुप्तोपममेतत् । दीर्घतमसः पुत्रः ᵛयः ऋषिः ᵛऔशिजः । उशिक् तस्य माता । तस्यां जातो य औशिजस्तं कक्षीवन्तमृषिमिव मां ᵛकृणुहि ॥२०॥

यो रेवान् यो अमीवहा वसुवित् पुष्टिवर्धनः ।
स नः सिषक्तु यस्तुरः ॥२१॥

यः । रेवान् । यः । अमीवहेत्यमीवऽहा ।
वसुविदिति वसुऽवित् । पुष्टिवर्धन इति पुष्टिऽवर्धनः ।
सः । नः । सिषक्तु । सिसक्त्विति सिसक्तु । यः । तुरः ॥ भ्यां ॥२१॥

सा– अथ सप्तविंशः – ' यो रेवान् यो अमीवहा वसुवित् पुष्टिवर्धनः । स नः सिषक्तु यस्तुरः ' इति। ᵛयः पुत्रः ᵛरेवान् धनवान् , पुनरपि ᵛयः पुत्रः ᵛअमीवहा अमीवस्य रोगस्य हन्ता । ᵛवसुवित् वसुनो धनस्य सारत्वं वेत्तीति वसुवित् । ᵛपुष्टिवर्धनः पोषणस्य वर्धयिता । पुनरपि ᵛयः पुत्रः ᵛतुरः त्वरायुक्तः शीघ्रकारी, ᵛसः तादृशः पुत्रोऽग्नेः प्रसादात् ᵛनः अस्मान् ᵛसिषक्तु सेवताम् । तथा च यास्केन व्याख्यातम्– " स नः सेवतां यस्तुरः " (नि ३·२१) इति ॥२१॥

आ– ' यो रेवान् ' [इति ।] ᵛयः ब्रह्मणस्पतिः । ' रे ' इति धननाम । ᵛरेवान् ।

---

1. C V1 S1 °स्पत्यत्वेन for °स्पत्ये तृचेन
7. H1 शृ for स्वृ
8. H1 श्रपणं श्रपयितारं for स्वरणं शब्दयितारम्
9. H1 °प्रधाने for °प्रदाने; H1 om. ऋषिः
16. P1 with marking above यो ins. on the margin– ब्राह्मणस्पत्यं यजुर्गायत्रं वा ।
21. H1 रैवान् for रेवान्

धनवान् । ᵛयः च ᵛअमीवहा । अमीवा व्याधिस्तस्य हन्ता अमीवहा । ᵛवसुवित् वसु धनं, तस्य सारासारतां वेत्ति वेद इति स वसुवित् । ᵛपुष्टिवर्धनः पुष्टेः पोषणस्य वर्धयिता पुष्टिवर्धनः । ᵛयः ᵛतुरः । तुरश्छान्दसः । त्वरः शीघ्रकारी । यः एवंविधः, ᵛसः ᵛनः अस्मान् ᵛसिषक्तु । षिच सेवने । ᵛसचताम् । यद्वा— एवंविधः पुत्रः प्रार्थ्यते— हे ब्रह्मणस्पते, यः ᵛरेवान् धनवान् यः च अमीवहा व्याधेर्हन्ता । वसुवित् धनस्य लब्धा । पुष्टिवर्धनः पुष्टेश्च यो वर्धयिता । यस्तुरः शीघ्रकारी यः पुत्रः सः नः अस्मान् सिषक्तु सेवतामिति ॥२१॥

मा नः शंसो अररुषो धूर्तिः प्रणङ्मर्त्यस्य ।
रक्षा णो ब्रह्मणस्पते ॥२२॥

मा । नः । शंसः । अररुषः । धूर्तिः । प्रणक् । मर्त्यस्य ।
रक्ष । नः । ब्रह्मणः । पते । म्या ॥२२॥

सा— अथाष्टाविंशः— 'मा नः शंसो अररुषो धूर्तिः प्रणङ्मर्त्यस्य । रक्षा णो ब्रह्मणस्पते' इति । रा दान इति धातोः क्वसुन्नन्तस्य षष्ठ्येकवचनं ररुष इति । दानं कृतवत इत्युक्तं भवति । तस्य निषेधात् ᵛअररुषः इत्युक्तम् । कदाचिदपि हविर्दानमकृतवत इत्यर्थः संपद्यते । तादृशस्य ᵛमर्त्यस्य मनुष्यस्य ᵛशंसः प्रशंसिता ᵛधूर्तिः कर्मानुष्ठानप्रशंसारूपेण धौर्त्येन युक्तः पुत्रः ᵛनः अस्मान् ᵛमा ᵛप्रणक् प्रकर्षेण मा व्याप्नोतु । नशिरयं व्याप्त्यर्थः । यद्वा-नश आदर्शने । मा प्रणक् मा प्रकर्षेण विनाशयत्वित्यर्थः । हे ᵛब्रह्मणस्पते, ᵛनः अस्मान् ᵛरक्ष । नास्तिकः पुत्रो यथा नोत्पद्यते तथा पालय ॥२२॥

आ— 'मा नः शंसः' इति । हे ᵛब्रह्मणस्पते, अस्मान् ᵛअररुषः अदातुः पुरुषस्य ᵛशंसः शंसनम् । शंसः अनिष्टचिन्तनम् । अररुषः । रा दाने । अस्य क्वसौ कृते षष्ठ्या ररुषः इति भवति । तन्नञा प्रतिषिध्यते । अररुषः अदातुः शत्रोः शंसः । प्रपूर्वस्य नशेर्व्याप्त्यर्थस्यैतद्रूपं 'प्रणक्' इति । ᵛमा ᵛप्रणक् मा व्याप्नोतु । ᵛमर्त्यस्य मृतियोग्यस्य ᵛधूर्तिः वध्या ᵛनः मा प्रणक् । ᵛनः अस्मान् ᵛरक्ष पालय ॥२२॥

महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः ।
दुराधर्षं वरुणस्य ॥२३॥

महि । त्रीणाम् । अवः । अस्तु । द्युक्षम् । मित्रस्य । अर्यम्णः ।
दुराधर्षमिति दुःऽआधर्षम् । वरुणस्य ॥ गौ ॥२३॥

---

1. B1 om. धनवान्
12. P1 with marking above ररुषः ins. on the margin ररौ इति ररिवान् तस्य
14. VI S1 C om. नः
15. V1 S1 C after आदर्शने add: इति धातुः
19. B1 om. नञा

सा– अथैकोनत्रिंशः –‘ महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः । दुराधर्षं वरुणस्य ’ इति । योऽयं मित्रः यश्चार्यमा योऽपि वरुणः एतन्नामकानां ᵛत्रीणां त्रयाणां देवानां संबन्धि ᵛअवः-पालनम् ᵛअस्तु भवतु । कथंभूतमवनम् ? ᵛमहि महत् सर्वापद्विनाशकम् । ᵛद्युक्षं द्युमन्ति सुवर्णादिद्रव्याणि क्षियन्ति निवसन्ति यस्मिन् यस्मिन् पालने, तथाविधं ᵛदुराधर्षम् अन्यैराधर्षयितुं तिरस्कर्तुमशक्यम् । अत्र ‘ महि त्रीणाम् ’ इत्यादितृचस्य मध्ये “ नाध्वसु वारणेषु ” (कासं ३·३.२४) इति यदुक्तं तस्य द्युलोकभूलोकगतसर्वमार्गाभिप्रायं कण्वो दर्शयति– “ इमे वा अध्वनो वारणा य इमेऽन्तरा द्यावापृथिव्यौ तानेवैतदुपतिष्ठते ” (काशब्रा १.४.१·२६) इति ॥२३॥

आ– ‘ महि त्रीणाम् ’ इत्यादि तृचमादित्यदेवत्यं गायत्रम् । ऋषिस्तु सत्यधृतिर्वारुणिः । पथि स्वस्त्ययने, विनियुक्तमिदं मधुसूक्तम् । ᵛमित्रस्य ᵛअर्यम्णः ᵛवरुणस्य चेति ᵛत्रीणां त्रयाणां सूर्याणां ᵛमहि माहात्म्यं ᵛनः ᵛअस्तु । ᵛअवः अवनं पालनम् । कथंभूतम् ? ᵛद्युक्षं द्युमन्ति द्रव्याणि यस्मिन् पालने क्षियन्ति निवसन्ति तद् द्युक्षम् । ᵛदुराधर्षम् अन्यैर्धर्षयितुमशक्यं दुराधर्षम् । द्युक्षं दुराधर्षमवनम् । मित्रादिसूर्यकमवनमस्माकमस्तु ॥२३॥

न॒हि तेषा॑म॒मा च॒न नाध्व॑सु वा॒रणे॑षु ।
ई॒शे॑ रि॒पुर॒घशं॑सः ॥२४॥

न॒हि । तेषा॑म् । अ॒मा । च॒न । न । अध्व॒स्वित्यध्व॑ऽसु । वा॒र॒णेषु॑ ।
ई॒शे॑ । रि॒पुः । अ॒घशं॑स॒ इत्य॒घऽशं॑सः ॥ च्छं ॥२४॥

सा– अथ त्रिंशः–‘ नहि तेषाममा चन नाध्वसु वारणेषु । ईशे रिपुरघशंसः ’ इति । अमाशब्दो गृहनामसु (निघण्टु ३.४) पठितः । अपीत्यस्मिन्नर्थे चन– शब्दः वर्तते । ᵛअमा ᵛचन गृहेऽपि वर्तमानानां तेषां मित्रार्यमवरुणैस्त्रिभिर्देवैः पालितानां यजमानानामुपद्रवायेति शेषः । ᵛअघशंसः सर्वदा पापस्य प्रशंसकः ᵛरिपुः शत्रुः ᵛन ᵛईशे न समर्थो भवति खलु । तथा ᵛवारणेषु चोरव्याघ्रादिषु भयवशान्निवारितेष्वपि ᵛअध्वसु मार्गेषु रिपुः ᵛन ईशे बाधितुं न समर्थः । मित्रादिभिः पालितानामस्माकं गृहेऽरण्ये वा नास्ति चोरादिबाधा इत्यर्थः ॥२४॥

आ– ‘ नहि तेषाम् ’ इति । ᵛतेषां सूर्यपालितानां ᵛअमा ᵛचन । अमाशब्दो गृहवचनः । चनशब्दोऽप्यर्थे । गृहेऽपि वसतां यजमानानां ᵛरिपुः शत्रुः न ᵛईशे । ᵛन ᵛअध्वसु ᵛवारणेषु ।

---

1. P1 with marking above महि ins. on the margin:– आदित्यदेवत्या गायत्री सत्यधृतिर्वारुणिः ऋषिः।
6. P1 तेन for तान्
8. B1 °दैवत्यं for °देवत्यं
10. B1 om. पालनं
11. B1 अशक्यमनाधर्षम् for अशक्यं दुराधर्षम्
19. V1 S1 C उपद्रवार्येति for उपद्रवायेति

अध्वसु मार्गेषु । कथं भूतेषु वारणेषु ? यत्रावस्थितान् पथिकान् चोरा वारयन्ति ते पन्थानो वारणास्तेषु वारणेषु । चोरप्रचुरमार्गेषु व्रजतां सूर्यपालितानां यजमानानाम् । ^{v}अघशंसः, अघं पापं शंसतीत्यघशंसः पापशंसनः रिपुः शत्रुः ^{v}न ईशे । ^{v}हि प्रसिद्धम् । वस्त्राद्यपहरणादौ न समर्थ इति ॥२४॥

ते हि पुत्रासो अदितेः प्र जीवसे मर्त्याय ।
ज्योतिर्यच्छन्त्यजस्रम् ॥२५॥

ते । हि । पुत्रासः । अदितेः । प्र । जीवसे । मर्त्याय ।
ज्योतिः । यच्छन्ति । अजस्रम् ॥ सं ॥२५॥

सा– अथैकत्रिंशः – 'ते हि पुत्रासो अदितेः प्र जीवसे मर्त्याय । ज्योतिर्यच्छन्त्यजस्रम्' इति । ^{v}अदितेः अखण्डितशक्तेर्देवमातुः ^{v}पुत्रासः पुत्राः ^{v}ते पूर्वोक्ता मित्रार्यमवरुणाः, ^{v}मर्त्याय मनुष्याय यजमानाय ^{v}अजस्रं निरन्तरम् अनुपक्षीणं ^{v}ज्योतिः तेजः ^{v}प्र ^{v}यच्छन्ति । किमर्थम् ? ^{v}जीवसे जीवितुं, यथा चिरं जीवनं भवति तथा तदुपायज्ञानं प्रयच्छन्ति ॥ २५ ॥

आ– आदित्यमाहात्म्यं स्तौति– 'ते पुत्रासः' इति । ^{v}अदितेः अखण्डितशक्तेर्देवमातुः ^{v}पुत्रासः पुत्राः मित्रादयः आदित्याः ^{v}मर्त्याय मरणार्हाय मनुष्याय ^{v}अजस्रं निरन्तरम् अनुपक्षीणं ^{v}ज्योतिः, इष्टप्रापकमनिष्टनिवारकं यज्ज्ञानलक्षणं ज्योतिः, [सत्] ^{v}यच्छन्ति प्रयच्छन्ति । ^{v}जीवसे जीवनाय ॥२५॥

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते ॥२६॥

कदा । चन । स्तरीः । असि । न । इन्द्र । सश्चसि । दाशुषे ।
उपोपेत्युपऽउप । इत् । नु । मघवन्निति मघऽवन् ।
भूयः । इत् । नु । ते । दानम् । देवस्य । पृच्यते ॥ ध्यौं ॥२६॥

---

1. B1 om. अध्वसु मार्गेषु
10. V1 पूर्वोक्त° for पूर्वोक्ता
11. V1 S1 C om. ज्योतिः; P1 यच्छन्ति for प्रयच्छन्ति and adds there after प्रयच्छन्तु
12. P1 प्रयच्छन्तु for प्रयच्छन्ति
15. H1 om. इष्टप्रापकम् ... यज्

सा– अथ द्वात्रिंशः – ‘कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे । उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते’ इति । हे ᵛइन्द्र परमैश्वर्ययुक्त, ᵛकदा ᵛचन अस्माभिः पुनः पुनर्याच्यमानः सन् कदाचिदपि ᵛस्तरीः ᵛन ᵛअसि हिंसको न भवसि, न कुप्यसीत्यर्थः । किं च हे ᵛमघवन् धनवन्, ᵛदाशुषे हविर्दत्तवते त्वदनुग्रहार्थम् ᵛउपोप अत्यन्तसमीपे ᵛइत् ᵛनु क्षिप्रमेव । इच्छब्द एवकारार्थः । नुशब्दः क्षिप्रवचनः । ᵛसश्चसि सेवसे । अत्यन्तानुग्रहेण सेवकवत् क्षिप्रमेवातिसमीपमागच्छसीत्यर्थः । ᵛदेवस्य ᵛते प्रकाशमानस्य तव ᵛभूयः ᵛदानं बहुतरं फलदानं ᵛपृच्यते यजमानेन संयुज्यते । अत्रेन्द्रशब्दस्य तात्पर्यं कण्वो दर्शयति– “इन्द्रो यज्ञस्य देवता सेन्द्रमेवैतदग्न्युपस्थानं करोति” (काशब्रा १·४·१·२७) इति ॥ २६ ॥

आ– ‘कदा चन’ इति ऐन्द्री पथ्या बृहती मधुच्छन्दाः । हे भगवन् ᵛइन्द्र, भूयो भूयो याच्यमानोऽपि त्वं ᵛकदा ᵛचन कदाचिदपि ᵛन ᵛस्तरीः ᵛअसि । स्तृणातेर्हिंसार्थस्यैतद्रूपं ‘स्तरीः’ इति । हिंसकः कोपनश्च नासि, न कुप्यसीत्यर्थः । किं च ᵛसश्चसि । सश्चतिः सेवनकर्मा । ᵛदाशुषे इति द्वितीयार्थे चतुर्थी । दाशुषः दानशीलान् सश्चसि सेवसे । उपशब्दः पादपूरणः । इच्छब्द एवार्थः । नुशब्दः क्षिप्रवचनः । हे ᵛमघवन्, ᵛते तव ᵛदेवस्य दातुः ᵛभूयः बहुतरं ᵛदानम् ᵛइत् ᵛनु क्षिप्रमेव दाशुषः प्रति ᵛउपोप ᵛपृच्यते । पृचि संपर्के ॥२६॥

तत् स॑वि॒तुर्वरे॑ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि ।
धियो॒ यो नः॑ प्रचो॒दया॑त् ॥२७॥

तत् । स॒वि॒तुः । वरे॑ण्यम् । भर्गः॑ । दे॒वस्य॑ । धी॒म॒हि॒ ।
धियः॑ । यः । नः॒ । प्र॒चो॒द॒या॒दिति॑ प्र॒ऽचो॒दया॑त् ॥ ॐ ॥२७॥

सा– अथ त्रयस्त्रिंशः – ‘तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात्’ इति । ᵛयः परमेश्वरः अन्तर्यामी ᵛनः अस्माकं ᵛधियः धीः कर्माणि ᵛप्रचोदयात् सत्कर्मानुष्ठानाय प्रकर्षेण प्रेरयति, तस्य ᵛदेवस्य द्योतनात्मकस्य ᵛसवितुः प्रेरकस्यान्तर्यामिणः ᵛभर्गः सर्वपापानां सर्वसंसारस्य च

---

1. P1 with marking above कदा ins. on the margin :– ऐन्द्री पथ्या बृहती मधुच्छन्दाः ।
3. C om. धनवन्
4. S1 दत्तवदनु for °दत्तवते त्वदनु°
14. B1 om. भूयः ... संपर्के
19. P1 with marking above तत् ins. on the margin विश्वामित्रः सविता गायत्री; C वरेणियं for वरेण्यं
20. V1 om. यः ... प्रेरयति । (L 21); S1 C interpret on the third Pāda after Commenting तत् ... धीमहि ।
21. S1 C before तस्य add तदिति षष्ठ्यर्थे; S1 C after अन्तर्यामिणो add – विज्ञानानन्दस्वभावस्य हिरण्यगर्भोपाध्यवच्छिन्नस्य वा ब्रह्मणो

भर्जनसमर्थं तेजः सत्यज्ञानादिवेदान्तप्रतिपाद्यं वरेणियं ^{v}वरेण्यं सर्वैः प्रार्थनीयं यदस्ति ^{v}तत् ^{v}धीमहि तादृशं तेजो ध्यायामः । सवितृपदस्य तात्पर्यं कण्वो दर्शयति– “ सविता वै देवानां प्रसविता तथो ह्यस्मा एते सवितृप्रसूताः सर्वे कामाः समृध्यन्ते ” (काशब्रा १·४·१·२८) इति ॥ २७ ॥

आ– ‘ तत् सवितुः ’ इति । विश्वामित्रः सावित्री गायत्री । ‘ तत् ’ इति षष्ठ्या विपरिणम्यते । तस्य ^{v}सवितुः सर्वस्य प्रसवदातुः आदित्यान्तःपुरुषस्य ^{v}देवस्य देवनादिगुणयुक्तस्य हिरण्यगर्भोपाध्यवच्छिन्नस्य विज्ञानानन्दस्वभावस्य वा ब्रह्मणः ^{v}वरेण्यं पुरुषार्थकामिभिर्वरणीयं ^{v}भर्गः । भर्गशब्दो वीर्यवचनः । “ वीर्यं वै भर्गः ” (शब्रा ५.४.५.१) इति श्रुतेः । तेन हि पाप्मानं भृज्जति दहतीति । अथवा भृजी भर्जन इत्यस्य रूपं भर्ग इति । “ अग्निर्वै भर्गः ” (शब्रा १२.३.४.८) इति श्रुतेः । भर्ग इति तेजोवचनः । तस्य सवितुः देवस्य वरेण्यं भर्गाख्यं तेजः ^{v}धीमहि । ध्यै चिन्तायाम् । अस्य छान्दसं संप्रसारणम् । ध्यायामश्चिन्तयामः । ^{v}धियः ^{v}यः ^{v}नः ^{v}प्रचोदयात् । धीशब्दो बुद्धिवचनः कर्मवचनः [वा] । अस्माकं बुद्धिं कर्माणि [वा] यः प्रचोदयात् । चुद संचोदने । यः प्रकर्षेण संचोदयति प्रेरयति, तस्य सवितुः संबन्धि वरेण्यं वीर्यं तेजो ध्यायाम इति संबन्धः । अथ सत्यज्ञानानन्तानन्दात्मकः सविता सर्वजगदुपादानतया जगत्कर्ता सर्वोपाधिभिश्चिकीर्षुस्तत्तदुपाधिधर्मान् विजिगीषुस्तत्तद्रूपैर्लीलया व्यवजिहीर्षुस्तथाभङ्गतया स्वकमनीयादिमहिम्नो दिदर्शयिषुर्निर्माय तया स्वयं वशीकृतमायः सर्वेश्वरो जगन्नियन्ता सर्वात्मनामात्मभूतोऽन्तर्यामी यो देवोऽस्माकं धियः धीः प्रचोदयात् । तस्य सवितुर्देवस्यात्मभूतमनन्ततयाऽऽत्मभावेन वरेण्यं ध्यातृणां सर्वसंसारक्लेशमूलावभर्जनं भर्गाख्यं परंज्योतीरूपं संतन्तं ध्यायाम इत्यर्थः ॥२७॥

---

2. S1 C after तेजो add वयं; S1 C after ध्यायामः add छान्दसं संप्रसारणम् । After this it Continues the Commentary on the third Pāda as – धियो यो नः । धी-शब्दो बुद्धिवचनः कर्मवचनो वा । बुद्धीः कर्माणि वा । यः सविता नः अस्माकं प्रचोदयात् । चुद संचोदने । प्रकर्षेण चोदयति प्रेरयति सत्कर्मानुष्ठानायेति ।
4. B1 om. तत् सवितुः ... सवितुः (L. 5)
6. H1 विज्ञानानन्तानन्दात्मस्वभावस्य for विज्ञानानन्द स्वभावस्य; H1 om. वा; B1 °कामितं for °कामिभिः
9. H1 after first इति adds च
11. B1 om. धीशब्दो ... प्रचोदयात् (L. 12)
12. B1 om. यः
13. B1 अत्र for अथ; B1 सर्वस्य for सर्व°
15. H1 °कामनीयथ° for कमनीयादि
16. H1 om. धीः
17. B1 °संस्कार° for °संसार°

परि॑ ते दूळभो॒ रथो॒ऽस्माँ३ अ॑श्नोतु वि॒श्वतः॑ । येन॒ रक्षां॑सि दा॒शुषः॑ ।
समि॑द्धो मा॒ सम॑र्धय प्र॒जया॑ च॒ धने॑न च ॥२८॥ ॥३॥

परि॑ । ते॒ । दूळभः॑ । दु॒र्दभ॒ इति॑ दुः॒ऽदभः॑ । रथः॑ । अ॒स्मान् । अ॒श्नो॒तु॒ । वि॒श्वतः॑ ।
येन॑ । रक्षां॑सि । दा॒शुषः॑ ।
समि॑द्ध॒ इति॒ सम्ऽइ॑द्धः । मा॒ । सम् । अ॒र्ध॒य॒ ।
प्र॒जयेति॑ प्र॒ऽजया॑ । च॒ । धने॑न । च॒ ॥ उपै॑ ॥२८॥ ॥३॥

सा– अथ चतुर्विंशः –' परि ते दूळभो रथोऽस्माँ३ अश्नोतु विश्वतः । येन रक्षसि दाशुषः । समिद्धो मा समर्धय प्रजया च धनेन च ' इति । हे अग्ने, ᵛते तव ᵛरथः ᵛअस्मान् यजमानान् ᵛविश्वतः सर्वासु दिक्षु ᵛपरि ᵛअश्नोतु परितो व्याप्नोतु । कस्यांश्चिदपि दिशि अल्पमपि स्थानमपरित्यज्यास्मद्रक्षणाय व्याप्नोतु । कथंभूतो रथः ? ᵛदूळभः दुर्दभः । छान्दसो वर्णव्यत्ययः । दभ्नोतिर्वधकर्मा । दुःखेन दभ्यते, केनाऽपि सहसा हिंसितुमशक्य इत्यर्थः । ᵛयेन रथेन ᵛदाशुषः हविर्दत्तवते यजमानाय तदुपकारार्थं ᵛरक्षसि रक्षां करोषि । स रथः पर्यश्नोत्वित्यन्वयः । ᵛसमिद्धः मया सम्यक् प्रदीपितस्त्वं ᵛप्रजया ᵛच पुत्रादिकया ᵛधनेन ᵛच सुवर्णादिना मां समर्धय, मां यजमानं समृद्धं कुरु । दाशुषः इति पदं कण्वो व्याचष्टे– " यजमाना वै दाश्वांसः " (काशब्रा १·४·१·२९) इति ॥ २८ ॥

[इति तृतीयेऽध्याये तृतीयोऽनुवाकः]

आ– ' परि ते ' इत्येतस्य वामदेव आग्नेयी अनिरुक्ता गायत्री । हे भगवन्नग्ने, ᵛते तव स्वभूतः ᵛरथः श्रीचरणास्तव कायो वा । " रथस्तु चरणः कायः " इति वचनात् । कथंभूतः ? ᵛदूळभः दुर्दभः । दुर् उपसर्गः प्रतिषेधार्थः । दभ्नोतिर्वधकर्मा । दूळभ इति छान्दसः । अवध्योऽप्रतिहतस्त्वरथः ᵛअस्मान् ᵛविश्वतः सर्वतः ᵛअश्नोतु, ᵛपरि अश्नोतु । ᵛयेन रथेन ᵛदाशुषः यजमानात् (न् ?) ᵛरक्षसि । एवमुक्तप्रकारेण ᵛसमिद्धः त्वं ᵛप्रजया ᵛच ᵛधनेन ᵛच ᵛमा मां ᵛसमर्धय ॥२८॥

बृहदुपस्थानं संपूर्णम् ॥

[इति तृतीयोऽनुवाकः]

---

9. P1 om. अपि स्थानम्
12. S1 C after रथः add छन्दसा
15. V1 इति तृतीयः खण्डः for इति ... °वाकः
17. B1 °चरणस् for °चरणास्; B1 चरणाः for चरणः

[अथ चतुर्थोऽनुवाकः]

सा– तृतीयेऽनुवाके विस्तरेणाग्न्युपस्थानमन्त्रा उक्ताः। चतुर्थे संक्षेपेणाग्न्युपस्थानमन्त्रा उच्यन्ते।

भूर्भुव॒ः स्व॑ः सु॒प्र॒जाः प्र॒जया॑ भूयासम् ।
सु॒वीरो॑ वी॒रैः सु॒पोष॒ः पोषै॑ः ॥१॥

भूः । भुव॑ः । स्व॒रिति॑ स्व॑ः । सु॒प्र॒जा इति॑ सु॒ऽप्र॒जाः । प्र॒जयेति॑ प्र॒ऽजया॑ । भू॒यास॒म् ।
सु॒वीर॒ इति॑ सु॒ऽवीर॑ः । वी॒रैः । सु॒पोष॒ इति॑ सु॒ऽपोष॑ः । पोषै॑ः ॥ ब्रं ॥१॥

कात्यायनः – “ भूर्भुवः स्वरिति वा ” (काश्रौ ४·१२·१२) इति । वाशब्दो विकल्पार्थः । पूर्वोक्तेन ‘ उप प्रयन्तः ’ इत्यादिना वा, वक्ष्यमाणेन ‘ भूर्भुवः स्वः ’ इत्यादिना वा, द्वयोरन्यतरेणानुवाकेनोपस्थानं कुर्यादित्यर्थः । प्रथममन्त्रेण कण्वोऽप्येतदुपस्थानं दर्शयति– “ स वा अग्निहोत्रꣳ हुत्वा सायमुपतिष्ठते भूर्भुवः स्वरिति ” (काशब्रा १·४·२·१) इति । पाठस्तु– ‘ भूर्भुवः स्वः सुप्रजाः प्रजया भूयासम् । सुवीरो वीरैः सुपोषः पोषैः ’ इति। हे अग्ने, ᵛभूः ᵛभुवः ᵛस्वः भूरादिव्याहृतित्रयात्मकस्तदर्थभूतलोकत्रयात्मको वा त्वम् । अतस्त्वत्प्रसादादहं यदा ᵛप्रजया बन्धुभृत्यादिरूपया युज्येयं तदानीं ᵛसुप्रजाः अनुकूलत्वेन शोभमानाः प्रजा यस्य मम तादृशः ᵛभूयासम् । तथा ᵛवीरैः स्वस्वकार्येषु शूरैर्यदा युज्येयं तदानीं ᵛसुवीरः शास्त्रीयमार्गवर्तिशोभनपुत्रयुक्तः भूयासम् । तथा ᵛपोषैः हिरण्यपश्वादिपोषणैर्यदा युज्येयं तदानीं ᵛसुपोषः बहुमूल्यार्हहिरण्यादियुक्तो भूयासम् ॥१॥

आ– अथ क्षुल्लकोपस्थानमुच्यते– ‘ भूर्भुवः स्वः ’ इति । आसुरेरार्षम् । यजूंषि । हे भगवन्नग्ने, यस्त्वं व्याहृत्यात्मकस्तं त्वां स्तुत्वा स्तुत्वा याचे । [प्रजया] ᵛप्रजाभिः ᵛसुप्रजाः शोभनप्रजाः ᵛभूयासं भवेयम् । ᵛवीरैः पुत्रैः ᵛसुवीरः शोभनवीरः सुपुत्रो भवेयम् । ᵛपोषैः भूहिरण्यादिपोषणैः ᵛसुपोषः शोभनपोषो भूयासम् ॥१॥

नय॑ प्र॒जां मे॑ पाहि॒ शꣳस्य॑ प॒शून् मे॑ पाहि ।
आऽग॑न्म वि॒श्ववे॑दसम॒स्मभ्यं॑ वसु॒वित्त॑मम् ॥२॥
अग्ने॑ सम्रा॒ळभि द्यु॒म्नम॒भि सह॒ आ य॑च्छस्व ।
अ॒यम॒ग्निर्गृ॒हप॑ति॒र्गार्ह॑पत्यः प्र॒जावा॑न् वसु॒वित्त॑मः ॥३॥

---

10. S1 before भूर् adds ॐ; P1 with marking above भूर् ins. on the margin आसुरेरार्षं यज्ञियं यजुः ।
14. V1 S1 C V1 S1 °पुत्रो for पुत्रयुक्तो; V1 om. भूयासम् ... यदा; C यद् च पोषैः पुष्टैः संपन्नैर् for तथा पोषैर् यदा
17. B1 om. one स्तुत्वा
18. H1 om. भवेयम्; B1 om. पुत्रैः
19. B1 om. सुपोषः

अग्ने॑ गृहपते॒ऽभि द्यु॒म्नम॒भि सह॒ आ य॑च्छस्व ।
गृहा॒ मा बि॑भीत॒ मा वे॑पध्व॒मूर्ज॒ꣳ बिभ्र॑त॒ एम॑सि ।।४।।
ऊर्ज॒ꣳ बिभ्र॑द्वः सु॒मना॑ः सु॒मे॒धा गृ॒हानै॑मि॒ मन॑सा॒ मोद॑मानः ।
येषा॑म॒ध्येति॑ प्र॒वस॒न् येषु॑ सौमन॒सो ब॒हुः ।।५।।
गृ॒हानुप॑ ह्वयामहे॒ ते नो॑ जानन्तु जान॒तः ।
उप॑हूता इ॒ह गाव॒ उप॑हूता अ॒जाव॑यः ।।६।।
अथो॒ अन्न॑स्य की॒लाल॒ उप॑हूतो गृ॒हेषु॑ नः ।
क्षेमा॑य व॒ः शान्त्यै॒ प्रप॑द्ये ।
शि॒वꣳ श॒ग्मꣳ शं॒योः शं॒योः ।।७।। (४) ।।

नय॑ । प्र॒जामिति॑ प्र॒ऽजाम् । मे॒ । पा॒हि॒ । शꣳस्य॑ । प॒शून् । मे॒ । पा॒हि॒ ॥
आ । अ॒ग॒न्म॒ । वि॒श्ववे॑दस॒मिति॑ वि॒श्वऽवे॑दसम् ।
अ॒स्मभ्य॑म् । व॒सु॒वित्त॑म॒मिति॑ व॒सु॒वित्ऽत॑मम् ॥ ल्पीः ॥२॥
अग्ने॑ । स॒म्रा॒ळिति॑ सं॒ऽराट् । अ॒भि । द्यु॒म्नम् । अ॒भि । सह॑ः । आ । य॒च्छ॒स्व॒ ।
अ॒यम् । अ॒ग्निः । गृ॒हप॑ति॒रिति॑ गृ॒हऽप॑तिः । गार्ह॑पत्य॒ इ॒ति गार्ह॑ऽपत्यः ।
प्र॒जा॒वा॒निति॑ प्र॒जाऽवा॑न् । व॒सु॒वित्त॑म॒ इति॑ व॒सु॒वित्ऽत॑मः ॥ म्युं ॥३॥
अग्ने॑ । गृ॒ह॒प॒त॒ इति॑ गृहऽपते । अ॒भि । द्यु॒म्नम् । अ॒भि । सह॑ः । आ । य॒च्छ॒स्व॒ ॥
गृहा॑ः । मा । बि॒भी॒त॒ । मा । वे॒प॒ध्व॒म् । ऊर्ज॑म् । बिभ्र॑तः । आ । इ॒म॒सि॒ ॥ गै ॥४॥
ऊर्ज॑म् । बिभ्र॑त् । व॒ः । सु॒म॒ना इति॑ सु॒ऽमना॑ः । सु॒मे॒धा इति॑ सु॒ऽमे॒धाः ।
गृ॒हान् । आ । ए॒मि॒ । मन॑सा । मोद॑मानः ॥
येषा॑म् । अ॒ध्येतीत्य॑धि॒ऽएति॑ । प्र॒व॒स॒न्निति॑ प्र॒ऽवस॑न् । येषु॑ । सौ॒म॒न॒सः । ब॒हुः ॥ क्रौं ॥५॥
गृ॒हान् । उप॑ । ह्व॒या॒म॒हे॒ । ते । न॒ः । जा॒न॒न्तु॒ । जा॒न॒तः ।
उप॑हूता॒ इत्युप॑ऽहूताः । इ॒ह । गाव॑ः । उप॑हूता॒ इत्युप॑ऽहूताः । अ॒जा॒व॑यः ॥ ञ्प्रि ॥६॥
अथो॒ इत्यथो॑ । अन्न॑स्य । की॒लाल॑ः । उप॑हूत॒ इत्युप॑ऽहूतः । गृ॒हेषु॑ । न॒ः ।
क्षेमा॑य । व॒ः । शान्त्यै॑ । प्र । प॒द्ये॒ ।
शि॒वम् । श॒ग्मम् । शं॒योरिति॑ शं॒ऽयोः । शं॒योरिति॑ शं॒ऽयोः । प्रूं ॥७॥(४)॥

सा– द्वितीयतृतीयमन्त्रयोर्विशेषमाह कात्यायनः – "प्रवत्स्यन्त्सर्वांश्चयैति प्रतिमन्त्रम्" (काश्रौ ४·१२·१३) इति । कण्वोप्याह– "अथ खलु प्रवत्स्यन् गार्हपत्यमेवाग्र उपतिष्ठतेऽथाहवनीयम्"

---

27. V1 S1 C om. second अथ

(काशब्रा १·४·२-२) इति । यदा यजमानो ग्रामान्तरं गन्तुमिच्छति तदानीमुभावाहवनीयगार्हपत्याग्नी मन्त्रद्वयेनोपतिष्ठेत । तयोः पाठस्तु–'नर्य प्रजां मे पाहि शंस्य पशून् मे पाहि' इति । हे ˈनर्य नरेभ्यो यजमानेभ्यो हित गार्हपत्य, ˈमे ˈप्रजां ˈपाहि । हे ˈशंस्य अनुष्ठातृभिः शंसितुं योग्य आहवनीय, ˈमे ˈपशून् ˈपाहि ॥

चतुर्थपञ्चमयोर्विशेषमाह कात्यायनः –"उपतिष्ठत आहवनीयगार्हपत्यदक्षिणाग्नीनाऽगन्मेति प्रतिमन्त्रम्" (द्र. काश्रौ ४·१२·१८) इति । ग्रामान्तरं गत्वा प्रत्यागतो यजमानो मन्त्राभ्यामाहवनीयगार्हपत्यावुपतिष्ठेत । कण्वोऽप्येतदुभयं दर्शयति– "स आहवनीयमुपतिष्ठत आऽगन्म" (काशब्रा १·४·२-४) इति, "अथ गार्हपत्यमुपतिष्ठतेऽयमग्निः" (काशब्रा १·४·२-४) इति । आहवनीयार्थमन्त्रपाठस्तु–'आऽगन्म विश्ववेदसमस्मभ्यं वसुवित्तमम् । अग्ने सम्राळभि द्युम्नमभि सह आ यच्छस्व' इति । विश्वं वेत्ति वेदयतीति वा विश्ववेदाः, तं सर्वज्ञम् । ˈअस्मभ्यम् अस्मदर्थं ˈवसुवित्तमम् अतिशयेन वसुनो धनस्य वेदितारं लब्धारम् । विद्लृ लाभे । तथाविधमाहवनीयमुद्दिश्य ˈआऽगन्म वयं ग्रामान्तरात् प्रत्यागताः । सम्यग् राजते दीप्यत इति ˈसम्राट् । तथाविध ˈअग्ने हे आहवनीय, ˈअभि ˈद्युम्नं सर्वतोऽवस्थितं धनम् । ˈअभि ˈसहः सर्वतः शत्रूनभिभवितुं बलम् ˈआयच्छस्व । दाण् दाने इति धातोर्यच्छादेशः । धनं बलं चानीयास्मभ्यं देहि ।

गार्हपत्यार्थमन्त्रपाठस्तु– 'अयमग्निर्गृहपतिर्गार्हपत्यः प्रजावान् वसुवित्तमः । अग्ने गृहपतेऽभि द्युम्नमभि सह आ यच्छस्व' इति । ˈअयं पुरोऽवस्थितः ˈगार्हपत्यः एतन्नामकः ˈअग्निः, ˈगृहपतिः गृहस्य पालकः, ˈप्रजावान् अस्मदीयपुत्रपौत्रादिस्वामी, ˈवसुवित्तमः प्रजानुग्रहार्थमतिशयेन धनस्य लब्धा वा । अन्यत् पूर्ववद्व्याख्येयम् ।

षष्ठे विशेषमाह कात्यायनः–"गृहा मा बिभीतेति गृहानुपैति" (काश्रौ ४.१२.२२) इति । ग्रामान्तरादागतः स्वगृहान् प्राप्नुयात् । कण्वस्त्वेवमाह–"स उपतिष्ठते गृहा मा बिभीत" (काशब्रा १.४·२·१०) इति । पाठस्तु–'गृहा मा बिभीत मा वेपध्वमूर्जं बिभ्रत एमसि । ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः' इति । हे ˈगृहाः, ˈमा ˈबिभीत, पालको यजमानो गत इति भयं मा कार्षिष्ट । ˈमा ˈवेपध्वम्, यः कोऽपि शत्रुरागत्य विनाशयिष्यतीति बुध्या मनसि कम्पनं मा कार्षिष्ट । यतो वयम् ˈऊर्जं ˈबिभ्रतः अन्नं संपूर्णं धारयमाणान् युष्मान् प्रति ˈएमसि आगताः स्मः । यथा यूयमूर्जं

---

2. S1 °तिष्ठते for °तिष्ठेत
5. C S1 तुरीय° for चतुर्थ°
8. P1 आहवनीयार्थ for आहवनीयार्थ°
9. P1 with marking above अगन्म ins. on the margin पूर्ववच्छन्दस्त्वनुष्टुप्; P1 with marking above अग्ने ins. on the margin आग्नेयी द्विपदा गायत्री
11. V1 S1 C om. विद्लृ लाभे
15. P1 with marking above अयम् ins. on the margin गार्हपत्यदेवत्यार्षं मङ्कुसारिणी बृहती; P1 with marking above अग्ने ins. on the margin आग्नेयी विपरीता विस्तारबृहती
17. V1 S1 C °ग्रहस्य for °ग्रहार्थम्
19. P1 with marking above गृहा ins. on the margin विराड्रूपा त्रिष्टुप् गृहदेवत्यादित्यस्यार्षम् ।
21. C om. हे गृहा; C VI S1 om. पालको गत इति
24. V1 S1 C आगतोऽस्मि for आगताः स्मः

बिभ्रतस्तथाहमपि ᵛऊर्जं ᵛबिभ्रद् धारयन् ᵛसुमनाः शोभनमनस्कः ᵛसुमेधाः शोभनधारणप्रज्ञोपेतः ᵛमनसा दुःखरहितेन ᵛमोदमानः हृष्यन् ᵛगृहान् ᵛवः गृहरूपान् युष्मान् प्रति ᵛएमि आगच्छामि ॥

अथ सप्तमः – ‘ येषामध्येति प्रवसन् येषु सौमनसो बहुः । गृहानुप ह्वयामहे ते नो जानन्तु जानतः ’ इति । ᵛप्रवसन् देशान्तरं गच्छन् यजमानः ᵛयेषाम् ᵛअध्येति । द्वितीयार्थे षष्ठी । इक् स्मरणे । तथाविधान् गृहान् स्वस्ति यथा भवति तथा स्मरति, गृहविषयं क्षेमं सर्वथा चिन्तयतीत्यर्थः । तथा ᵛयेषु गृहेषु यजमानस्य ᵛसौमनसः ᵛबहु । सुमनसो भावः सौमनसः प्रीत्यतिशयः । स च भूयान् । ᵛगृहान् ᵛउप ᵛह्वयामहे तान् प्रीतिविषयान् आह्वयामः । गृहाभिमानी देवो अस्मत्समीपे समागच्छत्विति । सर्वदा यजमानः ᵛते च गृहदेवाः ᵛजानतः उपकाराभिज्ञान् ᵛनः अस्मान् ᵛजानन्तु । एते कृतघ्ना न भवन्तीत्यवगच्छन्तु ।

अथाष्टमः – ‘ उपहूता इह गाव उपहूता अजावयः । अथो अन्नस्य कीलाल उपहूतो गृहेषु नः ’ इति । ᵛइह गृहेषु ᵛगावः ᵛउपहूताः । धेनवो बलीवर्दाश्च सुखेन तिष्ठन्त्वित्येवमनुज्ञाताः । तथा इह गृहेषु ᵛअजावयः अजास्त्वाविरत्वजातिद्वययुक्ताः पशवः ᵛउपहूताः सुखेन वर्तन्तामित्यस्माभिरनुज्ञाताः । ᵛअथो अपि च ᵛअन्नस्य ᵛकीलालः अन्नसंबन्धी रसविशेषः ᵛनः अस्मदीयेषु ᵛगृहेषु ᵛउपहूतः समृद्धो भवत्वित्येवमस्माभिरनुज्ञातः ॥

नवमे विशेषमाह कात्यायनः – “ क्षेमाय व इति प्रविशति ” (काश्रौ ४.१२.२३) इति । पाठस्तु- ‘ क्षेमाय वः शान्त्यै प्रपद्ये शिवꣳ शग्मꣳ शंयोः शंयोः ’ इति । हे गृहाः, ᵛवः युष्मान् ᵛप्रपद्ये प्राप्नोमि । किमर्थम् ? ᵛक्षेमाय, विद्यमानस्य वसुनो रक्षणं क्षेमस्तदर्थं, तथा ᵛशान्त्यै मम सर्वानिष्टशमनाय । ᵛशंयोः । शमिति सुखनाम । तत् कामयमान इति शंयुः । “ शंयुरिदं कामयमानः ” (नि ६.३१) इति यास्केनोक्तत्वात् । तादृशस्य मम ᵛशिवं ᵛशग्मम् इति द्वे सुखनामनी । तत्राद्यमैहिकं द्वितीयमामुष्मिकम् । उभयविधं सुखं भूयादिति शेषः । शंयोः शंयोरित्यभ्यासः आदरार्थः ॥ २-७ ॥

[इति तृतीयेऽध्याये चतुर्थोऽनुवाकः ॥]

आ– प्रवसन् यजमानो गार्हपत्यमुपतिष्ठते– ‘ नर्य प्रजां मे पाहि ’ इति । आदित्यस्यार्षं गार्हपत्यदेवत्योष्णिक् । नरेभ्यो हितो नर्यः । तत्संबोधनं ᵛनर्य, ᵛमे मदीयां ᵛप्रजां ᵛपाहि । स एवाहवनीयमुपतिष्ठते– ‘ शꣳस्य ’ इति । आहवनीयदेवत्या आदित्यार्षमुष्णिक् । शंसु स्तुतौ ।

---

2. C om. गृहान् वः
3. P1 with marking above येषाम् ins. on the margin पूर्ववदनुष्टुप्
4. P1 with marking above षष्ठी ins. on the margin अधीगर्थदयेशां कर्मणीति; V1 S1 C after स्मरणे add इति धातुः
5. V1 S1 C om. स्वस्ति
6. V1 S1 C भूयात् for भूयान्
7. V1 S1 C om. आह्वयामः
8. V1 S1 C अभिज्ञानान् for अभिज्ञान्
10. C V1 गृहाः for गावः
15. P1 with marking above क्षेमाय ins. on the margin पूर्ववद्बृहती
20. C S1 तुरीयो° for चतुर्थो°
23. B1 आदित्यार्षोष्णिक् for आदित्यार्षमुष्णिक्

हे स्तुत्य, ᵛपशून् ᵛमे ᵛपाहि इति । प्रत्यागतो यजमान आहवनीयमुपतिष्ठते ‘ आऽगन्म ’ इति । आहवनीयदेवत्यमादित्यार्षमनुष्टुप् । ᵛविश्ववेदसं विश्वं वेत्ति वेदयतीति वा विश्ववेदाः, तं विश्ववेदसं सर्वज्ञम् । ᵛअस्मभ्यं ᵛवसुवित्तमम् । षष्ठ्यर्थे चतुर्थी । अस्माकं वसुवित्तममतिशयेन धनस्य वेदितारं यं त्वां वयम् ᵛआऽगन्म प्रत्यागता वयम् ॥२॥

‘ अग्ने सम्राट् ’ [इति] आग्नेयी द्विपदा गायत्री, कृत्स्नमन्त्रपक्षे बृहती । हे भगवन् ᵛअग्ने, स त्वं ᵛसम्राट् । राजृ दीप्तौ । सम्यग् राजत इति सम्राट् । हे दीप्तिमन्, ᵛअभि, ᵛद्युम्नम् इति धननाम । अभितः सर्वतः द्युम्नं धनम् ᵛआयच्छस्व । यमेरेतद्रूपम् । यच्छतिः स्थापनार्थः । अस्मभ्यं स्थापय । ᵛअभि ᵛसहः । सहो बलम् । शत्रूनभिभवितुं यत् सामर्थ्यं तदभिसहः । आयच्छस्व । गार्हपत्यमुपतिष्ठते – ‘ अयमग्निः ’ इति । गार्हपत्यदेवत्या आदित्यार्षं न्यङ्कुसारिणी बृहती । यः ᵛअयम् ᵛअग्निः ᵛगृहपतिः गृहोपलक्षिताग्निसाध्यसर्वकर्मणां पतिः ᵛगार्हपत्यः गार्हपत्याख्यः ᵛप्रजावान्, प्रकृष्टजन्मवत्यः प्रजाः, विशेषतस्तद्वान् प्रजावांश्च, ᵛवसुवित्तमः धनस्य वेदितृतमश्च यस्त्वामहं याचे ॥३॥

तं याचते– ‘ अग्ने गृहपते ’ इति । कृत्स्नमन्त्रपक्षे आग्नेयी विपरीता विस्तारबृहती । हे ᵛअग्ने ᵛगृहपते, ᵛअभि ᵛद्युम्नम् ᵛअभि ᵛसहः च ᵛआयच्छस्व स्थापय । ‘ गृहा मा बिभीत ’ इति विराड्रूपा त्रिष्टुप् गृहदेवत्या आदित्य ऋषिः । हे ᵛगृहाः, ᵛमा ᵛबिभीत भयं मा कार्षिष्ट, किं तु भयं मुञ्चत । ᵛमा ᵛवेपध्वं वेपनं कम्पनं मा कार्षिष्ट । यतो वयम् ᵛऊर्जं ᵛबिभ्रत । डुभृञ् धारणपोषणयोः । ऊर्जम् अन्नं धारयमाणान् अनुपक्षीणान्नान् युष्मान् ᵛएमसि एम आगताः स्मः । आत्मनि क्वचिदेकवचनं क्वचिद्बहुवचनं भवति ॥४॥

अहमपि ᵛऊर्जं ᵛबिभ्रत् धारयन् ᵛवः युष्मान् प्रति ᵛसुमनाः शोभनमनस्कः सन् ᵛसुमेधाः सुष्ठुधारणावत्प्रज्ञः, ᵛमनसा ᵛमोदमानः हृष्यन् ᵛवः युष्मान् ᵛगृहान् ᵛएमि आगच्छामि । ‘ येषामध्येति ’ इति । गृहाः देवताः । प्रकृतिसामान्येनोक्त ऋषिः । अनुष्टुप् । प्रवसन् ᵛयेषां गृहाणाम् ᵛअध्येति । इक् स्मरणे इत्यस्यैतद्रूपं, न तु इङ् अध्ययने इत्यस्य । प्रवसन् प्रवासं कुर्वन्

---

5. H1 त्रिपदा for द्विपदा
7. H1 आगच्छेति, B1 अयच्छेति for यच्छतिः
10. H1 गृहोपलक्षिताः साध्यः for गृहोपलक्षिताग्निसाध्य°
13. H1 विपरीत° for विपरीता
16. H1 मुञ्चतम् for मुञ्चत
17. B1 om. युष्मान्
20. B1 after गृहान् adds येषां यान् गृहान् अध्येति स्मरति । येषु गृहेषु
21. B1 प्रकृत° for प्रकृति°
22. B1 om. इक् ... अध्येति [218 L 1]

देशान्तरं गच्छन् गृहपतिः येषां यान् गृहान् अध्येति स्मरति । ^{v}येषु गृहेषु ^{v}सौमनसः ^{v}बहुः । सुमनसो भावः सौमनसः ॥५॥

'गृहानुप', 'अयो अन्नस्य' इति च गृहदेवत्ये अनुष्टुभौ कृत्स्नमन्त्रपक्षे आदित्यस्यार्षम् । बहुप्रकारं सौमनस्यं येषु विद्यते तान् ^{v}गृहान् ^{v}उपह्वयामहे उपह्वयामः । ^{v}ते च उपहूताः गृहाः ^{v}जानतः अवगन्तॄन् [^{v}नः] अस्मान् ^{v}जानन्तु सदावगच्छन्तु । 'उपहूताः' इति । अत्र महापङ्क्तिस्त्र्यावसानास्तिस्रोऽपि वास्तव्यः । ^{v}इह ^{v}नः अस्माकं ^{v}गृहेषु ^{v}उपहूताः अभ्यनुज्ञाताः ^{v}गावः, ^{v}अजावयः अजाः अवयश्च उपहूताः । ^{v}अथो अपि च ^{v}अन्नस्य ^{v}कीलालः । कीलालशब्दो रसवचनः । ^{v}उपहूतः ॥

'क्षेमाय वः' इति प्रविशति । गृहदेवत्या बृहती । आदित्यार्षम् । ^{v}वः युष्मान् गृहान् ^{v}प्रपद्ये प्रविशामि । ^{v}क्षेमाय स्थितस्य परिपालनाय, ^{v}शान्त्यै मम सर्वारिष्टशान्त्यै प्रविशामि । 'शिवं शग्मम्' इति द्वे अपि सुखनामनी । ^{v}शंयोः, शम् इति [सुखनाम] । इदंयुरिदं कामयमान इति शंयुर्भवति । तस्य शंयोः ^{v}शिवं ^{v}शग्मं च अनेकप्रकारं सुखं भवतु । शंयोः शंयोरित्यभ्यासस्त्वादरार्थः ॥६-७॥

[इति चतुर्थोऽनुवाकः]

[अथ पञ्चमोऽनुवाकः]

सा– चतुर्थे संक्षेपेणाग्न्युपस्थानमन्त्रा उक्ताः । पञ्चमे वरुणप्रघासमन्त्रा उच्यन्ते ।

प्रघासिनो हवामहे मरुतश्च रिशादसः ।
करम्भेण सजोषसः ॥१॥

प्रघासिन इति प्रऽघासिनः । हवामहे । मरुतः । च । रिशादसः ।
करम्भेण । सजोषस इति सऽजोषसः ॥ ति ॥१॥

चातुर्मास्याख्ययागः पर्वचतुष्टयात्मकः । वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयाख्यानि चत्वारि पर्वाणि । तत्र वरुणप्रघासाख्ये द्वितीये पर्वणि दक्षिणोत्तरयोर्द्वयोर्वेद्योर्हविःष्वासादितेषु प्रतिप्रस्थाता

---

4. B1 om. तान्
5. B1 om. अत्र
7. H1 om. अपि च
12. H1 अनेन प्रकारेण for अनेकप्रकारं

पत्नीमुदानयन् जारं तदीयं पृच्छेत् । साऽपि तं जारं ब्रूयात् । तदाह कण्वः – "स पत्नीमुदानयति तामुदानेष्यन् पृच्छति केन चरसीति वरुण्यꣳ ह वा एतत् स्त्री करोति यदन्यस्य सत्यन्येन चरति" (काशब्रा १·५·१·१७) इति । वरुण्यमकृत्यन्येन तन्निवारणीयमित्यर्थः । तित्तिरिरप्येतत् सर्वं विस्पष्टमाह– "पत्नीं वाचयति । मेध्यामेवैनां करोति । अथो तप एवैनामुप नयति । यज्जारꣳ सन्तं न प्रब्रूयात् । प्रियं ज्ञातिꣳ रुन्ध्यात् । असौ मे जार इति निर्दिशेत् । निर्दिश्यैवैनं वरुणपाशेन ग्राहयति" (तैब्रा १·६·५) इति । आपस्तम्बोऽप्येतद्दर्शयति– "प्रतिप्रस्थाता पत्नीमुदानयत्येतच्च वाचयति । तां पृच्छति पत्नि कति ते जारा इति । यानाचष्टे तान् वरुणो गृह्णात्विति निर्दिशति" (आपश्रौ. ८·६·१८-२१) इति । कात्यायनः – "आख्याते प्रघासिन इत्येनां वाचयति नयन्" (काश्रौ ५·५·१०) इति । जारे पत्न्या कथिते सत्येनां पत्नीं नयन् प्रतिप्रस्थाता 'प्रघासिनः' इति मन्त्रं वाचयेत् । कण्वोऽप्याह– "तां वाचयति प्रघासिनः" (काशब्रा १·५·१·१८) इति । पाठस्तु– 'प्रघासिनो हवामहे मरुतश्च रिशादसः । करम्भेण सजोषसः' इति । घस्लृ अदने । प्रकर्षेण घस्यते भक्ष्यत इति हविर्विशेषः प्रघासः । स येषामस्ति तान् ^{v}प्रघासिनः ^{v}मरुतः एतन्नामकान् देवान् ^{v}हवामहे आह्वयामः । 'मरुतश्च' इति चकारेण तदीयपरिचारकाः समुच्चीयन्ते । ते सर्वेऽपि ^{v}रिशादसः । रिशतिर्हिंसार्थः । दसु उपक्षये । रिशां वैरिकृतां हिंसां दस्यन्त्युपक्षयन्तीति रिशादसः । ^{v}करम्भेण, यवमयो हविर्विशेषः करम्भः, तेन ^{v}सजोषसः समानप्रीतयः । तथाविधान् मरुतः हवामहे इति पूर्वत्रान्वयः ॥१॥

आ – 'प्रघासिनो हवामहे' इत्यादयश्चातुर्मास्यमन्त्राः । प्रजापतेरार्षम् । मारुती गायत्री । ^{v}प्रघासिनः, प्रघासो ग्रासः येषामस्तीति प्रघासिनः । 'शुक्रज्योतिश्च' इत्याद्येकोनपञ्चाशन्नामानः प्रघासोपलक्षिताः मरुतः प्रघासिनः (कासं १८·७·१-५) इति प्रसिद्धाः । तान् प्रघासिनः ^{v}मरुतः देवान् ^{v}हवामहे आह्वयामः । मरुतः ^{v}च ^{v}रिशादसः । रिशतिर्हिंसार्थः । दसु उपक्षये । ब्राह्मणान् रेशयन्तं हिंसन्तं दस्यन्ति उपक्षयन्तीति रिशदासिन एव सन्तो रिशादसः । ^{v}करम्भेण करम्भपात्रेण ^{v}सजोषसः समानप्रीतयः मरुतः ये, तान् हवामहे ॥१॥

यद्ग्रा॒मे यदर॑ण्ये॒ यत् स॒भाया॒ꣳ यदि॑न्द्रि॒ये ।
यदेन॑श्चकृ॒मा व॒यमि॒दं तदव॑यजामहे॒ स्वाहा॑ ॥२॥

---

1. V1 S1 C उदानयेत् for उदानयन्
2. S1 C सत्येन for सत्यन्येन
10. P1 with marking above प्रघासिनो ins. on the margin मारुता गायत्री प्रजाप्रतेरार्षम् ।
11. V1 S1 C after अदने add : इति धातुः
13. V1 S1 C after °क्षये add : इति धातुः
19. H1 हिंसार्थे for हिंसार्थः
20. B1 ब्राह्मणो न शयन्तं विहसन्तं दस्यन्ति उपलक्षयन्तीति रिपशायद्दासिनं, H1 ब्राह्मणान् त्रेशयन्तं विहसन्तं दस्यान्ति उपलक्षयन्तीति एशेयशिनः we have corrected this as – ब्राह्मणान् रेशयन्तं ... रिशद्दासिनः; H1 एव सत्ये for एव सन्तो
21. H1 एतदेवा B1 ये सन् for ये तान

यत् । ग्रामे॑ । [यत् ।] अर॑ण्ये । [यत् ।] स॒भाया॑म् [यत् ।] इ॒न्द्रि॒ये ।
[यत् ।] एन॑ः । च॒कृ॒म । व॒यम् । इ॒दम् । तत् । अव॑ । य॒जा॒म॒हे॒ । स्वाहा॑ ॥ शीं ॥२॥

सा— कात्यायनः — "करम्भपात्राणि जुहोति शूर्पेण मूर्धनि कृत्वा दक्षिणेऽग्नौ प्रत्यङ्मुखी जायापती वा दक्षिणेनाहृत्य तीर्थेन पूर्वेण वेदिमपरेण वा यद्ग्राम इति" (काश्रौ ५·५·११) इति। यवपिष्टेन निर्मितानि मेषमेष्यादिरूपाणि करम्भपात्राणि। तानि शूर्पेण पत्नी जुहुयादित्येकः पक्षः। दम्पती द्वौ [वा] जुहुयातामित्यपरः पक्षः। तौ च दक्षिणोत्तरेण मार्गेण तानि पात्राण्याहृत्य वेद्याः पूर्वदिशि पश्चिमदिशि वा स्थित्वा जुहुयाताम्। कण्वस्तु पत्नीहोमपक्षमाश्रित्याह— "सा जुहोति यद्ग्रामे" (काशब्रा १·५·१·२३) इति। पाठस्तु— 'यद्ग्रामे यदरण्ये यत् सभायां यदिन्द्रिये। यदेनश्चकृमा वयमिदं तदव यजामहे स्वाहा' इति। ᵛग्रामे वसन्तः ᵛवयं ᵛयत् ᵛएनः पापं ग्रामोपद्रवरूपं ᵛचकृम, तथा ᵛअरण्ये वसन्तो वयं ᵛयत् एनो मृगवृक्षोपद्रवरूपं चकृम, तथा ᵛसभायाम् अवस्थिता वयं ᵛयत् एनो महाजनतिरस्कारादिकं चकृम। तथा ᵛइन्द्रिये जिह्वोपस्थरूपे प्रीतियुक्ता वयं ᵛयत् एनः कलञ्जभक्षण-परस्त्रीगमनादिकं चकृम, तथाऽन्यत्रापि भृत्यस्वाम्यादौ ᵛयत् एनस्ताडनावज्ञादिकं चकृम। अत्र भृत्यस्वामिविषयत्वेन तित्तिरिणा मन्त्र एवमाम्नातः— "यच्छूद्रे यदर्ये। एनश्चकृमा" (तैब्रा २·६·६) इति। ᵛतत् ᵛइदं सर्वम् ᵛअवयजामहे विनाशयामः। अवपूर्वो यजतिर्नाशार्थः। ᵛस्वाहा एतद्धविर्देवतायै पापविनाशिन्यै दत्तम् ॥२॥

आ— पत्नीवाचनमन्त्रः। पत्नी दक्षिणाग्नौ करम्भपात्राणि जुहोति— 'यद्ग्रामे' इति। मारुत्यनुष्टुबनिरुक्ता। ᵛग्रामे वसन्तो वयं ᵛयत् ᵛएनः पापं ᵛचकृम। ᵛअरण्ये वसन्तः ᵛयत् एनश्चकृम। ᵛसभायाम् अवस्थिताः ᵛयत् एनश्चकृम। ᵛइन्द्रिये च प्रजननेऽवस्थिता सन्तः ᵛवयं ᵛयत् एनश्चकृम। एन इति पापनाम। ᵛयत् एनः कृतवन्तो वयं ᵛतत् ᵛइदम् सर्वम् ᵛअवयजामहे। अवपूर्वो यजिर्नाशार्थः। एतत् पापं नाशयामः। स्वाहा एतद्धविः सुहुतमस्तु ॥२॥

मो षू ण॑ इन्द्रात्र॑ पृ॒त्सु दे॒वैरस्ति॒ हि ष्मा॑ ते शुष्मिन्नव॒याः ।
म॒हश्चि॒द्यस्य॑ मी॒ळ्हुषो॑ य॒व्या ह॒विष्म॑तो म॒रुतो॒ वन्द॑ते॒ गीः ॥३॥

---

3. P1 दक्षिणाग्नौ for दक्षिणेऽग्नौ
5. V1 S1 C after निर्मितानि add कृत्वा दक्षिणेऽग्नौ प्रत्यङ्मुखः; P1 om. मेषं°
6. V1 S1 C om. द्वौ.
8. P1 with marking above यद्ग्रामे ins. on the margin मारुत्यनिरुक्तानुष्टुप्
9. V1 S1 C om यदेनः पापं.
13. V1 om मन्त्रः; S1 एव for एवं; S1 C समाम्नातः for आम्नातः
17. B1 om. °रुक्ता … चकृमा
18. B1 om. च
20. H1 एनः for एतत्; B1 तारयामः for नाशयामः

मो इति मो । सु । नः । इन्द्र । अत्र । पृत्स्विति पृत्ऽसु । देवैः ।
अस्ति । हि । स्म । ते । शुष्मिन् । अवयाः इत्यवऽयाः ।
महः । चित् । यस्य । मीळ्हुषः । यव्या ।
हविष्मतः । मरुतः । वन्दते । गीः ॥ ङ्चि ॥३॥

सा– कात्यायनः – "मो षू ण इति यजमानो जपति" (काश्रौ ५.५.१२) इति । पाठस्तु– 'मो षू ण इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः । महश्चिद्यस्य मीळ्हुषो यव्या हविष्मतो मरुतो वन्दते गीः' इति । पृदिति संग्रामनाम । हे ᵛइन्द्र, ᵛअत्र ᵛपृत्सु एषु संग्रामेषु वर्तमानः ᵛदेवैः त्वया सह सख्यं प्राप्तैर्मरुन्नामकैर्देवैः सहितस्त्वं ᵛनः अस्मान् ᵛमो विनाशयेति शेषः । मो-शब्दो निषेधार्थः । सु-शब्दो विनाशाभावस्य सौष्ठवं ब्रूते । तथा सति विनाशलेशो मा भूदित्यर्थः संपद्यते । कः प्रसङ्गो विनाशस्येत्याशङ्क्य, 'अस्ति हि' इत्यादिना नाशप्रसङ्गोऽभिधीयते । शुष्मेति बलनाम । हे ᵛशुष्मिन् बलवन्निन्द्र, ᵛते तव ᵛअवयाः अवेक्षारूपो व्यापारः ᵛअस्ति ᵛहि ᵛस्म विद्यत एव खलु । अवपूर्वस्य यजतेरवया इति रूपम् । अवगतो यागोऽवयाः । यद्यपि तत्कालोचितत्वदीययागाभावरूपोऽपराधोऽस्मासु विद्यते तथाऽपि कृपालुस्त्वमस्मान् मा विनाशयेत्यर्थः । मिह सेचने । ᵛमीढु(ळ्हु)षः वृष्टिप्रदत्वेन सेक्तुः । ᵛहविष्मतः हविर्योग्यस्य ᵛयस्य तव ᵛयव्या यवमयैः करम्भपात्रैर्निष्पन्ना होमक्रिया ᵛमहः ᵛचित् पूजा खलु । तस्य तव यथोक्तपूजोपेतस्यास्मासु कृपालुत्वं युक्तमित्यभिप्रायः । किं च ᵛगीः अस्मदीया स्तुतिरूपा वाक् ᵛमरुतः भवतः सखीन् ᵛवन्दते नमस्करोति । 'नमो महद्भ्यः' इत्येवमादिकाया स्तुतेर्नमस्काररूपत्वान्मरुद्विषयनमस्कारेणापि तुष्टस्य तव कृपैव युक्तेत्यर्थः ॥३॥

आ–यजमानो जपति–'मो षू णः' इति । ऐन्द्री मारुती विराडगस्त्यः । ᵛअत्र, ᵛपृत्सु इति संग्रामनाम । एषु संग्रामेषु वर्तमानाः ᵛमो ᵛषू ᵛणः । नः अस्मदीयाः प्रजाः । मो इति प्रतिषेधार्थः । प्रतिषेध्यक्रिया ब्राह्मणवाक्यस्थिताऽत्राध्याह्रियते । नोऽस्मदीयाः प्रजा मा विनाशीः

---

5. P1 with marking above मो षू ins. on the margin – ऐन्द्री मारुती विराडुष्णिक् ।
7. P1 पृत्स्विति for पृदिति ।
9. V1 S1 C after इति ins. अयम्
10. V1 S1 C सः for नाश°
12. V1 S1 C अयतेः for यजतेः; P1 with marking above रूपम् ins. on the margin :- श्वेतबाहूक्थशास्पुरोडाशवयाबाण्डस्य दान्त इति वाच्यम्; P1 अभ्यागतो for यागो
13. V1 S1 C after सेचने add इति धातुः
16. P1 om. नमस्करोति
18. B1 विराडागच्छति for विराडगस्त्यः
19. B1 वर्द्धमानः for वर्तमानाः; B1 before नः add मोक्षु; H1 om. नः; H1 om. प्रजाः; H1 हि for इति
20. H1 °वाक्ये for °वाक्य°

मा हिंसीः । [ᵛदेवैः] मरुद्भिः सहितः उपकारः ᵛअस्ति ᵛहि ᵛस्म । हे ᵛशुष्मिन्, शुष्मेति बलनाम, तद्वान् । तत्संबोधनं हे शुष्मिन्, हे बल [वन्], इन्द्र, ᵛते तव ᵛअवयाः । अवपूर्वस्य यजतेरेतद्रूपम् । अवया इति अवयुतो यागः । ᵛयस्य ᵛमीळ्हुषः । मिह सेचने । सेक्तुस्तव । ᵛयव्या यव्यैर्यवमयैः करम्भपात्रैः ᵛहविष्मतः तव ᵛमहः ᵛचित्, महस्तेजः । ᵛमरुतः देवांश्च ᵛगीः वाक् । गीः ᵛवन्दते । वदि अभिवादनस्तुत्योः । स्तोतॄणां गीर्वाक् स्तौति । "यत्र ह वै तत्प्रजापतेः प्रजानां मरुतः पाप्मानं विमेथिरे" (काशब्रा १.५.१.२४) इत्यादिनेतिहासेन निदानवचनं श्रुतिः करोति ॥३॥

अक्र॒न् कर्म॑ कर्म॒कृतः॑ स॒ह वा॒चा म॑यो॒भुवा॑ ।
दे॒वेभ्य॒ः कर्म॑ कृ॒त्वाऽस्तं॒ प्रेत॑ सचाभुवः ॥४॥

अक्र॑न् । कर्म॑ । क॒र्म॒कृ॒त॒ इति॑ क॒र्म॒ऽकृ॒तः॑ । स॒ह । वा॒चा । म॒यो॒भु॒वेति॑ म॒यः॒ऽभुवा॑ ।
दे॒वेभ्यः॑ । कर्म॑ । कृ॒त्वा । अस्त॑म् । प्र । इ॒त॒ । स॒चा॒भु॒व॒ इति॑ सचाऽभुवः ॥ ऽयां ॥४॥

सा– "अक्रन् कर्मेत्येनां वाचयति" (काश्रौ ५.५.१३) इति । पाठस्तु– 'अक्रन् कर्म कर्मकृतः सह वाचा मयोभुवा । देवेभ्यः कर्म कृत्वाऽस्तं प्रेत सचाभुवः' इति । ᵛकर्मकृतः वरुणप्रघासाख्यकर्मकारिण ऋत्विजः, ᵛवाचा स्तुतिरूपया ᵛसह ᵛकर्म वरुणप्रघासानुरूपम् ᵛअक्रन् कृतवन्तः । कथं भूतया वाचा ? ᵛमयोभुवा । मय इति सुखनाम । तन्मयो भवति निष्पद्यते यया स्तुतिरूपया वाचा सा स्तुतिर्मयोभूस्तया मयोभुवा वाचा मन्त्ररूपस्तुत्येत्यर्थः । ᵛसचाभुवः सहभवनशीलाः । परस्परं यजमानेन पत्न्या वा अस्मिन् कर्मणि सहावस्थिता ऋत्विजः ᵛदेवेभ्यः देवार्थं ᵛकर्म ᵛकृत्वा वरुणप्रघासात्मकं कर्मानुष्ठाय ᵛअस्तं ᵛप्रेत गृहान् गच्छत । सोऽयमर्थः कण्वेन दर्शितः – "अस्तं प्रेतेति गृहा उ वा अस्तं ... ... तदेनां गृहेष्वेव प्रतिष्ठापयति" (काशब्रा १.५.१.२६) इति । तित्तिरिरप्यमुमेवार्थं दर्शयति–"अक्रन् कर्म कर्मकृत इत्याह देवानृणं निरवदाय । अनृणा गृहानुपप्रेतेति वावैतदाह" (तैब्रा १.६.५) इति । देवानुद्दिश्य कर्तव्यो यज्ञः, ऋणं तन्निरवदाय निःशेषेण परिहृत्येत्यर्थः ॥४॥

---

1. H1 om. मा हिंसीः
3. H1 मीढुषः for मीळ्हुषः
7. H1 अश्रुति for श्रुतिः
12. P1 with marking above अक्रन् ins. on the margin आग्नेय्यनिरुक्तानुष्टुप्
15. P1 om. मयोभूस्तया
16. P1 with marking above सह॰ ins. on the margin षच समवाये; V1 S1 C च for वा
18. P1 आगच्छन् for गच्छत; S1 C गृहान् for गृहाः

आ– पत्नी वाचयति– ‘अक्रन् कर्म’ इति । आग्नेयी अनिरुक्ताऽनुष्टुप् । पत्नी वः ऋत्विजो ब्रवीति । ये ᵛकर्मकृतः, कर्म कुर्वन्तीति कर्मकृतः ये ऋत्विजः, ᵛकर्म वरुणप्रघासम् ᵛअक्रन् कृतवन्तः । तानेतान् ᵛसह ᵛवाचा ब्रवीमि सहोक्त्या । ᵛमयोभुवा । मय इति सुखनाम । मयसा सुखेन भवतीति मयोभूः । तया मयोभुवा वाचा इदं ब्रवीमि । किमिति । ᵛदेवेभ्यः देवतार्थं ᵛकर्म एवंविशिष्टमिदं कर्म ᵛकृत्वा । ᵛअस्तम् इति गृहनाम । गृहान् ᵛप्रेत गच्छत । ᵛसचाभुवः सहभवनशीलाः एते ऋत्विजोऽतो मया सह गृहान् गच्छत ॥४॥

अव॑भृथ निचुम्पुण निचे॒रुर॑सि निचुम्पुण ।
अव॑ दे॒वैर्दे॒वकृ॑त॒मेनो॑ऽयासिष॒मव॒ मर्त्यै॒र्मर्त्य॑कृतं पुरु॒राव्णो॑ देव रि॒षस्पा॑हि
॥५॥(५)॥

अव॑भृथेत्यव॑ऽभृथ । नि॒चु॒म्पु॒णेति॑ निऽचुम्पुण ।
नि॒चे॒रुरिति॑ नि॒ऽचे॒रुः । अ॒सि॒ । नि॒चु॒म्पु॒णेति॑ निऽचुम्पुण ।
अव॑ । दे॒वैः । दे॒वकृ॑त॒मिति॑ दे॒वऽकृ॑तम् । एनः॑ । अ॒या॒सि॒ष॒म् ।
अव॑ । मर्त्यैः॑ । मर्त्य॑कृत॒मिति॒ मर्त्य॑ऽकृतम् ।
पु॒रु॒राव्ण॒ इति॑ पु॒रु॒ऽराव्णः॑ । दे॒व॒ । रि॒षः॒ । पा॒हि॒ । ॥चँ॥५॥(५)॥

सा– कात्यायनः – “अवभृथेति । जायापती स्नातः” (काश्रौ ५.५.३०,३१) इति । वरुणप्रघासस्य कर्मणोऽन्ते तदङ्गभूतं यदवभृथाख्यं कर्म जलसमीपे क्रियते तत्रानेन मन्त्रेण दम्पतिभ्यां जले स्नानं कर्तव्यम् । पाठस्तु– ‘अवभृथ निचुम्पुण निचेरुरसि निचुम्पुण । अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि’ इति । अवाचीनानि पात्राणि जलमध्ये क्रियन्ते यस्मिन् यज्ञविशेषे सोऽयमवभृथः । हे ᵛअवभृथ, त्वं ᵛनिचुम्पुण नितरां मन्दं गच्छ । चुप मन्दायां गतौ । ᵛनिचेरुः ᵛअसि नितरां चरणशीलोऽसि । तथाप्यत्र ᵛनिचुम्पुण नितरां मन्दं गच्छ । मन्दगतौ किं प्रयोजनमित्युच्यते । ᵛदेवैः द्योतनात्मकैरस्मदीयैरिन्द्रियैः ᵛदेवकृतं हविःस्वामिषु देवेषु कृतम् ᵛएनः पापं यदस्ति तत् ᵛअवयासिषम् । अस्मिन् कुलेऽहमवनीतवानस्मि । तथा ᵛमर्त्यैः मनुष्यैरस्मत्सहायभूतैर्ऋत्विग्भिः ᵛमर्त्यकृतं मर्त्येषु मनुष्येषु यज्ञदर्शनार्थमागतेषु कृतमवज्ञारूपं यदेनोऽस्ति तदप्यहमवयासिषमित्यनुवर्तते । इदमस्माभिः

---

1. B1 om. वः
2. B1 प्रघासान् for °प्रघासम्
4. H1 मन्त्रेण for इदं
17. P1 with marking above अव° ins. on the margin– यज्ञदेवत्या जगती ।
19. V1 S1 C after गतौ add इति धातुः
20. V1 S1 C after इति adds तद्
21. S1 C om. °कृतं ... तथा म° [L 22]

परित्यक्तमेनो यथा त्वां न प्राप्नोति तथा हे यज्ञ, मन्दं गच्छेत्यभिप्रायः । हे 'देव अवभृथाख्य यज्ञपुरुष, 'पुरुराव्णः । रा दाने । बहुविधविरुद्धफलदायिनः 'रिषः वधात् 'पाहि पालय । रिषतिर्हिंसार्थः । विरुद्धफलदायी वधस्त्वत्प्रसादादस्माकं मा भूदित्यर्थः ॥५॥

[इति तृतीयेऽध्याये पञ्चमोऽनुवाकः ॥]

आ– ' अवभृथ ' इति यज्ञदेवत्या जगती । अवभृथो यज्ञः । अव अवाचीनानि पात्राण्यस्मिन् भ्रियन्त इति अवभृथः । हे Vअवभृथ यज्ञ, Vनिचुम्पुण नीचैश्चुम्पुण त्वमत्वरया गच्छ । Vनिचेरुः नितरां चरणशीलः Vआसि । चुप मन्दायां गतौ । Vनिचुम्पुण मन्दं गच्छ । किं प्रयोजनमिति । यतो यथा त्वामप्राप्य विनश्यति तथा निचुम्पुण । किं तत् एनः ? Vदेवैः Vदेवकृतम् Vएनः Vअवयासिषम् अवनीतवानहम्, अपगतमित्यर्थः । देवैः इन्द्रियैः कर्मकरणभूतैः करणानुग्राहकैः प्रसिद्धदेवैर्वान्यकरणैः कृतम् एनः । कस्मिन् विषये कृतम् । देवकृतम् देवविषये यत् यदि कृतम् । Vमर्त्यैः मनुष्यैर्ऋत्विग्भिः सहायभूतैर्यदि कथंचित् मर्त्यैः कृतं मनुष्यविषये कृतं यदेनः अहम् अयासिषम् अवनीतवानहम् । त्वत्प्रसादात् परिहृतवानित्यर्थः । किं तर्हि Vदेव हे अवभृथ यज्ञ, Vरिषः । रिषतिर्हिंसार्थः । क्विबन्तस्य पञ्चम्यन्तं रूपं रिष इति । रिषः वधात् Vपाहि । कथंभूताद्वधात् ? Vपुरुराव्णः । रा दाने । पुरु बहु । बहुविधविरुद्धफलभोगसंसारदातुः पुरुराव्णः । अथवा बहुविधसंसारलक्षणफलदातुर्वधात् पाहि ॥५॥

[इति पञ्चमोनुवाकः]

[अथ षष्ठोऽनुवाकः]

सा– पञ्चमे वरुणप्रघाससम्बन्धा उक्ताः । षष्ठे साकमेधगतं कर्म किंचिदुच्यते ।

पूर्णा दर्वि परा पत सुपूर्णा पुनरापत ।
वस्नेव वि क्रीणावहा इषमूर्जं शतक्रतो ॥१॥

पूर्णा । दर्वि । परा । पत । सुपूर्णेति सुऽपूर्णा । पुनः । आ । पत ।
वस्नेवेति वस्नाऽइव । वि । क्रीणावहै । इषम् । ऊर्जम् । शतक्रतो इति शतऽक्रतो ॥ ढुं ॥१॥

---

2. V1 S1 C after दाने add इति धातुः
9. B1 सम° for कर्म°
10. B1 अस्मिन् for कस्मिन्; B1 om. मर्त्यैः
13. B1 पञ्चम्यन्ते for पञ्चम्यन्तं
14. H1 om. बहु; B1 °संतान° for °संसार°
15. B1 °संतान° for °संसार°; H1 °प्रदातुः for °दातुः
18. C S1 V1 trans. कर्म after किंचित्

कात्यायनः – “स्थाल्या दर्व्यादत्ते पूर्णा दर्वीति” (काश्रौ ५·६·३६) इति । पाठस्तु– ‘पूर्णा दर्वि परा पत सुपूर्णा पुनरा पत । वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो’ इति । हे ᵛदर्वि, अन्नप्रदानसाधनभूते काष्ठादिनिर्मिते, त्वं पूर्णायाः स्थाल्याः सकाशादन्नं गृहीत्वा संपूर्णा भूत्वा ᵛपरा पूर्णत्वादेवोत्कृष्टा सती ᵛपत इन्द्रदेवतां प्रति गच्छ । ᵛसुपूर्णा कर्मफलेन सुष्ठु पूर्णा सती ᵛपुनः ᵛआ ᵛपत भूयोऽस्मान् प्रत्यागच्छ । हे ᵛशतक्रतो, इन्द्र, त्वं चाहं च उभौ ᵛवस्नेव वसुना धनेनेव ᵛइषम् अभीष्टं हविःस्वरूपमन्नम् ᵛऊर्जं हविर्दानफलरूपं रसविशेषं च ᵛविक्रीणावहै परस्परं द्रव्यविनिमयरूपं विक्रयं करवावहै । अहं तुभ्यं हविर्ददामि, त्वं च मह्यं फलं देहीत्यर्थः ॥१॥

आ– दर्व्योपहन्ति– ‘पूर्णा दर्वि’ इति, ‘देहि मे’ इति [च] द्वे ऐन्द्रयावनुष्टुभौ । उर्णवाभ ऋषिः । हे ᵛदर्वि, अन्नप्रदानोपकरणभूते अस्याः स्थालीतोऽन्नं गृहीत्वा ᵛपूर्णा सती ᵛपरा उत्कृष्टा इन्द्रं प्रति ᵛपत गच्छ । ततः कर्मफलेन शोभनेन पूर्णा ᵛसुपूर्णा ᵛपुनः ᵛआ ᵛपत पुनरागच्छ । एवं दर्वीमुक्त्वा अथेन्द्रमाह– ᵛवस्नेव ᵛविक्रीणावहै । वस्नशब्देन मूल्यमुच्यते । वस्ना इव मूल्येनेव अध्वर्युयजमानौ आवां, हे ᵛशतक्रतो, ᵛइषम् अन्नम् ᵛऊर्जं विशिष्टरसं च ᵛविक्रीणावहै परस्परं द्रव्यविनिमयं करवावहै ॥१॥

दे॒हि मे॒ ददा॑मि ते॒ नि मे॑ धे॒हि नि ते॑ दधौ॑ ।
नि॒हा॒रं नि ह॑रामि ते नि॒हा॒रं नि ह॑रासि मे॒ स्वाहा॑ ॥२॥(६)॥

दे॒हि । मे॒ । ददा॑मि । ते॒ । नि । मे॒ । धे॒हि॒ । नि । ते॒ । द॒धौ॒ ।
नि॒हा॒र॒मिति॑ नि॒ऽहार॑म् । नि । ह॒रा॒मि । ते॒ ।
नि॒ऽहा॒र॒मिति॑ नि॒ऽहार॑म् । नि । ह॒रा॒सि॒ । मे॒ । स्वाहा॑ ॥रौँ॥२॥(६)॥

सा– **कात्यायनः** – देहि म इति जुहोति” (काश्रौ ५·६·४०) इति । कण्वोऽप्याह– “स जुहोति देहि मे” (काशब्रा १·५·२·१८) इति । पाठस्तु– ‘देहि मे ददामि ते नि मे धेहि नि ते दधौ । निहारं नि हरामि ते निहारं नि हरासि मे स्वाहा’ इति । हे यजमान, त्वं ᵛमे मह्यमिन्द्राय ᵛदेहि प्रथमं प्रयच्छ । ᵛते तुभ्यं यजमानाय ᵛददामि अपेक्षितं पश्चात् प्रयच्छामि । अनेन प्रथमपादेन उक्त एवार्थः

---

1. C S1 V1 पूर्णा दर्वीमवहन्ति for स्थाल्या दर्व्यादत्ते; P1 with marking above पूर्णा ins. on the margin और्णवाभ ऐन्द्री शतक्रतुरनुष्टुप् ।
3. V1 S1 C परि° for परा
6. C V1 S1 परस्पर° for परस्परं
7. V1 C S1 trans तुभ्यं, after हविः
10. H1 संपूर्णा for सुपूर्णा
20. P1 after जुहोति adds पूर्वदृष्टा ऐन्द्रयनुष्टुप् and om. देहि म इतीति ॥ पाठस्तु

पुनरपि द्वितीयपादेनादरातिशयार्थमुच्यते । ᵛमे मह्यमिन्द्राय ᵛनि ᵛधेहि प्रथमं त्वं हविर्नितरां संपादय । ᵛते तुभ्यं यजमानाय ᵛनि ᵛदधौ अपेक्षितफलं संपादयामि । निहारशब्दोऽत्र मूल्यवाची । नितरां ह्रियत इति व्युत्पत्तेः । ᵛनिहारं मूल्यभूतं हविः ᵛते तुभ्यम् इन्द्राय ᵛनिहरामि यजमानोऽहं नितरां समर्पयामि । उत्तरो निहारशब्दो मूल्येन क्रेतव्यं पदार्थं ब्रूते । तत्रापि नितरां ह्रियत इति व्युत्पत्तिः । ᵛनिहारं क्रेतव्यवस्त्वनुरूपं फलं ᵛमे मह्यं यजमानाय ᵛनिहरासि पश्चान्नितरां प्रयच्छ । पूर्वार्धे पदद्वयेनोक्तोऽर्थः आदरेण द्विवारमिन्द्रेणोक्तः । तमर्थमुत्तरार्धेन यजमानः सम्यगङ्गीकरोति । ᵛस्वाहा इति अयं शब्दो हविर्दानार्थः ॥२॥

[इति तृतीयेऽध्याये षष्ठोऽनुवाकः ॥]

आ– इन्द्रो ब्रवीति उच्यते [च] । ᵛदेहि ᵛमे मह्यं, प्रथमं तावत् मह्यं त्वं देहि, पश्चात् ᵛते तुभ्यं युष्मदपेक्षितमहं ᵛददामि । मम प्रथमं त्वं ᵛनिधेहि, पश्चादहं ᵛते तुभ्यं ᵛदधौ । निहारं नितरां हरणम् । निहारः मूल्यपर्यायः । ᵛनिहारं मूल्यं त्वं ᵛनिहरासि पूर्वम् । पश्चादहं ᵛनिहारं ᵛनिहरामि । प्रत्यग्रफलं मन्त्रदृगाशास्ते ᵛस्वाहा आह्वानमस्तु ॥२॥

[इति षष्ठोऽनुवाकः]

[अथ सप्तमोऽनुवाकः]

सा– षष्ठे साकमेधगतपूर्णादर्व्याख्यकर्माङ्गभूतमन्त्रा उक्ताः । सप्तमेऽपि साकमेधगतपितृयज्ञाख्यकर्माङ्गभूता मन्त्रा उच्यन्ते ।

अक्ष॒न्नमी॑मदन्त॒ ह्यव॑ प्रि॒या अ॑धूषत ।
अस्तो॑षत॒ स्वभा॑नवो॒ विप्रा॒ नवि॑ष्ठया म॒ती ।
योजा॒ न्वि॑न्द्र ते॒ हरी॑ ॥१॥

अक्ष॑न् । अमी॑मदन्त । हि । अव॑ । प्रि॒याः । अ॒धू॒ष॒त॒ ।
अस्तो॑षत । स्वभा॑नव॒ इ॒ति॒ स्वऽभा॑नवः । विप्रा॑ः । नवि॑ष्ठया । म॒ती ।
योज॑ । नु । इ॒न्द्र॒ । ते॒ । हरी॒ इ॒ति॒ हरी॑ ॥ ज्यें ॥१॥

कात्यायनः – यज्ञोपवीतिनः सर्वे निष्क्रम्योदङ्ङोऽक्षन्नमीमदन्तेत्याहवनीयमुपतिष्ठन्ते द्वाभ्याम्" (काश्रौ ५.९.२१) इति । कण्वोऽप्याह– "ऐन्द्रीभ्यामुपतिष्ठन्त इन्द्रो ह्याहवनीयोऽक्षन्नमीमदन्त"

---

2. S1 om. अत्र
4. V1 om. ह्रियत इति ... पश्चान्

(काशश्रौ १.६.१.२५) इति । तत्र प्रथममन्त्रपाठस्तु– ‘अक्षन्नमीमदन्त ह्यव प्रिया अधूषत । अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ’ इति । अद भक्षण इति धातोर्लुङि घस्लादेशे अक्षन्निति रूपम् । पितृयज्ञाख्ये कर्मणि ये पितरः सन्ति तेऽस्माभिर्दत्तं हविःस्वरूपमन्नम् ᵛअक्षन् भक्षितवन्तः । कथमेतदवगम्यते ? उच्यते– ᵛहि यस्मात् ᵛअमीमदन्त हर्षं प्राप्ताः । मदी हर्षे । तस्मादक्षन्नित्यवगम्यते । अत्र अस्मदीयां भक्तिमवगम्य ᵛप्रियाः प्रीतियुक्ताः सन्तः ᵛअधूषत स्वकीयं शिरः कम्पितवन्तः । धूञ् कम्पने । किं च ᵛस्वभानवः स्वयं दीप्तियुक्ताः ᵛविप्राः मेधाविनः सन्तः ᵛनविष्ठया नवतमया ᵛमती मत्या युक्ता ᵛअस्तोषत स्तुतिं कृतवन्तः । अहो भक्तिरित्यभिधानं स्तुतिः । हे ᵛइन्द्र, ᵛनु क्षिप्रं ᵛते तव ᵛहरी एतन्नामकौ हरितवर्णावश्वौ ᵛयोज गमनाय रथे योजय । तवाभीष्टायाः पितृतृप्तेः संपन्नत्वात् तैः पितृभिः सह त्वया गन्तव्यमित्यर्थः ॥१॥

आ– आहवनीयमुपतिष्ठते – ‘अक्षन्नमीमदन्त, सुसंदृशम्’ इति द्वे ऐन्द्र्यौ, पङ्क्ती गौतमार्षम् । ᵛअक्षन् । लुङि अदेर्घसि घसेरुपधालोपादौ च कृते अडागमे च अक्षन्निति भवति । “अदितवन्तो भुक्तवन्तः पितरः” इति पितृयज्ञे । कथमेतद् द्वयमिति चेत् । उच्यते– ᵛअमीमदन्त, ᵛहि यस्मात् । मद तृप्तौ । अमीमदन्त तृप्ता अभवन्, तस्मात् भुक्तवन्तः पितर इति । ᵛअव ᵛप्रिया ᵛअधूषत । अत्र अवाचीनमन्नं निक्षिप्य प्रियाः अन्नभक्तिमुपस्मृत्य अधूषत । धूञ् कम्पने । प्रीत्या स्वगात्राणि धुन्वन्ति, ‘अहो साधु साधु’ इति । किं च ᵛस्वभानवः स्वयं दीप्ताः ᵛविप्राः प्राज्ञाः मेधाविनः ᵛनविष्ठया नवतमया अपूर्वया ᵛमती मत्या पितरः ᵛअस्तोषत । प्रिया अन्नभक्तीरुपस्मृत्य स्वशरीराणि कम्पयन्तो दातॄन् अस्तोषत अस्तुवन् स्तुवन्ति– ‘अहो एभिर्दत्तमन्नमस्मत्तृप्तिकरं मधुरादिगुणयुक्तम्’– इति । एवंभूतान् पितॄनुपलभ्य अथेन्द्रमाह– ᵛयोज ᵛनु क्षिप्रं ᵛते ᵛहरी त्वदीयौ हरितावश्वौ गमनाय योज नियोजय ॥१॥

सुसंदृशं त्वा वयं मघवन् वन्दिषीमहि ।
प्र नूनं पूर्णवन्धुर स्तुतो यासि वशाँ३ अनु
योजा न्विन्द्र ते हरी ॥२॥

---

3. H1 with markings above अक्षन् ins. on the margin :
ऐन्द्री पाङ्क्तगौतम ऋषिः ।
4. V1 S1 C after हर्षे add इति धातुः
5. V1 S1 C after कम्पने add इति धातुः
12. B1 after °यज्ञे adds पितर उच्यते, H1 पितर इति उच्यते–
16. H1 before प्राज्ञाः adds प्राप्ताः
17. H1 om. अहो

सु॒सं॒दृश॒मिति॑ सु॒ऽसं॒दृश॑म् । त्वा॒ । व॒यम् । मघ॑व॒न्निति॒ मघ॑ऽवन् । व॒न्दि॒षी॒महि॑ ।
प्र । नू॒नम् । पू॒र्णब॑न्धुर॒ इति॑ पू॒र्णऽब॑न्धुरः । स्तु॒तः । या॒सि॒ । वशा॑न् । अनु॑ ।
योज॑ । नु । इ॒न्द्र॒ । ते॒ । हरी॒ इति॒ हरी॑ ॥ थ्लैं ॥२॥

सा– द्वितीयमन्त्रपाठस्तु– ‘ सुसंदृशं त्वा वयं मघवन् वन्दिषीमहि । प्र नूनं पूर्णबन्धुरः स्तुतो यासि वशाꣳ अनु योजा न्विन्द्र ते हरी ’ इति । हे ^{v}मघवन् इन्द्र, ^{v}सुसंदृशं ^{v}त्वा शोभनदर्शनं त्वां ^{v}वयम् अनुष्ठातारः ^{v}वन्दिषीमहि अभिवादयामः । वदि अभिवादने । इत्थमस्माभिर्नमस्कृतस्त्वं ^{v}पूर्णबन्धुरः । रथनीडवाची बन्धुरशब्दः । संपूर्णरथनीडोपेतो भूत्वा ^{v}स्तुतः अस्माभिः स्तूयमानः सन् ^{v}वशान् ^{v}अनु अस्मदीयकामान् अनु लक्षीकृत्य ^{v}नूनं ^{v}प्रयासि अवश्यमस्मदीयान् कामान् दातुमेव स्थाने गच्छसि । ^{v}योज इत्यादि पूर्ववत् ॥१॥

आ– हे ^{v}मघवन् धनसंपन्न इन्द्र, ^{v}सुसंदृशं ^{v}त्वा शोभनदर्शनं त्वां ^{v}वयं ^{v}वन्दिषीमहि । वदि अभिवादनस्तुत्योः । अभिवादयामः । एवमभिवादितः ^{v}स्तुतः च त्वं ^{v}पूर्णबन्धुरः । ^{v}बन्धुरशब्दो रथनीडवचनः । ^{v}नूनं निश्चयेन पूर्णबन्धुरः पूर्णरथनीडः सन् ^{v}वशान् ^{v}अनु । वश कान्तौ । तव कामाननु युष्मत्कामानुसारेण वशाननु यथेष्टं वा ^{v}प्रयासि । अतः ^{v}नु क्षिप्रं ^{v}ते ^{v}हरी ^{v}योज ॥२॥

म॒नो न्वा हु॑वामहे नारा॒श॒ꣳसेन॒ स्तोमे॑न ।
पि॒तॄ॒णां च॒ मन्म॑भिः ॥३॥

मन॑ः । नु । आ । हु॒वा॒म॒हे॒ । ना॒रा॒श॒ꣳसेन॑ । स्तोमे॑न ।
पि॒तॄ॒णाम् । च॒ । मन्म॑भि॒रि॑ति॒ मन्म॑ऽभिः ॥ खौं ॥३॥

सा– कात्यायनः – “ मनो न्वा हुवामह इति गार्हपत्यं तिसृभिः ” (काश्रौ ५·९·२२) इति । उपतिष्ठन्त इत्यनुवर्तते । तत्र प्रथमायाः पाठस्तु– ‘ मनो न्वा हुवामहे नाराशꣳसेन स्तोमेन । पितॄणां च मन्मभिः ’ इति । ^{v}नु क्षिप्रवचनः । पितृयज्ञानुष्ठानविषयं चित्तं तदभिमानिदैवतमित्यर्थः । ^{v}आहुवामहे आह्वयामः । केन साधनेनेति तदुच्यते । ^{v}स्तोमेन स्तोत्रेण । कथंभूतेन ? ^{v}नाराशꣳसेन । शंसः प्रशंसनम् । नराणां मनुष्याणां योग्यः शंसो नराशंसः तत्संबन्धी नाराशंसस्तेन । स्तोत्रं द्विविधं दैवं मानुषं च । यत्र देवाः स्तूयन्ते तद् दैवम् । यत्र च मनुष्याः प्रशस्यन्ते तन्मानुषम् । तथाविधेन स्तोत्रेणेत्युक्तं भवति । किं ^{v}च ^{v}पितॄणां ^{v}मन्मभिः । पितरो यैः स्तोत्रैर्मन्यन्ते तादृशैः स्तोत्रैराह्वयामः ॥३॥

---

6. V1 S1 C om. वदि अभिवादने
8. P1 °दानम् for °कामान् …; C लक्ष्यी° for लक्षी°; V1 S1 C स्वस्थाने for स्थाने
23. P1 before नरा° adds सः
24. P1 प्रशंस्यन्ते for प्रशस्यन्ते ।

आ– गार्हपत्यमुपतिष्ठते– ‘ मनो न्वा ह्वामहे ’ इति त्रीणि मनोदेवत्यानि गायत्राणि । ऋषिरेषां बन्धुः । ᵛमनः ᵛनु ᵛआहुवामहे । नु क्षिप्रं मनः मानसम् आहुवामहे पितृयज्ञकारणमाह्वयामः । केनेति ? ᵛनाराशंसेन ᵛस्तोमेन । शंसनं शंसः । नराणां संबन्धी शंसो नराशंसः । [तत्संबन्धी नाराशंसः], तेन । येन नराः प्रशस्यन्ते दीर्घायुषः पुत्रवन्तो भूयासुरित्यादिभिर्गुणैः स नाराशंसः स्तोमः स्तुतिविशेषः । तेन आह्वयामहे । किं च ᵛपितॄणां ᵛच ᵛमन्मभिः मननीयैः स्तोमैराह्वयामः ॥३॥

आ न॑ एतु मन॒ः पुन॒ः क्रत्वे॒ दक्षा॑य जी॒वसे॑ ।
ज्योक् च॒ सूर्यं॑ दृ॒शे ॥४॥

आ । न॒ः । ए॒तु । मन॑ः । *पुन॒रिति॒ पुन॑ः । क्रत्वे॑ । दक्षा॑य । जी॒वसे॑ ।
ज्योक् । च॒ । सूर्य॑म् । दृ॒शे ॥ गिं ॥४॥

सा– द्वितीयायाः पाठस्तु– ‘ आ न एतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक् च सूर्यं दृशे ’ इति । ᵛनः अस्माकं ᵛमनः पूर्वोक्तं चित्तं ᵛपुनः भूयः ᵛआ ᵛएतु आगच्छतु । किमर्थम् ? ᵛक्रत्वे क्रतवे संकल्पाय यज्ञं संकल्पयितुम् । ᵛदक्षाय कर्मण्युत्साहाय । ज्योगिति निपातश्चिरवचनः । ᵛज्योग् ᵛजीवसे चिरं जीवितुं, ᵛसूर्यं ᵛदृशे ᵛच चिरकालं सूर्यमवलोकयितुं च । एतेषां संकल्पादीनां सिद्धये मनः पुनरागच्छतु ॥४॥

आ– ᵛआ ᵛनः ᵛएतु । नः अस्माकं तत् ᵛमनः ᵛपुनः आ एतु आगच्छतु । किमर्थम् ? ᵛक्रत्वे क्रतवे, क्रतुः संकल्पः यज्ञो वा । ᵛदक्षाय, दक्षः संकल्पसमृद्धिरुत्साहो वा, तस्मै । ᵛजीवसे जीवनाय । ᵛज्योक् ᵛच सूर्यम् । ज्योक् इति निपातश्चिरवचनः । सूर्यं चिरकालं ᵛदृशे द्रष्टुम् ॥४॥

---

2. H1 एष्ट्वाकिबन्धुः for एषां बन्धुः ; H1 before पितृ adds किं च

3. B1 नाराशंसः for नराशंसः

5. B1 यो for सः

9. * [The word पुनः is technically called रिफित, since its visarga in padapāṭha originates from र् in the Saṁhitā-pāṭha. In the Saṁhitā-pāṭha of the 4th *mantra*, पुनः ends in विसर्ग and not in र्; while it ends in र् in that of the 5th; i. e. its रिफित – character has not become clear in Saṁhitā-pāṭha of the fourth *mantra*, while it is clear in that of the fifth. That is why पुनः is repeated and intervened by इति in the pada-pāṭha of the fourth *mantra* and not so in that of the fifth. Vide – Vāj Prātiśākhya I.160;168 – विसर्जनीयो रिफितः; द्वा : सवित : पुन : ... ’ and IV.19 रिफितं संहितायामनिरुक्तम् ।]

18. C VI S1 om. first ज्योग्

पुनर्नः पितरो मनो ददातु दैव्यो जनः ।
जीवं व्रातꣳ सचेमहि ।।५।।

---

*पुनः । नः । पितरः । मनः । ददातु । दैव्यः । जनः ।
जीवम् । व्रातम् । सचेमहि ।।शं।।५।।

सा– तृतीयायाः पाठस्तु– ‘ पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातꣳ सचेमहि ’ इति । हे ᵛपितरः, भवदनुज्ञया ᵛदैव्यः देवसंबन्धी ᵛजनः पुरुषः ᵛनः अस्मभ्यं ᵛमनः पूर्वोक्तं चित्तं ᵛपुनः भूयः ᵛददातु प्रयच्छतु प्रेरयत्वित्यर्थः । तथा सत्यनुष्ठानं कृत्वा भवत्प्रसादात् ᵛजीवं जीवनवन्तं ᵛव्रातं पुत्रपश्वादिगणं ᵛसचेमहि सेवेमहि । सचतिः सेवार्थः । अनन्तरमाम्नातो मन्त्रः प्रकरणबलाद् अत्र जपार्थो द्रष्टव्यः ॥५॥

आ– ‘ पुनर्नः ’ इति । हे ᵛपितरः, ᵛदैव्यः देवसंबन्धी ᵛजनः ᵛनः अस्मभ्यं ᵛमनः पुनःपुनः ᵛददातु । ततस्तेन देवजनदत्तेन मनसा ᵛजीवं जीवनवन्तं ᵛव्रातं गणं पुत्रपश्वादिकं ᵛसचेमहि । स्वञ्ज परिष्वङ्गे । परिष्वजेमहि ॥

वयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः ।
प्रजावन्तः सचेमहि ।।६।।(७)।।

वयम् । सोम । व्रते । तव । मनः । तनूषु । बिभ्रतः ।
। प्रजावन्त इति प्रजाऽवन्तः । सचेमहि ।। गौं ।।६।।(७)।।

सा– पाठस्तु– ‘ वयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ’ इति । अत्र पितृयज्ञे सोमनामको देवोऽस्ति; “ सोमाय पितृमते ” (काशब्रा १·३·३·११) इत्येवं हविषो विहितत्वात् । हे ᵛसोम, ᵛवयं यजमानाः । ᵛतव ᵛव्रते त्वत्संबन्धिनि कर्मणि वर्तमानाः ᵛतनूषु भवदीयशरीरेषु ᵛमनः ᵛबिभ्रतः अस्मदीयं चित्तं धारयन्तः, त्वत्कारुण्यात् ᵛप्रजावन्तः पुत्रपौत्रादिसंपन्नाः ᵛसचेमहि सर्वदा च संयुक्ता भवेम ॥६॥(७)॥

[इति तृतीयेऽध्याये सप्तमोऽनुवाकः ॥]

---

3. * [Vide note on page 229]
7. VI S1 C जीवन्तं for जीवनवन्तं
8. P1 अन्यत्र for अत्र
11. B1 om. गणं
12. H1 षज for स्वञ्ज

आ– ‘ वयꣳ सोम ’ इति सोमदेवत्या गायत्री बन्धोरार्षम् । जपे विनियुक्तोऽयं मन्त्रः । उमया सहितः सोमस्तत्संबोधनं हे ^{v}सोम, ^{v}तव ^{v}व्रते । व्रतमिति कर्मनाम । तव आज्ञाभूते कर्मणि वर्तमानास्तव ^{v}तनूषु तव श्रीमूर्तिषु विषयभूतासु ^{v}मनः ^{v}बिभ्रतः धारयन्तो युष्मत्कारुण्यामृतेनास्मच्छरीराणि पोषयन्तः ^{v}प्रजावन्तः पुत्रपौत्रादिभिः सहिताः ^{v}वयं ^{v}सचेमहि । षच समवाये । समवयेमहि । श्रीसोम, त्वच्चरणारविन्दे संबद्धा भवेम, सेवितव्यानि वस्तूनि वा परिष्वजेमहि ॥६॥(७)॥

[इति सप्तमोऽनुवाकः ॥]

[अथाष्टमोऽनुवाकः ।]

सा– सप्तमे साकमेधगतपितृयज्ञमन्त्रा उक्ताः । अष्टमे साकमेधगतत्र्यम्बकहविर्विषया मन्त्रा उच्यन्ते ।

ए॒ष ते॑ रुद्र भा॒गः स॒ह स्वस्राऽम्बि॑कया॒ तं जु॑षस्व॒ स्वाहा॑ ।
ए॒ष ते॑ रुद्र भा॒ग आ॒खुस्ते॑ प॒शुः ॥१॥

ए॒षः । ते॒ । रु॒द्र॒ । भा॒गः । स॒ह । स्वस्रा॑ । अम्बि॑कया । तम् । जु॑ष॒स्व॒ । स्वाहा॑ ।
ए॒षः । ते॒ । रु॒द्र॒ । भा॒गः । आ॒खुः । ते॒ । प॒शुः ॥ श्रैं ॥१॥

कात्यायनः– “ एष त इति जुहोति ” (काश्रौ ५.१०.१२) इति । पाठस्तु– ‘ एष ते रुद्र भागः सह स्वस्राऽम्बिकया तं जुषस्व स्वाहा ’ इति । रोदयति विरोधिनां शतमिति रुद्रः । हे ^{v}रुद्र, ^{v}ते तव ^{v}स्वस्रा भगिन्या ^{v}अम्बिकया एतन्नामधारिण्या ^{v}सह ^{v}एषः अस्माभिर्दीयमानः पुरोडाशः ^{v}भागः भजनीयः स्वीकर्तुं योग्यः । त्वं तथाविधं पुरोडाशं सं ^{v}जुषस्व सेवस्व ^{v}स्वाहा इदं हविर्दत्तम् । अम्बिकायाः रुद्रभगिनीत्वं कण्वो दर्शयति– “ अम्बिका ह वै नामास्य स्वसा तयास्यैष सह भागः ” (काशब्रा १.६.२.५) इति । योऽयं रुद्राख्यः क्रूरो देवस्तस्य यं विरोधिनं हिंसितुमिच्छा भवति तमनया भगिन्या क्रूरदेवतया साधनभूतया हिनस्ति । सा चाम्बिका शरत्कालरूपं रोगकालं प्राप्य ज्वरादिकमुत्पाद्य तं

---

1. B1 H1 वधो for बन्धोः
15. P1 before first एष adds – दक्षिणाग्न्युल्मुकमादाय चतुष्पथे पलाशपत्रमध्यमेन होम सर्वेषामवदानम् ।
17. V1 S1 C पुरोडाश° for पुरोडाशः
18. V1 S1 C om. सेवस्व
19. P1 सा for अस्य; P1 तस्य for तयास्य
20. V1 S1 C om. यं
21. V1 S1 C om. रोगकालं

विरोधिनं हन्ति। रुद्राम्बिकयोस्तयोरुभयोरप्रत्ययमनेन हविषा शान्तं भवति। तदेतत् सर्वं तित्तिरिर्दर्शयति– “एष ते रुद्र भागः सह स्वस्राऽम्बिकयेत्याह। शरद्वा अस्याम्बिका स्वसा। तया वा एष हिनस्ति। यं हिनस्ति तयैवैनं सह शमयति” (तैब्रा १·६·१०) इति। कात्यायनः – “अतिरिक्तमाखूत्कर उपकिरत्येष इति” (काश्रौ ५·१०·१३) इति। यजमानस्य पुत्रप्रभृत्यादयो यावन्तः पुरुषाः सन्ति तान् गणयित्वा प्रतिपुरुषमेकैकः पुरोडाश इत्येतावतः पुरोडाशान्निरूप्य ततोऽप्यधिकमेकं पुरोडाशं निर्वपेत्। सोऽयमतिरिक्त इत्युच्यते। तदेतत् कात्यायनेनादौ सूचितम् – “त्रैयम्बकान् निर्वपति रौद्रानेककपालान् यावन्तो यजमानगृह्या एकाधिकान्” (काश्रौ ५·१०·१-२) इति। तित्तिरिणाऽप्येतदाम्नातम् – “प्रतिपुरुषमेककपालान्निर्वपति ......एकमतिरिक्तम्” (तैब्रा १·६·१०) इति। तत्र योऽयमतिरिक्तः पुरोडाशस्तं नासौ जुहुयात्। किं तु मूषकोत्खाते उद्वासा (?) ‘एष ते’ इति मन्त्रेणोपकिरेत्। कण्वोऽप्येतदाह– “अथ योऽयमतिरिक्तो भवति तमेवमुत्तरत आखुकरीष उपकिरत्येष ते रुद्र” (काशब्रा १·६·२·५) इति। पाठस्तु– ‘एष ते रुद्र भाग आखुस्ते पशुः’ इति। हे ᵛरुद्र, ᵛएषः अस्माभिरुपकीर्यमाणोऽतिरिक्तः पुरोडाशः ᵛते ᵛभागः त्वया भजनीयः। तथा ᵛते तव ᵛआखुः ᵛपशुः मूषकः पशुत्वेन समर्पितः। तत्समर्पणं कण्वो दर्शयति– “आखुस्ते पशुरिति तमस्मा आखुमेव पशुमनुदिशति तमस्याऽऽस्ये दधाति तथेतरान् पशून्न हिनस्ति” (काशब्रा १·६·२·५) इति। अस्याः रुद्रभगिन्यास्ते त्वन्निमित्तं ददाति। तद्दानेन च तुष्टो रुद्रस्तयाऽम्बिकया यजमानस्य पशून् न मारयतीति ॥१॥

आ– ‘एष ते रुद्र भागः’ इति। रुद्रदेवत्याऽऽनुष्टुभी विराट्। ऋषिनामानुक्तावादावुक्त एव ऋषिः। त्रैयम्बकाः पुरोडाशाः। तत्र विनियुक्तोऽयं मन्त्रः अवदानहोमे। ऋ गतौ। ऋत्या ज्ञानेन संसारकारणमज्ञानं द्रावयतीति रुद्रः, तत्संबोधनं हे भगवन् श्रीरुद्र, ᵛते तव यः ᵛएषः ᵛभागः ᵛसह ᵛस्वस्रा ᵛअम्बिकया, स्वस्रा भगिन्या जगज्जनन्या अम्बिकया, सह ᵛतं भागं ᵛजुषस्व। “अम्बिका ह वै नामास्य स्वसा तयास्यैष सह” (काशब्रा १.६.२.५) इत्यादि श्रुतेः। ᵛस्वाहा सुहुतमस्तु। ईश्वरत्वात् [रात्?] रुद्राम्बिकयोराविर्भावात् स्वसृता तस्या न विरुध्यते। अतिरिक्तमुत्करे उपकिरति ᵛएष ᵛते ᵛरुद्र ᵛभागः, ᵛआखुः मूषकः ᵛते ᵛपशुः [इति] ॥१॥

अव॑ रु॒द्रम॑दीम॒ह्यव॑ दे॒वं त्र्य॑म्बकम्।
यथा॑ नो॒ वस्य॑स॒स्कर॒द्यथा॑ न॒ः श्रेय॑स॒स्कर॒द्यथा॑ नो व्यवसा॒यया॑त् ॥२॥

---

3. V1 S1 C °स्करमुप° for स्कर उप°
5. P1 तावतः for एतावतः
6. P1 कात्यायनाद्यैः for कात्यायनेनादौ
8. V1 S1 C तेनासौ for तं नासौ
9. P1 उ वा त for उद्वासा
10. V1 S1 C आखूत्करीषे for आखुकरीषे
11. P1 om. हे रुद्र
15. P1 om. इति.
20. H1 एषा for एषः

अवं । रुद्रम् । अदीमहि । अवं । देवम् । त्र्यंम्बकमिति त्रिऽअंम्बकम् ।
यथां । नः । वस्यंसः । करंत् । यथां । नः । श्रेयंसः । करंत् । यथां । नः ।
व्यवसाययादिति विऽअवसाययांत् ॥त्रै॥२॥

कात्यायनः – "आगम्याव रुद्रमदीमहीति जपन्ति" (काश्रौ ५·१०·१४) इति । कण्वोऽप्याह– "अथ पुनरेत्य जपत्यव रुद्रमदीमह्यव" (काशब्रा १·६·२·६) इति । द्वयोर्मन्त्रयोः प्रतीकमिदम् । तयोः प्रथममन्त्रपाठस्तु– 'अव रुद्रमदीमह्यव देवं त्र्यम्बकम् । यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात्' इति । ᵛरुद्रम् ᵛअव, असौ रुद्र इति मनसा तमवगत्य ᵛअदीमहि । यथा त्वदनुग्रहादन्नं भक्षयेम तथा ᵛत्र्यम्बकं, त्रीण्यम्बकानि नेत्राणि यस्य तादृशं, ᵛदेवम् ᵛअव । त्रिनेत्रोऽयं देव इति मनसा अवगत्य अदीमहीत्यनुवर्तते । ᵛयथा येन प्रकारेण ᵛनः अस्मान् ᵛवस्यसः वसुमतः ᵛकरत् असौ त्र्यम्बकः कुर्यात् । किं च ᵛयथा ᵛनः ᵛश्रेयसः ज्ञातिषु प्रशस्यतरान् कुर्यात् । किं च ᵛयथा ᵛनः ᵛव्यवसाययात् येन प्रकारेण अस्मान् अवसाययेत् सर्वेषु कार्येषु निश्चययुक्तान् कुर्यात तथैनं भजाम इति शेषः । आशीःपरत्वं मन्त्रस्य तित्तिरिर्दर्शयति– "अवाम्ब रुद्रमदिमहीत्याह । आशिषमेवैतामा शास्ते (तैब्रा १·६·१०) इति ॥२॥

आ– 'अव रुद्रम्', 'भेषजम्' इति द्वे रुद्रदेवत्ये । आद्या पङ्क्तिस्तदपरा पञ्चपदा उष्णिक् । ᵛअव ᵛरुद्रम् । अन्यदेवताभ्यः अव अवयुत्य पृथक्कृत्य । रुद्रम्, रुत् शोकः, तं द्रावयतीति रुद्रः, तम् ᵛअदीमहि । अद् भक्षणे । छान्दसो णिलोपः । रुद्रमादयामः भोजयामः । ᵛअव ᵛदेवं ᵛत्र्यम्बकम् । त्रीणि अम्बकानि नेत्राणि यस्य सः त्र्यम्बकः । तं देवं देवनादिगुणयुक्तम् अव अवगम्य ज्ञात्वा देवं त्र्यम्बकं तथा भोजयामः ᵛयथा ᵛनः ᵛवस्यसस्करत्, यथा येन प्रकारेण नः अस्मान् वस्यसः करत् कुर्यात् । वस निवासे । वसनशीलान् कुर्यान् । ᵛयथा ᵛनः ᵛश्रेयसस्करत् प्रशस्यतरान् कुर्यात् । ᵛयथा ᵛनः ᵛव्यवसाययात् । विपूर्वस्यावपूर्वस्य च "षो अन्तकर्मणि" (धापा ११४७) इत्यस्याशिषि लिङि आर्धधातुके यासुटि कृते व्यवसाययादिति भवति । यथा नः सर्वकर्मणामन्तं प्रापयेदित्यर्थः ॥२॥

भेषजमंसि भेषजं गवेऽश्वांय पुरुंषाय भेषजम् ।
सुगं मेषायं मेष्यै ॥३॥

---

5. V1 S1 C after तयोः adds एषः
6. V1 S1 C °मन्त्रः for °मन्त्र°
8. S1 भक्षयेत for भक्षयेम; P1 त्रियम्बकं for त्र्यम्बकं
9. V1 S1 C वसुमत्तमं for वसुमतः; V1 S1 C त्रियम्बकः for त्र्यम्बकः
14. V1 °श्रुत्य for °युत्य
16. V1 त्रियम्बकं for त्र्यम्बकं

भेषजम् । असि । भेषजम् । गवे । अश्वाय । पुरुषाय । भेषजम् ।
सुगमिति सुऽगम् । मेषाय । मेष्यै ॥यं॥३॥

सा– द्वितीयमन्त्रपाठस्तु– ‘ भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजम् । सुगं मेषाय मेष्यै ’ इति । हे रुद्र, त्वं भेषजम् असि औषधवत् सर्वोपद्रवनिवारकोऽसि । अतोऽस्मदीयेभ्यो गवाश्वपुरुषमेषमेषीभ्यः सुगं सुखेन गन्तुं प्राप्तुं शक्यं यत् भेषजं सर्वव्याधिनिवारकमस्ति तद्देहीति शेषः । तथास्मदीयानां सुगं भेषजं देहि । अनेन मन्त्रेण स्वगृहे विद्यमानानां पशूनां क्षेमप्राप्तिर्भवति । तमेनमर्थं तित्तिरिर्दर्शयति– “ भेषजं गव इत्याह । यावन्त एव ग्राम्याः पशवः । तेभ्यो भेषजं करोति ” (तैब्रा १·६·१०) इति ॥३॥

आ– हे भगवन् श्रीरुद्र, यतस्त्वं स्वभावत एव भेषजम् औषधम् असि सर्वप्राणिनामतस्त्वां प्रार्थये । सुगं सुगम्यं सुलभं सुसाधनं भेषजं गवे अश्वाय पुरुषाय मेषाय मेष्यै सुगं भेषजं देहीति शेषः ॥३॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥४॥

त्र्यम्बकमिति त्रिऽअम्बकम् । यजामहे ।
सुगन्धिमिति सुऽगन्धिम् । पुष्टिवर्धनमिति पुष्टिऽवर्धनम् ।
उर्वारुकमिवेत्युर्वारुकम्ऽइव । बन्धनात् । मृत्योः । मुक्षीय । मा । अमृतात् ॥तं॥४॥

सा– कात्यायनः –“ अग्निं त्रिः परियन्ति पितृवत् सव्योरूनाघ्नानास्त्र्यम्बकमिति । देववच्चैतेनैव दक्षिणाघ्नानाः ” (काश्रौ ५·१०·१५-१६) इति । यथा पितृमेधे पुत्रादयः पुरुषाः स्वकीयान् वामभागस्थान् ऊरूंस्ताडयन्तस्त्रिवारमप्रदक्षिणं परियन्ति, एवमत्र पुरुषाः प्रथमेनैव त्र्यम्बकमन्त्रेण अग्निमप्रदक्षिणत्रयेण प्रदक्षिणत्रयेण च परियन्तीत्यर्थः । पाठस्तु– ‘ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ’ इति । सुगन्धिं दिव्यगन्धोपेतं पुष्टिवर्धनं धनधान्यादिपुष्टेर्वर्धयितारं त्र्यम्बकं नेत्रत्रयोपेतं रुद्रं यजामहे पूजयामः । ततो रुद्रस्य प्रसादात् मृत्योः मुक्षीय अपमृत्योः संसारमृत्योश्च मुक्तो भूयासम् । अमृतात् मा मुक्षीय स्वर्गरूपात् मुक्तिरूपाच्च अमृतात् मा मुक्षीय मुक्तो मा भूयासम् । अभ्युदयनिःश्रेयसरूपात् फलद्वयान्मम भ्रंशो मा भूदित्यर्थः । मृत्योर्मोचने दृष्टान्तः – ‘ उर्वारुकमिव बन्धनात् ’ इति । कर्कट्यादेः फलमत्यन्तपक्वं सत् स्वकीयबन्धनस्थानात् वृन्तात् प्रमुच्यते तद्वत् ॥४॥

---

4. S1 S1 C °पुरुषेभ्यः for °पुरुषमेषमेषीभ्यः [L 5]
6. P1 एवम् for एनम्
25. S1 C कर्कन्ध्वादेः for कर्कट्यादेः

आ– ‘ त्र्यम्बकम् ’ इति द्वे रौद्र्यौ अनुष्टुभौ । पूर्वस्याः वासिष्ठः । ‘ त्र्यम्बकम् ’ इति शिरसि । ‘ यजामहे ’ इति ललाटे । ‘ सुगन्धिम् ’ इति मुखे । ‘ पुष्टिवर्धनम् ’ इति हृदये ‘ उर्वारुकम् ’ इति नाभौ । ‘ बन्धनात् ’ इति कट्याम् । ‘ मृत्योः ’ इति ऊरुद्वये । ‘ मुक्षीय ’ इति जानुद्वये । ‘ माऽमृतात् ’ इति पादद्वये । प्रणवव्याहृति(पूर्वकं)पादचतुष्टयेन षडङ्गन्यासः । अस्य मन्त्रस्य वसिष्ठ ऋषिः । मृत्युञ्जयस्त्र्यम्बकश्रीरुद्रो देवता । ‘ गं वाङ् मा वा ’ इति बीजशक्तिः कीलाक्षराणि । मृत्युञ्जयत्र्यम्बकश्रीरुद्रसमाराधने विनियोगः । केवलप्रणवसंपुटमन्त्रजपः शुद्धवैदिकमार्गः, प्रणवव्याहृतिः संपुटो वा । प्रासादामृतेश्वरभुवनेश्वरीप्रणवव्याहृतिसंपुटः त्र्यम्बकमन्त्रो वा जप्तव्य इति मन्त्रवादमार्गः ।

“ बद्धपद्मासनं श्वेतवर्णं चन्द्रकलाधरम् । चतुर्भुजं ज्ञानमुद्राधराधरकरद्वयम् ॥

धृतामृतकलशोत्तरकरद्वयं सर्वालंकारभूषितम् । ध्यात्वा यज्ञ आवाह्य पूजयेत् ” इति ॥

ᵛत्र्यम्बकं ᵛयजामहे पूजयामः । ᵛसुगन्धि, “ गन्धस्येदुत्पूति° ” (पा. ५.४.१३५) इत्यादिना (इकारः) समासान्तः । शोभनगन्धं सुकीर्तिम् । ᵛपुष्टिवर्धनं पोषस्य वर्धयितारम् । सुगन्धि पुष्टिवर्धनं त्र्यम्बकं यजामहे । हे त्र्यम्बक, त्वत्प्रसादात् ᵛमृत्योः मरणहेतोः संसारलक्षणाद्वा मृत्योः ᵛमुक्षीय । वचनव्यत्ययः । मुक्षीमहि स्वयं मुक्ता भवेम । यथा लोके ᵛउर्वारुकं कर्कट्यादेः परिपक्वफलं ᵛबन्धनात् वृन्तात् मुच्यते एवमहमपि मृत्योः मुक्षीय त्वं मोचय । ᵛमा ᵛअमृतात् मा मोचय । अग्निं त्रिः पर्येत्यनेन मन्त्रेण । कुमार्यश्चोत्तरेण मन्त्रेणाग्निं परियन्ति ॥४॥

त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् ।
उर्वारुकमिव बन्धनादितो मुक्षीय माऽमुतः ॥५॥

---

1. H1 रौद्र्ये for रौद्र्यौ; H1 पूर्वस्य for पूर्वस्याः
5. B1 गं मां चेति for गं ... वेति
6. B1 om. °त्र्यम्बक°
7. B1 °अमित° for °अमृत°
8. B1 त्र्यम्बको for त्र्यम्बकमन्त्रो; H1 °पद° for °वाद’
9. H1 °धारणं for °धरा°
10. B1 यत्रा° for यज्ञ आ°
12. H1 °गन्धि for °गन्धं
15. H1 उर्वारुकमिव बन्धनात् ज्ञातिवर्गादिबन्धनात् प्रसवबन्धनात् for उर्वारुकं ... बन्धनात्
16. B1 अग्नीध्रः for अग्निं त्रिः

त्र्यम्बकमिति त्रिऽअम्बकम् । यजामहे ।
सुगन्धिमिति सुऽगन्धिम् । पतिवेदनमिति पतिऽवेदनम् ।
उर्वारुकमिवेत्युर्वारुकम्ऽइव । बन्धनात् । इतः । मुक्षीय । मा । अमुतः ॥यं॥५॥

सा– कात्यायनः – "कुमार्यश्चोत्तरेण" (काश्रौ ५·१०·१६) इति । यजमानसंबन्धिन्यः कुमार्योऽपि पूर्वोक्तपुरुषवदुत्तरेण त्र्यम्बकमन्त्रेणाग्निं त्रिः परियन्ति । पाठस्तु– 'त्र्यम्बकं यजामहे सुगन्धि पतिवेदनम् । उर्वारुकमिव बन्धनादितो मुक्षीय माऽमुतः' इति । 'पतिवेदनं भर्तुर्लम्भयितारम् (लम्भयितारम्) अनुकूलपतिप्रदमित्यर्थः । अन्यत् पूर्ववत् । 'इतः 'मुक्षीय अस्मान्मातृपितृभ्रातृकर्मतो मुक्ता भूयासम् । 'अमुतः 'मा मुक्षीय अमुतः पत्युर्मुक्ता मा भूयासम् । "सा यदित इत्याह ज्ञातिभ्यस्तदाह माऽमुत इति पतिभ्यस्तदाह" (शब्रा २·६·२·१४) इति श्रुतेः । जनकस्य गोत्रं गृहं च परित्यज्य पत्युर्गोत्रे गृहे च त्र्यम्बकप्रसादात् सर्वदा वसामीत्यर्थः ।

आ– ᵛपतिवेदनं भर्तुर्लम्ध(म्भ?)यितारं ᵛसुगन्धि ᵛत्र्यम्बकं ᵛयजामहे । ᵛउर्वारुकम् ᵛइव ᵛबन्धनात् ज्ञातिवर्गादिबन्धनात् ᵛमुक्षीय, ᵛइतः ᵛअस्मात् मुक्षीय । ᵛमा ᵛअमुतः अमुष्मात् पत्युर्मा मोचय ॥

एतेन रुद्रावसेन परो मूजवतोऽतीहि ।
अवततधन्वा पिनाकावसः कृत्तिवासा अहिंसन्नः शिवः शान्तोऽतीहि ॥६॥(८)॥

एतेन । रुद्र । अवसेन । परः । मूजवत इति मूजऽवतः । अति । इहि ।
अवततधन्वेत्यवततऽधन्वा । पिनाकावस इति पिनाकऽअवसः । कृत्तिवासा इति कृत्तिऽवासाः ।
अहिंसन् । नः । शिवः । शान्तः । अति । इहि ॥थ्यें॥६॥(८)॥

सा– कात्यायनः – "मूतयोः कृत्वा वेणुयष्ट्यां कुपे वाऽऽसज्योभयतः स्थाणुवृक्षवंशवल्मीकानामन्यतमस्मिन्नुत्क्षेपणवदासजत्येतेन इति" (द्र.काश्रौ ५·१०·२१) इति । व्रीहियवादिधान्यवहनार्थं तृणवंशादिभिर्निर्मितः पात्रविशेषो मूतमित्युच्यते । तयोरुभयोर्मूतयोस्त्र्यम्बकान् हविःशेषान् प्रक्षिप्य

---

7. S1 C after पूर्ववत् ins. इत्यर्थः

8. V1 S1 C after second अमुतः add विवाहादूर्ध्वं भविष्यतः ;
V1 S1 C om. सा ... °स्तदाह इति । (L. 9)

10. P1 वसामः for वसामि

13. B1 मृत्युरमृतात् for पत्युर्

20. C S1 अन्तेन for एतेन

21. C S1 विशेषान् for हविः शेषान्

स्वकीयेनांशेन वोढुं शक्यायां वंशयष्टयामग्रद्वये तन्मूतद्वयमवासज्योन्नते स्थाणौ वृक्षे वंशे वल्मीके वा मूतद्वययुक्तां वंशयष्टिं संसृजति । ततो गोभिराघ्रातुमशक्यत्वात् गावो रोगं न प्राप्नुयन्तीत्यर्थः । पाठस्तु– ‘एतेन रुद्रावसेन परो मूजवतोऽतीहि । अवततधन्वा पिनाकावसः’ इति । मूजवान्नाम कश्चित् पर्वतो रुद्रस्य वासस्थानम् । अवसशब्देन देशान्तरं गच्छतो मार्गमध्ये तटाकादिसमीपे भोक्तव्य ओदनविशेषोऽभिधीयते । हे ᵛरुद्र, ᵛएतेन मूतद्वयगतेन ᵛअवसेन हविःशेषाख्येन भोज्येन सहितस्त्वं ᵛमूजवतः ᵛपरः पर्वतात् परभागवर्ती सन् ᵛअतीहि अतिक्रम्य गच्छ । कथंभूतस्त्वम् ? ᵛअवततधन्वा अवरोपितधनुष्कः । अस्मद्विरोधिनां त्वया निवारितत्वात् इत ऊर्ध्वं धनुषि ज्यासमारोपणस्य प्रयोजनाभावादवरोपणमेवेदानीं युक्तम् । तथा ᵛपिनाकावसः पिनाकाख्यं त्वदीयं धनुरावस्ते सर्वत आच्छादयतीति पिनाकावसः । वस आच्छादने । यथा धनुर्दृष्ट्वा प्राणिनो न बिभ्यति तथा त्वदीयं धनुर्वस्त्रादिना प्रच्छाद्य गच्छेत्यर्थः ॥

कात्यायनः – “ कृत्तिवासा इति । अनपेक्षमेत्योपस्पृशन्त्यपः ” (काश्रौ ५·१०·२२-२३) इति । उन्नते वृक्षादौ मूतद्वयमवसज्य प्रत्यावर्तमानाः मूतद्वयस्यावेक्षणमकृत्वा वेदिसमीपे समागत्योदकं स्पृशेयुः । पाठस्तु– ‘ कृत्तिवासा अहिंसन्नः शिवः शान्तोऽतीहि ’ इति । हे रुद्र, त्वं ᵛकृत्तिवासाः चर्माम्बरः ᵛनः अस्मान् ᵛअहिंसन् हिंसामकुर्वन् ᵛशिवः अस्मदीयपूजया संतुष्टः ᵛशान्तः कोपरहितः भूत्वा ᵛअतीहि पर्वतमतिक्रम्य गच्छ ॥६॥८॥

इति तृतीयेऽध्यायेऽष्टमोऽनुवाकः ॥७॥

आ– ‘एतेन’ इति रौद्रम् । आस्तारपङ्क्तिः । हे ᵛरुद्र, ᵛएतेन ᵛअवसेन पथ्योदनेन मार्गे संबलेन ᵛपरः परस्तात् ᵛमूजवतः, मूजवान्नाम पर्वतो रुद्रस्य वसतिः, तस्मात् ᵛमूजवतः पर्वतस्थानात् । ᵛअवततधन्वा अवतारितधनुः, ᵛपिनाकावसः, पिनाको रुद्राङ्कुशः, रुद्राङ्कुशकृतसंबन्धः । ᵛकृत्तिवासाः चर्माम्बरः । ᵛअतीहि सर्वानतिक्रम्य अस्मान् प्राप्नुहि आगच्छ । अतिरतिशयार्थो वा । एवंभूतस्त्वमागत्यास्मत्सपर्यां गृहीत्वा संतुष्टः ᵛअहिंसन् कस्यचिदपि हिंसामकुर्वन् हे रुद्र, ᵛनः अस्माकं ᵛशान्तः सन् स्वयं ᵛशिवः त्वम् ᵛअतीहि पूजितो गच्छ ॥६(८)॥

[इति अष्टमोऽनुवाकः]

---

1. C S1 V1 वृक्षवंशवल्मीके for वृक्षे वंशे वल्मीके
4. P1 आवास for वास°
5. V1 S1 C om. अवसेन P1 परतः for परः
6. S1 om. अतीहि
8. V1 S1 C om. वस आच्छादने [L 9]
11. V1 S1 C °द्वये for °द्वयम्; S1 C V1 °मानो for °मानाः;
    C V1 S1 om. समागत्य ... अस्मान् (L 13)
15. V1 खण्डः for अनुवाकः
17. B1 मार्गसंबद्धान्नेन for मार्गे संबलेन
20. V1 after सपर्यां folios 36 to 42 are missing

[अथ नवमोऽनुवाकः]

सा – इत्थमष्टमे साकमेधगतत्र्यम्बकहविर्विषया मन्त्रा उक्ताः । नवमे वाजिनविषया मन्त्रा उच्यन्ते । यत्र यत्रामिक्षायागो भवति तत्र तत्रानुनिष्पादी वाजिनयाग इत्येवं जैमिनीये धर्मविचारशास्त्रे निर्णीतम् । चातुर्मास्येष्वपि प्रथमपर्वणि वैश्वदेव्यामिक्षा विहिता । तत्रायं वाजिनयागः प्रसक्तः । क्षीरे विकृते सति तत्र निष्पन्नं नीरं वाजिनमित्युच्यते । तदेव यागे द्रव्यम् । वाजिशब्दाभिधेयास्तत्र देवाः । तदेतदन्यत्राम्नातम्– " तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम् " इति । तद्द्रव्यस्य निष्पत्तिप्रकारमापस्तम्बोऽप्याह – " तप्ते प्रातर्दोहे सायंदोहमानयति । यत् संवर्तते साऽऽमिक्षा । यदन्यत्तद् । वाजिनम् " (आपश्रौसू ८·२·५-६) इति । तस्मिन् वाजिनयागे शेषभक्षणे विकल्पितस्त्रयो मन्त्रास्तानाह ॥

वा॒जिना॒ꣳ वाजो॑ऽवतु भ॒क्षो अस्मान् रेत॑ः सि॒क्तम॒मृत॒ं बला॑य ।
विश्वे॑ दे॒वा अ॒भि यत् सं॑बभू॒वुस्तन्मा॑ धिनोतु प्र॒जया॒ धने॑न ॥१॥
वा॒ज्य॒हꣳ वाजि॑न॒स्योप॑हूत॒ उप॑हूतस्य भक्षयामि ।
वाजे॑ वा॒जी भू॑यासम् ॥२॥

वा॒जिना॑म् । वाज॑ः । अ॒व॒तु॒ । भ॒क्षः । अ॒स्मान् । रेत॑ः । सि॒क्तम् । अ॒मृत॑म् । बला॑य ।
विश्वे॑ । दे॒वाः । अ॒भि । यत् । सं॒ब॒भू॒वुरिति॑ सं॒ऽब॒भू॒वुः ।
तत् । मा॒ । धि॒नो॒तु॒ । प्र॒जयेति॑ प्र॒ऽजया॑ । धने॑न । ज्यों ॥१॥
वा॒जी । अ॒हम् । वाजि॑नस्य । उप॑हूत॒ इत्युप॑ऽहूतः । उप॑हूत॒स्येत्युप॑ऽहूतस्य । भ॒क्ष॒या॒मि॒ ।
वाजे॑ । वा॒जी । भू॒या॒स॒म् ॥ चौं ॥

कात्यायनः – " वाजिनां वाजिनं भक्षयामीति । वाज्यहं वाजिनस्योपहूतस्योपहूतो भक्षयामीति वा । वाजे वाजी भूयासमिति वा " (काश्रौसू ४·४·२३-२५) इति । तत्र प्रथममन्त्रपाठस्तु– ' वाजिनां वाजोऽवतु भक्षो अस्मान् रेतः सिक्तममृतं बलाय । विश्वे देवा अभि यत् संबभूवुस्तन्मा धिनोतु प्रजया धनेन ॥ वाज्यहꣳ वाजिनस्योपहूत उपहूतस्य भक्षयामि ' इति । 'वाजिनाम् एतन्नामकानां यागदेवानां संबन्धी 'वाजः अन्नभूतो हविःशेषः, 'भक्षः भक्षयितुं योग्यः 'अस्मान् 'अवतु, स वाजो-

---

3. P1 °निष्पादि° for ° निष्पादी
5. P1 वाजिन° for वाजि°
6. C om. सा; V1 S1 C तस्य for तद्°
19. P1 om. वाज्यहं ... भक्षयामीति वा [L 20]
20. V1 S1 C om. first and second वा; V1 S1 C भूयासमिति च for भूयासमिति वा
22. P1 with markings above वाज्यहं ins. on the margin :– श्रौतसूत्रे वाज्यहमिति मन्त्रो वाजिन भक्षणे विकल्पेनोक्तस्तेन नायं पूर्वशेषः । तदभावे पूर्वशेष इति ज्ञेयम् ।
23. S1 V1 C भक्ष्यो for भक्षो

ऽस्मान् रक्षयतु । ᵛरेतः भक्षितहविःशेषान्नपरिणामरसरूपमस्मदीयं ᵛसिक्तं पुत्रोत्पत्त्यर्थं योनौ स्थापितं सत् ᵛअमृतं पुत्ररूपजीवोपेतत्वेन विनाशरहितं भूत्वा ᵛबलाय अपत्यसंपत्तिरूपबलसिद्धये संपद्यतामिति शेषः । ᵛविश्वे ᵛदेवाः सर्वेऽपि देवाः एतदुपलक्षिताः सर्वे जनाः ᵛयत् ᵛअभि रेतोरूपं यद्वस्त्वभिप्राप्य ᵛसंबभूवुः समुत्पन्नाः । ᵛतत् सर्वजनोत्पादकं रेतः ᵛप्रजया ᵛधनेन पुत्रपौत्रादिप्रजारूपेण मां ᵛधिनोतु मां प्रीणयतु । ᵛवाजी ᵛअहं पूर्वोक्तवाजाख्यान्नवान् यजमानोऽहम् ᵛउपहूतः इतरैरनुज्ञातः सन् ᵛउपहूतस्य वाजस्य इतरैरनुज्ञातस्य हविःशेषस्य कंचिद्भागमिति शेषः । ᵛभक्षयामि हविःसंस्काररूपं भक्षणं करोमि । यत्तु ‘ वाजिनं भक्षयामि ’ इति द्वितीयो मन्त्रः कात्यायनेनोदाहृतः असौ शाखान्तरीयः ॥

तृतीयमन्त्रपाठस्तु– ‘ वाजे वाजी भूयासम् ’ इति । ᵛवाजे अन्नविषये ᵛवाजी ᵛभूयासं संग्रामवान् भूयासम् । वाजशब्दोऽन्नसंग्रामयोर्वाचकः । यत्र युद्धेनान्नं लभ्यते तत्र वाजिदेवतानुग्रहात् विजयिनो भूयास्मेत्यर्थः ॥१-२॥

आ– ‘ वाजिनां वाजः ’ इति वाजिदेवत्या त्रिष्टुप् । ᵛवाजिनां वाजवतामन्नवतां संबन्धी ᵛवाजः अन्नम् । कथंभूतः ? ᵛभक्षः [भक्षितुं योग्यः] वाजः ᵛअस्मान् ᵛअवतु । ᵛरेतः ᵛसिक्तम् ᵛअमृतम् । अन्नपरिणामरसरूपं सिक्तं सेचितं रेतः वीर्यम्, अमृतं सत् ᵛबलाय अस्तु । ᵛविश्वे ᵛदेवाः इत्युपलक्षणम्, सर्वे जनाः । ᵛयत् यस्मात् रेतसः ᵛअभि ᵛसंबभूवुः ᵛतत् रेतसः ᵛमा मां ᵛप्रजया ᵛधनेन संततिरूपधनेन ᵛधिनोतु प्रीणातु ॥१॥

‘ वाज्यहम् ’ इति गायत्री लिङ्गोक्तवाजिदेवत्या । वाजिनस्येति कर्मणि षष्ठी । देवभूतस्य [ᵛउपहूतस्य ?] अनुज्ञातस्य ᵛवाजिनस्य उपहूतं वाजिनम् आमिक्षाशेषरसभूतं वाजिनम्, ᵛउपहूतः अनुज्ञातः ᵛवाजी अन्नवान् ᵛअहं ᵛभक्षयामि । इत उत्तरम्– ᵛवाजे ᵛवाजी ᵛभूयासम् समग्रान्नवान् भवेयमिति यजमानाशीः ॥

सवित्रा प्रसूता दैव्य आप उन्दन्तु ते तनूम् ।
दीर्घायुत्वाय वर्चसे ॥३॥

सवित्रा । प्रसूता इति प्रऽसूताः । दैव्यः । आपः । उन्दन्तु । ते । तनूम् ।
दीर्घायुत्वायेति दीर्घायुऽत्वाय । वर्चसे ॥जो॥३॥

सा–अथ पर्वसमाप्तौ कर्तव्ये वपने मन्त्रविनियोगमाह कात्यायनः –“ अपरेण दक्षिणाग्निं दक्षिणं गोदानमुन्दति सवित्रा प्रसूता इति ” (काश्रौ ५.२.१४) इति । गोदानं शिरसो भागः । पाठस्तु– ‘सवित्रा

---

1. C रक्षतु for रक्षयतु
2. P1 अमृतरूपं for अमृतं
4. P1 om. समुत्पन्नाः; V1 S1 C सत् for तत्; V1 S1 C तद्रेतः for रेतः; S1 C om. पुत्र ... रूपेण
6. P1 om. वाजस्य; P1 किंचिद् for कंचिद्
24. V1 S1 C दक्षिणा for दक्षिणं

प्रसूता दैव्य आप उन्दन्तु ते तनूम् । दीर्घायुत्वाय वर्चसे ' इति । ᵛसवित्रा प्रेरकेण परमेश्वरेण ᵛप्रसूताः प्रेरिताः ᵛदैव्यः दिवि भवा वृष्टेर्जाताः ᵛआपः जलानि ᵛते मुण्डनार्थमवस्थितस्य यजमानस्य तव ᵛतनूं शरीरावयवभूतं शिरः ᵛउन्दन्तु क्लेदयन्तु । उन्दी क्लेदने । किमर्थम् ? ᵛदीर्घायुत्वाय बहुकालजीवनाय, ᵛवर्चसे ब्रह्मतेजोऽभिवृद्धये ॥३॥

आ— ' सवित्रा प्रसूता ' इति । गायत्रं लिङ्गोक्तदेवतम् । ᵛसवित्रा सर्वस्य प्रसवकर्त्रा ᵛप्रसूताः अनुज्ञाताः ᵛदैव्यः दिवि भवाः ᵛआपः जलानि ᵛते मुण्डनार्थं स्थितस्य यजमानस्य तव ᵛतनूम् । अत्र प्रधानत्वेन शिर उपलक्ष्यते । शिरः ᵛउन्दन्तु । उन्दी क्लेदने । क्लेदयन्तु । ᵛदीर्घायुत्वाय चिरकालजीवनाय, ᵛवर्चसे ब्रह्मतेजोऽभिवृद्धये ॥३॥

क॒श्यप॑स्य त्र्यायु॒षं ज॒मद॑ग्नेस्त्र्यायु॒षम् ।
यद्दे॒वानां॑ त्र्यायु॒षं तन्मे॑ अस्तु त्र्यायु॒षम् ॥४॥

क॒श्यप॑स्य । त्र्या॒यु॒षमिति॑ त्रि॒ऽआ॒यु॒षम् ।
ज॒मद॑ग्ने॒रिति॑ ज॒मत्ऽअ॑ग्नेः । त्र्या॒यु॒षमिति॑ त्रि॒ऽआ॒यु॒षम् ।
यत् । दे॒वाना॑म् । त्र्या॒यु॒षमिति॑ त्रि॒ऽआ॒यु॒षम् ।
तत् । मे॒ । अ॒स्तु॒ । त्र्या॒यु॒षमिति॑ त्रि॒ऽआ॒यु॒षम् ॥पा॥४॥

सा-कात्यायनः – त्र्यायुषमिति यजमानो जपति " (काश्रौ ५·२·१६) इति । सोऽयं अपो वपनकालीनः । पाठस्तु–' कश्यपस्य त्र्यायुषं जमदग्नेस्त्र्यायुषम् । यद्देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषम् ' इति । ᵛकश्यपस्य एतन्नामकस्य प्रजापतेः संबन्धि ᵛत्र्यायुषं त्रयाणां बाल्ययौवनस्थविर[त्व]रूपाणाम् आयुषां समाहाररूपम् । तथा ᵛजमदग्नेः एतन्नामकस्य ᵛत्र्यायुषम् । तथा ᵛदेवानाम् इन्द्रादीनां त्र्यायुषम् । यदुक्तेषु पर्यायेषु ᵛयत् त्र्यायुषमस्ति ᵛतत् त्र्यायुषं सर्वं ᵛमे मम यजमानस्य ᵛअस्तु भवतु । कश्यपादीनां बाल्यादिषु यादृशं चरितं तादृशं मम भूयादित्यर्थः ॥४॥

आ— यजमानो जपति—' कश्यपस्य ' इति । नारायणो ऋषिः । लिङ्गोक्तदेवत्योष्णिक् । यजमानाशीर्वा देवता । ᵛकश्यपस्य देवपितुः ᵛयत् ᵛत्र्यायुषम् । त्रीणि आयूंषि बाल्ययौवनस्थाविराणि समाहृतानि त्र्यायुषम् । ᵛतत ᵛमे ᵛअस्तु । ᵛजमदग्नेः ᵛयत् ᵛत्र्यायुषं तन्मे अस्तु । देवानां [यत्] त्र्यायुषं ᵛतत् [मे अस्तु] । [मे] ᵛत्र्यायुषम् ᵛअस्तु इत्येवं यजमानाशीः ॥४॥

---

2. P1 before जाता adds : भवा
3. V1 S1 C om. उन्दी क्लेदने
16. P1 V1 त्रियायुषं for त्र्यायुषं in all places; in this parigraph
19. C S1 V1 अस्तु मम यजमानस्य for मे मम यजमानस्य अस्तु ।

येन धाता बृहस्पतेरिन्द्रस्य चायुषेऽवपत् ।
तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय ॥५॥
दीर्घायुत्वाय बलाय वर्चसे ।
सुप्रजास्त्वाय चासा अथो जीव शरदः शतम् ॥६॥(९)॥

येन । धाता । बृहस्पतेः । इन्द्रस्य । च । आयुषे । अवपत् ।
तेन । ते । वपामि । ब्रह्मणा । जीवातवे । जीवनाय ॥शीं॥५॥
दीर्घायुत्वायेति दीर्घायुऽत्वाय । बलाय । वर्चसे ।
सुप्रजास्त्वायेति सुप्रजाःऽत्वाय । च । असौ ।
अथो इत्यथो । जीव । शरदः । शतम् ॥थं॥६॥ (९) ॥

[समिधाग्निमष्ट ॥८॥ अग्निज्योतिषं त्वा चाष्ट ॥८॥ उपप्रयन्तोऽष्टाविंशतिः ॥२८॥ भूर्भुवः स्वः सप्त ॥७॥ प्रवासिनः पञ्च ॥५॥ पूर्णा दर्वि द्वे ॥२॥ अक्षन्नमीममदन्त षट् ॥६॥ एष ते च षट् ॥६॥ वाजिनां वाजश्च षट् ॥६॥ नवानुवाकेषु षट्सप्ततिः ॥७६॥]

[इति शुक्लयजुर्वेदकाण्वसंहितायां तृतीयोऽध्यायः ॥३॥ हरिः ॐ ॥]

सा– कात्यायनः– "वपति येन धातेति" (द्र॰काश्रौ ५.२.१७) इति । पाठस्तु– 'येन धाता बृहस्पतेरिन्द्रस्य चायुषेऽवपत् । तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय ॥ दीर्घायुत्वाय बलाय वर्चसे । सुप्रजास्त्वाय चासा अथो जीव शरदः शतम्' इति । 'धाता सर्वस्य जगतो विधाता चतुर्मुखो ब्रह्मा, 'बृहस्पतेः 'इन्द्रस्य 'च 'आयुषे आवयोरुभयोरायुर्वृद्ध्यर्थं 'येन यादृशेन मन्त्रात्मकेन क्षुरेण वपनमकरोत्, हे यजमान, 'ते तव 'तेन 'ब्रह्मणा तादृशेन मन्त्रात्मकेन क्षुरेण 'वपामि वपनं करोमि । किमर्थम् ? जीवात्वादिप्रयोजनषट्कसिद्ध्यर्थम् । जीवातुर्जीवनहेतुभूतमन्नादिकमौषधम् । जीवनं प्राणधारणम् । दीर्घायुष्यमायुष्याभिवृद्धिः । बलं शरीरेन्द्रियदार्ढ्यम् । वर्चः शरीरकान्तिः । सुप्रजास्त्वं सदाचारपुत्रादिसमृद्धिः । चकार उक्तप्रयोजनसमुच्चयार्थः । 'अथो उक्तप्रयोजनसंपत्तेरनन्तरम् । 'असौ पुरतो वर्तमानो यजमानस्त्वं 'शतं 'शरदः 'जीव शतसंख्याकान् संवत्सरान् अत्यन्तसंयोगेन जीवनवान् भव ॥६॥

इति तृतीयोऽध्याये नवमोऽनुवाकः ॥(९)॥

---

13. In the printed text °संहिता पाठे for °संहितायां
17. P1 V1 आयु° for आयुर्
19. V1 S1 C om. जीवातुर्; V1 S1 C °भूतमन्त्रादिकम् for °भूतमन्नादिकम्
21. V1 S1 C तु for उक्त°

अथ विनियोगसंग्रहः –

नवानुवाकास्त्वध्याये तृतीयेऽर्थास्तु तेष्वमी ।
आधानमग्निहोत्रं च विस्तरेणाग्न्युपस्थितिः ॥१॥

संग्रहेणापि वरुणप्रघासाः साकमेधकाः ।
पित्रर्थास्त्र्यम्बकाध्याये मन्त्राः सर्वेऽपि वर्णिताः ॥२॥

समिधा समिधो दध्यात् तिसृभिस्तु जपेदुप ।
अग्न्याधानं भूर्भुवः सुवरिध्मा ये(?) द्यौरितीरयेत् ॥३॥

उपतिष्ठत आऽयं गौस्तिसृभिर्वर्णिता स्फुटम् ।
अग्निज्यो समिदाधानमग्निर्ज्यो जुहुयात् तथा ॥४॥

सूर्यज्यो समिदाधानं सूर्यो ज्योतिर्जुहोति हि ।
सजूर्द्वयेन जुहुयात् काम्यहोमास्त्विहाग्नये ॥५॥

अनमित्रमुभौ जप्यौ समीति समिधं क्षिपेत् ।
अनुवाके द्वितीयेऽस्मिन् मन्त्रा एकादशेरिताः ॥६॥

उपस्थानमुपेत्याद्यैस्त्रयोदशभिरीरितम् ।
अन्धेन गां व्रजेत् तां तु रेवतीत्युपतिष्ठते ॥७॥

स हीत्यालभते गार्हपत्यस्यापैति सप्त हि ।
गां व्रजेदिळ एहीति काम्य एहीत्युपस्थितिः ॥८॥

सोमानं नव पूर्वाग्नेश्चतुस्त्रिंशत् समीरिताः ।
संगृह्योपस्थितिर्भूर्भु नर्यं शंस्य द्वयं गताः ॥९॥

आगन्मायमिति द्वाभ्यामागत्याग्नेरुपस्थितिः ।
गृहत्रयाद्गृहान् गत्वा विशेत् क्षेमा नवेरिताः ॥१०॥

प्रघा पत्नीं वाचायेत यद्ग्रा होमः करम्भकः ।
मो षु स्वामी क्ष (ज ?) पेदक्रन् पत्नीं वाचयते ततः ॥११॥

---

2. P1 °वाक्काध्याये for °वाकास्त्वध्याये; P1 अर्थस्तु for अर्थास्तु ।
5. V1 S1 C °त्र्यम्वकार्थाश्च त्र्यम्बकाख्ये विनिर्णिताः for त्र्यम्बकाध्याये ... वर्णिताः ।
6. V1 S1 C दध्ना for दध्यात्
7. P1 °इध्मये for °इध्मा ये
8. V1 S1 C °तिष्ठावत for °तिष्ठत and om. स्फुटम्
11. V1 S1 C °होमी विहाग्नये for °होमास्त्विहाग्नये
12. S1 C सामिति for समीति
15. V1 S1 C om. गां व्रजेत् ... सो° (L. 16)
20. V1 S1 C आगन्मापमिति for आगन्मायमिति
21. V1 S1 C आ त्वा for गत्वा
22. C यद्गा होनकरम्भगः V1 यद्गा होमकरंभगः, S1 यद्गा होतकरंभगः, for यद्गा होमः करम्भकः for यद्ग्रा होमः करम्भकः

अव स्नातो दम्पती द्वौ पञ्च मन्त्रा इहेरिताः ।
पूर्णा दर्विग्रहो देहि जुहोति द्वाविहेरितौ ॥१२॥
अक्षन्-सु समुपस्थानं द्वाभ्यामाहवनीयके
मन आ नः पुनर्गार्हपत्याग्नौ तिसृभिस्तथा ॥१३॥
वयं तु श जपेन्मन्त्राः षडेवात्रोपवर्णिताः ।
एष होमोऽप्येष ते रु शेषमाखूत्करे क्षिपेत् ॥१४॥
अव भेषद्वयं जप्यं त्र्यम्बकमप्रदक्षिणम् ।
कुमारीणां तथा त्र्यम्बशेषभूनेऽत्रबुध्यतु ॥१५॥
एतेनेति सजेत् कृत्ति जलस्पर्शोऽष्ट वर्णिताः ।
वाजिनां शेषभक्षः स्याद्वाजी तत्र विकल्पितः ॥१६॥
सवित्रेति शिरः क्लेद्यं कश्येति स्वामिनो जपः ।
शिरो वपति येनेति पञ्च मन्त्रा इहेरिताः ॥१७॥
वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥१८॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्येण
विरचिते माधवीये काण्ववेदार्थप्रकाशे संहिताभाष्ये तृतीयोऽध्यायः ॥

आ– 'येन धाता' इति, 'दीर्घायुत्वाय' इति [च] लिङ्गोक्तदेवत्ये । आद्यानुष्टुप् उत्तरा गायत्री । यजमानस्य वपनकाले अध्वर्युराशिषः करोति । ^{v}धाता विधाता ब्रह्मणस्पते (तिः ?) । ^{v}जीवातवे, जीव प्राणधारणे, जीवेरातुः (उणादि ५२), जीवयतीति जीवातुः । तस्मै ^{v}जीवातवे । ^{v}इन्द्रस्य यदायुः बहुकालजीवसंपादनाय दीर्घायुत्वेन ^{v}येन यादृशेन बहुरूपेण अवपत् । ^{v}बृहस्पतेः ^{v}इन्द्रस्य ^{v}आयुषे दीर्घायुष्ट्वासिद्ध्यर्थम् ^{v}अवपत् वपनमकरोत् । ^{v}तेन

---

1. C V1 S1 अव स्थातो for अव स्नातो
2. CV1 हविर्ग्रहो, S1 हविग्रहे for दर्विग्रहो
4. CV1 S1 ब्रह्मपत्न्याग्नौ for गार्हपत्याग्नौ
6. P1 होमो येष ते रुद्र for होमोऽप्येष ते रु
7. P1 °भेषज° for भेष°; V1 S1 C त्र्यम्बकेन प्रदक्षिणम् for त्र्यम्बकमप्रदक्षिणम्
9. P1 एतैनेति for एतेनेति; P1 सजून्, V1 S1 C सदेत् for सजेत्; P1 स्पर्शेषु for स्पर्शोऽष्ट; C S1 °स्पर्शे for स्पर्शो
10. V1 S1 C om. वाजिनां ... इहेरिताः (L. 12)
14. P1 °महेश्वरम् for °महेश्वरः
16. P1 om. °वेदार्थप्रकाशे

▼ब्रह्मणा ब्रह्मरूपेण ᵛते ᵛवपामि वपनं करोमि। ▼जीवनाय दीर्घायुत्वाय, ᵛबलाय ▼वर्चसे ▼सुप्रजास्त्वाय शोभनप्रजासमृद्धये। ▼अथ ᵛशरदः ▼शतम् अतिबहुकालम्, ▼असौ त्वं ▼जीव, इत्यध्वर्युराशीः करोति ॥५-६॥ (९)॥

इति परमहंसपरिव्राजकाचार्यश्रीवासुदेवपरिपूज्य-परमकारुण्यासादितश्रीकृष्णभक्तिसाम्राज्यस्य
श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदि-श्रीमदानन्दबोधभट्टोपाध्यायेन
विरचिते काण्ववेदमन्त्रभाष्यसंग्रहे तृतीयोऽध्यायः ॥

---

3. H1 °प्रज्ना° for °प्रजा°
6. H1 °भाष्ये for °भाष्य°

[अथ चतुर्थोऽध्यायः]

[प्रथमोऽनुवाकः ।]

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

तृतीयेऽध्याये आधानाग्निहोत्राग्न्युपस्थानचातुर्मास्यमन्त्रा उक्ताः । अथ चतुर्थमारभ्य नवमान्तेषु षट्सु अध्यायेषु सोमयागमन्त्रा उच्यन्ते । तत्रास्मिंश्चतुर्थेऽध्याये सोमक्रयमन्त्राः प्राधान्येनोच्यन्ते । आदौ तावद् यजमानसंस्कारार्थं वपनमन्त्रा उच्यन्ते । स च यजमानः षोडशानाम् ऋत्विजां वरणं कृत्वा प्राचीनशालां गन्तुम् अरण्योरग्निं समारोप्य तत्र गच्छेत् ॥

एदमगन्म देवयजनं पृथिव्या यत्र देवासो अजुषन्त विश्वे ।
ऋक्सामाभ्यां संतरन्तो यजुर्भी रायस्पोषेण समिषा मदेम ॥१॥

आ । इदम् । अगन्म । देवयजनमिति देवऽयजनम् । पृथिव्याः ।
यत्र । देवासः । अजुषन्त । विश्वे ।
ऋक्सामाभ्यामित्यृक्ऽसामाभ्याम् । संतरन्त इति संऽतरन्तः । यजुर्भिरिति यजुःऽभिः ।
रायः । पोषेण । सम् । इषा । मदेम ॥ त्रैं ॥१॥

कात्यायनः –"प्राचीनशालास्तम्भे पूर्वार्ध्यं गृहीत्वाऽरणिपाणिराहेदमगन्म" (द्र. काश्रौ ७·१·३६) इति । आपस्तम्बोऽप्याह– "एदमगन्म देवयजनं पृथिव्या इति देवयजनमध्यवस्यति । प्राग्वंशस्य मध्यमं स्थूणाराजमारभ्य जपतीति वाजसनेयकम्" (आपश्रौ १०·३·३-४) इति । पाठस्तु– 'एदमगन्म देवयजनं पृथिव्या यत्र देवासो अजुषन्त विश्वे । ऋक्सामाभ्यां संतरन्तो यजुर्भी रायस्पोषेण समिषा मदेम' इति । देवा इज्यन्ते यस्मिन् स्थाने तत् देवयजनम् । तत्र पृथिव्याः संबन्धि, इदम् इति हस्तेनाभिनीय प्रदर्श्यते । तदिदं देवयजनम् आऽगन्म यष्टुकामा आगताः स्मः । यत्र यस्मिन् देवयजने विश्वे देवासः सर्वे देवाः अजुषन्त प्रीतियुक्ताः स्थिताः । यत्र अजुषन्त इदं देवयजनमित्यन्वयः । ऋक्सामाभ्यां यजुर्भिः वेदत्रयगतैर्मन्त्रैः संतरन्तः समुद्रवन्महान्तं सोमयागं समुत्तरन्तः सम्यगुत्तरन्तः समापयन्तो वयं रायः पोषेण धनपुष्ट्या इषा इष्यमाणेनान्नेन च संमदेम हर्षं सम्यक् प्राप्नुयाम । देवयजनाख्यस्य स्थानस्य स्वर्गसंबन्धित्वं न भवति । किंतु पृथिवीसंबन्धित्वम् । एतस्यार्थस्य प्रसिद्धत्वं

---

3. S1 before यस्य adds : गजाननाय नमः, P1 ॐ
15. V1 S1 C °स्तम्भं for °स्तम्भे
16. P1 with marking above आप° ins. on the margin :– कण्वस्तु– पूर्वार्द्धे शाला स्थूणा भवति । तामभिपद्य जपत्येदमगन्मेत्यादि ।
17. V1 S1 C om. एदम् ... पाठस्तु (L. 4)
22. P1 om. सम्यगुत्तरन्तः
23. V1 S1 C om. इषा
24. V1 S1 C om. न

तित्तिरिर्दर्शयति– " एदमगन्म देवयजनं पृथिव्या इत्याह देवयजनꣳ ह्येष पृथिव्या आगच्छति " (तैसं ३-१-१) इति । अस्मिन् मन्त्रे देवशब्देन षोडशर्त्विजो ब्राह्मणा विवक्षिता इत्येतदपि स एव दर्शयति– " विश्वे ह्येतद्देवा जोषयन्ते ब्राह्मणाः " इति ॥१॥

आ– ' एदमगन्म ' इति । अग्निष्टोमादिका मन्त्राः अवभृथपर्यन्ताः । प्रजापतेरार्षम् । शालास्तम्भान्वारम्भे यजमानो जपति ' एदम् ' इति । आद्या देवयजमानदेवत्या जगती । ^{V}आ ^{V}इदं ^{V}देवयजनम् । लक्षणलक्षितत्वेन प्रतीयमानं ^{V}पृथिव्याः संबन्ध्येव देवयजनम् । यज देवपूजासंगतिकरणदानेषु । देवाः यत्र य (? इ)ज्यन्ते तद् देवयजनम् । वयम् ^{V}आऽगन्म आगताः स्मः । ^{V}यत्र यस्मिन् देवयजने ^{V}देवासः ^{V}विश्वे सर्वे देवाः इष्टाः सन्तः ^{V}अजुषन्त । जुषी प्रीतिसेवनयोः । स्वकामान् सेवितवन्तः । अतस्तद्देवयजनमागताः । ^{V}ऋक्सामाभ्यां प्लवभूताभ्यां ^{V}यजुर्भिः च यज्ञसमुद्रं ^{V}संतरन्तः ^{V}रायः ^{V}पोषेण यज्ञसाधनभूतेन धनस्य पोषेण पुष्ट्या ^{V}इषा अन्नेन ^{V}संमदेम संहृष्येमहि तुष्येमहि च ॥१॥

इमा आपः शमु मे सन्तु देवीरोषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः ।
आपो अस्मान् मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ॥२॥
विश्वꣳ हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूत एमि ।
दीक्षातपसोस्तनूरसि तां त्वा शिवाꣳ शग्मां परि दधे
भद्रं वर्णं पुष्यन् ॥३॥ (१)॥

इमाः । आपः । शम् । ऊँ इत्यूꣳ । मे । सन्तु । देवीः ।
ओषधे । त्रायस्व । स्वधित इति स्वऽधिते । मा । एनम् । हिꣳसीः ।
आपः । अस्मान् । मातरः । शुन्धयन्तु ।
घृतेन । नः । घृतप्व इति घृतऽप्वः । पुनन्तु ॥ ङ्याः ॥२॥
विश्वम् । हि । रिप्रम् । प्रवहन्तीति प्रऽवहन्ति । देवीः ।
उत् । इत् । आभ्यः । शुचिः । आ । पूतः । एमि ।
दीक्षातपसोः । तनूः । असि । ताम् । त्वा । शिवाम् । शग्माम् । परि । दधे ।
भद्रम् । वर्णम् । पुष्यन् ॥ क्न्युः ॥ ३ ॥ (१) ॥

सा– कात्यायनः – " प्रथमम् । दक्षिणं गोदानं विदानं विदार्योनत्तीमा आप इति " (काश्रौ ७-२-८-९) इति । शिरसो दक्षिणभागगतान् केशान् विभक्तान् क्लेदयेदित्यर्थः । पाठस्तु– ' इमा आपः शमु

---

26. S1 C °भागमात्रान् for भागगतान्

मे सन्तु देवीः ’ इति । देव्यः द्योतमाना निर्मलाः ᵛइमाः ᵛआपः शिरःक्लेदनाय सिच्यमाना एता आपो मम यजमानस्य ᵛशम् ᵛउ ᵛसन्तु सुखकारिण्य एव भवन्तु ॥

कात्यायनः – “यूपवत् कुशतरुणम् । क्षुरेण चान्तर्निधाय छित्वा” (काश्रौ ७·२·१०-१२) इति । यथा पश्वर्थस्य यूपस्य छेदनाय ‘ओषधे’ इति मन्त्रेण छिन्द्यात् । एवमत्रापि तृणान्तर्धानं क्षुरस्थापनं च मन्त्रद्वयेन कर्तव्यमित्यर्थः । आपस्तम्बोऽप्याह– “ओषधे त्रायस्वैनमिति प्रागग्रं दर्भमन्तर्धाय स्वधिते मैनꣳ हिꣳसीरिति स्वधितिनाऽभिनिधाय” (द्र. आपश्रौ७·२·४)इति । [पाठस्तु– ‘ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः ’ इति] । हे ᵛओषधे कुश, ᵛएनं यजमानं ᵛत्रायस्व क्षुरात् रक्षस्व । हे स्वधिते क्षुर, ᵛएनं यजमानं ᵛमा ᵛहिंसीः मा बाधस्व ॥

कात्यायनः – “ आपोऽस्मानिति स्नात्वा ” (काश्रौ ७·२·१५) इति । पाठस्तु– ‘आपो अस्मान् मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्वं हि रिप्रं प्रवहन्ति देवीः ’ इति । ᵛमातरः मातृवत् पालयित्र्यः एताः हि ᵛआपः ᵛअस्मान् कृतक्षौरान् यजमानान् ᵛशुन्धयन्तु शोधयन्तु । क्षौरकर्मनिर्मितामपहतिं निवारयन्तु । घृतेन क्षरणोपेतेन जलेन पुनन्तीति ᵛघृतप्वः जलदेवतास्ताश्च ᵛनः अस्मान् ᵛघृतेन क्षरणयुक्तेन जलेन ᵛपुनन्तु शुद्धान् कुर्वन्तु । ᵛदेवीः द्योतमाना आपः ᵛविश्वं ᵛहि ᵛरिप्रं सर्वमपि पापम् अस्मद्यजमानेभ्यः ᵛप्रवहन्तु प्रकर्षेणापनयन्तु ॥

कात्यायनः – “ उदिदाभ्य इत्युत्क्रामति ” (काश्रौ ७·२·१५) इति । ‘ शुचिरा पूत एमि ’ इति मन्त्रशेषः । ᵛशुचिः ᵛपूतः इति शब्दद्वयेन स्नानाचमनाभ्यां बहिरन्तश्च शुद्धिद्वयमभिधीयते । इच्छब्दः समुच्चयार्थः। तथाविधः सन्नहम् आभ्यः उत्पद्य उद्गम्य ᵛएमि भूमिमागच्छामि ॥

कात्यायनः –“ क्षौमं वस्ते...दीक्षातपसोरिति ” (काश्रौ ७·२·१६-१९) इति । दुकूलवस्त्रमाच्छादयतीत्यर्थः । पाठस्तु– ‘ दीक्षातपसोस्तनूरसि तां त्वा शिवाꣳ शग्मां परि दधे भद्रं वर्णं पुष्यन् ’ इति । हे क्षौमवस्त्र, त्वं दीक्षातपसोस्तनूरसि । दीक्षाभिमानिदेवतायास्तपोभिमानिदेवतायाश्च शरीरवत् प्रियस्वरूपम् ᵛअसि । ᵛशिवां शग्मां द्वयोरपि शब्दयोः सुखनामत्वात् अत्यन्तंसुखरूपत्वमित्युक्तं भवति । हे देवताद्वयतनो ᵛतां त्वा तथाविधसुखकरीं त्वां ᵛपरिदधे । यजमानोऽहं परितो धारयामि । किं कुर्वन् ? ᵛभद्रं ᵛवर्णं ᵛपुष्यन् । अनेन वस्त्रधारणेन शरीरे कल्याणं वर्णविशेषं पोषयन् ॥२–३॥

इति चतुर्थाध्याये प्रथमोऽनुवाकः ॥१॥

आ – ‘ इमा आपः ’ इति यजूंषि लिङ्गोक्तदेवत्यानि । बहुमन्त्रपक्षे एकखण्डिकाभिप्रायेण लिङ्गोक्तदेवत्या त्रिष्टुप् । ᵛशम् इति सुखनाम । ᵛउ इति पादपूरणः । इमाः ᵛशं सुखात्मिकाः [देवीः] देव्यः देवनादिगुणयुक्ताः ᵛआपः ᵛमे मम ᵛसन्तु । ‘ ओषधे त्रायस्व ’ इति कुशतरुणदेवत्यः । कुशतरुणमन्तर्दधाति – ‘ ओषधे त्रायस्व ’ इति । हे ᵛओषधे, ᵛएनं यजमानं त्रायस्व । त्रैङ् पालने, पालयस्व क्षुरात् । ᵛस्वधिते इति क्षुरेणाभिनिदधाति । क्षुरदेवत्यः । स्वधितिरिति वज्रनाम । अवज्रस्यापि क्षुरस्य वज्रनाम्ना स्तुतिः । हे ᵛस्वधिते हे क्षुर, ᵛएनं यजमानं ᵛमा ᵛहिंसीः ॥

---

4. V1 S1 C om. यूपस्य
5. C V1 S1 om. ओषधे ... अभिनिधायेति (L.)
11. V1 S1 C पुनन्तु for शोधयन्तु
12. P1 om. जलेन

स्नाति– ‘ आपो अस्मान् .... विश्वꣳ हि ’ इति । अब्देवत्ये द्वे । याः ᵛमातरः जगतो निर्मात्र्यः ᵛआपः ताः ᵛअस्मान् शुन्धयन्तु । ᵛशुधि शुद्धौ । शोधयन्तु । किं च घृतप्वः पुनन्तु इति । घृतेन पुनन्तीति ᵛघृतप्वः । घृतं ह्यपां परमं रसरूपं तेजः । याः घृतप्वस्ताः ᵛनः अस्मान् ᵛपुनन्तु ॥

‘ विश्वं हि ’ इति एकखण्डिकाऽभिप्रायेण लिङ्गोक्तदेवत्या जगती । ᵛरिप्रम् इति पावननाम । ᵛदेवीः देव्यः ᵛआपः विश्वं सर्वं ᵛरिप्रं पावनरूपं प्रकर्षेण वहन्ति । अतः ᵛउत् ᵛइत् ᵛआभ्यः पावनकीर्तिभ्यः अद्भ्यः ᵛशुचिः ᵛपूतः इत् अपि पूर्वपूतोऽपि आभ्यः आसमन्तात् ᵛपूतः ᵛउदेमि उद्गच्छामि, पाप्मभ्य इति शेषः ॥

क्षौमं वासः परिधत्ते– ‘ दीक्षातपसोः ’ इति । वासोदेवत्यम् । दीक्षातपसोः । दीक्षा एव दीक्षा । तपःशब्देनात्र उपसद उच्यन्ते, तपःप्रधानत्वात् । तनूशब्देन वासोऽभिधानम् । ‘ दीक्षातपसोस्तनूरसि ’ । ᵛशिवां ᵛशग्मां द्वे अपि सुखनामनी । नानाविधसुखहेतुभूतां ᵛतां तनूं ᵛपरि ᵛदधे परिधानं करोति । किं कुर्वन् ? अस्या वर्णरूपं ᵛभद्रं कल्याणं ᵛपुष्यन् रूपपोषणं कुर्वन् ॥२-३॥(१)॥

[इति प्रथमोऽनुवाकः ।]

[अथ द्वितीयोऽनुवाकः]

सा– प्रथमे यजमानस्य वपनमन्त्रा उक्ताः । द्वितीये अभ्यञ्जनादिसंस्कारमन्त्रा उच्यन्ते ।

म॒हीनां॒ पयो॑ऽसि वर्चो॒दा अ॑सि॒ वर्चो॑ मे देहि ।
वृ॒त्रस्य॑ क॒नीन॑काऽसि चक्षु॒र्दा अ॑सि॒ चक्षु॑र्मे देहि ॥१॥

म॒हीना॑म् । पय॑ः । अ॒सि॒ । व॒र्चो॒दा इति॑ व॒र्चः॒ऽदाः । अ॒सि॒ । वर्च॑ः । मे॒ । दे॒हि॒ ।
वृ॒त्रस्य॑ । क॒नीन॑का । अ॒सि॒ ।
च॒क्षु॒र्दा इति॑ च॒क्षुः॒ऽदाः । अ॒सि॒ । चक्षु॑ः । मे॒ । दे॒हि॒ ॥ छें ॥१॥

कात्यायनः –“ शालां पूर्वेण तिष्ठन्नभ्यङ्क्ते । कुशेषु नवनीतेन शीर्ष्णोऽध्यनुलोमꣳ सपादको महीनां पयोऽसीति ”. (काश्रौ ७·२·३३) इति । प्राचीनशालायाः पूर्वभागे स्थित्वा कुशेषु लग्नं नवनीतं गृहीत्वा शिर आरभ्य पादान्तस्य शरीरस्य अभ्यङ्गं कुर्यात् । पाठस्तु– ‘ महीनां पयोऽसि वर्चोदा असि वर्चो मे देहि ’ इति । हे नवनीत, त्वं ᵛमहीनां गवाम् । महीशब्दो गोनामसु पठितः (निघण्टु २·११) । ᵛपयः

---

16. V1 S1 C अञ्जनादि for अञ्जभ्यनादि
25. P1 with marking above पठितः ins. on the margin : मह्यो वा एता गाव इति श्रुतेः ।

ᵛअसि । क्षीरजन्यत्वात् पयस्त्वोपचारः ᵛवर्चोदाः ᵛअसि स्निग्धत्वेन कान्तिप्रदः असि । अतः ᵛमे मह्यं यजमानाय ᵛवर्चः ᵛदेहि कान्तिं प्रयच्छ ॥

कात्यायनः – "वृत्रस्येत्यक्षिणी अनक्ति त्रैककुदाञ्जनेनाभावेऽन्यत्" (द्र. काश्रौ ७·२·३४) इति । त्रिककुत्पर्वतादुत्पन्नं लभ्यते चेत्, तेनाक्षिद्वयमञ्ज्यात् । तदभावेऽन्यदप्यञ्जनमस्तु । पाठस्तु– 'वृत्रस्य कनीनकाऽसि चक्षुर्दा असि चक्षुर्मे देहि' इति । हे अञ्जन, त्वं ᵛवृत्रस्य वृत्रनामकस्य ᵛकनीनका ᵛअसि नेत्रमध्यगतकृष्णमण्डलरूपाऽसि । तदेवाह तित्तिरिः – "इन्द्रो वृत्रमहन् तस्य कनीनिका पराऽपतत् तदाञ्जनमभवत्" (तैसं ६·१·१) इति । ᵛचक्षुर्दाः ᵛअसि । कनीनकारूपत्वात् दृष्टिप्रदत्वमुपपन्नम् । अतः ᵛमे मह्यं ᵛचक्षुः ᵛदेहि दृष्टिपाटवं प्रयच्छ ॥१॥

आ– 'महीनां पयः' इति नवनीतदेवत्यम् । ᵛमहीनां गवां ᵛपयः ᵛअसि । पयःशब्दः तत्कार्यकार्ये नवनीते वक्ष्यते । नवनीतोऽसि । यतस्त्वं स्वतः ᵛवर्चोदाः ᵛअसि अतः ᵛवर्चः तेजः ᵛमे ᵛदेहि ॥

अक्षिणी अनक्ति 'वृत्रस्य' इति । अञ्जनदेवत्यम् । ᵛवृत्रस्य ᵛकनीनका ᵛअसि इति वृत्रसंबन्धिनि अक्षिणि तारका कृष्णा तेनावस्थिताऽसि । स्वभावतः ᵛचक्षुर्दाः ᵛअसि । अतः ᵛचक्षुः ᵛमे ᵛदेहि ॥१॥

चि॒त्पति॑र्मा पुनातु वा॒क्पति॑र्मा पुनातु
दे॒वो मा॑ सवि॒ता पु॑ना॒त्वच्छि॑द्रेण प॒वित्रे॑ण॒ सूर्य॑स्य र॒श्मिभिः॑ ।
तस्य॑ ते पवित्रपते प॒वित्र॑पूतस्य॒ यत्का॑मः पु॒ने तच्छ॑केयम् ॥२॥

चि॒त्प॒ति॒रिति॑ चि॒त्ऽप॑तिः । मा॒ । पु॒ना॒तु॒ । वा॒क्प॒ति॒रिति॑ वा॒क्ऽप॑तिः । मा॒ । पु॒ना॒तु॒ ।
दे॒वः । मा॒ । स॒वि॒ता । पु॒ना॒तु॒ । अच्छि॑द्रेण । प॒वित्रे॑ण । सूर्य॑स्य । र॒श्मिभि॒रिति॑ र॒श्मिऽभिः॑ ।
तस्य॑ । ते॒ । प॒वि॒त्र॒प॒त॒ इति॑ पवित्रऽपते ।
प॒वित्र॑पू॒त॒स्येति॑ प॒वित्र॑ऽपूतस्य । यत्का॑म॒ इ॒ति॒ यत्ऽका॑मः । पु॒ने । तत् । श॒के॒य॒म् ॥ र्डिं ॥२॥

सा– कात्यायनः – "कुशपवित्रैश्चित्पतिर्मेति पावयति सप्तभिः सप्तभिः प्रतिमन्त्रमच्छिद्रेणेति" (काश्रौ ७·३·१) इति । शेषोऽनुषज्यते । प्रतिमन्त्रं पृथक् सप्तभिः सप्तभिः कुशैः शोधके क्रियमाणे मिलित्वा कुशपवित्राण्येकविंशतिः संपद्यन्ते । एतदेवाभिप्रेत्य तित्तिरिराह– "एकविंशत्या पवयति दश

---

1. P1 V1 °प्रदस्तम् for °प्रदोऽसि
5. P1 with marking above second कनीनका ins. on the margin :– तारकाक्ष्णः कनीनिकेत्यमरः ।
8. P1 Trans. देहि after °पाटवं° ।

हस्त्या अङ्गुलयो दश पद्या आत्मैकविंशो यावानेव पुरुषस्तमपरिवर्गं पवयति ” (तैसं ६·१·१) इति। पाठस्तु– ‘ चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ’ इति। चिच्छब्दो ज्ञानवाची। चितां ज्ञानानां पतिः चित्पतिः मनोऽभिमानी देवः। “ मनो वै चित्पतिः ” (तैसं ६·१·१) इति तित्तिरिणोक्तत्वात्। यद्वा– “ प्रजापतिर्वै चित्पतिः ” (काशब्रा ४·१·३·१५) इति श्रुतेः स वा भवतु। शुद्धिहेतुर्वायुश्छिद्ररहितत्वादच्छिद्रं पवित्रम्। अथवाऽऽदित्यमण्डलम्। “ असौ वा आदित्योऽच्छिद्रं पवित्रम् ” (तैब्रा ३·२·५) इति श्रुतेः। तेन ^{v}पवित्रेण सूर्यसंबन्धिरश्मिभिः च मां यजमानं ^{v}चित्पतिः ^{v}पुनातु शुद्धं करोतु। हे ^{v}पवित्रपते शुद्धिपालक, ^{v}ते तव अनुग्रहात् ^{v}पवित्रपूतस्य पूर्वेण पवित्रेण शुद्धस्यैतस्य यजमानस्याभीष्टं भूयादिति शेषः। तदेवाभीष्टं स्पष्टीक्रियते– ^{v}यत्कामः यस्मिन् यस्मिन्ननुष्ठाने कामवानहं पुनः शुद्धो भवामि ^{v}तत् ^{v}शकेयं तदनुष्ठानं कर्तुं शक्तो भूयासम्। ^{v}वाक्पतिः बृहस्पतिः ^{v}सविता ^{v}देवः अन्तर्यामी। एतदपि मन्त्रद्वयं पूर्ववद्योज्यम् ॥२॥

आ– कुशपवित्रेण पावयति– ‘ चित्पतिः ’ इति। द्वे प्राजापत्ये। ^{v}चित्पतिः प्रजापतिः, ^{v}मा ^{v}पुनातु। ^{v}तस्य ^{v}पवित्रपूतस्य सतो मम ^{v}ते तव प्रसवे वर्तमानस्य हे ^{v}पवित्रपते देव सवितः, एतद् भवतु। किमेतदिति तदाह– ‘ यत्कामः पुने तच्छकेयम् ’ इति। यः कामो यस्य स ^{v}यत्कामः अहं ^{v}पुने आत्मानं पावयामीति ते ^{v}शकेयं शक्नुयामः ॥२॥

आ वो देवास ईमहे वामं प्रयत्यध्वरे।
आ वो देवास आशिषो यज्ञियासो हवामहे ॥३॥

आ। वः। देवासः। ईमहे। वामम्। प्रयतीति प्रऽयति। अध्वरे।
आ। वः। देवासः। आशिष इत्याऽशिषः। यज्ञियासः। हवामहे ॥ त्रीं ॥३॥

सा– कात्यायनः – “ आ वो देवास इति वाचयति ” (काश्रौ ७·३·६) इति। अध्वर्युर्यजमानं वाचयेत्। पाठस्तु– ‘ आ वो देवास ईमहे वामं प्रयत्यध्वरे। आ वो देवास आशिषो यज्ञियासो हवामहे ’ इति। हे ^{v}देवासः देवाः, ^{v}अध्वरे अस्मदीये यज्ञे ^{v}वामं ^{v}प्रयति वननीयं संभजनीयमनुष्ठानं प्राप्नुवति सति तदीयं संभावितं फलं ^{v}वः युष्मान् ^{v}आ ^{v}ईमहे साकल्येन याचामहे। किं च हे ^{v}देवासः देवाः ^{v}यज्ञियासः, आशिषः यज्ञसंबन्धीनि फलानि ^{v}आ समानेतुं ^{v}वः युष्मान् ^{v}हवामहे आह्वयामः ॥३॥

आ– ‘ आ वो देवासः ’ इति वाचयति। अनुष्टुप्, आशीर्देवता। हे ^{v}देवासः देवाः ^{v}वः युष्मान् ^{v}आ ^{v}ईमहे। ईमहे इति याच्ञाकर्मसु पठितम् (निघण्टु ३·१९)। आयाचामहे।

---

1. P1 हस्ताङ्गुल्यो for हस्त्या अङ्गुलयो; P1 पुरुषममुं for पुरुषस्तममुं
3. V1 S1 C om. चितां
22. P1 om. देवाः
25. H1 आशि for आशीर्

किमिति ? ᵛअध्वरे यज्ञे ᵛवामं वननीयं संभजनीयं वस्तु यत् ᵛप्रयंति गच्छाति तत् ईमहे इति । ᵛदेवासः ᵛयज्ञियासः यज्ञसंपादिन्यः ᵛवः युष्मत्संबन्धिन्यः याः ᵛआशिषः ताः ᵛआ ᵛहवामहे आह्वयामः ॥३॥

स्वाहा॑ य॒ज्ञं मन॑स॒ः स्वाहो॒रोर॒न्तरि॑क्षात् ।
स्वाहा॒ द्यावा॑पृथि॒वीभ्या॒ꣳ स्वाहा॒ वाता॒दार॑भे ॥४॥(२)॥

स्वाहा॑ । य॒ज्ञम् । मन॑सः । उ॒रोः । अ॒न्तरि॑क्षात् ।
द्यावा॑पृथि॒वीभ्या॑म् । वाता॑त् । आ । र॒भे ॥ षौ ॥४॥

सा– कात्यायनः – “ स्वाहा यज्ञमित्यङ्गुली अञ्चते नानाहस्तयोरेवꣳ शेषं प्रतिमन्त्रमुत्तमेन मुष्टीकृत्वा ” (काश्रौ ७.३.७-९) इति । हस्तयोर्द्वयोर्यदेतत् कनिष्ठिकाङ्गुलिद्वयं तत्प्रथममन्त्रेण यथा प्रसृतं न भवति तथा संकोचयेत् । एवमुत्तरैर्मन्त्रैर्भाविनोऽङ्गुलिद्वयस्य संकोचो द्रष्टव्यः । ‘ द्यावापृथिवीभ्याम् ’ इत्येतत् पदं यथा मन्त्रद्वयं भवति तथा विच्छेदनीयम् । ततश्चत्वारो मन्त्राः संपद्यन्ते । ‘ स्वाहा यज्ञं वातात् ’ इत्युत्तमेन मन्त्रेण मुष्टिद्वयं कुर्यात् । तदेतत् सर्वमापस्तम्बो विस्पष्टयति– “ स्वाहा यज्ञं मनस इति द्वे । स्वाहा दिव इति द्वे । स्वाहा पृथिव्या इति द्वे । स्वाहोरोरन्तरिक्षादिति द्वे । स्वाहा यज्ञं वातादारभ इति मुष्टीकरोति ” (आपश्रौ १०.११.४) इति । अत्रत्यः पाठस्तु– ‘ स्वाहा यज्ञं मनसः स्वाहोरोरन्तरिक्षात् । स्वाहा द्यावापृथिवीभ्याꣳ स्वाहा वातादारभे ’ इति । मनःशब्दः तैत्तिरीये तृतीयान्तः । अत्र तु पञ्चम्यन्तः । स्वाहाशब्दस्य निपातत्वेन बह्वर्थवाचित्वात् तत्र तत्र उचिता अर्था ब्राह्मणानुसारेणोपलक्षणीयाः । ते चात्र लक्ष्यन्ते । ᵛमनसः ᵛयज्ञं ᵛस्वाहा चित्तेन यज्ञमभिगच्छामीत्यर्थः । ᵛउरोः ᵛअन्तरिक्षात् ᵛस्वाहा, विस्तीर्णे अन्तरिक्षे यज्ञ आश्रितः । ᵛद्यावापृथिवीभ्यां ᵛस्वाहा, द्यावापृथिव्योर्यज्ञ आश्रितः । ᵛवातात् ᵛस्वाहा ᵛआरभे वायुप्रसादात् प्रवर्तनीयमिदं कर्म प्रारब्धं करोमि । सोऽयमुपलक्षितः सर्वोऽर्थस्तित्तिरिणा स्पष्टमुदाहृतः – “ स्वाहा यज्ञं मनसेत्याह मनसा हि पुरुषो यज्ञमभिगच्छति स्वाहा द्यावापृथिवीभ्यामित्याह द्यावापृथिव्योर्हि यज्ञः स्वाहोरोरन्तरिक्षादित्याहान्तरिक्षे हि यज्ञः स्वाहा यज्ञं वातादारभ इत्याहायं वाव यः पवते स यज्ञस्तमेव साक्षादा रभते मुष्टीकरोति वाचं यच्छति यज्ञस्य धृत्यै ” (तैसं ६.१.४) इति । वातस्य क्रियाहेतुत्वात् यज्ञरूपत्वम् ॥४॥

इति चतुर्थेऽध्याये द्वितीयोऽनुवाकः ॥२॥

आ – ‘ स्वाहा यज्ञम् ’ इत्यादीनां चतुर्णां यजुषां यज्ञो देवता । ᵛमनसः सकाशात् अहं ᵛयज्ञम् ᵛआरभे । ᵛस्वाहा ᵛवातात् आरभे वातात् सकाशात् अहं यज्ञमारभे । ᵛस्वाहा सुहुतमस्तु ॥४॥

[इति द्वितीयोऽनुवाकः]

---

14. P1 अत्रत्य° for अत्रत्यः
16. V1 S1 C तैत्तिरीयके for तैत्तिरीये
18. V1 S1 C om. इत्यर्थः
19. P1 आश्रितत्वात् for आश्रितः
21. P1 Trans. पुरुषः after °गच्छति

[तृतीयोऽनुवाकः]

सा– द्वितीयेऽभ्यञ्जनादिसंस्कारमन्त्रा उक्ताः । तृतीये त्वौद्भ्रमणहोममन्त्रा उच्यन्ते ।

आकू॑त्यै प्र॒युजे॒ऽग्नये॒ स्वाहा॑ मे॒धायै॒ मन॑से॒ऽग्नये॒ स्वाहा॑
दी॒क्षायै॒ तप॑से॒ऽग्नये॒ स्वाहा॒ सर॑स्वत्यै पू॒ष्णे॒ऽग्नये॒ स्वाहा॑ ॥
आपो॑ देवीर्बृहतीर्वि॑श्वशं॑भुवो॒ द्यावा॑पृथिवी॒ उर्व॑न्तरिक्ष ।
बृह॒स्पत॑ये ह॒विषा॑ विधेम॒ स्वाहा॑ ॥१॥

आकू॑त्या॒ इत्याऽकू॑त्यै । प्र॒युज॒ इति॑ प्र॒ऽयुजे॑ । अ॒ग्नये॑ । स्वाहा॑ ।
मे॒धायै॑ । मन॑से । [अ॒ग्नये॑ । स्वाहा॑ ।]
दी॒क्षायै॑ । तप॑से । [अ॒ग्नये॑ स्वाहा॑ ।] सर॑स्वत्यै । पू॒ष्णे । अ॒ग्नये॑ । स्वाहा॑ ।
आप॑ः । दे॒वीः॒ । बृ॒ह॒तीः॒ । वि॒श्व॒शं॒भु॒व॒ इति॑ विश्वऽशं॑भुवः ।
द्यावा॑पृथि॒वी इ॒ति द्यावा॑ऽपृथिवी । उरु॑ । अ॒न्त॒रि॒क्ष॒ ।
बृ॒ह॒स्पत॑ये । ह॒विषा॑ । वि॒धे॒म॒ । स्वाहा॑ ॥धीः॥१॥

कात्यायनः – "औद्भ्रमणानि जुहोति स्थाल्याः स्रुवेणाकूत्या इति प्रतिमन्त्रम्" (काश्रौ ७·२·१६) इति । तत्र प्रथममन्त्रपाठस्तु– 'आकूत्यै प्रयुजेऽग्नये स्वाहा' इति । यज्ञं करिष्यामीत्येवंविधो मानसः संकल्प आकूतिः । तस्यै ˇआकूत्यै तत्संपूर्त्यर्थं ˇप्रयुजे निर्विघ्नेन मां प्रेरयते ˇअग्नये वह्निदेवाय ˇस्वाहा इदं हुतमस्तु ॥

द्वितीयमन्त्रपाठस्तु– 'मेधायै मनसेऽग्नये स्वाहा' इति । श्रुतयोर्मन्त्रतन्त्रयोर्धारणाशक्तिर्मेधा । तत्सिद्ध्यर्थं ˇमनसे मदीयमनोऽभिमानिने ˇअग्नये हुतमस्तु ॥

तृतीयमन्त्रपाठस्तु– 'दीक्षायै तपसेऽग्नये स्वाहा' इति । व्रतनियमो दीक्षा । तत्सिद्ध्यर्थं मदीयशारीरतपोऽभिमानिने ˇअग्नये हुतमस्तु ॥

चतुर्थमन्त्रपाठस्तु– 'सरस्वत्यै पूष्णेऽग्नये स्वाहा' इति । मन्त्रोच्चारणशक्तिः सरस्वती, तत्सिद्ध्यर्थं वागिन्द्रियपोषकाय वह्नये हुतमस्तु ॥

पञ्चममन्त्रपाठस्तु– 'आपो देवीर्बृहतीर्विश्वशंभुवो द्यावापृथिवी उर्वन्तरिक्ष । बृहस्पतये हविषा विधेम स्वाहा' इति । हे ˇआपः, यूयं ये च ˇद्यावापृथिवी द्यावापृथिव्यौ यच्च ˇउरु विस्तीर्णम् ˇअन्तरिक्षम् । तेषामबादीनां सर्वेषां देवानामनुग्रहादिति शेषः । ˇबृहस्पतये एतन्नामकाय देवाय ˇहविषा ˇविधेम आज्येन परिचर्यां करवाम । कथंभूता आपः ? ˇदेवीः देव्यः द्योतमानाः । ˇबृहतीः प्रभूताः । ˇविश्वशंभुवः

---

2. V1 S1 C औद्द्रहण° for औद्भ्रमण°
14. V1 S1 C °विध° for विधो
18. V1 S1 C om. मदीय°
21. S1 C तुरीय° for चतुर्थ°
25. P1 आकूत्यादीनां for अबादीनां

विश्वं सुखेन भावयित्र्यः। एतानि विशेषणानि वृष्टिजन्यास्वप्सु युज्यन्ते। तदाह तित्तिरिः– " या वै वर्ष्यास्ता आपो देवीर्बृहतीर्विश्वशंभुवः " (तैसं ६·१·१) इति ॥१॥

आ– औद्ग्रभणानि जुहोति । ' आकूत्यै प्रयुजे ' इत्यादीनां चतुर्णां यजुषामग्निर्देवता । आकूतिः प्रयत्नः आत्मनो धर्मः मनसो प्रेरणाय भवति । तस्यै प्रयुङ्क्ते इति प्रयुक्, तस्मै ^{v}प्रयुजे आकूतिलक्षणाय ^{v}अग्नये ^{v}स्वाहा सुहुतमस्तु । ^{v}मेधायै धीर्धारणावती मेधा तस्यै । मन्यते अनेनेति मनस्तस्मै प्रयुजे मेधालक्षणाय मनोग्रहणाय ^{v}अग्नये ^{v}स्वाहा । दीक्षायै । दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु । दीक्षत इति दीक्षा । तस्यै । ^{v}तपसे । तपतीति तपस्तस्मै । उपसद इति वा तपः । दीक्षालक्षणाय तपोलक्षणाय [च] ^{v}अग्नये ^{v}स्वाहा । ^{v}सरस्वत्यै । सृ गताविल्यस्य रूपं सरस्वतीति । ' वाग्वै सरस्वती ' (काशब्रा १·५·३·६) इति श्रुतेः । तस्यै । पूषा पुष्णातीति । पशवो वै पूषेति वा । तस्मै । सरस्वतीलक्षणाय पूषलक्षणाय चाग्नये स्वाहा ॥

' आपो देवीः ' इति लिङ्गोक्तदेवत्या विराट् । हे ^{v}देवीः देव्यः ^{v}आपः ^{v}बृहतीः बृहत्यो महत्यः ^{v}विश्वशंभुवः विश्वं सुखेन भावयित्र्यः । हे द्यावापृथिव्यौ, ^{v}उर्वन्तरिक्षम् । उरु विस्तीर्णमन्तरिक्षम् । युष्मभ्यं ^{v}बृहस्पतये ^{v}हविषा । द्वितीयान्तत्वेन परिणामः । हविः विधेम हविर्विदध्म । स्वाहा ॥१॥

विश्वो॑ दे॒वस्य॑ ने॒तुर्मर्तो॑ वुरीत स॒ख्यम् ।
विश्वो॑ रा॒य इ॑षुध्यति द्यु॒म्नꣳ वृ॑णीत पु॒ष्यसे॒ स्वाहा॑ ॥२॥(३)॥

विश्वः॑ । दे॒वस्य॑ । ने॒तुः । मर्तः॑ । वु॒री॒त॒ । स॒ख्यम् ।
विश्वः॑ । रा॒ये । इ॒षु॒ध्य॒ति॒ । द्यु॒म्नम् । वृ॒णी॒त॒ । पु॒ष्यसे॑ । स्वाहा॑ ॥ ह्रीं ॥३॥

सा– षष्ठमन्त्रपाठस्तु– ' विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् । विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ' इति । ^{v}विश्वः ^{v}मर्तः सर्वो मनुष्यः ^{v}नेतुः फलप्रापकस्य ^{v}देवस्य दा(? देव)– नादिगुणयुक्तस्य ^{v}सख्यं सखिभावं ^{v}वुरीत वृणुते प्रार्थयते । किं च ^{v}विश्वः सर्वोऽपि जनः ^{v}राये धनप्राप्त्यर्थं धनादिप्राप्त्यर्थं ^{v}इषुध्यति प्रार्थयते सवितारमिति शेषः । इषुध्यतिर्याञ्चाकर्मसु पठितः । किं च

---

3. H1 औद्ग्रहणानि for औद्ग्रभणानि
20. P1 with marking above मर्तः ins. on the margin : अत्र मर्तशब्दोऽयकारोपध इति प्रातिशाख्ये ।, V1 S1 C देवस्यादानादि° for देवस्य दानादि°
21. V1 S1 C om. अपि
22. S1 V1 यच्याकर्म एवायं धातुः; याञ्च्याकर्मण्ययं धातुः for इषुध्यतिर्याञ्चायाकर्मसु;

विश्व इत्यनुवर्तते । सर्वोऽपि जनः ᵛद्युम्नं यशोऽन्नं सुखं वा, यं सवितारं ᵛवृणीत प्रार्थयते, तस्मै ᵛपुष्यसे आपन्नपोषणार्थम् उद्युक्ताय ᵛस्वाहा, तस्मै प्रेरकाय देवाय हुतमस्तु ॥२॥

इति चतुर्थेऽध्याये तृतीयोऽनुवाकः ॥

आ— स्वस्त्यात्रेयः सवितृदेवत्याऽनुष्टुप् । ᵛविश्वः ᵛमर्तः सर्वो मनुष्यो जनः ᵛदेवस्य देवनादिगुणयुक्तस्य ᵛनेतुः प्रणेतुः सवितुः ᵛसख्यं सखिभावं वृणीत । वृङ् वरणे । किं च ᵛविश्वः जनः ᵛरायः धनाय ᵛइषुध्यति प्रार्थयते सवितारम् । इषुध्यतिः याच्ञाकर्मसु पठितः । द्युम्नं द्योततेः, यशोऽन्नं वा प्राति तच्चोभयं ᵛवृणीत तच्चोभयं प्रार्थयते । ᵛपुष्यसे, व्यत्ययो वा पुष्यसीति पुष्टिं करोषीति वा ॥२॥

[इति तृतीयोऽनुवाकः]

[अथ चतुर्थोऽनुवाकः]

सा– तृतीये औद्ग्रभणहोममन्त्रा उक्ताः । चतुर्थे कृष्णाजिनादिमन्त्रा उच्यन्ते ।

ऋ॒क्सा॒मयो॒ः शि॒ल्पे॑ स्थ॒स्ते॒ वा॒मा र॑भे॒ ते मा॑ पातम् ।
आऽस्य य॒ज्ञस्यो॒दृच॑ः ।।१।।

ऋ॒क्सा॒मयो॒रित्यृ॑क्ऽसा॒मयो॑ः । शि॒ल्पे॒ इति॒ शि॒ल्पे॑ । स्थ॒ः ।
ते इ॒ति॒ ते । वा॒म् । आ । र॒भे॒ । ते इ॒ति॒ ते । मा॒ । पा॒त॒म् ।
आ । अ॒स्य । य॒ज्ञस्य॑ । उ॒दृच॒ इत्यु॒त्ऽऋच॑ः ॥ बुं ॥ १ ॥

कात्यायनः – "शुक्लकृष्णसन्धिमालभत ऋक्सामयोरिति" (काश्रौ ७.३.२३) इति । पाठस्तु– 'ऋक्सामयोः शिल्पे स्थस्ते वामारभे ते मा पातम् । आऽस्य यज्ञस्योदृचः' इति । हे शुक्लकृष्णरेखे, कृष्णाजिनगते युवाम् ᵛऋक्सामयोः ᵛशिल्पे ᵛस्थः । ऋगभिमानिसामाभिमानिदेवतयोः संबन्धिनी ये शिल्पे चातुर्ये तद्रूपे भवथः । ᵛते ᵛवां तथाविधे युवाम् ᵛआरभे अहं स्पृशामि । ᵛते ᵛमा ᵛपातं तथाविधे मां पालयतम् । कियन्तं कालमिति चेदुच्यते । ᵛआ ᵛअस्य ᵛयज्ञस्य ᵛउदृचः अनुष्ठीयमानस्य यज्ञस्य येयमृगुत्तमाऽस्ति तत्पर्यन्तं यज्ञसमाप्तिपर्यन्तमित्यर्थः । ऋक्सामाभिमानिन्यौ देवते केनापि निमित्तेन देवानां यज्ञार्थमवस्थिते सत्यौ कृष्णमृगो भूत्वा तदीयं रूपं सम्यक् कृत्वा देवेभ्योऽपक्रम्य दूरदेशे कस्मिंश्चिदतिष्ठताम् । तस्य मृगस्य चर्मणि यः शुक्लो वर्णः सोऽयमृचः शिल्परूपम् । यश्च कृष्णो वर्णः सोऽयं साम्नः शिल्परूपम् ।

---

1. V1 S1 C om. विश्व इत्यनुवर्तते
11. C S1 औद्ग्रहण°, V1 औद्ग्रहणस्य for औद्ग्रभण°; C S1 तुरीये for चतुर्थे
17. V1 S1 C °सान्धिना° for °संधिमा°
20. C S1 V1 °विधं for °विधे
24. P1 कृष्ण° for कृष्णो

तत् सर्वमाह तित्तिरिः – “ ऋक्सामे वै देवेभ्यो यज्ञायातिष्ठमाने कृष्णो रूपं कृत्वाऽपक्रम्यातिष्ठताम् ” (तैसं ६·१·३) इति; “ एष वा ऋचो वर्णो यच्छुक्लं कृष्णाजिनस्यैष साम्नो यत् कृष्णम् ” (तैसं ६·१·३) इति च ॥१॥

आ – कृष्णाजिनयोः शुक्लकृष्णसंधिमालभते । ‘ ऋक्सामयोः ’ इति कृष्णाजिनदेवत्या गायत्री । ऋचां साम्नां च Vशिल्पे प्रतिरूपे प्रतिमाभूते कृष्णाजिनयोः वां Vस्थः भवथः । “ यद्वै प्रतिरूपं तत् शिल्पम् ” (शब्रा ३·२·१·५) इति श्रुतेः । कृष्णाजिने Vवां युवामहम् Vआरभे । कृष्णाजिने Vमा मां Vपातं गोपायतम् । Vआ Vअस्य Vयज्ञस्य Vउदृचः उत्तमा ऋक् उदृक्, तस्या उत्तमाया ऋच आ समाप्तेः Vते Vमा Vपातम् इति ॥१॥

शर्मासि शर्म मे यच्छ नमस्ते अस्तु मा मा हिꣳसीः ।
ऊर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जं मे यच्छ ॥२॥

शर्म । असि । शर्म । मे । यच्छ । नमः । ते । अस्तु । मा । मा । हिꣳसीः ।
ऊर्क् । असि । आङ्गिरसी । ऊर्णम्रदा इत्यूर्णऽम्रदाः । ऊर्जम् । मे । यच्छ ॥गों॥२॥

सा– कात्यायनः –“ दक्षिणजानुनाऽऽरोहति शर्मासीति ” (काश्रौ ७·३·२४) इति । ‘ पाठस्तु– ‘ शर्मासि शर्म मे यच्छ नमस्ते अस्तु मा मा हिꣳसीः ’ इति । हे कृष्णाजिन, त्वं Vशर्म Vअसि शरणमसि । अतः Vमे मह्यं Vशर्म Vयच्छ शरणं देहि स्वकीयत्वेन स्वीकुर्वित्यर्थः । Vते तुभ्यं कृष्णाजिनाय Vनमः Vअस्तु Vमा Vमा Vहिꣳसीः मां यजमानं हिंसितं मा कुरु ॥

कात्यायनः – “ मेखलां बध्नीते ... ऊर्गसीति ” (काश्रौ ७·३·२६) इति । आपस्तम्बोऽपि विस्पष्टमाह– “ शरमयी मौञ्जी वा मेखला त्रिवृत् पृथ्व्यन्यतःपाशा, तया यजमानं दीक्षयति ” (आपश्रौ १०·९·१३) इति । पाठस्तु– ‘ ऊर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जं मे यच्छ ’ इति । हे मेखले, त्वम् Vआङ्गिरसी अङ्गिरोनामकानामृषीणां संबन्धिनी Vऊर्क् अन्नरसरूपा, Vऊर्णम्रदा Vअसि कम्बलवन्मृदुरासि । तथाविधा त्वम् Vऊर्जम् अन्नरसं Vमे Vयच्छ मह्यं देहि । अस्याः शरमय्या मेखलायाः अङ्गिरोभिः संबन्धं तित्तिरिर्दर्शयति– “ अङ्गिरसः सुवर्गं लोकं यन्त ऊर्जं व्यभजन्त ततो यदत्यशिष्यत ते शरा अभवन्नूर्ग्वै शरा यच्छरमयी मेखला भवत्यूर्जमेवाव रुन्द्धे ” (तैसं ६·१·३) इति । अङ्गिरोनामकानामृषीणां परस्परमन्नरसे विभज्यमाने यदवशिष्टं तच्छरनामकतृणविशेषेणाविर्भूतं, तस्मात् ‘ ऊर्गसि ’ इत्यादि मन्त्र उपपन्न इत्यर्थः ॥२॥

आ – दक्षिणजानुनाऽऽरोहति ‘ शर्मासि ’ इति । कृष्णाजिनमेखले द्वे [त्रिष्टुप्] देवत्ये । मन्त्रभेदपक्षे तु अनुष्टुप् । हे कृष्णाजिन, त्वं Vशर्म Vअसि । यतस्त्वं शरणमसि अतस्त्वं Vशर्म शरणं

---

2. V1 P1 वाक्रूपो for ऋचां
3. S1 V1 C om. च
17. V1 om. अपि;
18. P1 शरमय° for शरमयी
26. H1 यतस्त्वा for यतस्त्वं

ᵛमे ᵛयच्छ । नमस्ते अस्तु । ᵛते तुभ्यं ᵛनमः ᵛअस्तु भवतु । ᵛमा ᵛमा ᵛहिꣳसीः मम हिंसां मा कार्षीः । मेखलां बध्नीते 'ऊर्गसि' इति । अङ्गिरसामार्षं मेखलादेवत्यं यजुः । ᵛऊर्क् ᵛअसि अन्नं भवसि । ᵛआङ्गिरसी अङ्गिरोभिर्दृष्टा ऊ[र्णेव] मृद्वी मेखला । यतस्त्वमेवंगुणः अतस्त्वं ᵛऊर्जं ᵛमे मह्यं ᵛयच्छ प्रयच्छ ॥२॥

सोम॑स्य नी॒विर॑सि॒ विष्णो॒ः शर्मा॑सि॒ शर्म॒ यज॑मानस्य ।
इन्द्र॑स्य॒ योनि॑रसि सु॒स॒स्याः कृ॒षीस्कृ॑धि ।।३।।

सोम॑स्य । नी॒विः । अ॒सि॒ । विष्णो॑ः । शर्म॑ । अ॒सि॒ । शर्म॑ । यज॑मानस्य ।
इन्द्र॑स्य । योनि॑ः । अ॒सि॒ । सु॒स॒स्या इति॑ सु॒ऽस॒स्याः । कृ॒षीः । कृ॒धि॒ ।।ङु।। ३।।

सा– कात्यायनः – "नीविं कुरुते सोमस्य नीविरिति" (काश्रौ ७·३·२७) इति । असीति मन्त्रशेषः । हे मेखले, त्वं ᵛसोमस्य ᵛनीविः ᵛअसि सोमदेवतायाः प्रियभूतग्रन्थिरसि । मूलाग्रयोरेकीकरणेन ग्रन्थिविशेषो नीविरित्युच्यते ॥

कात्यायनः– "शिरः प्रोर्णुते विष्णोः शर्मेति" (काश्रौ ७·३·२८) इति । आच्छादयतीत्यर्थः । पाठस्तु– 'विष्णोः शर्मासि शर्म यजमानस्य' इति । हे वस्त्र, ᵛविष्णोः व्यापिनो यज्ञस्य ᵛशर्म ᵛअसि सुखहेतुर्भवसि । अतः ᵛयजमानस्य मम ᵛशर्म सुखं संपादयेति शेषः ॥

कात्यायनः– "कृष्णविषाणां त्रिवलिं पञ्चवलिं वोत्तानां दशायां बध्नीते । तया कण्डूयनम् । इन्द्रस्य योनिरिति" (काश्रौ ७·३·२९-३१) इति । आपस्तम्बोऽप्याह– "कृष्णविषाणां यजमानाय प्रयच्छति । आबध्नातीत्येके । त्रिवलिः पञ्चवलिर्वा" (आपश्रौ १०·८.१७-१९) इति । 'असि' इति मन्त्रशेषः । हे कृष्णविषाणे, त्वं [यथा] पूर्वम् ᵛइन्द्रस्य ᵛयोनिः ᵛअसि, तथेदानीमस्य [यजमानस्य] स्थानं भवेति शेषः । पुरा कदाचिद्यज्ञपुरुषो दक्षिणां देवीं समभवत् । तस्मात् संभवनादिन्द्रोऽजायत । तदानीमेवात्रान्यस्योत्पत्तिर्मा भूदिति विचार्येन्द्रः सद्यो योनिमाच्छिद्य मृगेषु न्यदधात् । निहिता सा योनिः कृष्णविषाणाऽभूत् । सोऽयमर्थस्तित्तिरिणा "यज्ञो दक्षिणामभ्यध्यायत्" (तैसं ६·१·३) इत्यस्मिन्नाख्याने समाख्यातः । तस्मादस्या इन्द्रयोनित्वमुपपन्नम् ॥

कात्यायनः– "भूमौ चोल्लिखति सुसस्या इति" (काश्रौ ७·३·३२) इति । आपस्तम्बोऽप्याह– "तया वेदेर्लोष्टमुद्धन्ति" (आपश्रौ १०·१०·३६) इति । पाठस्तु– 'सुसस्याः कृषीस्कृधि' इति ।

---

14. V1 S1 C om. मम
16. P1 with marking above इति ins. on the margin:– कण्वस्तु– शिरस्त उपस्पृशतीन्द्रस्य योनिरसीतीति ।
17. P1 आबध्नीतेत्येके for आबध्नातीत्येके
18. V1 S1 C मध्यस्थानं for अत्य स्थानं [L 19]
20. V1 S1 C om. एव; P1 om. अत्र; V1 S1 C सद्योनिम् for सद्यो योनिम्
24. V1 S1 C तथा for तया

सस्यं व्रीहियवादि, तदर्थो भूमिगतो व्यापारः कृषिः। याः कृषयः सन्ति ताः सर्वाः ᵛसुसस्याः शोभनधान्याः ᵛकृषि, हे कृष्णविषाणे, कुरु। एतन्मन्त्रलभ्यं फलं तित्तिरिरुदाजहार– "कृष्यै त्वा सुसस्याया इत्याह तस्मादकृष्टपच्या ओषधयः पच्यन्ते" (तैसं ६·१·३) इति ॥३॥

आ– नीविं कुरुते–'सोमस्य नीविः' इति । सोमदेवत्या उष्णिक् । ᵛसोमस्य सोमदेवतायाः ᵛनीविः ᵛअसि । शिरः प्रोर्णुते–'विष्णोः शर्मासि' इति । वासो देवत्या जगती । ᵛविष्णोः यज्ञस्य ᵛशर्म ᵛअसि । वासः शरणं भवसि । यजमानस्य शर्म शरणं भवसि ॥

कृष्णविषाणां बध्नाति– 'इन्द्रस्य योनिरसि' इति । कृष्णविषाणदेवत्योष्णिक् । यथा त्वं पूर्वम् ᵛइन्द्रस्य ᵛयोनिः उत्पत्तिस्थानम् ᵛअसि, तथेदानीं यजमानस्य योनिर्भवसि ।

भूमौ चोल्लिखति– 'सुसस्याः' इति । कृष्णविषाणदेवत्योष्णिक् । कृष्णवि-[षाण]-विलखनेन ᵛकृषीः व्यवसायभूताः ᵛसुसस्याः कल्याणधान्याः जनाः ᵛकृधि कुरु ॥३॥

उच्छ्रयस्व वनस्पत ऊर्ध्वो मा पाह्यꣳहसः ।
आऽस्य यज्ञस्योदृचः ॥४॥(४)॥

उत् । श्रयस्व । वनस्पते । ऊर्ध्वः । मा । पाहि । अꣳहसः ।
आ । अस्य । यज्ञस्य । उदृच इत्युत्ऽऋचः ॥गां॥४॥(४)॥

सा– "मुखसंमितमौदुम्बरं दण्डं प्रयच्छति ॥ उच्छ्रयस्वेत्येनमुच्छ्रयति" (काश्रौ ७·४·१-२) इति । पाठस्तु– 'उच्छ्रयस्व वनस्पत ऊर्ध्वो मा पाह्यꣳहसः । आऽस्य यज्ञस्योदृचः' इति । हे ᵛवनस्पते, वृक्षावयवरूप दण्ड, ᵛउच्छ्रयस्व उन्नतो भव । एवम् ᵛऊर्ध्वः भूत्वा ᵛअꣳहसः पापात् ᵛमा मां ᵛपाहि । तत्र कालविधिरुच्यते । ᵛअस्य अनुष्ठीयमानस्य ᵛयज्ञस्य ᵛआ ᵛउदृचः उत्तमाया ऋचः समाप्तिं गता या ऋक् तस्याः पर्यन्तमित्यर्थः ॥४॥

इति चतुर्थेऽध्याये चतुर्थोऽनुवाकः ॥४॥

आ– दण्डमुच्छ्रयति 'उच्छ्रयस्व' इति । दण्डदेवत्या गायत्री । हे ᵛवनस्पते, त्वम् उत्पूर्वस्य श्रयतेरेतद्रूपम् । ᵛउच्छ्रयस्व उन्नतो भव । ᵛऊर्ध्वः भूत्वा ᵛअंहसः पापात् मां ᵛपाहि । कालविधिमाह– 'आऽस्य यज्ञस्य' इति । ᵛअस्य ᵛयज्ञस्य ᵛउदृचः ᵛआ समाप्तेः यज्ञसमाप्ति-पर्यन्तम् ॥४॥

[इति चतुर्थोऽनुवाकः ॥४॥]

---

1. P1 तथा for तदर्थो
81. V1 S1 C तत्र तत्र for तत्र; V1 S1 C समाप्तिगतायाः । तादृक्पर्यन्तम् for समाप्तिं .. पर्यन्तम्.
20. C S1 तुरीयाध्याये, V1 चतुर्थाध्याये for चतुर्थेऽध्याये

[अथ पञ्चमोऽनुवाकः]

सा– चतुर्थे कृष्णाजिनादिमन्त्रा उक्ताः । पञ्चमे व्रतकरणादिमन्त्रा उच्यन्ते ।

व्रतं कृणुत व्रतं कृणुत व्रतं कृणुत ।
अग्निर्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञियः ॥१॥

व्रतम् । कृणुत । व्रतम् । कृणुत । [व्रतम् । कृणुत ।]
अग्निः । ब्रह्म । अग्निः । यज्ञः । वनस्पतिः । यज्ञियः । ॥ळं॥ १॥

कात्यायनः – "व्रतं कृणुतेति वाग्विसर्जनं त्रिरुक्त्वा" (काश्रौ ७.४.१५) इति । मौनेनावस्थितस्य यजमानस्य वाग्विसर्जनसाधनमेतन्मन्त्रवाक्योच्चारणं विधीयते । पाठस्तु– 'व्रतं कृणुत व्रतं कृणुत व्रतं कृणुत' इति । दीक्षितस्य भोजनाय यत् पयो नियतं तद्व्रतमित्युच्यते । हे परिचारकाः, ᵛव्रतं ᵛकृणुत दोहनादिना क्षीरं संपादयत । त्रिवारं वाक्यावृत्तिरादरार्था । अनेन मन्त्रेण मौनपरित्यागं तित्तिरिरपि विधत्ते– "व्रतं कृणुतेति वाचं विसृजति" (तैसं ६.१.४) इति ॥

कात्यायनः – "अग्निर्ब्रह्मेति च सकृत्" (काश्रौ ७.४.१५) इति । एतमपि मन्त्रं सकृदुच्चारयेत् । पाठस्तु – 'अग्निर्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञियः' इति । ब्रह्मशब्देन वेदत्रयमभिधीयते । तस्य वेदत्रयस्य अग्नित्वमुपचर्यते । आधानेन निष्पन्नस्य वैदिकस्याग्नेर्वेदव्यतिरेकेणासंभवात् । तस्य चाग्नेर्यज्ञसाधनत्वाद्यज्ञत्वमुपचर्यते । तथा यज्ञयोग्यस्य खादिरादेर्वनस्पतेर्यज्ञसाधनत्वात् ᵛवनस्पतिः ᵛयज्ञः इत्यनुवर्तनीयम् ॥१॥

आ– वाचं विसृजते– 'व्रतं कृणुत' इति । यज्ञदेवत्योष्णिक् । व्रतशब्देन पयोऽभिधीयते । कृञ् हिंसायाम् अत्र करोत्यर्थः । ᵛव्रतं ᵛकृणुत कुरु मम भोजनाय पृथक् कर्मणे क्षिप्रं पयः कुरुत, यज्ञार्थं वा पयः कृणुतेति । ᵛअग्निः ᵛब्रह्म [बृहस्पतिः] । त्रैलक्षणम् । ᵛअग्निः एव ᵛयज्ञः । ᵛयज्ञियः यज्ञार्हः ᵛवनस्पतिः अपि यज्ञ एव । वेदं विना वैदिकोऽग्निर्न स्यात् । अग्निं विना यज्ञो न स्यात् । तथा वनस्पतिं विना यज्ञो न स्यात् । ततः परस्परं साकाङ्क्षाऽभिधीयते ॥१॥

दैवीं धियं मनामहे सुमृळीकामभिष्टये ।
वर्चोदां विश्वधायसं सुतीर्था नो असद्वशे ॥२॥

---

2. C S1 तुरीये for चतुर्थे
8. V1 S1 C om. °साधन°
9. C S1 °चारिकाः for °चारकाः
10-11. V1 C S1 अभिविधत्ते for अपि विधत्ते
12. H1 om. च
16. H1 वर्तनीयः for °वर्तनीयम्

दै॒वीम् । धिय॑म् । म॒ना॒म॒हे॒ । सु॒मृ॒ळी॒कामिति॑ सु॒ऽमृ॒ळी॒काम् । अ॒भिष्ट॑ये ।
व॒र्चो॒दामिति॑ व॒र्चः॒ऽदाम् । वि॒श्वधा॑यस॒मिति॑ वि॒श्वऽधा॑यसम् ।
सु॒ती॒र्थेति॑ सु॒ऽती॒र्था । नः॒ । अ॒स॒त् । वशे॑ ॥थां॥२॥

सा– कात्यायनः – "दैवीं धियमिति व्रतायोपस्पर्शनम्" (काश्रौ ७·४·३२) इति । बौधायनः– "अथाप आचामति दैवीं धियम्" (बौश्रौ ६·७) इति । आपस्तम्बः – "दैवीं धियं मनामह इति हस्तावनिज्य" (आपश्रौ १०·१७·२५) इति । पाठस्तु– 'दैवीं धियं मनामहे सुमृळीकामभिष्टये । वर्चोदां विश्वधायसꣳ सुतीर्था नो असद्वशे' इति । ᵛअभिष्टये अभिमुखत्वेन प्राप्तस्य यज्ञस्य सिद्ध्यर्थं ᵛधियम् अनुष्ठानविषयां बुद्धिं ᵛमनामहे याचामहे । याच्ञाकर्मस्वेतत् पदं पठितम् । कथंभूतां धियम् ? ᵛदैवीं देवसंबन्धिनीं, देवतोद्देशेन प्रवृत्ताम् । ᵛसमृळीकां शोभनसुखहेतुम् । ᵛवर्चोदाम् अनुष्ठानविषयस्य तेजसो दात्रीम् । ᵛविश्वधायसं विश्वस्य सर्वस्यानुष्ठानक्रमस्य धारयित्रीम् । तथाविधा धीः ᵛसुतीर्था अस्माभिः सुष्ठु तरीतुं प्राप्तुं शक्या सती ᵛवशे ᵛअसत् अस्माकमधीनत्वे भवतु ॥२॥

आ– 'दैवीं धियम' इति यज्ञदेवत्याऽनुष्टुप् । 'मनामहे' इति याच्ञाकर्मसु पठितम् । ᵛदैवीं देवसंबन्धिनीम् । मृड सुखने । ᵛसुमृळीकां सुसुखां सुखात्मिकाम् । कथंभूतामिति । ᵛवर्चोदां तेजोदात्रीम् । ᵛविश्वधायसं विश्वस्य धारयित्रीं ᵛधियं बुद्धिं ᵛमनामहे याचामहे । ᵛअभिष्टये । अभिपूर्वस्य यजतेरादिलोपः । अभिष्टये अभियागाय । सा धीः ᵛसुतीर्था यज्ञं प्रति शोभनावतारा । "तीर्थं मन्त्राद्युपाध्यायशास्त्रेष्वम्भसि पावने । पात्रोपायावतारेषु स्त्रीपुष्पे योनियज्ञयोः" ॥ (शब्दर २६·७३) इत्यभिधानात् । सुतीर्था ᵛनः अस्माकं ᵛवशे ᵛअसत् स्यात् ॥२॥

ये दे॒वा मनो॑जाता मनो॒युजो॒ दक्ष॑क्रतवः ।
ते नो॑ऽवन्तु॒ ते नः॑ पान्तु॒ तेभ्यः॒ स्वाहा॑ ॥३॥

ये । दे॒वाः । मनो॑जाता॒ इति॒ मनः॑ऽजाताः ।
म॒नो॒यु॒ज इति॑ म॒नः॒ऽयुजः॑ । दक्ष॑क्रतव॒ इति॒ दक्ष॑ऽक्रतवः ।
ते । नः॒ । अ॒व॒न्तु॒ । ते । नः॒ । पा॒न्तु॒ । तेभ्यः॑ । स्वाहा॑ ॥ ढीं ॥३॥

सा– कात्यायनः – "ये देवा इति व्रतयति" (काश्रौ ७·४·३३) इति । बौधायनः – "अथास्मै कंसे चमसे वा निषिच्य व्रतं प्रयच्छति । तद्दक्षिणतः परिश्रित्य व्रतयति ये देवाः" (बौश्रौ ६·७) इति । पाठस्तु– 'ये देवा मनोजाता मनोयुजो दक्षक्रतवः । ते नोऽवन्तु ते नः पान्तु

---

4. H1 with marking above इति ins. on the margin:– कण्वः– स यत्रास्मै व्रतं प्रदास्यन् भवति तदवनेजयति सोऽवनेनिक्ते दैवीम् (काशब्रा ४·२·२·१५) इति ।
13. H1 सुखान्तिकां for सुखात्मिकां
15. H1 अभियाशाभ्वसाधीः corrected as अभियागाय । सा धीः

तेभ्यः स्वाहा ' इति । दीव्यन्ति द्योतन्त इति देवाः । चक्षुरादीन्द्रियाभिमानिनो देवाश्चक्षुरादीन्द्रियरूपाः प्राणाः । ते च ^{v}देवाः ^{v}मनोजाताः दर्शनश्रवणादीच्छारूपान्मनस उत्पन्नाः । तथाविधायामिच्छायामुत्पन्नायां पश्चाच्चक्षुरादीनां प्रवर्तमानत्वात् । तथा ^{v}मनोयुजः रूपादिदर्शनकालेऽपि मनसा युक्ता एव वर्तन्ते । अन्यचित्तस्य रूपादिप्रतिभासाभावात् । एतमेवार्थमभिप्रेत्य चक्षुरादिप्राणपरत्वं तित्तिरिर्व्याचष्टे– " प्राणा वै देवा मनोजाता मनोयुजः " (तैसं ६·१·४) इति । ते च देवा दक्षक्रतवः । दक्षाः कुशलाः क्रतवः संकल्पा येषां चक्षुरादीनां ते ^{v}दक्षक्रतवः संकल्पितार्थकारिण इत्यर्थः । ते देवाः ^{v}ये सन्ति ^{v}ते देवाः ^{v}नः अस्मान् ^{v}अवन्तु अनुष्ठानविघ्नपरिहारेण पालयन्तु । तथा ^{v}ते देवाः ^{v}नः अस्मान् ^{v}पान्तु फलप्राप्त्या पालयन्तु । ^{v}तेभ्यः प्राणरूपेभ्यो देवेभ्यः ^{v}स्वाहा इदं क्षीरं हुतमस्तु ॥३॥

आ– व्रतं व्रतयति– ' ये देवाः ' इति । वाक्प्राणोदानैश्चक्षुःश्रोत्रमध्यात्मम् अग्निर्मित्रावरुणा आदित्या विश्वेदेवाश्च अधिदैवतमित्येतद्दैवत्योष्णिक् । अग्निहोत्रसंपदं यजमानं करोति । अत्र मयि प्राणेषु ^{v}ये ^{v}देवाः ^{v}मनोजाताः मनसो जाताः, मनःपूर्वका हि तेषां प्रवृत्तिरिति । मनसो युज्यन्त इति ^{v}मनोयुजः । ^{v}दक्षक्रतवः । दक्ष वृद्धौ शीघ्रार्थे च । दक्षाः क्रतवः संकल्पाः येषां ते दक्षक्रतवः दक्षक्रतुशरीराः । " वागेवाग्निः प्राणोदानौ मित्रावरुणौ चक्षुरादित्यः श्रोत्रं विश्वेदेवाः " (शब्रा ३·२·२·१३) इति । ये एते अध्यात्मश्रुतौ पठ्यन्ते ^{v}ते इहोच्यन्ते देवाः ^{v}नः अस्मान् ^{v}अवन्तु कामयन्तु । ^{v}ते देवाः ^{v}नः ^{v}पान्तु पालयन्तु । ^{v}तेभ्यः देवेभ्यः ^{v}स्वाहा ॥३॥

श्वा॒त्राः पी॒ता भ॑वत यू॒यमा॑पो अ॒स्माक॑म॒न्तरु॒दरे॑ सु॒शेवाः॑ ।
ता अ॒स्मभ्य॑मय॒क्ष्मा अ॑नमी॒वा अना॑गसः॒ स्वद॑न्तु दे॒वीर॒मृता॑ ऋ॒ता॒वृधः॑ ॥४॥

श्वा॒त्राः । पी॒ताः । भ॒व॒त॒ । यू॒यम् । आ॒पः॒ ।
अ॒स्माक॑म् । अ॒न्तः । उ॒दरे॑ । सु॒शे॒वा इति॑ सु॒ऽशेवाः॑ ।
ताः । अ॒स्मभ्य॑म् । अ॒य॒क्ष्माः । अ॒न॒मी॒वाः । अना॑गसः ।
स्वद॑न्तु । दे॒वीः । अ॒मृताः॑ । ऋ॒ता॒वृधः॑ । ऋ॒त॒वृ॒ध इत्यृ॑त॒ऽवृधः॑ ॥जौं॥४॥

सा– कात्यायनः – " श्वात्राः पीता इति नाभिमालभते " (काश्रौ ७·४·३५) इति । पाठस्तु– ' श्वात्राः पीता भवत यूयमापो अस्माकमन्तरुदरे सुशेवाः । ता अस्मभ्यमयक्ष्मा अनमीवा अनागसः स्वदन्तु देवीरमृता ऋतावृधः ' इति । हे ^{v}आपः क्षीररूपाः, ^{v}यूयं मया ^{v}पीताः सत्यः ^{v}श्वात्राः ^{v}भवत । क्षिप्रपरिणामाः शीघ्रं जीर्णा भवत । ' श्वात्रम् इति क्षिप्रनाम ' (निरुक्त ५·३) इति यास्केनोक्तत्वात् । किं च ^{v}अस्माकं पीतवताम् ^{v}अन्तः ^{v}उदरे जलपाकस्थाने ^{v}सुशेवाः शोभनसुखा भवतेत्यनु-

---

1. V1 S1 C om. चक्षुरादीन्द्रियाभिमानिनो देवाः
3. V1 मुक्ताः for युक्ताः
26. V1 S1 C उक्तम् for उक्तत्वात् [L 27]

वर्तते। शेवमिति सुखनाम। ताः ᵛतथाविधाः आपः ᵛअस्मभ्यम् अस्मदुपकारार्थं ᵛस्वदन्तु स्वादुयुक्ता भवन्तु। कथंभूतास्ताः? ᵛअयक्ष्माः प्रबलरोगविशेषरहिताः। ᵛअनमीवाः अल्पेन रोगसामान्येनापि रहिताः। ᵛअनागसः पापरहिताः। उपद्रवकारिण्यो न भवन्तीत्यर्थः। ᵛदेवीः देव्यः शरीरपुष्टिहेतुत्वेन द्योतमानाः। ᵛअमृताः अपमृत्युरहिताः। ᵛऋतावृधः यज्ञवृद्धिहेतवः॥४॥

आ– नाभिं स्पृशति– 'श्वात्राः पीताः' इति। अब्देवत्या जगती। हे ᵛआपः, ᵛश्वात्राः श्वात्रमिति क्षिप्रनाम। ᵛपीताः सूर्यस्य क्षिप्रपरिणामा ᵛभवत। किं च ᵛअस्माकम् ᵛअन्तः ᵛउदरे उदरमध्ये जलपाकस्थाने ᵛसुशेवाः शेवमिति सुखनाम। ससुखाः सुखावस्थानवत्यो भवत। ᵛअस्मभ्यम् अस्मदर्थं या आपः ᵛअनागसः अपराधविरोधिन्यः तन्निबन्धनपापविरोधिन्यः तत्फलविरोधिन्यः। अत एव ᵛअनमीवाः सामान्यतः अमीवा व्याधिस्तद्विरोधिन्यः। विशेषतश्च ᵛअयक्ष्माः यक्ष्मविरोधिन्यः सर्वव्याधिविरोधिन्यः। आदरार्थे पुनर्यक्ष्मग्रहणम्। ᵛआपः ᵛताः आपो ᵛदेवीः युष्मान् ᵛऋतावृधः सत्यवृध यज्ञवृधो वा। ᵛअमृताः देवेन सह मृतिधर्मरहिताः वागादयः प्राणाः। ᵛस्वदन्तु। स्वद् आस्वादने। आस्वादयन्तु॥४॥

इ॒यं ते॑ य॒ज्ञिया॑ त॒नूर॒पो॑ मु॑ञ्चा॒मि न प्र॒जाम्।
अ॒ꣳहो॒मुचः॒ स्वाहा॑कृताः पृथि॒वीमा वि॑शत पृथि॒व्या सं भ॑व॥५॥

इ॒यम्। ते॒। य॒ज्ञिया॑। त॒नूः। अ॒पः। मु॒ञ्चा॒मि॒। न। प्र॒जामिति॑ प्र॒ऽजाम्। अ॒ꣳहो॒मुच॒ इत्य॑ꣳहः॒ऽमुचः॑। स्वाहा॑ऽकृता॒ इति॒ स्वाहा॑ऽकृताः। पृ॒थि॒वीम्। आ। वि॒श॒त॒। पृ॒थि॒व्या। सम्। भ॒व॒॥ णें॥५॥

सा– कात्यायनः – "मेक्ष्यन् कृष्णविषाणया लोष्टं किंचिद्वाऽऽदत्त इयं त इति" (काश्रौ ७·४·३६) इति। मेक्ष्यन् मेहनं मूत्रं करिष्यन् किंचिद् 'इयं ते' इत्यनेन लोष्टं तद्व्यतिरिक्तं तृणादिकं वा विविक्षितम्। पाठस्तु– 'इयं ते यज्ञिया तनूः' इति। हे यज्ञपुरुष, ᵛइयं पृथिवी ᵛते तव ᵛयज्ञिया ᵛतनूः यज्ञयोग्यो देहः। अतोऽस्यां मूत्रोपहतिपरिहाराय व्यवधानं कर्तुं लोष्टं तृणं वा स्वीकरोमीत्यभिप्रायः॥

कात्यायनः – "अपो मुञ्चामीति मेहति" (काश्रौ ७·४·३७) इति। पाठस्तु– 'अपो मुञ्चामि न प्रजाम्। अꣳहोमुचः स्वाहाकृताः पृथिवीमाविशत' इति। ᵛअपः ᵛमुञ्चामि अस्यां पृथिव्यां लोष्टादिव्यवहितायां मूत्ररूपा अपो मुञ्चामि परित्यजामि। ᵛन ᵛप्रजां प्रजोत्पत्तिनिमित्तं रेतो न मुञ्चामि।

---

19. S1 C V1 लोष्ठव्यतिरिक्तं for लोष्टं तद्व्यतिरिक्त°; P1 S1 C V1 लोष्ठ for लोष्ट in all places; V1 S1 C अस्याः for अस्यां; V1 Si C लोष्ठं तरणं for लोष्टं तृणं

24. C S1 om. परित्यजामि

अतो हे आपः, ᵛअꣳहोमुचः अंहसः पापात् पुरुषं पृथक्कुर्वन्त्यः । ᵛस्वाहाकृताः पूर्वं क्षीरपानकाले स्वाहेत्यनेन मन्त्रेण स्वीकृता यूयं ᵛपृथिवीम् ᵛआविशत इदानीं पृथिवीं प्रविशत ॥

कात्यायनः – “ पृथिव्या संभवेत्यात्तं निदधाति ” (काश्रौ ७.४.३८) इति । पुरा स्वीकृतं लोष्टादिकं मूत्रस्थाने निदध्यात् । हे लोष्टादिक, ᵛपृथिव्या सह त्वमेकीभव ॥५॥

आ– किं च लोष्टमादत्ते– ‘ इयं ते ’ इति । लोष्टदेवत्या उपरिष्टाद्बृहती । ᵛइयं पृथिवी ᵛते ᵛयज्ञिया ᵛतनूः कृत्स्नपक्षे यज्ञार्हतनूः ।

मेहति– ‘ अपो मुञ्चामि ’ [इति] । मूत्रदेवत्यम् । ᵛअपः मूत्रं त्यजामि । ᵛन ᵛप्रजां प्रजानि आन्ते (?) इत्यर्थः । अतो रेतो न मुञ्चामि । ᵛअꣳहोमुचः अꣳहः पापं तत्फलं चासुखं तस्मात् पुरीषं मुञ्चन्ति पृथक्कुर्वन्तीःयर्थः । मूत्राख्या आपः याः यूयम् अꣳहोमुचः । अपूर्वस्वाहाकारेण सहिताः ᵛस्वाहाकृताः ताः, इदानीं ᵛपृथिवीम् ᵛआविशत प्रविशत । ᵛपृथिव्या सह । समित्येकीभावे । ᵛसंभव एकीभव ॥५॥

अग्ने॒ त्वꣳ सु जा॑गृहि व॒यꣳ सु म॑न्दिषीमहि ।
रक्षा॑ णो॒ अप्र॑युच्छन् प्र॒बुधे॑ न॒ः पुन॑स्कृधि ॥६॥

अग्ने॑ । त्वम् । सु । जा॒गृ॒हि॒ । व॒यम् । सु । म॒न्दि॒षी॒म॒हि॑ ।
रक्ष॑ । न॒ः । अप्र॑यु॒च्छ॒न्नित्यप्र॑ऽयुच्छन् ।
प्र॒बु॒ध॒ इति॑ प्र॒ऽबुधे॑ । न॒ः । पु॒न॒रि॒ति॒ पुन॑ः । कृ॒धि॒ ॥ ज्युं ॥६॥

सा– कात्यायनः – “ अग्ने त्वमित्युक्त्वा स्वपिति ” (काश्रौ ७.४.३९) इति । पाठस्तु– ‘ अग्ने त्वं सु जागृहि वयꣳ सु मन्दिषीमहि । रक्षा णो अप्रयुच्छन् प्रबुधे नः पुनस्कृधि ’ इति । हे ᵛअग्ने, ᵛत्वं ᵛसुजागृहि सुष्ठु निद्रारहितो भव । ᵛवयं यजमानाः ᵛसुमन्दिषीमहि साधु स्वप्स्यामः । मन्दितिः स्वापार्थः । युच्छ प्रमादे । ᵛअप्रयुच्छन् प्रमादरहितः सन्, ᵛनः ᵛरक्ष अस्मान् पालय । ᵛनः अस्माकं ᵛप्रबुधे प्रबोधाय ᵛपुनः ᵛकृधि भूयोऽपि प्रयत्नं कुरु । अस्याग्नेः प्रार्थनायास्तात्पर्यं तित्तिरिर्दर्शयति– “ अग्निमेवाधिपां कृत्वा स्वपिति रक्षसामपहत्यै ” (तैसं ६.१.४) इति ॥६॥

आ– स्वपिति– ‘अग्ने त्वाम् ’ इति । आग्नेय्यनुष्टुप् । हे ᵛअग्ने, ᵛत्वं ᵛसु साधु ᵛजागृहि जागृ निद्राक्षये । ᵛवयं ᵛसुमन्दिषीमहि, मन्दातिः स्वप्नार्थः, साधु स्वप्स्यामः । ‘ रक्षा णः ’ । ᵛनः अस्मान् ᵛरक्ष । छान्दसो दीर्घः । यच्छ प्रमादे । ᵛअप्रयुच्छन् अप्रमाद्यन् त्वं ᵛप्रबुधे प्रबोधाय ᵛनः अस्मान् ᵛपुनः ᵛकृधि पुनर्नवान् कृधि ॥६॥

---

1. V1 S1 C °कुर्वत्यः for कुर्वन्त्यः
3. C अत्र, V1 अत्रं, P1 आन्ते for आत्तं
17. V1 स्वपति for स्वपिति
20. V1 S1 C after प्रमादे add इति धातुः

पु॒न॒र्मन॒ः पु॒न॒रायु॑र्म॒ आऽगा॒त् पु॒न॒श्चक्षु॒ः पु॒न॒ः श्रोत्रं॑ म॒ आऽगा॑त् ।
पुन॑ः प्रा॒णः पुन॑रा॒त्मा म॒ आऽगा॑त् ।
वै॒श्वा॒न॒रो अद॑ब्धस्तनू॒पा अ॒ग्निर्मा॑ पातु दु॒रि॒ताद॑व॒द्यात् ।।७।।

पुन॑ः । मन॑ः । पुन॑ः । आयु॑ः । मे॒ । आ । अ॒गा॒त् ।
पु॒न॒रिति॑ पुन॑ः । चक्षु॑ः । पु॒न॒रिति॑ पुन॑ः । श्रोत्र॑म् । मे॒ । आ । अ॒गा॒त् ।
पु॒न॒रिति॑ पुन॑ः । प्रा॒णः । पुन॑ः । आ॒त्मा । मे । आ । अ॒गा॒त् ।
वै॒श्वा॒न॒रः । अद॑ब्धः । त॒नू॒पा इति॑ त॒नू॒ऽपाः ।
अ॒ग्निः । मा॒ । पा॒तु॒ । दु॒रि॒तादिति॑ दुः॒ऽइ॒तात् । अ॒व॒द्यात् ॥ मौः ॥७॥

सा– कात्यायनः – "विबुद्धमस्वप्स्यन्तं पुनर्मन इति वाचयति" (काश्रौ ७.४.४०) इति। पाठस्तु– 'पुनर्मनः पुनरायुर्म आगात् पुनश्चक्षुः पुनः श्रोत्रं म आगात् । पुनः प्राणः पुनरात्मा म आगात् वैश्वानरो अदब्धस्तनूपा अग्निर्मा पातु दुरितादवद्यात्' इति । ᵛमे यजमानस्य ᵛमनः ᵛपुनः ᵛआऽगात् सुप्तिकाले विलीय पुनरिदानीं शरीरे समागतम्। किं च स्वापकाले ᵛमे मदीयं ᵛआयुः नष्टप्रायं भूत्वा ᵛपुनः ᵛआऽगात् इदानीं पुनरुत्पन्नमिवासीत्। तथा ᵛमे ᵛचक्षुः ᵛपुनः ᵛआऽगात् । तथा मे ᵛश्रोत्रं ᵛपुनः ᵛआऽगात् । ᵛप्राणः प्राणवायुः ᵛपुनः आऽगात् । तथा ᵛमे ᵛआत्मा तनूरूपो जीवः ᵛपुनः आऽगात्। एवं सर्वेष्वागतेषु अत ऊर्ध्वमयम् ᵛअग्निः ᵛअवद्यात् जिह्वया वदितुमयोग्यात् निन्दिताद् ᵛदुरिताद् पापात् मां ᵛपातु पालयतु। कीदृशोऽग्निः? ᵛवैश्वानरः विश्वानरसंबन्धी सर्वपुरुषोपकारकः। ᵛअदब्धः केनाप्यहिंसितः। ᵛतनूपाः अस्मदीयशरीरस्य पालकः ॥७॥

आ– विबुधमस्वप्स्यन्तं 'पुनर्मनः' इति वाचयति। आग्नेयी जगती। ᵛमे ᵛमनः ᵛपुनः ᵛआऽगात् आगतम्। मे ᵛआयुः ᵛपुनः आऽगात् पुनरागतम्। ᵛचक्षुः ᵛपुनः ᵛआऽगात्। ᵛमे ᵛश्रोत्रं ᵛपुनः आऽगात्। ᵛमे ᵛप्राणः ᵛपुनः ᵛआऽगात्। मे ᵛआत्मा विज्ञानलक्षणा बुद्धिः ᵛपुनः आऽगात्। किं च ᵛअदब्धः अनुपहिंसितः ᵛतनूपाः शरीरस्य गोप्ता ᵛवैश्वानरः विश्वनरात्मको भगवान् ᵛअग्निः ᵛमा मां ᵛपातु। ᵛदुरितात् ᵛअवद्यात् वदनानर्हात् दुरितात् अंहसः ॥७॥

त्वम॑ग्ने व्र॒तपा अ॑सि दे॒व आ मर्त्ये॒ष्वा ।
त्वं य॒ज्ञेष्वीड्यः॑ ॥८॥

---

8. P1 S1 V1 C विबुधम् for विबुद्धम्
10. V1 S1 C after मे add : मनः
11. V1 S1 C °कालेन for °काले
13. V1 S1 C om. प्राणः; S1 C तत्त्व for तनू°
15. V1 S1 C कथं सोऽग्नि for कीदृशोऽग्निः
21. H1 वन्दन° for वदन°

त्वम् । अ॒ग्ने॒ । व्र॒त॒पा इति॑ व्र॒त॒ऽपाः । अ॒सि॒ । दे॒वः । आ । मर्त्ये॑षु । आ ।
त्वम् । य॒ज्ञेषु॑ । ईड्यः॑ ॥ गां ॥८॥

सा– कात्यायनः – " त्वमग्न इत्याह क्रुद्ध्वा अव्रत्यं वा व्याहृत्य " (काश्रौ ७.५.१-२) इति। दीक्षितो यदा क्रुध्यति यदा च व्रतविरुद्धं ब्रूते तदानीं ' त्वमग्ने ' इति मन्त्रं ब्रूयात् । पाठस्तु– ' त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं यज्ञेष्वीड्यः ' इति । हे ᵛअग्ने, ᵛदेवः द्योतनात्मकः ᵛत्वम् ᵛआ ᵛमर्त्येषु मनुष्यपर्यन्तेषु सर्वप्राणिषु ᵛव्रतपाः ᵛअसि व्रतस्य कर्मणः पालको भवसि । तथा त्वम् ᵛआ समन्ताद् ᵛयज्ञेषु ᵛईड्यः स्तुत्योऽसि । अत्र स्वापस्य व्रतविरोधित्वात् तत्परिहारोऽनेन मन्त्रेण संपाद्यते । तदाह तित्तिरिः – " अव्रत्यमिव वा एष करोति यो दीक्षितः स्वपिति त्वमग्ने व्रतपा असीत्याहाग्निर्वै देवानां व्रतपतिः स एवैनं व्रतमालम्भयति " (तैसं ६.१.४) इति ॥८॥

आ– जपति– ' त्वमग्ने ' इति । वत्सस्यार्षम् । आग्नेयी गायत्री । हे ᵛअग्ने, ᵛत्वं ᵛव्रतपाः व्रतस्य कर्मणः पालकः । ᵛआ ᵛमर्त्येषु मनुष्यपर्यन्तेषु सर्वप्राणिषु । ᵛदेवः सः त्वम् एव ᵛआ समन्तात् व्रतस्य पाता ᵛयज्ञेषु ᵛईड्यः । ईडतिरध्येषणकर्मा स्तुतिकर्मा च । त्वमेव पूज्यः स्तुत्यश्चाध्येषितव्यश्च ॥८॥

रास्वेय॑त् सो॒माऽऽ भूयो॑ भर ।
दे॒वो नः॑ स॒वि॒ता वसो॑र्दा॒ता वस्व॑दात् ॥९॥(५)॥

रास्व॑ । इय॑त् । सो॒म॒ । आ । भूयः॑ । भ॒र॒ ।
दे॒वः । न॒ः । स॒वि॒ता । वसोः॑ । दा॒ता । वसु॑ । अ॒दा॒त् ॥ ह्रीं ॥९॥(५)॥

सा– कात्यायनः – " लब्धमालभ्य वाचयति रास्वेयत् " (काश्रौ ७.५.१६) इति । क्रतौ देयं यद् द्रव्यं यद्यत् परिचारकैरानीतं तत् सर्वमुपस्पृश्येमं मन्त्रं पठेत् । पाठस्तु– ' रास्वेयत् सोमा भूयो भर । देवो नः सविता वसोर्दाता वस्वदात् ' इति । हे ᵛसोम एतन्नामक देव, ᵛइयत् ᵛरास्व एतावद् धनं देहि । ᵛभूयः पुनरपि ᵛआ ᵛभर धनमाहर । ᵛवसोः धनस्य ᵛदाता ᵛसविता ᵛदेवः ᵛनः अस्मभ्यं ᵛवसु ᵛअदात् पूर्वमपि धनं दत्तवान् । भूयः इत्यस्य पदस्य अपरिमितपशुरूपधनाहरणे तात्पर्यम् । तदाह तित्तिरिः – " सोमाऽऽ भूयो भरेत्याहापरिमितानेव पशूनव रुन्द्धे " (तैसं ६.१.४) इति ॥९॥

इति चतुर्थेऽध्याये पञ्चमोऽनुवाकः ॥५॥

---

5. P1 देव द्योतनात्मक for देवः द्योतनात्मकः
6. H1 S1 C सर्वत्र प्राणिव्रतस्य for सर्व° ... व्रतस्य; P1 om. त्वम्
8. H1 S1 C after तद् ins. एतद्
10. H1 अपस्तरस्य for वत्सस्य
19. H1 S1 C देयद्रव्यं for देयं यद्द्रव्यं
24. CS1 तुरीये for चतुर्थे

आ– लब्धमालभ्य वाचयति– ‘ रास्वेयत् सोम ’ इति । सौम्या निचृत् गायत्री । हे ᵛसोम, ᵛइयद् धनं परिमितं धनं ᵛरास्व, रा दाने, देहि । किं च ᵛभूयः पुनः धनम् ᵛआ ᵛभर आहर । “ हृग्रहोर्भश्छन्दसि ” (पा ८·२·३२ वा १) इति हकारस्य भकारः । ᵛनः अस्मभ्यं ᵛसविता ᵛदेवः ᵛवसोः धनस्य ᵛदाता त्वमेव सविता च पूर्वमपि ᵛवसु ᵛअदात् बहुधनं दत्तवान् ॥९॥(५)॥

[इति पञ्चमोऽनुवाकः]

[अथ षष्ठोऽनुवाकः]

सा– पञ्चमे व्रतकरणादिमन्त्रा उक्ताः । षष्ठे सोमक्रयण्यानयनमन्त्रा उच्यन्ते ।

ए॒षा ते॑ शुक्र त॒नूरे॒तद्वर्च॒स्तया॒ सं भ॑व॒ भ्राजं॑ गच्छ ।
जूर॑सि धृ॒ता मन॑सा॒ जुष्टा॒ विष्ण॑वे ॥१॥
तस्या॑स्ते स॒त्यस॑वसः प्र॒स॒वे त॒नु य॒न्त्रम॑शीय॒ स्वाहा॑ ।
च॒न्द्रम॑सि शु॒क्रम॑स्य॒मृत॑मसि वैश्वदे॒वम॑सि ॥२॥

ए॒षा । ते॒ । शु॒क्र॒ । त॒नूः । ए॒तत् । वर्चः॑ । तया॑ । सम् । भ॒व॒ । भ्राज॑म् । ग॒च्छ॒ ।
जूः । अ॒सि॒ । धृ॒ता । मन॑सा । जुष्टा॑ । विष्ण॑वे ॥सैं॥१॥
तस्याः॑ । ते॒ । स॒त्यस॑व॒स इति॑ स॒त्यऽस॑वसः । प्र॒स॒व इति॑ प्र॒ऽस॒वे ।
त॒नु । य॒न्त्रम् । अ॒शी॒य॒ । स्वाहा॑ ।
च॒न्द्रम् । अ॒सि॒ । शु॒क्रम् । [अ॒सि॒ ।] अ॒मृत॑म् । [अ॒सि॒] ।
वै॒श्व॒दे॒वमिति॑ वै॒श्व॒ऽदे॒वम् । [आ॒सि॒] ॥ठीं॥२॥

कात्यायनः–“ ध्रौवं जुह्वां चतुर्विगृह्णाति । बर्हिस्तृणेन हिरण्यं बद्ध्वाऽवदधात्येषा त इति ” (काश्रौ ७·६·७-८) इति । ध्रुवायां स्थितमाज्यं जुह्वां गृहीत्वा तस्मिन्नाज्ये दर्भतृणेन बद्धं हिरण्यमवदध्यात् । पाठस्तु– ‘ एषा ते शुक्र तनूरेतद्वर्चस्तया सं भव भ्राजं गच्छ ’ इति । हे ᵛशुक्र, दीप्यमानाग्ने, ᵛते तव ᵛएषा ᵛतनूः दृश्यमानमाज्यरूपं शरीरम्, ᵛएतत् आज्ये प्रक्षिप्यमाणं हिरण्यं ᵛवर्चः तदीयं तेजः, ᵛतया ᵛसंभव आज्यरूपया तन्वा एकीभव । ततः ᵛभ्राजं ᵛगच्छ हिरण्यगतां दीप्तिं प्राप्नुहि । एतन्मन्त्रपाठेनाग्नेः सतेजस्त्वं सतनुत्वं च संपद्यते । “ सतेजसमेवैनꣳ सतनुं करोति ” (तैसं ६·१·७) इति ॥

कात्यायनः – “ जूरसीति जुहोति ” (काश्रौ ७·६·९) इति । पाठस्तु– ‘ जूरसि धृता मनसा जुष्टा विष्णवे । तस्यास्ते सत्यसवसः प्रसवे तनु यन्त्रमशीय स्वाहा ’ इति । हे सोमक्रयणि, वाग्रूपा त्वं ᵛजूः ᵛअसि वेगयुक्ताऽसि, तथा ᵛमनसा ᵛधृता नियमिताऽसि । ᵛविष्णवे ᵛजुष्टा यज्ञार्थं प्रीतियुक्ताऽसि । ᵛसत्यसवसः

---

7. V1 S1 C °वरण° for °चरण°
19. C S1 om. ते

अवितथाभ्यनुज्ञायाः ᵛतस्याः ᵛते तथाविधायास्तव सोमक्रयण्याः ᵛप्रसवे अनुज्ञायां सत्यां ᵛतनु स्वल्पं ᵛयन्त्रं नियमनम् ᵛअशीय प्राप्नुयाम् । विनयोक्त्या नियमस्य स्वल्पत्वमुच्यते । परमार्थतस्तु नियमस्य यज्ञसमाप्तिपर्यन्तत्वात् महत्त्वम् । ᵛस्वाहा इदमाज्यं सुहुतमस्तु । तमेतं मन्त्रं तित्तिरिर्विभज्य व्याचष्टे– “ वाग्वा एषा यत् सोमक्रयणी जूरसीत्याह यद्धि मनसा जवते तद्वाचा वदति धृता मनसेत्याह मनसा हि वाग्धृता जुष्टा विष्णव इत्याह यज्ञो वै विष्णुर्यज्ञायैवैनां जुष्टां करोति तस्यास्ते सत्यसवसः प्रसव इत्याह सवितृप्रसूतामेव वाचमव रुन्द्धे ” (तैसं ६·१·७) इति । जवते शीघ्रकर्तव्यतामवगच्छतीत्यर्थः ॥

कात्यायनः – “ चन्द्रमसीति हिरण्यमुद्धृत्य ” (द्र.काश्रौ ७·६·१०) इति । पुरा जुह्वां बद्ध्वा स्थापितं हिरण्यमुद्धरेत् । पाठस्तु– ‘ चन्द्रमसि शुक्रमस्यमृतमसि वैश्वदेवमसि ’ इति । हे हिरण्य, त्वं ᵛचन्द्रम् ᵛअसि आह्लादहेतुर्भवसि । चदि आह्लादे । ᵛशुक्रम् ᵛअसि दीप्यमानमसि । ᵛअमृतम् ᵛअसि विनाशरहितमसि । अग्निसंयोगेऽपि हिरण्यस्य विनाशाभावः प्रसिद्धः । ᵛवैश्वदेवम् ᵛअसि सर्वदेवसंबन्ध्यसि । सर्वोऽपि देवो हिरण्यदानादिना तुष्यत्येव ॥१–२॥

आ– ‘ एषा ते ’ द्वावर्धर्चावेकाऽनुष्टुप् । पूर्वार्धर्चो हि हिरण्यदेवत्य उत्तरो वाग्देवत्यः । विनियोगो ध्रौवाज्ये हिरण्यं निदधाति । हे ᵛशुक्र, आज्य ᵛते तव ᵛएषा हिरण्यलक्षणा ᵛतनूः शरीरम्, ᵛएतत् हिरण्यलक्षणं ᵛवर्चः तेजः, ᵛतया तन्वा ᵛसंभव एकीभव च । ᵛभ्राजं दीप्तिमन्तं सोमं ᵛगच्छ ।

जुहोति– ‘ जूरसि ’ इति । जीव प्राणधारण इत्यस्य डुप्रत्यये ᵛजूः इति भवति । या त्वं जीवनम् ᵛअसि । “ धिया धिया ह्येतया मनुष्या जुज्यूषन्ति ” (शब्रा ३.२.४.१६) इति श्रुतेः । या त्वं ᵛधृता धारयिता ᵛमनसा, ᵛजुष्टा ᵛविष्णवे विष्णोः सोमस्य मनसा जुष्टा अभिरुचिता च या जूरसीति ॥१॥

‘ तस्यास्ते ’ इति लिङ्गोक्तदेवत्या निचृत् पङ्क्तिः । ᵛतस्याः ᵛते तव ᵛसत्यसवसः अवितथाभ्यनुज्ञायाः ᵛप्रसवे अभ्यनुज्ञायां वर्तमानाः । ᵛतनु, विभक्तिपरिणामः, तनोः । ᵛयन्त्रम् अस्य शरीरस्य दृढत्वम् । ᵛअशीय, अशू व्याप्तौ, व्याप्नुयामः आ यज्ञपरिसमाप्तेः । ᵛस्वाहा सुहुतमस्तु ॥

---

1. P1 °ज्ञातायास् for ज्ञायास्
4. P1 C V1 S1 C ध्यायते for जवते
6. V1 S1 C °प्रसवम् for °प्रसूताम्
9. V1 S1 C after आह्लादे add इति धातुः
11. P1 V1 तुष्यते च for तुष्यत्येक
16. H1 जुप्रत्यये corrected as डुप्रत्यये
21. H1 °पातिनामं corrected as °परिणामः
22. H1 दास्याशरस्य corrected as अस्य शरीरस्य

सोमक्रयण्यानयनमन्त्राः]

हिरण्यमुद्धरति– ‘ चन्द्रमासि ’ इति । हिरण्यदेवत्यम् । ᵛशुक्रं रेतः । अग्नेः रेतः ᵛअसि । ᵛचन्द्रम् ᵛअसि । चदि आह्लादे । आह्लादे हेतुरसि । ᵛअमृतं मृतिविरोधि ᵛअसि । ᵛवैश्वदेवम् ᵛअसि सर्वदेवत्योऽसि ॥१-२॥

चिदसि मनाऽसि धीरसि दक्षिणाऽसि
क्षत्रियाऽसि यज्ञियाऽस्यदितिरस्युभयतःशीर्ष्णी ।
सा नः सुप्राची सुप्रतीची भव ॥३॥
मित्रस्त्वा पदि बध्नीतां पूषाऽध्वनस्पात्विन्द्रायाध्यक्षाय ।
अनु त्वा माता मन्यतामनु पिताऽनु भ्राता सगर्भ्योऽनु सखा सयूथ्यः ॥४॥
सा देवि देवमच्छेहीन्द्राय सोमम् ।
रुद्रस्त्वाऽऽ वर्तयतु स्वस्ति सोमसखा पुनरेहि ॥५॥(६)॥

चित् । [असि ।] मना । [असि] । धीः ।
दक्षिणा । क्षत्रिया । यज्ञिया । अदितिः । उभयतःशीर्ष्णीत्युभयतःऽशीर्ष्णी ।
सा । नः । सुप्राचीति सुऽप्राची । सुप्रतीचीति सुऽप्रतीची । भव ॥र्णी॥३॥
मित्रः । त्वा । पदि । बध्नीताम् । पूषा । अध्वनः । पातु । इन्द्राय । अध्यक्षायेत्यधिऽअक्षाय ।
अनु । त्वा । माता । मन्यताम् । पिता । [अनु ।] भ्राता । सगर्भ्य इति सऽगर्भ्यः ।
[अनु ।] सखा । सयूथ्य इति सऽयूथ्यः ॥ढों॥४॥
सा । देवि । देवम् । अच्छ । इहि । इन्द्राय । सोमम् ।
रुद्रः । त्वा । आ । वर्तयतु । स्वस्ति । सोमसखेति सोमऽसखा ।
पुनः । आ । इहि ॥खें॥५॥(६)॥

सा– कात्यायनः – “ चिदसीत्येनामभिमन्त्रयते ” (काश्रौ ७.६.१५) इति । एनां सोमक्रयणीमित्यर्थः । पाठस्तु–‘ चिदसि मनाऽसि धीरसि दक्षिणाऽसि क्षत्रियाऽसि यज्ञियाऽस्यदितिरस्युभयतःशीर्ष्णी । सा नः सुप्राची सुप्रतीची भव ॥ मित्रस्त्वा पदि बध्नीतां पूषाऽध्वनस्पात्विन्द्रायाध्यक्षाय । अनु त्वा माता मन्यतामनु पिताऽनु भ्राता सगर्भ्योऽनु सखा सयूथ्यः । सा देवि देवमच्छेहीन्द्राय सोमम् । रुद्रस्त्वाऽऽ वर्तयतु स्वस्ति सोमसखा पुनरेहि ’ इति । हे वाग्देवतारूपे सोमक्रयणि, त्वं चिदादिशब्दप्रतिपाद्या ᵛअसि । देहादिसंघातस्याचेतनत्वं व्यावर्त्य चेतनत्वं संपादयती अन्तःकरणस्य चित्तमनोबुद्धय इति तिस्रो वृत्तयः । तदेवात्र चिदित्युच्यते । लोके यः बाह्यवस्तुषु वा निर्विकल्परूपं सामान्यज्ञानं जनयन्ती वृत्तिश्चित्तम् । तदेवात्र चिदित्युच्यते । लोके यः

---

25. V1 S1 C om. तिस्रो; V1 °संघातस्य चेतनत्वं व्यावर्त्याचेतनत्वं for °संघातस्याचेतनत्वं व्यावर्त्य चेतनत्वं; V1 S1 C संपादयता for संपादयती

कश्चित् पदार्थः एवं भवति वा न वेति संकल्पविकल्पौ कुर्वाणा वृत्तिर्मनः। तदेवात्र मनेत्युच्यते। भवत्येवेति निश्चयरूपा वृत्तिर्बुद्धिः। सैवात्र धीशब्देनोच्यते। सोमक्रयण्याश्चिन्मनोधीरूपत्वेन प्रशंसा क्रियते। तत्र तित्तिरिर्दर्शयति– "वाग्वा एषा यत् सोमक्रयणी चिदसि मनाऽसीत्याह शास्त्येवैनामेतत्" (तैसं ६·१·७) इति। वागात्मिकां सोमक्रयणीं चिदादिशब्दवाच्यामित्येवं प्रशंसतीत्यर्थः। चिदादिरूपत्वमुपचारेण संपाद्य प्रशंसा कृता। दक्षिणादिरूपत्वेन तु विद्यमानैव प्रशंसा क्रियते। कर्मसु गवां देयद्रव्यत्वेन दक्षिणात्वं प्रसिद्धम्। सोमक्रयसाधनत्वेन यज्ञसंबन्धित्वात् यज्ञियात्वम्। वेदेषु क्षत्रजात्यभिमानी सोमः। तथा च बृहदारण्यके समाम्नायते– "यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः" (बृउ १·४·११) इति। तेन सोमेन क्षत्रेणाभिमन्तव्यस्य सोमलताद्रव्यस्य क्रयहेतुत्वेन क्षत्रियात्वम्। ज्योतिष्टोमस्याद्यन्तयोः प्रायणीयोदयनीययोः अदितिदेवताकत्वात् सेयमदितिः ᵛउभयतःशीर्ष्णी। तद्रूपत्वं चास्याः क्रयद्वारा तत्संबन्धित्वादुपचर्यते। यथोक्तमर्थं तित्तिरिर्दर्शयति– "दक्षिणाऽसीत्याह दक्षिणा ह्येषा यज्ञियाऽसीत्याह यज्ञियामेवैनां करोति क्षत्रियाऽसीत्याह क्षत्रिया ह्येषाऽदितिरस्युभयतःशीर्ष्णीत्याह यदेवाऽऽदित्यः प्रायणीयो यज्ञानामादित्य उदयनीयस्तस्मादेवमाह" (तैसं ६·१·७) इति। ᵛसा पूर्वोक्तचिदादिरूपा त्वं ᵛनः अस्मदर्थं ᵛसुप्राची ᵛसुप्रतीची ᵛभव, प्रथमं सोमस्य क्रेतारं प्रति सुष्ठु प्राङ्मुखी गत्वा पश्चादस्मान् प्रति समागन्तुं सुष्ठु प्रत्यङ्मुखी भव ॥३॥

ᵛमित्रः हितकारी देवः ᵛत्वा ᵛपदि ᵛबध्नीतां दक्षिणपादे बन्धनं करोतु। तथा ᵛपूषा पोषको देवः ᵛअध्वनः ᵛपातु भयोपेतात् मार्गात् त्वां पालयतु। सोमयागस्य ᵛअध्यक्षाय ᵛइन्द्राय स्वामिने देवाय। तत्प्रीत्यर्थं सोमक्रयसाधनत्वेन ᵛमाता ᵛत्वा ᵛअनुमन्यतां त्वदीयमाता त्वामङ्गीकरोतु। एवं पित्रादयोऽप्यनुमन्यन्ताम्। ᵛसगर्भ्यः त्वया सहैकस्मिन् वा गर्भेऽवस्थितो वत्सः ᵛभ्राता ᵛअनु त्वत्तः पूर्वं पश्चाद्वोत्पन्नः, ᵛसखा सहचारी वत्सः, स एव ᵛसयूथ्यः, एकस्मिन् गोसमूहे वर्तमानत्वात् ॥४॥

हे ᵛदेवि, सोमक्रयणि, ᵛसा त्वम् ᵛइन्द्राय ᵛसोमम् ᵛअच्छेहि इन्द्रार्थं सोमद्रव्यं प्राप्तुं गच्छ। ᵛरुद्रः ᵛत्वा ᵛआवर्तयतु सोमं गृहीत्वा स्थितां त्वां रुद्रो देवोऽस्मान् निवर्तयतु। सोमो देवः सखा यस्यास्तव सा त्वं ᵛसोमसखा असि। क्षेमेण ᵛपुनः ᵛएहि भूयोऽप्यागच्छ। "मित्रस्त्वा पदि बध्नीताम्" (कासं ४·६·४) इत्यादिमन्त्रव्याख्यातमर्थं तित्तिरिः– "बद्धवद्धा स्यात्" (तैसं ६·१·७) इत्यादिना विस्पष्टं प्रपञ्चयामास ॥५॥ (६) ॥

इति चतुर्थेऽध्याये षष्ठोऽनुवाकः ॥६॥

---

1. V1 S1 C मन इति for मनेति
4. V1 वागात्मिका सोमक्रयणी for वागात्मिकां सोमक्रयणीं; V1 S1 C °वच्या त्वम् for वाच्याम्, corrected it °वाच्यत्वेनैवम्
5. V1 S1 C om. कर्मसु .. समाम्नायते। (L.18)
9. V1 S1 C वास्याः for चास्याः
11. V1 S1 C यमग्नियाम् for यज्ञियाम्
12. P1 पूर्वोक्ता for पूर्वोक्त°
13. V1 S1 C प्रथम° for प्रथमं
18. P1 om. वा
21. V1 देवता for देवो°

आ— सोमक्रयणीमामन्त्रयति अध्यारोपकल्पनया वाग्रूपया । ‘चिदसि’ इत्यादयस्त्रयो मन्त्राः गोदेवत्याः । द्वयोस्तु पङ्क्तिः । उत्तरोष्णिक् । चिती संज्ञाने । संज्ञानात्मका ^{v}असि । ^{v}मनः । मन संज्ञाने । प्रज्ञा ^{v}असि । या च ^{v}धीः निश्चयात्मिका बुद्धिः ^{v}असि । या च त्वं ^{v}दक्षिणा ^{v}असि । दक्षयतीति दक्षिणा । या च त्वं ^{v}क्षत्रिया ^{v}असि । क्षतात् त्रायत इति क्षत्रिया सा । या च ^{v}यज्ञिया ^{v}असि यज्ञसंबन्धिनी यज्ञिया असि । ^{v}अदितिः ^{v}असि । दो अवखण्डने । अखण्डिताऽसि अदीनाऽसीति वा । उभयतःशीर्ष्णी उभयतोमुखी । सा या त्वमुक्तगुणासि ^{v}सा त्वं ^{v}नः अस्माकं ^{v}सुप्राची [सुष्टु] शोभनं [यथा तथा] प्रागञ्चनशीला ^{v}भव सोममभिगच्छेत्यर्थः । ^{v}सुप्रतीची भव । अञ्चु गतिपूजनयोः । साधु अस्मान् प्रति गमनशीला भव । सोमं गृहीत्वाऽऽगच्छेत्यर्थः ॥३॥

‘मित्रस्त्वा’ इति । ^{v}पदि तव पादे त्वां गां ^{v}मित्रः आदित्यः ^{v}बध्नीतां बध्नातु अनुबध्नातु रक्षणाय । गमने ^{v}पूषा । “इयं वै [पृथिवी] पूषा” (शब्रा ६.३.२.८) इति श्रुतेः । इयं पृथिवी पूषा ^{v}अध्वनः मार्गात् त्वां ^{v}पातु । ^{v}इन्द्राय ^{v}अध्यक्षाय इति षष्ठ्यर्थे चतुर्थी । इन्द्रार्थमिति । अधि उपरि अक्षिणी परितो वा यस्य सः, तस्य अध्यक्षस्य इन्द्रस्य संबन्धिनः सोममाहर्तुं प्रवृत्तां त्वां ^{v}माता पृथिवी ^{v}अनु ^{v}मन्यताम् । ^{v}पिता द्यौः ^{v}अनु ^{v}मन्यताम् । भरणयुक्तो ^{v}भ्राता ^{v}अनु मन्यताम् । समानगर्भजातिषु साधुः ^{v}सगर्भ्यः । [समानयूथप्रभवः ^{v}सयूथ्यः ।] समानख्यातियुक्तः ^{v}सखा ^{v}अनु मन्यताम् ॥४॥

किं च सोमं प्रति गमने या चैवमस्माभिः कृतसामग्रीका ^{v}सा त्वं हे ^{v}देवि देवनादिगुणयुक्ते. ^{v}अच्छ आभिमुख्येन ^{v}इन्द्राय इन्द्रार्थं ^{v}देवं ^{v}सोमम् ^{v}इहि सोममाहर्तुं सोमं प्रति गच्छ । ^{v}रुद्रः ^{v}त्वा ^{v}आवर्तयतु सोमं गृहीत्वा स्थितां त्वां रुद्र एव [आ]वर्तयतु । ^{v}स्वस्ति अविनाशेन क्षेमेण । ^{v}सोमसखा, सोमः सखा यस्याः गोः सा सोमसखा । सोमेन सह ख्यायमाना त्वं ^{v}पुनः ^{v}एहि पुनरागच्छ ॥५॥(६)॥

[इति षष्ठोऽनुवाकः]

---

1. H1 वाग्रूषा corrected as वाग्रूपया
6. अवखाण्डिता corrected as अखण्डिता
8. H1 प्रत्वा corrected as साधु अस्मान्
10. H1 गम corrected as गां
18. H1 हे अच्छ भिग्मते corrected as अच्छ आभिमुख्येन; H1 षमां इहि सोममाह त्वं सोमं प्रतीच्छ corrected as सोमम् इहि । सोममाहर्तुं सोमं प्रति गच्छ ।

[अथ सप्तमोऽनुवाकः]

सा– षष्ठे सोमक्रयण्यानयनमन्त्रा उक्ताः । सप्तमे सोमक्रयण्यनुगमनादिमन्त्रा उच्यन्ते ।

वस्व्य॒स्यदि॑तिरस्या॒दि॒त्याऽसि॑ रु॒द्राऽसि॑ च॒न्द्राऽसि॑ ।
बृह॒स्पति॑ष्ट्वा सु॒म्ने र॑म्णातु रु॒द्रो वसु॑भि॒रा च॑के ।।१।।

वस्वी॑ । अ॒सि॒ । अदि॑तिः । आ॒दि॒त्या । [आ॒सि॒ ।] रु॒द्रा । च॒न्द्रा ।
बृह॒स्पति॑ः । त्वा॒ । सु॒म्ने । र॒म्णा॒तु॒ । रु॒द्रः । वसु॑भि॒रिति॒ वसु॑ऽभिः । आ । च॒क्रे ।।घुं।।१।।

कात्यायनः – "नीयमानामनुगच्छतो वस्व्यसीति" (काश्रौ ७.६.१६) इति । अनुगच्छतोऽध्वर्युयजमानावित्यर्थः । पाठस्तु– 'वस्व्यस्यदितिरस्यादित्याऽसि रुद्राऽसि चन्द्राऽसि । बृहस्पतिष्ट्वा सुम्ने रम्णातु रुद्रो वसुभिरा चके' इति । सोमक्रयणी गौर्वसुरूपेणादितिरूपेणादित्यरूपेण रुद्ररूपेण चन्द्ररूपेण च स्तूयते 'वसु' इत्यादिभिः पञ्चभिर्वाक्यैः । किं च ᵛबृहस्पति देवः त्वां ᵛसुम्ने ᵛरम्णातु त्वां सुखं रमयतु । ᵛआचके इति कान्तिकर्मसु (निघण्टु २.६.११) पठितम् । ᵛरुद्रः देवः ᵛवसुभिः अष्टभिर्देवैः सह त्वां रक्षितुं कामयत्वित्यर्थः ॥ (१) ॥

आ– उदीचीं नीयमानामनुगच्छति 'वस्व्यसि' इति । सोमक्रयणीदेवत्यमनुष्टुप् बृहती वा । सोमक्रयणी गौः वसुरूपेणा-[दितिरूपेणा] दित्यरूपेण रुद्ररूपेण चन्द्ररूपेण [च] स्तूयते । ᵛवस्वी वसुरूपिणी त्वम् ᵛअसि । किं च ᵛबृहस्पतिः देवः ᵛत्वा त्वां ᵛसुम्ने ᵛरम्णातु संयमयतु । रम्णातिः संयमनकर्मा । ᵛरुद्रः ᵛवसुभिः सह ᵛआचके । आचक इति कान्तिकर्मसु पठितः । त्वां रक्षितुं रुद्रः कामयत्वित्यर्थः ।।१।।

अदि॑त्यास्त्वा मू॒र्धन्ना जि॑घर्मि दे॒व॒यज॑ने पृथि॒व्याः ।
इळा॑यास्प॒दम॑सि घृ॒तव॒त् स्वाहा॑ ।।२।।

अदि॑त्याः । त्वा॒ । मू॒र्धन् । आ । जि॒घ॒र्मि॒ । दे॒व॒यज॑न॒ इति॑ दे॒व॒ऽयज॑ने । पृ॒थि॒व्याः ।
इळा॑याः । प॒दम् । अ॒सि॒ । घृ॒तव॒दिति॑ घृ॒तऽव॑त् । स्वाहा॑ ।।ज्यि।।२।।

सा–"षट् पदान्यतीत्य सप्तमं पर्युपविशन्ति । हिरण्यमस्मिन्निधायाभिजुहोत्यदित्यास्त्वेति" (काश्रौ ७.६.१७-१८) इति । पाठस्तु – 'अदित्यास्त्वा मूर्धन्ना जिघर्मि देवयजने पृथिव्याः ।

---

1. P1 °क्रयणानु° for °क्रयण्यनु
9. V1 S1 C om. अदितिरूपेण
11. C काम° for कान्ति°
14. H1 °रूपिति corrected as रूपिणी

इळायास्पदमसि घृतवत् स्वाहा ’ इति । ᵛअदित्याः अखण्डितायाः ᵛपृथिव्याः भुवः ᵛमूर्धन् मूर्धनि शिरोरूपे ᵛदेवयजने देवानां यागयोग्यस्थाने ᵛत्वा ᵛआजिघर्मि । हे सोमक्रयणीपद त्वामाक्षारयामि । घृ क्षरणदीप्त्योः । देवयजनस्य “ पृथिवी मूर्धा ” इति प्रसिद्धिं तित्तिरिर्दर्शयति– “ पृथिव्या ह्येष मूर्धा यद्देवयजनम् ” (तैसं ६.१.८) इति । किं च ᵛइळायाः ᵛपदम् ᵛअसि । हे स्थानविशेष, गोः पादोऽसि । तेन पादेनाङ्कितत्वात् तद्रूपत्वम् । तच्च पदं ᵛघृतवत् घृतसंयुक्तं तथा कर्तुं ᵛस्वाहा जुहोमि । इळाख्यायाः गोः पादस्य घृत [व] त्वं घृतस्रवणहेतुत्वादवगन्तव्यम् । तच्च तित्तिरिर्दर्शयति– “ यदेवास्यै पदाद् घृतमपीड्यत तस्मादेवमाह ” (तैसं ६,१.८) इति । “ सा यत्र यत्र न्यक्रामत् ततो घृतमपीड्यत (तैसं २.६.७) इति च ॥२॥

आ– ‘ आदित्यास्त्वा ’ इति । आज्यदेवत्योष्णिक् । हे आज्य, ᵛअदित्याः ᵛपृथिव्याः ᵛमूर्धन् मूर्ध्नि ᵛआजिघर्मि आक्षारयामि । घृ क्षरणदीप्त्योः । पृथिव्याः संबन्धिनि ᵛदेवयजने ᵛइळायाः गोपदनियमित त्वं गोः ᵛपदम् ᵛअसि । अतः ᵛघृतवत् घृतसंयुक्तं त्वां कर्तुं जुहोमीति शेषः ॥२॥

अ॒स्मे र॑मस्वा॒स्मे ते॒ बन्धुः॑ ।
त्वे रायो॑ अ॒स्मे रायः॑ ॥३॥

अ॒स्मे इत्य॒स्मे । र॒म॒स्व॒ । अ॒स्मे इत्य॒स्मे । ते॒ । बन्धुः॑ ।
त्वे इति॒ त्वे । रायः॑ । अ॒स्मे इत्य॒स्मे । रायः॑ ॥दौ॥३॥

सा– कात्यायनः – “ स्फ्येन पदं त्रिः परिलिखत्यस्मे रमस्वेति ” (काश्रौ ७.६.१९) इति । [पाठस्तु– ‘ अस्मे रमस्व ’ इति ।] हे गोपद, त्वम् ᵛअस्मे अस्मासु ᵛरमस्व क्रीडां कुरु ॥

कात्यायनः – “ समुद्धृत्य पदं स्थाल्यामावपत्यस्मे ते बन्धुरिति ” (काश्रौ ७.६.२०) इति । [पाठस्तु– ‘ अस्मे ते बन्धुः ’ इति ।] हे सोमक्रयणीपद, ᵛते तव ᵛअस्मे ᵛबन्धुः वयं बन्धुभूताः स्मः ॥

कात्यायनः – “ यजमानाय पदं प्रयच्छति त्वे राय इति ” (काश्रौ ७.६.२१) इति । [पाठस्तु– ‘ त्वे रायः ’ इति ।] हे यजमान, ᵛत्वे त्वयि ᵛरायः धनानि एतत्पदरूपेण तिष्ठन्त्विति शेषः । अनेन मन्त्रेण धनसंपत्तिं तित्तिरिर्दर्शयति– “ त्वे राय इति यजमानाय प्र यच्छति यजमान एव रयिं दधाति (तैसं ६.१.८) इति ।

---

1. P1 om. मूर्द्धन्
2. V1 S1 C after दीप्त्योः add इति धातुः
3. V1 S1 C °मूर्धत्व° for मूर्द्धेति
4. P1 गो° for गोः
5. V1 S1 C ° तद्रूपत्वं गन्तव्यम् । (L)
6. V1 S1 C अस्य, P1 अस्याः for अस्यै, P1 पदा for पदाद्
17. V1 S1 C गोः for गो°; C om. अस्मे
22. C S1 पदे, V1 पदेन for मन्त्रेण

कात्यायनः – "अस्मे राय इति यजमानः प्रतिगृह्णाति" (द्र. काश्रौ ७.६.२२) इति। [पाठस्तु– 'अस्मे रायः' इति ।] ᵛअस्मे अस्मासु यजमानेषु ᵛरायः धनानि पदरूपेण तिष्ठन्तु ॥३॥

आ– पदं परिलिखति– 'अस्मे रमस्व' इत्यादीनां षण्णां लिङ्गोक्तदेवता। ᵛअस्मे ᵛरमस्व अस्मासु रमस्व रतिं कुरु। पदं स्थाल्यामावपति– 'अस्मे ते बन्धुः' इति। वयं ᵛते ᵛबन्धुः। बध्नातीति बन्धुः। बन्धुभूता यजमानाः। पदे ᵛत्वे त्वयि ᵛरायः। "पशवो वै रायः" (शब्रा ३.३.१.८)। त्वयि पशवः सन्त्विति शेषः। पदं यजमाने प्रतिगृह्णाति– 'अस्मे रायः' इति। ᵛअस्मे मयि पशवः सन्त्विति शेषः ॥३॥

मा व॒यꣳ रा॒यस्पोषे॑ण॒ वि यौ॑ष्म॒ तोतो॒ राय॑ः ।
सम॑ख्ये दे॒व्या धि॒या सं दक्षिणयो॒रुच॑क्षसा ।
मा म॒ आयु॑ः प्रमो॑षी॒र्मो अ॒हं तव॑ वी॒रान् विदे॑य॒
तव॑ दे॑वि सं॒दृशि ॥४॥(७)॥

मा । व॒यम् । रा॒यः । पोषे॑ण । वि । यौ॒ष्म॒ । तोत॑ः । राय॑ः ।
सम् । अ॒ख्ये॒ । दे॒व्या । धि॒या । सम् । दक्षि॑णया । उ॒रुच॑क्ष॒सेत्यु॒रुऽच॑क्षसा ।
मा । मे॒ । आयु॑ः । प्र । मो॒षी॒ः । मो इ॒ति॒ मो । अ॒हम् । तव॑ । वी॒रान् । वि॒दे॒य॒ ।
तव॑ । दे॒वि॒ । सं॒दृशी॒ति॑ स॒म्ऽदृशि॑ ॥ ण्योः ॥४॥ (७) ॥

सा– कात्यायनः – "मा वयमित्यध्वर्युरात्मानं संस्पृशति" (काश्रौ ७.६.२३) इति। पाठस्तु– 'मा वयꣳ रायस्पोषेण वि यौष्म' इति। ᵛवयम् अध्वर्युप्रभृतयः ᵛरायः ᵛपोषेण धनस्य पुष्ट्या ᵛमा ᵛवियौष्म वियुक्ता मा भवाम ॥

कात्यायनः – "हृत्वा पत्न्यै पदं प्रयच्छति। नेष्टा तोत इत्येनां वाचयति" (काश्रौ ७.६.२४-२५) इति। तोतशब्दः कलत्रवाची। तस्मिन् कलत्रे ᵛरायः पदरूपाणि धनानि तिष्ठन्तु। पत्न्यै पदप्रदानं तित्तिरिरुपपादयति– "तोते राय इति पत्निया अर्धो वा एष आत्मनो यत् पत्नी यथा गृहेषु निधत्ते तादृगेव तत्" (तैसं ६.१.८) इति ॥

कात्यायनः –"सोमक्रयणीं च समीक्षमाणाꣳ समख्ये इति" (द्र. काश्रौ ७.६.२६) इति। 'एनां वाचयति' इत्यनुवर्तते। पाठस्तु– "समख्ये देव्या धिया सं दक्षिणयोरुचक्षसा। मा म आयुः प्र मोषीर्मो अहं तव वीरान् विदेय तव देवि संदृशि' इति। ᵛदेव्या द्योतमानया ᵛधिया बुद्ध्या ᵛसमख्ये अहं पत्नी सोमक्रयणीं सं सम्यक् यथा भवति तथा समख्ये दृष्टवत्यस्मि। किं च ᵛउरुचक्षसा विस्तीर्णदर्शनया ᵛदक्षिणया दक्षिणत्वयोग्यया गवा सोमक्रयण्या। समित्यनेनोपसर्गेण संयुज्य स्थितास्मीत्ययमर्थः उपलक्ष्यते। एवंविधे सोमक्रयणि, त्वं मे पत्न्या ᵛआयुः ᵛमा ᵛप्रमोषीः प्रमुषितं विनष्टं मा कार्षीः। ᵛमो ᵛअहं ᵛतव

---

26. V1 S1 C om. समख्ये ... °चक्षसा
27. C om. दक्षिणया

सोमक्रयण्याः ᵛतव ᵛआयुः ᵛअहं पत्नी ᵛमो प्रमोषिषमित्यध्याहारः, प्रमुषितं मा कार्षम् । किं च ᵛतव सोमक्रयण्याः ᵛसंदृशि संदर्शने सति ᵛवीरान् पुत्रान् ᵛविदेय लभेय ॥४॥ (७)॥

इति चतुर्थेऽध्याये सप्तमोऽनुवाकः ॥(७)॥

आ– अध्वर्युरात्मानमुपस्पृशति । इयं खण्डिका लिङ्गोक्तनानादेवत्या । आनुष्टुभः प्रगाथः। नानामन्त्रपक्षे तु उक्तप्रकार एव। ᵛवयं ᵛरायः ᵛपोषेण धनस्य पोषेण ᵛमा ᵛवि ᵛयौष्म। यू मिश्रणे। मा वियुक्ता स्याम । गृहीतपदां पत्नीं वाचयति– 'तोतो रायः '। ᵛतोतः त्वयि ᵛरायः पशवः सन्त्विति शेषः। सोमक्रयण्यां समीक्षितायां ' समख्ये ' इति पत्न्याशीः। आस्तारपङ्क्तिः। सोमक्रयणीतः पत्न्याशिष आशास्ते । यया ᵛदेव्या ᵛधिया त्वया अहं सोमक्रयणीं ᵛसमख्ये । ख्या प्रकथने । संदर्शनं कृतवती । कया सह स्थितामिति । ᵛउरुचक्षसा विस्तीर्णदर्शनया वाचा, यया अतीतानागतवर्तमानविप्रकृष्टादिकं ज्ञायते तया विस्तीर्णदर्शनया वाचा । ᵛसंदाक्षिणया च सह स्थितां वा समख्ये। एवंविधगुणयुक्तया सह स्थित त्वं ᵛमे ᵛआयुः ᵛमा ᵛप्रमोषीः । मुष स्तेये । माऽवखण्डेय, आयुषः खण्डनं मा कार्षीः । ᵛअहं ᵛतव ᵛवीरान् हे ᵛदेवि, ᵛतव ᵛसंदृशि तव संदर्शने सति वीरान् पुत्रान् ᵛविदेय लभेय ॥४॥(७)॥

[इति सप्तमोऽनुवाकः]

[अथाष्टमोऽनुवाकः]

सा– सप्तमे सोमक्रयण्यनुगमनमन्त्रा उक्ताः । अष्टमे यजमानवाचनादिमन्त्रा उच्यन्ते ॥

ए॒ष ते॑ गाय॒त्रो भा॒ग इति॑ मे॒ सोमा॑य ब्रूता-
दे॒ष ते॒ त्रैष्टु॑भो भा॒ग इति॑ मे॒ सोमा॑य ब्रूतात् ।
ए॒ष ते॒ जाग॑तो भा॒ग इति॑ मे॒ सोमा॑य ब्रूता-
च्छन्दोमा॒नाना॒ँ साम्रा॑ज्यं गच्छता॒दिति॑ मे॒ सोमा॑य ब्रूतात् ॥१॥

ए॒षः । ते॒ । गा॒य॒त्रः । भा॒गः । इति॑ । मे॒ । सोमा॑य । ब्रू॒ता॒त् ।
[ए॒षः । ते॒ ।] त्रैष्टु॑भः । त्रैस्तु॒भ इति॒ त्रैस्तु॑भः । [भा॒गः । इति॑ । मे॒ । सोमा॑य । ब्रू॒ता॒त् ।]
[ए॒ष । ते॒ ।] जाग॑तः । छ॒न्दो॒मा॒ना॒नामिति॑ छ॒न्दः॒ऽमा॒ना॒ना॑म् ।
साम्रा॑ज्य॒मिति॒ साम्ऽरा॑ज्यम् । ग॒च्छ॒ता॒त् । इति॑ । मे॒ । सोमा॑य । ब्रू॒ता॒त् ॥ठों॥१॥

---

1. P1 after पत्नी om. मो
3. C S1 तुरीये for चतुर्थे
9. H1 स्थितं for स्थिता

कात्यायनः – "एष त इति वाचयति" (काश्रौ ७.७.८) । आपस्तम्बोऽप्याह– "एष ते गायत्रो भाग इत्येतैर्यजमानो राजानमुपतिष्ठते" (आपश्रौ १०.२४.३५) इति । मन्त्रचतुष्टयस्य प्रतीकमिदम् । तत्र प्रथममन्त्रपाठस्तु– 'एष ते गायत्रो भाग इति मे सोमाय ब्रूतात्' इति । हे सोम, ^{v}ते तव ^{v}एषः पुरो दृश्यमानः ^{v}भागः ^{v}गायत्रः गायत्रीसंबन्धः ^{v}इति ^{v}मे एवं प्रकारं मम यजमानस्य वचनं ^{v}सोमाय ^{v}ब्रूतात् । हे अध्वर्यो, सोमाभिमानिदेवाय ब्रूहि । गायत्रीच्छन्दोऽयं[र्थं?] सोमस्य तव क्रयः न तु वधार्थमित्येष यजमानोक्तेरभिप्रायः । तमेतमभिप्रायम् "अध्वर्यो सोमाय कथय" (काशब्रा ४·३·२-८) इत्यादि कण्व आह ॥

द्वितीयतृतीयमन्त्रपाठस्तु– 'एष ते त्रैष्टुभो भाग इति मे सोमाय ब्रूतादेष ते जागतो भागः इति मे सोमाय ब्रूतात्' इति ॥ ^{v}त्रैष्टुभः त्रिष्टुप्छन्दसः संबन्धी । ^{v}जागतः जगतीछन्दसः संबन्धी । अन्यत् पूर्ववद्व्याख्येयम् ॥

चतुर्थमन्त्रपाठस्तु– 'छन्दोमानानाꣳ साम्राज्यं गच्छतादिति मे सोमाय ब्रूतात्' इति । अस्मिन् छन्दस्येतावन्त्यक्षराणीति मानं परिमाणं यैर्देवैर्ज्ञायते ते छन्दोमानास्तेषां ^{v}छन्दोमानानां संबन्धी लोकः साम्राज्यः समीचीनराज्योपेतः तल्लोकं हे सोम, ^{v}गच्छतात् त्वं प्राप्नुहि ^{v}इति ^{v}मे मम यजमानस्यैतद्वचनं ^{v}सोमाय ^{v}ब्रूतात्, हे अध्वर्यो, सोमदेवाय कथय । एतेषां मन्त्राणां तात्पर्यं तित्तिरिर्दर्शयति– "यो वै सोमꣳ राजानꣳ साम्राज्यं लोकं गमयित्वा क्रीणाति गच्छति स्वानाꣳ साम्राज्यं छन्दांसि खलु वै सोमस्य राज्ञः साम्राज्यो लोकः पुरस्तात् सोमस्य क्रयादेवमभि मन्त्रयेत साम्राज्यमेवैनं लोकं गमयित्वा क्रीणाति गच्छति स्वानाꣳ साम्राज्यम्" (तैस ३·१·२) इति । योऽयं यजमानः सोमलक्षणं सोमाभिप्रेतं राजानं समीचीनराजार्हलोकं प्रथमतो वाचा प्रापय्य संतोषं जनयित्वा पश्चात् क्रीणाति स यजमानो ज्ञातीनां मध्ये साम्राज्यं प्राप्नोति । सोमस्य तथाविधो लोकः क इति चेत् गायत्र्यादिच्छन्दोदेवता यत्र तिष्ठन्ति स एव तथाविधो लोकः । तस्मात् कारणात् सोमक्रयात् पूर्वमेतैर्मन्त्रैर्मन्त्रयित्वा क्रयं कुर्वाणः साम्राज्यं प्रापय्य क्रीतवान् भवति । तेन स्वयमपि ज्ञातीनां मध्ये साम्राज्यं प्राप्नोति ॥१॥

आ– यजमानं वाचयति । सोमदेवत्यमत्याष्टिः । हे सोम, ^{v}गायत्रः गायत्रीसंबन्धी ^{v}एषः ^{v}भागः ^{v}ते ^{v}इति ^{v}मे ममेदमेतं वचनं, हे अध्वर्यो, ^{v}सोमाय ^{v}ब्रूतात् । छन्दोऽर्थं तव क्रयो न वधार्थमित्येवं यजमानाभिप्रायः । एतमभिप्रायं हे अध्वर्यो, सोमाय कथय इति वाक्यार्थः । ^{v}एषः

---

3. C om. तत्र
6. V1 S1 C इत्यर्थः for इत्यादि; and om. कण्व आह ।
7. P1 °मन्त्रयोः for मन्त्र°
8. P1 °छन्दः° for °छन्दसः
10. C S1 तुरीय° for चतुर्थ°
11. V1 S1 C om. मानं
12. P1 एव तद् for एतद्
16. V1 S1 C after इति । add अस्यायमर्थः ।
17. V1 S1 C राजार्ह for राजार्ह°; C प्राप्य for प्रापय्य
19. P1 om. मन्त्रैर्
20. V1 S1 C प्राप्य for प्रापय्य
22. H1 ब्रुक्तावत् वंशेर्थं तव क्रयोमवध्यर्थम् corrected as ब्रूतात् । छन्दोर्थं तव क्रयो न वधार्थम् ।

ᵛत्रैष्टुभः त्रिष्टुभः संबन्धी ᵛभागः ᵛइति ᵛमे मम यजमानस्य वचनं, हे अध्वर्यो, ᵛसोमाय ᵛब्रूतात् । ᵛजागतः ᵛभागः जगतीसंबन्धी [भागः] । ᵛएषः ᵛते जागतः ᵛइति यजमानस्य वचनं हे अध्वर्यो, ᵛसोमाय ᵛब्रूतात् । ᵛछन्दोमानानाम् अस्मिन् छन्दस्येतावन्त्यक्षराणीति मानं परिमाणं येषां छन्दसां तानि छन्दोमानानि । तेषां छन्दोमानानामन्येषामपि छन्दसां ᵛसाम्राज्यम् आधिपत्यं ᵛगच्छतात् ᵛइति ᵛमे मम यजमानस्य वचनं. हे अध्वर्यो, ᵛसोमाय ᵛब्रूतात् ब्रूहीति ॥१॥

आ॒स्मा॒को॑ऽसि शु॒क्रस्ते॒ ग्र॒ह्यः॑ । वि॒चि॒त॑स्त्वा॒ वि चि॑न्वन्तु ॥२॥

आ॒स्मा॒कः । अ॒सि॒ । शु॒क्रः । ते॒ । ग्र॒ह्यः॑ ।
वि॒चि॒त इति॑ वि॒ऽचि॒त॑ः । त्वा॒ । वि । चि॒न्व॒न्तु॒ ॥धौ॥२॥

सा– कात्यायनः – " प्राङुपविश्याऽऽस्माकोऽसीति सोममालभते " (काश्रौ ७·७·९) इति । पाठस्तु– ' आस्माकोऽसि शुक्रस्ते ग्रह्यः । विचितस्त्वा वि चिन्वन्तु ' इति । हे सोम, त्वं क्रयपथमागतः सन् ᵛआस्माकः ᵛअसि अस्मदीयोऽसि । ᵛते तव संबन्धी ᵛशुक्रः एतन्नामको यो ग्रहोऽस्ति, सोऽयं ᵛग्रह्यः ग्रहेषु साधुः । एतदुपलक्षणमैन्द्रवायवादिग्रहाणामपि । ते सर्वे ग्रहा साधव इत्यर्थः । ᵛविचितः विवेकेन चयनस्य कर्तारः ᵛत्वा ᵛविचिन्वन्तु सोमरूपं त्वां विविच्य सारासारविवेकं कृत्वा सारभूतमेकत्र समूहयन्तु ॥२॥

आ – सोममालभते– ' आस्माकोऽसि ' इति । सोमदेवत्या द्विपदा अनुष्टुप् । हे सोम, क्रयपथमागतः त्वम् ᵛआस्माकः अस्मदीयः ᵛअसि । ᵛग्रह्यः ग्रहेषु साधुः । ᵛशुक्रः ग्रह्यः ᵛते तव । [उप] लक्षणार्थोऽयम् । शुक्रप्रभृतयो ग्रहास्तव ग्रहीष्यन्ते । किं च ᵛविचितः चयनकर्तारः त्वां ᵛविचिन्वन्तु ॥२॥

अ॒भि त्यं दे॒वꣳ स॑वि॒तार॑मो॒ण्यो॑ः
क॒विक्र॑तु॒मर्चा॑मि स॒त्यस॑वꣳ रत्न॒धाम॒भि प्रि॒यं म॒तिं क॒विम् ।
ऊ॒र्ध्वा यस्या॒मति॒र्भा अदि॑द्युत॒त् सवी॑मनि
हिर॑ण्यपाणिरमिमीत सु॒क्रतु॑ः कृ॒पा स्व॑ः ॥३॥

अ॒भि । त्यम् । दे॒वम् । स॒वि॒तार॑म् । ओ॒ण्यो॑ः ।
क॒विक्र॑तु॒मिति॑ क॒विऽक्र॑तुम् । अर्चा॑मि ।
स॒त्यस॑व॒मिति॑ स॒त्यऽस॑वम् । र॒त्न॒धामिति॑ र॒त्न॒ऽधाम् ।
अ॒भि । प्रि॒यम् । म॒तिम् । क॒विम् ।

---

3. H1 छन्दस्यभावन्त्याऽक्षराणाति corrected as छन्दस्येतावन्त्यक्षराणीति

* ऊर्ध्वा । यस्य॑ । अमति॑ः । भाः । अदि॑द्युतत् । सवी॑मनि । हिर॑ण्यपाणिरिति हिर॑ण्यऽपाणिः । अमिमीत । सुक्रतुरिति॑ सुऽक्रतु॑ः । कृपा । स्वरिति स्व॑ः ॥खु॥३॥

सा– कात्यायनः – "सोमं मिमीते दशकृत्वोऽभि त्यमिति" (काश्रौ ७·७·१३) इति । पाठस्तु– 'अभि त्यं देवꣳ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवꣳ रत्नधाममभि प्रियं मतिं कविम् । ऊर्ध्वा यस्यामतिर्भा अदिद्युतत् सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः' इति । ᵛत्यं ᵛदेवं यः प्रकृतः सोमाख्यो देवस्तम् ᵛअभि ᵛअर्चामि सर्वतः पूजयामि । कथभूतं देवम् ? ᵛओण्योः द्यावापृथिव्योः ᵛसवितारं सोमयागानाम् । ओण्योरिति द्यावापृथिवीनामसु (नि ३·३०·१५) पठितम् । ᵛकविक्रतुं मेधाविकर्माणम् । ᵛसत्यसवम् अवितथप्रेरणम् । ᵛरत्नधां रत्नानां धारकं पोषकं वा । ᵛअभि सर्वतः ᵛप्रियं देवानां प्रीतिविषयम् । ᵛमतिं मननयोग्यम् । ᵛकविं क्रान्तदर्शिनम् । किं च ᵛयस्य आदित्यस्य [ᵛभाः] दीप्तिः ᵛअमतिः केनापि मन्तुमशक्या सती ᵛऊर्ध्वा ऊर्ध्वगमनाभिमुखी । ᵛसवीमनि प्रसवविशेषवति देशे । यत्र नक्षत्रादीनां प्रसवः प्रवृत्तिस्तत्रेत्यर्थः । ᵛअदिद्युतत् सर्वाणि वस्तूनि द्योतितवती । ᵛहिरण्यपाणिः सुवर्णाभरणयुक्तः पाणिस्तद्युक्तः । ᵛस्वः आदित्यः । ᵛसुक्रतुः साधुसंकल्पः । ᵛकृपा अत्यन्तं कृपालुः । ᵛअमिमीत पूर्वोक्तभायुक्तः, स देवः सोमं मिमीतवान् । एतावान् सोम इति तदीयं परिमाणं निश्चितवान् ॥३॥

आ– सोमं मिमीते– 'अभि त्यम्' इति । सावित्र्यष्टिरतिशक्वरीपदा । ᵛत्यं तं ᵛदेव ᵛसवितारम् ᵛओण्योः द्यावापृथिव्यौ (व्योः ?) । ओण्योरिति द्यावापृथिवीनाम । अन्तरा वर्तमानं ᵛकविक्रतुं मेधाविकर्माणम् । ᵛसत्यसवं ᵛरत्नधाम् ᵛअभि ᵛप्रियं रत्नानां धां धारकं च । अभि सर्वतः । प्रियं सर्वजनानां प्रियम् । ᵛमतिं बुद्धिं मतिरूपं ᵛकविं क्रान्तदर्शिनम् । एवंगुणवरिष्ठं सवितारम् ᵛअभ्यर्चामि अभिपूजयामि । किं च, ᵛयस्य सवितुः ᵛअमतिः अमन्यन्तरस्या (?) विषया मतिरमतिः । [ᵛऊर्ध्वा] ऊर्ध्वाभिमुखी उत्कृष्टा वा आत्ममयी अमतिः ᵛभाः दीप्तिर्द्युतिः ᵛसवीमनि प्रसवविशेषवति देशे ᵛअदिद्युतत् [अ]द्योतयत् । ᵛहिरण्यपाणिः सुवर्णपाणिः ᵛसुक्रतुः साधुसंकल्पः ᵛस्वः आदित्यः ᵛकृपा कृपालुः ᵛअमिमीत सोमं मितवान् ॥३॥

प्रजाभ्य॑स्त्वा प्रजास्त्वा॑ऽनुप्राण॑न्तु ।
प्रजास्त्वम॑नुप्राणि॑हि ॥४॥(८)॥

1. * Mss read ऊर्ध्वाः । commentators appear to have accepted ऊर्ध्वा ।
6. S1 V1 C कृतः for प्रकृतः; V1 S1 C om. ओण्योः
8. V1 रत्नधातमं for रत्नधां; C before रत्नानां adds मम; H1 रत्नधारकं for रत्नानां धारकम् ।
10. V1 S1 C om. ऊर्ध्वा
12. P1 Trans. पाणिस् before सुवर्णा°; V1 S1 C अत्यन्त° for अत्यन्तं
13. V1 S1 C °भायुक्तः for °भायुक्तः

प्र॒जाभ्य॒ इति॑ प्र॒ऽजाभ्यः॑ । त्वा॒ । प्र॒जा इति॑ प्र॒ऽजाः । त्वा॒ । अ॒नु॒प्राण॒न्त्वित्य॑नु॒ऽप्राण॑न्तु ।
। प्र॒जा इति॑ प्र॒ऽजाः । त्वम् । अ॒नु॒प्राणि॒हीत्य॑नु॒ऽप्राणि॑हि ॥बो॥४॥(८)॥

सा– कात्यायनः – “उष्णीषेण बध्नाति प्रजाभ्यस्त्वेति” (काश्रौ ७·७·२०) इति । [पाठस्तु– ‘ प्रजाभ्यस्त्वा प्रजास्त्वाऽनुप्राणन्तु ... ’ इति] हे सोम, ˈप्रजाभ्यः प्रजानामुपकाराय ˈत्वा सोमरूपं त्वां बध्नामीति शेषः ॥

कात्यायनः – “अङ्गुल्या मध्ये विवृणोति प्रजास्त्वाऽनुप्राणन्त्विति” (काश्रौ ७·७·२१) इति । उष्णीषेण बद्धस्य सोमदेवस्य श्वासनिरोधो मा भूदिति विवरं कुर्यात् । ‘प्रजास्त्वमनुप्राणिहि’ इति मन्त्रशेषः । हे सोम, ˈत्वा अनु प्रथमतः श्वासं कुर्वन्तं त्वामनुसृत्य ᵛप्रजाः सर्वाः प्राणन्तु श्वासं कुर्वन्तु । तथा हे सोम, ˈत्वम् अपि ᵛप्रजाः अनु प्रथमतः श्वासं कुर्वतीः प्रजाः अनुसृत्य प्राणिहि श्वासं कुरु । प्रजानां तव च कदाचिदपि श्वासनिरोधो मा भूत् । किं तु परस्परमनुसृत्य श्वासः प्रवर्ततामित्यनेनाभिप्रायेण विवरं करोतीत्यर्थः ॥४॥

इति चतुर्थेऽध्यायेऽष्टमोऽनुवाकः ॥८॥

आ– उष्णीषैराबध्नाति– ‘प्रजाभ्यस्त्वा’ इत्यादीनि यजूंषि लिङ्गोक्तदेवत्यानि। ᵛप्रजाभ्यः अर्थाय ᵛत्वा त्वां सोमं बध्नामीति शेषः । “अङ्गुल्या मध्ये विवृणोति प्रजास्त्वानुऽप्राणन्तु” (काश्रौ ७·७·२१) । हे सोम, प्राणन्तमुच्छ्वसन्तं त्वामनु ᵛप्रजाः प्राणन्तु उच्छ्वसन्तु । उच्छ्वसन्तीः ᵛप्रजाः ᵛत्वम् ᵛअनुप्राणिहि ॥४॥

[इति अष्टमोऽनुवाकः ॥(८)॥]

[अथ नवमोऽनुवाकः]

सा– अष्टमे यजमानवाचनादिमन्त्रा उक्ताः । नवमे हिरण्यस्पर्शादिमन्त्रा उच्यन्ते ।

च॒न्द्रं त्वा॑ च॒न्द्रेण॑ क्रीणामि शु॒क्रꣳ शु॒क्रेणा॒मृत॑म॒मृते॑न ।
स॒ग्मे ते॒ गोर॒स्मे ते॑ च॒न्द्राणि॑ ॥१॥

च॒न्द्रम् । त्वा॒ । च॒न्द्रेण॑ । क्री॒णा॒मि॒ । शु॒क्रम् । शु॒क्रेण॑ । अ॒मृत॑म् । अ॒मृते॑न ।
स॒ग्मे । ते॒ । गोः । अ॒स्मे इत्य॒स्मे । ते॒ । च॒न्द्राणि॑ ॥कुं॥१॥

---

7. V1 S1 C (आ)श्वास° for °श्वास°
8. P1 त्वाम् for त्वा° ; P1 त्वा for त्वाम्
10. V1 S1 C किं च for किंतु
12. C S1 तुरीये° for चतुर्थे°

कात्यायनः – " चन्द्रं त्वेति हिरण्यमालभ्य वाचयति " (द्र.काश्रौ ७.८.१५) इति । पाठस्तु– " चन्द्रं त्वा चन्द्रेण क्रीणामि शुक्रं शुक्रेणामृतममृतेन " इति । हे सोम, ᵛचन्द्रं ᵛत्वा । चदि आह्लादे । फलहेतुत्वेन आह्लादकरं त्वां ᵛचन्द्रेण ᵛक्रीणामि आह्लादकरेण हिरण्येन क्रीतं करोमि । कथंभूतं त्वाम् ? ᵛशुक्रं दीप्यमानम् । ᵛअमृतं स्वादुत्वेनामृतसमानम् । कथंभूतेन चन्द्रेण ? ᵛशुक्रेण दीप्यमानेन ᵛअमृतेन अग्निसंयोगादिनापि विनाशरहितेन ॥

कात्यायनः – " सग्मे त इति सोमविक्रयिणं हिरण्येनाभिकम्पयति " (काश्रौ ७.८.१६) इति । यो हिरण्यं गृहीत्वा सोमं विक्रीणाति तमध्वर्युर्हिरण्येन अभिकम्पयेत् । तद्धस्ते हिरण्यं पुनः पुनर्दत्वा स्वीकुर्वन् व्यवहारं कुर्यादित्यर्थः । ' गोः ' इति मन्त्रशेषः । औकारस्थाने ओकारश्छान्दसः । हे सोमविक्रयिन्, ᵛते गौः ᵛसग्मे तिष्ठतु इति शेषः । या गौः सोमस्य मूल्यत्वेन तुभ्यं दत्ता सा त्वदीया गौः पुनः प्रत्यावृत्य सग्मे मदीयसंगवति यजमाने तिष्ठतु । हिरण्यमेव तवास्तु । गौर्मा भूदित्यर्थः ।

कात्यायनः – " अस्मे त इति यजमानसहितं निदधाति " (काश्रौ ७ ८.१७) इति । यजमाने प्रत्यर्पितं यद् गोद्रव्यं तत् पुनर्यजमानसहितं सोमविक्रयिणः पुरतो निदधातीत्यर्थः । ' चन्द्राणि ' इति मन्त्रशेषः । हे सोमविक्रयिन्, ᵛते ᵛचन्द्राणि तुभ्यं दत्तानि यानि हिरण्यानि तानि ᵛअस्मे अस्मासु प्रत्यावृत्य तिष्ठन्तु । तव गौरेव सोममूल्यमस्तु । हिरण्यानि मा भूवन्नित्यर्थः ॥१॥

आ– उच्छ्वसन् हिरण्यमालभ्य वाचयति । ' चन्द्रं त्वा ' इत्यादीनि यजूंषि सौम्यानि । ᵛचन्द्रम् आह्लादकरं ᵛत्वा त्वां, ᵛचन्द्रेण आह्लादकेन हिरण्येन. ᵛत्वा त्वां सोमं ᵛक्रीणामि ᵛशुक्रम् अक्लिष्टकर्माणं त्वां ᵛशुक्रेण हिरण्येन क्रीणामि । सोमेन विक्रयणं (? सोमविक्रयिणं) हिरण्येन अभिकम्पयेत् – ' सग्मे ते गोः ' इति । लिङ्गोक्तदेवत्यम् । सह गवा वर्तत इति सग्मः यजमानस्तस्मिन् । ᵛगोः, गौरिति परिणामः । ᵛते तव संबन्धिनी गौर्यजमाने वर्तत इति यजमानसहितं निदधाति । ' अस्मे ' इति । हे सोमविक्रयिन्, ᵛअस्मे अस्मासु ᵛते तव संबन्धिनीभिः ᵛचन्द्राणि हिरण्यानि वर्तन्ते ॥१॥

तप॑सस्त॒नूर॑सि प्र॒जाप॑ते॒र्वर्णः॑ । प॒र॒मेण॑ प॒शुना॑ क्रीयसे सहस्रपो॒षं पु॑षेयम् ॥२॥

तप॑सः । त॒नूः । अ॒सि॒ । प्र॒जाप॑ते॒रिति॑ प्र॒जाऽप॑तेः । वर्णः॑ ।
प॒र॒मेण॑ । प॒शुना॑ । क्री॒य॒से॒ । स॒ह॒स्र॒पो॒षमिति॑ स॒ह॒स्र॒ऽपो॒षम् । पु॑षे॒य॒म् ॥झं॥ ॥२॥

---

2. S1 V1 S1 C आह्लादन इति धातुः for आह्लादे
3. फले for फल°; P1 om. त्वां; C om. क्रीणामि । ... चन्द्रेण (L 4)
8. C V1 S1 औकरस्य for औकार°; P1 ओकारस्यादेशः for ओकारश्छान्दसः
11. C S1 यजमानेन for यजमाने
17. H1 शुक्रम् for शुक्रम्; H1 हि रसेन corrected as हिरण्येन
18. H1 after °देवत्यं adds : भरव गतौ

सा– कात्यायनः – "अजां प्रत्यङ्मुखीमालभ्य वाचयति तपसस्तनूरिति" (काश्रौ ७.८.२०) इति। पाठस्तु– 'तपसस्तनूरसि प्रजापतेर्वर्णः। परमेण पशुना क्रीयसे सहस्रपोषं पुषेयम्' इति। हे अजे, त्वं ˇतपसः पुण्यस्य ˇतनूः ˇअसि देहो भवसि। यज्ञनिष्पादकस्य सोमस्य द्युलोकेऽवस्थितस्य आनयनार्थमजां गृहीत्वा गायत्री देवता जगाम इति सोमाहरणोपाख्याने तित्तिरिणा (तैसं ६.१.६) समाम्नातम्। तस्मादजायाः पुण्यशरीरत्वम्। वर्ण्यत इति ˇवर्णः देहः। हे अजे, त्वं ˇप्रजापतेः वर्णः असि। यथा प्रजापतिः सर्वदेवताप्रियः एवमजाऽपि सर्वदेवताप्रिया। तदपि तित्तिरिणा समाम्नातम्– "सा वा एषा सर्वदेवत्या यदजा" (तैसं ३.४.३) इति। हे सोम, त्वं ˇपरमेण ˇपशुना उत्तमेनाजादिरूपेण अनेन पशुनेदानीं ˇक्रीयसे। पशोरुत्तमत्वं च 'तपसस्तनूः' इत्यादिना पूर्वमेवोक्तम्। अतोऽस्य प्रसादात् ˇसहस्रपोषं पुत्रपश्वादिसहस्राणां पोषं पोषणं यथा भवति तथा ˇपुषेयं पुष्टो भूयासम् ॥२॥

आ– अजामालभ्य वाचयति– 'तपसस्तनूरसि' इति। अजादैवत्यम्। हे अजे, त्वं ˇतपसः ˇतनूः ˇअसि, ˇप्रजापतेः ˇवर्णः रूपम्। स एवमजां सोमसमक्षमभिष्टुत्य अथ इदानीं सोममाह– 'परमेण पशुना' इति। सोमदैवत्यं यजुः। हे सोम, त्वं ˇपरमेण गुणोत्कर्षविशेषवर्तमानेन ˇपशुना ˇक्रीयसे गृह्यसे, अतः त्वत्प्रसादात् ˇसहस्रपोषं, [यत्] प्राणिनां सहस्रवर्धनं प्राप्नोति तत् ˇसहस्रपोषं ˇपुषेयं वर्धयेयम्। सहस्रप्राणिपोषकं समग्रं धनं संततं मम गृहे वर्धतामित्यभिप्रायः ॥२॥

मित्रो न एहि सुमित्रध इन्द्रस्योरुमा विश दक्षिणम्।
उशन्नुशन्तꣳ स्योनः स्योनम् ॥३॥

मित्रः। नः। आ। इहि। सुमित्रध इति सुऽमित्रधः।
इन्द्रस्य। ऊरुम्। आ। विश। दक्षिणम्।
उशन्। उशन्तम्। स्योनः। स्योनम् ॥ध्युं॥३॥

सा– कात्यायनः– "सव्येनाजां प्रयच्छन् मित्रो न इति दक्षिणेन सोमम्। ... आदाय" (काश्रौ ७.८.२१-२२) इति। पाठस्तु– 'मित्रो न एहि सुमित्रधः' इति। हे सोम, त्वं ˇनः अस्माकं ˇमित्रः प्रीतियुक्तो भूत्वा ˇसुमित्रधः शोभनानां मित्राणां धारकः सन् ˇएहि आगच्छ। वस्त्रेण शुद्धस्य सोमस्य वरुणदेवताकत्वेन क्रूरत्वात् तच्छान्त्यर्थं मित्रत्वेन प्रार्थनम्। तदाह तित्तिरिः– "वारुणो वै क्रीतः सोम उपनद्धो मित्रो न एहि सुमित्रधा इत्याह शान्त्यै" (तैसं ६.१.११) इति॥

---

2. P1 with markings above तसस् ins. on the marking अजादैवतं यजुः।
5. C before वर्ण्यते add : किं च
6. P °देवाप्रिया for देवताप्रिया
9. V1 S1 C om. पोषं पोषणं
23. V1 S1 C सुमित्रधाः for सुमित्रधः

काल्यायनः– "दक्षिणोरुं प्रत्युह्य वासः सोमं निदधातीन्द्रस्योरुमिति" (द्र.काश्रौ ७.८.२३) इति। वासः प्रत्युह्य वस्त्रमुपरिस्थाप्येत्यर्थः। पाठस्तु– 'इन्द्रस्योरुमा विश दक्षिणम्। उशन्नुशन्तꣳ स्योनः स्योनम्' इति। यजनरूपेण परमैश्वर्येणोपेतत्वादत्रेन्द्रशब्देन यजमानो विवक्षितः। हे सोम, त्वम् ᵛइन्द्रस्य यजमानस्य ᵛदक्षिणोरुम् ᵛआविश दक्षिणेऽस्मिन्नूरावुपविशेत्यर्थः। कथंभूतस्त्वम्? ᵛउशन्
५ दक्षिणमूरुं कामयमानः। वश कान्तौ। कान्तिरिच्छेत्युक्तत्वात्। पुनः किंभूतः? ᵛस्योनः सुखरूपः। कथंभूतमूरुम्? ᵛउशन्तं त्वद्विषयककामेनोपेतम्। ᵛस्योनम् उपवेष्टुं सुखकरम्। पुरा देवाः क्रीतं सोममिन्द्रस्योरावुपावेशयन्। तस्मादत्र यजमानस्येन्द्रशब्देन व्यवहारः इति। तदाह तित्तिरिः– "देवा वै यꣳ सोममक्रीणन् तमिन्द्रस्योरौ दक्षिण आसादयन्नेष खलु वा एतर्हीन्द्रो यो यजते तस्मादेवमाह" (तैसं ६.१.११) इति ॥३॥

१० आ– सोममादत्ते– 'मित्रो नः', 'इन्द्रस्य' इति। द्वे सौम्ये यजुषी। हे सोम, ᵛसुमित्रधः शोभनानि मित्राणि धनानि पुष्यतीति सुमित्रधः, ᵛमित्र आदित्यः। त्वं ᵛनः अस्मान् ᵛएहि अभिगच्छ। यजमानस्य दक्षिण ऊरौ निदधाति। ᵛइन्द्रस्य यजमानस्य ᵛदक्षिणम् ᵛऊरुम् ᵛआविश उपविश। "एष वा अत्रेन्द्रो भवति यद्यजमानः" (शब्रा ३.३.३.१०) इति श्रुतेः। कथंभूतस्त्वम्? कथंभूतमूरुमिति। वश कान्तौ। ᵛउशन् कामयमानः। स्योनमिति
१५ सुखनाम। स्योनः सुखरूपः त्वम् ᵛउशन्तं ᵛस्योनं सुखरूपमूरुमाविश ॥३॥

स्वान॒ भ्राजाङ्घा॑रे॒ बम्भा॑रे॒ हस्त॒ सुह॑स्त॒ कृशा॑नो ।
ए॒ते वः॑ सो॒म॒क्रय॑णा॒स्तान् रक्ष॑ध्वं॒ मा वो॑ दभन् ।।४।।

स्वान॑। भ्राज॑। अङ्घा॑रे। बम्भा॑रे। हस्त॑। सु॒ह॒स्तेति॒ सुऽह॑स्त। कृशा॑नो॒ इति॒ कृशा॑नो।
ए॒ते। व॒ः। सो॒म॒क्रय॑णा॒ इति॑ सो॒म॒ऽक्रय॑णाः। तान्। र॒क्ष॒ध्व॒म्। मा। व॒ः। द॒भ॒न्॥ड्लु॑॥४॥

२० सा– कात्यायनः– "स्वान भ्राजेति जपति सोमविक्रयिणमीक्षमाणः" (काश्रौ ७.८.२४) इति। पाठस्तु– 'स्वान भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानो। एते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन्' इति। स्वानादिभिः सप्तभिः शब्दैः द्युलोके सोमस्य रक्षकाः सप्त देवाः संबोध्यन्ते। हे स्वानादयः सप्त देवाः, ᵛवः युष्माकं ᵛसोमक्रयणाः सोमं क्रेतुमानीता नो हिरण्यादिपदार्था एते पुरतः स्थापिताः ᵛतान् पदार्थान् यूयं ᵛरक्षध्वम्। ᵛवः युष्मान् ᵛमा ᵛदभन् तेऽपि वैरिणो भूत्वा मा हिंसिषत। स्वानादीनां
२५ द्युलोके सोमरक्षकत्वं तित्तिरिर्दर्शयति– "स्वान भ्राजेत्याहैते वा अमुष्मिँल्लोके सोममरक्षन्" (तैसं ६.१.१०) इति ॥४॥

आ– सोमक्रयणानादिशति– 'स्वान भ्राज' इत्यादीनि सप्त धिष्ण्यनामानि तत्तद्देवत्यानि च। अनुष्टुप्। सप्तदशानां सोमक्रयणानां मध्ये सप्त सोमक्रयणाननुदिशति। हे ᵛस्वान, हे ᵛभ्राज,

---

5. V1 S1 C om. वश ... किं भूतः?
24. V1 S1 C om. भूत्वा

हे ᵛअङ्घारे, हे ᵛबम्भारे, हे ᵛहस्त, हे ᵛसुहस्त, हे ᵛकृशानो । एवं सप्त धिष्ण्यनामानः संबोध्यन्ते । इतरानाह– 'एते वः' इति । ᵛवः युष्माकं मध्ये ᵛएते ᵛसोमक्रयणाः ᵛतान् ᵛरक्षध्वं गोपायत । ᵛमा ᵛवः युष्मान् ᵛदभन् हिंसां मा कुर्युः ॥४॥

परि माऽग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भज ।
उदायुषा स्वायुषोदस्थाममृताँ अनु ॥५॥

परि । मा । अग्ने । दुश्चरितादिति दुःऽचरितात् । बाधस्व ।
आ । मा । सुचरित इति सुऽचरिते । भज ।
उत् । आयुषा । स्वायुषेति सुऽआयुषा । उत् । अस्थाम् । अमृतान् । अनु ॥८९॥५॥

सा– कात्यायनः – "गृहीतसोमं परि माऽग्न इति वाचयति" (काश्रौ ७.९.१) इति । पाठस्तु– 'परि माऽग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भज' इति । हे ᵛअग्ने, ᵛदुश्चरितात् पापात् ᵛमा ᵛपरि ᵛबाधस्व मां परितो निवारय । ᵛसुचरिते सदाचाररूपे पुण्ये ᵛमा मां यजमानम् ᵛआ ᵛभज सर्वतो भज स्थापयेत्यर्थः ।

कात्यायनः– "उदायुषेत्युत्थानम्" (काश्रौ ७.९.२) इति । पाठस्तु– 'उदायुषा स्वायुषोदस्थाममृताँ अनु' इति । ᵛउदायुषा उत्कृष्टेन चिरंजीवनलक्षणेन आयुषा निमित्तभूतेन । तथा ᵛस्वायुषा यागदानादिना शोभनेनायुषा निमित्तभूतेन ᵛअमृतान् ᵛअनु सोमादिदेवाननुसृत्य ᵛउदस्थाम् अहमुत्थितवानस्मि । देवाननुसृत्योत्थानं तित्तिरिर्दर्शयति– "उदायुषा स्वायुषेत्याह देवता एवान्वारभ्योत्तिष्ठति" (तैसं ६.१.११) इति ॥५॥

आ– गृहीतसोमः वाचयति – 'परि माऽग्न' इति । आग्नेयी पुरस्ताद्बृहती । हे भगवन् ᵛअग्ने, ᵛदुश्चरितात् पापाचरणात् ᵛमा मां ᵛपरिबाधस्व त्रायस्वेत्यर्थः । 'आ मा सुचरिते भज' । ᵛसुचरिते [शोभने] आचारे वर्तमानं ᵛमा माम् ᵛआ ᵛभज । ᵛउदायुषा उत्कर्षेण आयुषा निमित्तभूतेन चिरकालजीवनाय ᵛस्वायुषा शोभनेनायुषा यागदानहोमदेवपूजादियुक्तो स्वायुषा निमित्तभूतेन ᵛअमृताँ ᵛअनु सोमादिदेवान् अनु अहम् ᵛउदस्थाम् अहमुत्तिष्ठामि ॥५॥

प्रति पन्थामपद्महि स्वस्तिगामनेहसम् ।
येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥६॥(९)॥

---

1. H1 अनुहस्त for सुहस्त
10. V1 S1 C om. परि
13. P1 with marking above उदा° ins. on the margin सौम्यं यजुः ।
14. V1 S1 C °जीवन° for °जीव°
20. H1 आचारं for आचारे
21. H1 °जीवनायुषा corrected as °जीवनाय

प्रति॑ । पन्था॑म् । अ॒प॒द्म॒हि॒ । स्व॒स्ति॒गामिति॑ स्व॒स्ति॒ऽगाम् । अ॒ने॒हस॑म् ।
येन॑ । विश्वा॑ः । परि॑ । द्विष॑ः । वृ॒णक्ति॑ । वि॒न्दते॑ । वसु॑ ॥ खि ॥६॥(९)॥

सा– कात्यायनः– “ शीर्ष्णि सोमं कृत्वा पाणिमन्तर्धाय। प्रति पन्थामित्यनोऽभ्येति ” (काश्रौ ७·९·४) इति । शकटमभिलक्ष्य गच्छेदित्यर्थः । पाठस्तु– ‘ प्रति पन्थामपद्महि स्वस्तिगामनेहसम् । येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ’ इति । ᵛपन्थां पन्थानं मार्गं ᵛप्रति ᵛअपद्महि वयं प्रत्यापद्यामहि, प्रतिपन्नाः प्राप्ता अभूमेत्यर्थः । ᵛयेन पथा । कथंभूतं पन्थानम् ? ᵛस्वस्तिगां क्षेमेण गन्तुं योग्यम् । ᵛअनेहसम् एहः पापरूपश्चोरादिबाधस्तद्रहितम् । येन पथा गच्छन् पुरुषः विश्वाः विश्वान् सर्वान् ᵛद्विषः द्वेषिणश्चौरादीन् ᵛपरि ᵛवृणक्ति परितो वर्जयति । ᵛवसु ᵛविन्दते धनं लभते । ‘ तं पन्थानम् ’ इति पूर्वत्रान्वयः ॥६॥(९)॥

इति चतुर्थेऽध्याये नवमोऽनुवाकः ॥४॥

आ-- ‘ प्रति पन्थाम् ’ इति । पथिदेवत्या अनुष्टुप् । पन्थानं स्तौति-- ‘ प्रति पन्थाम् अनेहसम् ’ । एह अपराधः । गमनापराधो न विद्यते यत्र पथि स अनेहाः तम् ᵛअनेहसम् । ᵛस्वस्तिगां, स्वस्ति अविनाशेन सुखेन च यच्च गम्यते स स्वस्तिगास्तं बाह्यपन्थानं ᵛप्रति ᵛअपद्महि प्रत्यापद्येमहि । ᵛयेन पथा गच्छन् ᵛविश्वा विश्वान् सर्वान् ᵛपरि ᵛद्विषः द्वेष्टॄन् परि ᵛवृणक्ति परिवर्जयति, ᵛविन्दते ᵛवसु धनं लभते च ॥६॥(१)॥

[इति नवमोऽनुवाकः]

[अथ दशमोऽनुवाकः]

सा– नवमे हिरण्यस्पर्शादिमन्त्रा उक्ताः । दशमे कृष्णाजिनास्तरणादिमन्त्रा उच्यन्ते ।

अदि॑त्या॒स्त्वग॒स्यादि॑त्यै॒ सद॒ आ सी॑द ।
अस्त॑म्ना॒द्द्यामृ॑ष॒भो अ॒न्तरि॑क्ष॒ममि॑मीत वरि॒माणं॑ पृ॒थि॒व्याः ।
आऽसी॑द॒द्विश्वा॒ भुव॑नानि स॒म्राड्विश्वेत् ता॒नि वरु॑णस्य व्र॒तानि॑ ॥१॥

---

5. C V1 S1 om. पन्थां; P1 om. पन्थानं
6. V1 S1 C स्वस्तिगं for स्वस्तिगा।
10. V1 S1 C चतुर्थां° for चतुर्थेऽ°
12. B1 अनेन संदेहः अपराधगमनापराधो न विद्यते यत्र पथि स अग्रेहः corrected as अनेहसम् । एहः अपराधः । गमनापराधो ... अनेहाः

आदि॑त्याः । त्वक् । अ॒सि॒ । आदि॑त्यै । सद॑ः । आ । सी॒द॒ ।
अस्त॑भ्नात् । द्याम् । ऋ॒ष॒भः । अ॒न्तरि॑क्षम् । अमि॑मीत । व॒रि॒माण॑म् । पृ॒थि॒व्याः ।
आ । अ॒सी॒द॒त् । विश्वा॑ । भुव॑नानि । स॒म्राळिति॑ स॒म्ऽराट् ।
विश्वा॑ । इत् । तानि॑ । वरु॑णस्य । व्र॒तानि॑ ॥घु॥ १ ॥

कात्यायनः – " कृष्णाजिनमस्मिन्नास्तृणात्यदित्यास्त्वगिति " (काश्रौ ७.९.६) इति । अस्मिन् शकट इत्यर्थः । 'असि' इति मन्त्रशेषः । हे कृष्णाजिन त्वम् ᵛअदित्याः ᵛत्वक् ᵛअसि अखण्डितायाः पृथिव्यास्त्वग्रूपमसि ॥

कात्यायनः – " तस्मिन् सोमं निदधात्यदित्यै सद इति " (काश्रौ ७.९.७) इति । 'आ सीद' इति मन्त्रशेषः । हे सोम, त्वम् ᵛअदित्यै ᵛसदः अदितेर्भूमेः संबन्धि स्थानम् ᵛआसीद सर्वतः प्राप्नुहि, तत्रोपविशेत्यर्थः ॥

कात्यायनः – " अस्तभ्नाद्द्यामिति सोममालभ्य वाचयति " (काश्रौ ७.९.८) इति । पाठस्तु– 'अस्तभ्नाद्द्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्याः । आऽसीदद्विश्वा भुवनानि सम्राड्विश्वेत् तानि वरुणस्य व्रतानि' इति । ᵛऋषभः श्रेष्ठः सोमः ᵛद्याम् ᵛअस्तभ्नात् द्युलोको यथा न पतति तथा स्वकीयया आज्ञया स्तम्भनं चकार । तथा ᵛअन्तरिक्षम् अस्तभ्नात् । तथा ᵛपृथिव्याः ᵛवरिमाणं भूमेर्वरिष्ठत्वं सर्वेभ्यो भूतेभ्योऽधिकश्रेष्ठत्वम् ᵛअमिमीत निर्मितवान् । तयोः ᵛसम्राट् सम्यग्राजमानः ᵛविश्वा विश्वानि सर्वाणि ᵛभुवनानि ᵛआऽसीदत् सर्वान् लोकान् व्याप्तवान् । ᵛइत् इत्थमुक्तेन प्रकारेण ᵛतानि द्युलोकस्तम्भनादीनि विश्वा सर्वाणि ᵛवरुणस्य सर्वावरणसामर्थ्ययुक्तस्य सोमस्य ᵛव्रतानि व्रतवन्नियतानि कर्माणि सर्वदा तानि करोतीत्यर्थः ॥१॥

आ–कृष्णाजिनमास्तृणाति–'अदित्यास्त्वक्' इति । कृष्णाजिनदेवत्यं यजुः । ᵛअदित्याः अनवखण्डितायाः पृथिव्याः ᵛत्वक् ᵛअसि कृष्णाजिनमसि । सोमं निदधाति– 'अदित्यै सदः' इति । सौम्यं यजुः । ᵛअदित्यै अदित्याः ᵛसदः स्थानं, हे सोम, ᵛआसीद । सोममालभ्य वाचयति– 'अस्तभ्नाद्द्याम्', 'वनेषु' इति । द्वे वरुणदेवत्ये त्रिष्टुभौ । ऋषि हिंसायाम् । भा दीप्तौ । जगद्विरोधिन ऋषन् विहिंसन् स्वात्मानं भासयतीति ᵛऋषभः श्रेष्ठश्च यः ᵛद्यां द्युलोकम् ᵛअस्तभ्नात्, अत्रैव तिष्ठेत्याज्ञया स्तम्भितवान्, यश्च ᵛअन्तरिक्षम् अस्तभ्नात् । 'अमिमीत वरिमाणं पृथिव्याः' । ᵛवरिमाणं वरिष्ठत्वं सर्वभूतेभ्योऽधिकतमत्वं च ᵛअमिमीत यो निर्मितवान् । ᵛआऽसीदत् ᵛविश्वा ᵛभुवनानि भोगस्थानानि यः आऽसीदत् आसादितवान् । ᵛसम्राट् ᵛविश्वा ᵛइत् ᵛतानि, इत् एवार्थे, सर्वाणि तानि भूतानि च यः अमिमीत निर्मितवान् स एव

---

14. V1 S1 C after अन्तरिक्षम् ins. अपि
16. P1 om. इत्; C VI S1 इतः for इत्
17. V1 S1 C बिश्वानि for विश्वा
24. H1 यः स्वा [मस्तभ्नाते] corrected as यश्चान्तरिक्षमस्तम्नात्

सम्राट् । सम्यग्राजत इति सम्राट् । स्वतन्त्रः परमानन्दरूपो वरुणः । वरणात् वरुणः । अस्य ᵛवरुणस्य तानि ᵛव्रतानि सर्वाणि कर्माणि ॥१॥

वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पयं उस्रियासु ।
हृत्सु क्रतुँ वरुणो विक्ष्वग्निं दिवि सूर्यमदधात् सोममद्रौ ॥२॥

वनेषु । वि । अन्तरिक्षम् । ततान । वाजम् । अर्वत्स्वित्यर्वत्ऽसु । पयः । उस्रियासु ।
हृत्स्विति हृत्ऽसु । क्रतुम् । वरुणः । विक्षु । अग्निम् । दिवि । सूर्यम् ।
अदधात् । सोमम् । अद्रौ ॥ छ्रौं ॥२॥

सा– कात्यायनः – "वनेषु व्यन्तरिक्षमिति सोमपर्याणहनेन परितत्य" (काश्रौ ७.९.९) इति । बन्धनहेतुना वस्त्रेण परितो वेष्टयित्वेत्यर्थः । बौधायनोऽप्याह– "अथैनं वाससा परितनोति वनेषु" (बौश्रौ ६.१५) इति । पाठस्तु– 'वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पय उस्रियासु । हृत्सु क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधात् सोममद्रौ' इति । ᵛवरुणः सर्वावरणसमर्थः सोमः ᵛवनेषु वनगतवृक्षाग्रेषु ᵛअन्तरिक्षम् आकाशं ᵛविततान तत्रावरणद्रव्याभावात् अत्यन्तं विस्तारितवान् । तथा ᵛअर्वत्सु अश्वेषु ᵛवाजं बलं विततानेत्यनुवर्तते । ᵛउस्रियासु गोषु । उस्रियाशब्दो गोनामसु (नि २.११.३) पठितः । ᵛपयः क्षीरं विततान । ᵛहृत्सु हृदयेषु ᵛक्रतुं संकल्पं तच्छक्त्युपेतं मनो विततान । ᵛविक्षु प्रजासु ᵛअग्निं जठराग्निं विततान । ᵛदिवि द्युलोके ᵛसूर्यं विततान । ᵛअद्रौ पर्वते ᵛसोमं वल्लीरूपम् ᵛअदधात् स्थापितवान् । परमेश्वरस्यैव सोमरूपेण अवतीर्णत्वात् मन्त्रद्वयोक्तं द्युलोकस्तम्भनादिसामर्थ्यं द्रष्टव्यम् । पर्वतगतानां पाषाणानां संधिषु सोमवल्ल्या उत्पाद्यमानत्वात् अद्रौ सोमस्थापनं द्रष्टव्यम् । तदाह तित्तिरिः– "सोममद्रावित्याह ग्रावाणो वा अद्रयस्तेषु वा एष सोमं दधाति" (तैसं ६.१.११) इति ॥२॥

आ– अस्यैव परब्रह्मरूपेण स्तुतिः । ᵛवनेषु वृक्षाग्रेषु ᵛअन्तरिक्षम् आकाशं यः ᵛवरुणः ᵛविततान मूर्तद्रव्याभावात् विस्तारितवान्. ᵛअर्वत्सु पुरुषेषु ᵛवाजं वीर्यं विततान । "वीर्यं वै वाजाः पुमांसोऽर्वन्तः" (शब्रा ३.३.४.७) इति श्रुतेः । ᵛपयः ᵛउस्रियासु गोषु पयो विततान । ᵛहृत्सु हृदयेषु ᵛक्रतुं संकल्पं विततान । 'विक्ष्वग्निम्' । ᵛविक्षु प्रजासु ᵛअग्निं जठरवह्निं विततान । ᵛदिवि द्युलोके ᵛसूर्यं विततान । ᵛअद्रौ अद्रिषु गिरिषु यः वरुणः ᵛसोमम् ᵛअदधात् स्थापितवान् । एवं ब्रह्मलक्षणो यो वरुणस्तं वयं स्तुम इति शेषः ॥२॥

---

8. P1 °हस्तेन परिनह्य for °हनेन परितत्य
14. V1 S1 C सोऽग्र for सोमः [L 46]
15. P1 om. विक्षु जठराग्निं विततान ।
20. B1 अमूर्त° corrected as मूर्त°

कृष्णाजिनास्तरणादिमन्त्राः ।

सूर्यस्य चक्षुरा रोहाग्नेरक्ष्णः कनीनकाम् ।
यत्रैतशेभिरीयसे भ्राजमानो विपश्चिता ॥३॥

सूर्यस्य । चक्षुः । आ । रोह । अग्नेः । अक्ष्णः । कनीनकाम् ।
यत्र । एतशेभिः । ईयसे । भ्राजमानः ।
विपश्चितेति विपःऽचिता ॥ क्रिं ॥३॥

स्सा– कात्यायनः– "कृष्णाजिनं पुरस्तादास्यजति सूर्यस्य चक्षुरिति" (काश्रौ ७·९·९) इति । पाठस्तु– 'सूर्यस्य चक्षुरा रोहाग्नेरक्ष्णः कनीनकाम् । यत्रैतशेभिरीयसे भ्राजमानो विपश्चिता' इति । हे सोम, त्वं, ᵛसूर्यस्य संबन्धि यत् ᵛचक्षुः अस्ति, तत्समानचक्षुर्युक्तो भव । तथा 'अग्नेः अक्ष्णः कनीनकाम्' ᵛअग्नेः संबन्धि यदक्षि विद्यते तस्य ᵛअक्ष्णः संबन्धिनी या कनीनका तारका ताम् ᵛआरोह इत्यनुवर्तते । तत्समानबुद्धिपाटवयुक्तो भवेत्यर्थः । ᵛयत्र यस्मिन् देवयजने ᵛएतशेभिः ᵛईयसे अश्वैर्गच्छसि । एतश इत्यश्वनामसु (नि १·१४·१०) पठितः । तत्रेत्यध्याहारः । तस्मिन् देवयजने ᵛविपश्चिता विदुषा सर्वज्ञेनाग्निना सह ᵛभ्राजमानः दीप्यमानः तिष्ठति शेषः । सूर्याग्निदृष्टिविषयत्वे सति मार्गो रक्षोबाधरहितो भवति । तदाह तित्तिरिः – "एष खलु वा अरक्षोहतः पन्था योऽग्नेश्च सूर्यस्य च" (तैसं ६·१·७) इति ॥३॥

आ– कृष्णाजिनं सोमस्य करोति– 'सूर्यस्य चक्षुः' इति । कृष्णाजिनदेवत्याऽनुष्टुप् । ᵛसूर्यस्य ᵛचक्षुः [ᵛआरोह] सूर्यस्य संबन्धि चक्षुरारोहणं कुरु, चक्षुरारुह्याभ्युच्छ्रुतो भव । ᵛअग्नेः ᵛअक्ष्णः अग्नेः संबन्धिनोऽक्ष्णः ᵛकनीनकाम् अक्षितारकाम् आरोह । ᵛयत्र ययोः स्थानयोः एताभ्यां दृष्टो लक्षितः ᵛएतशेभिः । एतश इत्यश्वनामसु (नि १·१४·१०) पठितः । एतशैः अश्वैः ᵛईयसे प्रणीयसे । ᵛभ्राजमानः दीप्यमानः । ᵛविपश्चिता सूर्येण सहितः अग्निः अग्निर्वा विपश्चिता सहितः ॥३॥

उस्रावेतं धूर्वाहौ युज्येथामनश्रू अवीरहणौ ब्रह्मचोदनौ ।
स्वस्ति यजमानस्य गृहान् गच्छतम् ॥४॥

उस्रौ । आ । इतम् । धूर्वाहा इति धूःऽवाहौ । युज्येथाम् ।
अनश्रू इत्यनश्रू । अवीरहणौ । अवीरहना इत्यवीरऽहनौ । ब्रह्मचोदना इति ब्रह्मऽचोदनौ ।
स्वस्ति । यजमानस्य । गृहान् । गच्छतम् ॥ र्ति ॥४॥

---

9. V1 S1 C तामतरः हेत्यनु° for तामारोहेत्यनु°
15. H1 (आ) रुह्याभ्युच्छ्रितो corrected as आरुह्य अभ्युच्छ्रितो
18. H1 नावा विपश्चिता सह corrected as अग्निर्वा विपश्चिता सहितः । [L 19]

सा– कात्यायनः – “ अनड्वाहौ युनक्त्युस्रावेतमिति ” (द्र.काश्रौ ७·९·११) इति । पाठस्तु– ‘ उस्रा एतं धूर्वाहौ युज्येथामनश्रू अवीरहणौ ब्रह्मचोदनौ । स्वस्ति यजमानस्य गृहान् गच्छतम् ’ इति । हे ᵛउस्रौ, अनड्वाहौ ᵛएतम् आगच्छतम् । कथंभूतावुस्रौ ? ᵛधूर्वाहौ शकटस्य धुरं वोढुं समर्थौ । ᵛअनश्रू नेत्रयोरश्रुरहितौ सोत्साहावित्यर्थः । ᵛअवीरहणौ शृङ्गादिभिः वीराणां पुत्राणां शिशूनां हननमकुर्वाणौ । ᵛब्रह्मचोदनौ ब्राह्मणानां च यज्ञं प्रति प्रेरकौ, तथाविधौ युवां ᵛस्वस्ति क्षेमेण ᵛयजमानस्य ᵛगृहान् प्रति ᵛगच्छतम् ॥४॥

आ– अनड्वाहौ युनक्ति– ‘ उस्रा एतम् ’ इति । आनडुही ऊर्ध्वबृहती । हे ᵛउस्रौ हे अनड्वाहौ, ᵛएतम् आगच्छतम् । आगत्य च हे ᵛधूर्वाहौ, धुरं वोढुं समर्थौ । ᵛयुज्येथां स्वयमेव धुरयोगं कुरुतम् । पुनः कथंभूताविति । ᵛअनश्रू नेत्रयोरश्रुरहितौ सोत्साहौ । ᵛअवीरहणौ शृङ्गादिभिः वीराणां पुत्राणां शिशूनां हननमकुर्वाणौ ᵛब्रह्मचोदनौ [ब्राह्मणानां यज्ञं प्रति प्रेरकौ] । ॥४॥

भ॒द्रो मे॑ऽसि॒ प्र च्य॑वस्व भुवस्पते॒ विश्वा॑न्य॒भि धामा॑नि ।
मा त्वा॑ परिप॒रिणो॑ वि॒दन् मा त्वा॑ परिप॒न्थिनो॑ वि॒दन्
मा त्वा॒ वृका॑ अघा॒यवो॑ विदन् ।
श्ये॒नो भू॒त्वा परा॑ पत॒ यज॑मानस्य गृ॒हान् ग॑च्छ॒ तन्नौ॑ सꣳस्कृ॒तम् ॥५॥

भ॒द्रः । मे॒ । अ॒सि॒ । प्र । च्य॒व॒स्व॒ । भु॒व॒ः । प॒ते॒ । विश्वा॑नि । अ॒भि । धामा॑नि ।
मा । त्वा॒ । प॒रि॒पु॒रि॒ण इति॑ प॒रि॒ऽपु॒रिण॑ः ।
प॒रि॒प॒न्थि॒न् इति॑ प॒रि॒ऽप॒न्थिन॑ः । वृका॑ः । अ॒घा॒यव॑ः । अ॒घ॒य॒व इत्य॑घ॒ऽयव॑ः । वि॒द॒न् ।
श्ये॒नः । भू॒त्वा । परा॑ । प॒त॒ । यज॑मानस्य । गृ॒हान् । ग॒च्छ॒ । तत् । नौ॒ । स॒ꣳस्कृ॒तम् ॥
॥ टॄं ॥५॥

सा– कात्यायनः – “ भद्रो म इति वाचयति ” (काश्रौ ७·९·१९) इति । पाठस्तु– ‘ भद्रो मेऽसि प्र च्यवस्व भुवस्पते विश्वान्यभि धामानि । मा त्वा परिपरिणो विदन् मा त्वा परिपन्थिनो विदन् मा त्वा वृका अघायवो विदन् । श्येनो भूत्वा परापत यजमानस्य गृहान् गच्छ तन्नौ सꣳस्कृतम् ’ इति । हे सोम, ᵛमे मह्यं यजमानाय मदुपकारार्थं ᵛभद्रः ᵛअसि कल्याणरूपोऽसि । भदि कल्याणे । हे ᵛभुवस्पते, भूशब्देनात्र भूमौ स्थितानि भूतानि यजमानाध्वर्युप्रभृतीन्युपलक्ष्यन्ते । तेषां भूतानां च पालकत्वात् पतिः सोमः । एतदेवाभिप्रेत्य तित्तिरिराह– “ प्र च्यवस्व भुवस्पत इत्याह भूतानाꣳ ह्येष पतिः ” (तैसं ६·१·११) इति । तथाविध हे सोम, ᵛविश्वानि सर्वाणि ᵛधामानि ᵛअभि प्राचीनवंशहविर्धानादि-

---

24. V1 S1 C मम for मह्यं; S1 C om. मद्; V1 S1 C after कल्याणे add इति धातुः
27. V1 S1 P1 C प्राचीनत्वं दाहविधानादि॰ corrected as प्राचीनवंशहविर्धानादि

स्थानान्यभिलक्ष्य ᵛप्रच्यवस्व प्रकर्षेण गच्छ । ᵛपरिपरिणः इत्यनेन सर्वत्र संचरन्तस्तस्करविशेषा उच्यन्ते । ते ᵛत्वा ᵛमा ᵛविदन् त्वां सोमं मा जानन्तु । तथा ᵛपरिपन्थिनः यजमानयागस्य प्रतिषेधका विद्वेषिणस्त्वां ᵛमा ᵛविदन् । ᵛअघायवः अघं पापं हिंसारूपम् इच्छन्तः ᵛवृकाः अरण्यश्वानाः ᵛत्वा ᵛमा ᵛविदन् । किं च ᵛश्येनः ᵛभूत्वा श्येनपक्षिवच्छीघ्रगामी भूत्वा अस्मदीयस्य ᵛयजमानस्य ᵛगृहान् ᵛपरा ᵛपत शीघ्रं ᵛगच्छ । [तत्] तत्र गृहेषु ᵛनौ आवयोस्तव मम च ᵛसंस्कृतं सर्वोपकरणसंयुक्तं स्थानं विद्यत इति शेषः ॥५॥

आ– [‘ भद्रो मेऽसि ’ इति ।] ᵛभद्रः भदि कल्याणे सुखे च । भन्दनीयः स्तुत्यः यतस्त्वं ᵛमे मम भद्रः ᵛअसि । अतः ᵛभुवस्पते भूतजातस्य पते ᵛप्रच्यवस्व प्रगच्छ । ᵛविश्वानि ᵛधामानि सर्वाणि स्थानानि नामानि जन्मानि वा ᵛअभि प्रच्यवस्व । किं च ᵛपरिपरिणः परिणेतारो दुर्जनाः परिच्यवमानं ᵛत्वा त्वां ᵛमा ᵛविदन् मा जानन् । ᵛमा ᵛत्वा ᵛपरिपन्थिनः प्रातिकूलाचरणशीलाः त्वां मा ᵛविदन् । ᵛवृकाः ᵛअघायवः ᵛत्वा ᵛमा ᵛविदन् । विकर्तशीलाः वृकाः । अघं पापं परस्य ये कर्तुमिच्छन्ति ते अघायवः । त एते गच्छन्तं [त्वां मा जानन्तु] । किं च त्वमपि ᵛश्येनः ᵛभूत्वा ᵛपरा ᵛपत श्येनरूपमास्थाय उत्पतन् गच्छ । ᵛयजमानस्य ᵛगृहान् ᵛगच्छ । ᵛतत् तत्र ᵛनौ आवयोस्तव च मम च ᵛसंस्कृतं सर्वोपस्तरणसंयुक्तं स्थानं विद्यते, तत् गच्छ ॥५॥

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतꣳ सपर्यत ।
दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शꣳसत ॥६॥

नमः । मित्रस्य । वरुणस्य । चक्षसे । महः । देवाय । तत् । ऋतम् । सपर्यत ।
दूरेदृश इति दूरेऽदृशे । देवजातायेति देवऽजाताय । केतवे ।
दिवः । पुत्राय । सूर्याय । शꣳसत ॥ जं ॥६॥

सा– कात्यायनः – “ शालां पूर्वेण प्रतिप्रस्थाताऽग्नीषोमीयं पशुमादाय तिष्ठति कृष्णसारङ्गं मेध्यमभावे लोहितसारङ्गम् । नमो मित्रस्येत्येनमालभ्य वाचयति ” (काश्रौ ७·९·२१,२२) इति । पाठस्तु– ‘ नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतꣳ सपर्यत । दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शꣳसत ’ इति । अस्मिन् मन्त्रे सूर्यरूपेण सोमः स्तूयते । ᵛमित्रस्य ᵛवरुणस्य इति चतुर्थ्यर्थे षष्ठ्यौ । मित्राय सूर्याय ᵛनमः अस्तु । कथंभूताय मित्राय ? वरुणाय स्वरश्मिभिर्जगदावृण्वते, ᵛचक्षसे चक्षुष्मते द्रष्टे, ᵛमहः महते ᵛदेवाय द्योतमानाय । हे ऋत्विजः, ᵛतत् ज्योतिष्टोमरूपम् ᵛऋतं सत्यमवश्यफलप्रदं कर्म अनुष्ठायेति शेषः । ᵛसपर्यत तेनानुष्ठानेन सपर्यां परिचर्यां कुरुत । किं च ᵛदूरेदृशे द्युलोकात्मके दूरे देशे प्राणिभिर्दृश्यत इति दूरेदृक् तस्मै । ᵛदेवजाताय देवात् द्योतमानात् परमात्मन उत्पन्नो देवजातः तस्मै । ᵛकेतवे अह्नो लक्षणरूपाय । हे ऋत्विजः, ᵛदिवस्पुत्राय द्युलोकस्य पुत्रवत् प्रियाय ᵛसूर्याय ᵛशंसत सूर्यप्रीत्यर्थं शंसनं स्तुतिं कुरुत ॥६॥

---

29. V1 S1 C अक्ष्णो for अह्नो; P1 om. अह्नो; P1 श्लक्ष्ण° for लक्षण°

आ— वाचयति 'नमो मित्रस्य' इति । अहितपनः सूर्यऋषिः । सूर्यदेवत्या जगती । परब्रह्मरूपेण आदित्यमवगम्य स्वयं नामस्कारं (?) कृत्वा अन्येषां नमस्कारं कथयति सूर्याय । ˅नमः ˅मित्रस्य मित्राय नमः । ˅वरुणस्य वरुणाय नमः । ˅चक्षसे नमः । ˅महः ˅देवाय ˅तत् ˅ऋतं ˅सपर्यत, हे ब्राह्मणाः, पूजयत । सपर्यतिरर्चाकर्मसु (नि ३·५·३) पठितः । ˅दूरेदृशे दूरे च स्थिते दृश्यत इति दूरेदृक् तस्मै । ˅देवजाताय देवानुग्रहार्थं जातो देवजातः तस्मै । ˅केतवे, केतुरिति प्रज्ञानामसु (नि ३·९·१) पठितम् । प्रज्ञानत्वाय विज्ञानानन्दरूपाय नमः । ˅दिवः ˅पुत्राय नमः । द्युलोकात् सूर्यो जायत इति प्रतीत्या दिवस्पुत्राय ˅सूर्याय ˅शंसत, शंसु स्तुतौ, स्तुतिं कुरुत ॥६॥

वरु॑णस्यो॒त्तम्भ॑नमसि॒ वरु॑णस्य स्कम्भ॒सर्ज॑नी स्थः ।
वरु॑णस्य ऋत॒सद॑न्यसि॒ वरु॑णस्य ऋत॒सद॑नमसि॒ वरु॑णस्य ऋत॒सद॑नी॒मा सी॑द ॥७॥

वरु॑णस्य । उ॒त्तम्भ॑नम् । अ॒सि॒ । [वरु॑णस्य] । स्क॒म्भ॒सर्ज॑नी॒ इति॑ स्क॒म्भ॒ऽसर्ज॑नी । स्थ॒ः ।
[वरु॑णस्य ।] ऋ॒त॒स॒द॒नीत्यृ॑त॒ऽसद॑नी । [अ॒सि॒ ।]
[वरु॑णस्य ।] ऋ॒त॒सद॑न॒मित्यृ॑त॒ऽसद॑नम् । [अ॒सि॒ ।]
[वरु॑णस्य ।] ऋ॒त॒सद॑नी॒मित्यृ॑त॒ऽसद॑नीम् । आ । सी॒द॒ ॥ तं ॥७॥

सा– कात्यायनः– "उत्तम्भनेनोपस्तभ्नाति वरुणस्योत्तम्भनमसीति" (काश्रौ ७·९·२५) इति । 'असि' इति मन्त्रशेषः । उत्तभ्यते शकटस्य मुखाग्रमुन्नतत्वेन स्थाप्यते यस्मिन् काष्ठे तत् काष्ठम् ˅उत्तम्भनम् । हे काष्ठ, त्वं ˅वरुणस्य शकटस्य उत्तम्भनम् ˅असि । तथा वरुणो बन्धकारी देवः एवं शकटेऽपि बद्धस्य सोमस्य स्थापितत्वात् वरुणशब्देन शकटमुपचर्यते ।

कात्यायनः– "शम्ये चोद्वृहति वरुणस्य स्कम्भसर्जनी इति" (काश्रौ ७·९·२६) इति । 'स्थः' इति मन्त्रशेषः । ˅वरुणस्य शकटस्य युगे बद्धयोर्बलीवर्दयोर्गलस्य बहिर्भागे काष्ठनिर्मिते शम्ये स्थाप्येते । ताभ्यां बलीवर्दयोरितस्ततो गमननिवारणं भवति । ते ततः स्कम्भशब्देनोच्येते । हे शम्ये, युवां ˅स्कम्भसर्जनी स्कम्भितुं सृज्यमाने भवथः ॥

कात्यायनः– "अभिमृशत्येनां वरुणस्य ऋतसदन्यसीति" (काश्रौ ७·९·२८) इति । एनामित्यनेन आसन्दी परामृश्यते । 'औदुम्बरीमासन्दीम्' इति पूर्वत्र प्रकृतत्वात् । वरुणशब्देनात्र बद्धः सोम उपलक्ष्यते । हे आसन्दि, त्वं ˅वरुणस्य वस्त्रादिना बद्धस्य सोमस्य संबन्धिनी ˅ऋतसदनी ˅असि, ऋतं यज्ञस्तन्निष्पत्त्यर्थमुपवेशनस्थानभूताऽसि ॥

कात्यायनः– "कृष्णाजिनमस्यामास्तृणाति वरुणस्य ऋतसदनमसीति" (काश्रौ ७·९·२९) इति । हे कृष्णाजिन, त्वं ˅वरुणस्य बद्धस्य सोमस्य संबन्धि ˅ऋतसदनम् ˅असि यज्ञार्थमुपवेशनस्थानमसि ॥

---

15. C after °शेषः । adds : वरुणस्योत्तम्भनमसि ।
16. Pl om. वरुणो

कात्यायनः – “ तस्मिन् सोमं निदधाति वरुणस्य ऋतसदनीमासीदेति ” (काश्रौ ७·९·२०) इति । हे सोम, त्वं ᵛवरुणस्य वरुणवह्वस्य तव संबन्धिनीम् ᵛऋतसदनीं यज्ञार्थमुपवेशनस्थानभूतामासन्दीं प्राप्य ᵛआसीद कृष्णाजिने सुखेनोपविश ॥७॥

आ– उत्तम्भनेनोपस्तभ्नाति– ‘ वरुणस्योत्तम्भनम् ’ इति । पञ्च वारुणानि यजूंषि वरुणदेवत्यानि । ᵛवरुणस्य ᵛउत्तम्भनम् उत्कृष्टस्तम्भनम् ᵛअसि न शकटस्य । शम्ये [उद्वहति]- ‘ वरुणस्य स्कम्भसर्जनी स्थः ’ इति । स्कम्भशब्देन युगमुच्यते । तस्य सर्जनी ᵛस्थः भवथः । आसन्दीमभिमृशति– ᵛवरुणस्य ᵛऋतसदनी सत्यसदनी त्वं भवसि । कृष्णाजिनमस्यामास्तृणाति ᵛऋतसदनम् ᵛअसि सत्यसदनमसि । सीदन्त्यस्मिन्निति सदनं, तस्मिन् सोमं निदधाति– ᵛवरुणस्य ᵛऋतसदनीम् ᵛआसीद ऋतस्य सत्यस्य सदनीम् आसीद उपविश ॥७॥

या ते॒ धामा॑नि ह॒विषा॒ यज॑न्ति॒ ता ते॒ विश्वा॑ प॒रि॒भूर॑स्तु य॒ज्ञम् ।
ग॒य॒स्फानः॑ प्र॒तर॑णः सु॒वीरोऽवी॑रह॒ा प्र च॑रा सोम॒ दुर्या॑न् ।।८।।(१०)।।

या । ते॒ । धामा॑नि । ह॒विषा॑ । यज॑न्ति । ता । ते॒ । विश्वा॑ । प॒रि॒भूरिति॑ प॒रि॒ऽभूः । अ॒स्तु॒ । य॒ज्ञम् ।
ग॒य॒स्फान॒ इति॑ ग॒य॒ऽस्फानः॑ । प्र॒तर॑ण॒ इति॑ प्र॒ऽतर॑णः । सु॒वीर॒ इति॑ सु॒ऽवीरः॑ ।
अवी॑र॒हेत्यवी॑रऽहा । प्र । च॒र॒ । सो॒म॒ । दु॒र्या॑न् ॥ म्यौं ॥ ८ ॥ (१०) ॥

एदमगन्म तिस्रः ॥३॥ मही॑नां चतस्रः ॥४॥ आकूत्यै द्वे ॥२॥ ऋक्सामयोश्चतस्रः ॥४॥ व्रतं कृणुत नव ॥९॥ एषा ते पञ्च ॥५॥ वस्वी चतस्रः ॥४॥ एष ते चत्वारि ॥४॥ चन्द्रं त्वा षट् ॥६॥ अदित्यास्त्वगष्ट ॥८॥ दशानुवाकेष्वेकोनपञ्चाशत् ॥४९॥

इति शुक्लयजुर्वेदकाण्वसंहितापाठे चतुर्थोऽध्यायः ॥४॥

सा– कात्यायनः – “ या त इति वाचयति ” (काश्रौ ७·९·३२) इति । पाठस्तु– ‘ या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् । गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्यान् ’ इति । हे ᵛसोम, ᵛते तव ᵛया ᵛधामानि प्रातःसवनादीनि स्थानानि प्राप्येति शेषः । ᵛहविषा ᵛयजन्ति ऋत्विजस्त्वदीयरसरूपेण हविषा यागं कुर्वन्ति । अतो यज्ञमभिलक्ष्येति शेषः । ᵛते तव संबन्धिनी [ᵛविश्वा] तानि सर्वाणि स्थानानि ᵛपरिभूः ᵛअस्तु भवान् परितः प्राप्तवान् भवतु । किं च ᵛगयस्फानः गृहाभिवर्द्धकः, ᵛप्रतरणः प्रकर्षेण यज्ञपारं प्रत्यस्माँस्तारयिता, ᵛसुवीरः शोभनास्त्वत्प्रसादलब्धा

---

2. V1 S1 C °सदनम् for सदनीम्
21. P1 om. हविषा यजन्ति [L 22]

वीरा अस्मत्पुत्रपौत्रा यस्य तव स त्वं सुवीरः, अवीरहा यः वीराणां महतां परिपालक इत्यर्थः । हे सोम, त्वं यथोक्तगुणयुक्तः सन् दुर्यान् प्रचर गृहान् प्राप्नुहि ॥१०॥

इति चतुर्थेऽध्याये दशमोऽनुवाकः ॥१०॥

अथ विनियोगसंग्रहः–

सोमक्रयार्था एतस्मिंश्चतुर्थेऽध्याय ईरिताः ।
दशानुवाका एतेषामर्थोऽत्र प्रविविच्यते ॥१॥
वपनाभ्यञ्जनाद्यर्था ह्यौद्गृह(भ ?)णाभिधाः ।
अजिनाद्या व्रतार्थाश्च क्रयण्यानयनोचिताः ॥२॥
सोमक्रयण्यनुगतिर्यजमानस्य वाचनम् ।
हिरण्यस्पर्शनार्थाः स्युरजिनास्तरणादयः ॥३॥
यज्ञशालास्तम्भजप इमा इति समुन्दनम् ।
तृणान्तर्धानमोषेति छेदनं स्वधिमन्त्रतः ॥४॥
आपः स्नायादुदुत्क्रामे दीक्षा वस्तेऽत्र सप्त हि ।
महीनां नवनीतेनाभ्यञ्ज्याद् वृत्रेति चक्षुषोः ॥५॥
आभिस्त्रिभिश्चित्यशेषो छिद्रेणेति भवेत् त्रिषु ।
आ वो वाचयते स्वाहा मुष्टिरेकादशेरिताः ॥६॥
आकूत्यै जुहुयात् षड्भिः षडेवात्रोपवर्णिताः ।
ऋक्सामाजिनसंस्पर्शाः शर्मास्यजिनरोहिणी ॥७॥
ऊर्ग् मेखलां प्रबध्नाति सोम तन्नीविबन्धनम् ।
विष्णोः शिरः प्रोर्णुतेऽथ विषाणामिन्द्रमन्त्रतः ॥८॥
कण्डूयनार्थमादद्यात् सुसस्या लेखनं भुवि ।
उच्छ्रेति दण्डोच्छ्रयणमष्टौ मन्त्रा इहेरिताः ॥९॥
व्रतं त्रिभिर्वाग्विमोको ह्यग्निर्ब्रह्मा सकृद्वदेत् ।
दैवीं पयः स्पृशेदद्य पिबेत् श्वात्रा इति स्पृशेत् ॥१०॥
नाभिं तथेयं ते यज्ञि मूत्रार्थं लोष्टमाहरेत् ।
अपो मुञ्चा मूत्रयेत तत्र लोष्टं क्षिपेत् पृथु ॥११॥

---

3. C S1 तुरीया°, V1 चतुर्था° for चतुर्थे
5. C S1 V1 चतुर्था° for चतुर्थे°
7. C S1 V1 वपनं चाभ्यञ्जनाद्याः for वपनाभ्यञ्जनाद्याः;
   C उद्ग्रहणा° for ह्यौद्ग्रहणा°
8. V1 S1 C (आ) नयवाचिनः for (आ) नयनोचिताः
11. V1 S1 C शिरसवन्दनम् for इति समुन्दनम्
15. V1 S1 C आज्या for आभिस; V1 S1 C चिता° for चित्य°
18. P1 शर्मासीत्यवरोहणम् for शर्मास्याजिनरोहिणी

अग्ने स्वप्स्यन् मन्त्रयेत बुद्धं वाचयते पुनः ।
क्रोधादौ त्वमिति ब्रूयाद् देयद्रव्यं स्पृशन् वदेत् ॥१२॥

रास्वेयदनुवाकेऽस्मिन्नुक्ता मन्त्राश्चतुर्दश ।
घृते स्वर्णं क्षिपेदेषा जूरसीति जुहोति हि ॥१३॥

चन्द्रं हिरण्यमुद्धृत्य चित्सोमक्रयणीं जपेत् ।
षष्ठेऽस्मिन्ननुवाके तु मन्त्राश्चत्वार ईरिताः ॥१४॥

वस्वी क्रयण्यनुगतिरदित्याः सप्तमे पदे ।
जुहोत्यस्मे परिलिखेत् पदमस्मे क्षिपेद्घटे ॥१५॥

त्वेपदं स्वामिने दद्यादस्मे तत्स्वीकरोत्यसौ ।
मा वयं संस्पृशेदृत्विक् तोतो पत्न्यै नयेत् पदम् ॥१६॥

समख्ये वाचयेत् पत्नीं नव मन्त्राः प्रकीर्तिताः ।
चतुरो वाचयेदेष ह्यस्मा सोमं स्पृशेत् तथा ॥१७॥

अभि सोमं मिमीतेऽथ प्रजेत्युष्णीषबन्धनम् ।
प्रजास्त्वेति विवृणुते मन्त्रा अष्टावुदीरिताः ॥१८॥

स्वर्णं स्पृष्ट्वा जपेच्चन्द्रं सग्मे स्वर्णेन कम्पयेत् ।
अस्मे स्वर्णं क्षिपेदग्नेऽजां स्पृष्ट्वा वाचयेत् तपः ॥१९॥

मित्रो न सोममादत्त इन्द्रोरौ स्थापयेदमुम् ।
जपेत् स्वानेति परि मा स सोमं वाचयेदथ ॥२०॥

उदोत्थाय ह्यनो गच्छेत् प्रतिमन्त्रा द्वेरिताः ।
अदि कृष्णाजिनं स्तृत्वा अदि सोमं तु सादयेत् ॥२१॥

अप स्पृष्ट्वा वाचयेत वने वस्त्रेण वेष्टयेत् ।
सूर्याजिनं पुरो दध्यादनड्वाहौ तु योजयेत् ॥२२॥

उस्रेति वाचयेद्भद्रः सारङ्गे वाचयेन्नमः ।
वरु स्तभ्नाति शकटम् उत्खेदो वरु शम्ययोः ॥२३॥

वरु स्पृशेदिहासन्दीमजिनास्तरणं वरु ।
वरु सोमं सादयेत जपेत् या ते चतुर्दश ॥२४॥

---

1. P1 वावयते for वाचयते
2. P1 अप° for देय°
8. P1 after घटे in brackets writes स्थाल्यामित्यर्थः
9. V1 S1 C अस्मेति for अस्मे तत्
10. S1 C ततो for तोतो
12. P1 ह्यस्मासौ सं° for ह्यस्मा सोमं
18. स्योनेति for स्वानेति
20. V1 S1 C आदि for अदि; V1 S1 C ह्यदि for अदि
52. P1 च तु for last वरु

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥२५॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे काण्वसंहिताभाष्ये चतुर्थोऽध्यायः ॥४॥

आ— सोमं प्रवेशयन् वाचयति— ‘या ते धामानि’ इति । सोमदेवत्या त्रिष्टुप् । गौतम ऋषिः । हे सोम, ^{v}या ^{v}ते ^{v}धामानि तव संबन्धीनि यानि धामानि त्रयाणि भवस्थानानि नामानि जन्मानीति धामानि । ^{v}हविषा यष्टारः ^{v}यजन्ति । ‘ता ते विश्वा’ । ^{v}ते तव ^{v}ता तानि विश्वानि सर्वाणि । ^{v}परिभूः, अत्र लिङ्गवचनव्यत्ययः परिभूणि । यज्ञं यज्ञं सर्वतो भवितृणि । ^{v}अस्तु ^{v}यज्ञम्, अत्र वचनव्यत्ययः, सन्तु । यद्वा— यज्ञं परिभूः अस्तु । त्वं च ^{v}गयस्फानः पुत्रपशुहिरण्यादिगृहस्य वर्धयिता । स्फायी ओप्यायी वृद्धौ । प्रतरः, तृ तरणे, प्रतरन्ति येनापदः सः ^{v}प्रतरणः । ^{v}सुवीरः शोभनवीरः । ^{v}अवीरहा पुत्रादीनामहन्ता । हे सोम, इत्थंभूतस्त्वं ^{v}दुर्यान् तदीयान् गृहान् ^{v}प्र ^{v}चर इति ॥१०॥(४)॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवपरिपूज्यश्रीमज्जातवेदभट्टाचार्यस्य सूनुना चतुर्वेदिश्रीमदानन्दबोधभट्टोपाध्यायेन विरचिते काण्ववेदमन्त्रभाष्यसंग्रहे चतुर्थोऽध्यायः ॥४॥

---

10. H1 स्युत्रादियितृप्स्यायि for स्फायी ओप्यायी
14. H1 om. °बोध°

पञ्चमोऽध्यायः

[अथ प्रथमोऽनुवाकः ।]

सा– यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

सोमक्रयप्रधाने चतुर्थेऽध्याये वपनाख्यसंस्कारमारभ्य क्रीतस्य सोमस्य शालाप्रवेशपर्यन्ता मन्त्रा उक्ताः । अथ सौमिकवेदिप्रधानः पञ्चमाध्याय आरभ्यते । तत्रादौ तावदातिथ्यहविरादिविषया मन्त्रा प्रथमेऽनुवाकेऽभिधीयन्ते ॥

अ॒ग्नेस्त॒नूर॑सि॒ विष्ण॑वे त्वा॒ सोम॑स्य त॒नूर॑सि॒ विष्ण॑वे त्वा ।
अति॑थेराति॒थ्यम॑सि॒ विष्ण॑वे त्वा ।
श्ये॒नाय॑ त्वा सोम॒भृते॒ विष्ण॑वे त्वा॒ऽग्नये॑ त्वा रायस्पोष॒दे विष्ण॑वे त्वा ।।१।।

अ॒ग्नेः । त॒नूः । अ॒सि॒ । विष्ण॑वे । त्वा॒ । सोम॑स्य ।
अति॑थेः । आ॒ति॒थ्यम् । श्ये॒नाय॑ । सो॒म॒भृ॒त इति॑ सो॒म॒ऽभृते॑ ।
अ॒ग्नये॑ । रा॒य॒स्पो॒ष॒द इति॑ रा॒य॒स्पो॒ष॒ऽदे । विष्ण॑वे । त्वा॒ ॥ जुं ॥१॥

कात्यायनः – " निर्वपेदग्नेस्तनूरिति पञ्चकृत्वः प्रतिमन्त्रम् " (काश्रौ ८.१.४) इति । प्रथममन्त्रपाठस्तु– ' अग्नेस्तनूरसि विष्णवे त्वा ' इति । हे हविः, त्वम्, ᵛअग्नेः ᵛतनूः ᵛअसि, अग्निनामको यो देवः सोमस्य राज्ञो भृत्यरूपस्तस्य तृप्तिहेतुत्वात् शरीरमसि । तथाविधं त्वां ᵛविष्णवे बहुषु यज्ञेषु व्यापित्वेन विष्णुशब्दाभिधेयाय सोमाय तत्प्रीत्यर्थं निर्वपामीति शेषः ॥

द्वितीयमन्त्रपाठस्तु– ' सोमस्य तनूरसि विष्णवे त्वा ' इति । पूर्वत्र क्रीतो यः सोमो वल्लीरूपः तदभिमानी देवो राजा तस्यानुचरः कश्चित् सोमनामको देवोऽत्र ' सोमस्य ' इति षष्ठ्यन्तेन विवक्षितः । अन्यत् सर्वं पूर्ववद्व्याख्येयम् ॥

तृतीयमन्त्रपाठस्तु– ' अतिथेरातिथ्यमसि विष्णवे त्वा ' इति । अत्र ' अतिथेः ' इति षष्ठ्यन्तेन सोमराजानुचरः कश्चित् अतिथिनामको देवो विवक्षितः । हे हविः, त्वम् अतिथिनामकस्य देवस्य ᵛआतिथ्यम् ᵛअसि । आतिथ्यनामकसंस्काररूपमसि । तिथिविशेषमनपेक्ष्य क्षुधया पीडितो ब्राह्मणो यः परगृहे समागच्छति तस्य सत्कारार्थं क्रियमाणः पादप्रक्षालनभोजनदानादिरूपः संस्कार आतिथ्यमित्युच्यते । तथाविधत्वमस्य हविषोऽत्र विवक्ष्यते । अन्यत् पूर्ववत् ॥

---

5. S1 C चतुर्थे° for चतुर्थे; S1 C °संस्कारस्य for °संस्कारमारभ्य; V1 om. संस्कारम्... क्रीतस्य

19. S1 C after देवो add भूत्वा

24. S1 C संस्कारार्थः for सत्कारार्थं

चतुर्थमन्त्रपाठस्तु– ‘ श्येनाय त्वा सोमभृते विष्णवे त्वा ’ इति । श्येननामकः कश्चिद्देवः सोमराजाऽनुचरः । स च नानाविधोपपन्नादग्नेः समर्पणेन सोमराजानं बिभर्तीति सोमभृत् । तस्मै ᵛश्येनाय हे हविः, त्वां निर्वपामि । अन्यत् पूर्ववत् ॥

पञ्चममन्त्रपाठस्तु– ‘ अग्नये त्वा रायस्पोषदे विष्णवे त्वा ’ इति । अपरोऽपि कश्चिदग्निनामको देवः सोमस्य राज्ञोऽनुचरः । रायस्पोषं धनपुष्टिं ददातीति [रायस्पोषदाः ।] राज्ञो गृहे यद्धनमस्ति तत् क्रयविक्रयादिना बहुधा पोषयित्वा राज्ञे समर्पयति । तथाविधाय ᵛअग्नये ᵛरायस्पोषदे रायस्पोषदायिने, हे हविः, त्वां गृह्णामि । अन्यत् पूर्ववत् ॥

विष्णुशब्दाभिधेयस्य सोमस्य राज्ञो हविषा तदनुचराणाम् अग्न्यादिदेवानां तद्द्वारा तत्संबन्धिगायत्र्यादिच्छन्दोदेवतानां च तृप्तिर्भवति । तदेतदभिप्रेत्य लौकिकन्यायसूचनेन तित्तिरिर्विस्पष्टमाह– “ यावद्भिर्वै राजाऽनुचरैरागच्छति सर्वेभ्यो वै तेभ्य आतिथ्यं क्रियते छन्दाꣳसि खलु वै सोमस्य राज्ञोऽनुचराणि ” (तैसं ६·२·१) इति ॥१॥

आ– आतिथ्ये हविर्गृह्णाति पञ्चभिर्वैष्णवैर्यजुर्भिः । ‘ अग्नेस्तनूरसि ’ इति पञ्चदेवत्यादि (?नि) । आद्यस्य पङ्क्तिर्वा सामान्येन । विवस्वानेव ऋषिः । ‘ अग्नेस्तनूः ’ इति अग्निशब्देन परोक्षं गायत्र्युच्यते इति श्रुतिः । ᵛअग्नेः ᵛतनूः शरीरम् ᵛअसि भवसि । हुतं हविरग्नेः शरीरम्, भवति हि अभिरुचितं ᵛविष्णवे जुष्टम् । विष्लृ व्याप्तौ । वेवेष्टि । विश प्रवेशने । विशति सुप्रक्षणेऽभिस्तौति अपेक्षितफलं प्रक्षरतीति एतेषां विष्णुरित्यनुशासनात् । तस्मै ᵛत्वा त्वां हविर्गृह्णामि । ‘ सोमस्य ’ इति त्रिष्टुप् । ᵛसोमस्य ᵛतनूः शरीरम् ᵛअसि । ᵛविष्णवे ᵛत्वा जुष्टं गृह्णामि । ‘ अतिथेः ’ इति जगती । ᵛअतिथेः ᵛआतिथ्यं शरीरम् ᵛअसि । ‘ श्येनाय त्वा ’ इति गायत्री । ᵛश्येनाय गायत्र्यात्मकाय ᵛसोमभृते सोमधारकाय विष्णवे । ‘ अग्नये त्वा रायस्पोषदे ’ इति अतिजगती । ᵛरायस्पोषदे रायस्पोषदायेति व्यत्ययः । धनपोषस्य दात्रे ᵛविष्णवे गृह्णामीति ॥१॥

---

2. S1 C °विधोपपन्नादि° for विधोपपन्नादग्नेः
6. C तुष्टिं S1 धंतुष्टिं for धनपुष्टिं
8. P °देवानां for °देवतानां
9. S1 C °वचनेन for °सूचनेन
10. S1 C अतिथिभ्यस् for second वै
12. B1 om. आतिथ्ये ... श्रुतिः (L. 14); H1 आतिथ्यं for आतिथ्ये
15. सप्रक्षणेभिस्तौति the meaning is obscure, may be corrupt. Could it be सुपृक्षणेऽभिस्तौति ?
16. B1 विक्षरति for प्रक्षरति
18. H1 om. अतिथेरिति जगती
19. H1 om. इति; B1
20. om. अति°

सा– अथ अग्निमन्थनमन्त्रा उच्यन्ते ।

अ॒ग्नेर्ज॒नित्र॑मसि॒ वृष॑णौ स्थः । उ॒र्वश्य॑स्या॒युर॑सि पु॒रूर॑वा असि ।
गा॒य॒त्रेण॑ त्वा॒ छन्द॑सा मन्थामि॒
त्रैष्टु॑भेन त्वा॒ छन्द॑सा मन्थामि॒ जाग॑तेन त्वा॒ छन्द॑सा मन्थामि ॥२॥

अ॒ग्नेः । ज॒नित्र॑म् । अ॒सि॒ । वृष॑णौ । स्थ॒ः । उ॒र्वशी॑ । आ॒युः । पु॒रू॒र॑वाः । अ॒सि॒ ।
गा॒य॒त्रेण॑ । त्वा॒ । छन्द॑सा । म॒न्था॒मि॒ ।
त्रैष्टु॑भेन । त्रैस्तु॑भे॒नेति॒ त्रैस्तु॑भेन । जाग॑तेन । त्वा॒ । छन्द॑सा । म॒न्था॒मि॒ ॥ घों ॥२॥

कात्यायनः – "अग्नेर्जनित्रमिति शकलमादाय वेद्यां करोति" (काश्रौ ५·१·२८) इति । 'असि' इति मन्त्रशेषः । जायते अस्मिन्निति जनित्रम् । हे शकल, त्वम् ˇअग्नेः ˇजनित्रम् ˇअसि । अग्निजननाधारभूतमसि ॥

कात्यायनः – "वृषणाविति कुशतरुणे" (काश्रौ ५·१·२९) इति । आदायेत्यनुवर्तते । 'स्थः' इति मन्त्रशेषः । हे दर्भौ, युवां ˇवृषणौ सेक्तारौ भवथः । यथा पुत्रजननाय स्त्रीपुरुषौ वीर्यस्य सेक्तारौ तद्वद्युवामपि अरण्योरग्निजननसामर्थ्यसंपादकावित्यर्थः ॥

कात्यायनः – "उर्वश्यसीत्यधरारणिं तयोः" (काश्रौ ५·१·३०) इति । शकले स्थापितयोर्दर्भयोरधरारणिं निदध्यात् । हे अधरारणे, त्वम् ˇउर्वशी ˇअसि । यथोर्वशी पुरुषभोगायाधस्ताच्छेते, तद्वत् त्वमपि अधोवस्थिताऽसीत्यर्थः ॥

कात्यायनः – "आयुरसीत्युत्तरयाऽऽज्यस्थालीं संस्पृशेत्" (द्र. काश्रौ ५·१·३१) इति । येयमुत्तरारणिर्निधास्यते तयाऽज्यस्थालीं स्पृशेत् । हे स्थालीगताज्य, त्वम् ˇआयुः ˇअसि । अरणिद्वयेन जनयिष्यमाणस्याग्नेरायुःप्रदमसि ॥

कात्यायनः – "पुरूरवाः इत्यभिधानम्" (काश्रौ ५·१·३१) इति । 'असि' इति मन्त्रशेषः । अधरारणेरभिमुखत्वेनोत्तरारणिं निदध्यात् । हे उत्तरारणे, त्वं ˇपुरूरवाः ˇअसि । यथा पुरूरवःशब्दाभिधेयः पुरुषः उर्वश्या अभिमुखत्वेनोपरि वर्तते, तथा त्वमपीत्यर्थः । उक्तान् विनियोगानापस्तम्बोऽपि दर्शयति– 'अग्नेर्जनित्रमसीत्यधिमन्थनं शकलं निदधाति । वृषणौ स्थ इति प्राञ्चौ दर्भौ । उर्वश्यसीत्यधरारणिमादत्ते । पुरूरवा इत्युत्तरारणिम्" (आपश्रौ ७·१२·१२-१३) इति ॥

कात्यायनः – "मन्थति गायत्रेणेति प्रतिमन्त्रम्" (काश्रौ ५·२·२) इति । मन्त्रत्रयेणारण्योर्मन्थनं कुर्यात् । पाठस्तु– 'गायत्रेण त्वा छन्दसा मन्थामि त्रैष्टुभेन त्वा छन्दसा मन्थामि; जागतेन त्वा छन्दसा

---

8. V1 om. कात्यायनः ... जनना° (L. 10)
17. S1 C उत्तरम् for उत्तरया, C S1 V1 स्पृशेत् for संस्पृशेत्
18. S1 C V1 om. second अरणि°
22. P1 उर्वशीम् for उर्वश्याः
23. S1 C V1 °मन्थन° for °मन्थनम्°
25. P1 मथनं for मन्थनं

मन्थामि ’ इति । हे अग्ने, त्वां गायत्रीछन्दोऽभिमानिना देवेन सविताऽहं ˇमन्थामि । अरण्योर्मन्थनेनोत्पादयामि । द्वितीयतृतीयमन्त्रावप्येवं व्याख्येयौ ॥२॥

आ— आतिथ्ये अग्निमन्थनशकलमादत्ते— ‘ अग्नेर्जनित्रमसि ’ इति । शकलदेवत्यं यजुर्वा उष्णिक् । जनी प्रादुर्भावे । अग्निर्जायतेऽस्मिन्निति ˇजनित्रम् । दर्भतरुणके निदधाति— ‘ वृषणौ स्थः ’ इति । दैवी बृहती । दर्भतरुणके देवते । वृषु सेचने । ˇवृषणौ वर्षितारौ सेक्तारौ ˇस्थः भवथः । अधरारणिं निदधाति— ‘ उर्वश्यसि ’ इति । दैवी बृहती । अधरारणिर्देवता । उत्तरारण्याज्यविलेपिनीमुपस्पृशति— ‘ आयुरसि ’ इति । दैवी बृहती । लिङ्गोक्तदेवत्या । उत्तरामरणिं निदधाति— ‘ पुरूरवा असि ’ इति । उत्तरारणिदेवत्या गायत्री । “ उर्वशी वाऽप्सराः पुरूरवाः पतिः ” (शब्रा ३·४·१·२२) इत्यादावुर्वशीपुरूरवसौ प्रसिद्धौ । मन्थति ‘ गायत्रेण ’ इति । ‘ गायत्रेण ’ इत्यादीनि त्रीणि आग्नेयानि त्रैष्टुभानि । हे अग्ने, ˇगायत्रेण ˇछन्दसा ˇत्वा त्वाम् अग्निं ˇमन्थामि जनयामि । मन्थ विलोडने । ˇत्रैष्टुभेन ˇछन्दसा ˇत्वा त्वां ˇमन्थामि ॥२॥

भवतं नः समनसौ सचेतसा अरेपसौ ।
मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥३॥

भवतम् । नः । समनसा इति सऽमनसौ । सचेतसा इति सऽचेतसौ । अरेपसौ ।
मा । यज्ञम् । हिꣳसिष्टम् । मा । यज्ञपतिमिति यज्ञऽपतिम् ।
जातवेदसा इति जातऽवेदसौ । शिवौ । भवतम् । अद्य । नः ॥ थूं ॥३॥

सा— कात्यायनः –‘ भवतं न इति प्रास्यति ’ (काश्रौ ५·२·५) इति । आपस्तम्बोऽप्याह— “ भवतं नः समनसावित्यग्रेणोत्तरं परिधिमाहवनीये प्रहरति ” (आपश्रौ ७·१३·६) । पाठस्तु— ‘ भवतं नः समनसौ सचेतसा अरेपसौ । मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ’ इति । योऽयमाहवनीयोऽग्निर्यश्चायं मथितोऽग्निस्तावुभौ हे अग्नी, ˇनः अस्मदर्थं ˇसमनसौ मनसा सहितौ, ˇसचेतसौ परस्परं समानचित्तयुक्तौ । अन्यविषयं मनः परित्यज्य अस्मदनुग्रहाभिमुखत्वं समनस्त्वम् । तस्मिन्ननुग्रहे परस्परविप्रतिपत्तिराहित्यं सचेतस्त्वम् । ˇअरेपसौ पापरहितौ । अस्मद्विषये प्रामादिकेनापराधेनापि कोपाभावः पापराहित्यम् । तद्वन्तौ ˇभवतं, यथोक्तगुणयुक्तावुभौ तिष्ठतम् । पापराहित्यमेव स्पष्टीक्रियते । ˇयज्ञं ˇमा ˇहिꣳसिष्टम् अस्मदीयं कर्म मा विनाशयतम् । तथा ˇयज्ञपतिम् अपि ˇमा विनाशयतम् । हे ˇजातवेदसौ उभावग्नी, अस्मिन्ननुष्ठानदिने ˇनः ˇअस्मदर्थं ˇशिवौ शान्तौ ˇभवतम् ॥३॥

---

1. P1 मथनेन for मन्थनेन
6. B1 देवताना for अधरारणिर् ... °देवत्या (L. 7)
8. B1 इह for वा; B1 पुरूरवसमित्यादा; H1 पुरूवसमित्यादाद्य we have corrected this as पुरूरवाः पतिरित्यादौ [L 9]
20. C S1 V1 अग्ने for अग्नी
23. S1 C V1 om. तद्वन्तौ

आ— निर्मन्थ्याग्न्याहवनीयाग्नी प्रार्थयते— ‘भवतं नः’ इति । आहवनीयनिर्मन्थ्याग्नी देवते । पङ्क्तिः । आहवनीयनिर्मन्थ्याग्नी युवां ᵛनः अस्माकं ᵛसमनसौ समानमनस्कौ ᵛभवतम् । ᵛसचेतसौ समानप्रज्ञौ भवतम् । ᵛअरेपसौ । रेप इति पापनाम । अरेपसौ अपापौ यजमानस्य पापविरोधिनौ भवतम् । ᵛयज्ञं ᵛमा ᵛहिꣳसिष्टं मा विनाशिष्टम् । ᵛयज्ञपतिं च यजमानं च ᵛमा हिꣳसिष्टम् । किं च हे ᵛजातवेदसौ निर्मन्थ्याहवनीयाग्नी, ᵛअद्य ᵛनः अस्माकं ᵛशिवौ शान्तौ ᵛभवतम् ॥३॥

अग्ना अग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्तिपावा ।
स नः स्योनः सुयजा यजेह देवेभ्यो हव्यꣳ सदमप्रयुच्छन्त्स्वाहा ॥४॥(१)॥

अग्नौ । अग्निः । चरति । प्रविष्ट इति प्रऽविष्टः ।
ऋषीणाम् । पुत्रः । अभिशस्तिपावेत्यभिशस्तिऽपावा ।
सः । नः । स्योनः । सुयजेति सुऽयजा । यज । इह । देवेभ्यः । हव्यम् । सदम् ।
अप्रयुच्छन्नित्यप्रऽयुच्छन् । स्वाहा ॥ ७५ ॥४॥(१)॥

सा— कात्यायनः — “अग्ना अग्निरिति जुहोति” (काश्रौ ५·२·६) इति । पाठस्तु— ‘अग्ना अग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्तिपावा । स नः स्योनः सुयजा यजेह देवेभ्यो हव्यꣳ सदमप्रयुच्छन्त्स्वाहा ।’ इति । ᵛअग्नौ आहवनीयाख्ये यः ᵛप्रविष्टः ᵛअग्निः मथ्यमानः सोऽयं ᵛचरति हविर्भक्षयति । चर गतिभक्षणयोः । कथंभूतोऽग्निः ? ᵛऋषीणां ᵛपुत्रः ऋत्विजो वेदविदश्चात्र ऋषय इत्युच्यन्ते । तैरुत्पादितत्वात् पुत्रवत् पुत्रः । ᵛअभिशस्तिपावा । अभिशस्तिर्वैकल्यनिमित्तोऽभिशापः । तस्मात् पाति पावयति (? गोपायति) रक्षयतीत्यभिशस्तिपावा । हे अग्ने, ᵛसः तथाविधस्त्वं ᵛनः अस्मदर्थं ᵛस्योना सुखरूपो भूत्वा ᵛसुयजा शोभनेन साङ्गेन यागेन ᵛइह अस्मिन् स्थाने ᵛदेवेभ्यः इन्द्रादिभ्यः ᵛहव्यं सोमादिरूपं ᵛयज देहि । यज देवपूजनसंगतिकरणदानेषु । अस्माभिर्दत्तं हविर्देवान् प्रापयेत्यर्थः । किं कुर्वन् ? ᵛसदं सदा ᵛअप्रयुच्छन् अप्रमाद्यन् । ᵛस्वाहा तुभ्यमिदमाज्यं हुतम् ॥४॥(१)॥

[इति पञ्चमेऽध्याये प्रथमोऽनुवाकः ॥१॥]

आ— जुहोति— ‘अग्ना अग्निः’ इति । अस्य निर्मन्थ्याहवनीयाग्नी देवते । विराड् यजुरन्ता । ᵛअग्नौ आहवनीयाख्ये ᵛप्रविष्टः एषः ᵛअग्निः निर्मन्थ्य ᵛऋषीणां विदुषां अग्निहोत्रिणां ᵛपुत्रः ।

---

1. B1 निर्मथ्य° for निर्मन्थ्य°
16. S1 C V1 after भक्षणयोः ins. इति
18. S1 C V1 om. पावयति; S1 C V1 रक्षति for रक्षयति
19. S1 C V1 संयोगेन for साङ्गेन यागेन; C om. अस्मिन्
22. S1 खण्डः for अनुवाकः

तैरस्य जननात् नरकपरित्राणनाच्च अग्नेः पुत्रत्वमुपचर्यते । ^{v}चरति । चरगतिभक्षणयोः । हविर्भक्षयति । सः च ^{v}अभिशस्तिपावा । अभिशासनमभिशास्तिः अभिशापः । अभिशस्तेः सकाशात् पाति गोपायतीति अभिशस्तिपावा, ^{v}सः ^{v}नः अस्माकं ^{v}स्योनः सुखरूपो भवतु । 'सुयजा यजेह' । तथा सति ^{v}इह अस्मिन्नग्नौ ^{v}सुयजा शोभनेन साङ्गेन यागेन ^{v}यज । पुरुषव्यत्ययः । यजै । तत्र ^{v}सदं सदा ^{v}अप्रयुच्छन् । युच्छ प्रमादे । अप्रमाद्यन् सावधानो भवान् ^{v}देवेभ्यः ^{v}हव्यं चरति ^{v}स्वाहा सुहुतमस्तु ॥४॥

[इति पञ्चमेऽध्याये प्रथमोऽनुवाकः ॥१॥]

[अथ द्वितीयोऽनुवाकः]

सा– प्रथमे आतिथ्यादिमन्त्रा उक्ताः । द्वितीये तानूनप्त्रादिमन्त्रा उच्यते ।

आप॑तये त्वा गृह्णामि॒ परि॑पतये त्वा गृह्णामि ।
तनून॑प्त्रे शाक्व॒राय॒ शक्म॒न्नोजि॑ष्ठाय ॥१॥

आप॑तय॒ इत्याऽप॑तये । त्वा॒ । गृ॒ह्णा॒मि॒ । परि॑पतय॒ इति॒ परि॑ऽपतये ।
तनू॒न॒प्त्र॒ इति॒ तनू॒ऽनप्त्रे॑ । शा॒क्व॒राय॑ । शक्म॑न् । ओजि॑ष्ठाय ॥ ल्यें ॥१॥

कात्यायनः – "ध्रौवं व्रतप्रदाने गृह्णात्यापतय इति" (काश्रौ ८·१·१९) पञ्चभिः । तत्र प्रथममन्त्रपाठस्तु– 'आपतये त्वा गृह्णामि' इति । आसमन्तात् पातीत्यापतिः प्राणवायुः । एवमाह तित्तिरिः – "प्राणो वा आपतिः । प्राणमेव प्रीणाति" (तैसं ६·२·२-३) इति । हे आज्य, त्वाम् ^{v}आपतये प्राणदेवताप्रीत्यर्थं ^{v}गृह्णामि । अस्मिन् पात्रे स्वीकरोमि ॥

द्वितीयमन्त्रपाठस्तु– 'परिपतये त्वा गृह्णामि' इति । इष्टप्राप्त्युपायमनिष्टपरिहारोपायं च चिन्तयित्वा परितः पालयतीति परिपतिर्मनः । तदप्याह तित्तिरिः – "मनो वै परिपतिर्मन एव प्रीणाति" (तैसं ६·२·२·३) इति । हे आज्य, ^{v}त्वा ^{v}परिपतये मनोदेवताप्रीत्यर्थं ^{v}गृह्णामि ॥

तृतीयमन्त्रपाठस्तु– 'तनूनप्त्रे' इति । अत आरभ्य त्रिषु मन्त्रेषु 'त्वा गृह्णामि' इत्ययं मन्त्रशेषोऽनुषज्यते । तनूं शरीरं न पातयति न विनाशयतीति तनूनप्ता जाठरोऽग्निः । हे आज्य, त्वां ^{v}तनूनप्त्रे, तनूनप्ता जाठरोऽग्निः, तस्मै तद्देवताप्रीत्यर्थं ^{v}गृह्णामि ॥

---

2. H1 om. अभिशापः
3. H1 before सः add यः
14. V1 S1 C om. पञ्चभिः ... एवमाह (L. 15)
21. S1 V1 C om. अतः
23. P1 om. तनूनप्त्रे; S1 C V1 om. तनूनप्ता: C जाठराग्नये; S1 P जाठराग्निः for जाठरोऽग्निः; C V1 S1 om. तद्°

चतुर्थमन्त्रपाठस्तु– ‘ शाक्वराय ’ इति । शाकनशीलः शाक्वरः शक्तिमान् पुरुषः । तस्य संबन्धि शाक्वरं शक्तिस्वरूपम् । हे आज्य, त्वां ᵛशाक्वराय शक्तिस्वरूपाभिमानिदेवताप्रीत्यर्थं गृह्णामि ॥

पञ्चममन्त्रपाठस्तु– ‘ शक्मन्नोजिष्ठाय ’ इति । ᵛशक्मन् शक्तिमत्सु पुरुषेषु यदोजिष्ठं तस्मै । हे आज्य, त्वां गृह्णामि । ओजो नामाष्टमो धातुस्तस्य सारम् ओजिष्ठम् । तदवष्टम्भेनैव शरीरे शक्तिरवतिष्ठते । ओजःसराभिमानिदेवताप्रीत्यर्थं गृह्णामीत्यर्थः । तनूनप्तृसंज्ञकजाठराग्निसंज्ञकजाठराग्निदेवताविषयस्य शपथकर्मणो हेतुभूतमाज्यं तनूनप्तृसंज्ञकम् । तदेतदुक्तैः पञ्चभिर्मन्त्रैर्गृहीतम् ॥१॥

आ – ध्रौवं व्रतप्रदाने गृह्णाति– ‘ आपतये ’ इति । वायुदैवत्या निचृदनुष्टुप् । आपततीत्यापतिस्तस्मै । परितः सर्वतः पातीति परिपतिः तस्मै ᵛपरिपतये आपतये वायवे आज्यं ᵛत्वा त्वां ᵛगृह्णामि । पुनः कथंभूताय ? ᵛतनूनप्त्रे । तनूशब्देनात्र आत्माऽभिधीयते । तन्वान्ति ह्याकाशादयो यस्मात् स आत्मा तनूः । “ तस्माद्वा एतस्मादाकाशः संभूतः आकाशाद्वायुर्जातः ” (तैआ ८.२) इति । तदभिप्रायेण ᵛतनूनप्त्रे ब्रह्मणः पौत्राय वायवे । ᵛशाक्वराय । शक्लृ शक्तौ । शक्नुवन्त्याकाशे भूतानि स्थातुमिति शक्वरः आकाशस्तस्यापत्यं शाक्वरो वायुः । तस्मै तनूनप्त्रे शाक्वराय वायवे । शक्मन् शक्तेर्मनिन्नन्तं रूपम् । हे ᵛशक्मन्, शक्तिसंपन्न वायो, ᵛओजिष्ठाय बलिष्ठाय वायवे आज्यं त्वां गृह्णामीति संबन्धः ॥१॥

अना॑धृष्टमस्यनाधृ॒ष्यं॑ दे॒वाना॒मोजः॑ ।
अन॑भिशस्त्यभिशस्ति॒पा अ॑नभिशस्ते॒न्यम् ।।२।।
अञ्ज॑सा स॒त्यमुप॑ गेषꣳ सुवि॒ते मा॑ धाः ।
अग्ने॑ व्रतपा॒स्त्वे॑ व्र॑तपाः ।।३।।
या तव॑ त॒नूरि॒यꣳ सा म॒यि या मम॑ त॒नूरे॒षा सा त्वयि॑ ।
स॒ह नौ॑ व्रतप॑ते व्र॒तान्यनु॑ मे दी॒क्षां दी॒क्षाप॑ति॒र्मन्य॑ता॒मनु॒ तप॒स्तप॑स्पतिः ।।४।।

अना॑धृष्टम् । अ॒सि॒ । अ॒ना॒धृ॒ष्यम् । दे॒वाना॑म् । ओजः॑ ।
अन॑भिश॒स्तीत्यन॑भिऽशस्ति । अ॒भि॒श॒स्ति॒पा इत्य॑भि॒श॒स्ति॒ऽपाः ।
अ॒न॒भि॒श॒स्ते॒न्य॑मित्य॑न॒भि॒ऽश॒स्ते॒न्य॑म् ।। ठों ।।२।।

---

1. C V1 तुरीय° for चतुर्थ°; P1 पुरुषस्य° for पुरुषः । तस्य;
2. C S1 °स्वरूप for °स्वरूपं°
3. V1 S1 C om. शक्मन्नोजिष्ठायेति; P1 हे शक्मन् for शक्मन्
7. B1 ध्रुवं for ध्रौवं
8. B1 परीति for पातीति; B1 om. परिपतिः
9. H1 तन्यन्ति for तन्वान्ति

अञ्ज॑सा । स॒त्यम् । उप॑ । गे॒ष॒म् । सु॒वि॒ते । मा॒ । धा॒ः ।
अग्ने॑ । व्र॒त॒पा॒ इति॑ व्रतऽपाः । त्वे इ॒ति त्वे । व्र॒त॒पा॒ इति॑ व्रतऽपाः ॥ डां ॥ ३ ॥
या । तव॑ । त॒नूः । इ॒यम् । सा । मयि॑ । या । मम॑ । त॒नूः । ए॒षा । सा । त्वयि॑ ।
स॒ह । नौ॒ । व्र॒त॒प॒त॒ इति॑ व्रतऽपते । व्र॒तानि॑ ।
अनु॑ । मे॒ । दी॒क्षाम् । दी॒क्षाप॑ति॒रिति॑ दी॒क्षाऽप॑तिः । मन्य॑ताम् ।
अनु॑ । तपः॑ । तप॑स्पतिः । तप॑.प॒ति॒रि॒ति तपः॑ऽपतिः ॥ द्रु ॥४॥

सा– कात्यायनः –"तानूनप्त्रमेतद्दक्षिणस्यां वेदिश्रोणौ निधायावमृशन्त्यृत्विजो यजमानश्चानाधृष्टमिति" (काश्रौ ८·१·२४-२५) इति। पाठस्तु– 'अनाधृष्टमस्यनाधृष्यं देवानामोजः। अनभिशस्त्यभिशस्तिपा अनभिशस्तेन्यम्। अञ्जसा सत्यमुप गेषं सुविते मा धाः' इति। हे आज्य, त्वम् ᵛअनाधृष्टम् ᵛअसि इतः पूर्वं केनाप्यतिरस्कृतमसि। ᵛअनाधृष्यम् इतः परमप्यतिरस्कार्यं ᵛदेवानाम् ᵛओजः अग्न्यादीनां संबन्धि सारमसि। ᵛअनभिशस्ति। अभिपूर्वः शंसतिर्गर्हायां वर्तते। तद्रहितमनभिशस्ति त्वमसि। ᵛअभिशस्तिपाः। ऋत्विजां परस्परविरोधेन निन्दनमभिशस्तिः। तस्याः पाति रक्षतीत्यभिशस्तिपाः। लिङ्गव्यत्ययादभिशस्तिपम्। ᵛअनाभिशस्तेन्यम्। अनभिशस्तमनभिनिन्दितं यत् स्वर्गादिफलं तद्धेतुत्वादनभिशस्तेन्यम्। हे आज्य, तथाविधमसि। अतोऽहमृत्विक् ᵛअञ्जसा ऋजुमार्गेण मानसकौटिल्यरहितेन ᵛसत्यम् आज्यस्पर्शरूपं शपथम् ᵛउपगेषम् उपगच्छेयम्। हे तनूनप्त्राज्य, ᵛसुविते शोभनमार्गे यज्ञकर्मणि ᵛमा ᵛधाः मां स्थापय॥

कात्यायनः – "अग्ने व्रतपा इत्याहवनीये समिधमाधाय" (काश्रौ ८·२·४) इति। पाठस्तु– 'अग्ने व्रतपास्त्वे व्रतपाः। या तव तनूरियं सा मयि या मम तनूरेषा सा त्वयि। सह नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्पतिः' इति। हे ᵛव्रतपाः सर्वेषां व्रतानां पालकाग्ने, ᵛत्वे ᵛव्रतपाः त्वमस्मदीयस्य वर्तमानस्य व्रतस्य पालको भवसीति शेषः। ᵛतव तथाविधस्य व्रतपालकस्य ᵛया ᵛतनूः शरीरमस्ति, ᵛसा ᵛइयं तनूः ᵛमयि भवत्विति शेषः। ᵛया च ᵛमम ᵛतनूः मदीयं शरीरं ᵛसा ᵛएषा तनूः ᵛत्वयि भवतु। तथा सति, हे ᵛव्रतपते व्रतपालकाग्ने, ᵛव्रतानि अनुष्ठेयानि कर्माणि ᵛनौ आवयोरग्नियजमानयोः ᵛसह प्रवर्तन्तामिति शेषः। व्रतेषु मम यावानादरस्तावानेव तवापि भवत्वित्यर्थः। किं च ᵛदीक्षापतिः दीक्षायाः पालकः सोमः ᵛमे मदीयां ᵛदीक्षाम् ᵛअनु मन्यताम्। तथा ᵛतपस्पतिः उपसद्रूपस्य तपसः पालकः सोमः ᵛतपः मदीयमुपसद्रूपमनुमन्यतामिति वर्तते॥२–४॥

आ– आज्यमवमृशन्त्यृत्विजः परस्परमद्रोहायाविरोधाय– 'अनाधृष्टमसि'। आज्यदेवत्योष्णिक्, 'घृतमाज्यं हविः सर्पिः' इत्यभिधानात्। हे आज्य, पूर्वमपि केनापि त्वम् ᵛअनाधृष्टम्

---

10. P1 before देवानाम् adds यतो
11. P1 om. वर्तते
12. P1 C S1 V1 अनभिशस्तिपाः – we have corrected this as अभिशस्तिपाः
14. C S1 V1 °शस्तेन्य for °शस्तेन्यम्; C V1 अतो हे for अतोऽहम्; P1 °रहितत्वेन for °रहितेन
19. C P1 त्वं for त्वे
24. P1 after मे adds मम
26. B1 om. अविरोधाय

[Vअसि] अनाधर्षितम् अनुल्लङ्घितं त्वं भवसि । इदानीमपि त्वम् Vअनाधृष्यम् अनुल्लङ्घनीयं त्वम् असि । Vदेवानाम् Vओजः बलं त्वमसि । अनभिशस्ति । अभिपूर्वः शंसतिर्गर्हायां वर्तते । न विद्यते अभिशस्तिर्यस्य तदाज्यम् Vअनभिशस्ति । अभिशस्तिपाः । अभिशस्तेः पाति रक्षतीति Vअभिशस्तिपाः । अत्र लिङ्गव्यत्ययः । अनभिशस्त्यस्य अनिन्द्यस्य स्वर्गादेः प्रदेशस्य संबन्धि आज्यम् Vअनभिशस्तेन्यम् आसि अनभिशंसनीयमासि ॥२॥

यतस्त्वमित्थंभूतमतस्त्वामभिशस्य (? °मृश्य) स्वाभिप्रेतमर्थं प्रार्थयति— ‘ अञ्जसा सत्यम् ’ इति । लिङ्गोक्तदेवत्या गायत्री । ‘ अञ्जसा सत्यमुप गेषम् ’ । Vअञ्जसा प्रगुणेन ऋजुमार्गेण Vसत्यं यथास्वरूपम् Vउपगेषम् उपगच्छेयम् । त्वं चानेन सत्येन Vसुविते शोभनया विते सुविस्तृते स्वर्गादिलोके Vमा Vधाः मां धारय ॥

आहवनीये समिधमादधाति— ‘ अग्ने व्रतपाः ’ इति । आग्नेयं यजुः । यजमानोऽनेन यजुषा अग्निशरीरात्मशरीरयोर्व्यत्ययं करोति । हे Vअग्ने Vव्रतपाः । व्रत इति कर्मनाम । व्रतं परिरक्षतीति व्रतपाः । हे व्रतपाः Vत्वे त्वां, व्यत्ययः । Vव्रतपाः व्रतस्य गोप्तारं, शरणं व्रजामीति शेषः ॥ ३ ॥

केन प्रकारेणेति तदाह – ‘ या तव तनूः ’ इति । लिङ्गोक्तदेवत्या जगती । तत्संबन्धिनी Vया Vइयं Vतनूः Vसा Vमयि भवत्विति शेषः । Vमम संबन्धिनी मदीया Vएषा Vया Vतनूः Vसा Vत्वयि भवत्विति शेषः । ‘ सह नौ व्रतपते व्रतानि ’ । हे Vव्रतपते, Vनौ एवंभूतशरीरव्यत्ययः ययोरावयोः Vसह एकत्र Vव्रतानि कर्माणि सन्त्विति शेषः । किं च । ‘ अनु मे दीक्षाम् ’ । [Vमे] मदीयां [Vदीक्षां] Vदीक्षापतिः सोमः Vअनुमन्यताम् । ‘ अनु तपस्तपस्पतिः ’ तप उपसद उच्यन्ते । उपसदां पतिः सोमः Vमे मदीयं Vतपः Vअनु मन्यताम् अनुजानातु ॥ ४ ॥

अ॒ꣳशुर॑ꣳशुष्टे देव सो॒मा प्या॑यता॒मिन्द्रा॑यैकधन॒विदे॑ ।
आ तुभ्य॒मिन्द्रः॒ प्याय॑ता॒मा त्वमिन्द्रा॑य प्यायस्व ॥ ५ ॥
आ प्या॑यया॒स्मान् सखी॑न्त्स॒न्या मे॒धया॑ ।
स्व॒स्ति ते॑ देव सोम सु॒त्यामु॒दृच॑मशीय ॥ ६ ॥

अ॒ꣳशुर॑ꣳशु॒रित्य॑ꣳशुःऽअ॑ꣳशुः । ते॒ । दे॒व॒ । सो॒म॒ । आ । प्या॒य॒ता॒म् ।
इन्द्रा॑य । ए॒क॒ध॒न॒विद॒ इत्ये॑क॒ध॒न॒ऽविदे॑ ।

---

4. H1 अत्राभि° for अनभि°
6. H1 अतः for यतः
15. B1 या for मदीया
19. H1 उपसतां for उपसदां; H1 after मे adds मम

आ । तुभ्यम् । इन्द्रः । प्यायताम् । आ । त्वम् । इन्द्राय । प्यायस्व ॥ जें ॥ ५ ॥
आ । प्यायय । अस्मान् । सखीन् । सन्या । मेधया ।
स्वस्ति । ते । देव । सोम । सुत्याम् । उदृचमित्युत्ऽऋचम् । अशीय ॥ ध्रीं ॥६॥

सा– कात्यायनः – "यजमानषष्ठाः सोममाप्याययन्त्यंशुरंशुरिति" (काश्रौ ८.२.६) इति। ऋत्विजश्चत्वारः, पत्नी पञ्चमी, यजमानः षष्ठः। पाठस्तु–'अंशुरंशुष्टे देव सोमा प्यायतामिन्द्रायैकधनविदे। आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्व'॥, 'आ प्याययास्मान्त्सखीन्त्सन्या मेधया। स्वस्ति ते देव सोम सुत्यामुदृचमशीय' इति। अंशुशब्दः सोमवल्या अवयवमाचष्टे। वीप्सा सर्वसंग्रहार्था। हे 'सोम 'देव, 'ते त्वदीयः 'अंशुरंशुः सर्वेऽप्यवयवाः 'इन्द्राय इन्द्रप्रीत्यर्थम् 'आप्यायताम् अनेन प्रोक्षणेन सर्वतो वर्धताम्। चिरकालावस्थानेन सोमस्य योऽवयवो म्लानो भवति, यश्च शुष्यति तदुभयमनेनाप्यायितं भवतीति मन्त्रस्य तात्पर्यम्। तदाह तित्तिरिः – "यदेवास्यापुवायते यन्मीयते तदेवास्यैतेनाऽऽप्याययति" (तैसं ६.२.२) इति। कथंभूताय इन्द्राय? । 'एकधनविदे। यावन्तः सोमयागाः सन्ति तेषु सर्वेषु सोमरूपमिदं द्रव्यमेकमेव धनं तद्विन्दते लभत इत्येकधनवित्। किं च, हे सोम, 'तुभ्यं त्वत्प्रीत्यर्थम् 'इन्द्रः 'आप्यायताम्। बहुसोमपानेनेन्द्रो वर्धताम्। तथा हे सोम, 'त्वम् अपि 'इन्द्राय इन्द्रप्रीत्यर्थम् 'आप्यायस्व सर्वतः प्रवृद्धो भव। एतन्मन्त्रपाठेनोभयोरभिवृद्धिः कृता भवति। तदाह तित्तिरिः – "उभावेवेन्द्रं च सोमं चाऽऽप्याययति" (तैसं ६.२.२) इति। किं च हे सोम, 'सखीन् सखिवत् प्रीतिविषयान् 'अस्मान् ऋत्विजः। तित्तिरिरप्याह– "ऋत्विजो वा अस्य सखायः" (तैसं ६.२.२) इति। 'सन्या धनदानेन। 'मेधया अनुष्ठानेनार्थज्ञानधारणशक्त्या च 'आप्यायय प्रवृद्धान् कुरु। किं च हे 'सोम 'देव, 'ते 'स्वस्ति होमोऽस्तु। तव प्रसादादहम् 'उदृचं येयमृगुत्तमा समाप्तिकालीनाऽस्ति तत्पर्यन्तम्। 'सुत्यां सोमाभिषवक्रियाम् 'अशीय प्राप्नुयाम् ॥५-६॥

आ– सोममाप्याययन्ति–'अंशुरंशुष्टे', 'आ प्यायय' इति च द्वे सोमदेवत्ये। आद्या पुरस्ताद्बृहती। अपरा गायत्री। द्वे सोमदेवत्ये। तत्र अंशुः। अंशुरश्मिरंशुवत्। अंशुरिति वीप्सा आदरार्था। 'आप्यायताम् उपचीयताम्। ओप्यायी वृद्धौ। अभिवर्धताम्। कस्मै? 'एकधनविदे एकस्मै धनविदे भगवते। यज्ञायैव धनं येषां ते एकधनाः। एकधना इति देवास्तान् वेत्तीति एकधनवित्। तस्मै एकधनविदे। 'इन्द्राय परमैश्वर्ययुक्ताय, इन्द्रार्थम्। 'आ तुभ्यमिन्द्रः प्यायताम्'। हे सोम, 'तुभ्यं त्वदर्थम् 'इन्द्रः 'आप्यायताम्। बहुसोमपानेन उपचीयताम्। हे सोम, 'इन्द्राय इन्द्रार्थमेव 'त्वम् अपि आत्मानम् 'आप्यायस्व वर्धय ॥५॥

'आ प्यायय' इति। हे सोम, 'अस्मान् यजमानान् 'आप्यायय। 'सखीन् समानख्यानान् परिचारकान्। 'सन्या। षणु दाने। धनदानेन सखीन् 'आप्यायय। 'मेधया

---

8. P1 om. ते
14. S1 C V1 प्रवृद्धं for प्रवृद्धो
17. S1 C V1 after इति add उक्तम्
23. B1 om. धनविदे
26. B1 अपि for एव

विज्ञापनधारणावत्या प्रज्ञया च अस्मानाप्यायय। हे ᵛदेव ᵛसोम, ᵛते तुभ्यं ᵛस्वस्ति अविनाशोऽस्तु। अहमपि ᵛउदृचम् उत्कृष्टदीप्तिमतीं ᵛसुत्याम्। षुञ् अभिषवे। तव संबन्धिनीं सुत्याम् ᵛअशीय। अशु व्याप्तौ। व्याप्नुयाम् ॥६॥

एष्टा रायः प्रेषे भगाय। ऋतमृतवादिभ्यो नमो दिवे नमः पृथिव्यै ॥७॥

एष्टा इत्याऽइंष्टाः। रायः। प्र। इषे। भगाय। ऋतम्।
ऋतवादिभ्य इत्यृतवादिऽभ्यः। नमः। दिवे। नमः। पृथिव्यै ॥ जां ॥ ७ ॥

सा– कात्यायनः – "प्रस्तरे निह्नवत उत्तानहस्ता दक्षिणोत्ताना एष्टा राय इति" (द्र.काश्रौ ८.२.९) इति। सर्वेऽप्यृत्विजः प्रस्तरे स्वकीयहस्तानुत्तानान् कृत्वा दक्षिणहस्तमुत्तानमुपर्यवस्थाप्य निह्नवते। तेन परिग्रन्ति सोममुपचरन्तीत्यर्थः। पाठस्तु– 'एष्टा रायः प्रेषे भगाय। ऋतमृतवादिभ्यो नमो दिवे नमः पृथिव्याः' इति। ᵛप्रेषे प्रकर्षेणेष्यमाणायान्नाय ᵛभगाय ऐश्वर्याद्यर्थं ᵛरायः धनानि ᵛएष्टा आसमन्तादिष्टा अपेक्षिताः। हे सोम, त्वत्प्रसादादस्माकं रायो भवन्त्वित्यभिप्रायः। किं च। ᵛऋतवादिभ्यः सत्यवादिभ्योऽग्निहोत्रिभ्यस्तत्प्रीत्यर्थम् ᵛऋतं सत्यमवश्यंभाविफलोपेतं कर्म हे सोम, संपादयेति शेषः। ᵛनमः ᵛदिवे द्युलोकाभिमानिन्यै देवतायै नमोऽस्तु। ᵛनमः ᵛपृथिव्यै भूमिदेवतायै नमोऽस्तु। तयोर्देवतयोरनुग्रहेण अनुष्ठातुर्यजमानस्य अविघ्नेन स्थितिर्भवति। तदाह तित्तिरिः – "द्यावापृथिवीभ्यामेव नमस्कृत्यास्मिन् लोके प्रतितिष्ठन्ति' (तैसं ६.२.२) इति ॥७॥

आ– प्रस्तरे निह्नुवतः– 'एष्टा रायः' इति धनदेवत्या गायत्री। ᵛरायः धनानि। ᵛआ ᵛइष्टाः दक्षिणार्थं दत्ताः। किमर्थम्? ᵛप्रेषे। प्र इषे प्रकृष्टान्नाय ᵛभगाय ऐश्वर्याद्यर्थम्। किं च– 'ऋतम् ऋतवादिभ्यः'। ऋतवादिनां सत्यवदनशीलानां सत्यव्रतानामग्निहोत्रिणां चिन्तितम् ᵛऋतं सत्यं स्यादिति शेषः। ᵛनमः ᵛदिवे ᵛनमः ᵛपृथिव्यै। द्यावापृथिव्योर्नमस्कारात् तदुपलक्षितानां सर्वेषां नमस्कारः कृत इत्यभिप्रायः ॥७॥

या ते अग्नेऽयःशया तनूर्वर्षिष्ठा गह्वरेष्ठा।
उग्रं वचो अपावधीत् त्वेषं वचो अपावधीत् स्वाहा ॥

---

1. B1 वा for च
8. P1 om. अपि
10. C P1 प्रैषे for प्रेषे; S1 प्रकर्षेणैष्य° for प्रकर्षेणेष्य°
11. C S1 V1 अपेक्षितदिष्टा for अपेक्षिताः
13. S1 भूरिति for भूमि°
17. H1 om. प्रेषे
18. S1 वादित; H1 वादीन–we have corrected this as °वदन°

या ते अग्ने रजःशया तनूर्वर्षिष्ठा गह्वरेष्ठा ।
उग्रं वचो अपावधीत् त्वेषं वचो अपावधीत् स्वाहा ॥
या ते अग्ने हरीशया तनूर्वर्षिष्ठा गह्वरेष्ठा ।
उग्रं वचो अपावधीत् त्वेषं वचो अपावधीत् स्वाहा ॥८॥(२)॥

या । ते । अग्ने । अयःशयेत्ययःऽशया । तनूः ।
वर्षिष्ठा । गह्वरेष्ठा । गह्वरेस्थेति गह्वरेऽस्था ।
उग्रम् । वचः । अप । अवधीत् । त्वेषम् । वचः । अप । अवधीत् । स्वाहा ।
रजःशयेति रजःऽशया । हरीशया । हरिशयेति हरिऽशया ॥८॥ (२) ॥

सा– कात्यायनः – " उपसदं जुहोति स्रुवेण या त इति " (काश्रौ ८.२.२५) इति । पाठस्तु– ' या ते अग्नेऽयःशया तनूर्वर्षिष्ठा गह्वरेष्ठा । उग्रं वचो अपावधीत् त्वेषं वचो अपावधीत् स्वाहा ' इति । अत्र कयाचिदाख्यायिकया कण्वो मन्त्रं व्याचष्टे । असुराणां लोकत्रये तिस्रः पुर इदमुवाच– " ततो ह्यसुरा एषु लोकेषु पुरश्चक्रिरे अयस्मयीमेवास्मिंल्लोके रजतामन्तरिक्षे हरिणीं दिवि " (माशब्रा ३.४.४.३) इति। एतमेवार्थं तित्तिरिरप्याह– " तेषामसुराणां तिस्रः पुर आसन्नयस्मय्यवमाऽथ राजताऽथ हरिणी " (तैसं ६.२.३) इति । तास्तिस्रः पुरो दग्धुमुपसद्देवतारूपोऽग्निर्यदा तासु पूर्षु प्रविश्य व्याप्नोति तदानीमेतास्तिस्रः पुरोऽग्नेस्तनवो भवन्ति । तदेतदभिप्रेत्यायं मन्त्रः प्रवर्तते । अयसि शेत इति अयःशया लोहमयीत्यर्थः । हे अग्ने, तव या तनूः अयःशया लोहमयपुरव्यापित्वेन तद्रूपा सती वर्षिष्ठा देवानामतिशयेनाभिमतफलवर्षिणी । गह्वरेष्ठा असुरसंबन्धितया गह्वरे विषमदेशे तिष्ठतीति गह्वरेष्ठा । सा ते तनूः उग्रं वचः अपावधीत् छिन्धि भिन्धीत्यादिकमसुरैः प्रोक्तं तीव्रं वचनं विनाशितवती । तथा त्वेषं वचः असुरैः प्रोक्तं देवाधिक्षेपरूपत्वेन प्रदीप्तं वाक्यम् अपावधीत् विनाशितवती । स्वाहा तथाविधोपकारकर्त्रे तुभ्यमग्नये हविर्दत्तम् । अथवा असुरैरुपद्रुता देवा अन्नपाने अलभमानाः क्षुधया पिपासया च वयं पीडिता इति वदन्ति, तदेतदुग्रं वचः । तथा किमुपपातकमस्माभिः पुरा कृतं, किं वा वीरहत्याऽऽदिरूपं महापातकमस्माभिः कृतमित्येवं क्लिश्यन्तो देवा यद्वाक्यं संतापहेतुत्वेन प्रदीप्तं वदन्ति तदिदं ' त्वेषं वचः ' इत्युच्यते । तदेतत् सर्वमाह तित्तिरिः – " अशनयापिपासे ह वा उग्रं वचः । एनश्च वैरहत्यं च त्वेषं वचः " (तैब्रा १.५.९) इति । कात्यायनः – " एवमितरे अन्वहं रजःशयां हरिशयां च " (काश्रौ ८.२.३८) इति । यथा प्रथमदिने 'अग्ने अयःशया' इत्युपसदनुष्ठिता, एवमितरे द्वितीयतृतीये उपसदौ द्वितीयतृतीयदिनयोरनुतिष्ठेत् । तत्र द्वितीयस्यामुपसदि ' रजःशया ' इति । तृतीयस्यामुपसदि ' हरिशया ' इति पाठभेदः । तयोर्मन्त्रयोः

---

11. C S1 V1 om. मन्त्रं व्याचष्टे
13. C S1 V1 एवम् for अवमा
16. C S1 V1 °पुरो for °पुर°; C S1 V1 देवीं for देवानाम्
19. C कारे; S1 °कारके for °कर्त्रे
21. V1 C °घातकम् for °पातकम्; C S1 om. पुरा कृतं ... अस्माभिः (L. 19)
26. V1 C S1 om. तत्र; S1 C1 V1 om. रजःशयेति ... तृतीयस्यामुपसदि; V1 C S1 °शयामिति for °शयेति

उत्तरवेदिनिर्माणमन्त्राः]

पाठस्तु–'या ते अग्ने रजःशया तनूर्वर्षिष्ठा गह्वरेष्ठा । उग्रं वचो अपावधीत् त्वेषं वचो अपावधीत् स्वाहा । या ते अग्ने हरीशया तनूर्वर्षिष्ठा गह्वरेष्ठा । उग्रं वचो अपावधीत् त्वेषं वचो अपावधीत् स्वाहा ' इति ॥ ^{v}रजःशया रजतमयी । ^{v}हरिशया हिरण्मयी । अन्यत् सर्वं पूर्ववद्व्याख्येयम् ॥८॥

[इति पञ्चमेऽध्याये द्वितीयोऽनुवाकः ॥]

आ– उपसदं जुहोति । "ततोऽसुरा एषु लोकेषु पुरश्चक्रिरे अयस्मयीमेवास्मिंल्लोके रजतामन्तरिक्षे हरिणीं दिवि " (माशब्रा ३·४·४·३) इत्यादीतिहासोदिताऽभिप्रायोऽयम् । 'या ते अग्ने ' इति । आग्नेयो धृतिबृहत्यात्मकप्रगाथः । हे ^{v}अग्ने, ^{v}ते तव ^{v}अयःशया । अयसि शेते इति अयःशया अयस्मयी ^{v}तनूः शरीरम् । ^{v}वर्षिष्ठा वृषतमा असुराणामपेक्षितार्थानामतिशयेनाभिवर्षिणी । ^{v}गह्वरेष्ठा निगूढदेशस्थायिनी । एवंगुणविशिष्टा सा ते तनूः । उग्रं वचः अपावधीत् । असुरसंबन्धि यद् ^{v}उग्रं ^{v}वचः निष्ठुरं वचनं जहि छिन्धि भिन्धीत्यादिवचनं तत् ^{v}अपावधीत् अपहन्तु । एवंविधं वचनं न कदाचिदपि शृणुयामित्याभिप्रायः । त्वेषं वचो अपावधीत् । बलेनोर्जस्वितया युक्तं ^{v}त्वेषम् । त्विष दीप्तौ, दीप्तं ^{v}वचः ^{v}अपावधीत् अपहन्तु । ^{v}स्वाहा अहीनमस्तु । हे ^{v}अग्ने, ^{v}ते तव ^{v}या ^{v}रजःशया, रजसि रजते शेत इति रजःशया रजतमयी ^{v}तनूः । ^{v}वर्षिष्ठा ^{v}गह्वरेष्ठा या तनूः सा ^{v}उग्रं ^{v}वचः ^{v}अपावधीत् । बलेन ^{v}त्वेषं दीप्तं ^{v}वचः ^{v}अपावधीत् । हे ^{v}अग्ने, हरिते शेत इति ^{v}हरिशया । ' हरिशया तनूः वर्षिष्ठा ' इत्यादि ॥ समानार्थम् ॥८॥

[इति पञ्चमेऽध्याये द्वितीयोऽनुवाकः ॥]

[अथ तृतीयोऽनुवाकः]

सा– द्वितीये तनूनप्त्रादिमन्त्रा उक्ताः । तृतीये तूत्तरवेदिनिर्माणमन्त्रा उच्यन्ते ।

तप्तायनी मेऽसि वित्तायनी मेऽसि
अवतान्मा व्यथितमवतान्मा नाथितम् ॥१॥

तप्तायनीति तप्तऽअयनी । मे । असि । वित्तायनीति वित्तऽअयनी । मे । असि ।
अवतात् । मा । व्यथितम् । अवतात् । मा । नाथितम् ॥रिं॥१॥

कात्यायनः –"शम्यामुदीचीं निदधाति । पुरस्तात् पश्चाच्च । दक्षिणतः प्राचीमुत्तरतश्च । स्फ्येनान्तर्लिखति तप्तायनीति प्रतिमन्त्रम् " (द्र. काश्रौ ५·३·२१-२५) इति । उत्तरवेदेः परिमाणं निर्णेतुं चतसृषु

---

15. B1 इत्यादिः समानार्थः for इत्यादि समानार्थम्
23. P1 om. स्फ्येन ... दिक्षु (P 306 L 1)

दिक्षु स्फ्येन रेखाः कुर्यात्। तदानीं पूर्वस्यां दिशि शम्यामुदगग्रां निधाय तस्याः पश्चिमपार्श्वे तदीयप्रमाणेन स्फ्येन रेखां कुर्यात्। तथा पश्चिमदिश्यप्युदगग्रां शम्यां निधाय तस्या अभ्यन्तरतो रेखां कुर्यात्। एवं दक्षिणत उत्तरतश्च प्रागग्रां शम्यां निधाय रेखाद्वयं कुर्यात्। तदेतत् सर्वमापस्तम्बोऽपि विस्पष्टमाह– "शम्यां पुरस्तादुदगग्रां निधाय स्फ्येनोदीचीमभ्यन्तरमुपलिखति। वित्तायनी मेऽसीति। एवं दक्षिणतः प्राचीं तिक्तायनी मेऽसीति। पश्चादुदीचीमवतान्मा नाथितमिति। उत्तरतः प्राचीमवतान्मा व्यथितमिति" (आपश्रौ ७·३·१४) इति। अत्रत्येषु चतुर्षु मन्त्रेषु अयं प्रथमः – 'तप्तायनी मेऽसि' इति। हे पृथिवि, त्वं ᵛमे मम अनुग्रहार्थं ᵛतप्तायनी ᵛअसि। तप्तं पुरुषमयति प्राप्नोतीति तप्तायनी। यो हि दरिद्रः क्षेत्ररहितोऽहमिति संतप्यते तं पुरुषं तापोपशान्त्यर्थं प्राप्नोषीत्यर्थः ॥

अथ द्वितीयः – 'वित्तायनी मेऽसि' इति। धनरहितस्य वित्तार्थं तं प्राप्नोतीति ᵛवित्तायनी। पृथिव्यां हि प्राप्तायां सस्यनिष्पत्तिद्वारा महत् धनं लभते ॥

अथ तृतीयः – 'अवतान्मा व्यथितम्' इति। व्यथ भयचलनयोः। ᵛव्यथितम् अन्नाभावाद्भीतं मां यजमानम् ᵛअवतात् इयं पृथिवी रक्षतात् ॥

अथ चतुर्थः – 'अवतान्मा नाथितम्' इति। नाथतिधातुर्याच्ञार्थः। ᵛनाथितं याचितवन्तं मां यजमानम् ᵛअवतात्। भूयो याच्ञा यथा न भवति तथा पृथिवी रक्षतात् ॥१॥

आ– चात्वालं परिलिखति– 'तप्तायनी' इति। तप्तायनीत्यादयश्चत्वारो मन्त्राः पृथिवीदेवत्याः। आद्यौ द्वौ गायत्र्यौ। अपरावुष्णिहौ। 'तप्तायनी मेऽसि' इति। तप्त इव पुरुषो वृत्त्यर्थं यस्यामयतीति ᵛतप्तायनी पृथिवी ᵛमे मम ᵛअसि ॥

द्वितीयं परिलिखति– 'वित्तायनी' इति। वित्तार्थं यस्यामयतीति ᵛवित्तायनी पृथिवी मम ᵛअसि ॥

तृतीयः – 'अवतान्मा व्यथितम्' [इति]। [ᵛव्यथितम्]। व्यथ भयचलनयोः। [व्यथितमन्नाभावाद्भीतं] माम् ᵛअवतात् ॥

चतुर्थः – 'अवतान्मा नाथितम्' [इति]। नाथेति याचनार्थः। ᵛनाथितं याचितवन्तं मां पृथिवी ᵛअवतात्। भूयो यथाऽहमन्यं न याचेयं तथा मां पृथिवी करोत्वित्यभिप्रायः ॥१॥

वि॒दे॒र॒ग्नेर्न॒भो नामाग्ने॑ अङ्गिर॒ आयु॒ना॒ नाम्नेहि॑ ।
यो॒ऽस्यां पृ॑थि॒व्याम॒सि यत् तेऽना॑धृष्टं॒ नाम॑ य॒ज्ञियं॒ तेन॒ त्वा द॑धे ।

---

1. P1 after कुर्यात् adds तप्तायनीति
5. नाद्रितम् for नाथितम्
6. C V1 प्रथममन्त्रः for प्रथमः
11. C S1 V1 after °चलनयोः ins. इति धातुः
16. H1 तप्तायसीति for तप्तायनी मेऽसीति
17. H1 तप्तायसी for तप्तायनी
22. B1 om. चतुर्थः … याचनार्थः नाथितं (L. 19)
23. B1 सा for मां

विदेरग्नेर्नभो नामाग्ने अङ्गिर आयुना नाम्नेहि ।
यो द्वितीयस्यां पृथिव्यामसि यत् तेऽनाधृष्टं नाम यज्ञियं तेन त्वाऽऽ दधे ।
विदेरग्नेर्नभो नामाग्ने अङ्गिर आयुना नाम्नेहि ।
यस्तृतीयस्यां पृथिव्यामसि यत् तेऽनाधृष्टं नाम यज्ञियं तेन त्वाऽऽ दधे ।
अनु त्वा देववीतये सिꣳह्यसि सपत्नसाही देवेभ्यः कल्पस्व
सिꣳह्यसि सपत्नसाही देवेभ्यः शुन्धस्व
सिꣳह्यसि सपत्नसाही देवेभ्यः शुम्भस्व ॥२॥(३)॥

विदेः । अग्नेः । नभः । नाम । अग्ने । अङ्गिरः । आयुना । नाम्ना । आ । इहि ।
यः । अस्याम् । पृथिव्याम् । असि ।
यत् । ते । अनाधृष्टम् । नाम । यज्ञियम् । तेन । त्वा । आ । दधे ॥
द्वितीयस्याम् ।
तृतीयस्याम् ।
अनु । त्वा । देववीतय इति देवऽवीतये ।
सिꣳही । असि । सपत्नसाही । सपत्नसहीति सपत्नऽसही । देवेभ्यः । कल्पस्व ।
शुन्धस्व । शुम्भस्व ॥त्रे॥२॥(३)॥

सा- कात्यायनः – "विदेरग्नेरिति स्फ्येन" (काश्रौ ५.३.२६) इति । उत्तरवेदिनिचयनार्थं यस्मिन् भूप्रदेशे मृदं खनति स प्रदेशश्चात्वाल इत्युच्यते । तं प्रदेशमापस्तम्बो विस्पष्टं दर्शयति– "उत्तरस्माद्विधंसादुदक् प्रक्रमे चात्वालः । तमुत्तरवेदिवत् तूष्णीं शम्यया परिमिनोति" (आपश्रौ ७.४.१-२) तस्मिंश्चात्वाले स्फ्येन मृदं खनेत् ॥ पाठस्तु– 'विदेरग्नेर्नभो नाम' इति । हे चात्वालगते मृत्तिके, 'अग्नेः तदभिमानिदेवस्य 'नभः 'नाम 'विदेः नभ इत्येतादृशं नामधेयं विद्धि । अग्निनामोच्चारणपुरःसरं प्रहरणं कण्वो विधत्ते– 'स वा अग्नीनां नामानि गृह्णन् प्रहरति" (काशब्रा ४.५.१.१७) इति ॥

कात्यायनः – "अग्ने अङ्गिर इति पुरोवत् हरति" (काश्रौ ५.३.२७) इति । खाता मृत् पुरीषम् । पाठस्तु– 'अग्ने अङ्गिर आयुना नाम्नेहि' इति । हे 'अङ्गिरः 'अग्ने अङ्गानां मध्ये सारभूतवह्ने । अङ्गसारवत्वेनास्य शब्दस्य निर्वचनं छन्दोगा आमनन्ति– "एवमु वाऽऽङ्गिरसं मन्यन्तेऽङ्गानां यद्रसस्तेन" इति ।

---

16. C V1 निवपनार्थं for निचयनार्थं
17. P1 स्पष्टं for विस्पष्टं
18. P1 °वेदिं for °वेदिवत्; V1 S1 C °मितेति for °मिनोति
20. P1 अग्नि for अग्नि; S1 नामोच्चारेण° for नामोच्चारण°
22. P1 V1 खातात् for खाता
23. V1 C S1 आङ्गिरसत्वेन for अङ्गसारवत्वेन

मुक्तान्नपचनहेतुत्वादुदराग्नेः शरीरावयवानां मध्ये सारत्वं प्रसिद्धम् । तेषु तेषु कर्मसु एति गच्छतीत्यायुः-शब्दोऽप्यग्नेर्नामधेयम् । हे अग्ने, 'आयुना 'नाम्ना अभिहितः सन् 'एहि आगच्छ ॥

कात्यायनः – " योऽस्यामिति निवपति " (काश्रौ ५.३.२८) इति । उत्तरवेदिस्थाने मृदं निक्षिपेत् । पाठस्तु– ' योऽस्यां पृथिव्यामसि यत् तेऽनाधृष्टं नाम यज्ञियं तेन त्वाऽऽ दधे ' इति । 'अस्यां 'पृथिव्यां दृश्यमानायां भूमौ 'यः 'असि, हे अग्ने, यस्त्वं वर्तसे । किं च 'ते तव 'यज्ञियं यज्ञयोग्यं 'यत् 'नाम प्रसिद्धमग्निरित्येतादृशं नाम 'अनाधृष्टं केनापि याज्ञिकेन अतिरस्कृतं 'तेन 'त्वा 'आदधे । तेन नाम्ना युक्तं त्वामास्थापयामि ॥

कात्यायनः – " एवं द्विरपरं द्वितीयस्यां तृतीयस्यामिति विशेषः " (काश्रौ ५.३.३०-३१) इति । यथा पूर्वैस्त्रिभिर्मन्त्रैः खात्वा हत्वा वेद्यर्थं मृत् प्रक्षिप्ता । एतत् त्रितयं पुनरपि द्विः कुर्यात् । तयोः पर्याययोर्द्वितीयस्यां तृतीयस्यामिति पाठविशेषो द्रष्टव्यः । पर्यायद्वयगतानां षण्णां मन्त्राणां पाठस्तु– ' विदेरग्नेर्नभो नामाग्ने अङ्गिर आयुना नाम्नेहि । यो द्वितीयस्यां पृथिव्यामसि यत् तेऽनाधृष्टं नाम यज्ञियं तेन त्वाऽऽ दधे । विदेरग्नेर्नभो नामाग्ने अङ्गिर आयुना नाम्नेहि यस्तृतीयस्यां पृथिव्यामसि यत् तेऽनाधृष्टं नाम यज्ञियं तेन त्वाऽऽदधे ' इति । यद्यपि पृथिवीशब्दस्य प्रकृतत्वात् द्वितीयतृतीयशब्दयोर्विशेष्यत्वेन स एवाऽनुवर्तते तथाप्यौचित्यात् द्वितीया पृथिवी अन्तरिक्षम् । तृतीया पृथिवी द्यौरित्यवगन्तव्यम् । अन्यत् सर्वं पूर्ववत् व्याख्येयम् ॥

कात्यायनः – " अनु त्वेति चतुर्थं यथार्थमाहृत्य " (काश्रौ ५.३.३२) इति । यथा पूर्वस्मिन् पर्यायत्रये मृदाहृत्य प्रक्षिप्ता एवं चतुर्थमपि प्रक्षेपणपर्यन्तं मृदाहरणं कुर्यात् । पाठस्तु– ' अनु त्वा देववीतये ' इति । 'देववीतये देवानां प्राप्तये 'त्वा, हे मृत्तिके, त्वाम् 'अनु पूर्वोक्तमाहरणत्रयमनुसृत्याहरामीति शेषः ॥

कात्यायनः – " सिꣳहासीति व्यूहत्युत्तरवेदिं शम्यामात्रीम् " (काश्रौ ५.३.३२) इति । एवम् उत्तरवेदिं चतुर्दिक्षु शम्यया परिमितां व्यूहति विशेषेण पांसुभिराच्छादयेत् । पाठस्तु– ' सिꣳह्यसि सपत्नसाही देवेभ्यः कल्पस्व ' इति । हे उत्तरवेदे, त्वं 'सिंही सिंहसमाना भूत्वा 'सपत्नसाही शत्रूणामभिभवित्री 'असि भवसि । अतः 'देवेभ्यः देवोपकारार्थं 'कल्पस्व समर्था भव ॥

कात्यायनः – " प्रोक्षत्युत्तरवेदिं सिकताश्च प्रकिरति । सिꣳहासीति प्रतिमन्त्रम् " (काश्रौ ५.३.३७) इति । तत्रादौ प्रोक्षणमन्त्रपाठस्तु– ' सिꣳह्यसि सपत्नसाही देवेभ्यः शुन्धस्व ' इति । हे उत्तरवेदे, 'शुन्धस्व शुद्धा भव । अन्यत् पूर्ववत् ॥

अथ सिकताप्रोक्षणमन्त्रपाठः – ' सिꣳह्यसि सपत्नसाही देवेभ्यः शुम्भस्व ' इति । हे उत्तरवेदे, त्वं 'शुम्भस्व सिकताप्रक्षेपेण शोभिता भव । अन्यत् पूर्ववत् ॥२॥

[इति पञ्चमेऽध्याये तृतीयोऽनुवाकः ॥३॥]

---

1. P1 एषु for तेषु तेषु
5. V1 C अग्निः for असि
9. C V1 स्वाहा for खात्वा; C द्वयोः for तयोः
14. P1 om. सर्वं
16. V1 C S1 यथापूर्वम् for यथार्थम्
19. V1 S1 C येयम् for एवम्
20. V1 S1 C°वेदिः for वेदिं; V1 S1 C °मितानां for °मितां
22. V1 S1 C अभि° for असि
28. P1 S1 पञ्चमां° for पञ्चमेऽ°

आ– चात्वाले प्रहरति– “स वा अग्नीनां नामानि गृह्णन् प्रहरति” (काशब्रा ४·५·१.१७) । ‘विदेरग्नः’ इति । आग्नेयं यजुः । हे अग्ने, ᵛनभः, न भातीति नभः । ᵛअग्नेः ते नभ इति स्वकीयं ᵛनाम त्वं ᵛविदेः जानीयाः । हे ᵛअग्ने हे ᵛअङ्गिरः, ᵛआयुना ᵛनाम्ना । आयुरित्यग्निनाम । आयुरित्यनेन नाम्ना अभिहितः ᵛएहि आगच्छ । ‘योऽस्यां पृथिव्यामसि’ । ᵛयः त्वम् ᵛअस्यां प्रसिद्धायां ᵛपृथिव्याम् ᵛअसि भवसि । ᵛते तव ᵛअनाधृष्टम् अनाधर्षितं ᵛयज्ञियं यज्ञार्हं ᵛयत् ᵛनाम ᵛतेन ᵛनाम्ना त्वाम् ᵛआदधे आस्थापयामि । हे अग्ने, अग्नेस्तव नभ इत्येकं नाम, आयुरित्यपरं नाम । तत् त्वं विदेः जानीहि । ताभ्यामभिहित एहि । ‘द्वितीयस्यां पृथिव्याम्’ इति द्वितीयपृथिवीशब्देन अन्तरिक्षमभिधीयते । तथा तृतीयपर्याये तृतीयपृथिवीशब्देन द्युलोकोऽभिधीयते ॥

चतुर्थं प्रहरति– ‘अनु त्वा देववीतये’ इति । आग्नेय्यनुष्टुप् । ᵛदेववीतये देवानां वीतये तर्पणाय । वीतिस्तर्पणार्थः ॥

व्यूहत्युत्तरवेदिम् – ‘सिꣳह्यसि’ इति । ‘सिꣳह्यसि’ इत्यादीनां त्रयाणां वेदिर्देवता । अतिशक्वरी छन्दः । सिंहीरूपेण वेदिः स्तूयते । या त्वं ᵛसिंही ᵛअसि । यज्ञादिविघ्नकारिणो निहन्तुं या त्वं सिंही भवसि, सा त्वं ᵛसपत्नसाही सपत्नान् सोढुं शीलमस्या इति सपत्नसाही । छान्दसो दीर्घः । सपत्नसाहीति शत्रूणामभिभवित्रीत्यर्थः । सा त्वमस्माभिरनुमीयमाना ᵛदेवेभ्यः अर्थाय ᵛकल्पस्व । उत्तरवेदिरूपेण क्लृप्ता भव ॥

वेदिं प्रोक्षति– ‘शुन्धस्व’ इति । आभिरद्भिः स्नाता सती शुद्धा भव । सिकताः प्रकिरति । या ᵛसिंही ᵛअसि सा त्वं ᵛसपत्नसाही, देवेभ्यः अर्थाय ᵛशुम्भस्व । शुम्भतिरलंकारार्थः । अलंकृता भव ॥२॥

[इति पञ्चमेऽध्याये तृतीयोऽनुवाकः]

---

1. B1 H1 after प्रहरति add विदेरग्नेरिति (H1 om· इति)
4. B1 H1 अन्त° for अग्नि° – we have corrected this as अग्नि°
7. B1 तच्च for तत् त्वं
9. H1 om. देववीतये
11. B1 om. ‘सिंह्यसि’ इति
12. H1 om. छन्दः; H1 om. या त्वं . निहन्तुं [L 13]
13. H1 om. सा त्वं
16. H1 om. आभिः; H1 after सिकताः ins. च

[अथ चतुर्थोऽनुवाकः]

सा– उत्तरवेदिनिर्माणमन्त्रास्तृतीये कथिताः । चतुर्थे निर्मितताया उत्तरवेदेः प्रोक्षणादिसंस्कारमन्त्रा उच्यन्ते ॥

इ॒न्द्र॒घो॒षस्त्वा॒ वसु॑भिः पु॒रस्ता॑त् पा॒तु प्रचे॑तास्त्वा रु॒द्रैः प॒श्चात् पा॑तु ।
मनो॑जवास्त्वा पि॒तृभि॑र्दक्षिण॒तः पा॑तु वि॒श्वक॑र्मा त्वाऽऽदि॒त्यैरु॑त्तर॒तः पा॑तु ॥१॥

इ॒न्द्र॒घो॒ष इतीन्द्र॑ऽघो॒षः । त्वा॒ । वसु॑भि॒रिति॒ वसु॑ऽभिः । पु॒रस्ता॑त् । पा॒तु॒ ।
प्रचे॑ता॒ इति॒ प्रऽचे॑ताः । रु॒द्रैः । प॒श्चात् ।
मनो॑जवा॒ इति॒ मनः॑ऽजवाः । पि॒तृभि॒रिति॑ पि॒तृऽभिः॑ । द॒क्षि॒ण॒तः ।
वि॒श्वक॒र्मेति॑ वि॒श्वऽक॑र्मा । आ॒दि॒त्यैः । उ॒त्त॒र॒तः । पा॒तु॒ ॥डँ॥१॥

कात्यायनः – "उत्तरवेदिं प्रोक्षतीन्द्रघोष इति प्रतिमन्त्रं प्रतिदिशं यथालिङ्गम्" (काश्रौ ५.४.११) इति । तत्रायं प्रथमो मन्त्रः – 'इन्द्रघोषस्त्वा वसुभिः पुरस्तात् पातु' इति । इन्द्र इत्यनेन शब्देन घुष्यते, विस्पष्टं कथ्यते यो देवः सोऽयम् ᵛइन्द्रघोषः । ᵛवसुभिः अष्टसंख्याकैर्गणदेवैर्युक्तः स देवः ᵛपुरस्तात् पूर्वस्यां दिशि हे उत्तरवेदे, ᵛत्वा त्वां ᵛपातु रक्षतु ॥

अथ द्वितीयो मन्त्रः – 'प्रचेतास्त्वा रुद्रैः पश्चात् पातु' इति । ᵛप्रचेताः प्रकृष्टप्रज्ञो वरुणः । स च ᵛरुद्रैः एकादशसंख्याकैर्गणदेवैः संयुक्तः ᵛपश्चात् पश्चिमायां दिशि त्वां ᵛपातु ॥

अथ तृतीयो मन्त्रः – 'मनोजवास्त्वा पितृभिर्दक्षिणतः पातु' इति । ᵛमनोजवाः मनोवदत्यन्तवेगयुक्तो यमो देवः ᵛपितृभिः स्वर्लोकवासिदेवताविशेषैर्युक्तो दक्षिणस्यां दिशि त्वां ᵛपातु ॥

अथ चतुर्थो मन्त्रः – 'विश्वकर्मा त्वाऽऽदित्यैरुत्तरतः पातु' इति । ᵛविश्वकर्मा, विश्वानि सर्वाणि जगदुत्पत्त्यादिविषयकर्माणि यस्यासौ विश्वकर्मा । तादृशो देवः ᵛआदित्यैः द्वादशसंख्याकैर्गणदेवैः सहित उत्तरस्यां दिशि त्वां ᵛपातु । उत्तरशब्दोदिता देवता यदा देवान् प्राप्ता तदानीमसुरा देवान् हन्तुमुद्यतवन्तः समागताः । तस्मिन्नवसरे देवसेनाऽधिपतय इन्द्रघोषादयश्चतसृषु दिक्षु तानसुरानपाकुर्वन् । तस्मादेतैर्मन्त्रैर्दिक्चतुष्टये रक्षा प्रार्थनीया । तदेतदाह तित्तिरिः – "देवाश्चेदुत्तरवेदिरुपावर्तीहैव वि जयामहा इत्यसुरा वज्रमुद्यत्य देवानभ्यायन्त तानिन्द्रघोषो वसुभिः पुरस्तादपानुदत" (तैसं ६.२.७) इत्यादि ॥१॥

आ– 'उत्तरवेदिं प्रोक्षति– 'इन्द्रघोषस्त्वा' इति । उत्तरवेदिदेवत्या जगती । घोष इति वाङ्नामसु पठितम् । ᵛवसुभिः अष्टवसुभिः सहितः । ᵛइन्द्रघोषः इन्द्रवाच्यो देवः । ᵛपुरस्तात् पूर्वस्यां दिशि ᵛत्वा वेदिं ᵛपातु रक्षतु । ᵛपश्चात् पश्चिमस्यां दिशि ᵛरुद्रैः एकादशभिर्देवैः सहितः ᵛप्रचेताः प्रकृष्टप्रज्ञो वरुणः ᵛत्वा वेदिं ᵛपातु । ᵛदक्षिणतः दक्षिणस्यां दिशि ᵛपितृभिः अग्निष्वात्तादिभिः पितृगणैः सहितः ᵛमनोजवाः मनोगतिर्यमस्त्वां वेदिं ᵛपातु । ᵛउत्तरतः

---

12. P1 S1 C इन्द्रो देवः for इन्द्रघोषः
19. V1 S1 C त्वादित्यैः for आदित्यैः
20. V1 S1 C प्राप्नोति for प्राप्ता

उत्तरस्यां दिशि द्वादशभिः ᵛआदित्यैः सहितः ᵛविश्वकर्मा विश्वानि कर्माणि जगदुत्पत्यादिविषयाणि यस्य सः विश्वकर्मा विश्वकृत् त्वां वेदिं ᵛपातु ॥१॥

इ॒द॒म॒हं त॒प्तं वार्ब॑हि॒र्धा य॒ज्ञान्निः सृ॑जामि ॥
सि॒ꣳह्य॑सि॒ स्वाहा॑ सि॒ꣳह्य॑स्यादित्य॒वनि॒ः स्वाहा॑ ॥२॥
सि॒ꣳह्य॑सि ब्रह्म॒वनि॑ः क्षत्र॒वनि॒ः स्वाहा॑ सि॒ꣳह्य॑सि सुप्रजा॒वनी॑ रायस्पोष॒वनि॒ः स्वाहा॑ । ५
सि॒ꣳह्य॒स्याव॑ह दे॒वान् यज॑माना॒य स्वाहा॑ भू॒तेभ्य॑स्त्वा ॥३॥

इ॒दम् । अ॒हम् । त॒प्तम् । वाः । ब॒हि॒र्धेति॑ ब॒हि॒ःऽधा । य॒ज्ञात् । निः । सृ॒जा॒मि॒ ।
सि॒ꣳही । अ॒सि॒ । स्वाहा॑ । आ॒दि॒त्य॒व॒नि॒रित्या॑दि॒त्य॒ऽव॒निः॑ ॥झिं॥२॥
ब्र॒ह्म॒व॒नि॒रिति॑ ब्र॒ह्म॒ऽव॒निः॑ । क्ष॒त्र॒व॒नि॒रिति॑ क्ष॒त्र॒ऽव॒निः॑ । सु॒प्र॒जा॒व॒नि॒रिति॑ सु॒प्र॒जा॒ऽव॒निः॑ ।
रा॒य॒स्पो॒ष॒व॒नि॒रिति॑ रा॒य॒स्पो॒ष॒ऽव॒निः॑ । आ । व॒ह॒ । दे॒वान् । यज॑मानाय । स्वाहा॑ । १०
भू॒तेभ्यः॑ । त्वा॒ ॥ न्यां ॥३॥

सा– कात्यायनः – "बहिर्वेदिशेषं निषञ्चनीदमहं तप्तं वारिति" (काश्रौ ५.४.१२) इति। पाठस्तु– 'इदमहं तप्तꣳ वार्बहिर्धा यज्ञान्निः सृजामि' इति। असुरनिवारणाय येनोदकेन प्रोक्षणं कृतं तदुदकमुग्ररूपत्वात् ᵛतप्तम् इत्युच्यते। तादृशम् ᵛइदं ᵛवाः एतदुदकं प्रोक्षणशेषभूतम् ᵛअहम् अनुष्ठाता ᵛयज्ञात् ᵛबहिर्धा यज्ञप्रदेशात् बाह्यप्रदेशे ᵛनिःसृजामि निःसारयामि ॥२॥ १५

सा– कात्यायनः – "नाभ्यां श्रोण्यꣳसेषु पञ्चगृहीतं जुहोत्यक्ष्णया दक्षिणेंऽसे श्रोण्याꣳ श्रोण्यामंसे मध्ये च हिरण्यं पश्यन् सिꣳह्यसीति प्रतिमन्त्रम्" (द्र. काश्रौ ५.४.१४) इति। अस्यायमर्थः योऽयमुत्तरवेदेर्नाभ्याख्यो मध्यमदेशः, यौ चाग्नेयैशानप्रदेशौ वेदेरंसाख्यौ, ये च वायव्यनैर्ऋतप्रदेशरूपे श्रोण्यौ, तेषु पञ्चसु स्थानेषु जुह्वां पञ्चवारं गृहीतेनाज्येन जुहुयात्। न चैतेषु स्थानेषु क्रमेण होमः, किं त्वक्ष्णाया वक्रत्वेन। तद् यथा–प्रथमं दक्षिणेंऽसे तत उत्तरस्यां श्रोण्यां तत उत्तरेंऽसे ततो दक्षिणस्यां श्रोण्यां ततो मध्य एतेषु २० पञ्चसु स्थानेषु हिरण्यं निधाय तदेतदवलोकयन् पञ्चभिर्मन्त्रैः जुहुयादिति। तमेतं वक्रप्रकारमापस्तम्बो विस्पष्टमुदाजहार– "दक्षिणमꣳसमुत्तराꣳ श्रोणिं दक्षिणामुत्तरमꣳसं मध्यमिति" (आपश्रौ ७.५.५) इति।

तत्रायं प्रथममन्त्रपाठः – 'सिꣳह्यसि स्वाहा' इति। पुरा कदाचिदुत्तरवेदिदेवता केनापि निमित्तेन देवेभ्योऽपक्रम्य तदानीमसुरानप्राप्य देवासुरसेनयोरुभयोर्मध्ये सिंहरूपं धृत्वा तस्थौ। तदाह तित्तिरिः – "तेभ्य उत्तरवेदिः सिꣳहीरूपं कृत्वोभयान् अन्तराऽपक्रम्यातिष्ठत्" (तैसं ६.२.७) इति। तदेतदभिप्रेत्य २५ अस्मिन् मन्त्रे सिंहीत्युच्यते। हे उत्तरवेदे, त्वं ᵛसिꣳही ᵛअसि सिंहरूपा भवसि। तादृश्यै तुभ्यं ᵛस्वाहा हविर्दत्तम्।

---

19. P1 जुह्वा for जुह्वां
21. P1 एवं for एतं
24. V1 S1 C प्राप्य for अप्राप्य
27. V1 S1 C हाविस्त्वाम् for हविर्दत्तम्

अथ द्वितीयो मन्त्रः – 'सिंह्यस्यादित्यवनिः स्वाहा' इति । आदित्यान् वनुते संभजते प्रीणयतीति ᵛआदित्यवनिः । अन्यत् पूर्ववत् ॥

अथ तृतीयः – 'सिंह्यसि ब्रह्मवनिः क्षत्रवनिः स्वाहा' इति । ब्राह्मणजातिक्षत्रियजात्योः प्रीणयितृत्वमन्त्रविशेषः ॥

अथ चतुर्थः – 'सिंह्यसि सुप्रजावनी रायस्पोषवनिः स्वाहा' इति । पुत्रपौत्रादिरूपायाः शोभनप्रजायाः सुवर्णरजतादिधनपुष्टेश्च संपादनमन्त्रविशेषः ॥

अथ पञ्चमः – 'सिंह्यस्यावह देवान् यजमानाय स्वाहा' इति । यजमानोपकारार्थं ᵛदेवान् अस्मिन् कर्मण्यानयेः । एतावानत्र विशेषः ॥

कात्यायनः – "भूतेभ्यस्त्वेति स्रुचमुद्यच्छति" (काश्रौ ५.४.१५) इति । होमशेषाज्ययुक्ते हे जुहु, त्वां ᵛभूतेभ्यः जरायुजाण्डजादिचतुर्विधभूतग्रामप्रीत्यर्थमुद्यच्छामीतिः शेषः । तमेतं मन्त्रार्थं विनियोगपुरःसरं तित्तिरिर्विस्पष्टं दर्शयति– "भूतेभ्यस्त्वेति स्रुचमुद्गृह्णाति य एव देवा भूतास्तेषां तद्भागधेयं तानेव तेन प्रीणाति" (तैसं ६.२.८) इति ॥३॥

……

आ– बहिर्वेदिशेषं निषिञ्चति– 'इदमहम्' इति । वारिदेवत्या अष्टिः । ᵛइदं ᵛतप्तम् आवर्तितं ᵛवाः वारि उदकं ᵛबहिर्धा ᵛयज्ञात् यजनस्थानात् बहिःस्थाने ᵛअहं ᵛनिःसृजामि क्षिपामि ॥२॥

आ – नाभिं व्याघारयति– 'सिंह्यसि' इति । 'सिंह्यसि' इत्यादीनां पञ्चानां वाग्देवता । आद्या गायत्री । द्वितीया पङ्क्तिः । तृतीया शक्वरी । चतुर्थी अत्यष्टिः । पञ्चम्यष्टिः । 'सिंह्यसि' इति । वेदिनाभिस्त्वं ᵛसिंही ᵛअसि यज्ञप्रतिबन्धसंहारिणी असि । ᵛस्वाहा आह्वानमस्तु । ᵛआदित्यवनिः या वेदिनाभिरादित्यान् वनुते संभजते सा ᵛआदित्यवनिः । या ब्रह्म वनुते संभजते सा ᵛब्रह्मवनिः । या क्षत्रं वनुते सा ᵛक्षत्रवनिः । या सुप्रजा वनुते सा ᵛसुप्रजावनिः । या रायस्पोषं वनुते संभजते सा ᵛरायस्पोषवनिः । एवंगुणविशिष्टा वेदिनाभिः वाग्रूपेण स्तूयते सा [त्वं] ᵛसिंही ᵛअसि । सा त्वं ᵛयजमानाय यजमानार्थं ᵛदेवान् ᵛआवह ᵛस्वाहा स्वकीयकर्मण्यानयेः । हविर्दत्तमस्तु ॥

---

1. V1 S1 C द्वितीयं for द्वितीयो; P1 भजते for संभजते
8. V1 S1 C आनयेत् for आनयेः
13. H1 after इति adds गायत्री
14. B1 आर्वं, H1 आर्तं – we have corrected this as आवर्तितं; निःसृजामि – In Saṁhitā the second verse ends with सिंह्यसि ... °वनिः स्वाहा, whereas the commentators end the second verse with निःसृजामि and take सिंह्यसि स्वाहा as part of the third verse. The Mādhyandina Saṁhitā follows this division.
16. B1 om. सिंह्यसीति
20. H1 om. °प्रजा वनुते ... दत्तमस्तु (L 23)
22. B1 स्वकीयकर्मणोर्दानमस्तु we corrected this as स्वकीयकर्मण्यानयेः । हविर्दत्तमस्तु

स्रुचमुपस्तृणाति– 'भूतेभ्यस्त्वा' इति । स्रुग्देवत्या दैवी बृहती । भूतशब्देन चतुर्विधा भूतग्राममात्रा अभिधीयन्ते । भूतग्रामार्थं भूतग्रामस्योत्पत्त्यर्थं चासि सा त्वम् । स्रुचमुपस्तृणामीति शेषः ॥३॥

ध्रु॒वो॑ऽसि पृथि॒वीं दृ॑ꣳह ध्रु॒व॒क्षिद॑स्य॒न्तरि॑क्षं दृꣳह ।
अ॒च्यु॒त॒क्षिद॑सि॒ दिवं॑ दृꣳहा॒ग्नेर्भस्मा॑स्य॒ग्नेः पुरी॑षमसि ॥४॥(४)॥

ध्रु॒वः । अ॒सि॒ । पृ॒थि॒वीम् । दृ॒ꣳह॒ ।
ध्रु॒व॒क्षिदिति॑ ध्रु॒व॒ऽक्षित् । अ॒न्तरि॑क्षम् ।
अ॒च्यु॒त॒क्षिदित्य॑च्यु॒त॒ऽक्षित् । दिव॑म् । दृ॒ꣳह॒ ।
अ॒ग्नेः । भस्म॑ । अ॒सि॒ । अ॒ग्नेः । पुरी॑षम् । अ॒सि॒ ॥ जूम् ॥४॥(४)॥

स्मा– कात्यायनः – "नाभिं पैतुदारवैः परिदधाति पूर्ववत् ध्रुवोऽसीति प्रतिमन्त्रम्" (काश्रौ ५.४.१६) इति । पीतदारुशब्देन देवदारुवृक्षविशेष उच्यते । तदीयैः परिधिभिरुत्तरवेदेर्मध्यदेशरूपामुत्तरनाभिं परिदध्यात् । तथा दर्शपूर्णमासेष्टौ पश्चिमदक्षिणोत्तरदिक्षु मध्यमदक्षिणोत्तरपरिधयः प्रक्षिप्ताः । तद्वदित्यभिप्रेत्य पूर्ववत् इत्युक्तम् । तत्र प्रथमो मन्त्रः – 'ध्रुवोऽसि पृथिवीं दृꣳह' इति । हे मध्यमपरिधे, त्वं ध्रुवः स्थिरः असि, अतः पृथिवीं दृꣳह दृढीकुरु ॥

अथ द्वितीयः – ध्रुवक्षिदस्यन्तरिक्षं दृꣳह' इति । हे दक्षिणपरिधे त्वं, ध्रुवे स्थिरे क्षियति निवसतीति ध्रुवक्षित्, तादृशः असि । तस्मात् अन्तरिक्षं दृढीकुरु ॥

अथ तृतीयः – 'अच्युतक्षिदसि दिवं दृꣳह' इति । अच्युते विनाशरहिते यज्ञे क्षियति निवसतीति अच्युतक्षित् । हे उत्तरपरिधे, तादृशः असि । तस्मात् त्वं द्युलोकं दृढीकुरु ॥

कात्यायनः – "अग्नेर्भस्मेति निवपति गुग्गुलुसुगन्धितेजनवृष्णेस्तुकाः" (काश्रौ ५.४.१७) इति । गुग्गुलुशब्देन धूपार्थं द्रव्यमुच्यते । सुगन्धितेजनशब्देन तृणविशेषमूलान्युच्यन्ते । वृष्णेस्तुकाशब्देनाविसंबन्धि रोमोच्यते । पाठस्तु– 'अग्नेर्भस्मास्यग्नेः पुरीषम्' इति । हे गुग्गुलुप्रभृतिसंभारसमूह, त्वम् उत्तरवेदिगतस्य अग्नेः भस्म भासकम् असि । तथा तस्य अग्नेः पुरीषं पूरकम् असि । तदेतदग्निपूरकत्वं प्रसिद्धमित्येवत् तित्तिरिर्दर्शयति– "अग्नेर्ह्येतत् पुरीषं यत् संभाराः" (तैसं १.२.८) इति ॥४॥

इति पञ्चमेऽध्याये चतुर्थोऽनुवाकः ॥४॥

---

1. B1 स्रुवम् for स्रुचम्
2. B1 °शब्दः for °मात्रा; B1 °त्वाम् for °त्वम्
10. P1 V1 S1 C पैतु° for पैत
11. P1 पूतदारु°, V1 S1 C पैतुद्र° for पीतदारु°
20. V1 S1 C om. उच्यन्ते
22. V1 S1 C °पूरकत्व प्रसिद्धम् for °पूरकत्वं प्रसिद्धम् [L 23]

आ– परिधीन् परिदधाति 'ध्रुवोऽसि' इति । 'ध्रुवोऽसि' इत्यादीनां त्रयाणां परिधयो देवताः । आद्या बृहती । उत्तरौ त्रैष्टुभौ । यस्मादधियज्ञं परिधिः ^{V}ध्रुवः ^{V}असि स्थिरस्त्वमसि तस्मात् ^{V}पृथिवीं त्वं ^{V}दृꣳह दृढीकुरु । ^{V}ध्रुवक्षित् । ध्रुवे यज्ञे क्षियतीति ध्रुवक्षित् परिधिः । यस्मात् त्वं ध्रुवक्षित् ^{V}असि, तस्मात् त्वम् ^{V}अन्तरिक्षं ^{V}दृꣳह दृढीकुरु । ^{V}अच्युतक्षित् । अच्युते यज्ञे क्षियतीत्यच्युतक्षित् परिधिः । यस्मात् त्वम् अच्युतक्षित् ^{V}असि तस्मात् त्वं ^{V}दिवं ^{V}दृꣳह दृढीकुरु ।

संभारानुपनिवपति– 'अग्नेर्भस्मासि' इति । संभारदेवत्या आद्या देवी पङ्क्तिः । परा उष्णिक् । संभारा गुग्गुल्वादयः । एते ^{V}अग्नेः ^{V}भस्म । भासतेरेतद्रूपम् । भस्म इति तद्वद्दीप्ताः शुद्धाश्चेत्यर्थः ॥

'अग्नेः पुरीषमसि' । संभाराणां शरीरपूरणात् ^{V}पुरीषं त्वम् ^{V}असि ॥४॥

[इति पञ्चमेऽध्याये चतुर्थोऽनुवाकः ॥४॥]

[अथ पञ्चमोऽनुवाकः]

सा– चतुर्थे उत्तरवेदिप्रोक्षणादिसंस्कारमन्त्रा उक्ताः । पञ्चमे हविर्धानाख्यमण्डपनिर्माणमन्त्रा उच्यन्ते ।

युञ्ज॒ते मन॑ उ॒त यु॑ञ्ज॒ते धियो॒ विप्रा॒ विप्र॑स्य बृह॒तो वि॑प॒श्चित॑ः ।
वि होत्रा॑ दधे वयु॒ना॒विदेक॒ इन्म॒ही दे॒वस्य॑ स॒वि॒तुः परि॑ष्टुतिः ॥१॥

यु॒ञ्जते॑ । मन॑ः । उ॒त । यु॒ञ्ज॒ते॒ । धिय॑ः । विप्रा॑ः । विप्र॑स्य । बृ॒ह॒तः । वि॒प॒श्चि॒त् इति॑ वि॒पः॒ऽचित॑ः ।
वि । होत्रा॑ः । द॒धे॒ । व॒यु॒ना॒वित् । व॒यु॒न॒विदिति॑ व॒यु॒न॒ऽवित् । एक॑ः । इत् । म॒ही । दे॒वस्य॑ । स॒वि॒तुः । परि॑ष्टुतिः । परि॑स्तु॒ति॒रि॒ति॒ परि॑ऽस्तुतिः ॥ प्रै: ॥ १ ॥

अस्ति तावत् प्राचीनवंशाख्या काचिच्छाला । तस्यामाहवनीयाग्नित्रयमैष्टिकवेदिश्च वर्तते । तस्याः शालायाः पुरतः षट्त्रिंशत्पददीर्घा सौमिकवेदिर्निर्मातव्या । तस्या वेद्या अग्रभागे पूर्वानुवाकद्वयो-

---

1. H1 परिधिः for परिधयो
2. B1 देवत्याः for देवताः; B1 आद्याया for आद्या
3. H1 om. परिधिः
4. B1 om. अन्तरिक्षं … तस्मात् त्वं (L. 6); H1 क्षीयते is corrected as क्षियति
6. H1 om. अग्नेर्भस्मासीति
7. H1 नु गुल्पोदयो for गुग्गुल्वादय; B1 येते for एते; H1 भस भक्ति for भासतेरे°
9. H1 °पूषणात् for °पूरणात्

क्तोत्तरवेदिः । ततः पश्चात् मध्यभागे हविर्धानाख्यो मण्डपो निर्मातव्यः । ततोऽपि पश्चात् सदोऽभिधाना आग्निध्रच्छाला निर्मातव्या । तस्याः स्थाने प्राचीनशालायाः पुरतो दक्षिणोत्तरभागयोर्हविर्धाननामके द्वे शकटे स्थापिते भवतः । तच्छकटद्वयं पुरतः प्रवर्त्य, तदावरकत्वेन हविर्धानाख्यमण्डपो निर्मातव्यः । तच्च शकटद्वयं सवितृमन्त्रहोमादूर्ध्वं प्रवर्तनीयम् । तदाह तित्तिरिः – “सावित्रियर्चा हुत्वा हविर्धाने प्र वर्तयति” (तैसं ६.२.९) इति । तमेतं होमं विधत्ते ।

कात्यायनः – “ चतुर्गृहीतं शालाद्वार्ये जुहोति युञ्जत इति स गार्हपत्यः ” (काश्रौ ५.३.२९) इति । प्राचीनशालायाः द्वारसमीपे पूर्वसिद्ध आहवनीयोऽनुवर्तते । तस्मिन् जुहुयात् । स च पूर्वमाहवनीयोऽपि सन् उत्तरवेद्याख्येऽन्यस्मिन्नाहवनीये निष्पन्ने सति तदपेक्षया स्वयं गार्हपत्यो भवतीत्यर्थः । पाठस्तु– ‘युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः’ इति । ᵛविप्रस्य ब्राह्मणस्य, यजमानस्य संबन्धिनः ᵛविप्राः ब्राह्मणाः ऋत्विजः ᵛमनः ᵛयुञ्जते । लौकिकचिन्ताभ्यो मनो निवार्य यज्ञचिन्तायां तत् प्रथमं नियमयन्ति । ततः ᵛधियः इन्द्रियाणि ᵛउत अपि यज्ञार्थेषु नियमयन्ति । कीदृशस्य विप्रस्य ? ᵛबृहतः ᵛविपश्चितः । अधीतवेदत्वात् बृहत्त्वम् । अर्थाभिज्ञत्वाद् विपश्चित्त्वम् । कीदृशा विप्राः ? ᵛहोत्राः होमकर्तारः । तदिदं विप्राणां मनोनियमादिसामर्थ्यम् ᵛएकः ᵛइत् ᵛवि ᵛदधे एक एव ससर्ज । कीदृश एकः ? ᵛवयुनवित् वयुनानि वित् मार्गान् वेत्ति, सर्वज्ञ इत्यर्थः । न चैकस्य सर्वसृष्टौ विस्मेतव्यम् । यतः ᵛसवितुः प्रेरकस्य अन्तर्यामिणः ᵛदेवस्य ᵛपरिष्टुतिः सर्ववेदोक्तस्तुतिः ᵛमही महती । तथा चाथर्वणिका अधीयते– “ यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः ” (मुंउ १.१.९) इति । वाजसनेयिनश्च– “ य एष सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किं च ” (बृउ ५.६.१) इति । श्वेताश्वतराश्च “ पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ” (श्वेउ ६.८) इति ॥१॥

आ– सावित्रं जुहोति– ‘ युञ्जते मनः ’ इति । अधियज्ञानुवादिनी सवितृदेवत्या जगती । श्यावाश्वो नाम ऋषिः । ᵛयुञ्जते ᵛमनः । ᵛविप्राः । प्रा पूरणे । विशेषेण नृणामपेक्षितफलं तत्साधनं च प्रापयन्ति पूरयन्तीति विप्राः ब्राह्मणा ऋत्विजः । ᵛबृहतः । बृहि वृद्धौ । महतः । मह पूजायाम् । महनीयस्य ᵛविपश्चितः विदुषो मेधाविनः ᵛविप्रस्य यजमानस्य ᵛमनः ᵛयुञ्जते प्रेरयन्ति । किं च । ᵛउत अपि ᵛधियः धीः । युञ्जन्ति– ‘ उत ’ इति । तत्प्रतियुक्ता वाचश्च

---

1. °वेदितः पश्चात् for °वेदिः । ततः पश्चात्; V1 S1 C °र्धानाख्य° for र्धानाख्यो
4. V1 S1 C सावित्र° for सवितृ°; P1 वर्तनीयम् for प्रवर्तनीयम्
7. V1 S1 C वर्तते for अनुवर्तते; V1 S1 C जुहोति for जुहुयात्
12. V1 C om. उत; V1 S1 C om. विप्रस्य
13. V1 C P1 विहोत्राः for होत्राः
14. V1 S1 C सर्जकः for ससर्ज; P1 om. वयुनवित्
15. C S1 V1 om. वयुनानि वित्; C V1 om. मार्गान् वेत्ति
16. P1 V1 अधीयन्ते for अधीयते; P1 after सर्वज्ञः adds सः
20. B1 om. युञ्जते मन इति
21. H1 तस्माद्धनं for तत्साधनं
24. H1 पूरयन्ति for प्रेरयन्ति; B1 युञ्जती for युञ्जन्ति

ᵛयुञ्जते । ᵛविप्राः एते सवित्रा प्रसूताः । ᵛहोत्राः, सुत्येऽहनि सप्त होतारो वषट्कर्तारो होत्रा उच्यन्ते, ते होत्राः । तेषां सर्वेषामृत्विजां मध्ये वयुनावित । सवित्रा प्रसूतो ब्रह्माख्यः । ᵛएकः एव । ᵛइत् एवार्थः । वेतिः कान्तिकर्मा वा प्रज्ञाकर्मा वा । तस्य वयुनमिति रूपम् । वयुनमिति प्रज्ञानामसु (नि ३.९.१०) पठितम् । वयुनं वेत्तीति ᵛवयुनवित् । छान्दसो दीर्घः वयुनाविदिति । त्रिवेदज्ञानान्वितो ब्रह्मा यस्य भैषज्यं ᵛविदधे करोति । 'मही देवस्य सवितुः परिष्टुतिः' । एवं देवनादिगुणयुक्तस्य यज्ञस्य । यज्ञादिद्वारा यजमान [स्य] जगत्प्रसवकर्तुः सवितुः इयमेव ᵛमही महती ᵛपरिष्टुतिः संस्तवनं भवति ॥१॥

इदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम् ।
समूळ्हमस्य पांसुरे स्वाहा ॥२॥

इदम् । विष्णुः । वि । चक्रमे । त्रेधा । नि । दधे । पदम् ।
समूळ्हमिति सम्ऽऊळ्हम् । अस्य । पांसुरे । स्वाहा ॥कि॥२॥

सा - कात्यायनः – "दक्षिणे वर्त्मनि दक्षिणस्यानसो हिरण्यं निधाय अभिजुहोतीदं विष्णुरिति" (काश्रौ ८·३·३१) इति । दक्षिणशकटसंबन्धिदक्षिणचक्रस्य मार्गे हिरण्यं निधाय तस्मिन्नेव होमः । पाठस्तु– 'इदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम् । समूळ्हमस्य पांसुरे स्वाहा' इति । 'विष्णुः त्रिविक्रमावतारं धृत्वा 'इदं विश्वं विभज्य क्रमते स्म । भूमावेकं पदम् । अन्तरिक्षे द्वितीयम् । दिवि तृतीयम् । इत्येवं 'त्रेधा 'पदं 'निदधे । पांसवो भूम्यादिलोकरूपा यस्य पदस्य सन्ति तत् पांसुरम् । 'अस्य विष्णोस्तस्मिन् पादे विश्वं 'समूळ्हं सम्यगन्तर्भूतम् । 'स्वाहा तस्मै विष्णवे हविर्दत्तम् ॥२॥

आ – दक्षिणे वर्त्मनि हिरण्यं निधायाभिजुहोति– 'इदं विष्णुः' इति । विष्णुदेवत्या गायत्री । ऋषिर्मेधातिथिः । ᵛइद परिदृश्यमानं जगत् । विष्लृ व्याप्तौ । वेवेष्टि व्याप्नोतीति ᵛविष्णुः, ᵛइदं सर्वं भूतेन्द्रियमनःप्राणाहंकारादिकं जीवान्तर्यामिभावेनाविशतीति वा विष्णुः । ᵛविचक्रमे विक्रान्तवान् । पद्यते ज्ञायते अनेनेति ᵛपदं, सर्वावभासकं ज्योतीरूपम् । भूम्यन्तरिक्षद्युलोकेषु ᵛत्रेधा त्रिप्रकारेण अग्निवायुसूर्यरूपेण त्रिधा ᵛनिदधे । अथवा जगदुत्पत्तिस्थितिलयाख्येषु त्रिषु स्थानेषु ब्रह्माविष्णुशिवरूपेण पदं स्वस्यैश्वर्यरूपं निदधे निहितवान् । तथा जाग्रत्स्वप्नसुषुप्तिस्थानेषु विश्वतेजसा प्रज्ञारूपेण त्रिधा पदं निदधे । किं च 'समूळ्हमस्य' ।

---

1. B1 एव for एते; H1 before होत्राः adds ब्रह्माख्यः
2. B1 प्रस्तुतो for प्रसूतो
3. B1 इतरे गत्यर्थः for इत् एवार्थः
24. B1 तदा for तथा

सर्वेषामपरोक्षरूपस्य अस्य परमेश्वरस्य विष्णोः सत्यज्ञानानन्दात्मलक्षणं परममद्वैतलक्षणं पदं समूळ्हम् अन्तर्हितम् अकृतात्मभिरविज्ञातम् । पांसुरे । लुप्तोपममेतत् । पांसवः भूरेणवो रमन्ते यस्मिन् प्रदेशे स पांसुरः । तस्मात् पांसुभूयिष्ठो देशः पांसुल इति । रलयोरभेदः । यथा पांसुले प्रदेशे निहितं द्रष्टुं न शक्यते । तद्वदिदमपि दुर्दर्शनमिति वाक्यशेषः । स्वाहा इति होमार्थः ॥२॥

इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या ।
व्यस्कभ्ना रोदसी विष्ण एते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा ॥३॥

इरावती इतीराऽवती । धेनुमती इति धेनुऽमती । हि । भूतम् ।
सूयवसिनी । सूयवसिनी इति सुऽयवसिनी । मनवे । दशस्या ।
वि । अस्कम्नाः । रोदसी इति रोदसी । विष्णो इति विष्णो । एते इत्येते ।
दाधर्थ । पृथिवीम् । अभितः । मयूखैः । स्वाहा । ॥ गौं ॥३॥

सा– कात्यायनः – “स्रुक्स्थाल्यौ प्रतिगृह्य प्रतिप्रस्थातोत्तरस्येरावती इति पूर्ववत्” (काश्रौ ८.३.३५) इति । यथा दक्षिणशकटसंबन्धिदक्षिणचक्रमार्गेऽध्वर्युर्हुतवान् तथोत्तरशकटसंबन्ध्युत्तरचक्रमार्गे प्रतिप्रस्थाता जुहुयादित्यर्थः । पाठस्तु– ‘इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या । व्यस्कभ्ना रोदसी विष्ण एते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा’ इति । हे द्यावापृथिव्यौ, युवां मनवे मन्वानाय यजमानाय इरावती अन्नवत्यौ धेनुमती हि बहुधेनुयुक्ते च भूतं भवतम् । किं च सूयवसिनी शोभनैर्यवसैरभ्यवहार्यैर्युक्ते । दशस्या यज्ञसाधनानां दात्र्यौ भवतम् । हे विष्णो, एते रोदसी द्यावापृथिव्यौ व्यस्कभ्नाः विभज्याऽऽज्ञया स्तम्भितवानसि । किं च तां पृथिवीं मयूखैः स्वकीयतेजोरूपैः नानाजीवैर्वराहाद्यनेकावतारैर्वा अभितः दाधर्थ सर्वतो धारितवानसि । स्वाहा तस्मै विष्णवे हविर्दत्तम् ॥३॥

आ– द्वितीयस्यानसो वर्त्मनि जुहोति– ‘इरावती इति’ । विष्णुदेवत्या त्रिष्टुप् । यजुरन्तावशिष्टा । ‘रोदसी इरावती धेनुपती’ इति द्विवचनान्तम् । हे भगवन् श्री विष्णो, रोदसी इमे द्यावापृथिव्यौ त्वच्छासनमनुवर्तमाने इरावती सत्य (?स्य) वत्यौ धेनुमती पश्वादिमत्यौ भूतम् अभूतम् । एवं संजाते । हि यस्मात् सूयवासिनी शोभनयवासिन्यौ । दशस्या । दशतिर्दानार्थः । मनवे यजमानाय यज्ञसाधनानां दशस्यौ दात्र्यौ । अतः कारणात्, हे भगवन् श्रीविष्णो, द्यावापृथिव्यौ त्वं व्यस्कम्नाः आज्ञया स्तम्भितवानसि । हे भगवन्, परमतेजोराशेस्तव

---

1. H1 after आनन्द° ins. °मयानन्त°; B1 om. परममद्वैतलक्षणं
18. P1 ज्ञेयाः for आज्ञया
21. B1 °विशिष्टः for °वशिष्टा; B1 ददाति for इति
22. H1 after सत्यवत्यौ add इरावत्यौ
23. B1 संज्ञाते for संजाते; B1 after यस्मात् adds तस्मात्

ᵛमयूखैः मयूखकल्पैः रश्मिवदाविर्भूतैर्वराहाद्यनेकावतारैः ᵛएते द्यावापृथिव्यौ ᵛदाधर्थ धारयसि अतस्त्वां स्तुमः । ‘ स्वाहा ’ इति होमार्थः ॥३॥

दे॒व॒श्रु॒तौ॑ दे॒वेष्वा घो॑षतम् ।
प्रा॒ची॒ प्रेत॑मध्व॒रं क॒ल्पय॑न्ती ऊ॒र्ध्वं य॒ज्ञं न॑यतं॒ मा जि॑ह्वरतम् ॥४॥

दे॒व॒श्रु॒ता॒विति॑ दे॒व॒ऽश्रु॒तौ॑ । दे॒वेषु॑ । आ । घो॒ष॒त॒म् ।
प्रा॒ची इ॒ति॑ प्रा॒ची॑ । प्र । इ॒तम् । अ॒ध्व॒रम् । क॒ल्पय॑न्ती॒ इति॑ क॒ल्पय॑न्ती ।
ऊ॒र्ध्वम् । य॒ज्ञम् । न॒य॒त॒म् । मा । जि॒ह्व॒र॒त॒म् ॥ लुम् ॥ ४ ॥

सा– कात्यायनः – “ दक्षिणया द्वाराऽऽनीता पत्नी पाणिभ्याऽऽज्यशेषं प्रतिगृह्याक्षधुरावनक्ति पराग्देवश्रुताविति ” (काश्रौ ८.३.३२) इति । प्रतिप्रस्थात्रा समानीता पत्नी होमशेषेणाज्येनाक्षस्वोभावग्रभागौ सकृदनज्यात् । पाठस्तु– ‘ देवश्रुतौ देवेष्वा घोषतम् ’ इति । हे ᵛदेवश्रुतौ देवसभायां प्रसिद्धावक्षाग्रभागौ युवां यजमानोऽयं वक्ष्यतीति ᵛदेवेषु ᵛआघोषतम् उच्चध्वनिना कथयतम् ॥

कात्यायनः – “ प्राची प्रेतमिति वाचयति ” (काश्रौ ८.४.३) इति । यदा हविर्धानाख्ये शकटे प्रवर्त्येते तदा यजमानं वाचयेत् । पाठस्तु– ‘ प्राची प्रेतमध्वरं कल्पयन्ती ऊर्ध्वं यज्ञं नयतं मा जिह्वरतम् ’ इति । हे उभे शकटे, ᵛप्राची प्राङ्मुखे ᵛप्रेतं प्रकर्षेण गच्छतम् । कीदृशे ? ᵛअध्वरं ᵛकल्पयन्ती इदं कर्म समर्थं कुर्वाणे । किं च ᵛऊर्ध्वम् उपरिवर्तिदेवान् प्रति यज्ञं ᵛनयतं प्रापयतम् । ᵛमा ᵛजिह्वरतं मा कुटिले भवतम् । ह्वृ कौटिल्ये ॥४॥

आ– पत्न्यक्षधुरावनक्ति ‘ देवश्रुतौ ’ इति । अस्या अक्षधुरौ देवते । पङ्क्तिः । ᵛदेवश्रुतौ अक्षधुरौ देवेषु विश्रुतौ प्रख्यातौ हे देवश्रुतौ, ᵛदेवेषु, घुषि रुषि शब्दने । ᵛआघोषतं शब्दयतम् आघोषं कुरुतम् ॥

वाचयति– ‘ प्राची प्रेतम् ’ इति । अस्य हविर्धाने देवते । त्रिष्टुप् । हे हविर्धाने, ᵛप्राची प्रागञ्चने ᵛअध्वरं यज्ञं ᵛप्रेतं प्रगच्छतम् । कल्पयन्ती ऊर्ध्वं यज्ञम् । ऊर्ध्वं उत्कृष्टत्वगुणं यज्ञं ᵛकल्पयन्ती कल्पयन्त्यौ ᵛयज्ञं ᵛनयतं सफलतां नयतं प्रापयतम् । ᵛमा ᵛजिह्वरतम् । ह्वल चलने । चलनं मा कुरुतम् असंचलितं कुरुतम् ॥४॥

---

1. B1 मयूषैः for मयूखैः; H1 रश्मिभिश्च भूतैः for रश्मिवदाविर्भूतैः
12. V1 S1 C °र्धानाख्य for र्धानाख्ये
16. V1 S1 C after कौटिल्ये add इति धातुः
17. H1 अक्षरं for first अक्ष°
18. श्रुतौ for विश्रुतौ; B1 before विश्रुतौ adds देवैः; B1 हि for हे
19. H1 प्रघोषं for आघोषं
21. B1 उत्कृष्टं सवर्णं for उत्कृष्टत्वगुणं

स्वं गोष्ठमा वंदतं देवी दुर्ये
आयुर्मा निर्वादिष्टं प्रजां मा निर्वादिष्टम् ।
अत्रं रमेथां वर्ष्मंन् पृथिव्याः ॥५॥

स्वम् । गोष्ठम् । गोस्थमितिं गोऽस्थम् । आ । वदतम् । देवी इतिं देवी । दुर्ये इतिं दुर्ये ।
आयुः । मा । निः । वादिष्टम् । प्रजामितिं प्रऽजाम् । मा । निः । वादिष्टम् ।
अत्रं । रमेथाम् । वर्ष्मंन् । पृथिव्याः ॥ ध्यों ॥५॥

सा– कात्यायनः – "स्वं गोष्ठमिति च स्वर्जति" (काश्रौ ८.४.४) इति। अस्यायमर्थः – प्रवर्त्यमानयोः शकटयोरक्षे स्वर्जनं ध्वनिं कुर्वति सति 'स्वं गोष्ठम्' इति यजमानं वाचयेत्। चकारो मन्त्रद्वयवाचनसमुच्चयार्थः इति। पाठस्तु– 'स्वं गोष्ठमा वदतं देवी दुर्ये आयुर्मा निर्वादिष्टं प्रजां मा निर्वादिष्टम्' इति। दुर्यशब्दो गृहवाची। "गृहा वै दुर्याः" (शब्रा ३.३.४.१०) इति श्रुत्यन्तरात्। तेन शब्देन गृहसदृशे शकटे लक्ष्येते। हे 'दुर्ये 'देवी गृहसदृशशकटद्वयरूपे देवते, 'स्वं 'गोष्ठं स्वकीयं गोस्थानम् 'आवदतं सर्वतः कथयतम्। योऽयमक्षशब्दस्तेन शब्देन यजमानस्य गृहं बहूनां गवां यथा स्थानं भवति तथा कथयतमित्यर्थः। 'आयुः 'मा 'निर्वादिष्टं यजमानस्य यावदायुरस्ति तावत् सर्वं मा निराकार्ष्टम्। तथा च यजमानस्य 'प्रजां पुत्रादिरूपां 'मा निराकार्ष्टम्। अनेनाक्षशब्देन आयुःप्रजयोर्निराकरणं मा भूत्। किं तु यजमानस्याशीर्वाद एव भवत्वित्यर्थः। योऽयमक्ष उभयतो बद्धो भवति सोऽयं वरुणदेवरूपो वावपारुष्येण दुर्वाग्वर्तते। तथा चान्यत्र श्रूयते– "वरुणो वा एष दुर्वागुभयतो बद्धो यदक्षः" (तैसं ६.२.९) इति। तस्माच्छापरूपदुर्वाक्परिहाराय आशीर्वादरूपं सुवाक्यमनेन मन्त्रेण प्रार्थितम्। एतदेव अभिप्रेत्य तैत्तिरीया मन्त्रमन्यथा पठन्ति– "सुवाग्देव दुर्याँ आ वद" (तैसं १.२.१३) इति॥

कात्यायनः – "पश्चादुत्तरवेदेस्त्रिषु प्रक्रमेषु मत्या वा नभ्यस्थे अभिमन्त्रयतेऽत्र रमेथामिति" (काश्रौ ८.४.५) इति। अनभ्यस्थे प्रवर्तनं परित्यज्य स्थापिते शकटे उभे मन्त्रयेत्। कुत्र स्थापिते इति चेत् उच्यते– पश्चादुत्तरवेदेस्त्रिषु प्रक्रमेष्वित्येकः पक्षः। 'मत्या वा' इत्यपरः पक्षः। यत्र स्थापनीय इति स्वस्य मतिस्तत्रेत्यर्थः। पाठस्तु– 'अत्र रमेथां वर्ष्मन् पृथिव्याः' इति। हे शकटे, युवां 'पृथिव्याः 'वर्ष्मन् भूमेः शरीरभूते 'अत्र अस्मिन् देवयजनप्रदेशे 'रमेथां क्रीडां कुरुतम्। देवयजनस्य भूमेः शरीरत्वमाह तित्तिरिः – "वर्ष्म ह्येतत् पृथिव्या यद्देवयजनम्" (तैसं ६.२.८) इति ॥५॥

---

9. C V1 वचन° for °वाचन°
13. V1 S1 C om. आयुर्मा ... भवत्वित्यर्थः (L, 15)
14. P1 निरासकार्षिष्ट for both निराकार्ष्ट
16. P1 अन्यत् for अन्यत्र
20. V1 S1 C अति° for अभि°
21. V1 S1 C अनभ्यस्त° for अनभ्यस्थे
22. V1 S1 C च for वा
25. V1 S1 C वर्ष्मन् for वर्ष्म

आ– शब्दं कुर्वन्नसि वाचयति– 'स्वं गोष्ठम्' इति । हविर्धानदेवत्या बृहती । हे हविर्धाने, हे देवी हे दुर्ये गृहेषु साधनभूते, स्वम् आत्मीयं गोष्ठं गोस्थानम् आवदतम् उच्चारयतम् । आयुः मा निर्वादिष्टम् । निरुपसर्गोऽत्र कुत्सायाम् । निर्वादनं मा कार्षीष्टम् । पशुधनादिरहितम् आयुः मा वादिष्टम् । तथाविधायुर्दानं मा कार्षीष्टम् । प्रजां मा निर्वादिष्टम् । दीर्घायुष्यादिगुणसंपन्नप्रजा स्यादित्युच्चारयतम् । अत्र रमेथाम् । रमु क्रीडायाम् । पृथिव्याः संबन्धिनि वर्ष्मन् वर्ष्मणि सेवनयोग्यविस्तीर्णस्थाने रतिं कुरुतम् ॥५॥

विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजांꣳसि ।
यो अस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा ॥६॥

विष्णोः । नु । कम् । वीर्याणि । प्र । वोचम् ।
यः । पार्थिवानि । विमम इति विऽममे । रजांꣳसि ।
यः । अस्कभायत् । उत्तरमित्युत्ऽतरम् । सधस्थमिति सधऽस्थम् ।
विचक्रमाण इति विऽचक्रमाणः । त्रेधा । उरुगाय इत्युरुऽगायः । विष्णवे । त्वा ॥ मौ ॥६॥

सा– कात्यायनः – "दक्षिणमुपस्तभ्नाति विष्णोर्नु कमिति" (काश्रौ ८.४.९) इति । दक्षिणशकटस्याग्रं वोढुम् आधारभूतं काष्ठं स्थापयेदित्यर्थः । पाठस्तु– 'विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि । यो अस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायः' इति । नु कम् इति पादसमवायोऽवधारणार्थः । [अव्य]यं कर्मवाचकम् । विष्णोः वीर्याणि कर्माणि प्रवोचं प्रब्रवीमि । कानि तानि कर्माणि इत्युच्यते यः विष्णुः पार्थिवानि रजांसि पृथिवीपरमाणून् विममे निर्मितवान् परिगणितवांश्च । पुनरपि यो विष्णुः उत्तरं सधस्थं देवानां सहवासस्थानं द्युलोकरूपम् अस्कभायत् यथाऽधो न पतति तथा स्तम्भितवान् । पुनरपि यः त्रेधा विचक्रमाणः त्रिषु लोकेषु पादत्रयं निदधे उरुगायः उरुभिर्महात्मभिः गीयते च ॥

कात्यायनः – "दक्षिणतः स्थूणामुपनिहन्ति विष्णवे त्वेति" (काश्रौ ८.४.७) इति । दक्षिणशकटाग्रबाहनाय यत् काष्ठं स्थापितं तद् भूमौ निखन्यात् । हे काष्ठ, विष्णवे हविर्धानशकटाभिमानिविष्णुप्रीत्यर्थं त्वां निखनामीति शेषः ॥६॥

---

4. B1 नोदिष्टम् for मा वादिष्टम्
5. B1 before दीर्घा॰ adds प्रजामप्येवमादिष्टं
16. C P1 before अव्ययं ins. पदसमुदायोऽवधारणार्थः
17. C V1 S1 om. पृथिवी॰
20. V1 S1 C निदधौ for निदधे

आ— दक्षिणमुपस्तभ्नाति— ‘ विष्णोर्नु कम् ’ इति । ‘ विष्णोर्नु कम् ’ इत्यादयस्तिस्रो वैष्णव्यास्त्रिष्टुभः यजुरन्ताः । Vनु Vकम् इति पादसमाहारोऽवधारणार्थः । Vविष्णोः एव Vवीर्याणि । यस्मात् स्वमहिम्ना सर्वान् लोकान् सर्वान् देवान् सर्वानात्मनः सर्वाणि भूतानि विरमति विरामयत्यजस्रं सृजति विसृजति वासयतीति वीरो भगवान् । तस्य विष्णोः कर्मादीनि वीर्याणि Vप्रवोचं प्रब्रवीमि । वेदस्यैव प्रवचनं “ सर्वे वेदा यत् पदमामनन्ति ” (कठोपनिषद् २·१५) [इति] । तच्चोपनिषदमिति । वेदस्यैवैवं वक्तुं युक्ततमत्वात् । ‘ यः पार्थिवानि विममे रजांसि ’ । Vयः विष्णुः Vपार्थिवानि पृथिवीविकाराणि Vरजांसि पृथिव्यन्तरिक्षद्युलोकस्थानानि तद्बृहत्वापेक्षया रजोवत् रजासि एतानि सूक्ष्माणि ‘विममे निर्मितवान् ।’ यो अस्कभायदुत्तरम् ’ । Vउत्तरं, भूमिमवधिं कृत्वा लक्षयोजनादुपरि स्थितं द्युलोकादिकं Vयः भगवान् विष्णुः Vअस्कभायत् तथा तिष्ठेत्याज्ञामात्रेणैव स्कम्भनं कृतवान् । ‘ सधस्थं विचक्रमाणस्त्रेधा ’ । “ सध मादस्थयोश्छन्दसि ” (पा ६·३·९६) इति सहशब्दस्य सधादेशः । सह अस्मिन् स्थीयत इति सधस्थं सहस्थानम् । देवादीनां सहनिवासस्थानं त्रेधा त्रिप्रकारेण जीवान्तर्यामिकालात्मना Vत्रेधा Vविचक्रमाणः । क्रमु पादविक्षेपे । पादविक्षेपं कुर्वाणः । सात्विकराजसतामसमूर्तिप्रकारेण वा विचक्रमाणः । अध्यात्ममधिदैवमधिभूतमिति च प्रकारेण विचक्रमाणः । सुरनरतिर्यग्जातिभेदेन त्रिधा विचक्रमाणः यो विष्णुर्विविधं फलं सौति प्रस्तावयति अभिवर्षतीति विष्णुर्वर्तते (?) । यः विष्णुः Vउरुगायः उरुभिः बहुभिः महर्षिभिः उरुभिर्वेदैश्च उरु गीयत इति उरुगायः । तस्य विष्णोः वीर्याणि प्रवोचं प्रब्रवीमीति संबन्धः । अथवा ‘ विष्णोर्नु कम् ’ इति । नु वितर्के । कम् इत्यस्य क इति परिणामः । विष्णोः वीर्याणि प्रवोचं प्रब्रवीमि [इति] यो ब्रवीति स को नु ? तद्वीर्याणि वक्तुं कोऽपि नार्हतीत्यर्थः । यद्यपि यः कविः ब्रह्माऽपि पार्थिवानि रजांसि आर्णानि [अणंसि ?] कालेन [साकल्येन] विममे, किं तथाऽपि विष्णोर्वीर्याणि विममे ? न विममे इत्यर्थः । यस्त्रेधा विचक्रमाणः उरुगायः उत्तरं सधस्थम् अस्कभायत् तस्य वीर्याणि विमातुं साकल्येन गणयितुं कतमोऽपि नार्हतीत्यर्थः । तथा च श्रीवेदव्यासः —

---

5. B1 om. एव; B1 वाचनम् for प्रवचनम्; B1 मत्वा for तच्च
7. B1 बहुत्वापेक्षया for बृहत्त्वापेक्षया
12. B1 °कालात्मभावः for °कालात्मना
13. B1 om. इति च
14. B1 °मूर्ति° for °जाति°; B1 स्तौति H1 स्तति we have corrected this as : सौति.
15. B1 trans महर्षिभिः ... शेषः ॥ (p. 405 L. 13)
16. H1 om. प्रवोचम् ; B1 अथ for अथवा B1 उरुधा; for उरु
18. H1 om. कोऽपि; B1 om. यद्यपि ... नार्हतीत्यर्थः (L.21)
21. B1 अपि for च

" विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि । *अस्कम्भयच्चास्खलता त्रिविष्टं यस्मात् त्रिसाम्यसदनादुरुकम्पयारम् (?) " (द्र. भापु २.७.४०) इत्येवमत्र व्याचष्टे। स्थूणामुपनिहन्ति– ' विष्णवे त्वा ' इति । Vविष्णवे विष्ण्वर्थं स्थूणां त्वां निहन्तीति शेषः ॥६॥

दि॒वो वा॑ विष्ण उ॒त वा॑ पृथि॒व्या म॒हो वा॑ विष्ण उ॒रोर॒न्तरि॑क्षात् ।
उ॒भा हि हस्ता॒ वसु॑ना पृ॒णस्वाऽऽ प्रय॑च्छ॒ दक्षि॑णा॒दोत स॒व्याद्विष्ण॑वे त्वा ।।७।।

दि॒वः । वा॒ । वि॒ष्णो॒ इति॑ विष्णो । उ॒त । वा॒ । पृ॒थि॒व्याः ।
म॒हः । वा॒ । वि॒ष्णो॒ इति॑ विष्णो । उ॒रोः । अ॒न्तरि॑क्षात् ।
उ॒भा । हि । हस्ता॑ । वसु॑ना । पृ॒णस्व॑ ।
आ । प्र । य॒च्छ॒ । दक्षि॑णात् । आ । उ॒त । स॒व्यात् । विष्ण॑वे । त्वा॒ ॥ स्रूः ॥७॥

सा– कात्यायनः – "दिवो वेत्युत्तरं प्रतिप्रस्थाता। उत्तरतः स्थूणां पूर्ववत्" (काश्रौ ८.४.११-१२) इति । यथाऽध्वर्युर्दक्षिणशकटं मन्त्रेणोपष्टभ्य विष्णवे त्वेति स्थूणां निखातवान् । एवं प्रतिप्रस्थातोत्तरशकटे कुर्यादित्यर्थः । पाठस्तु– ' दिवो वा विष्ण उत वा पृथिव्या महो वा विष्ण उरोरन्तरिक्षात्। उभा हि हस्ता वसुना पृणस्वाऽऽ प्रयच्छ दक्षिणादोत सव्याद्विष्णवे त्वा ' इति । हे Vविष्णो, द्युलोकात् Vवा भूलोकाद्वा महर्लोकात् वा Vउरोः विस्तीर्णादन्तरिक्षलोकाद्वा समानीतेन Vवसुना द्रव्येण Vउभा Vहि Vहस्ता स्वकीयौ हस्तावुभावपि Vपृणस्व पूरयस्व। ततो धनपूर्णात् Vदक्षिणात् Vसव्यात् च हस्तात् Vप्रयच्छ बहुकृत्व आवृत्या प्रकृष्टं मणिमुक्तादिधनमस्मभ्यं देहि । ' विष्णवे त्वा ' इत्ययं मन्त्रः पूर्ववद्व्याख्येयः ॥७॥

आ– उत्तरमुपस्तभ्नाति– ' दिवो वा विष्णो इति । हे Vविष्णो, Vदिवः Vवा द्युलोकाद्वा Vउत Vवा Vपृथिव्याः पृथिवीलोकात्, हे Vविष्णो, आदरार्थं पुनर्वचनम् । Vउरोः विस्तीर्णात् Vअन्तरिक्षात् महतोऽन्तरिक्षलोकात् । एकैकस्माल्लोकात् । एतेभ्यो वा त्रिभ्यो लोकेभ्यः । उत अपि अन्यतः कुतश्चित् उपायान्तरितो वा । मह इति धननाम । Vमहः धनमादाय Vउभा उभौ

---

1. H1 पवनानि for पार्थिवानि
   * [भागवतपुराणे तु– ' चस्कम्भ यः स्वरंहसाऽस्खलता त्रिपृष्ठं यस्मात् त्रिसाम्यसदनादुरु कम्पयानम् ' इति दृश्यते ।]
2. H1 मन्त्रं for अत्र
3. H1 °रुहन्ति for °निहन्ति
10. P1 उत्तरं for उत्तरा
11. P1 उपलभ्य for °उपष्टभ्य
14. P1 भूर्लोकाद् for भूलोकाद्
16. V1 S1 C om. व्याख्येयः
18. H1 अप्यर्थः पुनर्वाक्यम् for आदरार्थं पुनर्वचनम्
19. B1 अन्तरिक्षात् लोकात् for अन्तरिक्षलोकात्; H1 उभेति for उत अपि

ᵛहस्ता हस्तौ तेन ᵛवसुना धनेन ᵛआपृणस्व हस्तौ परिपूरय। तत्र हस्तौ धनेनापूर्य ᵛआप्रयच्छ ᵛदक्षिणात् दक्षिणहस्तेन। ᵛउत अपि ᵛसव्यात् सव्यहस्तेनापि, उभाभ्यां वा आप्रयच्छ आभिमुख्येन प्रयच्छ । ईश्वरः हि यस्मात् त्वमतस्त्वन्यौर्नैरन्तरमपेक्षितमाप्रयच्छेत्यभिप्रायः । 'विष्णवे त्वा' इति पूर्ववत् ॥७॥

प्र तद्विष्णुं स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥८॥

प्र । तत् । विष्णुः । स्तवते । वीर्येण ।
मृगः । न । भीमः । कुचरः । गिरिष्ठाः । गिरिस्था इति गिरिऽस्थाः ।
यस्य । उरुषु । त्रिषु । त्रिक्रमणेष्विति त्रिऽक्रमणेषु ।
अधिक्षियन्तीत्यधिऽक्षियन्ति । भुवनानि । विश्वा ॥ ट्ॅं ॥८॥

सा– कात्यायनः – "प्र तद्विष्णुरिति वाचयति" (काश्रौ ८·४·१६) इति । पाठस्तु– 'प्र तद्विष्णु स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा' इति । ᵛयस्य ᵛविष्णोः ᵛउरुषु प्रभूतेषु ᵛत्रिषु ᵛविक्रमणेषु पादप्रक्षेपणस्थानेषु ᵛविश्वा विश्वानि सर्वाणि ᵛभुवनानि ᵛअधिक्षियन्ति अधिनिवसन्ति । ततः सुप्रसिद्धो विष्णुः ᵛवीर्येण [अ] साधारणभूतेन वीरकर्मादिना ᵛप्रस्तवते प्रस्तूयते । तत्र दृष्टान्तः– ᵛगिरिष्ठाः पर्वते स्थितः ᵛकुचरः कुत्सितप्राणिभक्षकः । चर गतिभक्षणयोः । बिभेत्यस्मादिति ᵛभीमः भयंकरः । ᵛमृगः ᵛन सिंह इव वीर्येण स्तूयते तद्वत् ॥८॥

आ – मध्यमं छदिरालभ्य वाचयति– 'प्र तद्विष्णुः' इति । दीर्घतमा औचथ्य ऋषिः । ᵛयस्य विष्णोः ᵛउरुषु पृथुषु महत्सु ᵛविक्रमणेषु पादेषु ᵛविश्वा विश्वानि ᵛभुवनानि सर्वाणि भूतानि ᵛअधिक्षियन्ति अधिवसन्ति । ᵛतत् सः ᵛविष्णुः ᵛवीर्येण वीरकर्मादिना अनन्यसाधारणभूतेन ᵛप्रस्तवते प्रस्तूयते । ᵛगिरिष्ठाः पर्वतस्थानः ᵛकुचरः कुत्सितप्राणिभक्षकः ।

---

1. B1 ते तव for तेन
3. H1 after प्रयच्छ । adds – हि यस्मात् तन्नः समग्रधनमासितप्रदाने विशकति विषित
   वा त्रिभृता आत्मातिनः मृपणाश्च सान्ति । त्वमपि
14. V1 S1 C °वसान्ति for °निवसान्ति
16. V1 S1 C om. चर गतिभक्षणयोः; P1 inserts in the margin : वेदे नशब्द इवार्थः
17. B1 मध्यमं ... स्तूयते ॥ [P 324 L 4]
18. H1 om. महत्सु
19. H1 भुवनानि for भूतानि; H1 °साधारणं मनः for °साधारणभूतेन [L 20]

बिभेत्यस्मादिति ^{v}भीमः सिंहः । ^{v}मृगः ^{v}न मृग इव । सिंहः स्ववीर्येण स्तूयत इति च । अथवा 'मृगः न'। अतो मृगवदवभासमानः भगवान् श्रीनरसिंहः, शुद्धतमत्वाद्वा मृगः । दैत्यादीनां तु भयहेतुत्वात् ^{v}भीमः। कुचरः, कुः पृथ्वी, तत्र लीलया चरतीति कुचरः । गिरि ऋग्यजुःसामलक्षणायां वाचि । वाच्यत्वेन लक्ष्यत्वेन च तत्र तिष्ठतीति ^{v}गिरिष्ठाः । इत्येवं श्रीभगवान् विष्णुः स्तूयते ॥८॥

---

५ विष्णो॑ र॒राट॑म॒सि विष्णो॑ः श्नप्त्रे॑ स्थो विष्णो॑ः स्यूर॑सि विष्णो॑र्ध्रु॒वो॑ऽसि ।
वै॒ष्ण॒वम॑सि विष्ण॑वे त्वा ॥९॥(५)॥

विष्णोः॑ । र॒राट॑म् । अ॒सि । श्नप्त्रे॒ इति॑ श्नप्त्रे॑ । स्थः॒ । स्यूः । ध्रु॒वः ।
वै॒ष्ण॒वम् । अ॒सि । विष्ण॑वे । त्वा॒ ॥ घां ॥९॥(५)॥

सा- कात्यायनः – "विष्णो रराटमिति रराट्याम्" (काश्रौ ८·४·१८) इति । वाचयतीत्यनुवर्तते । असीति मन्त्रशेषः । हविर्धानाख्ये पूर्वोक्ते द्वे शकटे दक्षिणोत्तरभागयोः स्थापयित्वा तदावरकत्वेन परितो हविर्धानाख्यमण्डपं कुर्यात् । स च मण्डपो विष्णुदेवताकत्वाद्विष्णुरित्युपचर्यते । विष्णोश्च मूर्तिधरस्य सर्वावयवसद्भावाल्ललाटाख्योऽवयवोऽस्ति । तद्वद्धविर्धानमण्डपस्यापि पूर्वद्वारवर्तिस्तम्भयोर्मध्ये काचिद्दर्भमाला प्रथ्यन्ते । तां मालां तद्बन्धनाधारं तिर्यग्वंशं वा संबोध्य पुरुषललाटत्वेनोपचर्यते । हे दर्भमयमालाधारवंश, त्वं विष्णोर्विष्णुमूर्तित्वेनोपचरितस्य हविर्धानमण्डपस्य ^{v}रराटम् ^{v}असि ललाटस्थानीयो भवसि ॥

कात्यायनः – "विष्णोः श्नप्त्रे स्थ इत्युच्छ्राय्यौ" (काश्रौ ८·४·१९) इति । येयं रराटी तस्यामूर्ध्वं स्थापितायामेतं मन्त्रं वाचयेत् । *बौधायनस्तु विस्पष्टमेतन्मन्त्रविनियोगमाह– "विष्णोः श्नप्त्रे स्थ इति रराट्या अन्तौ व्यस्यति संमृशतीत्येके" (*आपश्रौसू ११·८·४) इति । व्यस्यति विभज्य प्रक्षिपतीत्यर्थः । हे रराट्यौ, युवां ^{v}विष्णोः विष्णुनामकस्य हविर्धानमण्डपस्य ^{v}श्नप्त्रे ^{v}स्थः ओष्ठसंबन्धिरूपे भवथः ॥

कात्यायनः – "रज्ज्वा विष्णोः स्यूरसीति । विष्णोर्ध्रुवोऽसीति ग्रन्थिं करोति" (काश्रौ ८·४·२१-२२) इति । हे रज्जो, त्वं ^{v}विष्णोः विष्णुनामकस्य हविर्धानमण्डपस्य संबन्धिनी ^{v}स्यूः ^{v}असि ग्रन्थिकरणाय स्यूता भवसि । हे रज्जुग्रन्थे, त्वं ^{v}विष्णोः हविर्धानस्य संबन्धी भूत्वा ^{v}ध्रुवः ^{v}असि स्थिरो भवसि ॥

---

1. B1 बिभ्याति for बिभेति
2. B1 नृसिंहः for नरसिंहः, H1 दैत्यानां for दैत्यादीनां
3. H1 तव for तत्र
4. H1 om. लक्ष्यत्वेन; H1 om, विष्णुः
11. P1 °देवकत्वात् for °देवताकत्वात्
13. V1 S1 C om. दर्भमाला ... उपचर्यते । (L. 11)
19. P1 ऊर्ध्वे for ऊर्ध्वं ।

* [यद्यपि सायणाचार्येण बौधायनादुद्धृतमिदं सूत्रमिति निर्दिष्टं तथाऽपि सूत्रांशोऽयम् आपस्तम्बश्रौतसूत्रे उपलभ्यते]।

कात्यायनः – “ प्राग्वंशं हविर्धानं निर्माय वैष्णवमसीत्यालभते ” (द्र. काश्रौ ८.४.२४) इति । विष्णवे त्वेति मन्त्रशेषः । प्रागग्रैर्वंशैर्मण्डपं निर्माय मन्त्रेणानेन स्पृशेत । हे हविर्धान, त्वं ^{v}वैष्णवम् ^{v}असि विष्णुदेवताकत्वेन तत्संबन्धी भवसि । तस्मात् विष्णुप्रीत्यर्थं त्वां स्पृशामि । हविर्धानस्य विष्णुदेवताकत्वं तित्तिरिर्दर्शयति– “ वैष्णवꣳ हि देवतया हविर्धानम् ” (तैसं ६.२.९) इति । ॥८॥

[इति पञ्चमेऽध्याये पञ्चमोऽनुवाकः ॥५॥]

आ– रराटमालभ्य वाचयति– ‘ विष्णो रराटमसि ’ इति । ‘ विष्णो रराटम् ’ इत्यादयः पञ्च मन्त्राः वैष्णवाः । आद्या उष्णिक् । द्वितीयातृतीयादयो मन्त्राः पङ्क्तयः । ^{v}विष्णोः यज्ञस्य ^{v}रराटं ललाटम् ^{v}असि ॥

उच्छ्राय्यावुपस्पृश्य वाचयति– ‘ विष्णोः श्नप्त्रे स्थ ’ इति । विष्णोः यज्ञस्य ^{v}श्नप्त्रे सृक्विणी ^{v}स्थः भवथः । श्नप्त्रशब्देन ओष्ठसन्धिरुच्यते । सीव्यत्यनेनेति स्यूः इति । ‘ विष्णोः स्यूरसि ’ । षिवु तन्तुसंताने । सीव्यति संतन्यतेऽनेनेति ^{v}स्यूः ^{v}असि । ग्रन्थिं करोति । ^{v}विष्णोः ^{v}ध्रुवः ^{v}असि ग्रन्थिरसि । समाप्तं स्पृशति– ‘ वैष्णवमसि ’ । विष्णुर्देवता अस्येति ^{v}वैष्णवम् । विष्णवे अर्थाय त्वामुपस्पृशामीति शेषः ॥८॥

[इति पञ्चमेऽध्याये पञ्चमोऽनुवाकः]

[अथ षष्ठोऽनुवाकः]

सा– पञ्चमे हविर्धानमण्डपनिर्माणमन्त्रा उक्ताः । षष्ठे तूपरवनिर्माणमन्त्रा उच्यन्ते ।

दे॒वस्य॑ त्वा स॒वि॒तुः प्र॑स॒वे॒ऽश्विनो॑र्बा॒हुभ्यां॑ पू॒ष्णो हस्ता॑भ्याम् ।
आ द॑दे॒ नार्य॑सी॒दम॒हꣳ रक्ष॑सो ग्री॒वा अपि॑ कृन्तामि ।
बृ॒हन्न॑सि बृ॒हद्र॑वा बृ॒ह॒तीमिन्द्रा॑य॒ वाचं॑ वद ।
र॒क्षो॒हणं॑ वलग॒हनं॑ वैष्ण॒वीम् ॥१॥

[दे॒वस्य॑ । त्वा॒ । स॒वि॒तुः । प्र॒स॒व इति॑ प्र॒ऽस॒वे ।
अ॒श्विनोः॑ । बा॒हु॒भ्या॒मिति॑ बा॒हुऽभ्या॑म् । पू॒ष्णः । हस्ता॑भ्याम् ।] आ । द॒दे॒ ।

---

1. P1 निधाय for निर्माय
2. V1 S1 C before हविर्धान ins. वंश°
6. B1 om. विष्णो रराटमसीति
10. H1 सूच्यति for सीव्यति B1 om. अनेनेति
11. B1 after असि adds इति; H1 °संधाने for संताने; B1 संततम् for संतन्यते
16. P om. तु

नारी॑ । अ॒सि॒ । इ॒दम् । अ॒हम् । रक्ष॑सः । ग्री॒वाः । अपि॑ । कृ॒न्ता॒मि॒ ।
बृ॒हन् । अ॒सि॒ । बृ॒हद्र॑वा॒ इति॑ बृ॒हत्ऽर॑वाः । बृ॒ह॒तीम् । इन्द्रा॑य । वाच॑म् । व॒द॒ ।
र॒क्षो॒हण॑म् । र॒क्षो॒ह॒नमिति॑ र॒क्षः॒ऽहन॑म् । व॒ल॒ग॒ह॒नमिति॑ व॒ल॒ग॒ऽहन॑म् । वै॒ष्ण॒वीम् ॥ ढ्यः ॥१॥

कात्यायनः – “ उपरवान् । अभ्र्यादि करोत्यवटवत् ” (काश्रौ ८·४·२८;८·५·१) इति । यथा यूपस्यावटः क्रियते तथाऽत्राप्युपरवनामकांश्चतुरो गर्तानभ्रिस्वीकारमारभ्य परिलेखनपूर्वकं कुर्यादित्यर्थः ॥

अवटार्थमभ्रिस्वीकारमाह । कात्यायनः – “ देवस्य त्वेत्यभ्रिमादाय ” (काश्रौ ६·२·८) इति । अभ्रिशब्देन काष्ठनिर्मितं खननसाधनमुच्यते । पाठस्तु– ‘ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आ ददे नार्यसि ’ इति । हे अभ्रे, ᵛत्वा ᵛआ ᵛददे त्वां स्वीकरोमि । त्वं तु ᵛनारी ᵛअसि खननसाधनत्वेन कर्मोपयोगित्वान्नराणां पुरुषाणाम् अनुष्ठातॄणां संबन्धिनी भवसि । अन्यत् सर्वमैष्टिकहविर्निर्वापणमन्त्रवद् व्याख्येयम् ॥

कात्यायनः – “ अवटं परिलिखतीदमहमिति ” (काश्रौ ६·२·८) इति । पाठस्तु– ‘ इदमहं रक्षसो ग्रीवा अपि कृन्तामि ’ इति । उपरवाख्यांश्चतुरोऽवटान् परिलिखामीति यदस्ति । ᵛइदम् इति विभक्तिव्यत्ययः । अनेन परिलेखनेन ᵛअहम् अनुष्ठाता ᵛरक्षसः राक्षसजातेः ᵛग्रीवाः कण्ठदेशात् ᵛकृन्तामि छिनद्मि । अपिशब्देन कृत्स्नशरीरच्छेदनं समुच्चीयते । न केवलं ग्रीवामात्रं छिनद्मि किन्तु कृत्स्नम् ᵛअपि शरीरम् इत्यर्थः ॥

कात्यायनः – “ बृहन्नसीति यथापरिलिखितं खनति ” (काश्रौ ८·५·७) इति । आग्नेयीं विदिशमारभ्य चतसृषु विदिक्षु चतुर उपरवान् खातुं भूमिः परिलिखिता । तेन परिलेखनक्रमेण अवटान् खनेत् । पाठस्तु– ‘ बृहन्नसि बृहद्रवा बृहतीमिन्द्राय वाचं वद । रक्षोहणं वलगहनं वैष्णवीम् ’ इति । उपरवाख्य हे गर्त, त्वं ᵛबृहन् ᵛअसि महान् भवसि । वर्तुलस्य गर्तस्य प्रादेशपरिमाणेन विस्तृतत्वात् बहुपरिमाणेन खातत्वाच्च महत्त्वम् । तथा त्वं ᵛबृहद्रवाः बृहन् महान् रवो ध्वनिर्यस्येति विग्रहः । सकारान्तोऽयं शब्दः । खातुं भूमावभ्र्यां प्रहृतायां ध्वनिर्महान् भवतीत्यर्थः । तस्मात् त्वम् ᵛइन्द्राय इन्द्रप्रीत्यर्थं ᵛरक्षोहणं रक्षोवधविषयां ᵛबृहतीं ᵛवाचं प्रौढध्वनियुक्तं वाक्यं ᵛवद । सैव वाक् ᵛवलगहनम् इति ᵛवैष्णवीम् इति च विशेष्यते । पराजित्य पलायमानै राक्षसैरिन्द्रादिवधार्थमभिचाररूपेण भूमौ निखाता अस्थिकेशनखादिपदार्था वलगा इत्युच्यन्ते । तदाह तित्तिरिः – “ असुरा वै निर्यन्तो देवानां प्राणेषु वलगान् न्यखनन् तान् बाहुमात्रेऽन्वविन्दन् तस्माद् बाहुमात्राः खायन्ते ” (तैसं ६·२·११) इति । तान् वलगान् हन्ति विनाशयतीति वलगहा वाक् । सा च यज्ञरक्षकस्य विष्णोः संबन्धिनी । तादृशीं वाचं ब्रूहि ॥१॥

आ– इत उत्तरमुपरवमन्त्राः प्राक् ‘ देवस्य त्वा ’ इत्यस्मात् मन्त्रात् । अभ्रिमादत्ते– ‘ देवस्य [त्वा ’ इति ।] अभ्रिदेवत्या गायत्री, [हे अभ्रे,] ᵛसवितुः ᵛदेवस्य ᵛप्रसवे वर्तमानोऽहम् ᵛअश्विनोः ᵛबाहुभ्यां ᵛपूष्णः ᵛहस्ताभ्यां ᵛत्वा त्वामभ्रिम् ᵛआददे गृह्णामि । ᵛनारी ᵛअसि । नारी

---

6. V1 S1 C after °स्वीकारम् ins- एवम्
20. V1 S1 C after त्वं add च
28. B1 इतः ... वर्तमानोऽहम् (p. 412, H. 2); H1 आददे for आदत्ते

इति प्रशस्यते । नरस्यापत्यं स्त्री नारी । परिलिखति– ‘ इदमहम् ’ इति । रक्षोघ्नदेवत्या शक्वरी । यदेतत् ᵛअहम् उपरवान् परिलिखामि ᵛइदम् अहम् अयमहं ᵛरक्षसः यज्ञविध्वंसिनो राक्षसस्य ᵛग्रीवाः ᵛअपि ᵛकृन्तामि छिनद्मि । यथापरिलिखितं खनति – ‘ बृहन्नसि ’ इति । उपरवदेवत्या भुरिक् बृहती । हे उपरव, यस्मात् त्वं ᵛबृहन् महान् ᵛअसि । कर्मणि परिमाणेन च । ᵛबृहद्रवाः महान् रवः शब्दोऽस्येति बृहद्रवाः । तस्मात् ᵛबृहतीं महतीं ᵛवाचम् ᵛइन्द्राय ᵛवद । पुनः कथंभूतामिति । ᵛरक्षोहणम् । रक्षांसि याचकान् हन्ति सा रक्षोहा तां रक्षोहणम् । “ ब्रह्मभ्रूणवृत्रेषु क्विप् ” (पा ३.२.८७) इति तत्र क्विप् । अत्र “ बहुलं छन्दसि ” (पा. ३.२.८८) इति क्विप् । ᵛवलगहनम् । शत्रुभिर्विनाशार्थं भूमौ निखाताः कृत्याविशेषा वलगाः । वृ (?) वधार्थस्य वृणोतेर्वल इत्येतद्रूपम् । छान्दसो लकारः । यस्य वधार्थं क्रियते तं पुरुषं रोगादिभिर्वृण्वन् प्रच्छादयन् । वलो गच्छतीति वलगः, एवं विधान् वलगान् हन्तीति वलगहा वाक् । तां ᵛवलगहनं ᵛवैष्णवीं विष्णुदेवत्यां वाचं वद इति संबन्धः ॥१॥

इ॒द॒म॒हं तं व॑ल॒गमुद्व॑पा॒मि यन्नो॒ निष्ट्यो॒ यम॒मात्यो॑ निच॒खान॑ ।
इ॒द॒म॒हं तं व॑ल॒गमुद्व॑पा॒मि यं नः॑ समा॒नो यमस॑मानो निच॒खान॑ ।
इ॒द॒म॒हं तं व॑ल॒गमुद्व॑पा॒मि यं न॒ः सब॑न्धु॒र्यमस॑बन्धु॒र्निच॒खान॑ ।
इ॒द॒म॒हं तं व॑ल॒गमुद्व॑पा॒मि यं नः॑ स॒जा॒तो यमस॑जातो निच॒खानोत् कृ॒त्यां कि॑रा॒मि ॥२॥

इ॒दम् । अ॒हम् । तम् । व॒ल॒गम् । उत् । व॒पा॒मि ।
यम् । न॒ः । निष्ट्य॑ः । यम् । अ॒मात्य॑ः । नि॒च॒खाने॑ति॑ नि॒ऽच॒खान॑ ।
स॒मा॒नः । [यम्] अस॑मानः ।
सब॑न्धु॒रिति॒ सऽब॑न्धुः । अस॑बन्धु॒रित्यस॑ऽबन्धुः ।
स॒जा॒त इति॑ स॒ऽजा॒तः । अस॑ंजातः ।
उत् । कृ॒त्यां । कि॒रा॒मि ॥ ध्राः ॥२॥

कात्यायनः – “ इदमहमित्युत्किरति यथाखातं प्रतिमन्त्रम् ” (काश्रौ ८.५.८) इति । येन क्रमेण चत्वारो गर्ताः खातास्तेन क्रमेण चतुर्भ्यो गर्तेभ्यः खातं यत् तृणादिकं चतुर्भिर्मन्त्रैरुत्किरेत् । तत्रायं प्रथमो मन्त्रः – ‘ इदमहं तं वलगमुद्वपामि यन्नो निष्ट्यो यममात्यो निचखान ’ इति । ष्ट्यै शब्दसंघातयोः । नितरां स्त्यायति संघातरूपेण सह वर्तत इति ᵛनिष्ट्यः पुत्रादिः । धनिकस्य स्वामिनो धनगृहादिनिर्वाहकः

---

2. H1 °विरोधिनो for °विध्वंसिनो
4. H1 om. महान्
8. B1 विशालार्थं for विनाशार्थं; H1 निखनिता for निखाताः

ᵛअमात्यः। केनापि निमित्तेन कुपितः पुत्रोऽमात्यो वा ᵛनः अस्मानुद्दिश्य वधार्थं ᵛयं ᵛवलगं ᵛनिचखान नितरां खातवान्, ᵛतं ᵛवलगम् ᵛउद्वपामि उद्धृत्य अन्यत्र परित्यजामि। इदंशब्दः क्रियाविशेषणम्। प्रत्यक्षं यथा भवति तथोद्वपामीत्यर्थः ॥

अथ द्वितीयः – 'इदमहं तं वलगमुद्वपामि यं नः समानो यमसमानो निचखान' इति। ᵛसमानः धनकुलादिभिः सदृशः। ᵛअसमानः न्यूनाधिको वा। अन्यत् पूर्ववत्। तृतीयकोटेरभावात्। समानासमानशब्दौ द्वावेव शत्रुवाचकावभिहितौ। एतदेवाभिप्रेत्य तित्तिरिराह "द्वौ वाव पुरुषौ यश्चैव समानो यश्चासमानो यमेवास्मै तौ वलगं निखनतस्तमेवोद्वपति" (तैसं ६.२.११) इति ॥

अथ तृतीयः – 'इदमहं तं वलगमुद्वपामि यं नः सबन्धुर्यमसबन्धुर्निचखान' इति। कुलशीलादिभिः समानो मातुलादिः ᵛसबन्धुः, तद्विपरीतः ᵛअसबन्धुः। अन्यत् पूर्ववत् ॥

अथ चतुर्थः – 'इदमहं तं वलगमुद्वपामि यं नः सजातो यमसजातो निचखान' इति। ᵛसजातः समानजन्मा भ्राता, तद्विपरीतः असजातः। अन्यत् पूर्ववत् ॥

कात्यायनः – "उत् कृत्यां किरामीति पश्चात सर्वेभ्यः" (काश्रौ ८.५.९) इति। असाधारणैर्मन्त्रैः पूर्वोक्तक्रमेणोद्वापं कृत्वा पश्चात् साधारणेनानेन मन्त्रेण चतुर्भ्यो गर्तेभ्यः उद्वपेत्। मन्त्रार्थस्तु– येयं कृत्या शत्रुभिरभितः संपादिता वलगरूपा ताम् ᵛउत्किरामि उद्धृत्य दूरे परित्यजामि ॥२॥

आ– उत्किरति–'इदमहम्' इति। 'इदमहम्' इत्यादयः पञ्च मन्त्राः कृत्यानिवर्तकाः। कृत्याग्निदेवत्या गायत्र्यः। 'इदमहं तं वलगमुद्वपामि यन्नो निष्ट्यो यममात्यो निचखान' इति। ᵛनः अस्माकं ᵛनिष्ट्यः। स्त्यै ष्ट्यै शब्दसंघातयोः। नितरां स्त्यायति सह संभाषणं करोतीति ᵛनिष्ट्यः सहसंभाषकः पुत्रः अन्यो वा ᵛयं ᵛवलगं ᵛनिचखान। ᵛअमात्यः, अमाशब्दो गृहवचनः सहवचनो वा। "अव्ययात् त्यप्" (पा ४.२.१०४) इति। तत्र भव इत्यस्मिन्नर्थे [त्यप्]। ग्रहे सह [वा] वसतीति अमात्यः एकगृहवासी यः कश्चित् यं वलगं निचखान। न्य [खनत्] "छन्दसि लुङ्लङ्लिटः" (पा ३.४.६) सर्वेषु कालेषु भवन्ति। ᵛतं ᵛवलगम् ᵛइदम् ᵛअहम् अयमहम् ᵛउद्वपामि उद्धरामि उन्मूल्य उत्किरामि इत्यर्थः ॥

द्वितीयमुत्किरति– 'यं नः समानो यमसमानो निचखान' इति। ᵛनः अस्माकं विद्याभिः ᵛसमानः सदृशः। ᵛअसमानः विद्याभिरसदृशः न्यूनोऽधिको वा। ᵛयं वलगं ᵛनिचखान ᵛतं ᵛवलगम् ᵛउद्वपामि ॥

तृतीयमुत्किरति– 'इदमहम्' इति। ᵛनः अस्माकं ᵛसबन्धुः, बध्नातीति बन्धुः, समानो

---

15. B1 om. उत्किरति
17. B1 निष्ट्याः for निष्ट्यः; H1 निरन्तरां for नितरां
18. B1 वाचं for वा यं; B1 H1 before पुत्रो adds सहसंभाषणं कः we have corrected this as सहसंभाषकः
20. H1 om. ग्रहे; B1 भवतीति for वसतीति

बन्धुः सबन्धुः । ᵛयं ᵛवलगं ᵛनिचखान ᵛअसबन्धुः असदृशो बन्धुः, यं वलगं निचखान ᵛतं ᵛवलगं ᵛउद्वपामि ॥

चतुर्थमुक्तिरति– ‘ इदमहम् ’ इति । ᵛसजातः समानजन्मा भ्राता । ᵛअसजातः असमानजन्मा भ्रातृसदृशः ᵛयं ᵛवलगं ᵛनिचखान ᵛतं वलगं ᵛउद्वपामि ॥

सर्वानुक्तिरति– ‘ उत्कृत्यां किरामि ’ इति । कृ विक्षेपे । समूलां ᵛकृत्याम् उत्कृत्योत्क्षिपामि ॥२॥

स्वराळसि सपत्नहा सत्रराळस्यभिमातिहा ।
जनराळसि रक्षोहा सर्वराळस्यमित्रहा ॥ ३ ॥

स्वराळिति स्वऽराट् । असि । सपत्नहेति सपत्नऽहा ।
सत्रराळिति सत्रऽराट् । अभिमातिहेत्यभिमातिऽहा ।
जनराळिति जनऽराट् । रक्षोहेति रक्षःऽहा ।
सर्वराळिति सर्वऽराट् । अमित्रहेत्यमित्रऽहा ॥ टौं ॥३॥

सा– कात्यायनः – “ स्वराडित्यवमर्शयति यथाखातं प्रतिमन्त्रम् ” (काश्रौ ८.५.१३) इति । खननक्रमेण चतुर्षु गर्तेषु यजमानस्य हस्तस्पर्शं चतुर्भिर्मन्त्रैः कारयेत् । तत्रायं प्रथमः – ‘ स्वराळसि सपत्नहा ’ इति । हे प्रथमगर्त, त्वं ᵛस्वराट् ᵛअसि स्वयमेव राजमानो भवसि । अतः ᵛसपत्नहा शत्रुघाती भवेति शेषः ॥

अथ द्वितीयः – ‘ सत्रराळस्यभिमातिहा ’ इति । सत्रेषु द्वादशाहादिषु राजत इति ᵛसत्रराट् । अभिमातिहा शत्रुघाती ॥

अथ तृतीयः – ‘ जनराळसि रक्षोहा ’ इति । जनेषु यजमानेषु राजत इति जनराट् । ᵛरक्षोहा यज्ञविनाशकराक्षसघाती ॥

अथ चतुर्थः – ‘ सर्वराळस्यमित्रहा ’ इति । सर्वेषु राजत इति सर्वराट् । ᵛअमित्रहा शत्रुघाती ॥३॥

आ– कृत्यार्थं खातं स्पृशति– ‘ स्वराळसि ’ इति । ᵛस्वराळसि इत्यादयः उपरवदेवत्याश्चतस्रो गायत्र्यः । स्वयमेव राजति इति स्वकीयमेव राज्यं यस्येति वा स ᵛस्वराट् ᵛअसि । सपत्नहा । शत्रून् हन्तीति ᵛसपत्नहा । यस्मात् त्वं स्वराट् सपत्नहा, अतो अस्मानपि तथाभूतान् कुर्विति शेषः । सत्रराट् । द्वादशाहादिसत्रेषु राजते सत्राणि वा राजयतीति ᵛसत्रराट् । त्वमसि ।

---

1. B1 om. असदृशो बंधुः
13. P1 आभि° for अव°
15. V1 S1 C असि for भवसि

अभिमातिहा । अभिमातिरिति अनुकूलशत्रुस्तं हन्तीति ᵛअभिमातिहा । जनराळसि । जनेषु राजत इति जनराट् । रक्षोहा । रक्षांसि हन्तीति ᵛरक्षोहा । सर्वराळसि । सर्वेषु राजत इति ᵛसर्वराट् । अमित्रान् हन्तीति ᵛअमित्रहा ॥३॥

र॒क्षो॒हणो॑ वलग॒हन॒ः प्रोक्षा॑मि वैष्ण॒वान्
र॑क्षो॒हणो॑ वलग॒हनोऽव॑ नयामि वैष्ण॒वान् ।
र॒क्षो॒हणो॑ वलग॒हनोऽव॑ स्तृणामि वैष्ण॒वान् ।।४।।

र॒क्षो॒हणः॑ । र॒क्षो॒हन॒ इति॑ र॒क्षः॒ऽहनः॑ । व॒ल॒ग॒हन॒ इति॑ व॒ल॒ग॒ऽहनः॑ ।
प्र । उ॒क्षा॒मि॒ । वै॒ष्ण॒वान् ।
अव॑ । न॒या॒मि॒ । अव॑ । स्तृ॒णा॒मि॒ । वै॒ष्ण॒वान् ॥ इलां ॥४॥

सा– कात्यायनः – "प्रोक्षत्येनान् रक्षोहण इति । भेदे मन्त्रावृत्तिः" (काश्रौ ८.५.२२-२३) इति । एतांश्चतुरो गर्तान् मन्त्रेण प्रोक्षेत् । तस्य च मन्त्रस्य गर्तभेदे सति आवृत्तिः कर्तव्या । पाठस्तु– 'रक्षोहणो वलगहनः प्रोक्षामि वैष्णवान्' इति । ᵛवैष्णवान् विष्णुदेवताकान् गर्तान् ᵛप्रोक्षामि । कीदृशान् ? ᵛरक्षोहणः राक्षसहन्तॄन् ᵛवलगहनः अभिचारसाधनहन्तॄन् ॥

कात्यायनः – "अवनयनावस्तरणे च" (काश्रौ ८.५.२४) इति । गर्तेषु प्रोक्षणशेषोदकसेचनमवनयनम् । दर्भैराच्छादनमवस्तरणम् । तयोर्द्वयोरपि क्रिययोर्गर्तभेदात् तत्तन्मन्त्रावृत्तिर्द्रष्टव्या । तत्रायमवनयनमन्त्रः – 'रक्षोहणो वलगहनोऽवनयामि वैष्णवान्' इति । ᵛअवनयामि सिञ्चामि । अन्यत् पूर्ववत् ॥

अथावस्तरणमन्त्रः – 'रक्षोहणो वलगहनोऽवस्तृणामि वैष्णवान्' इति । ᵛअवस्तृणामि दर्भैराच्छादयामि । अन्यत् पूर्ववत् ॥

आ– एतान् प्रोक्षति– 'रक्षोहणः' इति । 'रक्षोहणो वलगहनः प्रोक्षामि' इत्यादीनि सप्त विष्णुदेवत्यानि । आद्या अष्टिः । द्वितीया तृतीया पञ्चमी [च] अत्यष्टयः । चतुर्थी धृतिः । षष्ठी दैवी पङ्क्तिः । सप्तमी दैवी बृहती । ᵛरक्षोहणः, रक्षांसि घ्नन्तीति रक्षोहणः । वलगान् घ्नन्तीति ᵛवलगहनः । ᵛवैष्णवान् विष्णुदेवत्यान् युष्मान् ᵛप्रोक्षामि । अवनयति । ᵛरक्षोहणः ᵛवलगहनः ᵛवैष्णवान् रक्षोघ्नीर्वलघ्नीर्वैष्णवीः आपः ᵛअवनयामि अवाचीः प्रापयामि । ᵛअवस्तृणामि ᵛरक्षोहणः ᵛवलगहनः ᵛवैष्णवान् वो युष्मान् दर्भान् अवाचीनान् स्तृणामि ॥४॥

---

15. C V1 S1 छादनम् for आच्छादनम्; V1 S1 C trans. अपि after क्रिययोः
21. H1 अत्यष्टिः for अत्यष्टयः
23. H1 after प्रोक्षामि adds प्रोहामि

र॒क्षो॒हणौ॑ वलग॒हना॒ उप॑ दधामि वैष्ण॒वी
र॒क्षो॒हणौ॑ वलग॒ह॒नौ॒ पर्यू॑हामि वैष्ण॒वी ।
वै॒ष्ण॒वम॑सि वैष्ण॒वा स्थ ॥५॥(६)॥

र॒क्षो॒हणौ॑ । र॒क्षो॒हना॒ इति॑ र॒क्षः॒ऽहनौ॑ । व॒ल॒ग॒हना॒ इति॑ व॒ल॒ग॒ऽहनौ॑ ।
उप॑ । द॒धा॒मि॒ । वै॒ष्ण॒वी इति॑ वै॒ष्ण॒वी । ५
परि॑ । ऊ॒हा॒मि॒ । वै॒ष्ण॒वी इति॑ वै॒ष्ण॒वी ।
वै॒ष्ण॒वम् । अ॒सि॒ । वै॒ष्ण॒वाः । स्थ॒ ॥ थिं ॥५॥(६)॥

सा- कात्यायनः – "अधिषवणे फलके द्व्यङ्गुल्यान्तरे प्रक्षालिते प्राची अरत्निमात्रे संतृण्णे वोपदधाति पर्यूहति च रक्षोहणौ रक्षोहणाविति" (काश्रौ ८.५.२५) इति। ययोः फलकयोरुपरि सोमोऽभिषूयते ते द्वे अधिषवणफलके, तयोर्मध्ये द्व्यङ्गुल्यवहिते ते चारत्निप्रमाणे असंतृण्णे इव दृढबन्धनरहिते १० ईषद्बन्धनोपेते तादृशी फलके चतुर्णां गर्तानामुपरि स्थापयेत्। तयोः परितो मृदा छिद्रपिधानं कुर्यात्।

तत्रायमुपधानमन्त्रः। 'रक्षोहणौ वलगहना उपदधामि वैष्णवी' इति। यावधिषवणफलकविशेषौ तौ रक्षसां 'वलगहनौ वलगविनाशकौ। 'वैष्णवी विष्णुदेवताकौ 'उपदधामि द्वयोर्गर्तयोरुपरि एकैकं फलकं स्थापयामि ॥

अथ पर्यूहणमन्त्रः – 'रक्षोहणौ वलगहनौ पर्यूहामि वैष्णवी' इति। 'पर्यूहामि मृदा १५ परितश्छादयामि। अन्यत् पूर्ववत् ॥

कात्यायनः – "तयोश्चर्माधिषवणं परिकृत्तं सर्वरोहितं निदधाति वैष्णवमसीति" (काश्रौ ८.५.२६) इति। यस्मिंश्चर्मणि सोमोऽभिषूयते तच्चर्माभिषवणाख्यम्। तस्य चर्मणोऽग्रभागः परितश्छिन्नो भवति। सर्वमपि लोहितवर्णं तादृशं चर्म तयोः फलकयोरुपरि स्थापयेत्। हे चर्म, त्वं 'वैष्णवम् 'असि २० यज्ञरक्षकविष्णुसंबन्धि भवसि ॥

कात्यायनः – "तस्मिन् ग्राव्णः पञ्च वैष्णवा स्थेति" (काश्रौ ८.५.२७) इति। निदधतीत्यनुवर्तते। तस्मिंश्चर्मणि सोमाभिषवहेतुभूतान् पञ्चसंख्याकान् पाषाणानवस्थापयेत्। हे पाषाणाः, यूयं 'वैष्णवाः 'स्थ यज्ञरक्षकविष्णुसंबन्धिनो भवथ ॥५॥

[इति पञ्चमाऽध्याये षष्ठोऽनुवाकः ॥६॥]

---

2. V1 अभ्रि° for अभि°
3. C V1 मध्यमं for मध्ये
4. C V1 मृदाच्छिद्य for मृदा छिद्र°
13. V1 S1 C after °गहनौ add : च
14. V1 after उपरि adds : पक्षे

आ– अधिषवणफले उपदधाति– ‘रक्षोहणौ वलगहनौ’ इति । राक्षसहन्तृणी वलगहन्तृणी । ᵛवैष्णवी विष्णुदेवत्ये अधिषवणफलके ᵛउपदधामि स्थापयामि । पर्यूहति– ‘रक्षोहणौ वलगहनौ वैष्णवी पर्यूहामि’ इति । परिप्रापयामि । तत्राधिषवणे चर्म निदधाति– ‘वैष्णवमसि’ इति । विष्णुदेवत्यम् ᵛअसीति । तस्मिन् [चर्मणि] ग्राव्णः पञ्च ᵛवैष्णवाः ᵛस्थ भवथ ॥५॥

[इति पञ्चमाऽध्याये षष्ठोऽनुवाकः ॥६॥]

[अथ सप्तमोऽनुवाकः]

सा– षष्ठे उपरवनिर्माणमन्त्रा उक्ताः । सप्तमे सदोनामकमण्डपस्य हविर्धानप्राचीनवंशयोर्मध्यवर्तिनो निर्माणाय मन्त्रा उच्यन्ते ।

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे॒ऽश्विनो॑र्बा॒हुभ्यां॑ पू॒ष्णो हस्ता॑भ्याम् ।
आ द॑दे॒ नार्य॑सी॒दम॒हꣳ रक्ष॑सो ग्री॒वा अपि॑ कृन्तामि ।
यवो॑ऽसि य॒वया॒स्मद् द्वेषो॑ य॒वयारा॑तीः ।
दि॒वे त्वा॒ऽन्तरि॑क्षाय त्वा पृ॒थि॒व्यै त्वा॑ ॥१॥

[दे॒वस्य॑ । त्वा॒ । स॒वि॒तुः । प्र॒स॒व इति॑ प्र॒ऽस॒वे । अ॒श्विनोः॑ । बा॒हुभ्या॒मिति॑ बा॒हुऽभ्या॑म् । पू॒ष्णः । हस्ता॑भ्याम् ।
आ । द॒दे॒ । नारि॑ । अ॒सि॒ । इ॒दम् । अ॒हम् । रक्ष॑सः । ग्री॒वाः । अपि॑ । कृ॒न्ता॒मि॒ ।]
यवः॑ । अ॒सि॒ । य॒वय॑ । अ॒स्मत् । द्वेषः॑ । य॒वय॑ । अरा॑तीः ।
दि॒वे । [त्वा॒ ।] अ॒न्तरि॑क्षाय । [त्वा॒ ।] पृ॒थि॒व्यै । त्वा॒ ॥ सो ॥१॥

कात्यायन– “औदुम्बरीं मिनोति यजमानमात्रीम् । यूपवच्छेते । अग्न्यादि करोत्याऽवस्तरणात्” (काश्रौ ८.५.३०-३२) इति । उदुम्बरवृक्षादुत्पन्नां कांचिच्छाखां सदोमण्डपमध्ये निखनेत् । सा च शाखा यजमानदेहपरिमिता सती खननात् पूर्वं यूपवद् भूमौ शयित्वा वर्तते । यथा यूपस्यावटं खनितुम् अग्निस्वीकारमारभ्य दर्भोपस्तरणपर्यन्तास्तत्तन्मन्त्रैरनुष्ठितास्तद्वदत्राप्यनुतिष्ठेदित्यर्थः ।

---

8. P1 V1 trans. षष्ठे after °मन्त्राः; S1 अभिहिताः for उक्ताः
19. P1 उप; C S1 अव for आऽव°
21. P1 शायित्वा, C S1 चयित्वा for शयित्वा; C S1 om. वर्तते
23. P1 तत्र मन्त्रैर् for तत्तन्मैत्रर्

यूपावटप्रदेशे मन्त्रविनियोगः कात्यायनेनैवमुक्तः –“ देवस्य त्वेत्यभ्रिमादाय ” (काश्रौ ६.२.८) इति । पाठस्तु– ‘ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आददे नार्यसि ’ इति । पूर्वानुवाके व्याख्यातम् ।।

कात्यायनः – “ अवटं परिलिखतीदमहमिति ” (काश्रौ ६.२.८) इति । पाठस्तु– ‘ इदमहꣳ रक्षसो ग्रीवा अपि कृन्तामि ’ इति । एतदपि पूर्वानुवाके व्याख्यातम् ॥

कात्यायनः – “ यवोऽसीत्यप्सु यवानोप्य ” (काश्रौ ६.२.१५) इति । पाठस्तु– ‘ यवोऽसि यवयास्मद् द्वेषो यवयारातीः ’ इति । हे धान्यविशेष, त्वं ᵛयवः ᵛअसि मिश्रणभूतस्य यवनस्य कर्ता भवसि । तस्मात् कारणात् ᵛद्वेषः द्वेष्टॄन् शत्रून् ᵛअस्मद् ᵛयवय अस्मत्तः पृथक्कुरु । तथा ᵛअरातीः अस्मदीयं धनमपहृत्य पुनरस्मभ्यमदातॄनपि ᵛयवय पृथक्कुरु ॥

कात्यायनः – “ प्रोक्षत्यग्रमध्यमूलानि दिवे त्वेति प्रतिमन्त्रम् ” (काश्रौ ६.२.१५) इति । तत्रायं प्रथमो मन्त्रः – ‘ दिवे त्वा ’ इति । हे औदुम्बर्यग्रभाग, त्वां ᵛदिवे द्युलोकप्रीत्यर्थं प्रोक्षामीति शेषः ॥

अथ द्वितीयः – ‘ अन्तरिक्षाय त्वा ’ इति । हे मध्यभाग, त्वाम् अन्तरिक्षलोकप्रीत्यर्थं प्रोक्षामि ॥

अथ तृतीयः – ‘ पृथिव्यै त्वा ’ इति । हे मूलभाग, त्वां पृथिवीप्रीत्यर्थं प्रोक्षामि ॥१॥

आ– इत उत्तरमौदुम्बरीमन्त्राः । अभ्रिमादत्ते– ‘ देवस्य त्वा ’ इति । व्याख्याते द्वे यजुषी । यवानावपति– ‘ यवोऽसि ’ इति । यवदेवत्या शक्वरी । यु पृथग्भावे । यौतीति ᵛयवः, यस्माद् यवनक्रियायोगात् यवनामा त्वम् ᵛअसि, अतः ᵛअस्मत् अस्मत्तः ᵛद्वेषः । द्विष अप्रीतौ । अप्रीतिर्दौर्भाग्यम् । ᵛयवय पृथक्कुरु । ᵛअरातीः अदानानि अस्मत्तः ᵛयवय पृथक्कुरु । औदुम्बरीं प्रोक्षति– ‘ दिवे त्वा ’ इति । औदुम्बरीदेवत्यानि यजूंषि । ᵛदिवे अर्थाय त्वां प्रोक्षामीति शेषः अन्तरिक्षार्थं त्वां प्रोक्षामि । ᵛपृथिव्यै त्वां प्रोक्षामि ॥१॥

शु॒न्ध॑न्ताँल्लो॒काः पि॑तृ॒षद॑नाः पितृ॒षद॑नमसि ।
उद्दिवꣳ॑ स्तभा॒नाऽन्तरि॑क्षं पृ॒ण दृꣳ॑हस्व पृथि॒व्याम् ॥२॥

शु॒न्ध॑न्ताम् । लो॒काः । पि॒तृ॒षद॑नाः । पि॒तृ॒सद॑ना॒ इति॑ पि॒तृ॒ऽसद॑नाः ।
पि॒तृ॒षद॑नम् । पि॒तृ॒सद॑न॒मिति॑ पि॒तृ॒ऽसद॑नम् । अ॒सि॒ ।
उत् । दिव॑म् । स्त॒भा॒न॒ । आ । अ॒न्तरि॑क्षम् । पृ॒ण॒ । दृꣳह॑स्व । पृ॒थि॒व्याम् ॥ जूँ ॥२॥

सा– कात्यायनः – “ अवटे शेषमासिञ्चति शुन्धन्तामिति ” (काश्रौ ६.२.१७) इति । पाठस्तु– ‘ शुन्धन्ताँल्लोकाः पितृषदनाः ’ इति । पितरः सीदन्ति येषु ते ᵛपितृषदनाः ᵛलोकाः ᵛशुन्धन्ताम् । अनेनोदकसेचनेन शुद्धा भवन्तु । खननेनोत्पन्नस्य क्रौर्यस्य शान्त्यर्थम् इदमुदकसेचनम् । तदाह तित्तिरिः – “ क्रूरमिव वा

---

1. C S1 V1 यूपावटे for यूपावट°; S1 C V1 अभिहितः for उक्तः
8. P1 om. कारणात् ; C before तस्मात् adds तत्
14. H1 औदुम्बर° for औदुम्बरी°
18. B1 उदुम्बरीं° for औदुम्बरीं; B1 उदुम्बरीं; for औदुम्बरी°

एतत् करोति यत् खनत्यपोऽवनयति शान्त्यै " (तैसं ६·३·४) इति । कात्यायनः – " बर्हींषि प्राञ्च्युदञ्चि च प्रास्यति पितृषदनमसीति " (काश्रौ ६·२·१८) इति । तस्मिन्नवटे प्रागग्रानुदगग्रांश्च दर्भानास्तृणीत । पितरः सीदन्त्युपविशन्ति यस्मिंस्तत् ᵛपितृषदनम् । हे बर्हिः, त्वं तथाविधम् ᵛअसि ।

कात्यायनः – " उद्दिवमित्युच्छ्रयति " (काश्रौ ८·१·३३) इति । उच्छ्रयणमूर्ध्वाङ्गत्वेन स्थापनम् । पाठस्तु– ' उद्दिवꣳ स्तभानाऽन्तरिक्षं पृण दृꣳहस्व पृथिव्याम् ' इति । हे औदुम्बरि, त्वं ᵛदिवं द्युलोकम् ᵛउत् ᵛस्तभान ऊर्ध्वं स्थित्वा यथा न पतति तथा द्युलोकं स्तम्भय । ᵛअन्तरिक्षम् ᵛआ ᵛपृण सर्वतः पूरय । ᵛपृथिव्यां ᵛदृꣳहस्व दृढा भव, यद्वा पृथिवीं दृढीकुरु ॥२॥

आ– अवटे शेषमासिञ्चति– ' शुन्धन्ताँल्लोकाः ' इति । पङ्क्तिः । पितरो येषु लोकेषु सीदन्ति आसते ते ᵛलोकाः ᵛपितृषदनाः । ᵛशुन्धन्तां शुद्धाः भवन्तु । बर्हींषि प्रास्यति– ' पितृषदनमसि ' इति । उष्णिक् । पितरोऽत्र सीदन्तीति ᵛपितृषदनम् । उच्छ्रयति– ' उद्दिवम् ' इति । ᵛदिवं द्युलोकं ᵛस्तभान स्तम्भय । ᵛआ ᵛअन्तरिक्षं ᵛपृण आपृण । पृ पालनपूरणयोः । अन्तरिक्षं पूरय । ᵛदृꣳहस्व ᵛपृथिव्यां पृथिवीं दृꣳहस्व, पृथिवीं दृढीकुरु ॥२॥

द्यु॒ता॒नस्त्वा॑ मारु॒तो मि॑नोतु मि॒त्रावरु॑णौ ध्रु॒वेण॒ धर्म॑णा ।
ब्र॒ह्म॒वनि॑ त्वा क्षत्र॒वनि॑ रायस्पोष॒वनि॒ पर्यू॑हामि ॥३॥

द्यु॒ता॒नः । त्वा॒ । मा॒रु॒तः । मि॒नो॒तु॒ । मि॒त्रावरु॑णौ । ध्रु॒वेण॑ । धर्म॑णा ।
ब्र॒ह्म॒वनीति॑ ब्र॒ह्म॒ऽव॒नि॑ । त्वा॒ । क्ष॒त्र॒वनीति॑ क्ष॒त्र॒ऽव॒नि॑ । रा॒य॒स्पो॒ष॒वनीति॑ रा॒य॒स्पो॒ष॒ऽव॒नि॑ ।
परि॑ । ऊ॒हा॒मि॒ ॥ थीं ॥३॥

सा– कात्यायनः – " द्युतान इति मिनोति ॥ पर्यूहणाद्योपसेचनात् कृत्वा " (काश्रौ ८·५·३४-३५) इति । पर्यूहणमारभ्योपसेचनपर्यन्तं यथा यूपे कृतं तथाऽत्रापि कुर्यात् । तस्मिन्नवटे यूपं निखनेत् । पाठस्तु– ' द्युतानस्त्वा मारुतो मिनोतु मित्रावरुणौ ध्रुवेण धर्मणा ' इति । हे औदुम्बरि, ᵛत्वा त्वां ᵛद्युतानः दीप्यमानः ᵛमारुतः वायुः ᵛध्रुवेण स्थैर्येण ᵛधर्मणा धारणेन ᵛमिनोतु प्रक्षिपतु । डुमिञ् प्रक्षेपणे । तथा ᵛमित्रावरुणौ एतन्नामकौ देवौ प्रक्षिपतामिति शेषः ॥

कात्यायनः – " पर्यूहणाद्योपसेचनात् कृत्वा " (काश्रौ ८·५·३५) इति । यथा पर्यूहणमारभ्योपसेचनपर्यन्तं यूपे कृतं तथाऽत्रापि कुर्यादित्यर्थः । तत्र यूपस्थानप्रदेशमन्त्रविनियोगः कात्यायनेनैवमुक्तः – " ब्रह्मवनि त्वेति पांसुभिः पर्यूहति " (काश्रौ ६·३·१०) इति । पाठस्तु– ' ब्रह्मवनि त्वा क्षत्रवनि

---

5. C S1 V1 पृण for आपृण
18. C °द्युपसेचमान्तं for °द्योपसेचनात्, P V1 S1 C °द्युप° for °द्योप°
19. V1 S1 C खनेत् for निखनेत्
21. V1 S1 C after प्रक्षेपणे add इति धातुः
24. V1 S1 C °प्रदेशे° for °प्रदेश°; V1 S1 C अभिहितः for उक्तः

रायस्पोषवनि पर्यूहामि ' इति । हे औदुम्बरि, ᵛत्वा त्वां ᵛपर्यूहामि परितो मृत्तिकां क्षिपामि । कीदृशीं त्वाम् ? ᵛब्रह्मवनि ब्राह्मणजातिं वनति संभजत इति ब्रह्मवनि । क्षत्रियजातिं संभजत इति ᵛक्षत्रवनि रायो धनस्य पुष्टिं संभजन इति ᵛरायस्पोषवनि । सर्वत्र " सुपां सुलुक् " (पा ७.१.३९) इति विभक्तेर्लुक् । शाखान्तरेऽपि द्वितीयान्तत्वेन स्पष्टमाम्नायते– " ब्रह्मवनिं त्वा क्षत्रवनिꣳ सुप्रजावनिं रायस्पोषवनिं पर्यूहामि " (तैसं १.३.१-१) इति ॥३॥

आ– मिनोति– ' द्युतानस्त्वा ' इति । पङ्क्तिः । द्युत दीप्तौ । ᵛद्युतानः दीप्यमानः ᵛमारुतः वायुः ᵛत्वा त्वां ᵛमिनोतु । डुमिञ् प्रक्षेपणे । प्रक्षिपतु । ᵛध्रुवेण ᵛधर्मणा स्थैर्येण धर्मेण । ᵛमित्रावरुणौ मिनुतां प्रक्षिपताम् । पर्यूहति– ' ब्रह्मवनि त्वा ' इति । बृहती । ᵛब्रह्मवनि । " वनसनरक्षिमथाम् " (पा ३.२.२७) इतीन् प्रत्ययः । ब्रह्म वनोति संभजत इति ब्रह्मवनि । ᵛत्वा त्वां ᵛपर्यूहामि । ऊह वितर्के । परिपूर्वस्य पूरणमर्थः, परिपूरयामि । ᵛक्षत्रवनि त्वां पर्यूहामि । ᵛरायस्पोषवनि त्वां पर्यूहामि ॥३॥

ब्रह्म॑ दृꣳह क्ष॒त्रं दृ॒ꣳहाऽऽयु॑र्दृꣳह प्र॒जां दृꣳह ।
ध्रु॒वाऽसि॑ ध्रु॒वो॒ऽस्मिन् यज॑मान आ॒यत॑ने भूयात् ।
घृ॒तेन॑ द्यावापृथिवी॒ पूर्ये॑था॒मिन्द्र॑स्य छ॒दिर॑सि विश्वज॒नस्य॑ छा॒या ॥४॥

ब्रह्म॑ । दृ॒ꣳह॒ । क्ष॒त्रम् । आयु॑ः । प्र॒जामिति॑ प्र॒ऽजाम् । दृ॒ꣳह॒ ।
ध्रु॒वा । आ॒सि॒ । ध्रु॒वः । अ॒स्मिन् । यज॑मानः । आ॒यत॑न॒ इत्या॒ऽयत॑ने । भू॒या॒त् ।
घृ॒तेन॑ । द्या॒वा॒पृ॒थि॒वी इति॑ द्यावापृथिवी । पू॒र्ये॒था॒म् । इन्द्र॑स्य । छ॒दिः । आ॒सि॒ ।
वि॒श्व॒ज॒नस्येति॑ वि॒श्व॒ऽज॒नस्य॑ । छा॒या ॥ ध्याः ॥४॥

सा– कात्यायनः – " ब्रह्म दृꣳहेति मैत्रावरुणदण्डेन समन्तं त्रिः पर्यूषति (काश्रौ ६.३.११) इति । परितो दृढीकुर्यादित्यर्थः ।

पाठस्तु– " ब्रह्म दृꣳह क्षत्रं दृꣳहायुर्दृꣳह प्रजां दृꣳह " इति । हे औदुम्बरि, ब्राह्मणजातिं क्षत्रियजातिमायुष्यं पुत्रादिरूपां प्रजां च दृढीकुरु ॥

कात्यायनः – " ध्रुवाऽसीति वाचयत्यौदुम्बरीमालभ्य (काश्रौ ८.५.३६) इति । आरम्भणं स्पर्शनम् । पाठस्तु– ' ध्रुवाऽसि ध्रुवोऽस्मिन् यजमान आयतने भूयात् ' इति । हे औदुम्बरि, त्वं ᵛध्रुवा

---

1. V1 S1 C परिक्षिपामि for क्षिपामि
2. V1 S1 C वनस्पतिं for वनति
4. V1 S1 C om. द्वितीयान्तत्वेन
7. H1 धर्मणा for धर्मेण
9. B1 om. ब्रह्म ... °वनि,
19. P1 V1 S1 समन्ततः, C समन्तः for समन्तं; P1 C V1 S1 पर्यूहति for पर्यूषति

ᵛअसि स्थिरा भवसि । त्वमिव ᵛयजमानः ᵛअस्मिन् लोके स्वकीये ᵛआयतने ᵛध्रुवः ᵛभूयात् स्थिरो भवतु ॥

कात्यायनः – "द्विशाखे जुहोति घृतेन द्यावापृथिवी इति" (द्र. काश्रौ ८.५.३ :) इति । औदुम्बर्याः संबन्धिनि यस्मिन् प्रदेशे द्विशाखोत्पत्तिस्तत्र जुहुयात् । पाठस्तु– 'घृतेन द्यावापृथिवी पूर्येथाम्' इति । हूयमानेनानेन ᵛघृतेन द्यावापृथिव्यौ सर्वतः पूरिते भवतम् ॥

कात्यायनः – "इन्द्रस्य छदिरिति मध्यमं छदिरारोप्य" (काश्रौ ८.६.१०) इति । औदुम्बरीनिखननादूर्ध्वं सदोनामकं मण्डपं निर्माय तस्योपरि प्रावरणार्थं मध्यमं कटमारोपयेत् । पाठस्तु– 'इन्द्रस्य छदिरसि विश्वजनस्य छाया' इति । छदिशब्देन तृणनिर्मितः कट उच्यते । हे तृणनिर्मित, त्वम् ᵛइन्द्रस्य ᵛछदिः ᵛअसि इन्द्रसंबन्धी कटो भवसि । अतस्त्वं प्रावरणाय सदोमध्यवर्तिनः ᵛविश्वजनस्य यजमानर्त्विग्रूपस्य सर्वप्राणिच्छाया भूयादिति शेषः । सदस इन्द्रदेवताकत्वेन त्वदीयच्छदिषः इन्द्रसंबन्धित्वम् ॥४॥

आ– पर्यूषति 'ब्रह्म दृꣳह' इति । 'ब्रह्म दृꣳह' इत्यादयश्चत्वारो मन्त्राः दैवी पङ्क्तयः । ᵛब्रह्म ᵛदृꣳह दृढीकुरु । ᵛक्षत्रं ᵛदृꣳह ᵛआयुः ᵛदृꣳह ᵛप्रजां दृꣳह । आलभ्य वाचयति 'ध्रुवाऽसि' इति । अत्यष्टिः । यथा त्वं ᵛध्रुवा ᵛस्थिरा ᵛअसि तथा ᵛअस्मिन् लोके ᵛआयतने स्थाने ᵛयजमानः अयं ᵛध्रुवः प्रजया पश्वादिभिश्च स्थिरः ᵛभूयात् । विशाखे जुहोति 'घृतेन द्यावापृथिवी' इति । द्यावापृथिवीदेवत्या त्रिष्टुप् । हे द्यावापृथिवी द्यावापृथिव्यौ, युवां ᵛपूर्येथां पूरिते भवथ । सदसि छादिमभिनिदधाति – 'इन्द्रस्य छदिः' इति । इन्द्रदेवत्या शक्वरी । ᵛइन्द्रस्य ᵛछदिः, छादयतीति छदिः ᵛअसि । छदिशब्दो गृहवचनः । ᵛविश्वजनस्य विश्वे सर्वे जना यस्य स विश्वजनः, तस्य इन्द्रस्य ᵛछाया, छायाशब्दोऽपि गृहवचनः, अथवा विश्वजनस्य सर्वप्राणिजातस्य छाया असि आश्रयोऽसि ॥४॥

परि॑ त्वा गिर्वणो॒ गिर॑ इ॒मा भ॑वन्तु वि॒श्वत॑ः ।
वृ॒द्धायु॒मनु॒ वृद्ध॑यो॒ जुष्टा॑ भवन्तु॒ जुष्ट॑यः ॥५॥

परि॑ । त्वा॒ । गि॒र्व॒ण॒ः । गिर॑ः । इ॒माः । भ॒व॒न्तु॒ । वि॒श्वत॑ः ।
वृ॒द्धायु॒मिति॑ वृ॒द्धऽआ॑युम् । अनु॑ । वृद्ध॑यः । जुष्टा॑ः । भ॒व॒न्तु॒ । जुष्ट॑यः । खीं ॥५॥

---

3. C V1 S1 विशाखे for द्विशाखे
5. C V1 S1 भवेताम् for भवतम्
9. P C S1 °संबान्धि for °संबन्धी
15. B1 om. अयं
14. B1 H1 पूरितौ for पूरिते; B1 अधि° for अभि
20. H1 om. आश्रयोऽसि

सा– कात्यायनः – "परि त्वेति परिवार्य" (काश्रौ ८·६·१२) इति । परितः कुड्यवदावरणं कृत्वेत्यर्थः । पाठस्तु– 'परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः । वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः' इति । गीर्भिः स्तुतिभिर्वननीयो भजनीय इति इन्द्रः सदोऽभिमानी गिर्वणाः । "इन्द्रो वै गिर्वाः" (माशब्रा ३·६·१·२४) इति श्रुतेः । सान्तोऽयम् । 'गिर्वणसे अङ्गिरस्वत्' इति दर्शनात् । हे 'गिर्वणः, 'इमाः स्तोत्रशस्त्ररूपा 'गिरः त्वां सर्वतः कटरूपेण 'परिभवन्तु वेष्टयन्तु । कीदृश्यः ? 'वृद्धायुम् 'अनु 'वृद्धयः दीर्घायुषं त्वामनु स्वयमपि बुद्धिमत्यः । किं च 'जुष्टयः अस्मत्सेवास्तव 'जुष्टाः प्रियाः 'भवन्तु ॥५॥

आ– परिश्रयति 'परि त्वा' इति । ऐन्द्री, अनिरुक्ता त्रिष्टुप् । मधुच्छन्दा ऋषिः । हे 'गिर्वणः हे इन्द्र, 'इमाः 'गिरः ऋग्यजुःसामलक्षणा वाचः 'त्वा 'विश्वतः 'परिभवन्तु परिगृह्णन्तु । कथंभूतं त्वाम् ? ताश्च कथंभूता इति । वृद्धायुमनु वृद्धयः । वृद्धाः । आयव इति मनुष्यनाम । वृद्धा आयवो मनुष्यलक्षणाः यस्येन्द्रस्य स तथोक्तः । तं 'वृद्धायुम् 'अनु 'वृद्धयः । सवनक्रमेणानुवृद्धा गिरो वाचः । यद्वा वृद्धश्चासौ आयुश्चेति वृद्धायुः तम् । महामनुष्यं वृद्धयः वाचस्त्वां परिगृह्णन्तु । किं च 'जुष्टयः प्रीतयः प्रीतिकराश्च त्वया 'जुष्टाः सेविता 'भवन्तु ॥५॥

इन्द्र॑स्य॒ स्यूर॒सीन्द्र॑स्य ध्रु॒वो॑ऽसि ।
ऐ॒न्द्रम॑सि वैश्वदे॒वम॑सि ॥६॥ (७)॥

इन्द्र॑स्य । स्यूः । [अ॒सि॒ । इन्द्र॑स्य ।] ध्रु॒वः । [अ॒सि॒]
ऐ॒न्द्रम् । [अ॒सि॒] । वै॒श्व॒दे॒वमिति॑ वै॒श्वऽदे॒वम् । अ॒सि॒ ॥ खे ॥६॥ (७)॥

सा– कात्यायनः – "परिषीवणग्रन्थ्यभिमर्शनान्यैन्द्रैः" (काश्रौ ८·६·१२) इति । इन्द्रदेवताकैस्त्रिभिर्मन्त्रैः परिषीवणादित्रयं कुर्यात् । तत्रायं प्रथमः – 'इन्द्रस्य स्यूरसि' इति । हे रज्जो, त्वं सदोऽभिमानिदेवस्य 'इन्द्रस्य संबन्धिनी सती 'स्यूः 'असि ग्रन्थिसिद्ध्यर्थं स्यूता भवसि ॥

अथ द्वितीयः – 'इन्द्रस्य ध्रुवोऽसि' इति । हे ग्रन्थे, त्वम् इन्द्रसंबन्धी भूत्वा स्थिरो भवसि ॥

अथ तृतीयः – 'ऐन्द्रमसि' इति । हे सदः, त्वम् इन्द्रसंबन्धि भवसि ॥

कात्यायनः – "हविर्धानापरान्तमुत्तरेणाग्नीध्रमग्न्यगारं निष्ठाय [च्य] वैश्वदेवमसीत्यालभते" (द्र. काश्रौ ८·६·१३-१४) इति । हविर्धानमण्डपस्यापरान्तो वायव्यकोणस्तस्योत्तरभागे किंचिदाग्नीध्रनामकमग्निस्थानं कृत्वा तस्य स्पर्शनं कुर्यात् । हे आग्नीध्र, त्वं 'वैश्वदेवम् 'असि सर्वदेवसंबन्धि भवसि ॥६॥(७)॥

[इति पञ्चमाध्याये सप्तमोऽनुवाकः]

---

3. C S1 om. गीर्भिः ... भजनीय इति; V1 S1 C; om. इन्द्रो ... दर्शनात् (L. 4)
5. V1 S1 C om. वृद्धायुमनु वृद्धयः
11. H1 महावृद्धम् अवृद्धत्वयो for महामनुष्यं वृद्धयः [L 12]
22. P1 om. अथ तृतीयः ... भवसि

आ– आग्नीध्रं स्पृशति– 'इन्द्रस्य स्यूरसि' इति। त्रीण्यैन्द्राणि गायत्राणि । चतुर्थं वैश्वदेवं बार्हतम् । ᵛइन्द्रस्य ᵛस्यूः । षिवु तन्तुसंताने । सीव्यत्यनेनेति स्यूरिति क्रतुसंतानविस्तारकः ᵛअसि । ᵛइन्द्रस्य ᵛध्रुवः ᵛअसि स्थैर्यधर्माऽसि । ᵛऐन्द्रम् ᵛअसि इन्द्रस्य संबन्ध्यसि । ᵛवैश्वदेवम् ᵛअसि वैश्वदेवदेवत्यमसि ॥६॥(७)॥

[इति पञ्चमेऽध्याये सप्तमोऽनुवाकः ॥७॥]

[अथाष्टमोऽनुवाकः]

सा– सप्तमे सदोनिर्माणमन्त्रा उक्ताः । अष्टमे धिष्ण्यनिर्माणमन्त्रा उच्यन्ते ।

वि॒भूर॑सि प्र॒वाह॑णो॒ वह्नि॑रसि हव्य॒वाह॑नः ।
श्वा॒त्रो॑ऽसि॒ प्रचे॑तास्तु॒थो॑ऽसि वि॒श्ववे॑दाः ॥१॥

वि॒भूरिति॑ वि॒ऽभूः । अ॒सि॒ । प्र॒वा॒ह॑णः । प्र॒वा॒ह॑न॒ इति॑ प्र॒ऽवाह॑नः ।
वह्नि॑ः । [अ॒सि॒ ।] ह॒व्य॒वाह॑न॒ इति॑ ह॒व्य॒ऽवाह॑नः ।
श्वा॒त्रः । प्रचे॑ता॒ इति॒ प्रऽचे॑ताः । तु॒थः । वि॒श्ववे॑दा॒ इति॑ वि॒श्वऽवे॑दाः ॥ श्रं ॥१॥

कात्यायनः – "धिष्ण्यान्निवपति... विभूरसीति प्रतिमन्त्रम्" (काश्रौ ८.६.१५) इति । अग्नीनामाश्रयभूताः, मृत्तिकया निर्मिताः स्वल्पवेदिका धिष्ण्या इत्युच्यन्ते । चात्वाले खातया मृत्तिकया धिष्ण्यान् निर्वपेत् । तदाह तित्तिरिः – "धिष्णियानुप वपति" (तैसं ६.३.१) इति । तत्रायं धिष्ण्यार्थः प्रथमो मन्त्रः – 'विभूरसि प्रवाहणः' इति । विभूशब्दप्रवाहणशब्दावग्नीध्रधिष्ण्यस्य नामनी । "सर्वे द्विनामानः" (काशब्रा ४.६.२.१३) इति कण्वेनोक्तत्वात् । हे आग्नीध्रधिष्ण्य, त्वं ᵛविभूः ᵛप्रवाहणः च ᵛअसि । विविधभवनात् विभूः । एतस्मादेव धिष्ण्यादितरधिष्ण्येष्वग्निविहरणादेतस्य विविधभवनं द्रष्टव्यम् । हविषः प्रवाहणपरत्वात् प्रवाहणत्वम् । एतस्य मन्त्रस्य आग्नीध्रधिष्ण्यविषयत्वं बौधायनः स्पष्टीचकार– "आग्नीध्रं द्रुत्वा स्फ्येनोद्धत्यावोक्ष्य चात्वालात् पुरीषं सिकता इति निवपति विभूरसि प्रवाहणः" (बौश्रौ ६.२९) इति ।

अथ द्वितीयो मन्त्रः – 'वह्निरसि हव्यवाहनः' इति । यज्ञकर्मणो निर्वाहकत्वात् वह्नित्वम् । देवान् प्रति हव्यप्रापणात् हव्यवाहनत्वम् । यथाऽग्नीध्रधिष्ण्यस्य नामद्वयमुक्तं तथा होतृधिष्ण्यस्या-

---

13. S1 C धिष्ण्यानि for धिष्ण्यान्; P1 धिष्ण्यां निवपति for धिष्ण्यान् निवपति
14. P1 °भूत° for भूता; V1 S1 C धिष्ण्यानि for धिष्ण्याः P1 उच्यते for उच्यन्ते
15. V1 S1 C चात्वाला धिष्ण्यानु वपति
19. S1 बोधायनः for बौधायनः
22. V1 S1 C om. मन्त्रः

प्वोक्तनामद्वयं द्रष्टव्यम् । धिष्ण्यगतानग्नीन् प्रति अन्ये देवाः प्रत्येकं नामद्वयं संपादयतेत्यूचुः । तदाह तित्तिरिः – "तान् देवा अब्रुवन् द्वे द्वे नामनी कुरुध्वम्" (तैसं ६.३.१) इति । होतृमैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकानां षण्णां संबन्धिनो धिष्ण्यान् सदसि कुर्यात् । तदाह कात्यायनः – "षट् सदसि" (काश्रौ ८.६.१८) इति ॥

अथ तृतीयः – 'श्वात्रोऽसि प्रचेताः' इति । ᵛश्वात्रः मित्रः ᵛप्रचेताः वरुणः । हे मैत्रावरुणधिष्ण्य, अनेन नामद्वयेन युक्तोऽसि ॥

अथ चतुर्थः – 'तुथोऽसि विश्ववेदाः' इति । तुथशब्देन देवान् प्रति दक्षिणानां विभागकर्ता पुरुष उच्यते । "तुथो ह स्म वै विश्ववेदा देवानां दक्षिणा वि भजति" (तैसं ६.६.१) इति तित्तिरिणोक्तत्वात् । विश्वं वेत्तीति ᵛविश्ववेदाः सर्वज्ञः । हे ब्राह्मणाच्छंसिधिष्ण्य, यथोक्तनामद्वयवानसि ॥१॥

आ–इत उत्तरं षोडशधिष्ण्यमन्त्राः । "ते वै द्विनामानो भवन्ति" (शब्रा ३.६.२.२४) इति श्रुतेः । आद्यानाम् [अष्टानां] धिष्ण्या अग्नयो देवताः । आद्यद्वितीये निचृदनुष्टुभौ । तृतीया गायत्री । ᵛत्रिभूः ᵛअसि आग्नीध्र. । [ᵛवह्निः ᵛअसि ᵛहव्यवाहनः] होता । [ᵛश्वात्रः ᵛअसि ᵛप्रचेताः] प्रशास्ता । ब्राह्मणाच्छंसिनः ᵛतुथः ᵛअसि ब्रह्माऽसि । "ब्रह्म वै तुथः" (माशब्रा ४.३.४.१५) इति श्रुतेः । ᵛविश्ववेदाः सर्वज्ञः सर्वधनो वा ॥१॥

उशिगसि कविरङ्घारिरसि बम्भारिः ।
अवस्यूरसि दुवस्वाञ्छुन्ध्यूरसि मार्जालीयः ॥२॥

उशिक् । कविः । अङ्घारिः । बम्भारिः ।
अवस्यूः । दुवस्वान् । शुन्ध्यूः । मार्जालीयः ॥ श्यो ॥२॥

सा– अथ पञ्चमः – 'उशिगसि कविः' इति । ᵛउशिक् कमनीयः । ᵛकविः विद्वान् । हे पोतृधिष्ण्य, यथोक्तनामद्वयवान् ᵛअसि ॥

अथ षष्ठः – 'अङ्घारिरसि बम्भारिः' इति । द्युलोके सोमरक्षकौ द्वौ अङ्घारिबम्भारी । तथा च सोमरक्षकविषयमन्त्रे "स्वान भ्राजाङ्घारे बम्भारे" (मासं ४.१७) इत्याम्नातम् । तयोर्नामद्वयमस्मिन्नेष्ट्रीयधिष्ण्ये इत्युपचर्यते ॥

अथ सप्तमः – 'अवस्यूरसि दुवस्वान्' इति । एतौ शब्दौ वायुविशेषवाचकौ । "अवस्यवे त्वा वाताय दुवस्यवे त्वा वाताय स्वाहा" (तैआ ४.९) इति मन्त्रान्तरे समाम्नानात् । तदेतन्नामद्वयमच्छावाकधिष्ण्यद्वये उपचर्यते । तान् होत्रादिधिष्ण्यान् सदसि निर्माय वेदेर्दक्षिणभागे मार्जालीयधिष्ण्यो निर्मातव्यः । "दक्षिणे वेद्यन्ते मार्जालीयं निवपति" (बौश्रौ ६.२९) इति बौधायनेनोक्तत्वात् ।

---

7. V1 C तुरीयः for चतुर्थः
11. धिष्ण्या अग्निदेवत्या :– we have corrected this as धिष्ण्या अग्नयो देवताः
13. H1 प्रशस्ता for प्रशास्ता
20. V1 S1 C पौत्र्य°, P1 पौतृ° for पोतृ°
25. P1 समाम्नातत्वात् for समाम्नानात्

अथाष्टमः – ‘शुन्ध्यूरसि मार्जालीयः’ इति । ^{v}शुन्ध्यूः शोधकः पात्रप्रक्षालनेन लेपमार्जनस्थानभूतः ^{v}मार्जालीयः । तदेतन्मार्जालीयधिष्ण्यस्य नामद्वयम् ॥२॥

आ– ^{v}उशिक् ^{v}असि । वश कान्तौ । कान्तोऽसि । ^{v}कविः क्रान्तदर्शनः । अङ्घारिः । अंहः [-शब्दस्य] हकारस्य छान्दसो घकारः । अङ्घः, तस्यारिः ^{v}अङ्घारिः । डुभृञ् धारणपोषणयोरित्यस्य रूपं बम्भेति । तस्यारिः ^{v}बम्भारिः । आश्रयाशः । अवस्यूरसि दुवस्वान् । अवस् अन्नम् । तदिच्छतीति क्यपि कृते औणादिके ऊ-प्रत्यये च कृते ^{v}अवस्यूः इति भवति । दुवस् इति हविर्नाम, तद्वान् ^{v}दुवस्वान् हविष्मान् । शुन्ध्यूर असिः । शुन्धि शुद्धौ । अत्रापि क्यपि ऊ-प्रत्यये च कृते ^{v}शुन्ध्यूः इति भवति । शोधकः । मार्जालीयः । मृजू शुद्धौ । अस्य रूपं ^{v}मार्जालीयः इति भवति ॥२॥

ऋतधामाऽसि स्वर्ज्योतिः समुद्रोऽसि विश्वव्यचाः ।
अजोऽस्येकपादहिरसि बुध्न्यः ॥३॥

ऋतधामेत्यृतऽधामा । स्वर्ज्योतिरिति स्वःऽज्योतिः । समुद्रः । विश्वव्यचा इति विश्वऽव्यचाः । अजः । एकपादित्येकऽपात् । अहिः । बुध्न्यः । ओ ॥३॥

सा– कात्यायनः –“सदोद्वारं पूर्वेण तिष्ठन्ननुदिशत्यौदुम्बरिब्रह्मासनशालाद्वार्यप्राजहिताहवनीयबहिष्पवमानदेशचात्वालशामित्रोत्करान् ऋतधामेति प्रतिमन्त्रम्” (द्र.काश्रौ ८.६.२३) इति । सदोद्वारस्य पूर्वभागेऽवस्थाप्यौदुम्बर्यादीनृतधामेत्यादिभिर्नवभिर्मन्त्रैः क्रमेण निर्दिशेत् । तत्रायं प्रथमः – ‘ऋतधामाऽसि स्वर्ज्योतिः’ इति । हे औदुम्बरि, त्वम् ^{v}ऋतधामा सामगानामृतमवश्यंभावि धामोपवेशनस्थानं यस्यास्तादृशी । सामगा ह्यौदुम्बरीं स्पृष्ट्वोद्गायन्ति । ^{v}स्वर्ज्योतिः उन्नतत्वेन स्वर्गे प्रकाशिका ॥

अथ द्वितीयः – ‘समुद्रोऽसि विश्वव्यचाः’ इति । हे ब्रह्मासनप्रदेश, त्वं ^{v}समुद्रः ^{v}असि । सर्वे देवाः सम्यगुत्कर्षेण द्रवन्त्यत्रेति समुद्रः । विश्वं सर्वं यज्ञं व्यचति गच्छतीति ^{v}विश्वव्यचाः ॥

अथ तृतीयः – ‘अजोऽस्येकपात्’ इति । हे प्राचीनवंशद्वारवर्तिस्तम्भ, त्वम् ^{v}अजः ^{v}असि । अजति यज्ञप्रदेशेषु गच्छतीति अजः । अथवा परब्रह्मत्वोपचारेण न जायत इति अजः । सर्वाणि भूतान्येकः पादो यस्यासौ ^{v}एकपात् । तथा च श्रुत्यन्तरम्- “पादोऽस्य विश्वा भूतानि” (कासं ३५.३) इति ॥

अथ चतुर्थः – ‘अहिरसि बुध्न्यः’ इति । प्राचीनवंशस्य पश्चिमभागवर्ती पुरातनो गार्हपत्योऽग्निः प्राजहित इत्युच्यते । हे प्राजहित, त्वम् ^{v}अहिः ^{v}असि । न हीयत इति अहिः । शालाद्वारीये नूतने गार्हपत्ये समुत्पन्नोऽयमग्निः स्वरूपेण न हीयते । बुध्नो मूलं, तत्र भवः ^{v}बुध्न्यः । आधानकाले प्रथममाहितत्वात् मूलभावित्वमुपपन्नम् ॥३॥

---

5. H1 भरण° for धारण°

6. H1 अनदिच्छति, B1 अनन्तदिच्छति for अन्नं तदिच्छति

15. C V1 S1 अक्षरात्; B1 अक्षरान्, we have corrected this as °त्रोत्करान् ।

आ– ‘ ऋतधामाऽसि ’ इति । औदुम्बरीदेवत्या अनुष्टुप् । ^{v}ऋतधामा ^{v}असि ऋतस्य यज्ञस्य धाम स्थानमसि । ‘ स्वर्ज्योतिः ’ इति । आदित्योऽसि । ‘ समुद्रोऽसि ’ इति । ब्रह्मेशानदेवत्याऽनुष्टुप् । ^{v}समुद्रः ^{v}असि । सर्वे देवाः सर्वाणि भूतानि यस्मात् समुद्रवन्ति इति समुद्रः असि । ^{v}विश्वव्यचाः । विश्वं यज्ञं व्यचति गच्छतीति विश्वव्यचाः ।। ‘ अजोऽसि ’ इति । शालाद्वार्यदेवत्या पाङ्क्तः । अज गतिक्षेपणयोः । अजति गच्छतीति ^{v}अजः । सर्वाणि भूतान्येकः पादो यस्य सः ^{v}एकपात् । न हीयत इति ^{v}अहिः । बुध्न्यः । बुध्नं मूलम् । तत्र भवः ^{v}बुध्न्यः ^{v}असि ॥३॥

सम्राळसि कृशानुः परिषद्योऽसि पवमानः ।
नभोऽसि प्रतक्वा मृष्टोऽसि हव्यसूदनः ॥४॥

सम्राळिति सम्ऽराट् । कृशानुः । परिषद्यः । परिसद्य इति परिऽसद्यः । पवमानः । नभः । प्रतक्वेति प्रऽतक्वा । मृष्टः । [असि ।] हव्यसूदन इति हव्यऽसूदनः ॥श्रौ॥४॥

अथ पञ्चमः – ‘ सम्राळसि कृशानुः ’ इति । उत्तरवेदिगत हे आहवनीय, बहुविधाहुत्याधारत्वेन सम्यग् राजनात् ^{v}सम्राट् ^{v}असि । पयोव्रतादिभिः कृशं यजमानमनुगच्छतीति ^{v}कृशानुः ॥

अथ षष्ठः – ‘ परिषद्योऽसि पवमानः ’ इति । हे बहिष्पवमानदेश, त्वं ^{v}परिषद्यः ^{v}असि । स्तोतुं समेतानामृत्विजां परिषत् । तद्योग्यः, अत एव शुद्धत्वात् ^{v}पवमानः इति ॥

अथ सप्तमः – ‘ नभोऽसि प्रतक्वा ’ इति । हे चात्वाल, त्वं ^{v}नभः ^{v}असि । खनने छिद्ररूपत्वात् आकाशत्वम् । ^{v}प्रतक्वा प्रकृष्टगमनयुक्तः । कृष्णविषाणत्यागार्थं हि चात्वालः प्रकर्षेण गम्यते ॥

अथाष्टमः – ‘ मृष्टोऽसि हव्यसूदनः ’ इति । शामित्रशब्देन पशुविशसनप्रदेश उच्यते । हे शामित्र, त्वं ^{v}मृष्टः ^{v}असि । क्रियमाणस्य पशुविशसनस्य विहितत्वेनाशुद्धिहेतुत्वाभावात् सत्यपि विशसने शुद्धोऽसि । हव्यस्य हृदयजिह्वादिरूपस्य हविषः सूदनः पाकहेतुरसि ॥४॥

आ– इत उत्तरमनुदिशत्याहवनीयम् । ‘ सम्राळसि ’ इति । ‘ सम्राळसि ’ इत्यादीनि चत्वारि यजूंषि आहवनीयदेवत्यानि । सम्यग्राजत इति ^{v}सम्राट् संगतदीप्तिः । कृशानुः, पयोव्रतादिभिरुपक्षीणं कृशं यजमानमनुगच्छतीति ^{v}कृशानुः । परिषद्योऽसि । बहिष्पवमानदेशदेवत्यम् ।

---

1. H1 औदुम्बर° for औदुम्बरी°
5. B1 शनोद्वय° H1 शातोद्वार्य for शालाद्वार्य°; B1 om. गच्छति
16. V1 S1 C ताच्छिद्र° for छिद्र°
17. P1 V1 °युक्ता for °युक्तः
19. S1 C हेतुत्वात् for °हेतुत्वाभावात्
22. H1 संघसंप्रद्° for संगत°
23. H1 om. °देश°

ᵛपरिषद्यः परिसदनीयः ¹ ᵛअसि । पवमानः । पवत इति ᵛपवमानः । नभोऽसि । न भातीति ᵛनभः, आकाशरूपो वा नभः । प्रतक्वा । तकतिः गत्यर्थः । प्रकर्षेण तकति गच्छतीति ᵛप्रतक्वा । ᵛमृष्टः ᵛअसि शुद्धोऽसि । ᵛहव्यसूदनः । सूद एव सूदनः सूपकारः । हव्यस्य हविषः पक्ता हव्यसूदनः ॥४॥

---

९ समूह्योऽसि विश्ववेदा ऊनातिरिक्तस्य प्रतिष्ठा ।
अग्नयः सगराः सगरा स्थ सगरेण नाम्ना रौद्रेणानीकेन ।
पात माऽग्नयः पिपृत माऽग्नयो नमो वोऽस्तु मा मा हिꣳसिष्ट ॥५॥ (८)॥

समूह्य इति सम्ऽऊह्यः । विश्ववेदा इति विश्वऽवेदाः ।
ऊनातिरिक्तस्येत्यूनऽअतिरिक्तस्य । प्रतिष्ठा । प्रतिस्थेति प्रतिऽस्था ।
अग्नयः । सगराः । सगराः । स्थ । सगरेण । नाम्ना । रौद्रेण । अनीकेन ।
पात । मा । अग्नयः । पिपृत । मा । अग्नयः ।
नमः । वः । अस्तु । मा । मा । हिꣳसिष्ट ॥ ध्रुः ॥५॥ (८) ॥

सा – अथ नवमः – 'समूह्योऽसि विश्ववेदाः' इति । वेदिगतस्य वर्जनीयस्य तृणादेः प्रक्षेपस्थानमुत्कर इत्युच्यते । हे उत्कर, त्वं तृणादिसमूहयोग्यत्वात् ᵛसमूह्यः ᵛअसि । विश्वं परित्यक्ततृणादिकं सर्वं वेत्तीति ᵛविश्ववेदाः । तदेवं 'विभूरसि' इत्यारभ्य 'विश्ववेदाः' इत्यन्ताः सप्तदश मन्त्रा उक्ताः । तेषां सर्वेषां प्रत्येकं शेषभूतः 'ऊनातिरिक्तस्य' इत्यादिको मन्त्रभागः । यद्यपि कात्यायनः –"रौद्रेण इति सर्वत्र" (काश्रौ ८·६·१७) इति उवाच, न 'ऊनातिरिक्तस्य' इति, तथापि 'रौद्रेण' इति अस्याङ्गस्योपलक्षणत्वात् 'ऊनातिरिक्तस्य' इत्यादिकः सर्वोऽपि मन्त्राणामुक्तानां शेष इति द्रष्टव्यम् । पाठस्तु– 'ऊनातिरिक्तस्य प्रतिष्ठा । अग्नयः सगराः सगरा स्थ सगरेण नाम्ना रौद्रेणानीकेन । पात माऽग्नयः पिपृत माऽग्नयो नमो वोऽस्तु मा मा हिꣳसिष्ट' इति । 'विभूरसि' इत्यादिभिः प्रतिपादिता ये धिष्ण्यरूपा अग्नयस्ते सर्वकर्मणि ᵛऊनातिरिक्तस्य न्यूनातिरिक्तांशस्य ᵛप्रतिष्ठा स्थितिहेतवः संपूर्तिकारिणः । विहितस्यैकदेशस्य परित्यागे न्यूनता भवति । अविहितस्यापि कस्यचिदनुष्ठानेऽतिरिक्तं भवति । तदुभयविधदोषपरिहारेण कर्मणः संपूर्तिमेतेऽग्नयः कुर्वन्तीत्येतेषां प्रतिष्ठा । ते च ᵛअग्नयः ᵛसगराः समानस्तुतयः । गृ स्तुतौ । सर्वेषां द्विनामत्वात् समानस्तुतित्वम् । हे अग्नयः, यूयं ᵛसगरेण ᵛनाम्ना सगर इत्यनेन शब्देन सर्वे व्यवह्रियमाणत्वात् ᵛसगराः ᵛस्थ सगरशब्दाभिधेया भवथ । ते यूयम् ᵛअग्नयः ᵛरौद्रेण ᵛअनीकेन

---

1. B1 after °सदनीयः adds परिषद्यः
17. P1 न्यून for ऊन°
21. V1 S1 C सर्वे for सर्व°; P1 om. ऊनातिरिक्तस्य
22. P1 एव अंशस्य for एकदेशस्य; V1 S1 C कर्म न्यूनं for न्यूनता; V1 S1 C अधिकस्य for अविहितस्य
24. V1 S1 C after स्तुतौ add इति धातुः

शत्रुविनाशकत्वात् उग्रेण भवदीयेन सैन्येन ^{v}मा ^{v}पात मां रक्षत । हे ^{v}अग्नयः, मां ^{v}पिपृत धनादिभिर्मां पूरयत । ^{v}वः युष्मभ्यं ^{v}नमः ^{v}अस्तु नमस्कारो भवतु । ^{v}मा ^{v}मा ^{v}हिंसिष्ट अनुष्ठातारं मां मा वधिष्ट ॥५॥ (८) ॥

[इति पञ्चमेऽध्यायेऽष्टमोऽनुवाकः]

आ– एवं ‘ समूह्योऽसि ’ । समूहे भवः ^{v}समूह्यः ^{v}असि । विश्ववेदाः । विश्वं वेत्तीति वेदयतीति वा ^{v}विश्ववेदाः । ^{v}ऊनातिरिक्तस्य । विहिते ऊनं न्यूनं, तत्र अतिरिक्तम् । तस्य ^{v}प्रतिष्ठा, तयोः संपूर्णतया स्थितिः प्रतिष्ठा । हे ^{v}अग्नयः ^{v}सगराः । गॄ स्तुतौ । गरः स्तुतिः । समानाः समानस्तुतयः ^{v}स्थ भवथ । ये यूयं समानस्तुतयो भवथ । ते ^{v}सगरेण ^{v}नाम्ना अभिहिताः सन्तः ^{v}अग्नयः, यूयं ^{v}मा ^{v}पात इति संबन्धः । सर्वेषां धिष्ण्या इति समानम् । सगरेण स्तुतियुक्तेन नाम्ना ^{v}रौद्रेण ^{v}अनीकेन । रुद्रदेवत्येन रौद्रेण । हे अग्नयः, मा मां पात पालयत । हे ^{v}अग्नयः ^{v}मा मां ^{v}पिपृत धनादिभिर्मां पूरयत मां सर्वतः संपूर्णं कुरुत । नमो वोऽस्तु । ^{v}वः युष्मभ्यं ^{v}नमः ^{v}अस्तु । किं च–मा मा हिंसिष्ट । तृहि हिसि हिंसायाम् । ^{v}मा मां ^{v}मा ^{v}हिंसिष्ट हिंसां मा कार्षिष्ट ॥५॥ (८) ॥

[इति पञ्चमाध्यायेऽष्टमोऽनुवाकः]

[अथ नवमोऽनुवाकः]

सा– अष्टमे धिष्ण्यनिर्माणमन्त्रा उक्ताः । नवमे वैसर्जनहोमादिमन्त्रा उच्यन्ते ।

ज्योति॑रसि वि॒श्वरू॑पं॒ विश्वे॑षां दे॒वाना॑ꣳ स॒मित् ।
त्वꣳ सो॑म तनू॒कृद्भ्यो॒ द्वेषो॑भ्यो॒ऽन्यकृ॑तेभ्यः ।
उ॒रु य॒न्ताऽसि॒ वरू॑थ॒ꣳ स्वाहा॑ ।
जु॒षा॒णो अ॒प्तुराज्य॑स्य वे॒तु॒ स्वाहा॑ ॥१॥

ज्योतिः॑ । अ॒सि॒ । वि॒श्वरू॑प॒मिति॑ वि॒श्वऽरू॑पम् ।
वि॒श्वे॑षाम् । दे॒वाना॑म् । स॒मिदिति॑ स॒म्ऽइत् ।

---

1. C om. सैन्येन, P1 सौम्येन for सैन्येन
2. P1 om. नमस्कारो भवतु
5. B1 तं न्यूनी तत्रातिक्रान्तस्य for ऊनं ... तस्य; H1 तत्र for तस्य
8. B1 नाम सर्वे प्रत्येन for सगरेण ... नाम्ना [L 9]
9. B1 मुखेन च for रुद्र° ... रौद्रेण
12. H1 om. हिंसां मा कार्षिष्ट

त्वम् । सोम । तनूकृद्भ्य इति तनूकृतऽभ्यः ।
द्वेषोभ्य इति द्वेषःऽभ्यः । अन्यकृतेभ्य इत्यन्यऽकृतेभ्यः ।
उरु । यन्ता । असि । वरूथम् । स्वाहा ।
जषाणः । अप्तुः । आज्यस्य । वेतु । स्वाहा ॥फ्रा॥१॥

कात्यायनः - "आज्याधिश्रयणस्रुक्संमार्जनोद्वासनावेक्षणानि कृत्वा" (काश्रौ ८.६.३१) इति । तत्राधिश्रितस्य आज्यस्य ग्रहणार्थोऽयं मन्त्रः - 'ज्योतिरसि विश्वरूपं विश्वेषां देवानाᳬ समित्' इति । हे आज्य, त्वं 'विश्वरूपं 'ज्योतिः 'असि । बहुध्वाहुतिषूपयुक्तत्वाद्विश्वरूपत्वं, दीप्यमानत्वाज्ज्योतिष्ट्वम् । 'विश्वेषां 'देवानां 'समित् असि सम्यग्दीपकमसि । देवा ह्याज्यं स्वीकृत्य दीप्यन्ते ॥

कात्यायनः - "त्वᳬ सोमेति प्रचरण्याऽभिजुहोति" (काश्रौ ८.७.१) इति । जुहूरिव सोमसाधनभूता काचित् प्रचरणीत्युच्यते । पाठस्तु- 'त्वᳬ सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यः । उरु यन्ताऽसि वरूथᳬ स्वाहा' इति । तनुं शरीरं कृन्तन्ति छिन्दन्तीति तनूकृन्ति रक्षांसि । द्विषन्तीति द्वेषांसि । अन्यैरस्मद्विरोधिभिः पृथिव्यां सततं विचरद्भिः कृतानि प्रेरितानि इत्यन्यकृतानि । हे 'सोम, 'त्वं तादृशेभ्यः 'यन्ता नियन्ता 'असि । यथा तादृशानि नोऽस्मान्न बाधन्ते तथाऽस्मानन्यत्र सुरक्षितप्रदेशे स्थापयित्वा पालयसि । तस्मात् त्वमेवास्माकम् 'उरु प्रभूतं 'वरूथं बलमसि । तस्मै तुभ्यं 'स्वाहा इदं हुतमस्तु । शालामुखीयो योऽग्निर्यश्च तस्याग्नेः समीपे स्थापितः सोमस्तदुभयमाग्नीध्रादिप्रदेशेषु नीत्वा पश्चादाग्नीषोमीयपशुरारब्धव्यः । ततः सोमं नेतुं तमुद्दिश्यासावाज्याहुतिर्हुता ॥

कात्यायनः - "जुषाणो अप्तुरिति द्वितीयम्" (काश्रौ ८.७.२) इति । जुहोतीत्यनुवर्तते । पाठस्तु- 'जुषाणो अप्तुराज्यस्य वेतु स्वाहा' इति । हे सोम, त्वं 'जुषाणः अस्मासु प्रीतिमान् रक्षसो मर्दनाय 'अप्तुः अल्पदेहः सन् 'आज्यस्य 'वेतु आज्यं पिब । तदेवेदं हुतमस्तु ॥१॥

आ - पृषदाज्यं गृह्णाति- 'ज्योतिरसि' इति । वैश्वदेवं यजुः । अज गतिक्षेपणयोः । [यथा आज्यस्त्वात्?] आज्य, त्वं ᵛज्योतिः ᵛअसि । वैचित्र्यात् विश्वं सर्वं रूपमसि, एवं ᵛविश्वेषां ᵛदेवानां त्वं ᵛसमित् ᵛअसि सन्धिनमसि ॥

वैसर्जनानि जुहोति- 'त्वं सोम' इति । भार्गवी सौमी गायत्री अनवसाना । हे ᵛसोम, यानि अन्यकृतानि द्वेषांसि, ये तनूकृतश्च तेभ्यस्तेभ्यो मां त्वं गोपायेत्यध्याहारः । कृती छेदने । तनूः शरीरं कृन्तन्ति छिन्दन्ति [इति] एते तनूकृतः । तेभ्यो मां गोपाय । ᵛद्वेषोभ्यः अप्रीतिभ्यः ।

---

6. C after मन्त्रः adds पाठस्तु
8. C S1 दीप्यन्ताम् for दीप्यन्ते
14. V1 S1 C after तस्मै add वरूथं … … स्वाहा
16. P1 हुतं हुत्वा for °हुतिर्हुता
18. V1 S1 C रक्षसामदर्शनाय for रक्षसो मर्दनाय [L 19]
23. B1 विसर्जनानि for वैसर्जनानि
24. H1 अत्य for अन्य°; B1 येन for ये
25. B1 तन्न शरीरकृतं निकृतं सि छिन्दान्ति, H1 तनूः शरीरं कृन्ततीति निकृन्ति छिन्दान्ति, we corrected this.

अन्यैर्दुर्जनैः कृतेभ्यो मां गोपाय। ᵛउरु ᵛयन्ता ᵛअसि बहुप्रकारं नियन्ता असि। अतः ᵛवरूथं गृहं यज्ञरूपं च मे गोपाय। यद्वा ᵛतनूकृद्भ्यः। तन्वा शरीरेण क्रियन्ते यानि द्वेषांसि, अन्यकृतानि च पुत्रदारप्रभृतिभिः कृतानि द्वेषांसि च। तेभ्यो गोपाय। द्वितीयं जुहोति– 'जुषाणः' इति। अप्तुदेवत्या। एकपदा विराट् यजुरन्ता। ᵛअप्तुः चात्र सोमः। ᵛजुषाणः [सेवमानः] प्रीयमाणो वा। अप्तुः, व्यत्ययः (?), अप्ता सोमः। ᵛआज्यस्य आज्यं ᵛवेतु पिबतु। स्वाहा ॥१॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥२॥

अग्ने। नय। सुपथेति सुऽपथा। राये। अस्मान्। विश्वानि। देव। वयुनानि। विद्वान्।
युयोधि। अस्मत्। जुहुराणम्। एनः।
भूयिष्ठाम्। ते। नमउक्तिमिति नमःऽउक्तिम्। विधेम ॥छ्॥२॥

सा– कात्यायनः – "अग्ने नयेति वाचयति" (काश्रौ ८.७.६) इति। पाठस्तु– 'अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम' इति। हे ᵛअग्ने हे ᵛदेव, ᵛविश्वानि ᵛवयुनानि ᵛविद्वान् सर्वान् मार्गानभिजानानस्त्वम् ᵛअस्मान् अनुष्ठातॄन् ᵛराये धनलाभाय ᵛसुपथा ᵛनय शोभनमार्गेण प्रापय। ᵛजुहुराणं कुटिलं फलप्रतिबन्धकं यद् ᵛएनः पापमस्ति तत्सर्वम् ᵛअस्मत् ᵛयुयोधि अनुष्ठातृभ्यः पृथक्कुरु। ᵛते तुभ्यं ᵛभूयिष्ठाम् अतिबहुलां ᵛनमउक्तिं नमस्कारविषयां वाचं ᵛविधेम संपादयामः ॥२॥

आ– वाचयति– 'अग्ने नय' इति। आग्नेयी त्रिष्टुबगस्त्यः। हे भगवन् ᵛअग्ने ᵛदेव देवनादिगुणयुक्त, ᵛविश्वानि सर्वाणि ᵛवयुनानि प्रज्ञानानि ᵛविद्वान् मदनुष्ठितानि जानन् ᵛअस्मान् ᵛसुपथा शोभनेन मार्गेण ᵛनय प्रापय। कस्मै ? ᵛराये धनाय यज्ञफलाय फलभागायेत्यर्थः। किं च ᵛयुयोधि, यु पृथग्भावे, अस्य रूपं युयोधीति। हुर्च्छा कौटिल्ये इत्यस्य धातोः सनादौ च कृते कुटिलीकर्तुमिच्छतीत्यस्मिन्नर्थे ᵛजुहुराणम् इति भवति। ᵛएनः पापम्। अभिलषितविशिष्टक्रियाफलं कुटिलीकर्तुं समर्थं यत् पापम्। पुण्यफलभोगप्रतिबन्धकमित्यर्थः। अतस्तत् जुहुराणम्

---

2. B1 वरूथ्यं for वरूथं
4. H1 अब्देवत्या for अप्तुदेवत्या; B1 वमुनामानि,
13. H1 गुणयुक्तानि we have corrected as वयुनानि
20. H1 °बाधाय for °भागाय
22. B1 पापस्थलमिव for पापम् अभिलषित°
23. H1 °फलयोः for °फलभोग°

एनः अस्मत्तः युयोधि पृथक्कुरु । ᵛभूयिष्ठां बृहत्तमां (बहुतमां ?) ᵛनमउक्तिं, नम इत्यन्ननाम । वच परिभाषणे । उक्तिः भाषणम् । नमसा हविर्लक्षणेन अभ्युद्यतेन । पुरोवाक्यायाज्यावचनं नमउक्तिस्तां ᵛविधेम करवाम ॥२॥

अयं नो अग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् ।
अयं वाजाञ्जयतु वाजसाता अयꣳ शत्रूञ्जयतु जर्हृषाणः स्वाहा ॥३॥

अयम् । नः । अग्निः । वरिवः । कृणोतु । अयम् । मृधः । पुरः । एतु । प्रभिन्दन्निति प्रऽभिन्दन् ।
अयम् । वाजान् । जयतु । वाजसाता इति वाजऽसातौ ।
अयम् । शत्रून् । जयतु । जर्हृषाणः । स्वाहा ।.ब्रौं॥३॥

सा - कात्यायनः – "उत्तरेण सदो हृत्वाग्नीध्रेऽग्निं निदधाति । ग्रावद्रोणकलशसोमपात्राणि च । अयं न इति जुहोति" (काश्रौ ८.७.७-९) इति । शालामुखीयमग्निं ग्रावादीनि च सदस उत्तरभागे नीत्वा आग्नीध्रमण्डपे निधाय तत्रत्यधिष्ण्यगतेऽग्नावाज्येन जुहुयात । पाठस्तु– 'अयं नो अग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् । अयं वाजान् जयतु वाजसाता अयꣳ शत्रूञ्जयतु जर्हृषाणः स्वाहा' इति । ᵛअयम् ᵛअग्निः ᵛनः अस्माकं ᵛवरिवः धनं ᵛकृणोतु । ᵛअयम् एवाग्निः ᵛमृधः संग्रामान ᵛपुरः अग्रतः ᵛप्रभिन्दन् वैरिणो विदारयन् ᵛएतु गच्छतु । ᵛअयम् एवाग्निः ᵛवाजसातौ संग्रामे ᵛवाजान् शत्रुसंबन्धीन्यन्नानि अस्मभ्यं दातुं ᵛजयतु । ततः ᵛअयम् अग्निः ᵛजर्हृषाणः अत्यर्थं हृष्यन् ᵛशत्रून् ᵛजयतु । तस्मै ᵛस्वाहा ॥३॥

आ– वाचयति– 'अयं नः' इति । आग्नेयी त्रिष्टुप् यजुरन्ता अगस्त्यः । ᵛअयम् ᵛअग्निः ᵛनः अस्माकं ᵛवरिवः धनं ᵛकृणोतु करोतु । ᵛअयम् एवाग्निः ᵛमृधः संग्रामान् ᵛपुरः अग्रतः ᵛप्रभिन्दन् वैरिणो विदारयन् ᵛएतु गच्छतु । ᵛअयम् एवाग्निः ᵛवाजान् अन्नानि ᵛजयतु । अन्नानि स्ववशं कृत्वा तान्यस्मभ्यं ददात्विति शेषः । ᵛवाजसातौ संग्रामे ᵛअयम् एवाग्निः ᵛजर्हृषाणः अत्यर्थं हृष्यन् ᵛशत्रून् ᵛजयतु ॥३॥

उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि ।
घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वाहा ॥४॥

उरु विष्णो ॥ [द्र. १६१ पृष्ठे]

सा– कात्यायनः – "उरु विष्ण इति जुहोति" (काश्रौ ८.७.१५) इति । पूर्वमन्त्रेणाग्नीध्रीये होमः । अनेन त्वाहवनीये । पाठस्तु– 'उरु विष्णो वि क्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब

---

11. S1 C V1 तत्रत्ये for तत्रत्य
15. S1 C V1 om. तस्मै स्वाहा

प्रप्र यज्ञपतिं तिर स्वाहा ' इति । हे ᵛविष्णो व्यापिन्नाहवनीय, अस्मदनुग्रहार्थम् ᵛउरु ᵛविक्रमस्व शत्रुषु बहुलं पराक्रमं कुरु । ᵛनः अस्माकं ᵛक्षयाय निवासार्थं ᵛउरु ᵛकृधि कुरु बहुलं गृहधनादिकं संपादय । घृतेन ज्वालोद्भवा योनिर्घृतयोनिः । हे ᵛघृतयोने, हूयमानमिदं ᵛघृतं ᵛपिब । ᵛयज्ञपतिं च यजमानं ᵛप्रप्र ᵛतिर अतिशयेन वर्धय । “ प्रसमुपोदः पादपूरणे ” (पा ८.१.६) इति द्विर्भावः ॥४॥

आ— आहवनीये जुहोति— ' उरु विष्णो ' इति । वैष्णवी अनुष्टुप् यजुरन्ता । हे ᵛविष्णो, ᵛउरु महत् ᵛविक्रमस्व पादविक्षेपं कुरु । व्याप्नुहीति वा । ᵛनः अस्माकं ᵛक्षयाय निवासस्थानाय । ᵛउरु विस्तीर्णं शरीरं ᵛकृधि । अथवा क्षयाय ब्रह्मगृहनिवासाय नः अस्मान् उरु पृथु ब्रह्म ब्रह्मीभूतान् कुरु । किं च ᵛघृतयोने हे भगवन्नग्ने, ᵛघृतं ᵛपिब । प्रप्र यज्ञपतिं तिर । तिरतिर्वृद्ध्यर्थः । ᵛयज्ञपतिं यजमानं पुत्रपश्वादिभिः । ᵛप्रप्र इत्यभ्यासस्त्वादरार्थः । प्र ᵛतिर वर्धय । ᵛस्वाहा इति होमार्थः ॥४॥

देव॑ सवितरे॒ष ते॒ सोम॒स्तꣳ र॑क्षस्व॒ मा त्वा॑ दभन् ।
ए॒तत् त्वं दे॑व सोम दे॒वो दे॒वाँ उपा॑गाः ।।५।।
इ॒दम॒हं म॑नु॒ष्या॑न्त्स॒ह रा॒यस्पोषे॑ण॒ स्वाहा॒ निर्वरु॑णस्य॒ पाशा॑न्मुच्ये ।
अग्ने॑ व्रतपा॒स्त्वे व्र॑तपाः ।।६।।
या तव॑ त॒नूर्मय्यभू॑दे॒षा सा त्वयि॒ या मम॑ त॒नूस्त्वय्यभू॑दि॒यꣳ सा मयि॑ ।
य॒था॒य॒थं नौ॑ व्रतपते व्र॒तान्यनु॒ मे दी॒क्षां दी॒क्षाप॑ति॒रम॒ꣳस्तानु॒ तप॒स्तप॑स्पतिः
।।७।।(९)।।

देव॑ । स॒वि॒तः॒ । ए॒षः । ते॒ । सोमः॑ । तम् । र॒क्ष॒स्व॒ । मा । त्वा॒ । द॒भ॒न् ।
ए॒तत् । त्वम् । दे॒व॒ । सो॒म॒ । दे॒वः । दे॒वान् । उप॑ । अ॒गा॒ः ॥ ठ्लों ॥५॥
इ॒दम् । अ॒हम् । म॒नु॒ष्या॑न् । स॒ह । रा॒यः । पोषे॑ण । स्वाहा॑ ।
निः । वरु॑णस्य । पाशा॑त् । मु॒च्ये॒ ।
अग्ने॑ । व्र॒त॒पा॒ इति॑ व्रतऽपाः । त्वे इ॒ति॒ त्वे । व्र॒त॒पा॒ इति॑ व्रतऽपाः ॥ढयूं॥६॥
या । तव॑ । त॒नूः । मयि॑ । अभू॑त् । ए॒षा । सा । त्वयि॑ ।
या । मम॑ । त॒नूः । त्वयि॑ । अभू॑त् । इ॒यम् । सा । मयि॑ ।
य॒था॒य॒थमिति॑ य॒था॒ऽय॒थम् । नौ॒ । व्र॒त॒प॒त॒ इति॑ व्रतऽपते । व्र॒तानि॑ ।

---

2. V1 S1 C बहुधनादिकं for बहुलं गृहधनादिकं;
3. C ज्वालेद्भवाद् for ज्वालोद्भवा; V1 S1 C om. योनिर्; P1 om. च
4. V1 S1 C om. प्रसमुपोदः ... द्विर्भावः

अनु । मे । दीक्षाम् । दीक्षापतिरिति दीक्षाऽपतिः । अमꣳस्त ।
अनु । तपः । तपस्पतिः । तपःपतिरिति तपःऽपतिः ॥ द्वौ ॥७॥(९)॥

सा– कात्यायनः – " दक्षिणेऽनसि कृष्णाजिनमास्तीर्य तस्मिन्त्सोमं निदधाति देव सवितरिति " (काश्रौ ८.७.१७) इति । दक्षिणे शकटे कृष्णाजिनस्यास्तरणं कृत्वा तस्मिन् सोमं निदध्यात् । पाठस्तु– 'देव सवितरेष ते सोमस्तꣳ रक्षस्व मा त्वा दभन्' इति । हे सवितः सर्वस्य प्रेरक देव, एषः सोमः ते तवार्पितः । तं तादृशं सोमं रक्षस्व पालय । मा त्वा दभन् एवंभूतस्य पातारं त्वामसुरा मा हिंसिषुः ॥

कात्यायनः – " एतत् त्वमिति विसृज्योपतिष्ठते " (काश्रौ ८.७.१८) इति । कृष्णाजिने स्थापितं बद्धं सोमं विस्रस्योपस्थानं कुर्यात् । पाठस्तु– 'एतत त्वं देव सोम देवो देवाँ उपागाः । इदमहं मनुष्यान्त्सह रायस्पोषेण' इति । हे सोम देव, त्वं देवः सन् भवदीयान् देवान् एतदिदानीं उपागाः प्राप्तोऽसि । अहं मनुष्यो यजमानो मदीयान् मनुष्यान् इदम् इदानीं सह रायः पोषेण पश्वादिधनेन सार्धं प्राप्तोऽस्मि ॥

कात्यायनः – " स्वाहा निरिति निष्क्रम्य " (काश्रौ ८.७.१९) इति । हविर्धानमण्डपान्निर्गत्येत्यर्थः । पाठस्तु– 'स्वाहा निर्वरुणस्य पाशान्मुच्ये' इति । स्वाहा सोमरूपमन्नं देवेभ्यो दत्तमस्तु । अनेन सोमप्रदानेन अहं वरुणस्य पाशात् निर्मुच्ये निर्मुक्तोऽस्मि ॥

कात्यायनः – " अग्ने व्रतपा इत्याहवनीये समिधमाधाय " (काश्रौ ८.७.१९) इति । पाठस्तु– 'अग्ने व्रतपास्त्वे व्रतपाः । या तव तनूर्मय्यभूदेषा सा त्वयि या मम तनूस्त्वय्यभूदियꣳ सा मयि । यथायथं नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिरमꣳस्तानु तपस्तपस्पतिः' इति । हे अग्ने, व्रतपाः स्वभावतः सर्वेषां व्रतानां पालकोऽसि. तस्मात् कारणादिदानीमपि त्वे त्वमेव व्रतपाः, त्वं मदीयस्य व्रतस्य पालको भवेति शेषः । शाखान्तरे तु त्वमित्येव पठितम् । " अग्ने व्रतपते त्वं व्रतानां पतिरसि " इति । पूर्वत्र 'आपतये' (काण्वसं ८.२.१) इत्यनुवाके यजमानोऽग्निशरीरस्वशरीरयोर्व्यत्ययं कृत्वा स्वकीयव्रतपालनं प्रार्थयामास । इदानीं व्रतस्य पालितत्वात् तं व्यत्ययं परिहृत्य स्वशरीरस्वीकाराभिप्रायेण 'अग्ने व्रतपाः या तव तनूः' इत्यादिमन्त्रभागं पठति । हे अग्ने, व्रतपालनप्रार्थनकाले तव संबन्धिनी या तनूः मयि अभूत् मय्यवस्थिता सा एषा तनूरद्य त्वयि अवतिष्ठताम् । किंच या मम तनूः त्वयि अवस्थिता सा इयम् अद्य मयि अवतिष्ठताम् । हे व्रतपते, व्रतपालकाग्ने, नौ व्रतानि आवयोः कर्माणि यथायथं स्वस्वसंबन्धमनतिक्रम्य अवतिष्ठन्तामिति शेषः । अनुष्ठानरूपं व्रतं ममास्तु । तत्पालनरूपं

---

6. V1 S1 C रक्ष for रक्षस्व
9. V1 S1 C विस्रंस्य for विस्रस्य
16. V1 before कात्यायनः add अथ
19. S1 V1 C om. कारणात्; P1 with marking on the margin above त्वे ... सुपां सुलुगिति शे इत्यादेशः; P1 om. त्वमेव
20. S P1 पठितः for पठितम्
21. P1 स्वशरीरं प्रार्थयति स्म । एवं कृत्वा स्वं for स्वशरीरयोर्व्यत्ययं कृत्वा
24. V1 S1 C om. किं च ... अवतिष्ठताम् । (L. 25)

तवास्तु इत्यर्थः । ^{v}मे ^{v}दीक्षां मदीयदीक्षार्थं नियमं ^{v}दीक्षापतिः दीक्षायाः पालकोऽग्निः ^{v}अनु ^{v}अमंस्त अनुमतवानङ्गीकृतवानित्यर्थः । ^{v}तपस्पतिः तपसः पालकोऽग्निः ^{v}तपः ^{v}अनु मदीयं तपोऽनुमतवान् ॥५-७॥

[इति पञ्चमेऽध्याये नवमोऽनुवाकः]

आ– सोमं निदधाति– ‘देव सवितः’ इति । सावित्री द्विपदा पङ्क्तिः । हे ^{v}देव, ^{v}सवितः ^{v}एषः ^{v}सोमः ^{v}ते तवार्पितः । ^{v}तं तवार्पितं सोमं ^{v}रक्षस्व गोपाय । ^{v}मा ^{v}त्वा दभन् सोमकर्मणि प्रवृत्तं त्वां सवितारम् असुराः मा दभन् । दभ्नोतिर्हिंसार्थः वधकर्मा । वधं मा कुर्वन् ॥

यजमान उपतिष्ठते– ‘एतत् त्वं देव’ इति । सौमी द्विपदा गायत्री । हे ^{v}सोम, एष ^{v}त्वं ^{v}देवः सन् ^{v}देवान् सोमार्हान् ^{v}उपागाः उपगतोऽसि ॥५॥

अभिनयेन दर्शयति– ‘इदमहम्’ इति । लिङ्गोक्तदेवत्यं यजुः । ^{v}इदम् ^{v}अहम् अयमहं ^{v}सह ^{v}रायस्पोषेण धनस्य पोषणेन सह ^{v}मनुष्यान् उपगच्छेयम् । ^{v}स्वाहा स्वस्त्या आह्वानमस्तु । निर्वरुणस्य पाशात् । अनेन सोमप्रदानेन ^{v}वरुणस्य ^{v}पाशात् ^{v}निर्मुच्ये निर्मुक्तोऽस्मि ॥

समिधमादधाति– ‘अग्ने व्रतपाः’ इति । आग्नेयं यजुः । हे ^{v}अग्ने, स्वभावतस्त्वं ^{v}व्रतपाः कर्मपालकः, अतस्त्वं मम ^{v}व्रतपाः ॥६॥

यजमानोऽग्निशरीरेणात्मशरीरस्य व्यत्ययं कृत्वा स्वाभिमतार्थसिद्ध्यर्थमभिवदति– ‘या तव तनूर्मय्यभूदेषा सा त्वयि’ इति । हे ^{v}अग्ने, ^{v}तव ^{v}या ^{v}तनूः ^{v}सा ^{v}एषा तनूः ^{v}मयि ^{v}अभूत् भूयात् ^{v}त्वयि । त्वदीया ^{v}मयि ^{v}या ^{v}मम ^{v}तनूः ^{v}सा ^{v}इयं ^{v}त्वयि ^{v}अभूत् । एवं मदीया त्वयि । एवं ^{v}व्रतपते, ^{v}नौ आवयोः ^{v}यथायथं यथास्वं ^{v}व्रतानि कर्माणि सन्तु । किं च– अनु मे दीक्षां दीक्षापतिरमंस्त । ^{v}दीक्षापतिः सोमः मम ^{v}दीक्षाम् ^{v}अनु ^{v}अमंस्त अनुमतवान् । अनु तपस्तपस्पतिः । ^{v}तपस्पतिः अपि सोमः मम तपः उपसदः अन्वमंस्त अनुमतवान् ॥७॥

[इति पञ्चमेऽध्याये नवमोऽनुवाकः]

---

1. S1 C V1 मदीयां दीक्षां दीक्षार्थं for मदीयदीक्षार्थं; C स्वम्, V1 सु for अनु
2. P1 तपोऽत्र for तपोऽनु
6. H1 om. असुराः
16. B1 om. त्वदीया मयि
17. H1 om. दीक्षापतिरमंस्त
19. B1 after °सदः adds : सदा

[अथ दशमोऽनुवाकः]

सा– नवमे वैपर्जनहोमादिमन्त्रा उक्ताः । दशमे यूपसंपादनमन्त्रा उच्यन्ते ।

उरु विष्णो वि क्रमस्वोरु क्षयाय नस्कृधि ।
घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वाहा ॥१॥

[उरु । विष्णो इति विष्णो । वि । क्रमस्व । उरु । क्षयाय । नः । कृधि ।
घृतम् । घृतयोन इति घृतऽयोने । पिब ।
प्रप्रेति प्रऽप्र । यज्ञपतिमिति यज्ञऽपतिम् । तिर । स्वाहा ॥१॥]

कात्यायनः – "गृहेषु । यूपाहुतिं जुहोति चतुर्गृहीतं स्रुवेणोरु विष्णविति" (द्र. काश्रौ ६.१.३.४) इति । स्वगृहेष्ववस्थाय चतुर्वारं गृहीतमाज्यं स्रुवेण जुहुयात् । सेयं यूपाहुतिः । पाठस्तु– 'उरु विष्णो वि क्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वाहा' इति । पूर्वानुवाके व्याख्यातः ॥१॥

आ– यूपाहुतिः -- 'उरु विष्णो' इति । व्याख्यातो मन्त्रः ॥१॥

अत्यन्याँ३ अगां नान्याँ३ उपागाम् ।
अर्वाक् त्वा परेभ्यः परोऽवरेभ्यः ॥२॥
तं त्वा जुषामहे देव वनस्पते देवयज्यायै ।
देवास्त्वा देवयज्यायै जुषन्तां विष्णवे त्वा ॥३॥

अति । अन्यान् । अगाम् । न । अन्यान् । उप । अगाम् ।
अर्वाक् । त्वा । परेभ्यः । परः । अवरेभ्यः ॥स्थि॥२॥
तम् । त्वा । जुषामहे । देव । वनस्पते । देवयज्याया इति देवऽयज्यायै ।
देवाः । त्वा । देवयज्याया इति देवऽयज्यायै । जुषन्ताम् । विष्णवे । त्वा ॥चिं॥३॥

सा– कात्यायनः – "आज्यशेषमादाय सतक्षा गच्छति । यूपमभिमृशत्यत्यन्यानिति । प्राङ् तिष्ठन्नभिमन्त्रयते वा" (काश्रौ ६.१.५.६) इति । यूपस्य तक्षणार्थं गत्वा यूपमभिमृशेदभिमन्त्रयेद्वा । पाठस्तु– 'अत्यन्याँ३ अगां नान्याँ३ उपागाम् । अर्वाक्त्वा परेभ्यः परोऽवरेभ्यः । तं त्वा जुषामहे देव वनस्पते देवयज्यायै । देवास्त्वा देवयज्यायै जुषन्ताम्' इति । वृक्षाः द्विविधाः यूप्या अयूप्याश्च [इति] । पलाशखदिरादयो यूप्याः । निम्बजम्बीरादयस्त्वयूप्याः । हे पुरोवर्तियूप्यवृक्ष, त्वत्तः 'अन्यान् कांश्चिद्यूप्यानपि

---

23. P1 S1 V1 C यूपा अयूपाः – we have corrected this as : यूप्या अयूप्याः
24. P1 S1 V1 C यूपवृक्ष – we have corrected this as : यूप्यवृक्ष

समप्रदेशजन्मादिलक्षणरहितानहम् ᵛअति ᵛअगाम। ᵛअन्यान त्वयूप्यान् ᵛन ᵛउपागाम्। कीदशम्? ᵛअर्वाक् ᵛपरेभ्यः उत्कृष्टेभ्यो लक्षणेभ्यः प्रत्यासन्नम्। तल्लक्षणयुक्तमित्यर्थः। पुनः कीदशम्? ᵛपरः ᵛअवरेभ्यः अत्यन्तनिकृष्टेभ्यो लक्षणेभ्यो दूरवर्तिनं, तद्रहितमित्यर्थः। किं च हे ᵛवनस्पते ᵛदेव तस्य पालक दीप्यमानवृक्ष, ᵛतं तादशं त्वां ᵛदेवयज्यायै देवयागार्थं ᵛजुषामहे वयं सेवामहे। ᵛदेवाः अपि देवयागार्थं त्वां सेवन्ताम्॥

कात्यायनः – "स्रुवेणोपस्पृशति विष्णवे त्वेति" (काश्रौ ६·१·११) इति। हे यूपवृक्ष, ᵛत्वा त्वां ᵛविष्णवे यज्ञार्थमुपस्पृशामीति शेषः। "यज्ञो वै विष्णुः" (काशब्रा ३·२·३-३) इति श्रुतेः॥२-३॥

आ– यूपमभिमृशति– 'अत्यन्यान्' इति। वनस्पतिदेवत्या गायत्री। ᵛअति ᵛअन्यान् *-अगात्– अत्र व्यत्ययः अगामिति-*। त्वत्तः ᵛअन्यान् यूपलक्षणसंपन्नानपि वृक्षान् ᵛअत्यगाम् अतिक्रान्तवानासि (स्मि?)। ᵛन ᵛअन्यान् ᵛउपागाम्। यूपलक्षणलक्ष्येषु साधारणान् न उपागां नोपगतोऽस्मि। ᵛपरेभ्यः उत्कृष्टेभ्यश्च ᵛअर्वाक् तेभ्योऽर्वाक् स्थितं त्वाम् उपागां त्वामेवोपगतोऽस्मि॥२॥

'तं त्वा' इति। वनस्पतिदेवत्या अनुष्टुप्। यो यूपलक्षणसंपन्नो वृक्षः तं त्वा जुषामहे। हे ᵛदेव हे ᵛवनस्पते, ᵛतं ᵛत्वा यूपीकर्तुं ᵛजुषामहे। ᵛदेवयज्यायै देवयागाय। किं च ᵛदेवाः च ᵛदेवयज्यायै देवयागाय त्वां वनस्पतिं ᵛजुषन्तां सेवन्तां॥

उपस्पृशति– 'विष्णवे त्वा'। यज्ञार्थं त्वामुपस्पृशामीति शेषः॥३॥

ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः।
दिवं मा लेखीरन्तरिक्षं मा हिꣳसीः पृथिव्या सं भव॥४॥

ओषधे। त्रायस्व। स्वधित इति स्वऽधिते। मा। एनम्। हिꣳसीः।
दिवम्। मा। लेखीः। अन्तरिक्षम्। मा। हिꣳसीः। पृथिव्या। सम्। भव॥गूं॥४॥

सा– कात्यायनः – "ओषध इति कुशतरुणं तिरस्कृत्य" (काश्रौ ६·१·१२) इति। यूपवृक्षस्य कुशमन्तर्धानं कुर्यात्। 'त्रायस्व' इति मन्त्र शेषः। हे ᵛओषधे, ᵛत्रायस्व मां स्वधितिभयात् रक्ष॥

कात्यायनः – "स्वधित इति परशुना प्रहरति" (काश्रौ ६·१·१२) इति। पाठस्तु– 'स्वधिते मैनꣳ हिꣳसीः' इति। हे ᵛस्वधिते परशो, ᵛएनं यूपं ᵛमा ᵛहिꣳसीः मा वधीः॥

---

1. S1 V1 C अयूपान्, P1 यूपान् we have corrected this as : अयूप्यान्;
 P1 अन्याँश्च for अन्यान् तुं
2. P1 कीदशः for कीदशम्
3. C before देव add हे
9. *-* [वस्तुतस्त्वत्र 'अगाम्' इत्येव संहितायां पाठोऽस्ति। ततः किं व्यत्ययेन?]
10. H1 नान्यानास्मि for असि

कात्यायनः – " दिवं मा लेखीरिति पतन्तमभिमन्त्रयते " (द्र. काश्रौ ६.१.१६) इति । पाठस्तु– ' दिवं मा लेखीरन्तरिक्षं मा हिꣳसीः पृथिव्या संभव ' । हे यूपवृक्ष, त्वं पतन् ᵛदिवं द्युलोकं ᵛमा ᵛलेखीः मा हिꣳसीः । अन्तरिक्षलोकं च ᵛमा ᵛहिꣳसीः । ᵛपृथिव्या ᵛसंभव पृथिव्या सह संगतो भव । यूपस्य वज्ररूपत्वात् । अतो लोकानां शान्तिराशास्यत इत्यभिप्रायः ॥४॥

आ– कुशतरुणमन्तर्दधाति– ' ओषधे त्रायस्व ' इति । कुशतरुणदेवत्यं यजुः । हे ᵛओषधे ᵛत्रायस्व । स्वधितिभयात् इति शेषः । प्रहरति– ' स्वधिते ' इति व्याख्यातम् । पतन्तमभिमन्त्रयते– ' दिवं मा लेखीः ' इति । लिख अक्षरविन्यासे । इह तु हिंसार्थः । ᵛदिवं द्युलोकं ᵛमा ᵛलेखीः मा हिꣳसीः । ᵛअन्तरिक्षम् अन्तरिक्षलोकं ᵛमा ᵛहिꣳसीः । ᵛपृथिव्या सह ᵛसंभव पृथिव्या संगतो भव, वज्ररूपत्वात् यूपस्य । अतो लोकानां शान्तिराशास्यते इत्यभिप्रायः ॥४॥

अ॒यं हि त्वा॒ स्वधि॑ति॒स्तेति॑जानः प्र॒णि॒नाय॑ म॒हते॒ सौभ॑गाय ।
अत॒स्त्वं॑ दे॑व वनस्पते श॒तव॑ल्शो॒ वि रो॑ह स॒हस्र॑वल्शा॒ वि व॒यꣳ रु॑हेम ।।५।।(१०)।।

अ॒यम् । हि । त्वा॒ । स्वधि॑ति॒रिति॒ स्वऽधि॑तिः । तेति॑जानः ।
प्र॒णि॒नाय॑ । प्र॒नि॒नायेति॑ प्र॒ऽनि॒नाय॑ । म॒ह॒ते । सौभ॑गाय ।
अत॑ः । त्वम् । दे॒व॒ । व॒न॒स्प॒ते । श॒तव॑ल्श॒ इति॑ श॒तऽव॑ल्शः । वि । रो॒ह॒ ।
स॒हस्र॑वल्शा॒ इति॑ स॒हस्र॑ऽवल्शाः । वि । व॒यम् । रु॒हे॒म ॥नः॥५॥(१०)॥

[अग्नेस्तनूरसि चतस्रः ॥४॥ आपतयेऽष्ट ॥८॥ तप्तायनी द्वे ॥२॥ इन्द्रघोषश्चतस्रः ॥४॥ युञ्जते नव ॥९॥ देवस्य त्वा पञ्च ॥५॥ द्वितीयो देवस्य त्वा षट् ॥६॥ विभूरसि पञ्च ॥५॥ ज्योतिरसि सप्त ॥६॥ उरु विष्णो पञ्च ॥५॥ दशानुवाकेषु पञ्चपञ्चाशत् ॥५५॥]

[अग्नेस्तनूरसि पञ्चपञ्चाशत् ॥५५॥]

सा– कात्यायनः – " अयं हि त्वेति शोधनम् । अभिमन्त्रणशेषो वा " (काश्रौ ६.१.१८.१९) इति । अनेन मन्त्रेण यूपं शोधयेत् । पूर्वमन्त्रेण सह अभिमन्त्रयेद्वा । पाठस्तु– ' अयꣳ हि त्वा स्वधितिस्तेतिजानः प्रणिनाय महते सौभगाय ' इति । ᵛहि यस्मात् हे छिन्नवृक्ष, ᵛतेतिजानः तीक्ष्णः ᵛअयं ᵛस्वधितिः

---

5. B1 °तरणम् for °तरुणम्
6. H1 त्रयस्वाकुरादिति; B1 त्रायस्वाक्षरादिति corrected as स्वधितिभयादिति;
   B1 आख्यातम् for व्याख्यातम्
7. H1 एतद् for पतन्तम्
8. B1 संगच्छतौ, H1 संभव for संगतो

कुठारः ᵛत्वा त्वां ᵛमहते ᵛसौभगाय दर्शनीयत्वाय तिर्यक्शाखोच्छेदनेन ᵛप्रणिनाय प्रकृष्टं यूपत्वं प्रापयामास । अतस्तादृशेन त्वया छेदनान्न भेतव्यम् ॥

कात्यायनः – " अतस्त्वमित्याव्रश्चने जुहोति । यूपे वा " (काश्रौ ६·१·२०-२१) इति । पाठस्तु– ' अतस्त्वं देव वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयꣳ रुहेम ' इति । हे दीप्यमान ᵛवनस्पते, ᵛत्वम् ᵛअतः अस्मात् स्थाणोः ᵛशतवल्शः बह्वङ्कुरः शतशाखः ᵛविरोह विशेषेण जायस्व । वयं च ᵛसहस्रवल्शाः पुत्रपौत्रादिभिर्बहुशाखोपेताः ᵛवि विशेषेण ᵛरुहेम प्रजायेमहीति यजमानेनाशास्यत इत्यभिप्रायः ॥

[इति पञ्चमेऽध्याये दशमोऽनुवाकः]

अथ विनियोगसंग्रहः –

अथ सौमिकवेद्यर्थमन्त्राणां प्रतिपादके ।
पञ्चमेऽध्याये एतस्मिन्ननुवाका दशेरिताः ॥
आतिथ्यादिस्तथा तानूनप्त्रमुत्तरवेदिका ।
तत्संस्कारा हविर्धानं ततश्चोपरि वा सदः ॥
धिष्ण्यवैसर्जनं यूप इत्यर्था अनुवाकगाः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे काण्वसंहिताभाष्ये पञ्चमोऽध्यायः ॥५॥ (१०) ॥

आ– यूपार्थं स्वधितिं स्तौति– ' अयꣳ हि त्वा ' इति । ᵛहि यस्मात् ᵛअयं ᵛस्वधितिः वज्ररूपः कुठारः ᵛतेतिजानः । तिज निशाने । इह तूत्साहार्थः । उत्साहमानः ᵛप्रणिनाय प्रणयति । ᵛमहते ᵛसौभगाय । सुभगो यज्ञः । स्वार्थे अण् । महते यज्ञाय । यज्ञार्थं स्थाणौ जुहोति– ' अतस्त्वम् ' इति । हे ᵛवनस्पते, ᵛअतः अस्मात् स्थाणोः ᵛशतवल्शः बह्वङ्कुरः शतशाखः ᵛविरोह । रुह बीजजन्मनि । प्रजायस्व । ᵛवयं च ᵛसहस्रवल्शाः पुत्रपौत्रादिभिः बहुशाखाः ᵛवि विशेषेण ᵛरुहेम प्रजायेमहीति यजमानाशीः ॥५॥(१०)॥

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवपरिपूज्यपादपरमकारुण्यासादितश्रीकृष्णभक्तिसाम्राज्य-
श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदिश्रीमदानन्दबोधभट्टोपाध्यायेन विरचिते
काण्ववेदमन्त्रभाष्यसंग्रहे पञ्चमोऽध्यायः ॥५॥(१०)॥

---

1. P1 छेदनेन त्वया for त्वया छेदनात्
6. V1 S1 C om. वि
10. P1 °वेद्यर्थं for °वेद्यर्थ°
13. P1 वाः for वा
16. V1 after अध्यायः add समाप्तः
19. H1 यज्ञस्यार्थं for यज्ञार्थं
20. B1 °वल्शिशः for °वल्शः

षष्ठोऽध्यायः

[अथ प्रथमोऽनुवाकः]

सा– यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

सा– सौमिकवेदिप्रधाने पञ्चमेऽध्याये आतिथ्यमारभ्य यूपनिर्माणपर्यन्ता मन्त्रा उक्ताः । अथाग्नीषोमीयपशुप्रधाने षष्ठेऽध्याये यूपसंस्कारमारभ्य सोमाभिषवोद्योगपर्यन्ता मन्त्रा उच्यन्ते । तत्रास्मिन् प्रथमानुवाके यूपसंस्कारमन्त्रा उच्यन्ते–

दे॒वस्य॑ त्वा स॒वि॒तुः प्र॑स॒वे॒ऽश्विनो॑र्बा॒हुभ्यां॑ पू॒ष्णो हस्ता॑भ्याम् ।
आ द॑दे॒ नार्य॑सी॒द॒म॒हꣳ रक्ष॑सो ग्री॒वा अपि॑ कृन्तामि ।
यवो॑ऽसि य॒वया॒स्मद् द्वेषो॑ य॒वयारा॑तीः ।
दि॒वे त्वा॒ऽन्तरि॑क्षाय त्वा पृथि॒व्यै त्वा॑ ।
शुन्ध॑न्ताँल्लो॒काः पि॑तृषद॑नाः पि॑तृषद॑नम॑सि ॥१॥

[दे॒वस्य॑ त्वा ॥ आ द॑दे॒ नार्य॑सी॒दम् ॥ यवो॑ऽसि ॥
दि॒वे त्वा॑ ॥ शुन्ध॑न्ताँल्लो॒काः ॥८॥ द्र. ३३२,३३३ पृष्ठे]

कात्यायनः– “देवस्य त्वेत्यभ्रिमादाय यूपावटं परिलिखतीदमहमिति” (काश्रौ ६.२.८) इति । ‘यवोऽसि’ इत्यप्सु यवानोप्य प्रोक्षत्यग्रमध्यमूलानि ‘दिवे त्वा’ इति, प्रतिमन्त्रमवटशेषमासिञ्चति ‘शुन्धन्ताम्’ इति, बर्हींषि प्राञ्च्युदञ्चि प्रास्यति ‘पितृषदनमसि’ इति । एतेषां मन्त्राणां पाठस्तु– ‘देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आ ददे नार्यसीदमहꣳ रक्षसो ग्रीवा अपि कृन्तामि । यवोऽसि यवयास्मद् द्वेषो यवयारातीः । दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वा । शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि’ इति । एते मन्त्राः पूर्वत्र औदुम्बरीविषये (कासं ५.७.१-२) यथा व्याख्याताः तद्वदत्रापि यूपविषये व्याख्यातव्याः ॥१॥

आ– उत्तराणि यजूंषि । अभ्रिमादत्ते– ‘देवस्य त्वा’ इति । यवानावपति– ‘यवोऽसि’ इति । प्रोक्षति– ‘दिवे त्वा’ इति । शेषमासिञ्चन्ति– ‘शुन्धन्ताँल्लोकाः’ इति । दर्भानुत्क्षिपति ‘पितृषदनमसि’ इति । एतानि पञ्च यजूंषि व्याख्यातानि ॥१॥

---

4. V1 °तीर्थं for °तीर्थ°
5. C S1 निर्माणमन्त्राः for निर्माणपर्यन्ता मन्त्राः;
6. C S1 V1 om. अध्याये
22. B1 before उत्तराणि adds श्रीकृष्णाय तुभ्यं नमः ७; H1 श्रीकृष्णाय नमः ॥

अग्रेणीरसि स्वावेश उन्नेतृणामेतस्य वित्तादधि त्वा स्थास्यति ।
देवस्त्वा सविता मध्वाऽनक्तु सुपिप्पलाभ्यस्त्वौषधीभ्यः ।
दिवमग्रेणास्पृक्ष आऽन्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणादृꣳहीः ॥२॥

अग्रेणीः । अग्रेनीरित्यग्रेऽनीः । असि । स्वावेश इति सुऽआवेशः ।
उन्नेतृणामित्युत्ऽनेतृणाम् । एतस्य । वित्तात् । अधि । त्वा । स्थास्यति ।
देवः । त्वा । सविता । मध्वा । अनक्तु ।
सुपिप्पलाभ्य इति सुऽपिप्पलाभ्यः । त्वा । ओषधीभ्यः ।
दिवम् । अग्रेण । अस्पृक्षः । आ । अन्तरिक्षम् । मध्येन । अप्राः ।
पृथिवीम् । उपरेण । अदृꣳहीः ॥ द्यौः ॥२॥

सा— कात्यायनः— "प्रथमं शकलं चाग्रेणीरसीति" (काश्रौ ६·२·१९) इति । यूपावटे शकलं निक्षिपेदित्यर्थः । पाठस्तु— 'अग्रेणीरसि स्वावेश उन्नेतृणामेतस्य वित्तादधि त्वा स्थास्यति' इति । हे यूपशकल, स्वावेशः शोभन आवेशो यूपावस्थितिलक्षणो यस्मिन् तादृशस्त्वम् । यूपस्य अग्रो नेतारः, प्रथमशकलः स्वरुश्चषालश्चेति । तेषामूर्ध्वनेतृणां मध्ये अग्रे प्रथमं नीयत इति अग्रेणीः असि । यूपस्य प्रथमावयवभूतो भवसीत्यर्थः । किं च त्वा त्वां यस्मात् कर्मणि अध्वर्युः अधि स्थास्यति स्थापयिष्यति अतस्त्वमेतस्यैतत् कर्म वित्तात् विद्धि ॥

कात्यायनः— "देवस्त्वेत्यनक्ति" (काश्रौ ६·३·२) इति । यूपमिति शेषः । पाठस्तु— 'देवस्त्वा सविता मध्वाऽनक्तु' इति । हे यूप, [त्वा] त्वां सविता प्रेरकः देवः मध्वा मधुरेण आज्येन अनक्तु ॥

कात्यायनः— "चषालमुभयतः । अक्तं प्रतिमुञ्चति सुपिप्पलाभ्य इति" (काश्रौ ६·३·३-४) इति । अधस्तादुपरिष्टादाज्येन सिक्तं चषालं यूपस्याग्रेऽवस्थापयेत् । पाठस्तु— 'सुपिप्पलाभ्यस्त्वौषधीभ्यः' इति । हे चषाल, त्वा त्वां सुपिप्पलाभ्यः शोभनफलोपेताभ्यः ओषधीभ्यः । तदर्थं यूपस्याग्रे प्रतिमुञ्चतीति शेषः ॥

कात्यायनः— "दिवमग्रेणेत्युच्छ्रयति" (द्र. काश्रौ ६·३·६) इति । उन्नतं कुर्यात् । पाठस्तु— 'दिवमग्रेणास्पृक्ष आऽन्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणादृꣳहीः' इति । हे यूप, त्वं च अग्रेण दिवं द्युलोकम् अस्पृक्षः स्पृष्टवानसि । तथा अन्तरिक्षम् अन्तरिक्षलोकं मध्यप्रदेशेन आ समन्तात् अप्राः पूरितवानसि । उपरेण मूलप्रदेशेन पृथिवीम् अदृꣳहीः दृढीकृतवानसि ॥२॥

---

11. P1 with markings above अग्रेणीः ins. on the margin शकलदेवत्यं यजुः ।
13. S1 स्वरुप° for स्वरु°
15. V1 S1 C om. अतस्
19. V1 S1 C om. चषालं
23. V1 S1 C तव for त्वं च
24. P1 om. अन्तरिक्षम्
25. V1 S1 C तथा पृथिवीं भूलोकमुपरेण तव मूलभागेन for उपरेण मूलप्रदेशेन

आ— प्रथमशकलं प्रास्यति— ‘ अग्रेणीरसि ’ इति । अग्रे प्रथमम् । विद्यमानस्य यूपस्य प्रथमम् अग्रे नीयत इति अग्रेणीः यूपात्प्रथमभूत इत्यर्थः । यद्वा— अग्रेऽवस्थितो यूपमवटं प्रति नयतीति अग्रेणीः पुरःसर इत्यर्थः । यस्त्वम् ^{V}अग्रेणीः ^{V}असि स त्वम् ^{V}उन्नेतॄणां ^{V}स्वावेशः । ऊर्ध्वं नेतॄणामध्वर्यूणां यूपावटे सुखेन तैरावेश्यत इति स्वावेशः । स त्वं हे यूपशकल, ^{V}एतस्य कर्मणः ^{V}वित्तात् । विद ज्ञाने । कर्मणि षष्ठी । एतत् कर्म विद्धि विदितार्थो भव, तत् कर्म कृतवानिति । अधि त्वा स्थास्यति । अधीत्युपरिभावे, विश्वस्य वा वर्तते । ^{V}अधि उपरि, हे यूप, अस्मिन् कर्मणि यूपं त्वामध्वर्युः ^{V}स्थास्यति स्थापयिष्यति । तत् कर्म ^{V}वित्तात् । यूपमनक्ति— ‘ देवस्त्वा ’ इति । हे यूप, ^{V}त्वा यूपं त्वां ^{V}सविता ^{V}देवः ^{V}मध्वा मधुवत् स्वादुना आज्येन ^{V}अनक्तु अञ्जयतु । चषालं प्रतिमुञ्चति— ‘ सुपिप्पलाभ्यः ’ इति । पिप्पलं फलम् । शोभनफलाभ्यः ^{V}ओषधीभ्यः फलपाकान्ताभ्यः अर्थाय त्वां चषालं प्रतिमुञ्चामीति वाक्यशेषः ॥

उच्छ्रयति— ‘ दिवमग्रेण ’ इति । हे यूप, ^{V}अग्रेण, तव अग्रेण ^{V}दिवं द्युलोकम् ^{V}अस्पृक्षः स्पृष्टवानसीति यूपमाहात्म्यकथनम् । ^{V}आ ^{V}अन्तरिक्षम् अन्तरिक्षलोकं ^{V}मध्येन तव मध्यप्रदेशेन आ ^{V}अप्राः प्रा । पूरणे । आपूरितवानसि । ^{V}पृथिवीम् ^{V}उपरेण । यूपोऽनेन प्रदेशेनोपरमति इत्युपरः । तत्र प्रतिष्ठाभाग उपरः । तेन पृथिवीम् ^{V}अदृंहीः दृढीकृतवानसि ॥२॥

या ते॒ धामा॑न्युश्मसि॒ गम॑ध्यै॒ यत्र॒ गावो॒ भूरि॑शृङ्गा अ॒यास॑ः ।
अत्राह॒ैतदु॑रुगा॒यस्य॒ विष्णोः॑ पर॒मं प॒दमव॑ भारि॒ भूरि॑ ॥३॥

या । ते॒ । धामा॑नि । उ॒श्मसि॑ । गम॑ध्यै ।
यत्र॑ । गाव॑ः । भूरि॑शृङ्गा॒ इति॒ भूरि॑ऽशृङ्गाः । अ॒यास॑ः ।
अत्र॑ । अह॑ । ए॒तत् । उ॒रु॒गा॒यस्येत्यु॑रु॒ऽगा॒यस्य॑ । विष्णोः॑ ।
प॒र॒मम् । प॒दम् । अव॑ । भा॒रि॒ । भूरि॑ । झौं ॥३॥

सा— कात्यायनः — “ या त इति मिनोति ” (काश्रौ ६·३·८) इति । अवटे प्रक्षिपेदित्यर्थः । पाठस्तु— ‘ या ते धामान्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः । अत्राहैतदुरुगायस्य विष्णोः परमं

---

1. H1 यूप° for यूपस्य
2. H1 °भुता° for °भूत°; H1 om. यद्वा
4. H1 om. हे
6. B1 °भावमैश्वर्ये for °भावे विश्वस्य
7. H1 इति for स्थापयिष्यति
8. H1 om. देवः

पदमव भारि भूरि ’ इति । हे यूप, तव संबन्धीनि यानि ^{v}धामानि स्थानानि ^{v}उश्मसि उश्मः वयं कामयामहे । ^{v}गमध्यै गन्तुम् । ^{v}यत्र येषु स्थानेषु ^{v}अयासः । अय गतौ । अया गन्तारः, ^{v}गावः रश्मयः । ^{v}भूरिश्रृङ्गाः बहुदीप्तयो वर्तन्ते । ^{v}अत्र ^{v}अह, अहेत्येवार्थे । एष्वेव स्थानेषु ^{v}उरुगायस्य उरुभिर्महद्भिर्गेयस्य ^{v}विष्णोः ^{v}परमम् उत्कृष्टं ^{v}भूरि महत् ^{v}पदम् आदित्याख्यम् ^{v}अवभारि अवभाति । तकारस्य छान्दसो रेफः । तादृशस्थानप्राप्तिहेतुत्वे कर्मणि हे यूप, अवटे तिष्ठेत्यर्थः ॥३॥

आ— मिनोति— ‘ या ते धामानि ’ इति । यूपदेवत्या त्रिष्टुप् । हे यूप, तव संबन्धीनि ^{v}या यानि ^{v}धामानि । स्थाननामजन्मज्योतिर्वचनो धामशब्दः । स्थानान्यभिप्रेतानि । ^{v}उश्मसि, उकारश्छान्दसः । उश्मः । वश कान्तौ । वयं कामयामहे । ^{v}गमध्यै गमनाय । त्वदीयानि यानि स्थानानि ^{v}यत्र कामयामहे गमनाय, तत्र च ^{v}गावः ^{v}भूरिश्रृङ्गाः ^{v}अयासः । यत्र येषु [स्थानेषु] गावः रश्मयः भूरिश्रृङ्गाः बहुदीप्तयः । शृङ्गाणीति ज्वलन्नामसु पठितम् । ^{v}अयासः । अय वय गतौ । अयासः अया गन्तारः । [अत्राहेति] ^{v}अत्र इति तत्रार्थे । ^{v}अह इति एवार्थे । तत्रैव ^{v}उरुगायस्य उरुभिर्महद्भिः परिगायस्य परिगेयस्य व्यापिनः श्रीभगवतः ^{v}विष्णोः ^{v}परमम् उत्कृष्टतमं, “ त्रिपादस्यामृतं दिवि ” (कासं ३५.१.३) इति प्रसिद्धं, ^{v}भूरि महत् ^{v}पदम् ^{v}अवभारि । तकारस्य छान्दसो रेफः । अवभाति ॥३॥

ब्रह्मवनिं त्वा क्षत्रवनिं रायस्पोषवनि पर्यूहामि ।
ब्रह्म दृꣳह क्षत्रं दृꣳहायुर्दृꣳह प्रजां दृꣳह ॥४॥

[ब्रह्मवनिं त्वा ॥ ब ॥४॥ द्र. ३३४-३३५ पृष्ठे]

सा— कात्यायनः— “ ब्रह्मवनि त्वेति पांसुभिः पर्यूहति । ब्रह्म दृꣳहेति मैत्रावरुणदण्डेन समन्तं त्रिः पर्यूषति ” (काश्रौ ६.३.१०-११) इति । एतयोर्मन्त्रयोः पाठस्तु— ‘ ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्यूहामि । ब्रह्म दृꣳह क्षत्रं दृꣳहायुर्दृꣳह प्रजां दृꣳह ’ इति । एतौ मन्त्रौ पूर्वत्र यथौदुम्बरीविषये (कासं ५.७.३-४) व्याख्यातौ तथा अस्मिन् यूपविषये [अपि] व्याख्यातव्यौ ॥४॥

---

1. P1 with Marking above उश्मसि ins. on the margin : इदन्तो मसी इकारोऽधि
2. C om. अयास : ... स्थानेषु; V1 after अय adds वय
3. V1 om. बहुदीप्तयो
6. H1 तत्र for तव
8. H1 after यानि adds यानि धामानि
13. B1 बृहत् for महत्
20. P1 पूर्ववत् for पूर्वत्र
21. V1 S1 C after तथा ins. इति

आ– पांसुभिः पर्यूहति– ‘ ब्रह्मवनि त्वा ’ इति । ‘ ब्रह्मवनि त्वा ’ इति, ‘ ब्रह्म दृंह ’ इति द्वे यूपदेवत्ये । द्वे अपि व्याख्याते ॥४॥

विष्णो॒ः कर्मा॑णि पश्यत॒ यतो॑ व्र॒तानि॑ पस्प॒शे ।
इन्द्र॑स्य॒ युज्य॒ः सखा॑ ॥५॥

विष्णो॑ः । कर्मा॑णि । प॒श्य॒त॒ । यत॑ः । व्र॒तानि॑ । प॒स्प॒शे ।
इन्द्र॑स्य । युज्य॑ः । सखा॑ ॥सौ॥५॥

सा– कात्यायनः– “ विष्णोः कर्माणीति वाचयति यूपमन्वारब्धम् ” (काश्रौ ६·३·१२) इति । यूपं स्पृष्टवन्तं यजमानं वाचयेत् । पाठस्तु– ‘विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ’ इति । हे ऋत्विजः, ᵛविष्णो ᵛकर्माणि सृष्टिसंहारादिचरितानि ᵛपश्यत, ᵛयतः यैः कर्मभिः ᵛव्रतानि भवदीयलौकिकवैदिककर्माणि ᵛपस्पशे । स्पश बन्धने । बद्धवान् निर्मितवानित्यर्थः । सः विष्णुः ᵛइन्द्रस्य ᵛयुज्यः योग्यः ᵛसखा । यद्वा विष्णोः यज्ञस्य कर्माणि पश्यत । यतः यैर्वीर्यैः व्रतानि आधानपशुसोमादीनि कर्माणि आत्मनि पस्पशे । शिष्टं समानम् । यद्वा विष्णुर्हि यज्ञाधिष्ठात्री देवता । तस्य कर्माणि वीर्याणि पश्यत । यैर्वीर्यैः व्रतानि कर्माणि अग्निवायुसूर्याणां स्वानि स्वान्यप्रमत्ताः सन्तो यूयं कुरुतेत्येवं पस्पशे नियमितवान् । किंभूतः ? यो विष्णुः इन्द्रस्य वृत्रवधादिकर्मसु युज्यः अनुरूपः सखा इति ॥५॥

आ– वाचयति– ‘ विष्णोः कर्माणि ’ इति, ‘ तद्विष्णोः ’ इति द्वे वैष्णव्यौ गायत्र्यौ । ऋषिर्मेधातिथिः । हे ऋत्विजः, ᵛविष्णोः यज्ञस्य ᵛकर्माणि वीर्याणि ᵛपश्यत । ᵛयतः यैर्वीर्यैः ᵛव्रतानि । व्रतमिति कर्मनाम । आधानपशुसोमादीनि कर्माणि आत्मनि ᵛपस्पशे । स्पश बन्धने । कर्माणि बद्धवान् । विष्णुर्हि यज्ञाधिष्ठात्री देवता । अथवा हे ऋत्विजः, विष्णोः श्रीभगवतः कर्माणि पश्यत । यतः यो विष्णुः अग्निवायुसूर्येन्द्रब्रह्मादीनि व्रतानि कर्माणि पस्पशे, ‘ ब्रह्मण इदं कर्म, इन्द्रस्येदं कर्म, अग्नेरिदं कर्म, सूर्यादीनामिदं कर्म ’ इति तत्तद्व्यापारनिबन्धनलक्षणामाज्ञां कृतवानित्यर्थः । किं च ᵛइन्द्रस्य ᵛयुज्यः । युजिर्योगे । योगार्हः स्वामित्वेन संबन्धार्हः । ᵛसखा, सहैव ख्यायत इति सखा । श्रीभगवान् यो विष्णुः यन्ता ब्रह्मादीनां व्रतानि पस्पशे तस्य विष्णोः कर्माणि, हे ऋत्विजः, पश्यतेति संबन्धः ॥५॥

---

1. H1 om. ब्रह्म दृंह
8. C S1 om. यूपं ... वाचयेत्; C P1 S1 om. पाठस्तु
10. V1 S1 C after बन्धने add इति धातुः
11. P1 with markings above सखा ins. on the margin वृत्रवधादिकर्मसु; S1 C यज्ञ° for यज्ञस्य; P1 om. वीर्यैः
12. V1 S1 C after पस्पशे add बद्धवान्; V1 S1 C om. यद्वा विष्णुर्हि... सखेति । (I, 14)
16. B1 om. हे ऋत्विजः विष्णोः
22. B1 यतो for यन्ता

तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥६॥

तत् । विष्णोः । परमम् । पदम् । सदा । पश्यन्ति । सूरयः ।
दिवीवेति दिविऽइव । चक्षुः । आततमित्याऽततम् ॥जं॥६॥

सा– कात्यायनः – “ तद्विष्णोरिति चषालमीक्षमाणम् ” (काश्रौ ६·३·१३) इति । यूपकटकं प्रेक्षमाणं यजमानं वाचयेदिति शेषः । पाठस्तु– ‘ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ’ इति । ᵛसूरयः विद्वांसो वेदान्तपारगाः ᵛविष्णोः ᵛतत् ᵛपरमं ᵛपदं स्वरूपं ᵛसदा ᵛपश्यन्ति । कीदृशम् ? ᵛदिवि आकाशे निरावरणे ᵛचक्षुः ᵛइव ᵛआततं व्याप्तम् ॥६॥

आ— चषालमुदीक्षते— ‘ तद्विष्णोः ’ इति । सत्यज्ञानानन्तानन्दात्मकलक्षणं यत् विष्णोः परमं पदं —

“ इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥
महतः परमव्यक्तमव्यक्तात् पुरुषः परः ।
पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः ॥
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ”— (द्र. महाभा १२·२३८·३)

इत्यादिषु प्रसिद्धं ᵛतत् ᵛविष्णोः ᵛपरमं ᵛपदं ᵛसूरयः श्रुत्याचार्यप्रसादेन संप्राप्तसम्यग्ज्ञानेन च विनिवृत्ताविद्यापटलाः सूरयः अपरोक्षज्ञानसंपन्नाः ᵛसदा ᵛपश्यन्ति सदा निरन्तरं साक्षात् कुर्वन्ति । ‘ दिवीव चक्षुराततम् ’ इति । ᵛदिवि प्रकाशविशेषव्याप्ताकाशे ᵛआततं परितो विस्तृतं प्रतिबन्धराहित[त]या सर्वतो विप्रसृतं व्याप्तं ᵛचक्षुः । अपरोक्षज्ञानसाधनं तत्र निहितं यत्किञ्चिद्वस्तु अव्यवधानेन ᵛइव यथा दर्शयति तदिव तथा सदा पश्यन्तीत्यर्थः । यद्वा दिवि ज्योतिर्निर्मले आततम् अतिविस्तरतेजसं भास्करं चक्षुः पश्यन्ति इव । अथवा इव एवार्थे । दिव्येवाततं त्रिपादलक्षणं चक्षुः अवभास्करम् । यद्ब्रह्मरूपं विष्णोः परमं पदं तत् सूरयः सदा पश्यन्ति । “ त्रिपादस्यामृतं दिवि ” (कासं ३५·१·८·३) इति श्रुतेः । यद्वा दिवि इव

---

7. P1 with markings above स्वरूपं ins. on the margin : विज्ञानघनमानन्दस्वभावं
8. C बहिरावरणे, S1 अभिरावरणे for निरावरणे
17. H1 विनिवृत्यात्मानि for विनिवृत्त°
19. B1 प्राप्तं for व्याप्तं
20. H1 एव for इव; B1 तद्दिवि for तदिव
21. B1 ज्योतिर्मण्डले for ज्योतिर्निर्मले; B1 अतीति विस्तृतसे तेजसां for अतिविस्तरतेजसं
22. B1 अवभासकम् for अवभास्करम्

यथा दिवि तथा चक्षुः चक्षुष्यपि आततं, द्युमण्डले चक्षुषि चाभेदेनावस्थितम् । विष्णोः यद् परमं पदं तद् सूरयः सदा अव्यवधानेन पश्यन्तीत्यर्थः । यद्वा चक्षुरधिष्ठानभूतमादित्यात्मकं दिवि इव निर्मलान्तःकरणे आततम् अविच्छिन्नतयाऽतिविस्तृतं विष्णोः परमं सर्वकार्यकारणप्रपञ्चमधःकृत्यावभासमानं ज्ञानानन्दस्वरूपं विष्णोर्यत् परमं पदं तद् सूरयोऽहमस्मीति सर्वसाक्षिरूपं साक्षात्कृत्य सदा पश्यन्तीत्यर्थः ॥६॥

परिवीरसि परि त्वा दैवीर्विशो व्ययन्ताम् ।
परीमꣳ यजमानꣳ रायो मनुष्याणाम् ।
दिवः सूनुरस्येष ते पृथिव्याँल्लोक आरण्यस्ते पशुः ॥७॥(१) ॥

परिवीरिति परिऽवीः । असि । परि । त्वा । दैवीः । विशः । व्ययन्ताम् ।
परि । इमम् । यजमानम् । रायः । मनुष्याणाम् ।
दिवः । सूनुः । असि । एषः । ते । पृथिव्याम् । लोकः ।
आरण्यः । ते । पशुः ॥ङिनः॥७॥(१)॥

सा– कात्यायनः – “ त्रिगुणा त्रिव्यामा कौशी रशना तया नाभिमात्रे त्रिवृतं परिव्ययति परिवीरसीति ” (काश्रौ ६·३·१५) इति । त्रिगुणा त्रिभिर्गुणैरवयवैरुपेता, त्रिव्यायामा त्रिभिर्व्यामैर्व्याप्ता, कौशी कुशसंबन्धिनी या रशना, तया नाभिप्रमाणे आवृत्तित्रयं यथा भवति तथा परिवेष्टयेत् । पाठस्तु– ‘परिवीरसि परि त्वा दैवीर्विशो व्ययन्ताम् । परीमं यजमानꣳ रायो मनुष्याणाम्’ इति । हे यूप, त्वं ᵛपरिवीः ᵛअसि परितो रशनया वीतो वेष्टितो भवसि । ᵛदैवीः ᵛविशः देवसंबन्धिन्यः प्रजा मरुद्गणादयस्त्वां परितः ᵛव्ययन्तां वेष्टयन्तु । तद्वत् ᵛइमं ᵛयजमानं ᵛमनुष्याणां संबन्धीनि ᵛरायः धनानि ᵛपरिवेष्टयन्तु ॥

कात्यायनः – “ यूपशकलमस्यामवगूहत्युत्तरेणाग्निष्ठां दिवः सूनुरसीति ” (काश्रौ ६·३·१७) इति । अष्टाश्रेर्यूपस्य या अश्रिरग्निसमीपे स्थिता तस्या उत्तरभागे रशनायां स्वरुनामकं शकलमवसृजेत् । पाठस्तु –‘ दिवः सूनुरस्येष ते पृथिव्याँल्लोक आरण्यस्ते पशुः ’ इति । हे शकल, त्वं ᵛदिवः ᵛसूनुः ᵛअसि द्युलोकस्य पुत्रोऽसि । ᵛते तव ᵛपृथिव्याम् ᵛएषः ᵛलोकः आश्रयस्थानमित्यर्थः । ᵛते तव ᵛआरण्यः अरण्यसंबन्धी ᵛपशुः ॥७॥

[इति षष्ठेऽध्याये प्रथमोऽनुवाकः]

---

1. H1 trans. यथा after दिवि; B1 om. लु°; B1 वा for च; H1 om. च
17. V1 S1 C °संबन्धिनी: for °संबंन्धिन्यः
20. C अष्टलेर् for अष्टाश्रेर्; V1 S1 C अश्रिर् for अश्रिर्; P1 यज्ञ° for अग्नि°;
 V1 S1 C °समाप° for °समीपे
22. P1 शकट for शकल
23. P1 om. अरण्य°; P °संबन्धि° for °संबन्धी
25. C S1 वष्ठ° for षष्ठे°

आ— परिव्ययति— ‘ परिवीरसि ’ इति । यूपदेवत्योष्णिक् । व्येञ् संवरणे इत्यस्य रूपं क्विपि संप्रसारणे च परिवीः इति भवति । ᵛपरिवीः ᵛअसि परिवीतः अस्माभिः परिवेष्टितः असि । हे यूप, ᵛत्वा त्वां ᵛदैवीः देव्यः ᵛविशः पशुलक्षणाः प्रजाः ᵛपरि ᵛव्ययन्तां परिव्ययन्तु । त्वत्प्रसादात् ᵛमनुष्याणां मध्ये ᵛइमं ᵛयजमानं ᵛरायः धनानि परिव्ययन्ताम् । स्वरुमवगूहति —‘ दिवः सूनुः ’ इति । स्वरुदेवत्या गायत्री । ᵛदिवः द्युलोकस्य त्वं स्वरुः ᵛसूनुः पुत्रः ᵛअसि । द्युलोकाद्वृष्टिद्वारेण जायत इति । उपशयं निदधाति— ‘ एष ते ’ इति । यूपदेवत्या शक्वरी । हे यूप, ᵛते तव ᵛपृथिव्याम् ᵛएषः ᵛलोकः आश्रयस्थानमित्यर्थः । ‘ आरण्यस्ते पशुः ’ । ᵛते यूपस्य तव ᵛआरण्यः, अरण्यसंबन्धी आरण्यः ᵛपशुः । यूपस्य पशुसंबन्धेन भाव्यमित्येवमाह ॥७॥(१)॥

[इति षष्ठेऽध्याये प्रथमोऽनुवाकः]

[अथ द्वितीयोऽनुवाकः]

सा— प्रथमेऽनुवाके यूपसंस्कारमन्त्राः उक्ताः । द्वितीये पशूपाकरणादिमन्त्रा उच्यन्ते—

उपावीरस्युप देवान् दैवीर्विशः प्रागुरुशिजो वह्नितमान् ।
देव त्वष्टर्वसु रम हव्या ते स्वदन्ताम् ॥१॥
रेवती रमध्वं बृहस्पते धारया वसूनि ।
ऋतस्य त्वा देवहविः पाशेन प्रति मुञ्चामि धर्षान्मानुषः ।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥२॥
अग्नीषोमाभ्यां जुष्टं नि युनज्मि ।
अद्भ्यस्त्वौषधीभ्यः प्रोक्षाम्यनु त्वा माता मन्यतामनु पिताऽनु भ्राता
सगर्भ्योऽनु सखा सयूथ्यः ।
अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि ॥३॥

---

1. B1 वृञ्; H वे we corrected this as व्येञ्
2. B1 क्विबेति for क्विपि
3. B1 om. परिव्ययन्तु ... परिव्ययन्ताम्
6. B1 उपशमं for उपशयं
8. B1 यः for अरण्यसंबन्धी; H1 वध्यम् for भाव्यम्

उपावीरित्युपऽअवीः । असि । उप । देवान् । दैवीः । विशः । प्र । अगुः ।
उशिजः । वह्नितमानिति वह्निऽतमान् ।
देव । त्वष्टः । वसु । रम । हव्या । ते । स्वदन्ताम् ॥चर्लौ॥१॥
रेवतीः । रमध्वम् । बृहस्पते । धारय । वसूनि ।
ऋतस्य । त्वा । देवहविरिति देवऽहविः । पाशेन । प्रति । मुञ्चामि । धर्षात् । मानुषः ।
देवस्य त्वा ॥गीं॥२॥ [द्र. ५५ पृष्ठे]
अग्नीषोमाभ्याम् । जुष्टम् । नि । युनज्मि ।
अद्भ्यः इत्यत्ऽभ्यः । त्वा । ओषधीभ्यः । प्र । उक्षामि ।
[द्र. २६७ पृष्ठे; ६४ पृष्ठे च] ।खौ॥(३)॥

कात्यायनः – "उपावीरसीति तृणमादाय" (काश्रौ ६.३.१८) इति । हे तृणविशेष, त्वम् 'उपावीः 'असि । उप समीपे अवति गच्छतीत्युपावीः । तादृशोऽसि ॥

कात्यायनः – "तेन पशुमुपस्पृशत्युप देवानिति" (काश्रौ ६.३.१९) इति । गृहीतेन तृणेन पशुमुपस्पृशेत् । पाठस्तु– 'उप देवान् दैवीर्विशः प्रागुरुशिजो वह्नितमान् । देव त्वष्टर्वसु रम हव्या ते स्वदन्ताम् । रेवती रमध्वं बृहस्पते धारया वसूनि' इति । 'वह्नितमान् यजमानं स्वर्गं प्रति वहतां प्रापयतां देवानां मध्ये श्रेष्ठतमांस्तान् 'उशिजः हविः कामयमानान् 'देवान् अग्नीषोमादीन् 'दैवीः 'विशः तत्संबन्धिनीः प्रजाश्च, हे पशो, त्वदीयानि हृदयाद्यङ्गानि 'उप 'प्रागुः उपागच्छन्तु । हे त्वष्टृनामक 'देव, 'वसु पशुलक्षणं धनं 'रम रमस्व । हे पशो, त्वदीयानि हव्यानि हवींषि 'स्वदन्तां स्वादूनि भवन्तु । हे 'रेवतीः क्षीरादिधनवन्तो हे पशवः, यूयं यजमानगृहे संक्रीडध्वम् । हे 'बृहस्पते, 'वसूनि हृदयादिद्रव्याणि 'धारय पोषय ॥

कात्यायनः – "द्विगुणरशनया द्विव्यामया कौश्या पाशं कृत्वाऽन्तराशृङ्गमभिदक्षिणं पादं बध्नात्यृतस्य त्वेति" (काश्रौ ६.३.२७) इति । अवयवद्वयोपेतया व्यामद्वयपरिमितया कुशदर्भनिर्मितया रशनया दक्षिणं पादं बध्नीयात् । शृङ्गद्वयमध्ये तां रशनामानीय बन्धनकारणरशनाऽप्रवर्तिनं पाशं कृत्वा तेन बध्नीयात् । पाठस्तु– 'ऋतस्य त्वा देवहविः पाशेन प्रतिमुञ्चामि धर्षान्मानुषः' इति । हे 'देवहविः देवानां हवीरूप हे पशो, 'ऋतस्य सत्यस्य यज्ञस्य । अवश्यंभाविफलोपेतत्वात् यज्ञस्य सत्यत्वम् । तत्सिद्ध्यर्थं त्वां 'पाशेन 'प्रतिमुञ्चामि बध्नामि । किं च 'मानुषः शमित्रादिः 'धर्षात् । निघृषा प्रागल्भ्य इत्यस्य रूपम् । अत्रोचितव्यापारं कुर्यादित्यर्थः ॥

---

11. V1 S1 C समीपं for समीपे.
16. P1 with markings above प्रजाश्च ins. on the margin प्रति.
18. P1 with markings above पशवो ins. in the margin पशवो वै रेवन्त इति श्रुतेः ।
21. C V1 S1 °निर्मित° for °निर्मितया
24. P1 om. सत्यस्य
25. V1 S1 C पित्रादि for शमित्रादिः

कात्यायनः — "देवस्य त्वेति यूपे" (काश्रौ ६.३.२८) इति । पशुं बध्नीयादिति शेषः । पाठस्तु— 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । अग्नीषोमाभ्यां जुष्टं नियुनज्मि' इति । अग्नीषोमदेवताभ्यां ᵛजुष्टम् अभिरुचितं पशुं ᵛनियुनज्मि पशुं निबध्नामि । शिष्टं व्याख्यातम् ॥

कात्यायनः — "अद्भ्यस्त्वेति पशुं प्रोक्षणीभिः प्रोक्षति" (काश्रौ ६.३.३१) इति । पाठस्तु— 'अद्भ्यस्त्वौषधीभ्यः प्रोक्षाम्यनु त्वा माता मन्यतामनु पिताऽनु भ्राता सगर्भ्योऽनु सखा सयूथ्यः । अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि' इति । हे पशो, त्वामद्भिरोषधीभिश्च ᵛप्रोक्षामि मेध्यं करोमि । दर्भैरपामुत्पूतत्वात् तस्त्वोषधीनामपि प्रोक्षणसाधनत्वम् । स्वमातृत्वीकृताभ्यां तृणोदकाभ्यां पशोरुत्पन्नत्वात् तेनोक्षणेन युक्तमिति वा । तित्तिरिरप्याह— "अद्भ्यस्त्वौषधीभ्यः प्रोक्षामीत्याहाद्भ्यो ह्येष ओषधीभ्यः संभवति यत् पशुः" (तैसं ६.३.६) इति । किं च हे पशो, एवं प्रोक्ष्यमाणं त्वां ᵛमाता भूमिः ᵛअनु मन्यताम् । तथा ᵛपिता द्यौः ᵛअनु मन्यताम् । एवमुत्तरत्र 'अनु मन्यताम्' इति प्रत्येकं संबध्यते । ᵛभ्राता समानजन्मा । ᵛसगर्भ्यः समानगर्भे उदरे भवः सोदरः । सहैव व्याख्यायत इति ᵛसखा सुहृत् । समानयूथे भवः ᵛसयूथ्यः । ᵛअग्नीषोमाभ्याम् एवंभूतं त्वां ᵛजुष्टम् अभिरुचितं ᵛप्रोक्षामि ॥१-३॥

* * *

आ— तृणमादत्ते— 'उपावीरसि' इति । तृणदेवत्या पङ्क्तिः । उप समीपे अवस्थितः । अव रक्षणे । अवति रक्षतीति ᵛउपावीः ᵛअसि । पशुमुपस्पृशति— 'उप देवान्' इति । लिङ्गोक्तदेवत्या द्विपदाऽनुष्टुप् । वह्नितमान् । यजमानं स्वर्गं प्रति वहतां देवानां मध्ये ये श्रेष्ठास्तान् ᵛवह्नितमान् ᵛउशिजः मेधाविनः ᵛदेवान् ᵛदैवीः दैव्यः देवसंबन्धिन्यः ᵛविशः प्रजारूपाः पशवः ᵛउप ᵛप्रागुः उपगच्छन्तु । 'देव त्वष्टः' इति । त्वष्टृदेवत्याऽनुष्टुप् । हे ᵛदेव, हे ᵛत्वष्टः, ᵛवसु ᵛरम पशुलक्षणं वसु धनं रम रमय । पशुमाह— 'हव्या ते स्वदन्ताम्' इति । लिङ्गोक्तदेवत्या गायत्री । ᵛते ᵛहव्या त्वदीयानि हव्यानि हवींषि ᵛस्वदन्ताम् । स्वद आस्वादने । आस्वादयन्तु ॥१॥

'रेवती रमध्वम्' इति । लिङ्गोक्तदेवत्याऽत्यष्टिः । कृत्स्नकण्डिकापक्षे बृहती । ᵛरेवतीः । अत्र व्यत्ययः । हे रेवन्तः धनवन्तः पशवः, ᵛरमध्वम् इह रता भवत । हे ᵛबृहस्पते, ᵛवसूनि पशुलक्षणानि धनानि ᵛधारय निश्चलीकुरु । पशुं बध्नाति— 'ऋतस्य त्वा' इति । पशुदेवत्या गायत्री । हे ᵛदेवहविः, हे देवानां हवीरूपे हे पशो, ᵛपाशेन ᵛप्रतिमुञ्चामि त्वां बध्नामि । ᵛमानुषः शमित्रादिः ᵛधर्षात् । ञिधृषा प्रागल्भ्ये इत्यस्य रूपम् । अत्रोचितव्यापारं कुर्यात् । यूपे पाशं बध्नाति— 'देवस्य त्वा' इति । व्याख्यातो मन्त्रः ॥२॥

---

3. P1 °देवताभ्यो for °देवताभ्यां
7. P1 अद्भ्यस्तु for अस्ति
8. V1 S1 C om. वा
18. B1 रमयस्व for रमय
20. H1 °खण्डिका° for °कण्डिका°
21. B1 देवा भवन्ति, H1 रेवा भवः we have corrected this as रता भवत
23. B1 om. पशो ... मन्त्रः ॥ (L. 25)

[‘ अग्नीषोमाभ्यां] जुष्टम् ’ इति । पशुदेवत्या त्रिष्टुप् । ᵛअग्नीषोमाभ्यां ᵛजुष्टम् अभिरुचितं त्वां ᵛनियुनज्मि निबध्नामि । पशुं प्रोक्षति— ‘ अद्भ्यस्त्वौषधीभ्यः ’ इति । पशुदेवत्यं यजुः । हे पशो, ᵛओषधीभ्यः अर्थाय ᵛअद्भ्यः त्वां ᵛप्रोक्षामि मेध्यं करोमि । एवं प्रोक्षमाणं ᵛत्वा त्वां ᵛमाता भूः ᵛअनुमन्यताम् । ᵛपिता द्यौः ᵛअनु मन्यताम् । ᵛअनु ᵛभ्राता समानजन्मा । ᵛसगर्भ्यः समानगर्भे उदरे भवः सोदरः । ᵛसखा, सहैव ख्यायत इति सखा सुहृत् । ᵛसयूथ्यः, समानयूथे भवः सयूथ्यः । ‘ अनु मन्यताम् ’ इति प्रत्येकं संबन्धः । ᵛअग्नीषोमाभ्यां ᵛजुष्टम् अभिरुचितं ᵛत्वा पशुं त्वां ᵛप्रोक्षामि ॥३॥

अपां पेरुरस्यापो देवीः सदन्तु ।
स्वात्तं चित् सद्देवहविः ॥४॥

अपाम् । पेरुः । असि । आपः । देवीः । सदन्तु ।
स्वात्तम् । चित् । सत् । देवहविरिति देवऽहविः ॥घं॥४॥

कात्यायनः – “ अपां पेरुरित्यास्य उपगृह्णाति ” (काश्रौ ६·३·३२) इति । पशोर्मुखे उदकं आपाययेत् । ‘ असि ’ इति मन्त्रशेषः । हे पशो, त्वम् ᵛअपां ᵛपेरुः ᵛअसि । पेरुः पानशीलः, उदकपानशीलो भवसि ।

कात्यायनः – “ आपो देवीरित्यधस्तादुपोक्षति ” (काश्रौ ६·३·३३) इति । पशोरधोभागं प्रोक्षयेत् । पाठस्तु– ‘ आपो देवीः सदन्तु । स्वात्तं चित् सद्देवहविः ’ इति । हे पशो, त्वाम् ᵛआपः ᵛदेवीः अब्रूपा देव्यः ᵛसदन्तु आस्वादयन्तु । वकारलोपश्छान्दसः । शाखान्तरे ‘ स्वदन्तु ’ (मासं ६·१९) इति पाठात् । ᵛस्वात्तं स्वकीयतया प्राप्तम् । ᵛचित् अतिस्वादु ᵛसत् ᵛदेवहविः देवानामेव योग्यं हविर्भूयात् । ‘ अद्भ्यस्त्वा ’ इत्येतन्मन्त्रद्वयेन अवश्यमनुष्ठेयमिति तित्तिरिराह – “ उपरिष्टात् प्रोक्षत्युपरिष्टादेवैनं मेध्यं करोति पाययत्यन्तरत एवैनं मेध्यं करोत्यधस्तादुपोक्षति सर्वत एवैनं मेध्यं करोति ” (तैसं ६·३·६) इति ॥४॥

आ– आस्य उपगृह्णाति – ‘ अपां पेरुः ’ इति । पशुदेवत्या गायत्री । हे पशो, ᵛअपां ᵛपेरुः । पानशीलः पेरुः । जलपानशीलः ᵛअसि । अधस्तात् प्रोक्षति– ‘ आपो देवीः ’ इति । अब्देवत्या द्विपदा उष्णिक् । हे पशो, ᵛआपः ᵛदेवीः देव्यः ᵛसदन्तु आस्वादयन्तु । स्वात्तं चित्

---

16. P1 अम्बुरूपाः for अब्रूपाः
17. V1 S1 C om. वकार° ... पाठात्
23. C उत्तरतः for अन्तरतः
20. H1 अनुष्टुप् for उष्णिक्

सद्देवहविः। स्वकीयतया प्राप्तं ᵛस्वात्तम्। ᵛसत् समीचीनं, ᵛचित् अतिस्वादु। ᵛदेवहविः, देवानामेव योग्यं हविः देवहविः पशुलक्षणं भूयात् ॥४॥

सं ते प्राणो वातेन गच्छताꣳ समङ्गानि यजत्रैः।
सं यजमान आशिषा ॥५॥

सम्। ते। प्राणः। वातेन। गच्छताम्। सम्। अङ्गानि। यजत्रैः।
सम्। यजमानः। आशिषेत्याऽशिषा ॥ गां ॥५॥

कात्यायनः– "उत्तराघारमाघार्य पशुं पूर्वेण समनक्ति ललाटांसश्रोणिषु सं त इति प्रतिमन्त्रम्" (काश्रौ ६.४.२) इति। ललाटे तावदयं मन्त्रः– 'सं ते प्राणो वातेन गच्छताम्' इति। हे पशो, ᵛते तव ᵛप्राणः ᵛवातेन वायुना ᵛसंगच्छताम्। अंसयोरयं मन्त्रः– 'समङ्गानि यजत्रैः' इति। अंसाद्यङ्गानि ᵛयजत्रैः ᵛयागैः ᵛसं गच्छन्ताम्। श्रोण्योरयं मन्त्रः– 'सं यजमान आशिषा' इति। अयं ᵛयजमानः दीर्घेण ᵛ[11]आशिषा दीर्घेण यज्ञफलेन ᵛसं गच्छताम् ॥५॥

आ– पशुं समनक्ति– 'सं ते प्राणः' इति। पशुदेवत्या गायत्री। हे पशो, ᵛते तव ᵛप्राणः ᵛवातेन वायुना ᵛसंगच्छताम्। तव ᵛअङ्गानि ᵛयजत्रैः यागैः ᵛसं गच्छन्ताम्। ᵛयजमानः तु ᵛआशिषा स्वापेक्षितयज्ञफलेन सं गच्छताम् ॥५॥

घृतेनाक्तौ पशुं त्रायेथाꣳ रेवति यजमाने। प्रियं धा आ विश ॥६॥
उरोरन्तरिक्षात् सजूर्देवेन वातेन।
अस्य हविषस्त्मना यज समस्य तन्वा भव ॥७॥

घृतेन। अक्तौ। पशुम्। त्रायेथाम्। रेवति। यजमाने।
प्रियम्। धाः। आ। विश ॥ शं ॥६॥
उरोः। अन्तरिक्षात्। सजूरिति सऽजूः। देवेन। वातेन।
अस्य। हविषः। त्मना। यज। सम्। अस्य। तन्वा। भव ॥गीं॥७॥

---

1. B1 स्वकीयता for स्वकीयतया; B1 समिमं for समीचीनं
2. B1 om. हविर्
8. C after मन्त्रः adds पाठस्तु
11. *[शुद्धीकृतोऽयं पाठः। सर्वेषु लिखितपुस्तकेषु 'आयुषा' इति लभ्यते।];
V1 S1 C om. दीर्घेण यज्ञफलेन

सा– कात्यायनः – “ *शाखां समाहर यूपशकलमाहरेत्युक्त्वोभौ जुह्वग्रे ताभ्यां पशोर्ललाट-मुपस्पृशति घृतेनाक्ताविति ” (कृ. काश्रौ ६·४·११-१२) इति । अध्वर्युरितरं प्रति *पलाशशाखां यूपशकलं च समाहरेति ब्रूयात् । ततः समाहृतौ तावुभौ जुह्वाऽग्रभागे आज्येनाऽक्त्वा ताभ्यामक्ताभ्यां पशोर्ललाटमुपस्पृशेत् । पाठस्तु– ‘ घृतेनाक्तौ पशुं त्रायेथाम् ’ इति । हे *शाखे, यूपशकल, युवामुभौ ᵛघृतेन ᵛअक्तौ सन्तौ ᵛपशुम् ᵛएतं ᵛत्रायेथां पालयेथाम् ।

कात्यायनः – “ रेवति यजमान इति वाचयति ” (काश्रौ ६·५·११) इति । पाठस्तु– ‘ रेवति यजमाने । प्रियं धा आ विश । उरोरन्तरिक्षात् सजूर्देवेन वातेन । अस्य हविषस्त्मना यज समस्य तन्वा भव ’ इति । रेवतीशब्दो धनवतीं वाग्देवतामाचष्टे । “ वाग्वै रेवती ” (माश ३·८·१-१२) इति श्रुतेः । हे ᵛरेवति वाग्देवते ᵛयजमाने अस्मिन् ᵛप्रियम् अभिप्रेतं ᵛधाः धेहि । ᵛआविश ज्ञानप्रदानेन यजमानं प्रविश । हे रेवति, ᵛवातेन वायुना ᵛदेवेन ᵛसजूः समानप्रीतिर्भूत्वा ᵛउरोः विस्तीर्णात् ᵛअन्तरिक्षात् यजमानं गोपायेति मन्त्रशेषः । किं च ᵛअस्य पशुलक्षणस्य ᵛहविषः ᵛत्मना आत्मना ᵛयज । यजमानस्य पशोः ᵛतन्वा शरीरेण ᵛसंभव । हे रेवति, यजमानरूपेणात्मरूपेण पशुरूपेण च यजेत्यर्थः ॥६-७॥

आ– स्वरुशाखाभ्यां* पशोर्ललाटमुपस्पृशति– ‘ घृतेनाक्तौ ’ इति । *स्वरुशाखादेवत्या बृहती । ᵛघृतेन ᵛअक्तौ अञ्जितौ सन्तौ स्वरुशाखे* युवां ᵛपशुं ᵛत्रायेयां पालयेथाम् । यजमानं वाचयति– ‘ रेवति ’ इति । वाग्देवत्यं यजुः । “ वाग्वै रेवती ” (माश ३·८·१-१२) [इति श्रुतेः ।] हे ᵛरेवति धनवति, ᵛयजमाने ᵛप्रियम् अभिप्रेतं ᵛधाः धेहि । ᵛआविशः यजमानं ज्ञानप्रदानेन आविश ॥६॥

‘ उरोरन्तरिक्षात् ’ इति वाग्देवत्याऽनुष्टुप् । उरोरन्तरिक्षात् । हे रेवति, ᵛवातेन वायुना ᵛदेवेन ᵛसजूः समानप्रीतिर्भूत्वा ᵛउरोः विस्तीर्णात् ᵛअन्तरिक्षात् यजमानं गोपायेति शेषः । किं च ‘ अस्य हविषस्त्मना यज ’ । हे रेवति, ᵛअस्य पशुलक्षणस्य ᵛहविषः ᵛत्मना आत्मना त्वं

---

*[अत्र कात्यायनश्रौतसूत्रमनुसृत्य ‘ शाखमाहर ’ इति भाष्यम् । एष पाठः माध्यन्दिनशतपथब्राह्मणं (३·८·१·४-५), काण्वीयशतपथब्राह्मणं (४·८·१-३) चानुसरति । ‘ शाखमाहरेत्यसिं वै शाखमित्याचक्षते ’ इति शतपथमत्रानुसंधेयम् । सायणार्यैस्तु भाष्येऽपि ‘ पलाशशाखाम् ’, ‘ हे शाखे ’ इत्यादि भाष्यं कुर्वद्भिः ‘ शाखां समाहर ’ इत्येवमेव पाठ आहृतः । स तु मूलविरोधीति गम्यते । आनन्दबोधकृतं भाष्यमपि शतपथ-कात्यायनादिमूलम् अदृष्ट्वैव सायणार्यमनुसरतीति संभाव्यते ।]

1. V1 S1 C before शाखां add आहर
3. V1 जुह्वा अग्रभागे for जुह्वाग्रभागे
5. P1 om. पालयेथाम्
11. P1 with markings above त्मना ins. in the margin मन्त्रेष्वाङ्यादेरात्मन इत्याकारलोपः; C S1 after यज add आत्मना
13. B1 स्वरुशाखां for स्वरुशाखाभ्यां
14. H1 युक्तौ for अक्तौ; H1 before अञ्जितौ adds रञ्जितौ; B1 om. सन्तौ

ᵛयज । ‘ समस्य तन्वा भव ’ । ᵛअस्य पशोः ᵛतन्वा शरीरेण ᵛसंभव । हे रेवति, यजमानरूपेण आत्मरूपेण च यजेत्यर्थः ॥७॥

व॒र्षो॑ वर्षी॑यसि य॒ज्ञे य॒ज्ञप॑तिं धाः ।
स्वाहा॑ दे॒वेभ्यो॑ दे॒वेभ्यः॒ स्वाहा॑ ।
माऽहि॑र्भू॒र्मा पृदा॑कुः ॥८॥(२)॥

व॒र्षो॑ इति॑ व॒र्षो । वर्षी॑यसि । य॒ज्ञे । य॒ज्ञप॑ति॒मिति॑ य॒ज्ञऽप॑तिम् । धाः॒ ।
स्वाहा॑ । दे॒वेभ्यः॑ । दे॒वेभ्यः॑ । स्वाहा॑ ।
मा । अहिः॑ । भूः॒ । मा । पृदा॑कुः ॥ चुं ॥८॥(२)॥

सा: – कात्यायनः – “ तृणमुपास्यति वर्षो वर्षीयसि ” (काश्रौ ६.५.१५) इति । विशसनीयस्य पशोर्भूमिस्पर्शपरिहारार्थम् अधस्ताद्भूमि तृणं प्रक्षिपेत् । पाठस्तु– ‘ वर्षो वर्षीयसि यज्ञे यज्ञपतिं धाः ’ इति । हे ᵛवर्षो, वृष्टिजन्ये तृणदेवते, ᵛवर्षीयसि विस्तीर्णतरे ᵛयज्ञे ᵛयज्ञपतिं ᵛधाः धेहि ।

कात्यायनः – “ स्वाहा देवेभ्य इति जुहोति ” (काश्रौ ६.५.२२) इति । पशुसंज्ञपनात् प्राक्कालीनोऽयं होमः ।

कात्यायनः – “ देवेभ्यः स्वाहेति जुहोति ” (काश्रौ ६.५.२४) इति । मन्त्रयोरनयोः सत्यप्यर्थैक्ये पाठभेदस्य तात्पर्यं तित्तिरिराह– “पुरस्तात्स्वाहाकृतयो वा अन्ये देवा उपरिष्टात्स्वाहाकृतयोऽन्ये स्वाहा देवेभ्यो देवेभ्यः स्वाहा ” (तैसं ३.१.५) इति ।

कात्यायनः – “ नियोजनीं चात्वाले प्रास्यति माऽहिर्भूरिति ” (काश्रौ ६.५.२६) इति । नितरां योजनं नियोजनं बन्धनम् । तद्धेतुभूतां रज्जुं चात्वाले प्रक्षिपेत् । पाठस्तु– ‘ माऽहिर्भूर्मा पृदाकुः ’ इति । हे रज्जो, त्वम् ᵛअहिः सर्पाकारः ᵛमा ᵛभूः मा भूयाः, ᵛपृदाकुः अजगराकारोऽपि ᵛमा भूयाः ॥८॥

[इति षष्ठेऽध्याये द्वितीयोऽनुवाकः]

आ– पश्चात् तृणमपास्यति– ‘ वर्षो वर्षीयसि ’ इति । तृणदेवत्यं यजुः । हे ᵛवर्षो हे तृणदेवते वर्षभव । ᵛवर्षीयसि विस्तीर्णतरे ᵛयज्ञे ᵛयज्ञपतिं यजमानं ᵛधाः धेहि । जुहोति– ‘ स्वाहा देवेभ्यो देवेभ्यः स्वाहा ’ इति । द्वे यजुषी देवदेवत्ये । नियोजनीं चात्वाले प्रास्यति ‘ माऽहिर्भूः ’ इति । रज्जुदेवत्योष्णिक् । हे रज्जो, ᵛअहिः सर्पाकारः ᵛमा ᵛभूः मा भूयाः, ᵛमा ᵛपृदाकुः पृदाकुरजगरः । अजगराकारोऽपि मा भूः ॥८॥

[इति षष्ठेऽध्याये द्वितीयोऽनुवाकः]

---

2. B1 om. आत्मरूपेण
10. C S1 V1 भूमिं for °भूमि ... om. तृणं
11. P1 सृष्टि° for वृष्टि°
24. H1 रक्ष° for रज्जु°; H1 हे रक्ष for हे रज्जो; H1 सर्पांकारो for सर्पाकारो

[अथ तृतीयोऽनुवाकः]

द्वितीये पशूपाकरणादिमन्त्रा उक्ताः । तृतीये संज्ञप्तपश्वाख्यहविःसंस्कारमन्त्रा उच्यन्ते–

नमस्त आतानानर्वा प्रेहि ।
घृतस्य कुल्या उप ऋतस्य पथ्या उप ॥१॥
देवीरापः शुद्धा वोढ्वꣳ सुपरिविष्टा देवेषु ।
सुपरिविष्टा वयं परिवेष्टारो भूयास्म ॥२॥

नमः । ते । आतानेत्याऽतान । अनर्वा । प्र । इहि ।
घृतस्य । कुल्याः । उप । ऋतस्य । पथ्याः । उप ॥गिं॥१॥
देवीः । आपः । शुद्धाः । वोढ्वम् । सुपरिविष्टा इति सुऽपरिविष्टाः । देवेषु ।
सुपरिविष्टा इति सुऽपरिविष्टाः । वयम् । परिवेष्टार इति परिऽवेष्टारः । भूयास्म ॥द्वौ॥२॥

कात्यायनः – "पात्नेजनहस्तां वाचयति नमस्त आतानेति" (काश्रौ ६.६.१) इति । पादप्रक्षालने तु पशुशुद्ध्यर्था आपः पात्नेजनशब्देनोच्यन्ते । तदुदकधारणपात्रं पात्नेजनं, तद्धस्ते यस्याः पत्न्याः सा पात्नेजनहस्ता, तां ऋत्विक् यदाऽऽसन्नमानयति तदानीमेतं मन्त्रं वाचयेत् । पाठस्तु– 'नमस्त आतानानर्वा प्रेहि। घृतस्य कुल्या उप ऋतस्य पथ्या उप। देवीरापः शुद्धा वोढ्वं सुपरिविष्टा देवेषु। सुपरिविष्टा वयं परिवेष्टारो भूयास्म' इति । आ समन्तात् तन्यत इत्यातानो यज्ञः । "यज्ञो वा आतानः" (माशब्रा ३.८.२.२) इति श्रुतेः । हे तादृश यज्ञ, 'ते तुभ्यं 'नमः नमस्कारोऽस्तु । त्वम् 'अनर्वा अप्रत्यृतः अन्यमनाश्रितः । यद्वा शत्रुरहितः सन् 'प्रेहि समाप्तिपर्यन्तं प्रकर्षेण गच्छ । इमं मन्त्रभागं शत्रुराहितार्थं (°राहित्यार्थम् ?) इति । तित्तिरिराह – "अनर्वा प्रेहीत्याह भ्रातृव्यो वा अर्वा भ्रातृव्यापनुत्त्यै" (तैसं ६.३.८) इति । 'घृतस्य 'कुल्याः घृतनदीः 'उप गच्छ । किं च 'ऋतस्य यज्ञस्य 'पथ्याः पथि भवास्ता नदीः 'उप 'प्रेहि इति संबन्धः । अत्र बहु घृतमाहुतमित्यभिप्रायः । एवं यज्ञं स्तुत्वा इदानीमापः स्तूयन्ते । हे 'सुपरिविष्टाः पात्रेषु पूरिताः 'देवीः हे देव्य 'आपः, यूयं स्वभावतः संस्कारतश्च 'शुद्धाः सत्यः 'देवेषु विषयभूतेषु पशुं 'वोढ्वम् । वाह प्रापणे । वहत पशुं प्रापयत । किं च 'वयम् अपि 'देवेषु 'सुपरिविष्टाः मध्येऽवस्थिताः 'परिवेष्टारः तेषां देवानां परिवेषणकर्तारः 'भूयास्म ॥१–२॥

---

2. V1 S1 C om. °आदि°
12. V1 S1 C °धारणं for °धारण°
15. V1 S1 C om. यज्ञो वा ... श्रुतेः ।
16. P1 before त्वम् adds किं च; V1 S1 C om. अप्रत्यृतः ... यद्वा
22. V1 S1 C वहतां for वहत; S1 C V1 om. पशुं प्रापयत । किं च वयमपि
 C S1 P1 om. सुपरिविष्टाः

आ– पत्नीं पशुं [प्रति] नयन् वाचयति– ‘ नमस्ते ’ इति । यज्ञदेवत्या गायत्री । पत्नी नमस्कारादिभिराशीर्भिर्यज्ञं पूजयति । हे ᵛआतान हे यज्ञ । “ यज्ञो वा आतानः ” (माशब्रा ३·५·२-२) इति श्रुतेः । आतन्यत इति आतानः इति । ᵛते तुभ्यं ᵛनमः । अर्वा अश्वः, तद्रहितो यज्ञः ᵛअनर्वा । ᵛप्रेहि प्रगच्छ आ समाप्तेः । ᵛघृतस्य ᵛकुल्याः घृतनदीः ᵛउप प्रेहि । ᵛऋतस्य यज्ञस्य ᵛपथ्याः पथि भवाः । ता नदीः ᵛउप प्रेहि इति संबन्धः । अत्र बहु घृतमाहुतमित्यभिप्रायः ॥१॥

एवं यज्ञं स्तुत्वा अथेदानीमप आह– ‘ देवीरापः ’ इति । अर्धमब्देवत्यम् । अर्धमाशीर्दैवत्यम् । सकला अनुष्टुप् । हे ᵛसुपरिविष्टाः पात्रेषु पूरिताः ᵛदेवीः हे देव्यः ᵛआपः ᵛशुद्धाः स्वभावतः संस्कारतश्च शुद्धाः सत्यो यूयम् । ᵛदेवेषु विषयभूतेषु पशुं ᵛवोढ्वम् । वह प्रापणे । वहत प्रापयत । तैर्देवैः ᵛसुपरिविष्टाः देवेषु मध्येऽवस्थिताः ᵛवयं तेषां देवानां ᵛपरिवेष्टारः परिवेषकर्तारो ᵛभूयास्म इति यजमानाशीः ॥२॥

वा॒चं॑ ते शुन्धामि प्रा॒णं ते॑ शुन्धा॒मि चक्षु॑स्ते शुन्धा॒मि श्रोत्रं॑ ते शुन्धामि ।
नाभिं॑ ते शुन्धा॒मि मेढ्रं॑ ते शुन्धामि पा॒युं ते॑ शुन्धामि च॒रित्राँ॑स्ते शुन्धामि ॥३॥

वाच॑म् । ते॒ । शु॒न्धा॒मि॒ । प्रा॒णम् । चक्षुः॑ । श्रोत्र॑म् ।
नाभि॑म् । मेढ्र॑म् । पा॒युम् । च॒रित्रा॑न् । ते॒ । शु॒न्धा॒मि॒ ॥रिंय॥३॥

सा– कात्यायनः – “ पशोः प्राणाञ्छुन्धति पत्नी । मुखं नासिके चक्षुषी कर्णौ नाभिं मेढ्रं पायुं पादान् संहृत्य वाचं ते शुन्धामीति प्रतिमन्त्रम् ” (काश्रौ ६·६·१–३) इति । पशुसंबन्धीनि प्राणस्थानानि मुखादिछिद्राणि पत्नी तत्तन्मन्त्रेण शोधयेत् । ‘वाचं ते शुन्धामि ’ इत्यादि ‘ चरित्रांस्ते शुन्धामि ’ इत्यन्ता अष्टौ मन्त्राः । तेषां पाठस्तु– ‘ वाचं ते शुन्धामि प्राणं ते शुन्धामि चक्षुस्ते शुन्धामि श्रोत्रं ते शुन्धामि । नाभिं ते शुन्धामि मेढ्रं ते शुन्धामि पायुं ते शुन्धामि चरित्रांस्ते शुन्धामि ’ इति । हे पशो, ᵛते तव संबन्धिनीं ᵛवाचं वागिन्द्रियं ᵛशुन्धामि शुद्धां करोमि । तथा त्वदीयं पञ्चवृत्तिकं ᵛप्राणं ᵛशुन्धामि उन्दनेन ।

---

1. H1 पश्यन् for पत्नीं पशुं नयन्; B1 नयेत् for नयन्
2. H1 आदर्शीभिः for आशीर्भिः
3. B1 च for ते
5. B1 after उप adds प्रेहि तस्य यज्ञस्य
9. B1 शुद्धं for पशुं
10. B1 इयमाशीः for यजमानाशीः
21. S1 V1 C om. उन्दनेन

तथा चक्षुरिन्द्रियं, श्रोत्रेन्द्रियं, नाभिच्छिद्रं, ᵛमेढ्रं गुह्येन्द्रियं, [ᵛपायुम् अपानेन्द्रियं], ᵛचरित्रान् चरणसाधनभूतान् पादान् । एवंविधानि त्वदीयानि सर्वेन्द्रियाणि ᵛशुन्धामि ॥३॥

आ– पशोः प्राणान् शुन्धति, पत्नीं वाचयति– 'वाचं ते' इति । द्वे पशुदेवत्ये यजुषी ॥ हे पशो, ᵛते तव ᵛवाचं वागिन्द्रियं ᵛशुन्धामि । ᵛते ᵛप्राणं पञ्चवृत्तिकं ᵛशुन्धामि । ᵛचक्षुः चक्षुरिन्द्रियं ᵛशुन्धामि । ᵛश्रोत्रं श्रोत्रेन्द्रियं, ᵛनाभिं नाभिच्छिद्रं, ᵛमेढ्रं गुह्येन्द्रियं, ᵛपायुम् अपानेन्द्रियं ᵛचरित्रान् चरणसाधनभूतान् पादान् सर्वव्यापारांश्च ᵛशुन्धामि ॥३॥

मन॑स्त॒ आ प्या॑यतां॒ वाक् त॒ आ प्या॑यतां
प्रा॒णस्त॒ आ प्या॑यतां॒ चक्षु॑स्त॒ आ प्या॑यतां॒ श्रोत्रँ॑ त॒ आ प्या॑यताम् ।
यत् ते॑ क्रू॒रँ यदास्थि॑तं॒ तत् त॒ आ प्या॑यतां॒
तत् ते॒ निष्ट्या॑यतां॒ तत् ते॑ शुध्यतु॒ शमहो॑भ्यः ॥४॥

मन॑ः । ते॒ । आ । प्या॒य॒ता॒म् ।
वाक् । प्रा॒णः । चक्षु॑ः । श्रोत्र॑म् ।
यत् । ते॒ । क्रू॒रम् । यत् । आस्थि॑त॒मित्याऽस्थि॑तम् । तत् । ते॒ । आ । प्या॒य॒ता॒म् ।
निः । स्त्या॒य॒ता॒म् । शु॒ध्य॒तु॒ । शम् । अहो॑भ्य॒ इत्यह॑ःऽभ्यः ॥ त्रिः ॥४॥

सा– कात्यायनः – "शेषेण यजमानश्च शिरःप्रभृत्यनुषिञ्चतः" (काश्रौ ६·६·४) इति । पत्न्या पश्ववयवजातं येनोदकेन शोधितं तेनोदकशेषेण अध्वर्युयजमानौ पशोः शिरआद्यङ्गान्यनुक्रमेण आसिञ्चेताम् । तदुच्यते ।

कात्यायनः – "मनस्त इति शिरः" (काश्रौ ६·६·५) इति । 'मनस्त आ प्यायताम्' इत्यनेन मन्त्रेण शिरः अनुसिञ्चेतामित्यर्थः । पाठस्तु– 'मनस्त आ प्यायतां वाक् त आ प्यायतां प्राणस्त आ प्यायतां चक्षुस्त आ प्यायतां श्रोत्रं त आ प्यायताम्' इति । हे पशो, ᵛते त्वदीयं ᵛमनः ᵛआप्यायतां शाम्यतु । एवं त्वदीयानि वाक्प्राणचक्षुःश्रोत्राणि शाम्यन्त्वित्यर्थः ॥

कात्यायनः –"यत् ते क्रूरमित्यङ्गानि" (काश्रौ ६·६·६) इति । मनःप्रभृतीनां मध्ये यान्यवशिष्टान्यङ्गानि तान्यवसिञ्चेताम् । पाठस्तु– 'यत् ते क्रूरं यदास्थितं तत् ते आ प्यायतां तत् ते निष्ट्यायतां तत् ते शुध्यतु' इति । हे पशो, ᵛते तव ᵛयद् बन्धनं मुखनिरोधादिकं ᵛक्रूरम् अस्माभिः कृतं, ᵛयत् च छेदनादिकम् ᵛआस्थितं कर्तुमुपस्थितं, ᵛतत् सर्वम् ᵛआप्यायताम् शाम्यतु । किं च ᵛतत् सर्वं ᵛते तव ᵛनिष्ट्यायतां स्तोत्रं (?) भवतु, तत्सर्वं शुद्धं भवतु ॥

---

1. P1 with markings above चरित्रान् ins. in the margin चरन्ति गच्छन्त्येभिरिति चरित्राः ।
4. H1 after चक्षुः ins. शुन्धामि
15. V1 S1 C °षिञ्चति for षिञ्चतः
17. V1 S1 C सिञ्चेताम् for आसिञ्चेताम्
25. P1 अव° for उप°; P1 च for ते and om. तव; V1 S1 C om. ते

संतप्तपशुहविःसंस्कारमन्त्राः]

कात्यायनः – "शमहोभ्य इति पश्चात् पशोर्निषिञ्चतः" (काश्रौ ६.९.७) इति । पशोर्जघनभागमध्वर्युयजमानौ निषिञ्चताम् । पाठस्तु– 'शमहोभ्यः' [इति ।] [ᵛअहोभ्यः] दिवसादिकालविशेषेभ्यः ᵛशं सुखमस्माकं पशोर्वा भूयादिति शेषः ॥४॥

आ – अध्वर्युयजमानौ पशुमाप्यायतः – 'मनस्ते' इति । हे पशो, ᵛते तव ᵛमनः ᵛआप्यायताम् । एवं प्राणचक्षुःश्रोत्राणि व्याख्येयानि । हे पशो, ᵛते तव अङ्गेषु ᵛक्रूरं विकृतम् अशान्तं वा ᵛयत् ᵛआस्थितम् अध्यवस्थितं निश्रितं ᵛतत् ᵛआप्यायताम् । ᵛनिष्ट्यायतां संहतं भवतु । ते तव तत् सर्वं ᵛशुध्यतु । जघनेन पशुमुदकं निनयतः 'शमहोभ्यः' इति । लिङ्गोक्तदेवत्या बृहती । ᵛअहोभ्यः अहरादिकालविशेषेभ्यः ᵛशं सुखम् अस्माकं भूयादिति शेषः । अहोभ्यः पशोर्वा संभूयात् ॥४॥

ओष॑धे॒ त्राय॑स्व॒ स्वधि॑ते॒ मैनꣳ॑ हिꣳसीः ।
रक्ष॑सां भा॒गो॑ऽसि॒ निर॑स्त॒ꣳ रक्षः॑ ॥५॥

ओष॑धे । त्राय॑स्व । स्वधि॑त॒ इ॒ति॒ स्वऽधि॑ते । मा । ए॒न॒म् । हि॒ꣳसी॒ः ।
रक्ष॑साम् । भा॒गः । अ॒सि॒ । निर॑स्त॒मिति॒ निःऽअ॑स्तम् । रक्षः॑ ॥ झां ॥५॥

सा– कात्यायनः – "अग्रेण नाभिं तृणं निदधात्योषध इति" (काश्रौ ६.९.८) इति । नाभेरग्रे दर्भं तृणं निदध्यात् । 'त्रायस्व' इति मन्त्रशेषः । आ [व्या ?] ख्यातं पूर्वाध्यायान्त्यानुवाके ॥

कात्यायनः – "स्वधित इति प्रज्ञातयाऽसिनिधाय छित्वा" (काश्रौ ६.६.९) इति । पूर्वं प्रसिद्धां स्वधितिं तृणस्योपरि स्थापयित्वा तया प्रसिद्धया स्वधित्या नाभिं छिन्द्यात् । पाठस्तु– 'स्वधिते मैनꣳ हिꣳसीः' इति । ᵛएनं पशुम् । अन्यन्मन्त्रशेषं (?) पूर्वमेव व्याख्यातम् ॥

कात्यायनः – "अग्रꣳ सव्ये कृत्वा दक्षिणेन मूलमुभयतोऽनक्ति लोहितेन रक्षसामिति" (काश्रौ ६.६.८) इति । यत् तृणं नाभेरग्रे स्थापितं तस्य तृणस्याग्रं वामहस्तेन धृत्वा दक्षिणहस्तेन मूलं धृत्वा अग्रमूलद्वयं छेदननिष्पन्नेन रक्तेन अञ्ज्यात् । 'भागोऽसि' इति मन्त्रशेषः । हे लोहिताक्ततृण, त्वं ᵛरक्षसां ᵛभागः ᵛअसि ॥

1,2. C1 आभि for नि°
5. B1 संयोगे for अङ्गेषु
6. B1 निश्चयं for निश्चितं
7. B1 संघातं for संहतं; B1 om. ते तव
15. S1 V1 C om. आख्यातं ... अनुवाके
16. S1 V1 C स्थिता for छित्वा; S1 V1 C पूर्वं° for पूर्वं
18. S1 V1 C मन्त्रद्वयं पत्रं इव for मन्त्रशेषं पूर्वमेव
19. P1 मूल उभयतो °for मूलमुभयतो°
20. S1 om. तृणस्य; P1 om. धृत्वा
21. V1 S1 C छेदनात् for छेदन°

कात्यायनः – "निरस्तमित्यपास्यति" (काश्रौ ६.६.१०) इति । लोहितावक्तं तृणं परित्यजेत् । 'रक्षः' इति मन्त्रशेषः । यद् यज्ञविघातकं रक्षः अस्ति तत् निरस्तं परित्यक्तम् ॥५॥

आ– अग्रेण नाभितृणं निदधाति– 'ओषधे त्रायस्व' इति । तृणदेवत्या गायत्री । अभिनिदधाति– 'स्वधिते मा' इति । आशीः । 'रक्षसां भागः' इति । व्याख्यातम् । अपास्यति – 'निरस्तꣳ रक्षः' इति ॥५॥

इदमहꣳ रक्षोऽभि तिष्ठामीदमहꣳ रक्षोऽव बाधे ।
इदमहꣳ रक्षोऽधमं तमो नयामि ॥६॥

इदम् । अहम् । रक्षः । अभि । तिष्ठामि । अव । बाधे ।
अधमम् । तमः । नयामि ॥ षं ॥६॥

सा– कात्यायनः – "इदमहमित्यभितिष्ठति यजमानः" (काश्रौ ६.६.११) इति । परित्यक्तं तृणमभित आक्रम्य यजमानस्तिष्ठेत् । पाठस्तु– 'इदमहꣳ रक्षोऽभि तिष्ठामीदमहꣳ रक्षोऽवबाधे । इदमहꣳ रक्षोऽधमं तमो नयामि' इति । यत् तृणरूपं रक्षः अध्वर्युणा निरस्तं तत् इदम् रक्षः अहम् यजमानः अभितः पादेनाक्रम्य तिष्ठामि । न केवलं स्थितिमात्रं किं तु अहम् इदम् रक्षः अवबाधे अवाचीनं यथा भवति तथा नाशयामि । अहम् इदं रक्षः अधमं तमः अत्यन्तनिकृष्टं तमः नयामि नरकं प्रापयामि ॥६॥

आ– 'इदमहम्' इति च द्वे रक्षोहणी यजुषी । यजमानोऽभितिष्ठति– 'इदमहम्' इति । यदेतत् तृणमभितिष्ठामि तत् इदम् अहं रक्षः अभितिष्ठामि । न केवलमभितिष्ठामि, किं तर्हि ? इदम् अहं रक्षः अहम् अव अवाचीनं बाधे नाशयामि । अहम्– इदम् अधमं अतिनिमृष्टं रक्षः रक्षोरूपं तमः नयामि नाशं नयामि ॥६॥

घृतेन द्यावापृथिवी प्रोर्णुवाथां वायो वे स्तोकानाम् ।
जुषाणो अग्निराज्यस्य वेतु स्वाहा ।
स्वाहाकृते ऊर्ध्वनभसं मारुतं गच्छतम् ॥६॥(३)॥

घृतेन । द्यावापृथिवी इति द्यावाऽपृथिवी । प्र । ऊर्णुवाथाम् । वायो इति वायो । वेः । स्तोकानाम् ।
जुषाणः । अग्निः । आज्यस्य । वेतु । स्वाहा ।
स्वाहाकृते इति स्वाहाऽकृते । ऊर्ध्वनभसमित्यूर्ध्वऽनभसम् । मारुतम् । गच्छतम् ॥दें॥६॥३॥

---

10. V1 S1 C after इति add शेषः

सा– कात्यायनः – " वपामुत्खिद्य वपाश्रपण्यौ प्रोर्णोति घृतेन द्यावापृथिवी इति " (काश्रौ ६·६·१२) इति । उदरदेशेऽवस्थितो वपाख्यो यो मांसविशेषः तां श्रपयतीति वपाश्रपणी । वपामुदरदेशात् पृथक्कृत्य वपासदृशया तया वपाश्रपण्यावाच्छादयेत् । ' प्रोर्ण्वाथाम् ' इति मन्त्रशेषः । हे ᵛद्यावापृथिवी, द्युलोकभूलोकसदृश्यौ वपाश्रपण्यौ भवदीयस्वरूपं ᵛघृतेन आज्यसमानया वपया ᵛप्रोर्ण्वाथाम् आच्छादयतम् । ऊर्णुञ् आच्छादने ॥

कात्यायनः – " तृणाग्रं चाध्वर्युर्वायो वेरिति " (काश्रौ ६.६.१५) इति । अध्वर्युर्बर्हिषोऽग्रभागमाहवनीये प्रास्यतीति शेषः । तथा बौधायनोऽप्याह – " आहवनीयस्यान्तिमेष्वङ्गारेषु वपायै प्रतितप्यमानायै बर्हिषोऽग्रमुपास्यति " (बौश्रौ ४.७) इति । ' स्तोकानाम् ' इति मन्त्रशेषः । हे ᵛवायो, वपायाः ᵛस्तोकानां वपासम्बन्धिनां विप्रुषां संघातमिति शेषः । ᵛवेः विद्धि पिबेत्यर्थः ॥

कात्यायनः :– " वपां स्रुवेणाभिघारयति जुषाणो अग्निरिति " (द्र. काश्रौ ६.६.१७) इति । पाठस्तु– ' जुषाणो अग्निराज्यस्य वेतु स्वाहा ' इति । ᵛजुषाणः सेवमानः आहवनीयः ᵛअग्निः ᵛआज्यस्य आज्यं ᵛवेतु पिबतु । ᵛस्वाहा सुहुतमस्तु ॥

कात्यायनः – " वपाश्रपण्यावनुप्रास्यति प्राचीं विशाखां प्रतीचीमितरां स्वाहाकृते इति " (काश्रौ ६.६.२८) इति । द्वयोः श्रपण्योर्मध्ये या विशाखा विविधशाखा विगतशाखा वा तामाहवनीयस्य प्राग्भागे इतरां प्रत्यग्भागे प्रक्षिपेत् । तथा च बौधायनः– " आहवनीये वपाश्रपणी प्रहरेत् । तयेति स्वाहोर्ध्वनभसं मारुतं गच्छतमिति प्राचीं द्विशाखां प्रतीचीमेकशूलाम् " (द्र. बौश्रौ ४·७; आपश्रौ ७·२१·३) इति । पाठस्तु – ' स्वाहाकृते ऊर्ध्वनभसं मारुतं गच्छतम् ' इति । हे वपाश्रपण्यौ, ᵛस्वाहाकृते स्वाहाकारेण प्राप्ते युवाम् ᵛऊर्ध्वनभसम् ऊर्ध्वं नभः आकाशो यस्य तादृशं वायुं ᵛगच्छतं प्राप्नुतम् ॥७॥

[इति षष्ठेऽध्याये तृतीयोऽनुवाकः]

आ– वपाश्रपण्यावाच्छादयति– ' घृतेन द्यावापृथिवी ', ' वायो वेः ' इति । द्वे वायव्ये । वपाश्रपण्यौ द्यावापृथिव्यावध्यास्यत इत्युच्यते । हे द्यावापृथिव्यौ, युवां ᵛघृतेन उदकेन ᵛप्रोर्ण्वाथाम् । ऊर्णुञ् आच्छादने । आच्छादयेथां परस्परम् । आहुतिपरिमाणाभिप्राय एषः । तृणाग्रमध्वर्युराहवनीये प्रास्यति – ' वायो वेः स्तोकानाम् ' इति । विद ज्ञाने इत्यस्य " दश्च " (पा ८·२·७५) इति रुत्वे कृते वेः इति भवति । ᵛवेः विद्धि । ᵛस्तोकानां विप्रुषां वपासंबन्धिनाम् । अत्र व्यत्ययः ।

---

3. V1 S1 C °सदृशतया for °सदृशया तया; P1 om. तया; V1 S1 C प्रोर्णयामि for प्रोर्ण्वाथाम्
4. P1 प्रोर्णवाथाम् P1 with marking above आज्य ins in the margin उदकेन
5. V1 S1 C om. ऊर्णुञ् आच्छादने
7. P1 S1 V1 C यैः for वपायै
9. V1 S1 C om. विप्रुषां; V1 S1 C वृद्धि for विद्धि; P1 with markings above वेः ins. in the margin विद ज्ञानेऽस्य दश्चेति रुत्वे कृते इदं रूपम्
14. P1 विविधा for विविध°
23. B1 परिणाम for परिमाण

हे वायो, स्तोकानां वेः विद्धि । वसामभिघारयति– ' जुषाणो अग्निः ' इति । आग्नेयं यजुः । ᵛजुषाणः सेवमान आहवनीयः ᵛअग्निः । ᵛआज्यस्य आज्यं ᵛवेतु पिबतु । [ᵛस्वाहा] सुहुतमस्तु । ᵛस्वाहाकृते स्वाहाकारेण कृते हुते हविषि ᵛऊर्ध्वनभसम् ऊर्ध्वं नभः आकाशो यस्य वायोः स तथोक्तः । तम् ऊर्ध्वनभसं ᵛमारुतं वायुं ᵛगच्छतं प्राप्नुतम् ।।६।।

[इति षष्ठेऽध्याये तृतीयोऽनुवाकः]

[चतुर्थोऽनुवाकः]

तृतीयेऽनुवाके संज्ञप्तपश्वाख्यहविःसंस्कारमन्त्रा उक्ताः । चतुर्थे वसाहोमो विधीयते–

सं ते॒ मनो॒ मन॑सा॒ सं प्रा॒णः प्रा॒णेन॑ गच्छताम् ।
रेळ॑स्य॒ग्निष्ट्वा॑ श्री॒णा॒त्वाप॑स्त्वा॒ सम॑रिणन् ।।१।।
वात॑स्य त्वा॒ ध्राज्यै॑ पू॒ष्णो रꣳह्या॑ ऊ॒ष्मणो॑ व्यथिषत् ।
प्रयु॑तं॒ द्वेष॑ः ।।२।।

सम् । ते॒ । मन॑ः । मन॑सा । सम् । प्रा॒णः । प्रा॒णेन॑ । ग॒च्छ॒ता॒म् ।
रेट् । अ॒सि॒ । अ॒ग्निः । त्वा॒ । श्री॒णा॒तु॒ । आप॑ः । त्वा॒ । सम् । अ॒रि॒ण॒न् ।।हैं।।१।।
वात॑स्य । त्वा॒ । ध्राज्यै॑ । पू॒ष्णः । रꣳह्यै॑ । ऊ॒ष्मण॑ः । व्य॒थि॒ष॒त् ।
प्रयु॑त॒मिति॒ प्रऽयु॑तम् । द्वेष॑ः ।।गौ।।२।।

कात्यायनः – "सं ते मन इति हृदमभिघार्य" (काश्रौ ६·८·६) इति । हृदयसंबन्धि मांसं पृषदाज्येन अभिघारयेत् । पाठस्तु– ' सं ते मनो मनसा सं प्राणः प्राणेन गच्छताम् ' इति । हे हृदय, ᵛते पशोस्तव ᵛमनः देवानां ᵛमनसा ᵛसंगच्छताम् । त्वदीयः ᵛप्राणः अपि देवानां ᵛप्राणेन संगच्छताम् ।।

कात्यायनः – "रेडसीति वसां गृहीत्वा" (काश्रौ ६·८·१२) इति । मांसपाकभाण्डे स्थितः स्नेहात्मको द्रवविशेषो वसा, तां गृह्णीयात् । पाठस्तु– ' रेळस्यग्निष्ट्वा श्रीणात्वापस्त्वा समरिणन् । वातस्य त्वा ध्राज्यै पूष्णो रꣳह्या ऊष्मणो व्यथिषत् ' इति । हे वसे, त्वं ᵛरेट् ᵛअसि । रिषतिर्हिंसार्थः । हिंसिता भवसि । तस्मादाहवनीयः ᵛअग्निः ᵛत्वा ᵛश्रीणातु आश्रयतु स्वीकरोतु । ᵛआपः च ᵛत्वा ᵛसमरिणन् सम्यक् प्राप्नुवन्तु । तव शेषो मा भूत् । हे वसे, त्वां दधामीति शेषः । किमर्थम् ? ᵛवातस्य वायोः ᵛध्राज्यै गत्यै, ᵛपूष्णः आदित्यस्य ᵛरꣳह्यै गत्यै । रंहतिर्ध्रजिश्च गतिकर्मा । वाय्वादित्ययोरप्रतिहतगमनसिद्ध्यर्थं त्वा

---

16. P1 घारयति for घार्य; C om. °संबन्धि°
18. V1 S1 C after संगच्छताम् ins अस्तु
23. P1 with markings above प्राप्नुवन्तु ins. in the margin बिभ्रतु । रिणाति बिभर्त्यर्थे इति भाष्यान्तरे ।
24. V1 S1 C om. ध्राजिश्च

ह्णामीत्यर्थः । ᵛऊष्मणः, ऊष्माऽन्तरिक्षं, तदर्थं त्वां गृह्णामीति । विशेषेणाधिक्येन सीदतीति ᵛव्यथिषत् । वसारूपं हविः, तथाविधं भवत्वित्यर्थः ॥

कात्यायनः – “ प्रयुतमिति पार्श्वेन संसृजति ” (काश्रौ ६.८.१२) इति । पार्श्वगतेन मांसेन मिश्रीकुर्यात् । “ पार्श्वेन वसाहोमं प्र यौति ” (तैसं ६.३.११) इति श्रुत्यन्तरात् । ‘ द्वेषः ’ इति मन्त्रशेषः । द्विष अप्रीतौ । वसापार्श्वमांसयोः परस्परमिश्रणेन यदप्रियमस्ति तदुभयोः सकाशात् ᵛप्रयुतं पृथग्भूतं भवतु ॥

आ – पशुहृदयमभिघारयति – ‘ सं ते मनः ’ इति । हृदयदेवत्या द्विपदाऽनुष्टुप् । हे पशो, [ᵛते] तव पृषदाज्येन अभिघारितं ᵛमनः अनेन ᵛमनसा ᵛसंगच्छताम् । तत्र ᵛप्राणः, पृषदाज्येनाभिघारितस्य तत्र प्राणः ᵛप्राणेन संगच्छताम् । वसां गृह्णाति– ‘ रेळसि ’ इति । वसादेवत्यं यजुः । रिषतिर्हिंसार्थः । ᵛरेट् ᵛअसि, [हे वसे,] या त्वं रिष्टा हिंसिता भवसि अल्पत्वेन (°त्वात् ?) । ‘ अग्निष्ट्वा श्रीणातु ’ । त्वां वसाम् ᵛअग्निः ᵛश्रीणातु । शृ पाके । पचतु श्रपयतु । अग्निः श्रीणातु त्वां भूयसीं करोतु । ‘ आपस्त्वा समरिणन् ’ । ᵛत्वा त्वां वसाम् ᵛआपः ᵛसमरिणन् समभरन् । रिणातिर्बिभर्त्यर्थे । आपो हि पच्यमानेभ्यः पश्वङ्गेभ्यो यं रसमुत्पादयन्ति सा वसा । तां वसाम् ।

ᵛवातस्य वायोः ᵛध्राज्यै गत्यै । वायोरप्रतिहतगतिसिद्ध्यर्थं त्वां गृह्णामीति शेषः । ‘ पूष्णो रंह्यै ’ । ᵛपूष्णः आदित्यस्य । रंहतिर्गत्यर्थः । आदित्यस्याप्रतिहतगत्यर्थं त्वां गृह्णामि । ‘ ऊष्मणः ’ । ऊष्मा अन्तरिक्षम् । ᵛऊष्मणः अन्तरिक्षस्य । अन्तरिक्षार्थं वसां गृह्णामि । ‘ व्यथिषत् प्रयुतं द्वेषः ’ । द्विष अप्रीतौ । वायोः सकाशात् ᵛप्रयुतं पृथग्भूतम् । द्वेषः अप्रियवचनः । ᵛव्यथिषत् विशेषेणाधिक्येन सीदतीति व्यथिषत् ॥२॥

घृतं घृतपावानः पिबत वसां वसापावानः पिबत ।
अन्तरिक्षस्य हविरसि स्वाहा ॥३॥

घृतम् । घृतपावान इति घृतऽपावानः । पिबत ।
वसाम् । वसापावान इति वसाऽपावानः । पिबत ।
अन्तरिक्षस्य । हविः । असि । स्वाहा ॥जं॥ ३॥

---

1. C तदर्थे
2. P1 with markings above भवत्विन्यर्थः ins. in the margin व्यथिषत् व्यथयतु अन्तरिक्षशक्तिमिति शेषः । अन्तरिक्षस्य तृप्तिं कृत्वा अतिरिच्यतामिति भाष्यान्तरे ।
6. B1 ते पशोः for हे पशो
10. H1 श्रपयन् for श्रपयतु
11. B1 om. त्वा त्वाम् ………समरिणन् [L12]
17. B1 before विशेषेण adds वि

सा– कात्यायनः –"वसैकदेशं जुहोति घृतं घृतपावान इति" (काश्रौ ६·८·१७) इति। स्वकृताया वसाया एकभागं जुहुयात्। पाठस्तु– 'घृतं घृतपावानः पिबत वसां वसापावानः पिबत। अन्तरिक्षस्य हविरसि स्वाहा' इति। हे 'घृतपावानः। पा पान इत्यस्य रूपम्। हे घृतस्य पातारः उपभोक्तारः, यूयं 'घृतं द्रवरूपं हविः 'पिबत। हे वसायाः पातारो देवताः, अत्रत्यं वसारूपमिदं हविः 'पिबत। हे वसो, त्वम् ['अन्तरिक्षस्य] अन्तरिक्षवासिनो देवगणस्य 'हविः 'असि। 'स्वाहा सुहुतमस्तु ॥३॥

आ– वसां जुहोति– 'घृतं घृतपावानः' इति। लिङ्गोक्तदेवत्या। वसायां घृतं विद्यते। द्विरभिघारणस्य विहितत्वात्। पा पान इत्यस्य क्वनिबन्तस्य रूपं 'घृतपावानः' इति। घृतेन [घृतस्य ?] पावानः पातारः उपभोक्तारः ᵛघृतं ᵛपिबत। हे ᵛवसापावानः वसायाः पातारः, ᵛवसां ᵛपिबत। हे वसे, ᵛअन्तरिक्षस्य अन्तरिक्षलोकाभिमानिदेवतायाः ᵛहविः ᵛअसि। ᵛस्वाहा एतद्धविः सुहुतमस्तु ॥३॥

दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा।
ऐन्द्रः प्राणो अङ्गेअङ्गे निधीत ऐन्द्र उदानो अङ्गेअङ्गे निदीधे ॥४॥
देव त्वष्टर्भूरि ते सꣳसमेतु सलक्ष्मा यद्विषुरूपं भवाति।
देवत्रा यन्तमवसे सखायोऽनु त्वा माता पितरो मदन्तु ॥५॥(४)॥

दिशः। प्रदिश इति प्रऽदिशः। आदिश इत्याऽदिशः। विदिश इति विऽदिशः।
उद्दिश इत्युत्ऽदिशः। दिग्भ्य इति दिक्ऽभ्यः। स्वाहा।
ऐन्द्रः। प्राणः। अङ्गेअङ्ग इत्यङ्गेऽअङ्गे। निधीत इति निऽधीतः। ऐन्द्रः। उदान इत्युतऽआनः। अङ्गेअङ्ग इत्यङ्गेऽअङ्गे। नि। दीधे ॥ तें ॥४॥
देव। त्वष्टः। भूरि। ते। सꣳसमिति सम्ऽसम्। एतु। सलक्ष्मेति सऽलक्ष्म।
यत्। विषुरूपमिति विषुऽरूपम्। भवाति।
देवत्रेति देवऽत्रा। यन्तम्। अवसे।
सखायः। अनु। त्वा। माता। पितरः। मदन्तु ॥दौं॥५॥(४)॥

---

1. V1 S1 C स्वीकृतायाः for स्वकृताया
3. P1 with marking above °पावानः ins. on the margin अतो मनिन्-क्वनिप्-वनिपश्चेति; P1 वा for यूयं
5. V1 S1 C om. स्वाहा। सुहुतमस्तु
7. B1 om. क्वनिबन्तस्य रूपम्

सा–कात्यायनः– “दिशो व्याघारयति वसाशेषेण वाजिनवत्” (काश्रौ. ६.८.२१) इति ॥ जुहुयादित्यर्थः । पाठस्तु– ‘दिशः प्रदिश अदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा’ इति । वसाशेषेण सर्वाभ्यः प्राच्यादिदिग्भ्यः ‘दिशः’ इत्यादिमन्त्रषट्केण होमं कुर्यात् । हे ᵛदिशः, युष्मभ्यं ‘स्वाहा’ इत्याध्याहारः। एवमन्यत्रापि ॥

कात्यायनः– “ऐन्द्रः प्राण इति पशुं संमृशति” (काश्रौ· ६·९·१) इति। पशुरूपं हविः संस्पृशेत् । पाठस्तु– ‘ऐन्द्रः प्राणो अङ्गेअङ्गे निधीत ऐन्द्र उदानो अङ्गेअङ्गे निदीधे ।। देव त्वष्टर्भूरि ते सꣳसमेतु सलक्ष्मा यद्विपुरूपं भवाति । देवत्रा यन्तमवसे सखायोऽनु त्वा माता पितरो मदन्तु’ इति । ᵛऐन्द्रः इन्द्रसंबन्धी प्राणवायुः ᵛअङ्गेअङ्गे पशोः सर्वेष्वङ्गेषु ᵛनिधीतः निहितः । तथा इन्द्रसंबन्धी उदानवायुः पशोः सर्वेष्वङ्गेषु निक्षिप्तः । हे ᵛत्वष्टः त्वष्टृनामक ᵛदेव, ᵛयत् पशोरङ्गजातं ᵛसलक्ष्मा समानलक्षणं सत् छेदने ᵛविपुरूपं सर्वतो व्यापि तेजोरूपं ᵛभवाति तत् सर्वं तवानुग्रहेण ᵛभूरि बहु अत्यन्तं, संसम् इत्येकीभावे । एकीकृत्य समेतु संगच्छताम् । हे पशो, ᵛदेवत्रा ᵛयन्तं देवेषु गच्छन्तं त्वां ᵛसखायः इतरे पशवः ᵛमाता ᵛपितरः च ᵛअनु ᵛमदन्तु हर्षं कुर्वन्तु । ᵛअवसे त्वन्मुखेन स्वर्गप्राप्त्या स्वकुलं सर्वमवितुम् [इत्यर्थः] ॥४–५॥

[इति षष्ठाध्याये चतुर्थोऽनुवाकः]

आ– ‘दिश प्रदिशः’ इति । अत्र “स्वाहाकारः सर्वत्र साकाङ्क्षत्वात्” (काश्रौ ४·४·१८) इति कात्यायनः । अत एवं व्याख्या– ‘दिशः स्वाहा’ इति । दिग्भ्यः ᵛस्वाहा । प्रदिग्भ्यः स्वाहा । आदिग्भ्यः स्वाहा । विदिग्भ्यः स्वाहा । उद्दिग्भ्यः स्वाहा । होमार्थोऽयम् ॥

पशुं संमृशति– ‘ऐन्द्रः’ इति । लिङ्गोक्तदेवत्या गायत्री । इन्द्रस्यात्मनः ᵛप्राणः ᵛऐन्द्रः । अस्य पशोः ᵛअङ्गेअङ्गे इति वीप्सा । पशोर्यावन्त्यङ्गानि तेषु सर्वेषु अङ्गेषु ᵛनिधीतः । दीधीङ् दीप्तिदेवनयोरित्यस्य रूपम् । निधीयत इति निधीतः प्राणः । इन्द्रसंबन्धी ᵛऐन्द्रः ᵛउदानः वायुः ᵛअङ्गेअङ्गे सर्वाङ्गेषु ᵛनिदीधे निहितः ॥४॥

अथ त्वष्टारमाह– ‘देव त्वष्टः’ इति । त्वाष्ट्री त्रिष्टुप् । त्वष्टा [हि] रूपाणाम् [ईष्टे] रूपकृद्रूपपतिश्च । अतो हे ᵛत्वष्टः हे ᵛदेव, ᵛभूरि ᵛते तव संबन्धि तेजोरूपं भूरि बृहत् ।

---

3. V1 S1 C om. हे दिशः·········अन्यत्रापि [L 43]
9. P1 उदानो for उदान°
10. V1 S1 C बृहत् for बहु
13. V1 S1 C अवतु; P1 आप्यायताम् for अवितुम्
15. H1 om. सर्वत्र
16. H1 एव for एवं
17. B1 om. स्वाहा । विदिग्भ्यः स्वाहा ।
19. B1 तस्य for अस्य
23. B1 om. च ।

समित्येकीभावे । ^{v}यत् ^{v}सलक्ष्मा समानलक्षणं सत् । यदसिना [वि–] कृतं सत् ^{v}विषुरूपं सर्वतो व्यापि तेजोरूपं ^{v}भवाति भवति, तत् सर्वं सम् एकीकृत्य समेतु पुनः पशोः रूपेण संगच्छतु । हे पशो, एवं प्राणादिभिर्दृढीकृतम् ^{v}अवसे अवनाय प्रीत्यै प्रीत्यर्थं ^{v}यन्तं गच्छन्तम् । ^{v}देवत्रा । द्वितीयार्थे, देवान् प्रति गच्छन्तं ^{v}त्वा त्वां देवत्रा देवेषु विषयभूतेषु । देवानां पालका वा । त्वाष्ट्रं (त्वष्टारं ?) दृष्ट्वा ^{v}मदन्तु हर्षं कुर्वन्तु । मदी हर्षे । ते ^{v}सखायः त्वाम् ^{v}अनु ^{v}मदन्तु ^{v}माता च ^{v}पितरः च अनुमदन्तु अभ्यनुजानन्तु ॥५॥

[इति षष्ठाध्याये चतुर्थोऽनुवाकः]

[अथ पञ्चमोऽनुवाकः]

सा– चतुर्थे वसाहोममन्त्रा उक्ताः। पञ्चमे गुदकाण्डेनोपपट्टुसंज्ञका होमा उच्यन्ते–

स॒मु॒द्रं ग॑च्छ॒ स्वाहा॑ दे॒वꣳ स॑वि॒तारं॑ गच्छ॒ स्वाहा॑ ।
अ॒न्तरि॑क्षं गच्छ॒ स्वाहा॑ मि॒त्रावरु॑णौ गच्छ॒ स्वाहा॑ ।
अ॒हो॒रा॒त्रे ग॑च्छ॒ स्वाहा॒ छन्दा॑ꣳसि गच्छ॒ स्वाहा॑ ।
द्यावा॑पृथि॒वी ग॑च्छ॒ स्वाहा॒ सोमं॑ गच्छ॒ स्वाहा॑ ।
य॒ज्ञं ग॑च्छ॒ स्वाहा॒ नभो॑ दि॒व्यं ग॑च्छ॒ स्वाहा॑ ।
अ॒ग्निं वै॑श्वान॒रं ग॑च्छ॒ स्वाहा॒
मनो॑ मे॒ हार्द्य॑च्छ ॥ १ ॥

स॒मु॒द्रम् । ग॒च्छ॒ । स्वाहा॑ । दे॒वम् । स॒वि॒तार॑म् ।
अ॒न्तरि॑क्षम् । मि॒त्रावरु॑णौ ।
अ॒हो॒रा॒त्रे इत्य॑हो॒रा॒त्रे । छन्दा॑ꣳसि ।
द्यावा॑पृथि॒वी इति॒ द्यावा॑पृथि॒वी । सोम॑म् ।
य॒ज्ञम् । नभः॑ । दि॒व्यम् । ।
अ॒ग्निम् । वै॒श्वा॒न॒रम् ।
मनः॑ । मे॒ । हार्त् । य॒च्छ॒ ॥ छः ॥ १ ॥

---

1. B1 संभूयात् for सत् । यत्
3. B1 अवसानाय for अवनाय
9. P1 om. चतुर्थे ... उच्यन्ते

कात्यायनः– “ गुदतृतीयस्य परिच्छेदमनुयाजेषु अनु समुद्रं गच्छेति प्रतिमन्त्रम् । प्रतिवषट्कारं हुत्वा ” (द्र. काश्रौ ६.९. १०–११) इति । गुदकाण्डस्य तृतीयभागमेकादशधा तिर्यक् छित्वा अनुयाजानामेकैकस्मिन् वषट्कारे सति ‘ समुद्रं गच्छ स्वाहा ’ इत्येतदादिभिः ‘ अग्निं वैश्वानरं गच्छ स्वाहा ’ इत्येतदन्तैरेकादशभिर्मन्त्रैरेकैकं गुदकाण्डभागं प्रतिप्रस्थाता जुहुयात् । एतेषां पाठस्तु– ‘ समुद्रं गच्छ स्वाहा देवᳩ सवितारं गच्छ स्वाहा । अन्तरिक्षं गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहा । अहोरात्रे गच्छ स्वाहा छन्दांसि गच्छ स्वाहा । द्यावापृथिवी गच्छ स्वाहा सोमं गच्छ स्वाहा । यज्ञं गच्छ स्वाहा नभो दिव्यं गच्छ स्वाहा । अग्निं वैश्वानरं गच्छ स्वाहा ’ इति । हे हविः, त्वं समुद्रादिनामकान् देवान् ᵛगच्छ प्राप्नुहि । सुहुतमस्तु ॥

कात्यायनः – “ मनो म इति मुखोपस्पर्शनम् ” (काश्रौ ६.९.११) इति । अथ यज्ञहोमान्ते मुखं स्पृशेत् । ‘ हार्द्यच्छ ’ इति मन्त्रशेषः । हे समुद्रादिदेवतासमूह, हृदः संबन्धि हार्दम् । ᵛमे मदीयं ᵛमनः ᵛयच्छ निबध्नीहि ॥१॥

आ– प्रतिप्रस्थातोपजपति– ‘ समुद्रं गच्छ ’ इति । द्वादश यजूँषि लिङ्गोक्तदेवत्यानि । हे हविः, त्वं ᵛसमुद्रं समुद्राभिमानिनं देवं ᵛगच्छ । ᵛस्वाहा सुहुतमस्तु । ᵛसवितारं ᵛदेवं ᵛगच्छ । ᵛअन्तरिक्षं, ᵛमित्रावरुणौ, ᵛअहोरात्रे अहोरात्र्य(त्रा ?) भिमानिदेवते, ᵛछन्दांसि छन्दोऽभिमानिदेवताः, ᵛद्यावापृथिवी, ᵛसोमं, ᵛयज्ञं, ᵛनभः, दिवि भवं ᵛदिव्यम्, ᵛअग्निं ᵛवैश्वानरम् । ‘ हविर्गच्छ ’ इति संबन्धः । ᵛस्वाहा सुहुतमस्तु ।

मुखं विमृष्टे– ‘ मनो मे हार्धच्छ ’ इति । हार्तृ ᵛमे ᵛमनः । हार्तृ हृदः संबन्धि हार्दं हृदयं ᵛयच्छ बध्नीहि ॥ १ ॥

दिवं ते धूमो गच्छत्वन्तरिक्षं ज्योतिः ।
पृथिवीं भस्मनाऽऽ पृण स्वाहा ॥ २ ॥

दिवम् । ते । धूमः । गच्छतु । अन्तरिक्षम् । ज्योतिः ।
पृथिवीम् । भस्मना । आ । पृण । स्वाहा ॥ षां ॥ २ ॥

सा–कात्यायनः – “ स्वरुं जुहोति दिवं ते धूम इति ” (काश्रौ ६.९.१२) इति । पाठस्तु– दिवं ते धूमो गच्छत्वन्तरिक्षं ज्योतिः । पृथिवीं भस्मनाऽऽ पृण स्वाहा ’ इति । हे स्वरो, ᵛते तव संबन्धी ᵛधूमः ᵛदिवं द्युलोकं ᵛ गच्छतु । तव ᵛज्योतिः ज्वाला [ᵛअन्तरिक्षम्] अन्तरिक्षलोकं गच्छतु । तव ᵛभस्मना ᵛपृथिवीं भूलोकम् ᵛआपृण समन्तात् पूरय ॥२॥

---

1. P1 om. कात्यायनः
10. P1 उपस्पृशत् for स्पृशेत्; P1 with markings above हार्दम् ins. on the margin आदिवृद्धिश्छान्दसी । [सायणाचार्यानन्दबोधयोः भाष्ये पदपाठं नानुसरतः ।
13. B1 om. सवितारं ········ सुहुतमस्तु [L 16]
25. V1 S1 C om. तव ज्योतिर् ······ गच्छतु ।

आ – स्वरुं जुहोति – ‘ दिवं ते ’ इति । स्वरुदेवत्या गायत्री । हे स्वरो, Vते तव संबन्धी Vधूमः Vदिवं द्युलोकं Vगच्छतु वृष्ट्यर्थम् । Vअन्तरिक्षं Vज्योतिः ज्वाला अन्तरिक्षलोकं गच्छतु । तव Vभस्मना Vपृथिवीम् Vआपृण आपूरय । Vस्वाहा सुहुतमस्तु ॥२॥

माऽपो मौषधीर्हिꣳसीर्धाम्नोधाम्नो राजꣳस्ततो वरुण नो मुञ्च ।
यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च ॥ ३ ॥
सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु ।
योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥ ४ ॥
इदमापः प्रवहत यत् किं च दुरितं मयि ।
यद्वाऽहमभिदुद्रोह यद्वा शेप उतानृतम् ॥ ५ ॥ (५) ॥

मा । अपः । मा । ओषधीः । हिꣳसीः ।
धाम्नोधाम्न इति धाम्नःऽधाम्नः । राजन् । ततः । वरुण । नः । मुञ्च ।
यत् । आहुः । अघ्न्याः । इति । वरुण । इति । शपामहे ।
ततः । वरुण । नः । मुञ्च ॥ क्यिः ॥ ३ ॥
सुमित्रिया इति सुऽमित्रियाः । नः । आपः । ओषधयः । सन्तु ।
दुर्मित्रिया इति दुःऽमित्रियाः । तस्मै । सन्तु ।
यः । अस्मान् । द्वेष्टि । यम् । च । वयम् । द्विष्मः ॥ ज्यूं ॥ ४ ॥
इदम् । आपः । प्र । वहत । यत् । किम् । च । दुरितमिति दुःऽइतम् । मयि ।
यत् । वा । अहम् । अभिदुद्रोहेत्यभिऽदुद्रोह । यत् । वा । शेपे । उत । अनृतम् । छों ॥५॥

सा–कात्यायनः – “ शुष्कार्द्रसंधौ हृदयशूलमुपगूहति . . माऽपो मौषधीरिति ”(काश्रौ ६.१०.३) इति । आलब्धस्य पशोः हृदयस्थमांसादानार्थं यः शूलो विहितः तं शुष्कार्द्रभूप्रदेशयोः संधौ निगूहेत् । पाठस्तु– ‘ माऽपो मौषधीर्हिꣳसीः ’ इति । हे हृदयशूल, त्वम् Vअपः देवताः Vमा Vहिꣳसीः मा वधीः ॥

कात्यायनः – “ धाम्नोधाम्नः सुमित्रिया न इत्युपस्पृशन्त्यपः ” (काश्रौ- ६.१०.५) इति । आभ्यां मन्त्राभ्यां मार्जयेरन् । पाठस्तु– ‘ धाम्नोधाम्नो राजꣳस्ततो वरुण नो मुञ्च । यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च ॥ सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु । योऽस्मान् द्वेष्टि यं च वयं द्विष्मः । इदमापः प्रवहत यत् किं च दुरितं मयि । यद्वाऽहमभिदुद्रोह यद्वा शेप उतानृतम्’ इति । हे Vराजन्, Vवरुण, Vधाम्नोधाम्नः यस्मात यस्मात् त्वदीयपाशसमन्वितात् स्थानात् वयं भीताः, तस्मात् तस्मात् स्थानात् Vनः अस्मान् Vमुञ्च मोचय । किं च, हे Vवरुण, भवदाद्याः सर्वा देवताः Vअघ्न्याः

---

19. V1 S1 C °सध्यौ for °संधौ
26. V1 S1 C om. first यस्मात्
27. V1 S1 C ततः for first तस्मात्

अहन्तव्याः पूजनीया इत्यर्थः। ^{v}इति ^{v}यत् ^{v}आहुः ब्रह्मवादिनो वदन्ति, इत्येवं सति अस्माकमिष्टप्राप्त्यनिष्टपरिहारार्थं वयं ता देवताः ^{v}शपामहे। ^{v} ततः तस्मात् पापात् हे ^{v}वरुण, ^{v}नः अस्मान् ^{v}मुञ्च मोचय। अब्देवता ओषधयश्च ^{v}नः अस्माकं ^{v}सुमित्रियाः ^{v}सन्तु, सुमित्रेषु साधवः योग्याः भवन्तु।^{v}यः शत्रुः ^{v}अस्मान् ^{v}द्वेष्टि, ^{v}वयं ^{v}यं शत्रुं ^{v}द्विष्मः द्वेषं कुर्मः तस्मादुभयात्मकाय शत्रवे आप ओषधयश्च ^{v}दुर्मित्रियाः ^{v}सन्तु अमित्रत्वेन दुष्टत्वेन अवस्थिता भवन्तु॥ हे ^{v}आपः, ^{v}इदं पशुसंज्ञपननिमित्तं पापं ^{v}वहत अपनयत। ^{v}यत् किं ^{v}च ^{v}दुरितम् अभिशापादिरूपं पापं ^{v}मयि स्थितं तदप्यपनयत। ^{v}वा अथवा ^{v}यत् प्राणिमात्रम् ^{v}अहम् ^{v}अभिदुद्रोह हिंसां कृतवानस्मि ^{v}उत ^{v}वा अहं ^{v}यत् ^{v}अनृतम् अनृतवादिनं यमपराधिनमनपराधिनं [वा] ^{v}शेपे शापं कृतवानस्मि, हे आपः, तदेतद्द्रोहादिकृतं पापमपनयत॥ ३–५॥ (५)॥

[इति षष्ठेऽध्याये पञ्चमोऽनुवाकः]

आ– हृदयशूलमुपगूहति– ['माऽपो मौषधीः' इति।] हृदयशूलदेवत्यं यजुः। हे हृदयशूल, ^{v}अपः ^{v}मा ^{v}हिꣳसीः, ^{v}ओषधीः अपि ^{v}मा हिꣳसीः। 'धाम्नोधाम्नः' इति वरुणदेवत्यं यजुः। वरुणमाह– हे ^{v}राजन् हे ^{v}वरुण, ^{v}धाम्नोधाम्नः, धामशब्दोऽत्र स्थानवचनः। यतो यतः पाशसमन्वितात् स्थानात् [वयं] भीतास्ततस्ततः भीतान् ^{v}नः अस्मान ^{v}मुञ्च। 'यदाहुः' इति वरुणदेवत्या अनवसाना गायत्री। 'अघ्न्याः' इति गोनाम। इह तु प्रकरणादवध्याविषयः। ^{v}यत् ^{v}आहुः वेदस्मृतिलोकाः ^{v}अघ्न्याः ^{v}इति अवध्याः इति न वधार्हाः। किन्तु वन्द्या इति एवं पूजनीयाश्च। 'वरुण' इति। हे ^{v}वरुण, वयं तु ^{v}इति ^{v}शपामहे। शपतिर्हिंसार्थः। इतिकारो वाक्यानुप्रदर्शनार्थः। एवमनेन विधिना वयं हिंस्मः, 'अघ्न्या' इति वयं वदामहे (वदामः?)। ^{v}ततः वरुण, ^{v}नः ^{v}मुञ्च ततस्तस्मादेनसः अस्मान् मुञ्च॥३॥

अभिमन्त्रयते– 'सुमित्रिया नः' इति। अब्देवत्या त्रिपदाऽनुष्टुप्। सुमित्रेषु साधवः सुमित्र्याः। अस्माकम् ^{v}आपः ^{v}सुमित्रियाः ^{v}सन्तु। ^{v}ओषधयः च सुमित्रियाः सन्तु। दुर्मित्रत्वेन अवस्थिताः ^{v}दुर्मित्रियाः। ^{v}यः शत्रुः ^{v}अस्मान् ^{v}द्वेष्टि ^{v}तस्मै दुर्मित्रियाः सन्तु। ^{v}यं ^{v}च शत्रुं ^{v}वयं ^{v}द्विष्मः तस्मै आपः ओषधयो दुर्मित्रियाः सन्तु॥ ४॥

---

1. V1 S1 C om. प्राप्त्यनिष्ट° [L 2]
3. PI सुमित्र्याः for सुमित्रियाः V1 S1 C om. साधवः;
4. V1 S1 C तस्मादुभयात्मका ये शत्रवस्तेषाम् for तस्मा° … शत्रवे; P1 दुर्मित्र्याः for दुर्मित्रियाः P1 तस्मत् for तस्मै
6. V1 S1 C किंचिद् for किं च
7. P1 om. आभि°; P1 om. अपराधिनम्; V1 S1 C om. अनपराधिनं
13. B1 अतः for ततस्ततः
19. B1 अभिमुञ्चत for अभिमन्त्रयते; B1 for सुमित्रियाः everywhere.
21. B1 दुर्मित्र्याः for दुर्मित्रियाः everywhere; B1 अस्मै for तस्मै

चात्वाले मार्जयन्ति– ‘ इदमापः ’ इति । अब्देवत्याऽनुष्टुप् । हे ᵛआपः, इदं पशुसंज्ञपननिमित्तं पापं ᵛप्रवहत अपनयत । ᵛयत् ᵛकिं ᵛच ᵛदुरितम् अभिशापादिमलं ᵛमयि स्थितं तत् प्रवहत अपनयत। यद्वा– द्रुह जिघांसायाम् । ᵛअहं ᵛयत् प्राणिमात्रम् ᵛअभिदुद्रोह हिंसां कृतवानस्मि, ᵛयत् ᵛअनृतम् अनृतवादिनं यम् अपराधिनमनपराधिनं ᵛवा अहं ᵛशपे । शप आक्रोशे । शापं कृतवानस्मि । तदेतद्द्रोहादिकृतं दुरितम् अपनयत ॥ ५ ॥ (५) ॥

[इति षष्ठेऽध्याये पञ्चमोऽनुवाकः]

[अथ षष्ठोऽनुवाकः]

सा– पञ्चमे गुदकाण्डहोमो वर्णितः । एतावता अग्नीषोमीयपशुः समाप्तः । अथ सोमाभिषवोपयुक्तानां वसतीवरीसंज्ञकानाम् अपामुपादानं षष्ठेऽभिधीयते–

ह॒विष्म॑तीरि॒मा आपो॑ ह॒विष्मा॒ँ३ आ वि॑वासति ।
ह॒विष्मा॑न् दे॒वो अ॑ध्व॒रो ह॒विष्माँ॑३ अस्तु॒ सूर्यः॑ ॥ १ ॥

ह॒विष्म॑तीः । इ॒माः । आपः॑ । ह॒विष्मा॑न् । आ । वि॒वा॒स॒ति॒ ।
ह॒विष्मा॑न् । दे॒वः । अ॒ध्व॒रः । ह॒विष्मा॑न् । अ॒स्तु॒ । सूर्यः॑ ॥ ᳲत्र ॥ १ ॥

कात्यायनः – “ वसतीवरीग्रहणं हविष्मतीरिति ” (द्र. काश्रौ ८.९.७) इति । सोमाभिषवणसाधनभूता वसतीवरीसंज्ञिका अपो गृह्णीयात्। पाठस्तु– ‘ हविष्मतीरिमा आपो हविष्माँ३ आ विवासति । हविष्मान् देवो अध्वरो हविष्माँ३ अस्तु सूर्यः ’ इति। ᵛहविष्मान् हविषा संयुक्तोऽयं यजमानः ᵛहविष्मतीः हविषा सोमेन युक्ताःᵛइमाः वसतीवरीः ᵛआपः ᵛआविवासति परिचरति। ततः ᵛदेवः द्योतमानः ᵛअध्वरः यागोऽपि स्वशरीरनिष्पत्त्यर्थं ᵛहविष्मान् भवतु । किं च ᵛसूर्यः अपि देवो यजमानस्य फलदानाय स्वसंतृप्त्यर्थं ᵛहविष्मान् हविःसंपन्नो भवतु ॥ १ ॥

आ–वसतीवरीर्गृह्णाति – ‘ हविष्मतीः ’ इति । लिङ्गोक्तदेवत्याऽनुष्टुप् । याः ᵛइमाः ᵛहविष्मतीः हविषा संयुक्ताः ᵛआपः । ᵛहविष्मान् हविषा युक्तो यजमानः ᵛआविवासति आविपूर्वो वासतिः परिचरत्यर्थः । यजमानो हविःप्रदानाय परिचरति । ᵛहविष्मान् ᵛअध्वरः यज्ञः स्वशरीरनिष्पत्त्यर्थं ᵛहविष्मान् भवतु । सु शोभनतया ईरणात् ᵛसूर्यः । सूर्यः देवः यजमानस्य फलदानाय स्वतृप्त्यर्थं ᵛहविष्मान् हवि संपन्नः ᵛअस्तु ॥ १ ॥

---

8. V1 S1 C °षोमीयः for °षोमयि°
16. V1 S1 C om. अयं

अ॒ग्नेर्वो॑ऽप॑न्नगृहस्य॒ सद॑सि सादयामि ।
इ॒न्द्रा॒ग्न्योर्भा॑ग॒धेयी॑ स्थ मि॒त्राव॑रुणयोर्भाग॒धेयी॑ स्थ ।
विश्वे॑षां दे॒वानां॑ भाग॒धेयी॑ स्थ ॥ २ ॥
अ॒मूर्या उप॒ सूर्ये॒ याभि॑र्वा॒ सूर्यः॑ स॒ह ।
ता नो॑ हिन्वन्त्वध्व॒रम् ॥ ३ ॥ (६) ॥

अ॒ग्नेः । व॒ः । अप॑न्नगृह॒स्येत्यप॑न्नऽगृहस्य । सद॑सि । सा॒द॒या॒मि॒ ।
इ॒न्द्रा॒ग्न्योः । भा॒ग॒धे॒यी॒रिति॑ भा॒ग॒ऽधेयीः॑ । स्थ॒ । मि॒त्राव॑रुणयोः ।
विश्वे॑षाम् । दे॒वाना॑म् । भा॒ग॒धे॒यी॒रिति॑ भा॒ग॒ऽधेयीः॑ । स्थ॒ ॥ द्रीं ॥ २ ॥
अ॒मूः । याः । उप॑ । सूर्ये॑ । याभिः॑ । वा॒ । सूर्यः॑ । स॒ह ।
ताः । न॒ः । हि॒न्व॒न्तु॒ । अ॒ध्व॒रम् ॥ रिं ॥ ३ ॥ (६) ॥

सा– कात्यायनः – "अग्नेर्व इति निदधाति शालाद्वार्यमपरेण" (काश्रौ. ८.९.११) इति । नूतनगार्हपत्यस्य पश्चिमभागे वसतीवरीसंज्ञका अपो निदध्यात् । पाठस्तु– 'अग्नेर्वोऽपन्नगृहस्य सदसि सादयामि' इति । हे वसतीवर्यः, वः युष्मान् अपन्नगृहस्य अविनश्वरगृहस्य शालामुखीयाग्नेः सदसि समीपस्थाने सादयामि स्थापयामि ॥

कात्यायनः – "दक्षिणस्यामुत्तरवेदिश्रोण्यां निदधातीन्द्राग्न्योरिति" (काश्रौ. ८.९.१८) इति । शालामुखीयाग्नेः पश्चिमभागे स्थापिता वसतीवरीरादाय उत्तरवेदेर्दक्षिणश्रोण्यां निदध्यात् । 'भागधेयीः स्थ' इति मन्त्रशेषः । हे वसतीवर्यः, यूयम् इन्द्राग्न्योः इन्द्राग्निदेवतयोः भागधेयीः स्थ भागधेययो भागरूपा भवथ ॥

कात्यायनः – "उत्तरस्यां पूर्ववत् । मित्रावरुणयोरिति वा" (काश्रौ ८.९.२१.२२) इति । दक्षिणश्रोण्यां स्थापिता वसतीवरीः पुनरप्यादाय पूर्वमन्त्रेण वा अनेन मन्त्रेण वा उत्तरश्रोण्यां निदध्यात् । 'भागधेयीः स्थ' इति मन्त्रशेषः । हे वसतीवरीसंज्ञका आपः यूयं मित्रावरुणदेवतयोर्भागरूपा भवथ ॥

कात्यायनः – "विश्वेषां देवानामित्याग्नीध्रे" (काश्रौ ८.९.२३) इति । उत्तरस्यां श्रोण्यां स्थापिता वसतीवरीः पुनरप्यादाय आग्नीध्रमण्डपे निदध्यात् । पाठस्तु–'विश्वेषां देवानां भागधेयीः स्थ । अमूर्या उप सूर्ये याभिर्वा सूर्यः सह । ता नो हिन्वन्त्वध्वरम्' इति । हे वसतीवर्यः, यूयं सर्वेषां देवानां भागरूपा भवथ । इदानीमभिनयेन दर्शयन्नाह– याः प्रसिद्धाः अमूः ईदृग्रूपाः वसतीवर्याख्या आपः उप

---

17. P1 with marking above °शेषः ins. in the margin : भागस्य धेययो धात्र्य इत्यर्थः ।
20. P1 om. अपि
22. V1 S1 C om. °श्रोण्यां स्थापिताः [L 23]
25. V1 S1 C ईदृग्भूताः for ईदृग्रूपाः

'सूर्ये सूर्यसमीपे स्थिताः। 'सूर्यः अपि 'याभिः अद्भिः 'सह गच्छति, 'ताः आपः 'नः अस्मदीयम् 'अध्वरं यज्ञं 'हिन्वन्तु प्रीणयन्तु ॥ ३ ॥ (६) ॥

[इति षष्ठेऽध्याये षष्ठोऽनुवाकः]

आ– शालाद्वार्यमपरेण निदधाति– ' अग्नेर्वः ' इति । ' अग्नेर्वः ' इत्यादीनि चत्वारि यजूंष्याप्यानि। ^{v}अग्नेः संबन्धिनः ^{v}अपन्नगृहस्य। पद्यतेरेतद्रूपं, न पद्यत इति अपन्नगृहम्, अपन्नं च तद्गृहं चेति तस्य अपन्नगृहस्य अपतितगृहस्येति पर्यायः। तस्य ^{v}सदसि। सीदन्ति अस्मिन्निति सदः, तस्मिन् सदसि निकटस्थाने ^{v}सादयामि। दक्षिणस्यामुत्तरवेदिश्रोणौ निदधाति। ^{v}इन्द्राग्न्योः ^{v}भागधेयीः इन्द्राग्न्योर्भागधेय्यः आपः ^{v}स्थ भवथ। तथा ^{v}मित्रावरुणयोः ^{v}भागधेयीः भागधेय्यः ^{v}स्थ भवथ। आग्नीध्रे निदधाति। ^{v}विश्वेषां ^{v}देवानां ^{v}भागधेयीः विश्वेषां देवानां भागत्वेन धेय्यः आपो भवथ ॥ २ ॥

अभिनयेन दर्शयन्नाह– ' अमूर्याः ' इति। आप्या गायत्री। ^{v}याभिः अद्भिः ^{v}सह ^{v}सूर्यः याति, ^{v}याः चाऽऽपः ^{v}उप ^{v}सूर्ये सूर्यसमीपे स्थिताः ^{v}ताः ^{v}अमूः आपः ^{v}नः अस्माकम् अस्मत्संबन्धिनम् ^{v}अध्वरं यज्ञं ^{v}हिन्वन्तु तर्पयन्तु। हिन्वतिस्तर्पणार्थः ॥ ३ ॥ (६) ॥

[इति षष्ठेऽध्याये षष्ठोऽनुवाकः]

[अथ सप्तमोऽनुवाकः]

सा– षष्ठे सोमाभिषवार्थानां वसतीवरीणां ग्रहणमुक्तम्। सप्तमेऽभिषोतव्यस्य सोमस्योपाहरणादिमन्त्रा उच्यन्ते–

हृ॒दे त्वा॒ मन॑से त्वा दि॒वे त्वा॒ सूर्या᳚य त्वा ।
ऊ॒र्ध्वो अ॑ध्व॒रं दि॒वि दे॒वेषु होत्रा॑ यच्छ ।।१।।
सोम॑ राज॒न् विश्वा॒स्त्वं प्र॒जा उ॒पाव॑रोह ।
विश्वा॒स्त्वां प्र॒जा उ॒पाव॑रोहन्तु ।।२।।

हृ॒दे । त्वा॒ । मन॑से । [त्वा॒ ।] दि॒वे । [त्वा॒ ।] सूर्या᳚य । [त्वा॒ ।]
ऊ॒र्ध्वः । अ॒ध्व॒रम् । दि॒वि । दे॒वेषु॑ । होत्राः॑ । य॒च्छ॒ ॥षां॥१॥

---

1. V1 S1 C ताभिः for याभिः
4. B1 om. अग्नेर्वः इति ।
5. B1 पततेः for पद्यतेः;B1 पतते इति for पद्यत इति
10. H1 भागधेयत्वेन for भागत्वेन

सोम॑ । रा॒ज॒न् । विश्वाः॑ । त्वम् । प्र॒जा इति॑ प्र॒ऽजाः । उ॒पाव॑रो॒हेत्यु॑प॒ऽअव॑रोह ।
विश्वाः॑ । त्वाम् । प्र॒जा इति॑ प्र॒ऽजाः । उ॒पाव॑रोह॒न्त्वित्यु॑प॒ऽअव॑रोहन्तु ॥ ध्यं ॥२॥

कात्यायनः– "ईषान्तरेणार्धसोममद्रिषु संमुखेषु निदधाति हृदे त्वेति" (काश्रौ ९.१.५) इति । ईषयोर्मध्ये सोमस्य अर्धभागमवहृत्य अभिमुखेषु ग्रावसु निदध्यात् । पाठस्तु– 'हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा । ऊर्ध्वो अध्वरं दिवि देवेषु होत्रा यच्छ । सोम राजन् विश्वास्त्वं प्रजा उपावरोह' इति । हे ᵛसोम ᵛराजन्, त्वां ᵛहृदे हृदयवद्भ्यो मनुष्येभ्यः ᵛमनसे मनस्विभ्यः पितृभ्यः ᵛदिवे द्युलोकवासिभ्यो देवेभ्यः, विशेषतः ᵛसूर्याय च, 'उपावहरामि' इति शेषः । एवमुपाहृतोऽभिषुतः ᵛत्वम् ᵛऊर्ध्वः उत्कृष्टः सन् ᵛअध्वरं मदीयं यज्ञं संपाद्य ᵛदिवि द्युलोकवासिषु ᵛदेवेषु ᵛहोत्राः वषट्कारवादिनः सप्त होत्रकान् ᵛयच्छ निबध्नीहि । किं च हे सोम राजन्, ᵛविश्वाः सर्वाः ᵛप्रजाः ᵛउपावरोह प्राप्नुहि । अत्र 'उपावहरेत् इति विधिं सूचयन् हृदयादिशब्दानां यथोक्तार्थं तित्तिरिर्दर्शयति– "ब्रह्मवादिनो वदन्ति स त्वा अध्वर्युः स्याद्यः सोममुपावहरन्त्सर्वाभ्यो देवताभ्य उपावहरेदिति हृदे त्वेत्याह मनुष्येभ्य एवैतेन करोति मनसे त्वेत्याह पितृभ्य एवैतेन करोति दिवे त्वा सूर्याय त्वेत्याह देवेभ्य एवैतेन करोत्येतावतीर्वै देवतास्ताभ्य एवैनꣳ सर्वाभ्य उपावहरति" (तैसं ६.४.३) इति । यो 'हृदे त्वा' इति मन्त्रेण सर्वदेवतार्थमुपावहर्तुं जानाति स एव मुख्योऽध्वर्युरिति ब्रह्मवादिनामुक्तिः ॥

कात्यायनः– "विश्वास्त्वामिति विसृज्योपतिष्ठते" (काश्रौ ९.१.६) ग्रावसु स्थापितं सोमं विमुच्य तत उपस्थानं कुर्यात् । पाठस्तु– 'विश्वास्त्वां प्रजा उपावरोहन्तु' इति । हे सोम, ᵛत्वां ᵛविश्वाः सर्वाः ᵛप्रजाः ᵛउपावरोहन्तु प्राप्नुवन्तु ॥ १-२ ॥

आ – सोममुपावहरति– 'हृदे त्वा' इति । सौम्यनुष्टुप् । हे सोम, ᵛत्वा सोमं त्वां, ᵛहृदे इति । विश्वोपभोगार्थमुपहितमात्मानं हरति आहरतीति हृत् मनोविशेषरूपम् । तस्मै हृदे त्वामुपावहरामि । ᵛमनसे संकल्पविकल्पात्मकं मनस्तस्मै ᵛत्वा सोमं त्वाम् उपावहरामि । ᵛदिवे हे सोम, द्युलोकप्राप्तये सोमं त्वामुपावहरामि । ᵛसूर्याय सूर्यप्रमुखेभ्यो देवेभ्यः सोमं त्वामुपहरामि । एवमुपाहृतोऽभिषुतश्च त्वम् ऊर्ध्वम् उत्कृष्टम् ᵛइमम् ᵛअध्वरं यज्ञं संपाद्य ᵛदिवि देवलोके ᵛदेवेषु ᵛयच्छ निबध्नीहि । वषट्कारवादिनः ᵛहोत्राः सप्त होत्रकास्तैः ᵛऊर्ध्वः संनिहितसंबन्धः ॥१॥

किं च 'सोम राजन्' इति द्वे सौम्ये यजुषी । एका गायत्री वा । हे ᵛसोम ᵛराजन्,

---

8. C S1 om. देवेषु
16. S1 C after सोम add : राजन्
17. V1 S1 C after °रोहन्तु ins. इति; P1 प्रापयन्तु for प्रापयन्तु
18. H1 °हरन्ति for हरति
19. B1 सविशेष for मनोविशेष°
20. H1 °हरति for first °हरामि; H1 om. दिवे ... °हरामि [L 21]
22. B1 ऊर्ध्वः उत्कृष्टः
24. B1 सोम्ये for सौम्ये

ᵛत्वं ᵛविश्वाः सर्वाः ᵛप्रजाः ᵛउपावरोह उपावरोहणं कुरु । ᵛविश्वाः ᵛप्रजाः प्रत्युत्थानादिभिः ᵛत्वाम् ᵛउपावरोहन्तु ॥२॥

श्रृणोत्व॒ग्निः स॒मिधा॒ हवं॑ मे श्रृण्वन्त्वापो॑ धि॒षणा॑श्च दे॒वीः ।
श्रोता॑ ग्रावाणो वि॒दुषो॒ न य॒ज्ञꣳ श्रृणोतु॒ दे॒वः स॑वि॒ता हवं॑ मे॒ स्वाहा॑ ॥३॥

शृ॒णोतु॑ । अ॒ग्निः । स॒मिधेति॑ स॒म्ऽइधा॑ । हव॑म् । मे॒ ।
शृ॒ण्वन्तु॑ । आप॑ः । धि॒षणा॑ः । च॒ । दे॒वीः ।
श्रोत॑ । ग्रा॒वा॒ण॒ः । वि॒दुष॑ः । न । य॒ज्ञम् ।
शृ॒णोतु॑ । दे॒वः । स॒वि॒ता । हव॑म् । मे॒ । स्वाहा॑ ॥ स्वाः ॥३॥

सा– कात्यायनः – " अभूदुषा रुशत्पशुरित्युच्यमाने । चतुर्गृहीतं प्रचरण्या जुहोति शृणोत्वग्निरिति " (काश्रौ ९.२.२४-९.३.१) इति । प्रातरनुवाकस्यावसाने 'अभूदुषा [रुशत्पशुः] इत्येतस्मिन् मन्त्रे होत्रा पठ्यमाने सति चतुर्वारं गृहीतमाज्यम् । प्रचरणीति जुहूसदृशी काचित् स्रुग्विशेषः, तया जुहुयात् । पाठस्तु– ' शृणोत्वग्निः समिधा हवं मे शृण्वन्त्वापो धिषणाश्च देवीः । श्रोता ग्रावाणो विदुषो न यज्ञꣳ शृणोतु देवः सविता हवं मे स्वाहा ' इति । ᵛअग्निः ᵛसमिधा समित्पूर्विकया आहुत्या ᵛमे ᵛहवं मदीयमाह्वानं ᵛशृणोतु । ᵛआपः मदीयमाह्वानं ᵛशृण्वन्तु । कीदृश्यः ᵛधिषणाः विद्योपेताः ᵛदेवीः देव्यो देवतारूपाश्च । न इत्युपमार्थे । ᵛविदुषः ᵛन विद्वांस इव, प्रत्यक्षतो जानन्त इव । हे ग्रावाणः, अभिषवार्थमिहोपस्थिता यूयं मदीयं ᵛयज्ञं ᵛश्रोत शृणुत । तथा ᵛसविता ᵛदेवः मदीयमाह्वानं ᵛशृणोतु । ᵛस्वाहा [सु] हुतमस्तु ॥३॥

आ– जुहोति– ' शृणोत्वग्निः ' इति । लिङ्गोक्तदेवत्या त्रिष्टुप् यजुरन्ता । ᵛसमिधा समित्पूर्विकया आहुत्या ᵛहवं ᵛमे मम आह्वानम् । ᵛअग्निः ᵛशृणोतु श्रुत्वाऽप्यनुजानातु । शृण्वन्त्वापः । ममाह्वानम् ᵛआपः [ᵛशृण्वन्तु] श्रुत्वाऽनुजानन्तु । ᵛधिषणाः वाचः ᵛदेवीः देव्यः शृण्वन्तु श्रुत्वाऽनुजानन्तु । ᵛश्रोत ᵛग्रावाणः । श्रोता छान्दसं पदम् । यूयमपि शृणुत । विदुषो न यज्ञम् । ᵛन इत्युपमार्थीयः । ᵛयज्ञं ᵛविदुषः इव प्रत्यक्षतो जानन्त इव शृणुतेति संबन्धः । तथा ᵛसविता ᵛदेवः ᵛमे मम ᵛहवम् आह्वानं ᵛशृणोतु । ᵛस्वाहा इति होमार्थः ॥३॥

दे॒वीरा॑पो अपां नपा॒द्यो व॑ ऊ॒र्मिर्ह॑वि॒ष्यः॑ ।
इ॒न्द्रि॒यावा॑न् म॒दिन्त॑मः ॥४॥

---

15. P1 विद्वत्सदृशाः for विद्वांसः
17. P1 oms. स्वाहा सुहुतमस्तु

तं दे॒वेभ्यो॑ देव॒त्रा दा॑त शुक्र॒पेभ्यः॑ ।
येषा॑ं भा॒ग स्थ स्वाहा॑ ॥५॥

देवीः॑ । आ॒प॒ः । अ॒पा॒म् । न॒पा॒त् । यः । व॒ः । ऊ॒र्मिः । ह॒वि॒ष्यः॑ ।
इ॒न्द्रि॒यावा॑न् । इ॒न्द्रि॒यवा॒निती॑न्द्रि॒यऽवा॑न् । म॒दिन्त॑म॒ इति॑ म॒दिन्ऽत॑मः ॥ छ्लूरां॑ ॥४॥
तम् । दे॒वेभ्यः॑ । दे॒व॒त्रेति॑ दे॒व॒ऽत्रा । दा॒त॒ । शु॒क्र॒पेभ्य॒ इति॑ शु॒क्र॒ऽपेभ्यः॑ ।
येषा॑म् । भा॒गः । स्थ । स्वाहा॑ ॥ जौ ॥५॥

सा– कात्यायनः – "देवीराप इत्यप्सु जुहोति" (काश्रौ ९.३.७) इति । चतुर्गृहीतमाज्यं वसतीवरीसंज्ञकास्वप्सु जुहुयात् । पाठस्तु– 'देवीरापो अपां नपाद्यो व ऊर्मिर्हविष्यः । इन्द्रियावान् मदिन्तमः ॥ तं देवेभ्यो देवत्रा दात शुक्रपेभ्यः । येषां भाग स्थ स्वाहा' इति । हे ᵛआपः देव्यः, ᵛवः युष्माकम् ᵛअपां ᵛनपात् अपत्यरूपः ᵛयः ᵛऊर्मिः ᵛदेवत्रा देवान् प्रति स्थितः तमूर्मिं ᵛदेवेभ्यः देवार्थं ᵛदात प्रयच्छत । कीदृश ऊर्मिः ? ᵛहविष्यः हविषे सोमरूपाय हितः । ᵛइन्द्रियावान् पीतः सन् इन्द्रियवृद्धिकारी । ᵛमदिन्तमः पीयमानोऽत्यन्तहर्षकारी । कीदृशेभ्यो देवेभ्यः ? हे आपः, यूयं ᵛयेषां देवानां ᵛभागः ᵛस्थ भागधेया भवथ । ᵛशुक्रपेभ्यः शुक्रं दीप्तं सोमं पिबन्तीति शुक्रपास्तेभ्यः ᵛदेवेभ्यः ᵛस्वाहा इदमाज्यं युष्यभ्यं हुतमस्तु ॥

ग्रहीष्यमाणानामपां मूलत्वेन हविस्त्वसंपादनेन चेयमाहुतिरुपयुज्यत इति तित्तिरिराह– "देवीरापो अपां नपादित्याहाऽऽहुत्यैवैना निष्क्रीय गृह्णात्यथो हविष्कृतानामेवाभिघृतानां गृह्णाति" (तैसं ६.४.३) इति ॥४-५॥

आ– अप्सु जुहोति– 'देवीरापः' इति । अब्देवत्या पङ्क्तिः । गायत्री । देवीरापः । हे देव्यः ᵛआपः, ᵛवः युष्माकम् ᵛअपां ᵛनपात् अपत्यरूपः ᵛऊर्मिः तरङ्गकल्लोलः ᵛहविष्यः ᵛहविर्योग्यः यज्ञियः । ᵛइन्द्रियावान्, दीर्घश्छान्दसः, वीर्यवान् । ᵛमदिन्तमः मदयितृतमः तर्पयितृतमः ॥४॥

'तं देवेभ्यः' इति आपी गायत्री । ᵛयः ऊर्मिः ᵛतं हविष्यम् इन्द्रियवन्तं मदिन्तमं ऊर्मिं ᵛदेवत्रा । "देवमनुष्य°" (पा ५.४.५६) इत्यादिना त्रप्रत्ययः । देवान् प्रति स्थितम् । ᵛयेषां देवानां यूयमापः ᵛभागः ᵛस्थ भवथ । ᵛतं भागं ᵛशुक्रपेभ्यः, शुक्रं पिबन्तीति शुक्रपास्तेभ्यः, शुक्रशब्द उपलक्षणार्थः । शुक्रादिग्रहाधिष्ठातृभ्यो देवेभ्यः ᵛदात प्रयच्छतेति संबन्धः । ᵛस्वाहा इति होमार्थः ॥५॥

---

10. P1 with markings above नपात् ins. in the margin : अपां नपात्संज्ञक इति भाष्यान्तरे; V1 S1 C om. यः; V1 S1 C स्थितं for स्थितः

12. V1 S1 C P1 एषां for येषां

16. S1 om. निष्क्रीय ...... अपोहतीति (P. 388 L. 6);
V1 S1 C हविष्कृत्यानानम् for हविष्कृतानाम्; P1 ग्रुतानां for °घृतानां

कार्षि॑रसि समु॒द्रस्य॒ त्वाऽक्षि॑त्या॒ उन्न॑यामि ।
समापो॑ अ॒द्भिर॑ग्मत॒ समोष॑धीभि॒रोष॑धीः ॥६॥

कार्षि॑ः । अ॒सि॒ । स॒मु॒द्रस्य॑ । त्वा॒ । अक्षि॑त्यै । उत् । न॒या॒मि॒ ।
सम् । आप॑ः । अ॒द्भिरित्य॒त्ऽभिः । अ॒ग्म॒त॒ ।
सम् । ओष॑धीभिः । ओष॑धीः ॥ डु ॥६॥

सा– कात्यायनः– "कार्षिरसीति मैत्रावरुणचमसेनाज्यमपोहति" (काश्रौ ९.३.८) इति । अप्सु हुतमाज्यम् व्यालोडयेदित्यर्थः। हे आज्यपदार्थ, त्वं ᵛकार्षिः कर्षणशीलः अङ्गगतमलस्यापनेता ᵛअसि । एतमर्थं तित्तिरिर्दर्शयति– "कार्षिरसीत्याह शमलमेवाऽऽसामप प्लावयति" (तैसं ६.४.३) इति ।

कात्यायनः– "समुद्रस्य त्वेति तेन गृह्णाति" (काश्रौ ९.३.९) इति । तेन मैत्रावरुणचमसेनापो गृह्णीयात् । पाठस्तु– 'समुद्रस्य त्वाऽक्षित्या उन्नयामि' इति । ᵛसमुद्रस्य "आपो वै समुद्रः" (काशब्रा ४.९.३.२९) इति श्रुतेः । वसतीवरीलक्षणस्याप्समुद्रस्य ᵛअक्षित्यै अक्षीणत्वाय हे आज्यमिश्रोदक, त्वाम् ᵛउन्नयामि उद्गृह्णामि ॥

कात्यायनः– "मैत्रावरुणचमसं वसतीवरीश्च संस्पर्शयति समाप इति" (काश्रौ ९.३.१२) इति । पाठस्तु– 'समापो अद्भिरग्मत समोषधीभिरोषधीरिति । हे ᵛआपः, संस्कृता यूयम् ᵛअद्भिः वसतीवरीभिः ᵛसमग्मत संगच्छध्वम् । ᵛओषधीः ओषधयः प्रियङ्गुमुद्गाद्याः । ᵛओषधीभिः व्रीहियवादिभिः संगच्छध्वम् । अपां कारणभूतत्वादोषधीनामपि तथैवोपयोगोऽस्त्वित्यर्थः ॥६॥

आ– आज्यमपोहति– 'कार्षिरासि' इति । आज्यदेवत्याऽनुष्टुप् । हे आज्य, ᵛकार्षिः, कृष विलेखने । कार्षिः कृष्टम् ᵛअसि देवतया भक्षितमित्यर्थः । तेन गृह्णामि । 'समुद्रस्य त्वा', 'समापः' इति द्वे आप्ये । समुद्रस्य त्वा । "आपो वै समुद्रः" (काशब्रा ४.९.३.२९) इति श्रुतेः । वसतीवरीलक्षणस्याप्समुद्रस्य ᵛअक्षित्यै अनुपक्षीणतायै । आज्य, त्वाम् ᵛउन्नयामि उद्गृह्णामि ॥

समापो अद्भिरग्मत समोषधीभिरोषधीः । ᵛओषधीभिः व्रीहियवादिभिः ᵛओषधीः मुद्गमसूरादयः ओषध्यः । हे ᵛआपः संस्कृताः, ᵛअद्भिः ᵛसमग्मत संगच्छत । ओषधीः संस्कृता ओषधीभिः समग्मत संगच्छत ॥६॥

---

6. S1 V1 C अव्रत° for अङ्गगत°
15. V1 S1 C om. प्रियङ्गुमुद्गाद्याः
16. V1 S1 C om. अपां ... ... इत्यर्थः
18. B1 लक्षितम् for भक्षितम्
20. B1 श्रुतिः for श्रुतेः; B1 om. अप्°

यम॑ग्ने पृ॒त्सु मर्त्य॒मवा॒ वाजे॑षु॒ यं जु॒नाः ।
स यन्ता॒ शश्व॑ती॒रिष॒ः स्वाहा॑ ।।७।। (७) ।।

यम् । अ॒ग्ने॒ । पृ॒त्स्विति॑ पृ॒त्ऽसु । मर्त्य॑म् । अवा॑ः । वाजे॑षु । यम् । जु॒नाः ।
सः । यन्ता॑ । शश्व॑तीः । इषः॑ । स्वाहा॑ ।।ङीं।।७।। (७) ।।

सा– कात्यायनः – "प्रचरणीसंस्रवमग्निष्टोमे जुहोत्यभावे चतुर्गृहीतं यमग्न इति । उक्थ्ये प्रथमं परिधिमालभते" (काश्रौ ९.३.१६.१७) इति । यद्यनुष्ठीयमानोऽग्निष्टोमश्चेत् तर्हि प्रचरणीपात्रलिप्तमाज्यशेषं जुहुयात् । उक्थे तु प्रचरणीपात्रलिप्तेनाज्येन प्रथमं परिधिं संस्पृशेत् । पाठस्तु– 'यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः । स यन्ता शश्वतीरिषः स्वाहा' इति । हे ᵛअग्ने, ᵛपृत्सु संग्रामेषु ᵛयं ᵛमर्त्यम् ᵛअवाः रक्षसि, किं च ᵛवाजेषु अन्ननिमित्तं ᵛयं मर्त्यं ᵛजुनाः गच्छसि, हवींषि ग्रहीतुं यस्य सकाशं गच्छसीत्यर्थः । ᵛसः मर्त्यस्त्वदनुग्रहेण ᵛशश्वतीरिषो नित्यान्यन्नानि धनरूपाणि ᵛयन्ता नियस्यति प्राप्स्यतीत्यर्थः । स्वाहा इति होमार्थः ।।७।। (७)।।

इति षष्ठेऽध्याये सप्तमोऽनुवाकः ।।

आ– जुहोति– 'यमग्ने' इति । मधुच्छन्दा आग्नेयी गायत्री । हे भगवन् ᵛअग्ने, ᵛपृत्सु संग्रामेषु ᵛयं ᵛमर्त्यं मनुष्यम् ᵛअवाः अवसि ᵛवाजेषु हविर्लक्षणेष्वन्नेषु समुद्यतेषु ᵛयं च पुरुषं ᵛजुनाः, जुनातिर्गत्यर्थः, अभिगच्छसि, ᵛसः ᵛशश्वतीः शाश्वतीः ᵛइषः अन्नानि ᵛयन्ता लब्धा भवति । ᵛस्वाहा इति होमार्थः ।।७।। ।। (७) ।।

[इति षष्ठेऽध्याये सप्तमोऽनुवाकः]

अष्टमोऽनुवाकः

सप्तमे सोमोपावहरणादिमन्त्रा उक्ताः । अष्टमे सोमाभिषवोऽभिधीयते–

दे॒वस्य॑ त्वा स॒वि॒तुः प्र॑स॒वे॒ऽश्विनो॑र्बा॒हुभ्या॑ं पू॒ष्णो हस्ता॑भ्याम् ।
आ द॑दे॒ रावा॑ऽसि ग॒भी॒रमि॒मम॑ध्व॒रं कृ॒धीन्द्रा॑य सु॒षूत॑मम् ।
उ॒त्त॒मेन॑ प॒विनोर्ज॑स्वन्तं॒ मधु॑मन्तं॒ पय॑स्वन्तम् ।
नि॒ग्रा॒भ्या॑ स्थ दे॒व॒श्रुत॑स्त॒र्पय॑त मा ।।१।।

---

7. V1 S1 C स्पृशेत् for संस्पृशेत

10. P1 with markings above यन्ता ins. in the margin : लब्धा । तृन्प्रत्ययान्तमेतत् । आद्युदात्तत्वात् इति भाष्यान्तरे ।

13. H1 मधुच्छन्दसाम् for मधुच्छन्दा

19. S1 C सोमोपाहरण° for सोमोपावहरण°

मनो॑ मे तर्पयत॒ वाचं॑ मे तर्पयत प्रा॒णं मे॑ तर्पयत॒
चक्षु॑र्मे॑ तर्पयत॒ श्रोत्रं॑ मे तर्पयत ।
आ॒त्मानं॑ मे तर्पयत प्र॒जां मे॑ तर्पयत प॒शून् मे॑ तर्पयत ग॒णान् मे॑ तर्पयत
ग॒णा मे॒ मा वितृ॑षन् ॥२॥

आ । द॒दे॒ । रा॒वा॑ । अ॒सि॒ । ग॒भी॒रम् । इ॒मम् । अ॒ध्व॒रम् । कृ॒धि॒ ।
इन्द्रा॑य । सु॒षूत॑मम् । सु॒सूत॑म॒मिति॑ सु॒ऽसूत॑मम् ।
उ॒त्त॒मेनेत्यु॑त्ऽत॒मेन॑ । प॒विना॑ । ऊर्ज॑स्वन्तम् । मधु॑मन्त॒मिति॒ मधु॑ऽमन्तम् । पय॑स्वन्तम् ।
नि॒ग्रा॒भ्या॒ इति॑ नि॒ऽग्रा॒भ्याः॑ । स्थ॒ । दे॒व॒श्रु॒त॒ इति॑ दे॒व॒ऽश्रु॒तः॑ । त॒र्पय॑त । मा॒ ॥ फाः ॥१॥
मनः॑ । मे॒ । त॒र्प॒य॒त॒ । वाच॑म् । प्रा॒णम् । चक्षुः॑ । श्रोत्र॑म् ।
आ॒त्मान॑म् । प्र॒जामिति॑ प्र॒ऽजाम् । प॒शून् । ग॒णान् ।
ग॒णाः । मे॒ । मा । वि । तृ॒ष॒न् ॥ ग्वें ॥२॥

कात्यायनः – "देवस्य त्वेत्यद्रिमादाय" (काश्रौ ९.४.५) इति । अत्राद्रिशब्देन सोमाभिषवहेतुः पाषाणो गृह्यते, तत्साहचर्यात् । पाठस्तु– 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आ ददे रावासि गभीरमिममध्वरं कृधीन्द्राय सुपूतमम् । उत्तमेन पविनोर्जस्वन्तं मधुमन्तं पयस्वन्तम्' इति । 'देवस्य त्वा' इत्यादि व्याख्यातम् । हे अभिषवसाधन पाषाण, त्वं ʼरावा । रा दान इत्यस्य रूपं, वनिपि कृते । आहुतीनां दक्षिणानां च रावा दाता भवसि । "एतद्ध्येष द्रयश्च रासते" (काशब्रा ४.९.४.४) इति श्रुतेः । रासतेर्वा रूपम् । तदा सलोपः कार्यः । ततः ʼगभीरं गम्भीरम् ʼइमं मदीयम् ʼअध्वरं यज्ञं ʼकृधि कुरु । ʼउत्तमेन उत्कृष्टेन ʼपविना वज्रसदृशेन त्वया अहं सोममीदृशं करोमि । कीदृशम् ? ʼइन्द्राय इन्द्रार्थं ʼसुपूतमं तकारलोपश्छान्दसो दीर्घश्च, सुष्ठु अभिषुततमम् । ʼऊर्जस्वन्तं रसवन्तम् । ʼमधुमन्तं स्वादुत्वोपेतम् । ʼपयस्वन्तं पयोविशेषवन्तम् । एवं सोमं करोमीत्यर्थः ॥

कात्यायनः – " निग्राभ्यासु वाचयति ... निग्राभ्या स्थेति " (द्र. काश्रौ ९.४.७) इति । अभिषोतव्यस्य सोमस्य सेचनीया आपो निग्राभ्या इत्युच्यन्ते । तासु गृह्यमाणासु यजमानं वाचयेत् । पाठस्तु– 'निग्राभ्या स्थ देवश्रुतस्तर्पयत मा । मनो मे तर्पयत वाचं मे तर्पयत प्राणं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयत । आत्मानं मे तर्पयत प्रजां मे तर्पयत पशून् मे तर्पयत गणान् मे

---

12. V1 C om. अत्र
13. V1 S1 C अभिधीयते for गृह्यते; S1 C तस्मादद्यात्, V1 नतमादर्यात् for तत्साहचर्यात्
15. V1 S1 C इत्यादिकं पूर्वं for इत्यादि
16. V1 S1 C om. वनिपि कृते; V1 S1 C om. एतद् .....कार्यः [L 17]
17. V1 S1 C om. गभीरं;
18. P1 om. यज्ञं
19. C दीर्घत्वम् for दीर्घश्च; P1 om. सुष्ठु
20. S1 C om. रसवन्तम् । मधुमन्तं; V1 om. रसवन्तम्

तर्पयत गणा मे मा वि तृषन् ' इति। हे आपः, यूयं ^{v}निग्राभ्याः निग्राह्याः ^{v}स्थ अस्माभिर्नितरां ग्रहीतव्या भवथ। ^{v}देवश्रुतः देवेषु प्रख्याताः यूयं ^{v}मा मां ^{v}तर्पयत प्रीतं कुरुत। हे आपः, मदीयानि मनः-प्रभृतीनीन्द्रियाणि च तर्पयत। ^{v}आत्मानं शरीरं ^{v}प्रजां पुत्रादिसंपत्तिं ^{v}पशून् ^{v}गणान् मनुष्यसंघांश्च ^{v}तर्पयत। ^{v}मे मदीयाः ^{v}गणा मनुष्यसंघाः ^{v}मा ^{v}वितृषन् मदीयद्रव्यदानेन पूरिताः सन्तो विवृद्धतृष्णा मा भुवन्। अनुरक्तगणोऽहं भवेयमिति यजमान आशास्त इत्यर्थः ॥ १-२ ॥

आ— अद्रिमादत्ते— ' देवस्य त्वा ' इति। ग्रावदेवत्या। व्याख्याता। ' आददे ' इति। ग्रावदेवत्या त्रिष्टुप्। ^{v}आददे गृह्णामि। ^{v}रावा, रा दाने इत्यस्य रूपम्। आहुतीनां दक्षिणानां च रावा दाता ^{v}असि, यतस्ततः ^{v}गभीरं गम्भीरं महान्तम् ^{v}इमम् ^{v}अध्वरं यज्ञं ^{v}कृधि कुरु। ^{v}इन्द्राय इन्द्रार्थं ^{v}सुषूतमम्, षूञ् अभिषवे, सु [ष्ठु] अभिषुततमम्। तकारलोपश्छान्दसो दीर्घश्च। सुषूतमम्। ^{v}उत्तमेन उत्कृष्टेन ^{v}पविना पवनेन पवनशीलेन वा सोमेन युक्तम्। ^{v}ऊर्जस्वन्तम् अन्नवन्तम्। ^{v}मधुमन्तं मधुमत्स्वादुरसोपेतम्। ^{v}पयस्वन्तं पयोविशेषवन्तम्। गभीरं गम्भीरं महान्तम् इमम् अध्वरं कृधि कुरु [इति संबन्धः] ॥

निग्राभ्यासु वाचयति— ' निग्राभ्या स्थ ' इति। आपोदेवत्यं (?) यजुः। ^{v}निग्राभ्याः निग्राह्याः। यस्माद् यूयमिन्द्रेण गृहीता आपस्तस्मान्निग्राभ्याः ^{v}स्थ भवथ। ^{v}देवश्रुतः, देवेषु [श्रुत्] प्रख्यातिः [येषां ते] देवश्रुतः, बहुमानान्विताः प्रख्याताः सत्यः हे आपः, मां ^{v}तर्पयत ॥१॥

' मनो मे तर्पयत ' इति। अब्देवत्यानि नव यजूंषि। अन्त्या यजमानाशीः। हे आपः, ^{v}मे मम ^{v}मनः ^{v}तर्पयत। ^{v}मे मम ^{v}वाचं ^{v}तर्पयत। ^{v}प्राणं ^{v}मे ^{v}चक्षुः ^{v}श्रोत्रम् ^{v}आत्मानं शरीरं ^{v}प्रजां पुत्रादिसंपत्तिं ^{v}पशून् ^{v}गणान् मनुष्यसंघान्। ^{v}गणाः ^{v}मे ^{v}मा ^{v}वितृषन् मया द्रव्यदानेन पूरिताः सन्तो विवृद्धतृष्णा मा भुवन्। अनुरक्तगणोऽहं भवेयमित्यर्थः ॥२॥

---

1. P1 with markings above निग्राभ्याः ins. in the margin– ह्यग्रहोर्भश्छन्दसीति हस्य भः। P1 निरन्तरं for नितरां
2. P1 with markings above कुरुत ins. in the margin समासव्यासाभ्याम्
3. V1 S1 C om. च; P1 संततिं for संपत्तिं
4. V1 S1 C मदीय° for मदीयाः
6. B1 अभ्रिम् for अद्रिम्; H1 व्याख्यातः for व्याख्याता
7. B1 °दैवत्या for °देवत्या
8. B1 om. यज्ञं कृधि कुरु
10. B1 om. पविना पवनेन
11. H1 om. अन्नवन्तं; B1 om. पयस्वन्तं

B1 प्रश्रावी तां for प्रख्यातिः; H1 प्रख्यातिः for प्रख्याताः

20. B1 °कृष्टा for° तृष्णा; H1 विचकृष्णा for विवृद्धतृष्णा

इन्द्रा॑य त्वा॒ वसु॑मते रु॒द्रव॑त॒ इन्द्रा॑य त्वाऽऽदि॒त्यव॑ते ।
इन्द्रा॑य त्वाऽभिमाति॒घ्ने श्ये॒नाय॑ त्वा सोम॒भृते॒ऽग्नये॑ त्वा रायस्पोष॒दे ॥३॥

इन्द्रा॑य । त्वा॒ । वसु॑मत॒ इति॒ वसु॑ऽमते । रु॒द्रव॑त॒ इति॑ रु॒द्रऽव॑ते । आ॒दि॒त्यव॑त॒ इत्या॑दि॒त्याऽव॑ते । अ॒भि॒मा॒ति॒घ्न इत्य॑भि॒मा॒ति॒ऽघ्ने । श्ये॒नाय॑ । सो॒म॒भृत॒ इति॑ सो॒म॒ऽभृते॑ । अ॒ग्नये॑ । रा॒य॒स्पो॒ष॒द इति॑ रा॒य॒स्पो॒ष॒ऽदे ॥ यँ ॥३॥

सा– कात्यायनः–“सोमं भिमीत इन्द्राय त्वा वसुमते रुद्रवत इति पञ्चकृत्वः प्रतिमन्त्रम्” (काश्रौ ८.४.५) इति। अभिषोतव्यस्य सोमस्य ‘इन्द्राय त्वा’ इत्यादिभिः पञ्चभिर्मन्त्रैः पञ्चवारं यथा भवति तथा मानमियत्तां कुर्यात् ।

तत्रायं प्रथमो मन्त्रः – ‘इन्द्राय त्वा वसुमते रुद्रवते’ इति । हे सोम, ᵛत्वा त्वाम् ᵛइन्द्राय इन्द्रार्थं मिमे । कीदृशाय इन्द्राय? ᵛवसुमते वसुसंज्ञकप्रातःसवनदेवतावते । ᵛरुद्रवते रुद्रनामकमाध्यन्दिनसवनदेवतावते ॥

अथ द्वितीयः – ‘इन्द्राय त्वाऽऽदित्यवते’ इति । ᵛआदित्यवते तृतीयसवनदेवतावते ᵛइन्द्राय हे सोम, त्वां मिमे ।

अथ तृतीया – ‘इन्द्राय त्वाऽऽभिमातिघ्ने’ इति । अभिमातिः शत्रुस्तं हन्तीत्यभिमातिहा इन्द्रस्तस्मै । हे सोम, त्वां मिमे ॥

अथ चतुर्थः– ‘श्येनाय त्वा सोमभृते’ इति । ᵛश्येनाय पक्षिरूपाय गायत्र्यात्मने ᵛसोमभृते सोमधारकाय। यद्वा– ᵛसोमभृते सोमहृते। “हृग्रहोर्भश्छन्दसि” (पा ५.२.३२ वा.१) इति हकारस्य भकारः । तादृशाय ᵛइन्द्राय हे सोम, त्वां मिमे ॥

अथ पञ्चमः– ‘अग्नये त्वा रायस्पोषदे’ इति । ᵛरायस्पोषदे धनपोषस्य दात्रे ᵛअग्नये हे सोम, त्वां मिमे ॥ ३ ॥

आ – सोमं मिमीते– ‘इन्द्राय त्वा’ इति । ‘इन्द्राय त्वा’ इत्यादीनि पञ्च यजूंषि सौम्यानि । ᵛवसुमते धनवते ᵛइन्द्राय प्रातःसवनदेवतावते, ᵛरुद्रवते माध्यंदिनसवनदेवतावते इन्द्राय सोमं त्वां मिमे निर्ममे । ᵛआदित्यवते तृतीयसवनदेवतावते ᵛइन्द्राय सोमं त्वां मिमे । अभिमातिघ्ने । अभिमातिः सपत्नः । अभिमातिं हन्तीत्यभिमातिहा तस्मै ᵛअभिमातिघ्ने । ᵛइन्द्राय सोमं त्वां मिमे । ᵛश्येनाय श्येनरूपाय गायत्र्यात्मने ᵛसोमभृते । “हृग्रहोर्भश्छन्दसि” (पा ८.२.३२ वा १) इति हकारस्य भकारः । सोमभृते इन्द्राय सोमं त्वां मिमे । ᵛरायस्पोषदे धनपोषस्य दात्रे ᵛअग्नये, सोमं त्वां मिमे इति शेषः ॥ ३ ॥

---

11. S1 मध्यं for माध्यं
16. C S1 तुरीयः for चतुर्थः
17. P1 after °धारकाय । adds अथैतान्यग्निभक्तीन्ययं, लोकः । प्रातःसवनं वसन्तो गायत्रीति श्रुतेः ।

यत् ते॑ सोम दि॒वि ज्योति॒र्यत् पृ॑थि॒व्यां यदु॒रा अ॒न्तरि॑क्षे ।
तेना॒स्मै यज॑मानायो॒रु रा॒ये कृ॒ध्यधि॑ दा॒त्रे वो॑चः ॥ ४ ॥

यत् । ते॒ । सो॒म॒ । दि॒वि । ज्योति॑ः । पृ॒थि॒व्याम् । उ॒रौ । अ॒न्तरि॑क्षे ।
तेन॑ । अ॒स्मै । यज॑मानाय । उ॒रु । रा॒ये । कृ॒धि॒ । अधि॑ । दा॒त्रे । वो॒च॒ः ॥ षैं ॥ ४ ॥

सा– कात्यायनः– "यत् ते इति मितालम्भनम्" (काश्रौ ९.४.९) इति । इयत्तीकृतस्य सोमस्य संस्पर्शनं कुर्यात् । पाठस्तु– 'यत् ते सोम दिवि ज्योतिर्यत् पृथिव्यां यदुरा अन्तरिक्षे । तेनास्मै यजमानायोरु राये कृध्यधि दात्रे वोचः' इति । हे ᵛसोम, त्रिषु लोकेषु ᵛते त्वदीयं ᵛज्योतिः ᵛयत् अस्ति, ᵛतेन ज्योतिषा ᵛअस्मै ᵛयजमानाय ᵛराये, चतुर्थी तृतीयार्थे, राया धनेन समृद्धम् ᵛउरु विस्तीर्णं स्थानं ᵛकृधि । किं च अधिकोऽयं यजमानो भवत्विति । ᵛदात्रे ᵛवोचः फलप्रदायेन्द्राय ब्रूहि ॥४॥

आ– मितालम्भनं 'यत् ते सोम' इति । सोमदेवत्या विपरीता बृहती । हे ᵛसोम, ᵛते तव ᵛदिवि द्युलोके ᵛयत् ᵛज्योतिः, ᵛपृथिव्यां ᵛयत् ज्योतिः, ᵛउरौ विस्तीर्णे ᵛअन्तरिक्षे [ᵛयत्] ज्योतिः, हे सोम, ᵛतेन तन्वाख्येन ज्योतिषा ᵛअस्मै ᵛयजमानाय यजमानार्थम्, ᵛउरु ᵛराये ᵛकृधि, तव शरीरम् उरु विस्तीर्णं कृधि, यजमानसंबन्धिनि यज्ञे तव शरीरं विस्तीर्णं कृधीत्यर्थः । राये च धनाय । ऋत्विग्दक्षिणादिसिद्ध्यर्थं राये च उरु कृधि । किं च, हे सोम, अधि ᵛदात्रे ᵛवोचः । दात्रे यजमानाय कृत्स्नोऽहमागत इति अधि ब्रूहि ॥ ४ ॥

श्वा॒त्रा स्थ॑ वृत्र॒तुरो॒ राधो॑गूर्ता अ॒मृत॑स्य॒ पत्नी॑ः ।
ता दे॑वीर्दे॑व॒त्रेमं य॒ज्ञं न॑य॒तोप॑हूता॒ः सोम॑स्य पिबत ॥ ५ ॥

श्वा॒त्राः । स्थ॒ । वृ॒त्र॒तुर॒ इति॑ वृ॒त्रऽतुर॑ः । राधो॑गूर्ता॒ इ॒ति॒ राध॑ःऽगूर्ताः । अ॒मृत॑स्य । पत्नी॑ः ।
ताः । दे॒वीः । दे॒व॒त्रेति॑ दे॒व॒ऽत्रा । इ॒मम् । य॒ज्ञम् । न॒य॒त ।
उप॑हूता॒ इत्युप॑ऽहूताः । सोम॑स्य । पि॒ब॒त ॥ द्रूं ॥ ५ ॥

सा– कात्यायनः– "श्वात्रा स्थेत्यासिञ्चति" (काश्रौ ९.४.१२) इति । पाठस्तु– 'श्वात्रा स्थ वृत्रतुरो राधोगूर्ता अमृतस्य पत्नीः । ता देवीर्देवत्रेमं यज्ञं नयतोपहूताः सोमस्य पिबत' इति । हे आपः, यूयमेवंविधाः ᵛस्थ । किंविधाः ? ᵛश्वात्राः क्षिप्रकारिण्यः । ᵛवृत्रतुरः वृत्रघातिन्यः । राधो

---

8. P1 V1 चतुर्थ्यर्थे तृतीया for चतुर्थी तृतीयार्थे
9. V1 S1 C भवति for भवत्विति
11. H1 om. पृथिव्यां यज्ज्योतिः
12. B1 तन्वा शरीराख्येन for तन्वाख्येन
23. V1 S1 C om. क्षिप्र°; P1 with markings above श्वात्राः ins. in the margin श्वात्रामिति क्षिप्रनाम; P1 after °घातिन्यः adds तूर्यतिर्वधकर्मा

धनमुद्गिरन्तीति ᵛराधोगूर्ताः धनाभिवर्षिण्यः। ᵛअमृतस्य सोमस्य ᵛपत्नीः पालयित्र्यः । हे ᵛदेवीः देव्यः आपः, ᵛताः तथाविधा यूयं ᵛदेवत्रा देवान् प्रति ᵛइमं ᵛयज्ञं ᵛनयत प्रापयत। किं च यूयम् ᵛउपहूताः अनुज्ञाताः सत्यः ᵛसोमस्य सोमं ᵛपिबत ॥ ५ ॥

आ - अधिब्रूहि– ‘ श्वात्रा स्थ ’ इति । उपरिष्टाद् बृहती । निग्राभ्या आपो देवताः । हे आपः, श्वात्रा इति क्षिप्रनाम, ᵛश्वात्राः क्षिप्रकारिण्यः ᵛस्थ भवथ । तुर्वी भुर्वी दुर्वी धुर्वी हिंसार्थाः । ᵛवृत्रतुरः, वृत्रं तुर्वन्ति घ्नन्तीति वृत्रतुरः । राधो धनमुद्गिरन्तीति ᵛराधोगूर्ताः धनानि वर्षिण्यः । ᵛअमृतस्य ᵛपत्नीः अमृतस्य पालयित्र्यः । श्वात्राः क्षिप्रकारिण्यो याः ᵛताः ᵛउपहूताः अध्वर्युणा उपहूताः सत्यः । हे ᵛदेवीः देव्यः आपः, ᵛदेवत्रा देवान् प्रति ᵛइमं यज्ञं ᵛनयत पुनरुपहूता यूयं ᵛसोमस्य सोमं ᵛपिबत ॥५॥

**मा भेर्मा संविक्था ऊर्जँ धत्स्व धि॑षणे वीड्वी सती वीळयेथामूर्जँ दधाथाम् ।
पाप्मा हतो न सोम॑ः ॥६॥**

मा । भेः । मा । सम् । विक्थाः । ऊर्जँम् । धत्स्व। धि॑षणे इति धि॑षणे ।
वीड्वी इति॑ वीड्वी । सती इति॑ सती । वीळयेथाम् । ऊर्जँम् । दधाथाम् ।
पाप्मा । हतः । न । सोम॑ः ॥ ढैं ॥ ६ ॥

सा- कात्यायनः– “ मा भेरिति प्रहरति ” (काश्रौ ९.४.१५) इति । अभिपुणयादित्यर्थः । पाठस्तु– ‘ मा भेर्मा संविक्था ऊर्जं धत्स्व धिषणे वीड्वी सती वीळयेथामूर्जं दधाथाम् । पाप्मा हतो न सोमः ’ इति । हे सोम, त्वं ᵛमा ᵛभेः मा भैषीः । ᵛमा ᵛसंविक्थाः कम्पनं मा कृथाः । यतो देवतर्पणार्थमहं त्वामभिषुणोमि । अतः ᵛऊर्जं ᵛधत्स्व रसं धेहि । एवं सोमं संबोध्य इदानीं द्यावापृथिव्यौ संबोधयति । हे ᵛधिषणे द्यावापृथिव्यौ युवां ᵛवीड्वी ᵛसती, वीडुशब्दो दृढवचनः । दृढे सत्यावात्मानं ᵛवीळयेथां दृढीकुरुतम् । किं च ᵛऊर्जं रसं ᵛदधाथाम् । अनेन आसंस्तुतेन ग्रावाघातेन यजमानस्य ᵛपाप्मा ᵛहतः ᵛन तु ᵛसोमः हतः ॥६॥

---

1. P1 S1 धनानि for धनाभि°
2. V1 S1 C om. ताः
3. P1 with markings obove सत्यः ins in the margin· अध्वर्युणा
6. B1 तुरति for तुर्वन्ति
7. the MS J ends here with पालयित्र्यः । हरिः ओम् । शुभमस्तु । श्रीगुरुभ्यो नमः । रामकृष्णाभ्यां नमः । and then … from श्रुतेः (… com. KS. 11·5.6)
15. C S1 भेर्मेति for भेरिति
18. C संधेहि for रसं धेहि
19. C S1 वीळु° for वीडु°
20. C S1 V1 अनेनैव अस्य (V1 अस्त्रं for अस्य) स्तुतेन ग्राव्णा for अनेन आसंस्तुतने ग्रावाघातेन

आ– प्रहरति– ‘ मा भेः ’ इति । सौम्यमर्धमर्धं द्यावापृथिव्यम् । हे सोम, त्वं ᵛमा ᵛभेः त्वं मा भैषीः । ओविजी भयचलनयोः । ᵛमा ᵛसंविक्थाः कम्पनं मा कृथाः । देवतर्पणार्थमहं त्वामभिषुणोमि । अतः ᵛऊर्जं ᵛधत्स्व रसं धेहि । एवं सोमं संबोध्य द्यावापृथिव्यौ संबोधयति । हे ᵛधिषणे, द्यावापृथिव्यौ ᵛवीड्वी, वीडुशब्दो दृढवचनः, वीड्वी दृढे ᵛसती सत्यौ आत्मानं ᵛवीळयेथां दृढीकुरुतम् । ᵛऊर्जं रसं ᵛदधाथाम् । अनेन वज्रसंस्तुतेन ग्राव्णा यजमानस्य ᵛपाप्मा ᵛहतः ᵛन ᵛसोमः, न तु सोमो हतः ॥ ६ ॥

प्रागपा॒गु॒द॑गध॒राक् स॒र्वत॑स्त्वा॒ दिश॒ आ धा॑वन्तु ।
अम्ब॒ निष्प॑र॒ सम॒रीर्वि॑दाम् ।। ७ ।।
त्वम॒ङ्ग प्रश॑ꣳसिषो दे॒वः श॑विष्ठ॒ मर्त्य॑म् ।
न त्वद॒न्यो म॑घवन्नस्ति म॒र्डि॒तेन्द्र॒ ब्रवी॑मि ते॒ वच॑ः ।।८।। (८) ।।

प्राक् । अपा॑क् । उद॑क् । अ॒ध॒राक् । स॒र्वत॑ः । त्वा॒ । दिश॑ः । आ । धा॒व॒न्तु ।
अम्ब॑ । निः । प॒र॒ । सम् । अ॒रीः । वि॒दा॒म् ॥ हूं ॥ ७ ॥
त्वम् । अ॒ङ्ग । प्र । श॒ꣳसि॒षः । दे॒वः । श॒वि॒ष्ठ । मर्त्य॑म् ।
न । त्वत् । अ॒न्यः । म॒घ॒व॒न्निति॑ मघऽवन् । अ॒स्ति॒ । म॒र्डि॒ता ।
इन्द्र॑ । ब्रवी॑मि । ते॒ । वच॑ः ॥ घ्यैं ॥ ८ ॥ (८) ॥

[हरिः ॐ ॥ देवस्य त्वा सप्त ॥७॥ उपावीरस्यष्ट ॥८॥ नमस्ते सप्त ॥७॥ सं ते पञ्च ॥५॥ समुद्रं पञ्च ॥५॥ हविष्मतीस्तिस्रः ॥३॥ हृदे त्वा सप्त ॥७॥ देवस्य त्वाऽष्ट ॥८॥ अष्टानुवाकेषु पञ्चाशत् ॥५०॥ इषे देवस्य समाः पञ्चाशत् ॥५०॥]

सा– कात्यायनः– “ निग्राभं वाचयति होतृचमसेऽल्पानंश्शूनवधाय प्रागपागिति ” (काश्रौ

---

1. B1 सौम्यधर्ममन्धी द्यावापृथिव्यामर्घश्छन्दो वृणुते – ... we have corrected this as सौम्यमर्धमर्धं द्यावापृथिव्यम and deleted अर्धश्छन्दो वृणुते ।

3. B1 ऊर्ध्वं for ऊर्जं

18. A after पञ्चाशत् add – इति शुक्लयजुर्वेदकाण्वसंहितापाठे षष्ठोऽध्यायः ॥ हरिः ॐ ॥; Padapaṭha :– देवसमाः for देवस्य समाः; after पञ्चाशत् adds इति शुक्लयजुः– काण्वपदसंहितायां षष्ठोऽध्यायः ॥

19. P1 om. होतृचमसे ... अवधाय; P1 after प्रागपागिति adds :– द्वाभ्यामितीति

९.४.२०) इति । प्रागादिमन्त्रः सोमनिग्रहणहेतुत्वान्निग्राभ इत्युच्यते । होतृचमसे सोमांशूनपस्थाप्यैतन्मन्त्रं यजमानं वाचयेत् । पाठस्तु– ‘ प्रागपागुदगधराक् सर्वतस्त्वा दिश आ धावन्तु । अम्ब निष्पर समरीर्विदाम् ॥ त्वमङ्ग प्रशꣳसिषो देवः शविष्ठ मर्त्यम् । न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ’ इति । हे सोम, ᵛत्वा त्वां प्रागादयः ᵛदिशः ᵛसर्वतः सर्वस्मात् स्वस्वप्रदेशात् ᵛआधावन्तु आभिमुख्येनागच्छन्तु । परस्परं किं भाषमाणा आधावन्त्विति तदाह– ‘ हे ᵛअम्ब हे मातः, ᵛनिष्पर स्वैः स्वैर्भागैः सोमं पूरयेति वदन्त्यः । किं च एवंविधं सोमम् ᵛअरीः आगच्छन्त्यो दिशः ᵛसंविदां, छान्दसं रूपं, संविदन्तु सम्यग्जानन्तु । हे ᵛशविष्ठ, अतिशयेन बलवन्निन्द्र, ᵛदेवः दीप्यमानः ᵛत्वं ᵛमर्त्यं मनुष्यं यजमानम् ᵛअङ्ग क्षिप्रं ᵛप्रशꣳसिषः प्रशंससि । हे ᵛमघवन् धनवन् ᵛइन्द्र, ᵛमर्डिता यजमानस्य सुखयिता ᵛत्वत् ᵛअन्यः ᵛन ᵛअस्ति अतोऽहं ᵛते ᵛवचः त्वमेव सुखयितेत्येवंरूपं त्वदीयं वचनं ᵛब्रवीमि ॥ ७–८ ॥

[इति षष्ठेऽध्यायेऽष्टमोऽनुवाकः ॥ ५ ॥]

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कमहीपालसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे काण्वसंहिताभाष्ये षष्ठोऽध्यायः ॥ ६ ॥

आ– निग्राभं वाचयति– ‘ प्रागपाक् ’ इति । सौम्युष्णिक् । हे सोम, ᵛप्राक् प्रागञ्चनाः । ᵛअपाक् अपागञ्चनाः । ᵛउदक् उदगञ्चनाः । ᵛअधराक् अधराञ्चनाः देवाः । एवं ᵛसर्वतः ᵛदिशः हे दिग्देवताः तत्तद्दिग्वासिनो वा [जनाः], ᵛत्वा त्वाम् ᵛआधावन्तु अभिसमागच्छन्तु । परस्परं किं भाषमाणाः आधावन्त्विति तदाह– ‘ अम्ब निष्पर ’ इति । हे ᵛअम्ब हे मातः, सोमं ᵛनिष्पर स्वैः स्वैर्भागैः सोमं पूरयेति वदन्त्यः । तत्रापि किं प्रयोजनमिति ‘ समरीर्विदाम् ’ । ᵛअरीः, “ प्रजा वा अरीः (काशब्रा ४.०.४.१७) इति श्रुतेः । ᵛसंविदाम्, छान्दसं पदम्, सांविदन्ताम् ॥७॥

---

1. P1 प्रागपागिति for प्रागादि°; C सोमग्रहणे तु निग्राभः, S1 सोमग्रहणे तु त्वानिग्राभः, V1 सोमनिग्रहणहेतुः त्वनिग्राभः for सोमनिग्रहणहेतुत्वान्निग्राभः; P1 निग्राभ्यः for निग्राभः

5. P1 संभाषमाणाः for भाषमाणाः

11. C S1 षष्ठा° for षष्ठे°

14. V1 आचार्येण for सायणाचार्येण

15. V1 माधवीयवेदार्थ° for माधवीये वेदार्थप्रकाशे

18. B1 त्वा समं त्वाम् for त्वा त्वाम्

19. B1 संबान्धिष्यारति – we have corrected this as :– अम्ब निष्पर इति; B1 सोमष्पर for सोमं निष्पर [L 20]

22. B1 संविदन्तः for संविदन्ताम्

अनेनापि निग्राभं वाचयति – ‘त्वमङ्ग’ इति । गोतम-[दृष्टा] ऐन्द्री पथ्या बृहती । अङ्गशब्दः क्षिप्रवचनः । हे इन्द्र हे ^{v}शविष्ठ बलिष्ठ, ^{v}मर्त्यम् ^{v}अङ्ग क्षिप्रं ^{v}प्रशंसिषः प्रशंससि । ^{v}मर्त्यं मनुष्यं यजमानं शंससि । हे ^{v}इन्द्र हे ^{v}मघवन्, ^{v}त्वत् ^{v}अन्यः ^{v}मर्डिता, मृड सुखने, यजमानस्य सुखयिता त्वत् अन्यः ^{v}न ^{v}अस्ति । अतोऽहं ^{v}ते ^{v}वचः ^{v}ब्रवीमि त्वमेव सुखयिता इति ॥८॥

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवसूरिपूज्यपादपरमकारुण्यासादितश्रीकृष्णभक्तिसाम्राज्यस्य-
श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदिश्रीमदानन्दबोधभट्टोपाध्यायेन विरचिते
काण्ववेदमन्त्रभाष्यसंग्रहे षष्ठोऽध्यायः ॥६॥

[इति षष्ठोध्यायः]

---

7. B1 चातुर्वेदि for चतुर्वेदि°

सप्तमोऽध्यायः

[अथ प्रथमोऽनुवाकः]

सा– यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

षष्ठेऽध्याये यूपसंस्कारादिसोमाभिषवपर्यन्ता मन्त्रा उक्ताः । सप्तमे ग्रहग्रहणमन्त्रा उच्यन्ते ॥

वा॒चस्पत॑ये पवस्व॒ वृष्णो॑ अ॒ꣳशुभ्यां॒ गभ॑स्तिपूतः ।
दे॒वो दे॒वेभ्य॑ः पवस्व॒ येषां॑ भा॒गोऽसि॒ मधु॑मतीर्न॒ इष॑स्कृधि ॥१॥

वा॒चः । पत॑ये । प॒व॒स्व॒ । वृष्ण॑ः । अ॒ꣳशुभ्या॒मित्य॒ꣳशुऽभ्या॑म् ।
गभ॑स्तिपूत॒ इति॒ गभ॑स्तिऽपूतः ।
दे॒वः । दे॒वेभ्य॑ः । प॒व॒स्व॒ । येषा॑म् । भा॒गः । असि॑ ।
मधु॑मती॒रिति॒ मधु॑ऽमतीः । न॒ः । इष॑ः । कृ॒धि॒ ॥ द्रें ॥१॥

कात्यायनः – “ उपांशुं गृह्णाति । वाचस्पतये देवो देवेभ्यो मधुमतीरिति ” (काश्रौ ९.४.२३) इति । मन्त्रत्रयस्य प्रतीकोपादानात् तत्रैकैकेन मन्त्रेणोपांशुमेकैकवारं गृह्णीयात् । पाठस्तु– ‘ वाचस्पतये पवस्व वृष्णो अꣳशुभ्यां गभस्तिपूतः ’ इति । हे सोम, पतये पालकदेवार्थं वृष्णः वर्षितुस्तव संबन्धिभ्यां अंशुभ्यां गभस्तिपूतः अध्वर्युबाहुभ्यां पूतः सन् वाचः संबन्धिना मन्त्रेण पवस्व शुद्धो भव ॥

अथ द्वितीयः – ‘ देवो देवेभ्यः पवस्व येषां भागोऽसि ’ इति । हे सोम, त्वं येषां देवानां भागः (असि) भवसि तेभ्यः देवेभ्यः देवः दीप्यमानः सन् पवस्व ॥

अथ तृतीयः – ‘ मधुमतीर्न इषस्कृधि ’ इति । हे सोम, त्वं नः अस्मदीयानि इषः अन्नानि मधुमतीः मधुररसोपेतानि कृधि कुरु ॥१॥

आ– ‘ वाचस्पतये ’ इति । अग्निष्टोममन्त्राणां प्रजापतेरार्षमिति अभिहितम् । अतः सर्वेषामग्निष्टोममन्त्राणां सामान्येन प्रजापतिः ऋषिः । यत्र तु ऋषिविशेषोऽभिधीयते तत्रोभावपि

---

5. C S1 षष्ठा° for षष्ठे°

13. P1 अत्र for तत्र and om. एकैकेन मन्त्रेणोपांशुम्; P1 with marking above वाचस्° ins. on the margin : विराट् प्राणदैवत्या; P1 with marking above पतये ins. in the margin : वाचस्पतये प्राणदेवतायै । प्राणो वै वाचस्पातिरिति श्रुतेः । पवस्व पवनं गमनं देवतार्थां प्रवृत्तिं कुर्वित्यर्थः इति भाष्यान्तरम् ।

15. V1 S1 C अध्वर्युषु for अध्वर्यु°; P1 with marking above सन् ins. on the margin : पाणी वै गभस्तीति श्रुतेः

17. P1 after पवस्व adds : हर; with marking above हर ins. in the margin– शुद्धो भव ।

ऋषी भवतः । उपांशुग्रहणस्य पुरो रुक् । 'वाचस्पतये' इति ॥ प्राणदेवत्याऽनुष्टुप् । समस्तस्य विराट् । ^{v}वृष्णः, वृष सेचने, वर्षितुः सोमस्य ^{v}अंशुभ्यां सह ^{v}गभस्तिपूतः । गभस्तीति बाहुनाम । अध्वर्युबाहुभ्यां पूतः सन् उपांशुग्रहं ^{v}वाचः ^{v}पतये प्राणाय ^{v}पवस्व, पव गतौ, व्रज देवतार्थं पवस्वेत्यर्थः । भिन्नपदयोरप्येकपदत्वेन व्याख्या श्रुतानुसारेण क्रियते । 'प्राणो वै वाचस्पतिः' (माशब्रा ५.१.१.७) इति श्रुतेः ॥

द्वितीयं गृह्णाति – 'देवो देवेभ्यः पवस्व' । देवेभ्योऽर्थाय ^{v}देवः । ^{v}स्वयं देवः सन् ^{v}पवस्व प्रवर्तय । ^{v}येषां देवानां द्वितीयग्रहस्त्वं ^{v}भागः ^{v}असि तेभ्यः ^{v}तेभ्यः ^{v}देवेभ्यः, पवस्वेति संबन्धः ॥

तृतीयं गृह्णाति– 'मधुमतीः' इति अन्नदेवत्या । अन्नानि ^{v}नः अस्माकं ^{v}कृधि कुरु ॥१॥

यत् ते॑ सो॒मादा॑भ्यं॒ नाम॒ जागृ॑वि॒ तस्मै॑ ते सोम॒ सोमा॑य॒ स्वाहा॑ ।
स्वाहो॒र्व॒न्तरि॑क्ष॒मन्वे॑मि॒ स्वांकृ॑तोऽसि॒ विश्वे॑भ्य इन्द्रि॒येभ्यो॑
दि॒व्येभ्य॒ः पार्थि॑वेभ्यः ॥२॥
मन॑स्त्वाऽष्टु॒ स्वाहा॑ त्वा स्वभव॒ः सूर्या॑य ।
दे॒वेभ्य॑स्त्वा मरीचि॒पेभ्यो॒ देवा॑ꣳशो॒ यस्मै॒ त्वेळे॑ ।
तत् स॒त्यमु॑परि॒प्लुता॑ भ॒ङ्गेन॑ ह॒तो॒ऽसौ फट् ।
प्रा॒णाय॑ त्वा व्या॒नाय॑ त्वा ॥३॥(१)॥

यत् । ते॒ । सो॒म॒ । अदा॑भ्यम् । नाम॑ । जागृ॑वि । तस्मै॑ । ते॒ । सो॒म॒ । सोमा॑य । स्वाहा॑ ।
स्वाहा॑ । उ॒रु । अ॒न्तरि॑क्षम् । अनु॑ । ए॒मि॒ । स्वांकृ॑त॒ इति॒ स्वाम्ऽकृ॑तः । अ॒सि॒ ।
विश्वे॑भ्यः । इ॒न्द्रि॒येभ्य॑ः । दि॒व्येभ्य॑ः । पार्थि॑वेभ्यः ॥ ङिः ॥२॥
मन॑ः । त्वा॒ । अ॒ष्टु॒ । स्वाहा॑ । त्वा॒ । स्व॒भ॒व॒ इति॑ स्वऽभवः ।
सूर्या॑य । दे॒वेभ्य॑ः । त्वा॒ । म॒री॒चि॒पेभ्य॒ इति॑ म॒री॒चि॒ऽपेभ्य॑ः ।
देव॑ । अ॒ꣳशो॒ इत्य॑ꣳशो । यस्मै॑ । त्वा॒ । ईळे॑ ।
तत् । स॒त्यम् । उ॒प॒रि॒प्लु॒तेत्यु॑प॒रि॒ऽप्लुता॑ । भ॒ङ्गेन॑ । ह॒तः । अ॒सौ । फट् ।
प्रा॒णाय॑ । त्वा॒ । व्या॒नायेति॑ वि॒ऽआ॒नाय॑ । त्वा॒ ॥ मेः ॥ ३॥ (१)॥

---

1. B1 वाचः । पतयति for वाचस्पतये इति

कात्यायनः – “ यत् ते इत्यात्तान्त्सोमे निद्धाति ” (काश्रौ ९.४.२८) इति। स्वीकृतानंशून् सोमे स्थापयेत्। पाठस्तु– ‘ यत् ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहा ’ इति। हे 'सोम, 'ते तव 'अदाभ्यम् अहिंस्यं 'जागृवि जागरणशीलं 'यत् 'नाम अस्ति, हे 'सोम, 'तस्मै तन्नामवते तुभ्यं 'सोमाय 'स्वाहा दत्तमस्तु॥

कात्यायनः – “ स्वाहेत्युक्त्वोर्वन्तरिक्षमिति निष्क्रमणम् ” (काश्रौ ९.४.३४) इति। स्वाहेत्येतदक्षरद्वयमुक्त्वा निष्क्रामेत्। पाठस्तु– ‘ स्वाहोर्वन्तरिक्षमन्वेमि ’ इति। 'उरु विस्तीर्णम् 'अन्तरिक्षम् 'अन्वेमि अनुगच्छामि॥

कात्यायनः – “ स्वाङ्कृत इति हुत्वा पात्रमुपमार्ष्टि ” (काश्रौ ९.४.३७) इति। होमं कृत्वा पात्रोपमार्जनं कुर्यात्। पाठस्तु– ‘ स्वांकृतोऽसि विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यः। मनस्त्वाऽष्टु स्वाहा त्वा स्वभवः सूर्याय ’ इति। हे प्राणरूपोपांशुग्रह, 'त्वं 'स्वांकृतः 'असि मया स्वीकृतो भवसि, स्वयंकृतोऽसीति वा। यकारलोपश्छान्दसः। “ स्वयं प्रजातः ” (द्र. काशब्रा ५.१.१.१७) इति श्रुतेः। किमर्थम् ? ['दिव्येभ्यः 'पार्थिवेभ्यः] देवजन्मनि मनुष्यजन्मनि च स्थितेभ्यः सर्वेभ्यः इन्द्रियेभ्यः हितं यत् 'मनः तादृशं 'त्वा 'अष्टु व्याप्नोतु। 'स्वभवः स्वयमुत्पन्नो यः प्राणः, हे उपांशुग्रह, तादृग्रूपं त्वां बहिःप्राणरूपायादित्याय स्वाहाकारेण जुहोमि। सूर्यस्य प्राणरूपत्वमाथर्वणिकैराम्नातम्– “ आदित्यो ह वै बाह्यः प्राण उदयत्येष ह्येनं वा चाक्षुषं प्राणमनुगृह्णीत ” (प्रश्नोपनिषद् ३·८) इति। स्वांकृतशब्देन प्राणरूपस्य ग्रहस्य स्वाधीनत्वं विवक्षितम्। दिव्यपार्थिवशब्दाभ्यां च जन्मद्वयं च विवक्षितमिति तित्तिरिर्दर्शयति– “ स्वांकृतोऽसीत्याह प्राणमेव समकृत ... विश्वेभ्य इन्द्रियेभ्यो देवेभ्यो दिव्येभ्यः पार्थिवेभ्य इत्याहोभयेष्वेव देवमनुष्येषु प्राणान् दधाति ” (तैसं ६.४.५) इति॥

कात्यायनः – “ प्रथमे परिधावुत्तानं पाणिं प्रागुपमार्ष्टि देवेभ्यस्त्वेति ” (काश्रौ ९.४.३८) इति। पश्चिमभागेऽवस्थितो यः परिधिस्तस्मिन् पाणिं सूर्याभिमुखं कृत्वा प्रागभिमुखं यथा भवति तथोपमार्जनं कुर्यात्। पाठस्तु– ‘ देवेभ्यस्त्वा मरीचिपेभ्यः ’ इति। हे लेप, त्वां 'मरीचिपेभ्यः मरीचिपालकेभ्यः 'देवेभ्यः परिधौ मार्ज्मि॥

कात्यायनः – “ वास उरो बहुषु श्लिष्टमंशुमभिचरन् जुहुयात् देवांशाविति ” (काश्रौ ९.४.३९) इति। वस्त्रोरुबाहुषु यः सोमांशुः संश्लिष्टस्तमभिचरन् जुहुयात्। पाठस्तु– ‘ देवाꣳशो यस्मै त्वेळे। तत् सत्यमुपरिप्लुता भङ्गेन इतोऽसौ फट् ’ इति। हे 'देवांशो, दीप्यमान सोमांशो, 'यस्मै वधाय त्वाम् 'ईळे, ईळिरध्येषणकर्मा, त्वां प्रार्थयामि। 'तत् वधकर्म 'सत्यम् अस्त्विति शेषः। 'उपरिप्लुता,

---

1. C before अंशून् adds तान्

6. C V1 S1 निष्क्रमेत् for निष्क्रामेत्

11. C V1 S1 om. स्वयं ... इति श्रुतेः। [L. 12]

12. C V1 S1 कीदृशाय for किमर्थम्; C V1 S1 om. मनुष्यजन्मनि; P1 om. अव° for च

13. P1 after इन्द्रियेभ्यः adds किंच; V1 S1 C हिताय for हितं यत्

15. C V1 S1 om. वा; C V1 S1 गृह्णानः for °गृह्णीत

17. C V1 S1 समन्वत, P1 समन्वन् for समकृत

26. C °एषणा for °एषण° P1 आह, V1 S1 C अस्ति for अस्तु

प्लवतिर्गत्यर्थः, उपर्यागतेन ^{v}भङ्क्तेन आमर्दन । 'असौ' इति देवदत्तादिनामनिर्देशः । ^{v}असौ द्वेष्यः ^{v}हतः निहतः ^{v}फट् विशीर्णो भवेत् ॥

कात्यायनः – "प्राणाय त्वेति पात्रासादनम्" (काश्रौ ९.४.४१) इति । खरस्य यस्मिन् दक्षिणप्रदेशे पूर्वमुपांशुपात्रं स्थापितमिदानीं तत्रैव स्थापयेत् । हे उपांशुपात्र, प्राणदेवतासंतोषार्थं त्वामासादयामीति शेषः ॥

कात्यायनः – "उपांशुसवनं पाणिना प्रमृज्योदञ्चं व्यानाय त्वेति" (काश्रौ ९.४.४२) इति । उपांशुसवनार्थं येन षाषाणेन सोमोऽभिषुतः स उपांशुसवनः । तं पाणिना प्रमार्जितं कृत्वा उदगभिमुखं यथा भवति तथा सादयेत् । हे उपांशुसवन, व्यानदेवतार्थं त्वामासादयामीति ॥२-३॥

[इति सप्तमेध्याये प्रथमोऽनुवाकः ॥]

आ– गृह्यमाणमंशुं सोमे निदधाति 'यत् ते सोमम्' इति । सोमग्रहदेवत्या जगती, यजुर्वा । सोमदेवत्यं यजुः । हे ^{v}सोम, ^{v}ते तव ^{v}अदाभ्यम् । दभ्नोतिर्हिंसार्थः । हिंसानर्हं ^{v}जागृवि जागरणशीलं ^{v}यत् नाम, हे ^{v}सोम, ^{v}तस्मै ^{v}ते नामवते तुभ्यं ^{v}सोमाय ^{v}स्वाहा सुहुतमस्तु ॥

'स्वाहोरु' इति द्वे यजुषी लिङ्गोक्तदेवत्ये । 'स्वाहा' इति निष्क्रामति । ^{v}उरु ^{v}अन्तरिक्षं विस्तीर्णमन्तरिक्षम् ^{v}अन्वेमि अनुगच्छामि ।

जुहोति– 'स्वांकृतोऽसि' इति । उपांशुदेवत्याऽनुष्टुप् । ^{v}स्वांकृतः ^{v}असि ^{v}विश्वेभ्यः ^{v}इन्द्रियेभ्यः सर्वेभ्य इन्द्रियेभ्यः सकाशात् । विश्वेभ्यः ^{v}दिव्येभ्यः दिवि भवेभ्यः सकाशात् । विश्वेभ्यः ^{v}पार्थिवेभ्यः द्विपदचतुष्पदेभ्यः सकाशात् । स्वांकृतः स्वयंकृतः । छान्दसो यकारलोपः । स्वयमुत्पन्नोऽसि । यस्त्वेवं स्वांकृतः स्वयमुत्पन्नः प्राणस्तं 'त्वा मनोऽष्टु' इत्युत्तरेण संबन्धः ॥२॥

'मनस्त्वा' इति लिङ्गोक्तदेवत्यं यजुः । ^{v}मनः । 'प्रजापतिर्वै [मनः]' । प्रजापतिं त्वां ^{v}अष्टु व्याप्नोतु । अशु व्याप्तावित्यस्य रूपम् । स्वाहा त्वा स्वभवः सूर्याय । "प्राणो वाऽस्यैष ग्रहः" (शब्रा ४.१.१.२२) इति प्रसिद्धो ग्रहो यः ^{v}स्वभवः स्वयंकृतो ग्रहः । तं ^{v}त्वा ^{v}सूर्याय सूर्यार्थं स्वाहाकारेण जुहोमीति शेषः ॥

---

2. V1 S1 C after भवेत् add : ञिफला विशरण इति धातोः क्विबन्तस्य फडित्येतद्रूपम् । छन्दसि डलयोरभेदः । अभिचारे रवी (? स्वाहा) कारस्यस्थाने फडिति प्रयुज्यते । वषड्वश्ये फडु भ्वादे (? फडुच्चाटे) हुं द्वेष्ये पौष्टिके स्वधेति वचनात् ॥
7. C V1 प्रमार्जनं, S1 मार्जनं, for प्रमार्जितं
8. P1 °देवार्थ for °देवतार्थ°; P1 om. इति
12. B1 नाम यत्ते – we corrected this as नामवते
19. B1 स्वयगुप्तं नासि – we have corrected this as : स्वयमुत्पन्नोऽसि; यस्त्वैवं for यस्त्वेवं

मध्यमे परिधौ प्रागुपमार्ष्टि ‘ देवेभ्यस्त्वा ’ इति । देवदेवत्या बृहती । ᵛमरीचिपेभ्यः ᵛदेवेभ्यः । मरीचिभिः स्वतेजोभिः पान्ति रक्षन्तीति मरीचिपाः । तेभ्यो देवेभ्योऽर्थाय त्वामुपमार्ष्टीति शेषः ॥

बाह्वादिश्लिष्टमंशुम् अभिचरन् जुहोति ‘ देवांशो ’ इति । लिङ्गोक्तदेवतमाभिचारिकं यजुः । अनुष्टुप् छन्दः । हे ᵛदेवांशो हे सोमांशो, ᵛयस्मै वधाय त्वाम् ᵛईळे । ईळिरध्येषणकर्मा । त्वां प्रार्थयामि । ᵛतत् ᵛसत्यम्, यद्वधकर्म [तत्] सत्यमास्त्विति शेषः । ᵛउपरिप्लुता, प्लवतिगत्यर्थः, उपर्युपरि प्लुता, प्रवतीति प्रुत्, तेन प्रुता । उपर्यागतेन ᵛभङ्गेन आमर्देन । ᵛअसौ इति नामनिर्देशः । ᵛअसौ ᵛहतः, ᵛफट् । ञिफला विशरणे । क्विबन्तस्यैतद्रूपं फडिति । छन्दसि लडयोरभेदः । फट् विशीर्यते । अभिचारे स्वाहाकारस्य स्थाने फडिति प्रयुज्यते । ‘ वषड्वधे फडुद्घाते (? च्चाटे) हुं द्वेष्ये पौष्टिके स्वधा ’ इति वचनात् ॥

पात्रासादनं ‘ प्राणाय त्वा ’ इति । ᵛप्राणाय ᵛत्वा त्वां सादयामीति शेषः । उपांशुसवनं सादयति– ‘ व्यानाय त्वा ’, सादयामीति शेषः ॥ ३ ॥

[इति सप्तमेऽध्याये प्रथमोऽनुवाकः ॥१॥]

[अथ द्वितीयोऽनुवाकः]

सा– प्रथमेऽनुवाके उपांशुग्रहार्था मन्त्रा उक्ताः । द्वितीयेऽन्तर्यामग्रहार्था मन्त्रा उच्यन्ते ॥

उ॒प॒या॒मगृ॑हीतोऽस्य॒न्तर्य॑च्छ मघवन् पा॒हि सोम॑म् ।
उ॒रु॒ष्य रायोऽवेषो॑ यजस्व ॥१॥
अ॒न्तस्ते॒ द्यावा॑पृथि॒वी द॑धाम्य॒न्तर्द॑धाम्यु॒र्व॒न्तरि॑क्षम् ।
स॒जूर्दे॒वेभि॒रव॑रै॒ः परै॑श्चान्तर्या॒मे म॑घवन् मादयस्व ।
स्वाहो॒र्व॒न्तरि॑क्ष॒मन्वे॑मि॒ स्वाकृ॑तोऽसि॒ विश्वे॑भ्य इन्द्रि॒येभ्यो॑ दि॒व्येभ्य॒ः पार्थि॑वेभ्यः ।
मन॑स्त्वाऽष्टु॒ स्वाहा॑ त्वा स्वभ॒वः सूर्या॑य ।
दे॒वेभ्य॑स्त्वा मरीचि॒पेभ्य॑ उदा॒नाय॑ त्वा ॥२॥ (२) ॥

उ॒प॒या॒मगृ॑हीत॒ इत्यु॑प॒या॒मऽगृ॑हीतः । अ॒सि॒ । अ॒न्तः । य॒च्छ॒ ।
म॒घ॒वन्निति॑ मघऽवन् । पा॒हि । सोम॑म् ।
उ॒रु॒ष्य । राय॑ः । अव॑ । इष॑ः । य॒ज॒स्व॒ ॥ इंय ॥ १ ॥

---

4. B1 लिङ्गोक्तदेवतामाभिचारिकं प्राणाय ग्रहं अनुष्टुप् for लिङ्गोक्त...छन्दः [L 5]

अ॒न्तारित्य॒न्तः । ते॒ । द्यावा॑पृथि॒वी इति॒ द्यावा॑पृथि॒वी । द॒धा॒मि॒ ।
अ॒न्तः । द॒धा॒मि॒ । उ॒रु । अ॒न्तरि॑क्षम् ।
स॒जूरिति॑ स॒ऽजूः । दे॒वेभि॑ः । अव॑रैः । परै॑ः । च॒ ।
अ॒न्त॒र्या॒म इत्य॑न्त॒ःऽया॒मे । म॒घ॒वा॒न्निति॑ मघऽवन् । मा॒द॒य॒स्व॒ ।
उ॒द॒ानायेत्यु॑त्ऽआ॒नाय॑ । त्वा॒ ॥ स्व्यों ॥२॥ (२) ॥

कात्यायनः – “ उदितेऽन्तर्यामग्रहणमुपयामगृहीत इति उपांशुवत्” (काश्रौ ९.६.१–२) इति। सूर्योदयादुत्तरकाले अन्तर्यामग्रहं गृह्णीयात्। उपांशुग्रहे येन मन्त्रेण यत् कर्मानुष्ठितम् अन्तर्यामग्रहणानन्तरं तेन तेन मन्त्रेण तत्तत्कर्मानुतिष्ठेत्। पाठस्तु– ‘ उपयामगृहीतोऽस्यन्तर्यच्छ मघवन् पाहि सोमम्। उरुष्य रायोऽवेषो यजस्व । अन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम् । सजूर्देवेभिरवरैः परैश्चान्तर्यामे मघवन् मादयस्व ’ इति। उपयमयतीत्युपयामो ग्रहस्तेन गृह्यत इति ᵛउपयामगृहीतः । हे सोमरस, त्वं तादृशो भवसि। हे ᵛमघवन् धनवन्निन्द्र, त्वं तादृशं ग्रहपात्रम् ᵛअन्तः ᵛयच्छ शत्रुभ्योऽन्तर्धानं व्यवधानं यथा भवति तथा नियमय। ततः ᵛसोमं ᵛपाहि पालय। तथा ᵛरायः धनानि ᵛअव ᵛउरुष्य आभिमुख्येनागत्य रक्ष। ᵛइषः अन्नानि ᵛयजस्व देहि ॥१॥

ᵛते तवानुग्रहात् ᵛद्यावापृथिवी द्यावापृथिव्यौ ᵛअन्तः ᵛदधामि व्यवधायिके करोमि। किं च ᵛउरु विस्तीर्णम् ᵛअन्तरिक्षम् ᵛअन्तः ᵛदधामि। हे ᵛमघवन् इन्द्र, ᵛअवरैः ᵛपरैः सर्वैर्देवैः ᵛसजूः समानप्रीतियुक्तः सन् ᵛअन्तर्यामे ग्रहे ᵛमादयस्व। स त्वं हृष्टः सन् अन्यानपि हर्षय ॥

स्वाहाकारमुक्त्वा निष्क्रामेत् – ‘ स्वाहोर्वन्तरिक्षमन्वेमि ’ इति। अयं पूर्वं व्याख्यातः ॥

अथ होमं कृत्वा पात्रं प्रमृज्यात् । पाठस्तु– ‘ स्वांकृतोऽसि विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यः। मनस्त्वाऽष्टु स्वाहा त्वा स्वभवः सूर्याय ’ इति । पूर्ववद्व्याख्येयम् ॥

अथ परिधौ पाण्युपमार्जनमन्त्रो – ‘ देवेभ्यस्त्वा मरीचिपेभ्यः ’ इति पूर्ववद्व्याख्यातव्यः ॥

कात्यायनः – “ उदानाय त्वेति पात्रासादनम् ” (काश्रौ ९.६.५) इति। अन्तर्यामग्रहः पूर्वं यस्मिन् स्थाने स्थितः इदानीं तस्मिन्नेवासादयेत्। हे अन्तर्यामग्रह, त्वामुदानदेवतासंतोषार्थमासादयामीति शेषः ॥ १–२ ॥

[इति सप्तमेऽध्याये द्वितीयोऽनुवाकः ॥२॥]

---

6. V1 S1 C °ग्रहण °उप for °ग्रहणमुप°
7. P1 °ग्रहेण for °ग्रहे येन
8. V1 S1 C om. one तेन; V1 S1 C तत्कर्म for तत्तत्कर्म
12. C S1 om. पाहि; P1 उरुष्य अभिमुखेनागत्य अव for अव उरुष्य आभिमुख्येनागत्य
15. V1 S1 C om. परैः
16. P1 पाहि for अन्यानपि
20. V1 S1 C अपरिधौ for अथ परिधौ; V1 S1 C व्याख्यातः for व्याख्यातव्यः
24. Pi V1 om. अध्याये

आ– अन्तर्यामं गृह्णाति–' उपयामगृहीतोऽसि ' इति । अतो हे ^{v}मघवन्, ^{v}अन्तः मध्ये ^{v}यच्छ ग्रहपात्रं ^{v}यच्छ गृह्णीष्व । ततः पात्रस्थं ^{v}सोमं ^{v}पाहि गोपाय । ^{v}उरुष्य ^{v}रायः पशून् । ^{v}अव ^{v}उरुष्य पशून् गोपाय । उरुष्यतिर्गोपायतीत्यर्थः । ततः ^{v}इषः ^{v}यजस्व । इषः अन्नानि । अत्रान्नप्रभवाः प्रजा इषः । " प्रजा वा इषः " (शब्रा ४.१.२.१५) इति श्रुतेः । यजस्व प्रजाः याजयस्व, यायजूकाः कुरु ॥१॥

' अन्तस्ते ' इत्यन्तर्यामपरो मन्त्रः । मघवद्देवत्या त्रिष्टुप् । ^{v}अन्तः ^{v}ते अन्तर्यामग्रहस्य तव अन्तः शरीरमध्ये ^{v}द्यावापृथिवी द्यावापृथिव्यौ ^{v}दधामि स्थापयामि । ' अन्तर्दधाम्युर्वन्तरिक्षम् ' [स्थाप-] यामि । हे^{v} मघवन् ^{v}सजूः ^{v}देवेभिः । " अतो भिस ऐस् " (पा ७.१.९), " बहुलं छन्दसि " (पा ७.१.१०) इति ऐस् न भवति । ' अवरैः परैश्च ' । पृथिवीस्थानैः ^{v}अवरैः देवैर्द्युस्थानैः ^{v}परैः ^{v}च देवैः सजूः समानजोषणः सह प्रीयमाणः इन्द्रः त्वम् ^{v}अन्तर्यामे अस्मिन् ग्रहे ^{v}मादयस्व आत्मानं हर्षयस्व ॥

जुहोति– ' स्वाहा ', ' स्वांकृतोऽसि ' इति मन्त्रौ द्वौ व्याख्यातौ । पात्रमासादयति– ' उदानाय त्वा ' इति । ग्रहदेवत्या पङ्क्तिः । त्वां गृह्णामीति शेषः ॥२॥

[इति सप्तमेऽध्याये द्वितीयोऽनुवाकः ॥२॥]

[अथ तृतीयोऽनुवाकः]

सा – द्वितीयेऽन्तर्यामग्रह उक्तः । तृतीये ऐन्द्रवायवग्रह उच्यते ॥

आ वा॑यो भूष शुचिपा॒ उप॑ नः स॒हस्रं॑ ते नि॒युतो॑ विश्ववार ।
उपो॑ ते॒ अन्धो॒ मद्य॑मयामि॒ यस्य॑ देव द॑धि॒षे पूर्व॒पेयँ॑ वा॒यवे॑ त्वा ॥१॥

आ । वा॒यो॒ इति॑ वायो । भू॒ष॒ । शु॒चि॒पा॒ इति॑ शुचिऽपाः ।
उप॑ । न॒ः । स॒हस्र॑म् । ते॒ । नि॒युत॒ इति॑ नि॒ऽयुत॑ः । वि॒श्व॒वा॒रेति॑ विश्वऽवार ।
उपो॒ इत्युपो॑ । ते॒ । अन्ध॑ः । मद्य॑म् । अ॒या॒मि॒ ।
यस्य॑ । दे॒व॒ । द॒धि॒षे॒ । पू॒र्व॒पे॒यमिति॑ पू॒र्व॒ऽपेय॑म् । वा॒यवे॑ । त्वा॒ । घ॑ाः ॥१॥

---

2. B1 गृह्णीय for गृह्णीष्व
6. B1 भाव for तव
10. B1 °जोष्यमाणः सदप्रीयमाणः for समान ... प्रीयमाणः
12. B1 स्वाहाकृतो for स्वाङ्कृतो°

कात्यायनः– "ऐन्द्रवायवं गृह्णात्या वायविति" (काश्रौ ९·६·६) इति । ऐन्द्रवायवग्रहे वायुदेवतार्थं सोमं गृह्णीयात् । पाठस्तु– 'आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार । उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयं वायवे त्वा' इति । हे ᵛवायो, त्वम् आगत्य ᵛभूष ग्रहानलंकुरु । हे ᵛशुचिपाः पवित्रस्य सोमस्य पातः, त्वं ᵛनः अस्मान् ᵛउप गच्छ । हे ᵛविश्ववार विश्वव्यापक, ᵛते तव ᵛसहस्रं ᵛनियुतः सन्ति । नियुच्छब्देन वायुवहनमृगा उच्यन्ते । ᵛमद्यं मदनीयम् ᵛअन्धः सोमरसरूपमन्नं ᵛते तव ᵛउपो उप समीपम् ᵛअयामि गमयामि । हे ᵛदेव दीप्यमान वायो, ᵛयस्य सोमस्य रसं ᵛपूर्वपेयं प्रथममेव पातव्यमिति ᵛदधिषे मनो धृतवानसि तादृशसोमरसरूपमन्नं तव समीपं गमयामीत्यन्वयः । हे सोमरस, त्वां वायुदेवतायै गृह्णामीति शेषः ॥१॥

आ– वायव्यं गृह्णाति 'आ वायो' इति । वसिष्ठो वायुदेवत्या त्रिष्टुप् यजुरन्ता । वा गतिबन्धनयोः । वातीति वायुः । तत्संबोधनम् । हे ᵛवायो ᵛशुचिपाः, पवित्रं सोमं प्रथमवषट्कृतम् अन्यैर्देवताविशेषैरप्राप्तं पिबतीति शुचिपाः त्वम्, ᵛउप ᵛनः अस्माकं समीपे । भूष अलङ्कारे । 'सहस्रं ते नियुतः' । नियुदिति वायोरश्वस्य नाम । अश्वानां सहस्रं तवास्तीति त्वदीयमश्वसहस्रं नितरां युतः हे ᵛविश्ववार, विश्वं सर्वं वृणोति सर्वैः प्राणिभिर्व्रियत इति वा विश्ववारः, तत्संबोधनम् हे विश्ववार । 'उपो ते अन्धो मद्यमयामि' । ᵛते तव स्वभूतम् ᵛअन्धः अन्नम् ᵛमद्यं मदनीयम् । ᵛउपो ᵛअयामि उपगमयामि । अय पय गतौ । 'यस्य देव दधिषे पूर्वपेयम्' । प्रथमवषट्कारलक्षणं प्रथमं पानीयं भागं हे ᵛदेव, ᵛदधिषे धारयसि । 'वायवे त्वा' इति । देवतादेशः । ᵛवायवे ᵛत्वा, गृह्णामीति शेषः ॥१॥

**इन्द्र॑वायू इ॒मे सु॒ता उप॒ प्रयो॑भि॒रा ग॑तम् । इन्द॑वो वामु॒शन्ति॒ हि ।
उ॒प॒या॒मगृ॑हीतोऽसि वा॒यव॑ इन्द्रवा॒यु॒भ्यां त्वै॒ष ते॒ योनि॑ः ।
स॒जोषो॑भ्यां त्वा ॥२। (३)॥**

इन्द्र॑वायू॒ इतीन्द्र॑ऽवायू । इ॒मे । सु॒ताः । उप॑ । प्रयो॑भि॒रिति॒ प्रय॑ःऽभिः । आ । ग॒तम् ।
इन्द॑वः । वा॒म् । उ॒शन्ति॑ । हि ।
वा॒यवे॑ । इ॒न्द्र॒वा॒यु॒भ्यामिती॑न्द्र॒वा॒यु॒ऽभ्या॑म् । त्वा॒ ।
ए॒षः । ते॒ । योनि॑ः । स॒जोषो॑भ्या॒मिति॑ स॒जोष॑ःऽभ्याम् । त्वा॒ ॥ श्रों ॥२॥(३)॥

---

3. V1 S1 C om. त्वं

5. V1 S1 C om. सन्ति; V1 S1 C नियुत इति वायोरश्वस्य नाम । अश्वानां सहस्रं तवास्तीति त्वदीयमश्वसहस्रं नितरां युतः । हे अन्धः अन्नं मद्यं मदनीयम् ᵛउपो उप ᵛअयामि उपगमयामि । पूर्वपेयं प्रथमं वषट्कारलक्षणं प्रथमं पानीयं भागं हे ᵛदेव ᵛदधिषे धारयसि । ᵛवायवे ᵛत्वा इति । देवता देवाः । ᵛवायवे ᵛत्वा गृह्णामीति शेषः । उप समीपं गमयामीत्यन्वयः for नियुच्छब्देन ... गमयामीत्यन्वयः ॥ (L. 6)

8. V1 S1 C गृह्णाति for गृह्णामि

13. B1 सपरिवार for विश्ववार

सा – कात्यायनः – “ अपगृह्य पुनरिन्द्रवायू इति ” (काश्रौ ९.६.७) इति । पूर्वमैन्द्रवायवाग्रे वायुदेवताकं सोमं गृहीत्वा इदानीं तस्मिन्नेव ग्रहे इन्द्रवायुदेवताकं गृह्णीयादिति शेषः। पाठस्तु– ‘ इन्द्रवायू इमे सुता उप प्रयोभिरा गतम् । इन्दवो वामुशन्ति हि । उपयामगृहीतोऽसि वायव इन्द्रवायुभ्यां त्वैष ते योनिः सजोषोभ्यां त्वा ’ इति । हे ^{v}इन्द्रवायू युष्मदर्थम् ^{v}इमे सोमाः ^{v}सुताः अभिषुताः । युवां ^{v}प्रयोभिः एतैः सोमरसरूपैरन्नैर्निमित्तरूपैः ^{v}उप समीपे ^{v}आगतम् आगच्छतम् । ^{v}हि यस्माद् ^{v}इन्दवः सोमरसाः ^{v}वां युवाम् ^{v}उशन्ति कामयन्ते । तस्मादागच्छतमिति पूर्वत्राऽन्वयः । हे सोमरस, त्वम् उपयामग्रहेण गृहीतो भवसि । ^{v}वायवे वायुदेवार्थं ^{v}इन्द्रवायुभ्याम् इन्द्रवायुदेवतार्थं च त्वां गृह्णामीति शेषः ॥

हे पात्र, सः ^{v}एषः खरस्यैकदेशः ^{v}ते ^{v}योनिः तव स्थानम् । अतोऽत्र ^{v}सजोषोभ्यां समानप्रीतिभ्यामिन्द्रवायुभ्यां त्वां सादयामीति शेषः । द्विदेवत्यग्रहाणां मध्ये ऐन्द्रवायवग्रहस्य प्राथम्यं -“ वाग्वा एषा यदैन्द्रवायवः ” (तैसं ६.४.७) इत्यादिवाक्यजातेन तित्तिरिणा बहुधा प्रपञ्चितम् ॥२॥

[इति सप्तमेऽध्याये तृतीयोऽनुवाकः ॥]

आ– द्वितीया पुरोरुक् ‘ इन्द्रवायू ’ इति । मधुच्छन्दाः । ऐन्द्रवायवी गायत्री । हे ^{v}इन्द्रवायू, ^{v}इमे सोमाः ^{v}सुताः अभिषुताः यस्मात् तस्माद्युवां ^{v}प्रयोभिः शीघ्रगैरश्वैः ^{v}उपागतम् उपागच्छतम् । प्रयोभिः प्रयाद्भिः । प्रयःशब्दः इण् गताविति धातोः शतृप्रत्ययान्तस्य यणादेशे भिसि च तकारस्य छान्दससकारे कृते सकारस्य रुत्वादौ कृते प्रपूर्वस्य प्रयोभिरिति रूपम् । किं च ‘ इन्दवो वामुशन्ति हि ’ । ^{v}हि यस्मात् ^{v}इन्दवः सोमाः ^{v}वां युवाम् ^{v}उशन्ति । वश कान्तौ । युवयोरागमनं कामयन्ते । तस्मादुपागच्छतमिति संबन्धः । ‘ उपयामगृहीतोऽसि [वायव इन्द्र-] वायुभ्यां त्वा ’ । गृह्णामीति शेषः । ^{v}एषः ^{v}ते ^{v}योनिः स्थानम् । योनिशब्दो हि स्थानवचनः । अतोऽत्र ^{v}सजोषोभ्यां समानप्रीतिभ्यां इन्द्रवायुभ्यां त्वां सादयामीति शेषः ॥२॥

[इति सप्तमेऽध्याये तृतीयोऽनुवाकः]

[अथ चतुर्थोऽनुवाकः]

सा – तृतीये ऐन्द्रवायवग्रह उक्तः । चतुर्थे मैत्रावरुणग्रह उच्यते ॥

अ॒यꣳ वां॑ मि॒त्रावरुणा सु॒तः सोम॑ ऋतावृधा । ममेदि॒ह श्रु॒तꣳ हव॑म् ।
उ॒प॒या॒मगृ॑हीतोऽसि मि॒त्रावरु॑णाभ्यां त्वा ।।१।।

---

7. V1 S1 C om. च
8. V1 S1 C om. एषः; P1 ते तव for एषः; P1 with markings above °खरस्यैक ins. in the margin पृथिवीलक्षणप्रदेश इति केचित्; P1 S1 V1 C तद्योनिः for ते योनिः
9. V1 S1 C °दैवत्य° for °देवत्य°
11. V1 P1 om. अध्याये; C S1 सप्तमा° for सप्तमे°

अयम् । वाम् । मित्रावरुणा । सुतः । सोमः । ऋतावृधा । ऋतवृधेत्यृतऽवृधा ।
मम । इत् । इह । श्रुतम् । हवम् ।
मित्रावरुणाभ्याम् । त्वा । खुं ॥१॥

कात्यायनः– “मैत्रावरुणमयं वामिति” (काश्रौ ९·६·८) इति । मैत्रावरुणदेवतार्थे पात्रे सोमं गृह्णीयात् । पाठस्तु– ‘अयं वां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतꣳ हवम् । उपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वा’ इति । हे ᵛऋतावृधा यज्ञस्य वर्धकौ मित्रावरुणौ ᵛवां युवयोरर्थाय ᵛअयं ᵛसोमः ᵛसुतः यस्मादभिषुतः तस्मात् ᵛइह अस्मिन् यज्ञे ᵛमम ᵛइत् यजमानानां मध्ये ममैव ᵛहवम् आह्वानं ᵛश्रुतं युवां शृणुतम् । हे ᵛसोमरस त्वं मैत्रावरुणग्रहणपात्रेण गृहीतो भवसि । त्वां मित्रावरुणदेवताभ्यां गृह्णामीति शेषः ॥१॥

आ– मैत्रावरुणस्य पुरोरुक्–‘अयं वाम्’ इति । गृत्समदः । मित्रावरुणदेवत्या गायत्री । ‘मित्रावरुणा’, ‘ऋतावृधा’ इत्युभयत्र “सुपां सुलुक्°” (पा. ७·१·३९) इत्याकारः । हे मित्रावरुणौ ऋतावृधौ, ऋतस्य सत्यस्य यज्ञस्य वर्धयितारौ हे ऋतावृधौ । वृधेः क्विबन्तस्य रूपम् । ᵛवां युवयोरर्थाय ᵛअयं ᵛसोमः ᵛसुतः अभिषुतः । यतस्ततः ᵛमम ᵛइत् एव । अहमस्मिन् यज्ञे यजमानानां मध्ये ममैव ᵛहवम् आह्वानं युवां ᵛश्रुतं शृणुतम् । ‘उपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वा’ इति देवतादेशः ॥१॥

राया वयꣳ ससवाꣳसो मदेम हव्येन देवा यवसेन गावः ।
तां धेनुं मित्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरन्तीम् ।
एष ते योनिर्ऋतायुभ्यां त्वा ॥२॥(४)॥

राया । वयम् । ससवाꣳस इति ससवाꣳसः । मदेम । हव्येन । देवाः । यवसेन । गावः ।
ताम् । धेनुम् । मित्रावरुणा । युवम् । नः ।
विश्वाहा । धत्तम् । अनपस्फुरन्तीमित्यनपऽस्फुरन्तीम् ।
एषः । ते । योनिः । ऋतायुभ्याम् । ऋतयुभ्यामित्यृतयुऽभ्याम् । त्वा ॥ द्विः ॥२॥(४)॥

सा– कात्यायनः– “पयसा श्रीणात्येनं कुशावन्तर्धाय राया वयमित्येवं सर्वत्र श्रयणेषु” (काश्रौ ९·६·९-१०) इति । मैत्रावरुणग्रहणपात्रे कुशद्वयव्यवधानं कृत्वा तत्रस्थं सोमरसं क्षीरेण मिश्रीकुर्यात् । एवं यत्र यत्र श्रयणानि सन्ति तेषु सर्वेषु एवं कुर्यादित्यर्थः । पाठस्तु– ‘राया वयꣳ ससवाꣳसो मदेम हव्येन देवा यवसेन गावः । तां धेनुं मित्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरन्तीम् । एष ते योनिर्ऋतायुभ्यां त्वा’ इति । ᵛदेवाः इन्द्रादयः ᵛहव्येन हविषा यथा हृष्यन्ति, ᵛगावः ᵛयवसेन घासेन, तथा ᵛवयं ᵛराया धनेन ᵛससवाꣳसः संभक्ताः । वन षण संभक्तावित्यस्य रूपम् । धनसंपन्नाः सन्तः ᵛमदेम हृष्टाः स्याम । हे मित्रावरुणौ, वां युवां ᵛनः अस्मभ्यं ᵛविश्वाहा सर्वदा ᵛतां तथाभूतां ᵛधेनुं ᵛधत्तम् दत्तम् । कीदृशीम् ? ᵛअनपस्फुरन्तीम् । अपेत्यापेत्य या पुरुषान्तरं गच्छति सा अपस्फुरन्ती, न अपस्फुरन्ती अनपस्फुरन्ती, तां धेनु-

---

30. C S1 om. अपेत्य° … न अपस्फुरन्ती V1 om. अपस्फुरन्ती न अपस्फुरन्ती;
V1 C अनपस्फुरन्तीं for अनपस्फुरन्ती.

मित्यर्थः । ^{v}ऋतायुभ्यां सत्यमिच्छद्‌भ्यां मित्रावरुणाभ्याम् । स्पष्टमन्यत् । गृहीतस्य सोमरसस्य क्षीरमेलनं " मित्रं देवा अब्रुवन् " (तैसं ६.४.८.१) इत्यादि वाक्यजातेन तित्तिरिणा स्पष्टीकृतम् ॥२॥

[इति सप्तमेऽध्याये चतुर्थोऽनुवाकः ॥]

आ– इह कामदुघां प्रार्थयति मन्त्रदृक्-- 'राया वाम्' इति । त्रसदस्युः । मित्रावरुणदेवत्या त्रिष्टुप् । हे मित्रावरुणौ, अस्माकं गृहे स्थितया यया धेन्वा ^{v}राया धनेन च ससवांसः । वन षण संभक्ताविल्यस्य रूपम् । संभक्ताः धनसंपन्नाः सन्तः ^{v}मदेम हृष्टाः स्याम । यथा ^{v}हव्येन ^{v}देवाः हृष्यान्ति, यथा ^{v}यवसेन गवाह्निकेन घासेन गावो हृष्यन्ति, ^{v}तां तथाभूतां सर्वसंपत्कारणभूतां ^{v}धेनुं मित्रावरुणौ ^{v}युवं ^{v}विश्वाहा सर्वदा ^{v}नः अस्माकं ^{v}धत्तं दत्तम् । पुनः कथंभूतां धेनुमिति ? ^{v}अनपस्फुरन्तीम् । स्फुरतिर्गत्यर्थः । अपेत्यापेत्य या पुरुषान्तरं गच्छति सा अपस्फुरन्ती । न अपस्फुरन्ती अनपस्फुरन्ती, ताम् [अनपस्फुरन्तीम्] । अनन्यगामिनीं तां धेनुम् अस्मभ्यं दत्तेति संबन्धः । 'एष ते योनिर्ऋतायुभ्यां त्वा', सादयामीति शेषः । ऋतशब्देन मित्रोऽभिधीयते । आयुशब्देन वरुणः । अत ऋतायुभ्यां मित्रावरुणाभ्यामिति ॥२॥

[इति सप्तमेऽध्याये चतुर्थोऽनुवाकः]

[अथ पञ्चमोऽनुवाकः]

सा – चतुर्थे मैत्रावरुणग्रह उक्तः । पञ्चमे आश्विनग्रह उच्यते ।

या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् ।
उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वा ॥१॥(५)॥

या । वाम् । कशा । मधुमतीति मधुऽमती । अश्विना । सूनृतावतीति सूनृताऽवती । तया । यज्ञम् । मिमिक्षतम् । अश्विभ्यामित्यश्विऽभ्याम् । त्वा । एषः । ते । योनिः । माध्वीभ्याम् । त्वा ॥ ठिं ॥१॥(५) ॥

कात्यायनः– "या वामित्याश्विनम्" (काश्रौ ९.७.८) इति । गृह्णीयादिति शेषः । पाठस्तु– 'या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् । उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वा' इति । हे ^{v}अश्विना अश्विदेवौ, ^{v}वां युवयोः ^{v}या ^{v}कशा । कशेति वाङ्‌नाम । या वाक् ^{v}मधुमती । मधु ब्रह्म, तद्वती । मधुब्राह्मणोपनिषत् प्रशंसायुक्ता, ^{v}सूनृतावती प्रियसत्यवचनोपेता ।

---

1. P1 with marking above– सत्यामिच्छद्‌भ्यां ins. in the margin. ऋतं सत्यं यज्ञं वा [यौ] कामयेते [तौ] ऋतवायू ताभ्यामिति भाष्यान्तम् ।
5. B1 अस्मान् गृहे स्थितवाचया धनेन च – we have correctd this as – अस्माकं गृहे स्थितया यया धेन्वा राया धनेन च
23. S1 C अश्विनौ देवौ for अश्विदेवौ.
24. P1 मधुब्राह्मणवती for मधु ब्रह्म । तद्वती

तया वाचा अस्मदीयं यज्ञं ᵛमिमिक्षतं सेक्तुमिच्छतं, निष्पादयतमित्यर्थः । ᵛमाध्वीभ्यां, मधुब्राह्मणं यावश्विनावधीयाते ताभ्यामश्विभ्यां त्वां सोमं सादयामि । शिष्टं स्पष्टम् ॥१॥

[इति सप्तमेऽध्याये पञ्चमोऽनुवाकः ॥]

आ– आश्विनस्य पुरोरुक्–‘ या वां कशा ’ इति । मेधातिथिराश्विनी गायत्री । ᵛअश्विना हे अश्विनौ ᵛवां युवयोः ᵛया ᵛकशा वाक् । कशेति वाङ्नाम । काशयति प्रकाशयतीति कशा या वाक् सा ᵛमधुमती । मधुब्राह्मणोपनिषत्प्रशंसायुक्ता । मधु ब्रह्म, तद्वती मधुमती ᵛसूनृतावती शोभना ऋतावती । ᵛतया वाचा ᵛयज्ञं ᵛमिमिक्षतम् युवां सिञ्चतम् । मिह सेचने । सेचनं कुरुतम् । तस्मात् ᵛउपयामगृहीतः ᵛअसि ᵛअश्विभ्यां ᵛत्वा गृह्णामि । ᵛएषः ᵛते ᵛयोनिः ᵛमाध्वीभ्याम् । मधुब्राह्मणं यावश्विनावधीयाते तावश्विनौ माध्वी । ताभ्यां गृह्णामीति शेषः ॥१॥

[इति सप्तमेऽध्याये पञ्चमोऽनुवाकः ॥]

——

[अथ षष्ठोऽनुवाक]

सा– पञ्चमे आश्विनग्रह उक्तः । अथ षष्ठे शुक्रग्रह उच्यते ।

तं प्र॒त्नथा॑ पू॒र्वथा॑ वि॒श्वथे॒मथा॑ ज्ये॒ष्ठता॑तिं ब॒र्हि॒षद॑ꣳ स्व॒र्विद॑म् ।
प्र॒ती॒ची॒नꣳ वृ॒जनं॑ दो॒ह॒से॒ धुनि॑मा॒शुं जय॑न्त॒मनु॒ यासु॒ वर्ध॑से ।
उ॒प॒या॒मगृ॑हीतो॒ऽसि॒ शण्डा॑य त्वा ॥१॥
ए॒ष ते॒ योनि॑र्वी॒रतां॑ पा॒ह्यप॑मृष्टः॒ शण्डो॑ दे॒वास्त्वा॑ शुक्र॒पाः प्रण॑य॒न्त्वना॑धृष्टाऽसि ।
सु॒वीरो॑ वी॒रान् प्र॑ज॒नय॒न् परी॑ह्य॒भि रा॒यस्पोषे॑ण॒ यज॑मानम् ।
सं॒ज॒ग्मा॒नो दि॒वा पृ॑थि॒व्या शु॒क्रः शु॒क्रशो॑चिषा॒ निर॑स्तः॒ शण्ड॑ः
शु॒क्रस्या॑धि॒ष्ठान॑मसि ॥२॥

तम् । प्र॒त्नथेति॑ प्र॒त्नऽथा॑ । पू॒र्वथेति॑ पू॒र्वऽथा॑ । वि॒श्वथेति॑ वि॒श्वऽथा॑ । इ॒मथेती॒मऽथा॑ ।
ज्ये॒ष्ठता॑ति॒मिति॑ ज्ये॒ष्ठऽता॑तिम् । ब॒र्हि॒षद॑म् । ब॒र्हि॒सद॒मिति॑ ब॒र्हि॒ऽसद॑म् । स्व॒र्वि॒द॒मिति॑ स्वः॒ऽविद॑म् ।
प्र॒ती॒ची॒नम् । वृ॒जन॑म् । दो॒ह॒से॒ । धुनि॑म् । आ॒शुम् । जय॑न्तम् । अनु॑ । यासु॑ । वर्ध॑से ।
शण्डा॑य । त्वा॒ ॥ चः ॥१॥

---

1. P1 with marking above माध्वीभ्यां ins. on the margin स्त्रीत्वं देवतात्वेनेति ज्ञेयम् ।
2. P1 V1 S1 C अधीयेते for अधीयाते.

एषः । ते । योनिः । वीरताम् । पाहि । अपमृष्ट इत्यपऽमृष्टः । शण्डः ।
देवाः । त्वा । शुक्रपा इति शुक्रऽपाः । प्र । नयन्तु । अनाधृष्टा । असि ।
सुवीर इति सुऽवीरः । वीरान् । प्रजनयन्निति प्रऽजनयन् । परि । इहि ।
अभि । रायः । पोषेण । यजमानम् ।
संजग्मान इति सम्ऽजग्मानः । दिवा । पृथिव्या । शुक्रः । शुक्रशोचिषेति शुक्रऽशोचिषा ।
निरस्त इति निःऽअस्तः । शण्डः ।
शुक्रस्य । अधिष्ठानम् । अधिस्थानमित्यधिऽस्थानम् ।असि ॥ डिर्ले: ॥२॥

स्वा– कात्यायनः – “ शुक्रं तं प्रत्नथेति ” (द्र. काश्रौ ९·६·११) इति । शुक्रग्रहं गृह्णीयात् । पाठस्तु– ‘ तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम् । प्रतीचीनं वृजनं दोहसे धुनिमाशुं जयन्तमनु यासु वर्धसे । उपयामगृहीतोऽसि शण्डाय त्वा । एष ते योनिर्वीरतां पाहि ’ इति । ᵛप्रत्नथा इत्यादौ ‘ था ’प्रत्ययः उपमार्थः । हे इन्द्र, त्वां प्रत्नाः पुरातना भृग्वादयो यथा अस्तुवन्, ᵛतं तादृशं त्वां स्तुम इति शेषः । ᵛपूर्वथा पित्रादयः [इव], ᵛविश्वथा अतीताः सर्वे यजमाना इव; ᵛइमथा वर्तमाना इमे यजमानाश्च [यथा] त्वामस्तुवन् तथा वयं त्वां स्तुम इत्यर्थः । कीदृशमिन्द्रम् ? ᵛज्येष्ठतातिम् । स्वार्थे तातिप्रत्ययः । ज्येष्ठम् । यद्वा– “ वृकज्येष्ठाभ्यां तिलतातिलौ च छन्दसि ” (पा ५·४·४१) इति प्रशंसार्थे तातिल्-प्रत्ययस्तद्धितः । श्रेष्ठप्रशंसमित्यर्थः । ᵛबर्हिषदं यागे संनिहितत्वेन तिष्ठन्तम् । ᵛस्वर्विदं यजमानाय दातव्यम् । स्वर्गं वेत्तीति स्वर्वित् तम् । हे इन्द्र, यस्त्वं ᵛप्रतीचीनं प्रतिगमनमस्मत्-प्रतिकूलं ᵛवृजनं वर्जनीयम् आलस्याश्रद्धादिकं ᵛदोहसे रिक्तीकरोषि विनाशयसि, तादृशं त्वां स्तुमः । यद्वा– वृजनमिति बलनाम । तत् प्रतीचीनं स्ववीर्येणात्माभिमुखं कृत्वा दोहसे यज्ञफलं धोक्षीत्यर्थः । ᵛयासु क्रियासु ᵛधुनिं त्वदनुग्रहात् शत्रून् कम्पयन्तम् ᵛआशुं क्षिप्रकारिणं ᵛजयन्तं सम्यगनुष्ठानेन यजमानान्तराण्यतिशयानम् एनं यजमानम् ᵛअनु सोमपानेन स्तुत्या च ᵛवर्धसे तासु क्रियासु तमिन्द्रं स्तुमः । हे शुक्रग्रह, त्वम् ᵛउपयामगृहीतः ᵛअसि, शुक्रपुत्राय शण्डनामकाय त्वां गृह्णामि । ᵛएषः खरप्रदेशस्तव स्थानम् । त्वं यजमानस्य ᵛवीरतां ᵛपाहि कर्मशूरत्वं च पालय ॥

कात्यायनः – “ शुक्रामन्थिभ्यां च चरतः । शुक्रेणाध्वर्युर्मन्थिना प्रतिप्रस्थाता । प्रोक्षिताप्रोक्षितौ यूपशकलावादाय । अपिधानं प्रोक्षिताभ्यामपमार्जनमप्रोक्षिताभ्याम् ” (काश्रौ ९·१०·१-५) इति । शुक्रामन्थि-ग्रहाभ्यां यथाक्रमेण अध्वर्युप्रतिप्रस्थातारावनुतिष्ठताम् । तत्प्रकार उच्यते–प्रोक्षिताभ्यां द्वाभ्यां यूपशकलाभ्यां सह प्रोक्षणरहितौ द्वौ यूपशकलौ स्वीकृत्य यथाक्रमेण तयोर्ग्रहयोः प्रोक्षिताभ्यां शकलाभ्यामाच्छादनं कृत्वा

---

12. V1 S1 C om. तं तादृशं ... शेषः [L 13]
13. S1 V1 C पूर्वे साध्यादयो यथा for पित्रादय [इव],
    S1 V1 C विश्वे ऋषयः ऋषिपुत्रा इव for अतीताः सर्वे यजमाना इव
14. S1 V1 C इदानींतना जना यथा for वर्तमाना इमे यजमानाश्च यथा त्वामस्तुवन्
15. V1 S1 C om. ज्येष्ठम् । श्रेष्ठप्रशंसमित्यर्थः ॥ (L 16)
19. V1 S1 C om. यद्वा ... धोक्षीत्यर्थः
20. C S1 V1 शत्रुं for शत्रून्
21. C S1 V1 om. च

अप्रोक्षिताभ्यां शकलाभ्याम् अपमार्जनं कुर्यात् । तत्र शुक्रग्रहस्य अपमार्जनमन्त्रः कात्यायनेन विनियुज्यते– “ अपमृष्टः शण्ड इत्यध्वर्युः ” (काश्रौ ९.१०.५) इति । अध्वर्युः पूर्वमुक्तेन प्रोक्षितशकलेन आच्छादनं कृत्वा अप्रोक्षितशकलेन अपमृज्यात् । शण्डनामकोऽसुरपुरोहितः शुक्रपुत्रः ᵛअपमृष्टः अपमार्जनीकृतः ॥

कात्यायनः – “ देवास्त्वेति निष्क्रामतो यथालिङ्गम् ” (काश्रौ ९.१०.६) इति। अध्वर्युप्रतिप्रस्थातारौ यथाक्रमेण शुक्रमन्थीत्येतत् पदद्वयवाचकमन्त्रलिङ्गमनतिक्रम्य निर्गच्छेताम् । तत्र शुक्रपदवाचकमन्त्रपाठः ‘ देवास्त्वा शुक्रपाः प्रणयन्तु ’ इति । शुक्रनामकग्रहस्थं सोमं पिबन्तीति ᵛशुक्रपाः ᵛदेवाः । हे शुक्रग्रह, त्वां ᵛप्रणयन्तु यजतिस्थानं प्रापयन्तु ॥

कात्यायनः – “ अपरेणोत्तरवेदिमरत्नी संधायोत्तरवेदिश्रोण्यां निधत्तोऽविसृजन्तौ दक्षिणस्यामध्वर्युरुत्तरस्यां प्रतिप्रस्थाताऽनाधृष्टासीति ” (काश्रौ ९.१०.७) इति । अध्वर्युप्रतिप्रस्थातारावुत्तरवेदेः पश्चिमभागे अरत्न्याः (? त्न्योः) संमेलनं कृत्वा ततस्तयोर्विसर्जनम् [अ] कुर्वन्तौ यथाक्रमेण उत्तरवेदेर्दक्षिणोत्तरश्रोण्योरुभयोर्ग्रहस्थापनं कुर्यातान् । हे वेदे, ᵛअनाधृष्टा अनुपहिंसिता [ᵛअसि] भवसि ॥

कात्यायनः – “ सुवीर इति दक्षिणं यूपदेशं गच्छत्यध्वर्युः ” (काश्रौ ९.१०.८) इति । अध्वर्युर्यूपस्य दक्षिणप्रदेशं गच्छेत् । पाठस्तु– ‘ सुवीरो वीरान् प्रजनयन् परीह्यभि रायस्पोषेण यजमानम् ’ इति । हे शुक्रग्रह, त्वं ᵛसुवीरः शोभनशौर्योपेतः सन् ᵛवीरान् यजमानस्य शौर्योपेतान् भृत्यादीन् ᵛप्रजनयन् उत्पादयन् ᵛरायः ᵛपोषेण धनस्य पुष्ट्या ᵛयजमानम् अभिलक्ष्य ᵛपरि ᵛइहि परितो गच्छ ॥

कात्यायनः – “ अपरेण यूपमरत्नी संधत्तः संजग्मान इति यथालिङ्गम् ” (काश्रौ ९.१०.१०) इति । यूपस्य पश्चिमभागे अध्वर्युप्रतिप्रस्थातारौ तत्तद्ग्रहवाचकपदलिङ्गमनतिक्रम्य अरत्न्योः संधानं कुर्याताम् । तत्राध्वर्युमन्त्रपाठः – ‘ संजग्मानो दिवा पृथिव्या शुक्रः शुक्रशोचिषा ’ इति । शुक्रनामको ग्रहः द्युलोकभूलोकाभ्यां ᵛसंजग्मानः संगच्छमानः ᵛशुक्रशोचिषा शुद्धदीप्त्या यूपं प्रजा वा बिभर्तीति शेषः ॥

कात्यायनः – “ निरस्तः शण्ड इत्यध्वर्युः ” (काश्रौ ९.१०.१२) इति । अध्वर्युरप्रोक्षितं यूपशकलं निरस्येत् । शण्डनामकः शुक्रपुत्रोऽसुरपुरोहितः ᵛनिरस्तः यज्ञाद् बहिर्निक्षिप्तः ॥

कात्यायनः – “ शुक्रस्याधिष्ठानमध्वर्युः ” (काश्रौ ९.१०.१३) इति । अध्वर्युराहवनीये प्रोक्षितं यूपशकलं प्रक्षिपेत् । ᵛअसि इति मन्त्रशेषः । शुक्रो ग्रहस्तस्य ᵛअधिष्ठानं भवसि ॥ १–२ ॥

आ – शुक्रं ग्रहं गृह्णाति । तस्य पुरोरुक् – ‘ तं प्रत्नथा ’ इति । अवत्सारः काश्यपः । वैश्वदेवी जगती । अत्र च प्रकरणात् शुक्रग्रहः सोमः । अत्रोत्तरार्धः प्रथमं व्याख्येयः । हे ᵛसोम, ᵛज्येष्ठतातिम् उत्कृष्टविस्तारम् । ज्येष्ठोपपदस्य तनोतेः रूपम् । ज्येष्ठतया प्रशस्यं वा । ᵛबर्हिषदम्, बर्हिषि यज्ञे सीदतीति बर्हिषत्, तं बर्हिषदम् । ᵛस्वर्विदं, स्वनिवासस्थानत्वेन स्वर्गलोकलब्धारम् ।

---

1. कुर्याताम् for कुर्यात्
3. P1 V1 S1 C आपामार्जनी° for अपमार्जनी°
6. P1 °नामकं for °नामक°
10. V1 S1 C om. उत्तरवेदेर्दक्षिणो°; [L 11]
11. V1 S1 C om. हे वेदे.
14. V1 S1 C शुक्र for शुक्रग्रह
19. P1 V1 विशुद्ध° for शुद्ध°; P1 यूयं for यूपं; V1 S1 C om. प्रजा वा
23. V1 S1 C om. शुक्रो ... भवसि.

^{v}प्रतीचीनं वस्तुतः प्रत्यगात्मभूतम् । ^{v}धुनिम्, धूञ् कम्पने, [शत्रूणां] कम्पयितारम् । ^{v}आशुं ^{v}जयन्तम् अतिवेगेन शत्रून् जयन्तं तेषां जेतारम् । एवंगुणविशिष्टमिन्द्रम् ^{v}अनु हे सोम, ^{v}यासु क्रियासु यासु दिक्षु प्रजासु येषु यजमानेषु ^{v}वर्धसे पुनः पुनः संस्क्रियसे, तासु तासु क्रियासु त्वमवस्थितः सन् तत्र देवान् संतर्पय। यजमानाय ^{v}वृजनं, व्रियते जनैरिति क्रियाफलं वृजनं, सर्वजनैर्वरणीयं फलं ^{v}दोहसे प्रपूरयसि । कथं पुनरिति ? ^{v}प्रत्नथा । थाशब्दः उपमार्थीयः। प्रत्नशब्दः पूरणवचनः । चिरंतनानामिव ऋषीणां भृग्वादीनाम् । तथा [त्वम्] अस्य यजमानस्य फलं दोहसे । ^{v}पूर्वथा पूर्वेषां साध्यादीनामिवास्य यजमानस्य फलं दोहसे । ^{v}विश्वथा विश्वेषाम् ऋषीणां ऋषिपुत्राणामिव अस्य यजमानस्य [फलं] दोहसे । ^{v}इमथा इदानींतनानामन्येषां यजमानानां यथा दोहसे । ' उपयामगृहीतोऽसि शण्डाय त्वा ', गृह्णामीति शेषः । शण्डोऽसुराणां पुरोहितः, ^{v}शण्डाय तन्निवृत्त्यर्थम् ॥१॥

' एष ते ' इति । लिङ्गोक्तानि यजूंषि । ^{v}एषः पृथिवीविशेषः । ^{v}ते तव ^{v}योनिः । अतस्त्वं ^{v}वीरतां ^{v}पाहि वीरत्वं गोपाय । अत एव यूपशकलेन अपमार्ष्टि । ^{v}अपमृष्टः अपमार्जनीकृतः अस्य ग्रहस्य शण्डः असुरः असुरपुरोहितश्च । निष्क्रामति– ' देवास्त्वा शुक्रपाः ' । शुक्रं नाम ग्रहं पिबन्तीति ^{v}शुक्रपाः शुक्रपायिनः ^{v}देवाः । हे शुक्रग्रह, ^{v}त्वा त्वां शुक्रपायिनः ^{v}प्रणयन्तु यजतिस्थानं प्रापयन्तु । दक्षिणस्यां वेदिश्रोणावासादयति– ^{v}अनाधृष्टा ^{v}असि अनुपहिंसिताऽसि ॥१॥

वेदिश्रोणितो यूपदेशं गच्छति– ' सुवीरो वीरान् ' इति । हे ग्रह, त्वं कल्याणवीरः सन् यजमानस्य ^{v}वीरान् ^{v}प्रजनयन् ^{v}अभि ^{v}रायः ^{v}पोषेण ^{v}यजमानम् अभि याजयन् ^{v}परि ^{v}इहि परिगच्छ । अपरेण यूपमरत्नी संधत्ते । ^{v}संजग्मानः संगच्छमानः संगच्छते । ^{v}दिवा द्युलोकेन संजग्मानः । ^{v}पृथिव्या पृथिवीलोकेन संजग्मानः । ^{v}शुक्रशोचिषा शुद्धदीप्त्या ^{v}शुक्रः ग्रहो यूयं (पं ?) बिभर्तीति शेषः । यूपशकलं निरस्यति– ' निरस्तः शण्डः' इति । आभिचारिकदेवत्यं यजुः । असुरः यज्ञाद् बहिर्निक्षिप्तः । आहवनीये प्रोक्षितौ (? तं) प्रास्यतः (? ति) । ^{v}शुक्रस्य शुक्रग्रहस्य ^{v}अधिष्ठानम् ^{v}असि ॥२॥

अच्छि॑न्नस्य ते देव सोम सु॒वीर्य॑स्य रा॒यस्पोष॑स्य दद्दि॒तारः॑ स्याम ।
सा प्र॑थ॒मा सꣳस्कृ॑तिर्वि॒श्ववा॑रा॒ स प्र॑थ॒मो वरु॑णो मि॒त्रो अ॒ग्निः ।।३॥
स प्र॑थ॒मो बृह॒स्पति॑श्चिकि॒त्वाँस्तस्मा॒ इन्द्रा॑य सु॒तमा जु॑होत॒ स्वाहा॑ ।
तृ॒म्पन्तु॒ होत्रा॒ मधो॒र्यत् स्वि॑ष्ट॒ꣳ यत् सुभृ॑त॒ꣳ यत् स्वाहा॑ ।।४।। (६) ।।

---

13. B1 °पुरोहितस्य for °पुरोहितश्च

अच्छि॑न्नस्य । ते॒ । दे॒व॒ । सो॒म॒ ।
सु॒वी॒र्य॑स्येति॑ सु॒ऽवीर्य॑स्य । रा॒यः । पोष॑स्य । द॒दि॒तार॑ः । स्या॒म॒ ।
सा । प्र॒थ॒मा । सꣳस्कृ॑तिः । वि॒श्ववा॒रेति॑ वि॒श्वऽवा॑रा ।
सः । प्र॒थ॒मः । वरु॑णः । मि॒त्रः । अ॒ग्निः ॥ ज्रों ॥३॥
सः । प्र॒थ॒मः । बृह॒स्पति॑ः । चि॒कि॒त्वान् । तस्मै॑ । इन्द्रा॑य । सु॒तम् । आ । जु॒हो॒त॒ । स्वाहा॑ ।
तृ॒म्पन्तु॑ । होत्रा॑ः । मधो॑ः । यत् । स्वि॑ष्ट॒मि॒ति सु॒ऽइ॑ष्टम् । सुभृ॑त॒मि॒ति सु॒ऽभृ॑तम् ।
यत् । स्वाहा॑ ॥ ज्यों ॥४॥

सा– कात्यायनः – "अच्छिन्नस्येति जपित्वा" (काश्रौ ९·१०·१४) इति । अध्वर्युः शकलप्रक्षेपानन्तरं जपेत् । पाठस्तु– 'अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्याम' इति । हे दीप्यमान ᵛसोम, ᵛअच्छिन्नस्य अनवखण्डितस्य ᵛते तव ᵛददितारः ᵛस्याम देवतासंतुष्टयर्थं भूयो भूयो दातारो भवेम । किं मूतस्य ? ᵛसुवीर्यस्य कल्याणप्रभावस्य ᵛरायः ᵛपोषस्य धनपुष्टिं कुर्वतः ॥

कात्यायनः – "उभयतोयूपं प्रत्यङ्मुखौ जुहुतः सा प्रथमेत्यध्वर्युः प्रथमम्" (काश्रौ ९·११·१) इति । अध्वर्युप्रतिप्रस्थातारौ यूपस्योभयपार्श्वयोः पश्चिमाभिमुखौ स्थित्वा जुहुयाताम् । तत्राध्वर्युः प्रथमं जुहुयात् । पाठस्तु– 'सा प्रथमा सꣳस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः । स प्रथमो बृहस्पतिश्चिकित्वाꣳस्तस्मा इन्द्राय सुतमा जुहोत स्वाहा' इति । यस्येन्द्रस्य या ᵛसंस्कृतिः समीचीना कृतिः ᵛविश्ववारा सर्वैर्देवैर्वरणीया ᵛसा ᵛप्रथमा देवानां मध्ये मुख्या । सः ᵛप्रथमः मुख्यः । ᵛसः इन्द्र एव वरुणमित्राग्नयः । ᵛचिकित्वान् चेतनाविशेषवान् ᵛबृहस्पतिः अपि ᵛसः इन्द्र एव । हे ऋत्विजः, ᵛतस्मै तादृशाय ᵛइन्द्राय ᵛसुतम् अभिषुतं सोममाभिमुख्येन ᵛजुहोत स्वाहाकारेण होमं कुरुत ॥

कात्यायनः – "तृम्पन्त्विति जपति" (काश्रौ ९·११·९) इति । होमानन्तरं जपेत् । पाठस्तु– 'तृम्पन्तु होत्रा मधोर्यत् स्विष्टं यत् सुभृतं स्वाहा' इति । ᵛमधोः मधुरोपेतस्य सोमस्य रसरूपं ᵛयत् द्रव्यं ᵛस्विष्टं सुष्ठु अपेक्षितम् । ᵛयत् ᵛसुभृतम् सुष्ठु संभृतम् । ᵛयत् स्वाहाकृतं, तादृशं रसरूपं द्रव्यं दृष्ट्वा ᵛहोत्रा यष्टव्या देवाः तृप्यन्तु । तृप तृम्प तृप्तौ ॥३–४॥

[इति सप्तमेऽध्याये षष्ठोऽनुवाकः ॥]

आ - जपति– 'अच्छिन्नस्य ते' इति । सोमदेवत्या द्विपदा गायत्री । हे ᵛदेव ᵛसोम, ᵛअच्छिन्नस्य अनवखण्डितस्य ᵛते तव ᵛसुवीर्यस्य कल्याणवीरस्य ᵛरायः ᵛपोषस्य धनस्य पोषस्य च ᵛददितारः भूयो भूयो दातारः ᵛस्याम भवेम । त्वत्प्रसादात् भूयो भूयो यज्ञकरणमाशास्यते ॥

---

10. P1 with markings obove ददितारः ins. on the margin दद दाने इडागमः ।
11. V1 S1 C om. किंभूतस्य ... कुर्वतः ॥
16. V1 S1 C trans. इन्द्रः after एव
17. P1 oms. एव; V1 S1 C after सः add एव
20. C S1 trans. रसरूपं after यद्
22. V1 S1 C om. तृपतृम्प तृप्तौ
23. P1 V1 om. अध्याये; C S1 सप्तमाध्याये for सप्तमेऽध्याये

जुहोति– ‘ सा प्रथमा ’ इति । ऐन्द्री द्विपदा त्रिष्टुप् । यस्येन्द्रस्य ^{V}प्रथमा ^{V}सꣳस्कृतिः संस्कारः, ^{V}सा दिवि देवमच्छेहीन्द्राय सोममिति क्रियते । या ^{V}विश्ववारा विश्वैः सर्वैः ऋत्विग्भिः देवैश्च व्रियत इति, विश्वं वा वृणोतीति वा विश्ववारा या संस्कृतिः ^{V}सा ^{V}प्रथमा संस्कृतिः । ^{V}सः च संस्कारः ^{V}प्रथमः ^{V}वरुणः । स च प्रथमः ^{V}मित्रः । स च प्रथमः ^{V}अग्निः । स च अन्येषां देवानां च प्रभुरिति स्तूयते ॥३॥

‘ स प्रथमः ’ इति । सोमदेवत्या गायत्री । ^{V}सः च ^{V}प्रथमः ^{V}बृहस्पतिः वाचस्पतिः । ^{V}चिकित्वान् चेतनाविशेषवान् । अन्येषां मान्त्रिगणनां मध्ये उत्कृष्टधीः । तस्मा इन्द्राय । यस्मै इन्द्राय सोमः सुतः अभिषुतः हे ऋत्विजः, ^{V}तस्मै ^{V}इन्द्राय [^{V}सु]तं सोमम् ^{V}आजुहोत आक्षारयत ^{V}स्वाहा स्वाहाकारेण ॥

जपति – ‘तृम्पन्तु होत्रा मधोः ’ इति । लिङ्गोक्तदेवत्यं यजुः । [होत्रा- शब्देन] हौत्रिकयाज्याच्छन्दांसि अभिधीयन्ते । [तृम्पन्तु] तृप तृम्प तृप्तौ । ^{V}होत्राः याज्याच्छन्दांसि ^{V}तृप्यन्तु । ^{V}मधोः मधुवन्मधुरसस्य सोमस्य ^{V}यत् ^{V}स्विष्टं सुशोभनतया यदिष्टमपेक्षितम् । ^{V}सुभृतं शोभनतया ^{V}यत् पात्रेण संभृतम् । ^{V}यत् स्वाहाकृतं तदिष्टाहोत्रास्तृप्यन्तु । ‘ अयाडग्नीद् ’ एवं होता आचष्टे ॥४॥

[इति सप्तमेऽध्याये षष्ठोऽनुवाकः ॥]

——

[अथ सप्तमोऽनुवाकः]

सा– षष्ठे शुक्रग्रह उक्तः । सप्तमेऽनुवाके मन्थिग्रह उच्यते–

अ॒यं वे॒नश्चो॑दय॒त् पृश्नि॑गर्भा॒ ज्योति॑र्जरायू रज॑सो वि॒माने॑ ।
इ॒म॒मपाꣳ सं॑ग॒मे सूर्य॑स्य॒ शिशुं॒ न विप्रा॑ म॒तिभी॑ रिहन्ति ।
उ॒प॒या॒मगृ॑हीतोऽसि॒ मर्का॑य त्वा ॥१॥

अ॒यम् । वे॒नः । चो॒द॒य॒त् । पृश्नि॑गर्भा॒ इ॒ति पृश्नि॑ऽगर्भाः ।
ज्योति॑र्जरायु॒रि॒ति ज्योति॑ःऽजरायुः । रज॑सः । वि॒मा॒न इति॑ वि॒ऽमाने॑ ।
इ॒मम् । अ॒पाम् । सं॒ग॒म इति॑ स॒म्ऽग॒मे । सूर्य॑स्य ।
शिशु॑म् । न । विप्राः॑ । म॒ति॒भि॒रिति॑ म॒तिऽभिः॑ । रि॒ह॒न्ति॒ ।
मर्का॑य । त्वा॒ ॥ फ्रों ॥१॥

---

8. B1 after सोमम् adds अभि
11. B1 होत्रका: for हौत्रिक° B1 याज्याः for second याज्या°
12. B1 यतः स्विष्टं for यत् स्विष्टं
13. B1 तमिष्टा° for तदिष्टा°

कात्यायनः – "मन्थिनमयं वेन इति" (काश्रौ. ९·६·१३) इति । मन्थिग्रहं गृह्णीयात् । पाठस्तु– 'अयं वेनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने । इममपाᳪ संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति । उपयामगृहीतोऽसि मर्काय त्वा' इति । अयम् इतीन्द्रो निर्दिश्यते । वेनः कान्तोऽभीष्टः । विनि कान्तावित्यस्माद्धातोरुत्पन्नत्वात् । पृश्निरादित्यस्य गर्भभूता आपः । तथा चान्यत्र प्रश्नोत्तराभ्यामयमर्थः श्रूयते– "क्वेमा आपो निविशन्ते यदीतो यान्ति संप्रति" (तैआ १·८) इति प्रश्नः । "आपः सूर्ये समाहिताः । अभ्राण्यपः प्रपद्यन्ते" (तैआ १·८) इत्युत्तरम् । ^{v}अयं ^{v}वेनः ^{v}पृश्निगर्भाः ^{v}चोदयत् अपो वर्षतीत्यर्थः । कीदृशोऽयम् ? ^{v}ज्योतिर्जरायुः विद्युल्लक्षणं तेजो जरायुवद्वेष्टनं यस्यासौ ज्योतिर्जरायुः । कुत्र स्थितः ? ^{v}रजसः ^{v}विमाने । रजसः उदकस्य ^{v}विमाने निर्माणस्थाने अन्तरिक्षे अवस्थितः । अपां सूर्ये गर्भीभावः कथं संपन्न इति चेत् अत्रोच्यते– ^{v}विप्राः मेधाविन ऋत्विजः ^{v}अपां ^{v}सूर्यस्य च ^{v}संगमे निमित्तभूते सति ^{v}इमम् इन्द्रं ^{v}शिशुं ^{v}न स्तनंधयं शिशुमिव लालयन्तः ^{v}मतिभिः मन्त्रसहिताभिराहुतिभिर्लिहन्ति यजन्तीत्यर्थः । आहुतिदेवताभिरिमा आपो नीयन्ते । एतदेवाभिप्रेत्य श्रूयते– "भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः" (तैआ १·९) इति । हे सोमरस त्वम्, ^{v}उपयामगृहीतः ^{v}असि उपयामयतीत्युपयामो ग्रहस्तेन गृहीतो भवसि । मर्कः शुक्रपुत्रोऽसुरपुरोहितः तस्मै त्वां गृह्णामीति शेषः ॥१॥

आ– मिथुनं गृह्णाति– 'अयं वेनः' इति । सोमदेवत्या त्रिष्टुप् । अनया त्रिष्टुभा अधिदैवतं अधियज्ञं वाऽवस्थितः सोमः स्तूयते । अधिदैवतं तावच्चन्द्रात्मना स्तूयते । ^{v}अयं ^{v}वेनः ^{v}चोदयत् । 'अयम् वेनः' इति मेधाविनामसु पठितम् । वेनतेः कान्तिकर्मणो वेन इति रूपम् । वेनः कान्तश्चन्द्रः अमृताद्यभीष्टप्रदः । पुनः कथंभूत इति ^{v}ज्योतिर्जरायुः ज्योतिर्जरायुस्थानीयम् । जरायुर्गर्भाशयः । जरायुणा गर्भ इव महत्ते (महाते ?) जसा वेष्टितस्तेजोराशिः । वेनशब्दवाच्योऽयं चन्द्रः । ^{v}पृश्निगर्भाः द्युलोकगर्भाः आदित्यगर्भा वा, गर्भे गृह्यमाणा वर्धमाना आपः । ^{v}रजसः ^{v}विमाने रजसः उदकस्य विमाने निर्माणस्थाने अन्तरिक्षस्थाने स्थिताः । उदकनिर्माणकाले च आदित्यगर्भा अपः वर्षार्थं चोदयत् । लेटः परिग्रहः । प्रेरयति ॥

इदानीमधियज्ञ[मव]स्थितमुच्यते । ^{v}इमम् एव सोमम् ^{v}अपां ^{v}सूर्यस्य च ^{v}संगमे सूर्यकिरणगृहीताभिः वसतीवरीलक्षणाभिरद्भिरभिषुतं सन्तं ^{v}शिशुं ^{v}न शिशुमिव, यथा शिशुं क्षीरादिदानेन वर्धयन्ति । ^{v}विप्राः मेधाविनो ब्राह्मणाः ^{v}मतिभिः मतिपूर्विकाभिः स्तुतिभिः ^{v}रिहन्ति स्तोत्रशस्त्रैः स्तुवन्ति । रिहतिरर्चतिकर्मसु पठितम् । "ता वै स्यन्दमानानां गृह्णीयात् । दिवा गृह्णीयात्" (शब्रा ३·९·२·४,६) इति श्रुतेः । ^{v}उपयामगृहीतः ^{v}असि । ^{v}मर्काय ^{v}त्वा गृह्णामीति शेषः । मर्कोऽसुरपुरोहितः ॥१॥

---

5. P1 निमिषन्ते, V1 S1 C आनिमिषन्तो for निविशन्ते; V1 S1 C यदितो for यदीतो
9. P1 गर्भे° for गर्भाः°
10. P1 oms. स्तनंधयं; V1 S1 C लालयन्तं for लालयन्तः
11. P1 with marking above यजन्तीत्यर्थः ins. रिहातिरर्चतिकर्मेति निरुक्ते
13. P1 °यमयतीति for °यामयतीति
22. B1 दृष्टार्थं चोदयते for वर्षार्थं चोदयत्

मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवन्ता ।
आ यः शर्याभिस्तुविनृम्णो अस्याश्रीणीतादिशं गभस्तौ ॥२॥
एष ते योनिः प्रजाः पाह्यपमृष्टो मर्को देवास्त्वा मन्थिपाः प्रणयन्त्वनाधृष्टाऽसि ।
सुप्रजाः प्रजाः प्रजनयन् परीह्यभि रायस्पोषेण यजमानम् ।
संजग्मानो दिवा पृथिव्या मन्थी मन्थिशोचिषा निरस्तो मर्को मन्थिनोऽधिष्ठानमसि ॥३॥

मनः । न । येषु । हवनेषु । तिग्मम् । विपः । शच्या । वनुथः । द्रवन्ता ।
आ । यः । शर्याभिः । तुविनृम्ण इति तुविऽनृम्णः । अस्य ।
अश्रीणीत । आदिशमित्याऽदिशम् । गभस्तौ ॥ त्रैं ॥२॥
एषः । ते । योनिः । प्रजा इति प्रऽजाः । पाहि । अपमृष्ट इत्यपऽमृष्टः । मर्कः । देवाः । त्वा ।
मन्थिपा इति मन्थिऽपाः । प्र । नयन्तु । अनाधृष्टा । असि । सुप्रजा इति सुऽप्रजाः ।
प्रजा इति प्रऽजाः । प्रजनयन्निति प्रऽजनयन् । परि । इहि । अभि । रायः । पोषेण । यजमानम् ।
संजग्मान इति सम्ऽजग्मानः । दिवा । पृथिव्या ।
मन्थी । मन्थिशोचिषेति मन्थिऽशोचिषा । निरस्त इति निःऽअस्तः । मर्कः ।
मन्थिनः । अधिष्ठानम् । अधिस्थानमित्यधिऽस्थानम् । असि ॥ र्म्युः ॥३॥

सा– कात्यायनः– "सक्तुभिः श्रीणात्येनं मनो न येष्विति" (काश्रौ ९·६·१४) इति । एनं मन्थिग्रहं यवमयैः पिष्टैः मिश्रीकुर्यात् । पाठस्तु– 'मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवन्ता । आ यः शर्याभिस्तुविनृम्णो अस्याश्रीणीतादिशं गभस्तौ । एष ते योनिः प्रजाः पाहि' इति । ˇविपः विपश्चितौ मेधाविनौ अध्वर्युप्रस्थातारौ ˇयेषु ˇहवनेषु ˇसोमयागेषु ˇशच्या कर्मणा निमित्तभूतेन ˇमनः ˇन मन इव ˇतिग्मं तीक्ष्णं क्षिप्रं प्राप्नुवतः । तथा हि शुक्रमन्थिनौ द्रवन्तौ गच्छन्तौ ˇवनुथः युष्मदीयं होमं व्याप्नुथः । तेषु होमेषु कर्तव्येषु ˇयः ˇतुविनृम्णः बहुधनयुक्तो बहुदक्षिणोपेतोऽस्ति, अस्य ˇगभस्तौ हस्ते स्थितस्य मन्थिग्रहस्य ˇआदिशं प्रदिशं ˇशर्याभिः अङ्गुलीभिः आश्रीणीत आश्रयं कुर्वीत । हे मन्थिग्रह ˇते तव ˇएषः प्रदेशः ˇप्रजाः ˇपाहि यजमानसंबन्धिनीः प्रजाः पालय ॥

कात्यायनः– "अपमृष्टो मर्क इति प्रतिप्रस्थाता" (काश्रौ ८.१०.५) इति । प्रोक्षितेन यूपशकलेन आच्छादनं कृत्वा अप्रोक्षितेन शकलेन अपामार्जनं कुर्यात् । मर्कनामकोऽसुरपुरोहितोऽपामार्जनीकृतः ॥

---

19. S1 C V1 विपाश्चितो मेधाविनोऽध्वर्यवो for विपः ... °प्रस्थातारौ; P1 with marking above कर्मणा ins. in the margin शचीति कर्मनामेति यास्कः

20. V1 S1 C व्याप्नुवान्ति for प्राप्नुवतः

कात्यायनः– “देवास्त्वेति निष्क्रामतो यथालिङ्गम्” (काश्रौ ९·१०·४) इति । प्रतिप्रस्थाता निष्क्रामेत् । पाठस्तु– ‘देवास्त्वा मन्थिपाः प्रणयन्तु’ इति । हे मन्थिग्रह, ^{v}त्वा त्वां, मन्थिग्रहं पिबन्तीति ^{v}मन्थिपाः ^{v}देवाः ^{v}प्रणयन्तु यजमानस्थानं प्रापयन्तु । ‘अनाधृष्टाऽसि’ इति मन्त्रो विनियोगपुरःसरं पूर्वं व्याख्यातः ॥

कात्यायनः:- “सुप्रजा इति प्रतिप्रस्थातोत्तरम्” (काश्रौ ९.१०.६) इति । प्रतिप्रस्थाता यूपस्योत्तरप्रदेशं गच्छेत् । पाठस्तु– ‘सुप्रजाः प्रजाः प्रजनयन् परीह्यभि रायस्पोषेण यजमानम्’ इति । हे मन्थिग्रह, ^{v}सुप्रजाः शोभनप्रजास्त्वं यजमानसंबन्धिनीः ^{v}प्रजाः ^{v}प्रजनयन् ^{v}रायः ^{v}पोषेण सह ^{v}यजमानम् आगच्छ । अरत्नीसंधाने विनियुक्तस्य प्रतिपस्थातृसंबन्धिनो मन्त्रस्य पाठस्तु – ‘संजग्मानो दिवा पृथिव्या मन्थी मन्थिशोचिषा’ इति । मन्थिनामको ग्रहो द्युलोकभूलोकाभ्यां ^{v}संजग्मानः संगच्छमानः ^{v}मन्थिशोचिषा मन्थिनः स्वदीप्त्या यूपं बिभर्तीति शेषः ॥

कात्यायनः:- “निरस्तो मर्क इति प्रतिप्रस्थाता” (काश्रौ ९.१०.९) इति । प्रतिप्रस्थाता अप्रोक्षितं यूपशकलं निरस्येत् । मर्कनामकोऽसुरपुरोहितः ^{v}निरस्तः निराकृतः ॥

कात्यायनः:- “मन्थिन इति प्रतिप्रस्थाता” (काश्रौ ९.१०.१०) इति । प्रतिप्रस्थाता प्रोक्षितं यूपशकलमाहवनीये प्रक्षिपेत् । पाठस्तु– ‘मन्थिनोऽधिष्ठानमसि’ इति । मन्थिग्रहस्याधिकरणम् ^{v}असि ॥२-३॥

आ– सक्तुभिः श्रीणाति– ‘मनो न येषु’ इति । त्रिष्टुप्, सोमस्तुतिः शुक्रामन्थिप्रदानाधियज्ञानुवादिनी । ^{v}मनः ^{v}नमन इव क्षिप्रं ^{v}येषु ^{v}हवनेषु सोमहोमेषु ^{v}तिग्मं, तेजतेरुत्साहकर्मणः तिग्मेतिरूपम्, उत्साहयुक्तं विपश्चितः, प्रातिपदिकैकदेशस्य लोपश्छान्दसः । ^{v}विप्रः मेधाविनोऽध्वर्यवः । शचीति कर्मनाम । कर्मणा निमित्तभूतेन ^{v}द्रवन्तौ गच्छन्तौ शुक्रामन्थिनौ युगपत ^{v}वनुथः । मध्यमः पुरुषः छान्दसः । वनुतः व्याप्नुतः । तेष्वेव होमेषु कर्तव्येषु । आ यस्तुविनृम्णः । तुवीति बहुनाम । नृम्णमिति धननाम । तदिदं शास्ति । सः ^{v}तुविनृम्णः बहुदक्षिणः ^{v}यः तस्य ^{v}अस्य ^{v}गभस्तौ पाणौ स्थितस्य मन्थिनः सोमग्रहस्य ^{v}आदिशं प्रतिदिशम् । ^{v}शर्याभिः स्वाङ्गुलीभिः ^{v}आश्रीणीत ॥२॥

प्रकृतः सः ^{v}एषः ^{v}ते तव सोमस्य ^{v}योनिः । ^{v}प्रजाः ^{v}पाहि यजमानसंबन्धिनीः प्रजाः गोपाय । यूपशकलेन अपामार्ष्टि – ‘अपमृष्टो मर्कः’ इति । अभिचारदेवत्यं यजुः । अपमार्जनीकृतः

---

7. P1 शोभनप्रसूतिः अतस्त्वं for शोभप्रजास्त्वं
9. V1 S1 C द्युलोकाभ्यां for द्युलोकभूलोकाभ्यां
10. P1 पयः for यूपं
12. P1 om. निरस्तः
14. V1 S1 C om. पाठस्तु ... अधिकरणमसि
23. B1 after आश्रीणित adds सोऽपि । चिनोतीति शेषः ।

ᵛमर्कः असुरपुरोहितः । निष्क्रामति– ‘ देवास्त्वा मन्थिपाः ’ इति । मन्थिग्रहदेवत्यं यजुः । मन्थीति ग्रहनाम । तं पान्ति रक्षन्तीति ᵛमन्थिपाः ᵛदेवाः सोमग्रहं ᵛत्वा यजतिस्थानं ᵛप्रणयन्तु । अनाधृष्टाऽसि । उत्तरवेदिश्रोणी देवता । अनाधृष्टाऽसि हे उत्तरवेदिश्रोणे, त्वम् सर्वेण ᵛअनाधृष्टा अनाधर्षिता ᵛअसि । गच्छति– ‘ सुप्रजाः ’ इति । मन्थिदेवता । हे मन्थिन् ᵛसुप्रजाः शोभनप्रजाः [प्रजाः ᵛप्र] जनयन् ᵛपरि ᵛइहि आगच्छ ᵛरायः ᵛपोषेण सह ᵛयजमानम् । परीहि इत्यनुवर्तते । अपरेण यूपमरत्नी संधत्तः– ‘ संजग्मानः ’ इति । ᵛसंजग्मानः मन्थी परीहि इति संबन्धः । यूपशकलं प्रास्यति– ‘ निरस्तो मर्कः ’ इति । आभिचारिकदेवत्यं यजुः । ᵛमर्कः असुरः । आहवनीये प्रास्यति– ‘ मन्थिनोऽधिष्ठानमसि ’ इति । मन्थिग्रहः । ᵛअधिष्ठानम् अधिकरणम् ᵛअसि ॥३॥

अच्छि॑न्नस्य ते देव सोम सु॒वीर्य॑स्य रा॒यस्पोष॑स्य ददि॒तार॑ः स्याम ।
सा प्र॑थ॒मा सꣳस्कृ॑तिर्वि॒श्ववा॑रा॒ स प्र॑थ॒मो वरु॑णो मि॒त्रो अ॒ग्निः ॥४॥
स प्र॑थ॒मो बृह॒स्पति॑श्चिकि॒त्वाꣳस्तस्मा॒ इन्द्रा॑य सु॒तमा जु॒हो॒त॒ स्वाहा॑ ।
तृ॒म्पन्तु॒ होत्रा॒ मधो॒र्यत् स्वि॑ष्ट॒ꣳ यत् सुभृ॑त॒ꣳ यत् स्वाहा॑ ॥५॥ (७)॥

अच्छि॑न्नस्य° ॥अ॥ ४॥
सः । प्र॒थ॒मः° ॥ स्म ॥५॥ (७)॥

सा– कात्यायनः– “अच्छिन्नस्येति जपित्वा” (काश्रौ ९.१०.११) इति ॥ पाठस्तु– “अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्याम” इति ॥ पूर्ववत् व्याख्येयम् ॥

कात्यायनः– “तमनु प्रतिप्रस्थाता” (काश्रौ ९.११.१) इति । प्रतिप्रस्थाता तं होमं कुर्वाणमध्वर्युमनुसृत्य जुहुयात् । पाठस्तु– ‘ सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः ॥ स प्रथमो बृहस्पतिश्चिकित्वाꣳस्तस्मा इन्द्राय सुतमाजुहोत स्वाहा ’ इति । पूर्ववद् व्याख्येयम् ॥

कात्यायनः– “तृम्पन्त्विति जपति” (काश्रौ ९.११.११) इति । ‘ तृम्पन्तु होत्रा मधोर्यत् स्विष्टं यत् सुभृतं यत् स्वाहा ’ इति । अयमपि व्याख्यातः ॥४–५॥

[इति सप्तमेऽध्याये सप्तमोऽनुवाकः]

आ– ‘ अच्छिन्नस्य ते ’, ‘ स प्रथमः ’ इति द्वे व्याख्याते ॥ (४–५ ॥)

[इति सप्तमेऽध्याये सप्तमोऽनुवाकः ॥६॥]

---

3. B1 उत्तरवेदिश्रोणिस्तं for हे उत्तरवेदिश्रोणे त्वं.

[अष्टमोऽनुवाकः]

सा– सप्तमेऽनुवाके मन्थिग्रह उक्तः । अष्टमे आग्रयण उच्यते ॥

ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥१॥
उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणः ।
पाहि यज्ञं पाहि यज्ञपतिम् ॥२॥
विष्णुस्त्वामिन्द्रियेण पातु विष्णुं त्वं पाह्यभि सवनानि पाहि ।
सोमः पवते सोमः पवते सोमः पवते ॥३॥
अस्मै ब्रह्मणे पवतेऽस्मै क्षत्राय पवतेऽस्मै सुन्वते यजमानाय पवते ।
इष ऊर्जे पवतेऽद्भ्य ओषधीभ्यः पवते द्यावापृथिवीभ्यां पवते सुभूताय पवते
ब्रह्मवर्चसाय पवते ।
विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥४॥(८)॥

ये । देवासः । दिवि । एकादश । स्थ । पृथिव्याम् । अधि । एकादश । स्थ ।
अप्सुक्षित इत्यप्सुऽक्षितः । महिना । एकादश । स्थ ।
ते । देवासः । यज्ञम् । इमम् । जुषध्वम् ॥गो॥१॥
आग्रयणः । असि । स्वाग्रयण इति सुऽआग्रयणः ।
पाहि । यज्ञम् । पाहि । यज्ञपतिमिति यज्ञऽपतिम् ॥ छैं ॥२॥
विष्णुः । त्वाम् । इन्द्रियेण । पातु । विष्णुम् । त्वम् । पाहि । अभि । सवनानि । पाहि ।
सोमः । पवते । सोमः । पवते ॥ सु ॥३॥
अस्मै । ब्रह्मणे । क्षत्राय । सुन्वते । यजमानाय ।
इषे । ऊर्जे । अद्भ्य इत्यत्ऽभ्यः । ओषधीभ्यः । द्यावापृथिवीभ्याम् ।
सुभूतायेति सुऽभूताय । ब्रह्मवर्चसायेति ब्रह्मऽवर्चसाय । पवते ।
विश्वेभ्यः । त्वा । देवेभ्यः । एषः । ते । योनिः । विश्वेभ्यः । त्वा । देवेभ्यः ॥ड्िः॥४॥(८)॥

कात्यायनः– "आग्रयणं द्वयोर्द्वयोर्ये देवास इति" (द्र. काश्रौ ९.६.१५) इति । धाराद्वये क्षरति सति आग्रयणनामकं ग्रहं गृह्णीयात् । पाठस्तु– 'ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ । अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् । उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणः । पाहि यज्ञं पाहि यज्ञपतिम् । विष्णुस्त्वामिन्द्रियेण पातु विष्णुं त्वं पाह्यभि सवनानि पाहि' इति । हे 'देवासः देवाः, 'ये यूयं 'दिवि द्युलोके महिना इति त्रिषु स्थानेषु संबध्यते । 'महिना महिम्ना

स्वस्वमाहात्म्येन ᵛएकादश ᵛस्थ एकादशसंख्याका भवथ। तथा ᵛपृथिव्याम् ᵛअधि ᵛएकादश ᵛस्थ एकादशसंख्याका भवथ। तथा ᵛअप्सुक्षितः अन्तरिक्षे निवसन्तः एकादशसंख्याका भवथ। ᵛते सर्वे देवा यूयं ᵛयज्ञं यजमानीयम् ᵛइमम् आग्रयणग्रहं ᵛजुषध्वं सेवध्वम्। हे आग्रयणग्रह, त्वम् उपयामेन पात्रेण स्वीकृतो भवसि। ᵛआग्रयणः ᵛअसि आग्रयणनामा भवसि। सुष्ठु अग्रं श्रैष्ठ्यं तस्य प्रापकः ᵛस्वाग्रयणः, तादृशस्त्वं ᵛयज्ञं ᵛपाहि रक्ष। ᵛयज्ञपतिं यजमानं च रक्ष। ᵛविष्णुः यज्ञरूपी देवः ᵛइन्द्रियेण स्वसामर्थ्येन ᵛत्वां ᵛपातु। ᵛत्वम् अपि तादृशं ᵛविष्णुं पालय। अभितः सर्वतः प्रातरादीनि ᵛसवनानि पालय ॥

कात्यायनः– "त्रिर्हिङ्कृत्य सोमः पवत इति" (काश्रौ ९.६.१६)। त्रिः वारत्रयं हिङ्कारं कृत्वा जपेदिति शेषः। पाठस्तु– 'सोमः पवते सोमः पवते सोमः पवते। अस्मै ब्रह्मणे पवतेऽस्मै क्षत्राय पवतेऽस्मै सुन्वते यजमानाय पवते। इष ऊर्जे पवतेऽद्भ्यः ओषधीभ्यः पवते द्यावापृथिवीभ्यां पवते सुभूताय पवते। ब्रह्मवर्चसाय पवते। विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः' इति। ᵛसोमः ᵛपवते। पवतिर्गत्यर्थः। सोमो गच्छति। "सोमः पवते" इति त्रिरावृत्तिरादरार्था। ᵛअस्मै ᵛब्रह्मणे ब्राह्मणजातिप्रीत्यर्थं ᵛपवते सोमो गच्छति, स्वकीये कर्मणि प्रवर्तत इत्यर्थः। तथा क्षत्रियजातिप्रीत्यर्थं ᵛपवते। ᵛअस्मै ᵛसुन्वते सोमाभिषवं कुर्वते ᵛयजमानाय कर्मप्राप्त्यर्थं ᵛपवते। ᵛइषे अन्नाय ᵛऊर्जे रसाय च ᵛपवते। ᵛअद्भ्यः वृष्ट्यर्थं ᵛओषधीभ्यः व्रीहियवादिसिद्ध्यर्थं च ᵛपवते। ᵛद्यावापृथिवीभ्यां द्युलोकभूलोकप्रीणनार्थं ᵛपवते। किं वाऽत्र बहुनोक्तेन। ᵛसुभूताय सर्वेषां साधुभावनाय ᵛपवते। ᵛब्रह्मवर्चसाय ब्राह्मणानां विशिष्टवर्चोऽभिवृद्ध्यर्थं ᵛपवते। हे आग्रयणग्रह, त्वां सर्वदेवताप्रीत्यर्थं गृह्णामीति शेषः। ᵛएषः स्वरप्रदेशस्तव स्थानम्। सर्वेभ्यः ᵛदेवेभ्यः त्वामासादयामीति शेषः ॥१–४॥

[इति सप्तमेऽध्यायेऽष्टमोऽनुवाकः]

आ– आग्रयणं गृह्णाति– 'ये देवासः' इति। वैश्वदेवी त्रिष्टुप्। हे ᵛदेवासः, यूयं ᵛदिवि द्युलोके ᵛएकादश ᵛस्थ एकादशसंख्याका भवथ। ᵛपृथिव्याम् ᵛअधि उपरि ᵛएकादश ᵛस्थ ᵛये देवाः अप्सु। अप्स्वित्यन्तरिक्षनाम। अन्तरिक्षे क्षितः। क्षि निवासगत्योः। क्षितः अन्तरिक्षे निवसन्तः। ᵛमहिना माहात्म्येन। महिनेत्यस्य त्रिष्वपि संबन्धः। ᵛते सर्वे देवाः यूयम् ᵛइमं ᵛयज्ञम् आग्रयणलक्षणं ᵛजुषध्वम् ॥१॥

'उपयामगृहीतोऽसि' इति व्याख्यातम्। 'आग्रयणोऽसि' इति। लिङ्गोक्तदेवत्यं यजुः। 'आग्रयणोऽसि' इति स्वनाम्ना संबोधनं स्तुत्यर्थम्। अतस्त्वं ᵛस्वाग्रयणः शोभमानाग्रयणः। यस्मिंस्त्वयि गृहीते अग्रे प्रथमं वाचः अयनं गमनम् उत्सर्गः अध्वर्योः संजातः। अथवा अग्रं

---

1. P1 om. second एकादश स्थ
2. P1 with marking above अप्सु° ins. in the margin अप्स्विति अन्तरिक्षनाम,
   V1 S1 C निवसथत्त for निवसन्तः
3. V1 S1 C om. सेवध्वम्
6. C V1 S1 om. सर्वतः
7. C V1 S1 हिंकारत्रयं for त्रिः वारत्रयं हिङ्कारं
11. P1 om. सोमः पवत इति
13. V1 S1 C °प्रीत्यर्थं for °प्राप्त्यर्थं

श्रैष्ठ्यं यन्ति प्राप्नुवन्त्यनेनेत्याग्रयणम् । अतो यस्त्वमेवं साधुकारी तं त्वां ब्रवीमि । हे आग्रयण, ᵛपाहि ᵛयज्ञं ᵛयज्ञपतिं ᵛपाहि गोपाय ॥२॥

‘ विष्णुस्त्वा ’ इति । वैष्णवी गायत्री । विष्णुस्त्वामिन्द्रियेण पातु । विष्णुः यज्ञस्याधिष्ठात्री देवता । अतः ᵛत्वाम् ᵛइन्द्रियेण वीर्येण ᵛविष्णुः ᵛपातु । ᵛत्वम् अपि ᵛविष्णुं यज्ञरूपं ᵛपाहि । ᵛअभि अभितः सर्वतः त्वं ᵛसवनानि ᵛपाहि । [स हि] सर्वेषु सवनेषु गृह्यत इति । ‘ सोमः पवते ’ इति । वैश्वदेवत्यम् । पवत इति [गति]कर्मसु पठितम् । ग्रहपात्रेषु सोमो गच्छति स्वकीये कर्मणि [प्र] वर्तते ॥३॥

ᵛअस्मै ᵛब्रह्मणे उत्पत्तिस्थित्यर्थं ᵛपवते । ᵛअस्मै ᵛक्षत्राय ᵛपवते । ᵛअस्मै ᵛसुन्वते सोमाभिषवं कुर्वते ᵛयजमानाय कर्मप्राप्त्यर्थं ᵛपवते । ᵛइषे अन्नाय ᵛपवते । ᵛऊर्जे रसाय पवते । ᵛअद्भ्यः वृष्ट्यर्थं पवते । ᵛओषधीभ्यः वीहियवादिभ्यो व्रीहियवादीनामुत्पत्तिस्थित्यर्थं ᵛपवते । ᵛद्यावापृथिवीभ्याम् उभयप्रीणनार्थं ᵛपवते । किं वाऽत्र बहुनोक्तेन । ᵛसुभूताय ᵛपवते सर्वेषां साधुभावनाय पवते । ᵛब्रह्मवर्चसाय ᵛपवते ब्राह्मणानां विशिष्टवर्चोऽभिवृद्धये पवते । ‘ विश्वेभ्यः त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ’ । सादयामीति शेषः ॥१–४॥

[इति सप्तमेऽध्यायेऽष्टमोऽनुवाकः ॥५॥]

[अथ नवमोऽनुवाकः]

सा– अष्टमेऽनुवाके आग्रयणग्रह उक्तः । नवमे उक्थ्यग्रहः उच्यते ।

उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वते वयस्वत उक्थायुवं गृह्णामि ।
यत् त इन्द्र बृहद्वयस्तस्मै त्वा विष्णवे त्वैष ते योनिरुक्थेभ्यस्त्वा ॥१॥
देवेभ्यस्त्वा देवायुवं गृह्णामि यज्ञस्यायुषे
मित्रावरुणाभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुषे ।
इन्द्राय त्वा देवायुवं गृह्णामि यज्ञस्यायुष
इन्द्राग्निभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुषे ।
इन्द्राय त्वा देवायुवं गृह्णामि यज्ञस्यायुष
इन्द्रावरुणाभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुषे ।
इन्द्राबृहस्पतिभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुष
इन्द्राविष्णुभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुषे ॥२॥(९)॥

इन्द्रा॑य । त्वा॒ । बृ॒हद्व॑त॒ इति॑ बृ॒हत्ऽव॑ते । वय॑स्वते ।
उ॒क्था॒यु॒व॑म् । उ॒क्थ॒यु॒वमित्यु॑क्थ॒ऽयु॒व॑म् । गृ॒ह्णा॒मि ।
यत् । ते॒ । इ॒न्द्र॒ । बृ॒हत् । वयः॑ । तस्मै॑ । त्वा॒ । विष्ण॑वे । त्वा॒ ।
ए॒षः । ते॒ । योनिः॑ । उ॒क्थेभ्यः॑ । त्वा॒ ॥ झाः ॥१॥
दे॒वेभ्यः॑ । त्वा॒ । दे॒वा॒यु॒व॑म् । दे॒व॒यु॒वमिति॑ दे॒व॒ऽयु॒व॑म् । गृ॒ह्णा॒मि॒ । य॒ज्ञस्य॑ । आयु॑षे ।
मि॒त्रावरु॑णाभ्याम् । इन्द्रा॑य । इ॒न्द्रा॒ग्निभ्या॒मितीन्द्रा॒ग्निऽभ्या॑म् ।
इन्द्रा॑य । इ॒न्द्रा॒वरु॑णाभ्याम् । इ॒न्द्रा॒बृह॒स्पति॑भ्या॒मितीन्द्रा॒बृह॒स्पति॑ऽभ्याम् ।
इ॒न्द्रा॒विष्णु॑भ्या॒मितीन्द्रा॒विष्णु॑ऽभ्याम् । त्वा॒ । दे॒वा॒यु॒व॑म् । दे॒व॒यु॒वमिति॑ दे॒व॒ऽयु॒व॑म् ।
गृ॒ह्णा॒मि॒ । य॒ज्ञस्य॑ । आयु॑षे ॥ पः ॥२॥(९)॥

कात्यायनः– " उक्थ्यमुपयामगृहीत इति " (काश्रौ ९.६.२१) इति । उक्थ्यग्रहं गृह्णीयात् । पाठस्तु– ' उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वते वयस्वत उक्थायुवं गृह्णामि । यत् त इन्द्र बृहद्वयस्तस्मै त्वा विष्णवे त्वैष ते योनिरुक्थेभ्यस्त्वा । देवेभ्यस्त्वा देवायुवं गृह्णामि यज्ञस्यायुषे मित्रावरुणाभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुषे । इन्द्राय त्वा देवायुवं गृह्णामि यज्ञस्यायुष इन्द्राग्निभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुषे । इन्द्राय त्वा देवायुवं गृह्णामि यज्ञस्यायुष इन्द्रावरुणाभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुषे इन्द्राबृहस्पतिभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुष इन्द्राविष्णुभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुषे ' इति । हे सोम, त्वमुपयामेन पात्रेण गृहीतो भवसि । हे उक्थ्यग्रह, उक्थायुवं उक्थं शस्त्रं कामयत इत्युक्थयुः । छान्दसो दीर्घः । तादृशं त्वाम् इन्द्राय गृह्णामि स्वीकरोमि । कीदृशायेन्द्राय ? बृहद्वते बृहत्सामवते बृहत्सामप्रियायेत्यर्थः । वयस्वते वयः सोमरूपमन्नं, तद्वते । हे इन्द्र, यत् ते बृहद्वयः महदन्नं सोमरूपमस्ति तस्मै तत्पानार्थं त्वां प्रार्थय इति शेषः । हे सोम, विष्णुदेवतार्थं त्वां गृह्णामि । एषः खरप्रदेशस्तव स्थानम् । उक्थेभ्यः त्वां सादयामि । देवेभ्यः देवानामर्थाय देवायुवं देवान् कामयमानं त्वां गृह्णामि । किमर्थम् ? यज्ञस्य आयुषे, यज्ञस्य संपूर्णतया समाप्तिरायुर्यस्य; फलपर्यन्ततया अवस्थानं च आयुर्वा यस्य तस्मै त्वां गृह्णामीत्यर्थं । मित्रादिदेवतार्थं देवायुवं त्वां गृह्णामि । शिष्टं स्पष्टम् ॥१–२॥

[इति सप्तमेऽध्याये नवमोऽनुवाकः ॥]

---

16. V1 S1 C om. उक्थं
20. P1 देवताप्रीत्यर्थं for देवानामर्थाय
22. V1 S1 C before फल॰ add च; V1 S1 C om. वा यस्य
24. P1 V1 om. अध्याये; C S1 सप्तमा॰ for सप्तमे॰

आ– उक्थ्यं गृह्णाति– ‘ उपयामगृहीतोऽसीन्द्राय त्वा ’ इति । लिङ्गोक्तदेवत्यानि यजूंषि । ‘ इन्द्राय त्वा गृह्णामि ’ इति संबन्धः । कथंभूतायेन्द्रायेति, vबृहद्वते, बृहदिति बृहत्साम, तद्वते । vवयस्वते विशिष्टं वयः यौवनलक्षणं सदावीर्यसमेतं यस्य स तथोक्तः, तस्मै vवयस्वते vइन्द्राय । vउक्थायुवम्, उक्थं शस्त्रं कामयते इक्त्युथायुः । छान्दसो दीर्घः । तम् उक्थायुवम् । मैत्रावरुण-ब्राह्मणाच्छंस्यच्छावाकसंबन्धिनम् उक्थ्यं नाम सोमग्रहं vगृह्णामि । हे इन्द्र यस्य (यत् ?) vते तव vबृहत महत् ऊर्जितं vवयः यौवनलक्षणं vतस्मै इन्द्राय तुभ्यं ग्रहं vत्वां गृह्णामि । vविष्णवे यज्ञाय त्वा गृह्णामीति शेषः । vएषः vते vयोनिः vउक्थेभ्यः vवा, सादयामीति शेषः ॥१॥

उक्थ्यं गृह्णाति– ‘ देवेभ्यस्त्वा ’ इति । लिङ्गोक्तदेवत्यानि यजूंषि । vदेवेभ्यः अर्थाय vदेवायुवम्, इदमायुरिदं कामयमान इति देवकामं ग्रहं त्वां गृह्णामि । vयज्ञस्यायुषे यज्ञस्य संपूर्णतया समाप्तिरायुर्वा यस्य च फलपर्यन्ततया अवस्थानं च वायुस्तस्मै त्वां गृह्णामीति शेषः । यद्वा– यज्ञो यजमानशरीरमिति यजमानस्यायुराशास्यते । उक्थ्यविग्रहणेषु द्वितीयो मन्त्रविकल्पः । मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकानां यथासंख्यं संबन्धः । vमित्रावरुणाभ्याम् अर्थाय vदेवायुवं त्वां vगृह्णामि । यज्ञस्य vआयुषे संपूर्णायुष्यसिद्धये vइन्द्राय इन्द्रार्थं vत्वा vदेवायुवं त्वां vगृह्णामि । vइन्द्राग्निभ्यां देवताभ्याम् अर्थाय देवायुवं त्वां vगृह्णामि । एवं चरकाणां मन्त्रविकल्पः । स्पष्टार्थः । vइन्द्राय vत्वा vइन्द्रावरुणाभ्यां त्वाम् । उक्थ्यादिषु तृतीयसवने उक्थ्यशेषग्रहमन्त्राः । vइन्द्राय vत्वा इन्द्रबृहस्पतिभ्यां त्वा इन्द्राविष्णुभ्यां त्वा ॥२॥

[इति सप्तमाध्याये नवमोऽनुवाकः ॥]

[अथ दशमोऽनुवाकः]

सा– नवमे उक्थ्यग्रह उक्तः । दशमे ध्रुवग्रह उच्यते–

मू॒र्धानं॑ दि॒वो अ॑र॒तिं पृ॑थि॒व्या वै॑श्वान॒रमृ॒त आ जा॒तम॒ग्निम् ।
क॒विं स॒म्राज॒मति॑थिं॒ जना॑नामा॒सन्ना पात्रं॑ जनयन्त दे॒वाः ॥१॥
उ॒प॒या॒मगृ॑हीतोऽसि ध्रु॒वो॑ऽसि ध्रु॒वक्षि॑तिर्ध्रु॒वाणां॑ ध्रु॒वत॒मो-
ऽच्यु॑तानामच्यु॒त॒क्षित्त॑मः । ए॒ष ते॒ योनि॑र्वैश्वान॒राय॑ त्वा ॥२॥

मू॒र्धान॑म् । दि॒वः । अ॒र॒तिम् । पृ॒थि॒व्याः । वै॒श्वा॒न॒रम् । ऋ॒ते । आ । जा॒तम् । अ॒ग्निम् । क॒विम् । स॒म्रा॒जमिति॑ स॒म्ऽराज॑म् । अति॑थिम् । जना॑नाम् । आ॒सन् । आ । पात्र॑म् । ज॒न॒य॒न्त॒ । दे॒वाः ॥ ग्यों ॥१॥

---

2. B1 महन्नामा for बृहत्साम

ध्रुवः । असि । ध्रुवक्षितिरिति ध्रुवऽक्षितिः । ध्रुवाणाम् । ध्रुवतम इति ध्रुवऽतमः ।
अच्युतानाम् । अच्युतक्षित्तम इत्यच्युतक्षित्ऽतमः ।
एषः । ते । योनिः । वैश्वानराय । त्वा ॥ द्विं ॥२॥

कात्यायनः– "ध्रुवं मूर्धानं दिव इति" (काश्रौ ९·६·२२) इति । ध्रुवनामकं ग्रहं गृह्णीयात् । पाठस्तु– 'मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् । कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः । उपयामगृहीतोऽसि ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तमः । एष ते योनिर्वैश्वानराय त्वा ' इति । वयं वैश्वानरनामकमग्निं स्तुम इति शेषः । कीदृशमग्निम् ? दिवः ᵛमूर्धानम् शिरोवदुन्नतप्रदेशे सूर्यरूपेणावस्थाय द्युलोकस्य भासकम्, ᵛअरतिं ᵛपृथिव्याः रतिरुपरतिस्तद्रहितम् । न हि पृथिव्या उपरि कदाचिदपि अग्निरुपरमते । किं तु दाहकपावकप्रकाशैः सर्वाननुगृह्णन् सर्वदा वर्तते । ᵛऋते यज्ञनिमित्ते ᵛआजातम् आभिमुख्येनारण्योरुत्पन्नम् । ᵛकविं स्वभक्तमनुग्रहीतुमभिज्ञम् । ᵛसम्राजं सम्यक् दीप्यमानं ᵛजनानां यजमानानाम् ᵛअतिथिं हविर्भिः सत्कारयोग्यम् ᵛआसन् । ईदृशस्याग्नेरास्ये मुखे होतुं ᵛदेवाः ᵛपात्रं सोमग्रहरसरूपम् ᵛआ ᵛजनयन्त सर्वत ऐन्द्रवायवादिस्थानेषूत्पादिवन्तः । हे सोम, त्वमुपायामेन पात्रेण गृहीतो भवसि । हे ग्रह, त्वं ध्रुवनामकोऽसि । कीदृशस्त्वम् ? ᵛध्रुवक्षितिः । क्षि निवासगत्योः । स्थिरनिवासः आ वैश्वदेवीशंसनप्रस्थानात् । ᵛध्रुवाणाम् आदित्यस्थाल्यादीनां मध्ये ᵛध्रुवतमः अतिशयेन स्थिरः । ᵛअच्युतानां च्युतिरहितानां क्षरणशून्यानाम् अच्युतक्षितीनामपि मध्ये ᵛअच्युतक्षित्तमः अच्युते यज्ञे क्षियन्ति निवसन्तीत्यच्युतक्षित्तमः तेषां श्रेष्ठोऽसि । ᵛएषः खरप्रदेशस्तव स्थानम् । वैश्वानराग्नये त्वां सादयामि ॥१-२॥

आ– ध्रुवं गृह्णाति– 'मूर्धानम्' इति । भरद्वाजो वैश्वानरी त्रिष्टुप् । सर्वात्मना वैश्वानरोऽत्र स्तूयते । ᵛदिवः द्युलोकस्य ᵛमूर्धानं सूर्यात्मनाऽवस्थितम्, यं शिर आहुर्ब्रह्मविदः । ᵛअरतिं ᵛपृथिव्याः, पृथिवीशब्दोऽन्तरिक्षवचनः । आकाशमापः पृथिवीत्यन्तरिक्षपर्यायात् । अरतिः अलंपर्यायः । ᵛअरतिं पर्याप्तं तम् ᵛपृथिव्याः अन्तरिक्षलोकस्य यमरतिं प्राहुः । तत्र स्थित्वायथाकालं वृष्ट्या भूतानि पुष्णातीति । ᵛवैश्वानरम् ᵛऋते ᵛआ ᵛजातम् अरण्योरुत्पन्नं यं च अग्निं प्राहुर्वेदाः । यं च ᵛकविं प्राहुः । यं च ᵛसम्राजं प्राहुः । परमैश्वर्यरूपं यं परब्रह्मरूपमाहुः । यं च ᵛजनानाम् ᵛअतिथिं प्राहुः । अतिथिरूपेण गृहान् प्रविशतीति प्रसिद्धं हि । ᵛआसन् आ

---

9. V1 S1 C °पावक° for °पाक°
10. P1 om. सम्राजं
11. P1 with marking above आसन् ins. in the margin
    पद्दन्नितिसूत्रेणास्य शब्दस्यासन्नित्यादेशो विभक्तिलोपश्च ।
14. V1 S1 C P1 °शंवसनमव° for शंसनप्रस्थानात् ।
15. V1 S1 C च्युताक्षितीनाम् for अच्युताक्षितीनाम्
16. V1 S1 C om. यज्ञे
20. उवट explains अरतिम् as अरतिं अलमतिं पर्याप्तमतिं पृथिव्या अन्तरिक्षलोकस्याहुः । तत्र असौ स्थितो यथाकालं वृष्ट्या पुष्णाति भूतानि ।

पात्रं योऽयमुक्तगुणो वैश्वानरस्तम् आसन् । आस्यशब्दस्य "पद्दन्नो°" (पा ६·१·६३) इत्यादिना आसन् आदेशः । सप्तम्याश्छान्दसो लोपः । आसनि देवादीनामासनि आस्ये मुखे vआ आभिमुख्येन vपात्रं, पीयतेऽनेनेति पात्रम् । vदेवाः इन्द्रादयः vजनयन्त [एवं] स सर्वात्मको वैश्वानरः स्तूयते ॥१॥

इन्द्राय ग्रहं गृह्णाति– ' उपयामगृहीतोऽसि ध्रुवोऽसि ' इति । ध्रुवतीति vध्रुवः स्थिरः त्वम् अत एव vध्रुवक्षितिः । क्षि निवासगत्योः । ध्रुवनिवासः । vध्रुवाणां पृथिव्यादीनां त्वं vध्रुवतमः असि । vअच्युतानां च्युतिरहितानां क्षरणशून्यानाम् अच्युतक्षितानामपि त्वम् vअच्युतक्षित्तमः । अच्युते क्षियन्तीति अच्युतक्षितः । तेषां श्रेष्ठः अच्युतक्षित्तमोऽसि । ' एष ते योनिर्वैश्वानराय त्वा ' इति । सादयामीति [शेषः] ॥२॥

ध्रु॒वं ध्रु॒वेण॒ मन॑सा वा॒चा सोम॒मव॑ नयामि ।
अथा॑ न॒ इन्द्र॒ इद्विशो॑ऽसप॒त्नाः सम॑नस॒स्कर॑त् ॥३॥(१०)॥

ध्रु॒वम् । ध्रु॒वेण॑ । मन॑सा । वा॒चा । सोम॑म् । अव॑ । न॒या॒मि॒ ।
अथ॑ । न॒ः । इन्द्र॑ः । इत् । विश॑ः । अ॒स॒प॒त्नाः । सम॑नस॒ इति॒ सऽम॑नसः । कर॑त् ।
ङुं ॥३॥(१०)॥

सा– "[ध्रुवं] सर्वमासिञ्चति" (काश्रौ ९·६·२६) इति । ध्रुवपात्रस्थं सर्वं सोमं होतृचमसेऽवसिञ्चेत् । पाठस्तु– ' ध्रुवं ध्रुवेण मनसा वाचा सोममव नयामि । अथा न इन्द्र इद्विशोऽसपत्नाः समनसस्करत् ' इति । vध्रुवेण एकाग्रेण vमनसा मन्त्रोच्चारणप्रवणया vवाचा vध्रुवं ध्रुवग्रहेऽवस्थितं vसोमम् vअवनयामि होतृचमसेऽवसिञ्चामि । vअथ अनन्तरम् vइन्द्रः vइत् इन्द्र एव vनः अस्माकं vविशः vअसपत्नाः सपत्नरहिताः शत्रुशून्याः vसमनसः स्थिरमनस्काश्च vकरत् करोतु ॥३॥

[इति सप्तमेऽध्याये दशमोऽनुवाकः ॥]

आ– ध्रुवं निनयति– ' ध्रुवं ध्रुवेण ' इति । बृहती । पूर्वोऽर्धर्चः ध्रौवः । उत्तरस्त्वैन्द्रः । vसोमं प्रति vध्रुवं त्वाम् vअव vध्रुवेण एकाग्रेण vमनसा vवाचा मन्त्रोच्चारणप्रवणया वाचा vनयामि अवसिञ्चामि । स हि होतृचमसे अवसिच्यते द्वादशशस्त्रैः । ' अथा न इन्द्रः इत् ' । [vइत्] एवार्थे । vइन्द्रः एव vनः अस्माकं vविशः प्रजाः मनुष्यान् vअसपत्नाः सपत्नरहिताः

---

1. B1 यूयम् for योऽयम्
22. B1 मन्त्रोच्चारणया for मन्त्रोच्चारप्रवणया

शत्रुशून्याः ᵛसमनसः च स्थिरमनस्काश्च ᵛकरत् इन्द्र एक एव करोतु ॥३॥

[इति सप्तमेऽध्याये दशमोऽनुवाकः ॥]

[अथ एकादशोऽनुवाकः]

सा– दशमेऽनुवाके ध्रुवग्रह उक्तः । एकादशे विप्रुषां होम उच्यते ॥

यस्ते॑ द्र॒प्सः स्कन्द॑ति॒ यस्ते॑ अ॒ꣳशुर्ग्राव॑च्युतो धि॒षण॑योरु॒पस्था॑त् ।
अ॒ध्व॒र्योर्वा॒ परि॑ वा॒ यः प॒वित्रा॒त् तं ते॑ जुहो॒मि मन॑सा॒ वष॑ट्कृत॒ꣳ स्वाहा॑ ।
दे॒वाना॑मु॒त्क्रमणम॑सि ।।१।।(११)।।

यः । ते॒ । द्र॒प्सः । स्कन्द॑ति । यः । ते॒ । अ॒ꣳशुः । ग्राव॑च्युत॒ इति॒ ग्राव॑ऽच्युतः ।
धि॒षण॑योः । उ॒पस्था॒दित्यु॒पऽस्था॑त् ।
अ॒ध्व॒र्योः । वा॒ । परि॑ । वा॒ । यः । प॒वित्रा॑त् ।
तम् । ते॒ । जु॒हो॒मि॒ । मन॑सा । वष॑ट्कृत॒मिति॒ वष॑ट्ऽकृतम् । स्वाहा॑ ।
दे॒वाना॑म् । उ॒त्क्रम॑ण॒मित्यु॒त्ऽक्रम॑णम् । अ॒सि॒ ॥ द्रूः ॥१॥ (११)॥

कात्यायनः– "यस्त इति विप्रुषां होमं जुह्वतीत्यध्वर्युर्वा" (काश्रौ ९·६·२९-३०) इति । प्रतिप्रस्थात्रुद्गात्रादिसहितोऽध्वर्युः केवलो वा विप्रुषां होमं जुहुयात् । पाठस्तु –'यस्ते द्रप्सः स्कन्दति यस्ते अꣳशुर्ग्रावच्युतो धिषणयोरुपस्थात् । अध्वर्योर्वा परि वा यः पवित्रात् तं ते जुहोमि मनसा वषट्कृतꣳ-स्वाहा' इति । हे सोम, ᵛते त्वदीयः ᵛयः ᵛद्रप्सः रसैकदेशः ᵛस्कन्दति भूमावन्यत्र वा पतति, ᵛते त्वदीयः ᵛयः ᵛअꣳशुः ᵛग्रावच्युतः ग्राव्णः सकाशात् पतितः, यः ᵛधिषणयोः अधिषवणफलकयोः ᵛउपस्थात् उत्सङ्गात् पतितः ᵛयः अंशुः ᵛअध्वर्योः ᵛवा ᵛपवित्रात् ᵛवा परिस्कन्दति । ᵛमनसा ᵛवषट्कृतं ᵛतं तादृशं ᵛते तव त्वदीयमंशुं स्वाहाकारेण ᵛजुहोमि ॥

कात्यायनः– "वेदितृणेऽध्वर्युरादत्ते । प्रह्व उदङ्ङो गच्छन्नन्यतरत्तृणं चात्वाले प्रास्यति देवानामिति" (काश्रौ ९·६·३२-३४) इति । अध्वर्युर्वेद्यन्तर्गतं तृणद्वयं स्वीकृत्य बहिःपवमानार्थं प्रतिप्रस्थात्रुद्गात्रादिसहितः प्रह्वीभूतः उदङ्मुखो गत्वा तयोरेकं चात्वाले प्रक्षिपेत् । पाठस्तु– 'देवानामुत्क्रमणमसि' इति । हे चात्वाल, यस्माद् देवास्त्वत्सकाशात् स्वर्गमुत्क्रामन्ति तस्मात् त्वं ᵛदेवानाम् ᵛउत्क्रमणम् ᵛअसि ॥१॥

[इति सप्तमेऽध्याये एकादशोऽनुवाकः ॥]

---

16. P1 V1 after द्रप्सो add रसो
18. P1 with marking above अध्वर्योः ins. in the margin अङ्गादौ
22. V1 S1 C भूत्वा for गत्वा
23. V1 S1 C after स्वर्ग add गाम्

ऋतुग्रहमन्त्राः]

आ– विप्रुषो होमः– ‘ यस्ते ’ इति । देवश्रवाः सौमित्री त्रिष्टुप् यजुरन्ता । हे सोम, ^{v}यः ^{v}ते तव ^{v}द्रप्सः विप्रुट् रसैकदेशः ^{v}स्कन्दति भूमावन्यत्र वा पतति । ^{v}यः ^{v}ते ^{v}अंशुः तवांशुः ^{v}ग्रावच्युतः ग्राव्णः सकाशात् च्युतः पतितः, ^{v}धिषणयोः अधिषवणफलकयोः ^{v}उपस्थात् उत्सङ्गात् पतितः, ^{v}अध्वर्योः ^{v}वा ^{v}यः अंशुः ^{v}परिस्कन्दति, ^{v}पवित्रात् ^{v}वा यः स्कन्दति, यतः कुतश्चिद्वा यः स्कन्दति ^{v}तं ^{v}ते ^{v}जुहोमि । ते तव संबन्धिनम् अंशुं ^{v}मनसा ^{v}वषट्कृतं ^{v}स्वाहा वषट्कारेण युक्तं स्वाहाकारेण च युक्तं वह्नौ जुहोमि । तृणं चात्वाले प्रास्यति –‘ देवानामुत्क्रमणमसि ’ इति । ^{v}देवानां वाय्वादीनाम् ^{v}उत्क्रमणं चात्वालम् ^{v}असि । चात्वालात् देवाः स्वर्गं गन्तुमुत्क्रामन्तीति चात्वालमुत्क्रमणमुच्यते ॥१॥

[इति सप्तमेऽध्याये एकादशोऽनुवाकः ॥]

[अथ द्वादशोऽनुवाकः]

सा– एकादशेऽनुवाके विप्रुषां होम उक्तः । द्वादशे ऋतुग्रहा उच्यन्ते

उ॒प॒या॒मगृहीतोऽसि॒ मध॑वे त्वोपया॒मगृ॑हीतोऽसि॒ माध॑वाय त्वा ।
उ॒प॒या॒मगृ॑हीतोऽसि शु॒क्राय॑ त्वोपया॒मगृ॑हीतोऽसि॒ शुच॑ये त्वा ।
उ॒प॒या॒मगृ॑हीतोऽसि॒ नभ॑से त्वोपया॒मगृ॑हीतोऽसि॒ न॒भ॒स्या॑य त्वा ।
उ॒प॒या॒मगृ॑हीतोऽसी॒षे त्वोपया॒मगृ॑हीतोऽस्यू॒र्जे त्वा॑ ।
उ॒प॒या॒मगृ॑हीतोऽसि॒ सह॑से त्वोऽपया॒मगृ॑हीतोऽसि स॒ह॒स्या॑य त्वा ।
उ॒प॒या॒मगृ॑हीतोऽसि॒ तप॑से त्वोपया॒मगृ॑हीतोऽसि त॒प॒स्या॑य त्वा ।
उ॒प॒या॒मगृ॑हीतोऽस्यꣳहसस्प॒तये॑ त्वा ।।१।। (१२)।।

मध॑वे । माध॑वाय ।
शु॒क्राय॑ । शुच॑ये ।
नभ॑से । न॒भ॒स्या॑य ।
इ॒षे । ऊ॒र्जे ।
सह॑से । स॒ह॒स्या॑य ।
तप॑से । त॒प॒स्या॑य ।
अ॒ꣳह॒स॒स्प॒तये॑ । अ॒ꣳह॒स॒ःप॒त॒य॒ इत्य॑ꣳह॒स॒ःऽप॒तये॑ । त्वा॒ ॥ खं॒ ।।१॥(१२)॥

---

3. B1 अवयवः अंशुः for तवांशुः

कात्यायनः– " ऋतुग्रहैः प्रचरतो द्रोणकलशादुपयामगृहीतोऽसि मधवे त्वेति द्वादश प्रतिमन्त्रम् । अध्वर्योः पूर्वः पूर्वो मन्त्रः । उत्तर उत्तरः प्रतिप्रस्थातुः " (काश्रौ ९·१३·१-४) इति । अध्वर्युः प्रतिप्रस्थाता चोभौ ऋतुग्रहैर्द्वादशभिरनुतिष्ठतः । उपयामेत्यादयो द्वादश मन्त्राः । तत्र षट्सु मन्त्रयुग्मेषु पूर्वः पूर्वोऽध्वर्योरुत्तर उत्तरः प्रतिप्रस्थातुरिति मन्त्रविवेकः । तत्रायं प्रथमो मन्त्रः– ' उपयामगृहीतोऽसि मधवे त्वा ' इति । हे सोम, त्वम् उपयामयतीत्युपयामो ग्रहस्तेन गृहीतो भवसि । त्वां [V]मधवे मधुनाम्ने चैत्रमासाय गृह्णामीति शेषः ॥

अथ द्वितीयो मन्त्रः – ' उपयामगृहीतोऽसि माधवाय त्वा ' इति । [V]माधवाय एतन्नामकाय वैशाखाय त्वां गृह्णामि ।

अथ तृतीयो मन्त्रः – ' उपयामगृहीतोऽसि शुक्राय त्वा ' इति । शुक्रनामकाय ज्येष्ठाय त्वां गृह्णामि ॥

अथ चतुर्थो मन्त्रः–' उपयामगृहीतोऽसि शुचये त्वा ' इति । [V]शुचये आषाढमासाभिमानिदेवतार्थं त्वां गृह्णामि ॥

अथ पञ्चमो मन्त्रः – ' उपयामगृहीतोऽसि नभसे त्वा ' इति । [V]नभसे श्रावणमासाय त्वां गृह्णामि ॥

अथ षष्ठो मन्त्रः – ' उपयामगृहीतोऽसि नभस्याय त्वा ' इति । हे सोम, [V]नभस्याय एतत्संज्ञकाय भाद्रपदमासाय त्वां गृह्णामि ॥

अथ सप्तमो मन्त्रः – ' उपयामगृहीतोऽसीषे त्वा ' इति । [V]इषे आश्वयुजमासाय सोम, त्वां गृह्णामि ॥

अथाष्टमो मन्त्रः– ' उपयामगृहीतोऽस्यूर्जे त्वा ' इति । [V]ऊर्जे एतन्नामकाय कार्तिकमासाय सोम, त्वां गृह्णामि ॥

अथ नवमो मन्त्रः– ' उपयामगृहीतोऽसि सहसे त्वा ' इति । [V]सहसे मार्गशीर्षमासाय सोम, त्वां गृह्णामि ॥

अथ दशमो मन्त्रः– ' उपयामगृहीतोऽसि सहस्याय त्वा ' इति । सहस्यनाम्ने पुष्यमासाय सोम, त्वां गृह्णामि ॥

---

3. P1 अनुष्ठितः for अनुतिष्ठतः; P1 षड् for षट्सु
5. V1 S1 C एतत्संज्ञकाय for मधुनाम्ने
6. V1 S1 C before गृह्णामि add त्वां and om. इति शेषः
7. C om. मन्त्रः; V1 S1 C om. एतन्नामकाय
9. C om. मन्त्रः; C V1 S1 ज्येष्ठाभिमानिदेवतायै for शुक्रनामकाय ज्येष्ठाय
11. C om. मन्त्रः; C V1 S1 आषाढमासाय for आषाढमासाभिमानि देवतार्थं
13. C om. मन्त्रः; C om. second नभसे
15 C. om. मन्त्रः; V1 C S1 om. हे सोम
17. C om. मन्त्रः; V1 S1 C om. second इषे

अथैकादशो मन्त्रः– ‘ उपयागृहीतोऽसि तपसे त्वा ’ इति । ^{v}तपःसंज्ञकाय माघमासाय सोम, त्वां गृह्णामि ॥

अथ द्वादशो मन्त्रः– ‘ उपयामगृहीतोऽसि तपस्याय त्वा ’ इति । ^{v}तपस्याय फाल्गुनमासाय त्वां गृह्णामि ॥

कात्यायनः– ‘ त्रयोदशं गृह्णीयादिच्छन्नुपयामगृहीतोऽस्यꣳहसस्पतये त्वा ’ (काश्रौ ९·१३·१८) इति । त्रयोदशग्रहे अनुष्ठातुर्यदीच्छा स्यात् तर्हि अध्वर्युस्त्रयोदशं ग्रहं गृह्णीयात्। यदि नेच्छा स्यात् तर्हि न गृह्णीयादि त्यैच्छिको विकल्पः । ^{v}अꣳहसपतये । अंहतेर्गतिकर्मणः सुन्प्रत्ययान्तस्य रूपम् । अंहसां गतीनां पतिरंहसस्पतिस्त्रयोदशो मास आदित्यगतिवशेन जायते, तस्मै हे सोम, त्वम् उपयामेन पात्रेण गृहीतोऽसि । तादृशं त्वां गृह्णामीति शेषः ॥१॥

[इति सप्तमेऽध्याये द्वादशोऽनुवाकः ॥]

आ– ऋतुग्रहास्त्रयोदश । मन्त्राणां तु तन्नामान्येव । ‘ उपयामगृहीतोऽसि मधवे त्वा ’ इत्यादीनि त्रयोदश लिङ्गोक्तानि यजूंषि । हे सोम, ^{v}उपयामगृहीतः । उपयामयतीत्युपयामः, तेन सोमो गृहीतः ^{v}असि । ^{v}मधवे मधुनाम्ने मासाय । मध्वर्थं त्वं सोमो गृहीतोऽसि । अतस्त्वां गृह्णामीति शेषः । ^{v}माधवाय त्वं गृहीतः ^{v}असि । त्वां गृह्णामीति शेषः । मधुप्रमुखमन्नं वसन्ते उत्पद्यत इति मधुमन्तौ मधुमाधवौ चैत्रवैशाखलक्षणौ वसन्तर्तुः । तन्नामायं ग्रहः । ‘ उपयामगृहीतोऽसि शुक्राय त्वा ’। ^{v}उपयामगृहीतः ^{v}असि । ‘ शुचये त्वा ’ सर्वत्र गृह्णामीति शेषः । शुक्रश्च शोचिश्चेति द्वौ ग्रैष्मौ ज्येष्ठाषाढलक्षणौ । शुच दीप्तौ । मत्वर्थीयो रप्रत्ययः । शुक्रः दीप्तिमान् । शुक्रो ज्येष्ठः । [शुचिः] शोचयिता प्राणिनां, शोषयिता जलानामिति । शुच शोक इति शुचेरिन्प्रत्ययान्तस्य रूपम् । शुचिरित्याषाढः । तस्मै ‘ उपयामगृहीतोऽसि ’ । ^{v}नभसे । न भासते यत्र सूर्यो न भातीति [वा] नभः । मेघाच्छिन्नत्वात् । नभोऽस्यास्तीति नभस्यः । एतौ वार्षिकौ श्रावणभाद्रपदसंज्ञौ मासौ । ^{v}इषे । [इषम्] अन्नमोषध्यादिकं तत्र प्रचुरं भवतीति । ^{v}ऊर्जे । उर्जम् अन्नोपसेचन-दध्यादिरसः तत्र प्रचुरो भवतीति ऊर्क्, तस्मै । एवं विशिष्टगुणवन्तौ आश्वयुजकार्तिकाख्यौ शारदौ मासौ । तस्मै ^{v}सहसे ^{v}सहस्याय । सहते शीतेन प्रजा अभिभवतीति शीतेनाभिभविता सहः मासः । एवं गुणवानिति मत्वर्थीयप्रत्ययान्तः सहस्यः । एवंगुणवन्तौ मार्गशीर्षपौषाख्यौ हेमन्तिकौ मासौ । तस्मै ^{v}तपसे । ^{v}तपस्याय । तपति दहतीति असुन्प्रत्ययान्तः तपो मासः । मत्वर्थीययत्प्रत्ययान्तः

---

11. B1 मंशस्तु corrected by me as मन्त्राणां तु
14. B1 उत्पाद्यते for उत्पद्यत
15. B1 मधुमन्तं for मधुमन्तौ
19. B नभसा यत्र for न भासते यत्र; B1 न भवतीति नभः
25. B1 ते प्रति हन्तीति corrected by me as : तपति दहतीति.

तपस्यमासः । एवंगुणवन्तौ माघफाल्गुनसंज्ञकौ शैशिरौ मासौ । तस्मै च Vअꣳहसस्पतये । अंहतेर्गतिकर्मणोऽसुन्प्रत्ययान्तस्य रूपमंह इति । अंहसां गतीनां पतिरंहसस्पतिस्त्रयोदशो मास आदित्यगतिवशेन जायते । तस्मै ' उपयामगृहीतोऽसि ' । त्वां गृह्णामीति शेषः ॥१॥

[इति सप्तमेऽध्याये द्वादशोऽनुवाकः ॥]

[अथ त्रयोदशोऽनुवाकः]

सा– द्वादशे ऋतुग्रहा उक्ताः । त्रयोदशेऽनुवाके ऐन्द्राग्नग्रह उच्यते ।

इन्द्रा॑ग्नी॒ आ ग॑तꣳ सु॒तं गी॒र्भिर्न॑भो॒ वरे॑ण्यम् । अ॒स्य पा॑तं धि॒ये॑षि॒ता ।
उ॒प॒या॒मगृ॑हीतोऽसीन्द्रा॒ग्निभ्यां॑ त्वै॒ष ते॒ योनि॑रिन्द्रा॒ग्निभ्यां॑ त्वा ॥१॥(१३)॥

इन्द्रा॑ग्नी॒ इतीन्द्रा॑ग्नी । आ । ग॒त॒म् । सु॒तम् । गी॒र्भिरिति॑ गी॒ःऽभिः । नभ॑ः । वरे॑ण्यम् ।
अ॒स्य । पा॒त॒म् । धि॒या । इ॒षि॒ता ।
इ॒न्द्रा॒ग्निभ्या॒मिती॑न्द्रा॒ग्निऽभ्या॑म् । त्वा॒ ।
ए॒षः । ते॒ । योनि॑ः । इ॒न्द्रा॒ग्निभ्या॒मिती॑न्द्रा॒ग्निऽभ्या॑म् । त्वा॒ ॥ नों ॥१॥(१३)॥

कात्यायनः– " ऐन्द्राग्नग्रहं गृह्णाति प्रतिप्रस्थातेन्द्राग्नी इति " (काश्रौ ९·१३·२०) इति । प्रतिप्रस्थाता इन्द्राग्निदेवताकं ग्रहं गृह्णीयात् । पाठस्तु– ' इन्द्राग्नी आ गतं सुतं गीर्भिर्नभो वरेण्यम् । अस्य पातं धियेषिता । उपयामगृहीतोऽसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वा ' इति । हे Vइन्द्राग्नी, युवां Vसुतम् अभिषुतं सोमं प्रति Vआगतम् आगच्छतम् । कीदृशं सोमम् ? Vगीर्भिः स्तुतिरूपाभिर्वाग्भिर्युक्तमिति शेषः । Vनभः, नभस्थितैः स्वर्गनिवासिभिर्देवैः Vवरेण्यं प्रार्थनीयम् । Vअस्य सोमस्य संबन्धिनं स्वकीयमंशं Vपातं युवां पिबतम् । कीदृशौ युवाम् ? Vधिया अस्मद्बुध्या Vइषिता प्रार्थितौ । हे सोम, उपयामेन ग्रहेण गृहीतो भवसि । हे ग्रह, Vइन्द्राग्निभ्यां त्वां गृह्णामि । Vएषः तव स्थानम् । Vइन्द्राग्निभ्यां त्वां सादयामि ॥१॥

[इति सप्तमेऽध्याये त्रयोदशोऽनुवाकः ॥]

आ– ऐन्द्राग्रं गृह्णाति ' इन्द्राग्नी आ गतम् ' इति । विश्वामित्रः, इन्द्राग्निदेवत्या गायत्री यजुरन्ता । हे Vइन्द्राग्नी Vसुतम् अभिषुतं सोमं प्रति Vआगतम् । Vगीर्भिः त्रयीलक्षणाभिः स्तुतिरूपाभिर्वाग्भिः Vवरेण्यं वरणीयं स्तुत्यं वा । Vनभः । लुप्तोपममेतत् । भासां ज्योतिषां

---

18. S1 V1 C om. युवाम् ; P1 अस्य for असद्°
9. V1 S1 C after एषः add खरः

नेता इव । यद्वा— नभः आदित्यमिव गीर्भिर्वरणीयममिषुतं सोमं प्रति इन्द्राग्नी आगतमिति संबन्धः । ᵛधिया ᵛइषिता यजमानस्य बुद्धया इषिता इषितौ अधीषितौ प्रेषितौ इन्द्राग्नी ᵛअस्य सोमस्य ᵛपातम् । ‘ उपयामगृहीतोऽसीन्द्राग्निभ्यां त्वा ’ गृह्णामि । ‘ एष ते योनिरिन्द्राग्निभ्यां त्वा ’ सादयामि ॥१॥

[इति सप्तमेऽध्याये त्रयोदशोऽनुवाकः ॥]

[अथ चतुर्दशोऽनुवाकः]

सा— त्रयोदशेऽनुवाके ऐन्द्राग्नग्रह उक्तः । चतुर्दशे स एवोच्यते ।

आ घा॒ ये अ॒ग्निमि॑न्ध॒ते स्तृ॒णन्ति॑ ब॒र्हिरा॑नु॒षक् । येषा॒मिन्द्रो॒ युवा॒ सखा॑ ।
उ॒प॒या॒मगृ॑हीतोऽस्यग्नी॒न्द्राभ्यां॑ त्वै॒ष ते॒ योनि॑रग्नी॒न्द्राभ्यां॑ त्वा ।।१।।(१४)।।

आ । घ॒ । ये । अ॒ग्निम् । इ॒न्ध॒ते । स्तृ॒णन्ति॑ । ब॒र्हिः । आ॒नु॒षक् ।
येषा॑म् । इन्द्रः॑ । युवा॑ । सखा॑ ।
अ॒ग्नी॒न्द्राभ्या॑म् । त्वा॒ । ए॒षः । ते॒ । योनिः॑ । अ॒ग्नी॒न्द्राभ्या॑म् । त्वा॒ ॥ हौं ॥१॥(१४)॥

तत्रायं विकल्पितो मन्त्र आम्नातः– ‘ आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा । उपयामगृहीतोऽस्यग्नीन्द्राभ्यां त्वैष ते योनिरग्नीन्द्राभ्यां त्वा ’ इति । ᵛये यजमानाः ᵛअग्निम् ᵛआ ᵛइन्धते आदीपयन्ते । ᵛघ इति अनर्थको निपातः । ये च ᵛआनुषक् आनुपूर्व्येण ᵛबर्हिः ᵛस्तृणन्ति । ᵛयेषां ᵛयुवा जरामृत्युरहितः ᵛइन्द्रः ᵛसखा मित्रलक्षणो भवति । हे सोम, तेषां संबन्धिनि यज्ञे उपयामेन ग्रहेण स्वीकृतो भवसि । त्वामग्नीन्द्रदेवतार्थं गृह्णामि । ᵛएषः खरप्रदेशस्तव स्थानम् । त्वां सादयामीति शेषः ॥१॥

[इति सप्तमेऽध्याये चतुर्दशोऽनुवाकः ॥]

आ— ग्रहस्य द्वितीयो मन्त्रविकल्पः — ‘ आ घा ये ’ इति । त्रिशोकः । अग्नीन्द्रदेवत्या गायत्री यजुरन्ता । इन्धी दीप्तौ । ᵛघ इत्यनर्थको निपातः । ᵛये यज्वानः ᵛअग्निम् ᵛआ ᵛइन्धते आदीपयन्ति । ये च ᵛआनुषक् । आनुषगिति नामानुपूर्व्येण क्रमेण, ये ᵛबर्हिः ᵛस्तृणन्ति तेषां ᵛइन्द्रः ᵛयुवा अनुपहतजरामृत्युशरीरः ᵛसखा समानख्यातः । नेतरेषामयज्वनाम् । ‘ उपयामगृहीतोऽस्यग्नीन्द्राभ्यां त्वा ’ गृह्णामि । ‘ एष ते योनिरग्नीन्द्राभ्यां त्वा ’ सादयामि ॥१॥

[इति सप्तमेऽध्याये चतुर्दशोऽनुवाकः]

---

23. B1 अयज्ञानां for अयज्वनाम् ।

[अथ पञ्चदशोऽनुवाकः]

सा– चतुर्दशे ऐन्द्राग्नग्रहस्य विकल्पितो मन्त्र उक्तः । पञ्चदशे वैश्वदेवग्रह उच्यते ॥

ओमा॑सश्चर्षणीधृतो विश्वे॑ देवास॒ आ ग॑त । दा॒श्वांसो॑ दा॒शुषः॑ सुतम् ।
उ॒प॒या॒मगृ॑हीतोऽसि॒ विश्वे॑भ्यस्त्वा दे॒वेभ्यः॑
ए॒ष ते॒ योनि॒र्विश्वे॑भ्यस्त्वा दे॒वेभ्यः॑ ॥१॥(१५)॥

ओमा॑सः । च॒र्ष॒णी॒धृत॑ः । च॒र्ष॒णि॒धृत॒ इति॑ चर्षणिऽधृतः । विश्वे॑ । दे॒वा॒सः॑ । आ । ग॒त॒ ।
दा॒श्वांसः॑ । दा॒शुषः॑ । सुतम् ॥ ऋं ॥१॥(१५)॥

कात्यायनः – " वैश्वदेवं गृह्णाति । शुक्रपात्रेण द्रोणकलशादन्वारब्धे ओमास इति " (काश्रौ ९·१४·१) इति । अध्वर्युर्यजमानेन स्पृष्टेऽस्पृष्टे वा सति द्रोणकलशात् सकाशाच्छुक्रपात्रेण वैश्वदेवं सोमं गृह्णीयात् । पाठस्तु– ' ओमासश्चर्षणीधृतो विश्वे देवास आ गत । दाश्वांसो दाशुषः सुतम् । उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ' इति । हे विश्वेदेवाः, ᵛआ ᵛगत आगच्छत । कीदृशाः ? ᵛओमासः रक्षितारः ᵛचर्षणीधृतः मनुष्यपोषकाः । अनिष्टनिवारणं रक्षणम् । इष्टप्रापणं पोषणम् । ᵛसुतम् अभिषुतं सोमं ᵛदाशुषः दत्तवतो यजमानस्य ᵛदाश्वांसः फलं पूर्वं दत्तवन्तः । अन्यत् स्पष्टम् ॥१॥

[इति सप्तमेऽध्याये पञ्चदशोऽनुवाकः ॥]

आ– वैश्वदेवं गृह्णाति– ' ओमासश्चर्षणीधृतः ' इति । मधुच्छन्दा वैश्वदेवी गायत्री । हे ओमासः । अव रक्षणे । अवतेर्मन्प्रत्यये " ज्वरत्वर° " (पा ६·४·२०) आदिना धातोरूडादेशे, गुणे चासुगि कृते च, जसि, ओमास, इति भवति । हे ᵛओमासः, अवितारः तर्पयितारस्तर्पणीया वा । ᵛचर्षणीधृतः । चर्षणयो मनुष्यास्तेषां वृष्ट्यादिप्रदानेन धारयितारः । चर्षणधृत इति छान्दसः पूर्वपदस्य दीर्घः । विश्वेदेवासः । " आज्जसेरसुक् " (पा ७·१·५०) इति असुगि देवास इति । हे ᵛविश्वे ᵛदेवासः, ᵛआ ᵛगत आगच्छत । दाश्वांसः । दाशेर्लिटि, क्वसन्तस्य रूपम् । ᵛदाश्वांसः दानशीलाः देवाः । ᵛदाशुषः यागदानादिकरणशीलस्य यजमानस्य संबन्धिनं ᵛसुतम् अभिषुतं सोमं प्रति आगतेति संबन्धः । ' उपयामगृहीतोऽसि विश्वेभ्यो देवेभ्यस्त्वा ' गृह्णामीति शेषः । ' एष ते योनिर्विश्वेभ्यो देवेभ्यस्त्वा ' सादयामीति ॥१॥

[इति सप्तमेऽध्याये पञ्चदशोऽनुवाकः ॥]

---

18. V1 S1 C फलं for फल°
21. B1 हे ओमासश्चर्षणीधृतः for देवास इति

[अथ षोडशोऽनुवाकः]

सा– पञ्चदशे वैश्वदेव ग्रह उक्तः । षोडशेऽपि स एवोच्यते।

विश्वे॑ दे॒वास॒ आ ग॑त शृ॒णु॒ता म॑ इ॒मꣳ हव॑म् ।
एदं ब॒र्हिर्नि षी॑दत ।
उ॒प॒या॒मगृ॑हीतोऽसि॒ विश्वे॑भ्यस्त्वा दे॒वेभ्य॑
ए॒ष ते॒ योनि॒र्विश्वे॑भ्यस्त्वा दे॒वेभ्य॑ः ।।१।। (१६)।।

विश्वे॑ । दे॒वा॒स॒ः । आ । ग॒त॒ । शृ॒णु॒त । मे॒ । इ॒मम् । हव॑म् ।
आ । इ॒दम् । ब॒र्हिः । नि । सी॒द॒त॒ ।। षीं ।।१।।(१६)।।

तत्रायं विकल्पितो मन्त्र आम्नातः– ‘विश्वे देवास आ गत शृणुता म इमं हवम् । एदं बर्हिर्नि षीदत । उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्यः एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः’ इति । हे विश्वेदेवाः यूयम् ^{v}आगत अस्मद्यज्ञं प्रत्यागच्छत । आगत्य ^{v}मे मदीयं ^{v}इमं ^{v}हवम् आह्वानं ^{v}शृणुत । श्रुत्वा च मदीयम् ^{v}इदं ^{v}बर्हिः यज्ञे ^{v}आनिषीदत । शिष्टं स्पष्टम् ॥१॥

[इति सप्तमेऽध्याये षोडशोऽनुवाकः ॥]

आ– वैश्वदेवं गृह्णाति ‘विश्वे देवास आ गत’ इति । गृत्समदः, वैश्वदेवी गायत्री । हे ^{v}विश्वे ^{v}देवासः विश्वेदेवाः, ^{v}आगत आगच्छत । आगत्य च ^{v}मे मम ^{v}इमं ^{v}हवम् आह्वानं ^{v}शृणुत । श्रुत्वा च ‘एदं बर्हिर्नि षीदत’ । मदीयं ^{v}इदं ^{v}बर्हिः यज्ञे ^{v}आनिषीदत । ‘उपयामगृहीतोऽसि विश्वेभ्यस्त्वा’ गृह्णामि । ‘एष ते योनिर्विश्वेभ्यस्त्वा’, सादयामीति शेषः ॥१॥

[इति सप्तमेऽध्याये षोडशोऽनुवाकः ॥]

[अथ सप्तदशोऽनुवाकः]

सा– षोडशेऽनुवाके वैश्वदेवग्रहस्य वैकल्पिको मन्त्र उक्तः। एतावता प्रातःसवनग्रहाः समाप्ताः॥ अथ सप्तदशमारभ्य माध्यन्दिनसवनग्रहा उच्यन्ते । तत्र त्रयो मरुत्वतीयग्रहाः । तेषां माध्यन्दिनप्रयोगं तित्तिरिराह–“माध्यन्दिने सवने मरुत्वतीया गृह्यन्ते” (तैसं ६.५.५) इति । तेषु प्रथममाह ।

---

25. V1 S1 C एतावन्तः for एतावता
26. C S1 तत्र ये for त्रयो
27. V1 S1 C after तेषु add त्रिषु

इन्द्र॑ मरुत्व इ॒ह पा॑हि॒ सोम॒ꣳ यथा॑ शार्या॒ते अपि॑बः सु॒तस्य॑ ।
तव॒ प्रणी॑ती॒ तव॑ शूर॒ शर्म॒न्ना वि॑वासन्ति क॒वय॑ः सुय॒ज्ञाः ।
उ॒प॒या॒मगृ॑हीतो॒ऽसीन्द्रा॑य त्वा म॒रुत्व॑त
ए॒ष ते॒ यो॑नि॒रिन्द्रा॑य त्वा म॒रुत्व॑ते ।।१।।(१७)।।

इन्द्र॑ । म॒रु॒त्व॒ः । इ॒ह । पा॒हि॒ । सोम॑म् । यथा॑ । शा॒र्या॒ते । अपि॑बः । सु॒तस्य॑ ।
तव॑ । प्रणी॑ती । प्र॒नीति॒ति प्रऽनी॑ती । तव॑ । शू॒र॒ । शर्म॑न् ।
आ । वि॒वा॒स॒न्ति॒ । क॒वय॑ः । सु॒य॒ज्ञा इति॑ सु॒ऽय॒ज्ञाः ।
इन्द्रा॑य । त्वा॒ । म॒रुत्व॑ते ।
ए॒षः । ते॒ । योनि॑ः । इन्द्रा॑य । त्वा॒ । म॒रुत्व॑ते ॥ च्च्यें ॥१॥ (१७) ॥

कात्यायनः– “मरुत्वतीयमृतुपात्रेणेन्द्र मरुत्व इति” (काश्रौ १०·१·१४) इति। ऋतुपात्रेण मरुत्वतीयं गृह्णीयात् । पाठस्तु– ‘ इन्द्र मरुत्व इह पाहि सोमꣳ यथा शार्याते अपिबः सुतस्य । तव प्रणीती तव शूर शर्मन्ना विवासन्ति कवयः सुयज्ञाः । उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ’ इति । मरुतो नाम देवा अस्य सन्तीति मरुत्वान् । तस्य संबोधनं हे ᵛमरुत्वः । “ मतुवसो रुः संबुद्धौ छन्दसि ” (पा ८·३·१) इति रुत्वम् । तादृश ᵛइन्द्र, त्वम् ᵛइह अस्मदीये यज्ञे ᵛसोमं ᵛपाहि पिब । ᵛयथा ᵛशार्याते । शर्यातिर्नाम कश्चिद्राजा तस्य संबन्धिनि यज्ञे । ᵛसुतस्य अभिषुतस्य सोमस्यांशम् ᵛअपिबः पीतवानसि । तद्वद् हे ᵛशूर वीर इन्द्र, ᵛप्रणीती प्रणीत्या प्रणयेनानुज्ञया ᵛसुयज्ञाः कल्याणयज्ञाः पूर्वे ᵛकवयः ᵛतव शर्मणि सुखे निमित्तभूते सति यथा ᵛआविवासन्ति परिचरन्ति तद्वदयमपि यजमान इत्यर्थः । स्पष्टमन्यत् ॥१॥(१७)॥

[इति सप्तमेऽध्याये सप्तदशोऽनुवाकः ॥]

---

10. V1 S1 C मृत्पात्रेण for first ऋतुपात्रेण;
    V1 S1 C मृत्पात्रेण for second ऋतुपात्रेण । and om. मरुत्वतीयं
13. P1 वामदेवा अस्य संतातिः for नाम देवा अस्य सन्ति; V1संततिः for सन्तीति ।
15. P1 om. शार्याते
16. V1 S1 C om. वीर; V1 S1 C om. प्रणीती
17. V1 S1 C om. यथा; against आविवासन्ति on the margin विवासतिः परिचर्यार्थः

[अथ अष्टादशोऽनुवाकः]

सा– अष्टादशे मरुत्वतीयग्रहमाह ।

मरुत्वन्तं॑ वृषभं॑ वावृधानमकवारिं दिव्यं॑ शासमिन्द्रम् ।
विश्वासाहमवसे नूतनायोग्रं॑ सहोदामिह तं॑ हुवेम ।
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत
एष ते योनिरिन्द्राय त्वा मरुत्वते ॥१॥(१८)॥

मरुत्वन्तम् । वृषभम् । वावृधानम् । ववृधानमिति ववृधानम् ।
अकवारिमित्यकवऽअरिम् । दिव्यम् । शासम् । इन्द्रम् ।
विश्वासाहम् । विश्वसहमिति विश्वऽसहम् । अवसे । नूतनाय ।
उग्रम् । सहोदामिति सहःऽदाम् । इह । तम् । हुवेम ॥ तैं ॥१॥(१८)॥

कात्यायनः– “मरुत्वतीयग्रहणं मरुत्वन्तमिति” (काश्रौ १०·३·६) इति । मरुत्वतीयं ग्रहं गृह्णीयात् । पाठस्तु– ‘मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं॑ शासमिन्द्रम् । विश्वासाहमवसे नूतनायोऽग्रं॑ सहोदामिह तं॑ हुवेम । उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते’ इति । vइह अस्मदीये यज्ञे vतम् vइन्द्रं vहुवेम वयमाह्वयामः । कीदृशमिन्द्रम् ? vमरुत्वन्तम् मरुद्गणोपेतम् । vवृषभं जलस्य वर्षितारम् । vवावृधानं कामानां वर्धयितारम् । vअकवारिम् अकुत्सितारिम् । वृत्रादीनां शत्रूणामतिप्रबलत्वात् । vदिव्यं दिवि भवम् । vशासं दुष्टानां शासितारम् । vविश्वासाहं विश्वं पालयितुं सहिष्णुम् अनलसमित्यर्थः । vअवसे रक्षणाय । vनूतनाय vउग्रम् इदानींतनेभ्यः, यजमानं रक्षितुं तद्वैरिषूग्रमित्यर्थः । vसहोदां बलप्रदम् । शिष्टं स्पष्टम् ॥१॥

[इति सप्तमेऽध्यायेऽष्टादशोऽनुवाकः ॥]

[अथ एकोनविंशोऽनुवाकः]

सा– एकोनविंशे मरुत्वतीयमाह ।

उपयामगृहीतोऽसि मरुतामोजसे त्वा ॥१॥(१९)॥

मरुताम् । ओजसे । त्वा ॥ ई ॥१॥(१९)॥

---

2. V1 S1 C before अष्टा° add अथ
15. S1 C जल° for जलस्य; V1 S1 C om. अकवारिम् .. शासितारं (L. 16)
17. S1 C om. अवसे ... उग्रमित्यर्थ (L. 13)

कात्यायनः– "ऋतुपात्रेण मरुत्वतीयग्रहणमुपयामगृहीतोऽसि मरुतामोजस इति" (काश्रौ १०·३·३) इति । 'त्वा' इति मन्त्रशेषः । हे मरुत्वतीयग्रह, ᵛमरुताम् ᵛओजसे बलाय त्वां गृह्णामीति शेषः । शिष्टं स्पष्टम् ।

[इति सप्तमेऽध्याये एकोनविंशोऽनुवाकः ॥]

[अथ विंशोऽनुवाकः]

स्ना– विंशेऽपि स एव मरुत्वतीयग्रह उच्यते ।

स॒जोषा॑ इन्द्र॒ सग॑णो म॒रुद्भि॒ः सोमं॑ पिब वृत्र॒हा शू॑र वि॒द्वान् ।
ज॒हि शत्रूँ॒रप॒ मृधो॑ नुद॒स्वाथाभ॑यं कृणुहि वि॒श्वतो॑ नः ।
उ॒प॒या॒मगृ॑हीतो॒ऽसीन्द्रा॑य त्वा म॒रुत्व॑त
ए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा म॒रुत्व॑ते ॥१॥(२०)॥

स॒जोषा॒ इति॑ स॒ऽजोषाः॑ । इ॒न्द्र॒ । सग॑ण॒ इति॒ सऽग॑णः । म॒रुद्भि॒रिति॑ म॒रुत्ऽभिः॑ ।
सोम॑म् । पि॒ब॒ । वृ॒त्र॒हेति॑ वृ॒त्र॒ऽहा । शू॒र॒ । वि॒द्वान् ।
ज॒हि । शत्रू॑न् । अप॑ । मृधः॑ । नु॒द॒स्व॒ ।
अथ॑ । अभ॑यम् । कृ॒णु॒हि॒ । वि॒श्वतः॑ । न॒ः ॥ त्रैं ॥१॥(२०)॥

तत्रायं विकल्पितो मन्त्रः– 'सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् । जहि शत्रूँरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः । उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते' इति । हे ᵛइन्द्र, त्वं ᵛसजोषाः । सह जोषसा प्रीत्या सहितः । ᵛसगणः वस्वादिगणैरुपेतः । ᵛमरुद्भिः एकोनपञ्चाशन्मरुद्गणैः सह । एवं सपरिवारः सन् ᵛसोमं ᵛपिब । अनेन सोमपानेन हे ᵛशूर विक्रान्त इन्द्र ᵛविद्वान् सर्वं जानन् । ᵛवृत्रहा वृत्रं शत्रुं हन्तीति वृत्रहा भविष्यसि । ततः ᵛशत्रून् ᵛजहि छिन्धि, ᵛमृधः संग्रामात् ये हतावशिष्टाः शत्रवस्तान् । ᵛअपनुदस्व अस्मान् अहत्वा पलायनार्थं प्रेरयस्व प्राणदानं कुर्वित्यर्थः । ᵛअथ अनन्तरं ᵛनः अस्माकम् ᵛअभयं ᵛविश्वतः सर्वतः ᵛकृणुहि कुरु । स्पष्टमन्यत् ॥१॥

[इति सप्तमेऽध्याये विंशोऽनुवाकः ॥]

---

3. S1 C V1 om. शिष्टं स्पष्टम्
13. V1 P1 सजोषसा for सह जोषसा
18. V1 S1 C °गणोपेतः for गणैरुपेतः; V1 °पञ्चाशता for पञ्चाशन्°; P1 C S1 एव for एवं

आ– मरुत्वतीयं गृह्णाति– ‘ इन्द्र मरुत्वः ’ इति । ‘ इन्द्रः मरुत्वः ’ इत्यादयश्चतस्र ऐन्द्रीमारुत्यस्त्रिष्टुभः । ‘ मरुताम् ’ इति यजुः । विश्वामित्रार्षम् । हे ^{v}इन्द्र, हे ^{v}मरुत्वः, मरुतो नाम देवाः । ते अस्य सन्तीति मरुत्वान्, तत्संबोधनम् । “ मतुवसो रुः संबुद्धौ छन्दसि ” (पा ८.३.१) इति रुत्वम् । मरुत्व इति । मरुद्भिः सहितः । ^{v}इह अस्मदीये यज्ञे ^{v}सोमं ^{v}पाहि । कथं पाहीति ? ‘ यथा शार्याते ’ । शार्या[तो ह] वा [.......] ॥१॥(१७)॥

[....] भू [? नु] त [ना] य ^{v}अवसे । ^{v}इह यज्ञगृहे । अवनाय स्थित्यै रक्षणाय वा ^{v}हुवेम । ‘ उपयामगृहीतः ’ इत्यादि व्याख्यातम् ॥१॥(१८)॥

तृतीयं यजुषा गृह्णाति– ‘ उपयामगृहीतोऽसि मरुताम् ’ इति । ^{v}मरुताम् ^{v}ओजसे ^{v}त्वा, गृह्णामीति शेषः । ओज इति बलनाम । तस्मै ॥१॥(१९)॥

चतुर्थो मन्त्रविकल्पः– ‘ सजोषाः ’ इति । हे ^{v}इन्द्र, त्वं ^{v}सजोषाः । जुषेः रूपमेतत् । जोषसा प्रीत्या सह वर्तमान इति सजोषाः समानजोषणः । ^{v}सगणः, वस्वादिगणैः [उपेतः] सगणः । ^{v}मरुद्भिः एकोनपञ्चाशद्भिः मरुद्भिर्देवैः सह । एवं सपरिवारः त्वं ^{v}सोमं ^{v}पिब । अनेन सोमपानेन ^{v}वृत्रहा भविष्यसि । हे ^{v}शूर विक्रान्त, ^{v}विद्वान् एतमर्थं जानन्, सोमं पीत्वा मरुद्भिः सह ^{v}शत्रून् वृत्रप्रमुखान् ^{v}जहि छिन्धि । ‘ अप मृधो नुदस्व ’ । णुद प्रेरणे । ^{v}मृधः संग्रामात् अपहताः अवशिष्टाः शत्रवः, तान् ^{v}अपनुदस्व । त्वया अस्मान् अहत्वा पलायनार्थं प्रेरयस्व प्राणदानं कुर्वीत्यर्थः । ‘ अथाभयं कृणुहि विश्वतो नः ’ । ^{v}अथ अनन्तरं ^{v}नः अस्माकं ^{v}अभयं ^{v}विश्वतः सर्वतः ^{v}कृणुहि कृधि ॥१॥(२०)॥

[इति सप्तमेऽध्याये सप्तदश-अष्टादश-एकोनविंश-विंश-अनुवाकाः ॥१॥(१७-२०)॥]

[अथ एकविंशोऽनुवाकः]

सा– सप्तदशादिविंशान्तेषु अनुवाकेषु मरुत्वतीयग्रहा उक्ताः । एकविंशे माहेन्द्र-ग्रह उच्यते ।

म॒हाँ॒३ इन्द्रो॑ नृ॒वदा चर्ष॑णि॒प्रा उ॒त द्वि॒बर्हा॑ अ॒मिनः॒ सहो॑भिः ।
अ॒स्म॒द्र्य॑ग्वावृधे वी॒र्या॑यो॒रुः पृ॒थुः सुकृ॑तः क॒र्तृभि॑र्भूत् ।
उ॒प॒या॒मगृ॑हीतोऽसि म॒हेन्द्रा॑य त्वै॒ष ते॒ योनि॑र्म॒हेन्द्रा॑य त्वा ॥१॥(२१) ॥

---

6. B1 अवसानाय for अवनाय

महान् । इन्द्रः । नृवदिति नृऽवत् । आ । चर्षणिप्रा इति चर्षणिऽप्राः ।
उत । द्विबर्हा इति द्विऽबर्हाः । अमिनः । सहोभिरिति सहःऽभिः ।
अस्मद्र्यक् । वावृधे । ववृध इति ववृधे । वीर्याय ।
उरुः । पृथुः । सुकृत इति सुऽकृतः । कर्तृभिरिति कर्तृऽभिः । भूत् ।
महेन्द्रायेति महाऽइन्द्राय । त्वा ।
एषः । ते । योनिः । महेन्द्रायेति महाऽइन्द्राय । त्वा॥ व्युः॥१॥ (२१)॥

कात्यायनः – " माहेन्द्रं गृह्णाति वैश्वदेववन्महाꣳ इन्द्र इति " (काश्रौ १०·३·१०) इति । यथा वैश्वदेवग्रहः शुक्रपात्रेण गृहीतः तथा माहेन्द्रग्रहं तेनैव गृह्णीयात् । पाठस्तु– ' महाꣳ इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः । अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् । उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ' इति । अयं ˇमहान् ˇइन्द्रः ˇनृवत् मनुष्यवत् ˇआचर्षणिप्राः चर्षणयो मनुष्यास्तान् प्राति अभीष्टभोग्यैः पूरयतीति चर्षणिप्राः । यथा राजाऽमात्यादिर्मनुष्यः सेवकान् अभीष्टभोगैरापूरयति तद्वत् । ˇउत अपि च अयं द्वयोः प्रकृतिविकृतिरूपयोः सोमयागयोर्वृद्धिर्यस्येति ˇद्विबर्हाः । ˇअमिनः ˇसहोभिः बलैरमितः उपमारहितः । ˇअस्मद्र्यक् अस्मत्सदृशः ˇवावृधे वृद्धिं प्राप्तः । यथा वयमस्यानुग्रहात् वृद्धिं प्राप्तास्तथैवायमस्मदीयैर्हविर्भिर्विवृद्धः । एतदेव प्रपञ्च्यते । ˇवीर्याय सामर्थ्यसिद्धये ˇकर्तृभिः यजमानैरयं ˇसुकृतः ˇभूत् सुष्ठु वर्धितोऽभूत् । कीदृशी तस्याभिवृद्धिः ? ˇउरुः यशसा विपुलः, ˇपृथुः बलेन विस्तृतः । स्पष्टमन्यत् ॥१॥

[इति सप्तमेऽध्याये एकविंशोऽनुवाकः ॥]

आ– माहेन्द्रं गृह्णाति– ' महाꣳ३ इन्द्रः ' इति । माहेन्द्री त्रिष्टुप् यजुरन्ता । भरद्वाजः । ˇइन्द्रः परमैश्वर्ययुक्तः प्रभावतः ˇमहान् । यथा महान् तथा ˇनृवत् , यथा महान्तो मनुष्याः । यद्वा–नृवन्मनुष्यवत् । ˇआचर्षणिप्राः इति । कृतेरेतद्रूपं चर्षणिरिति । प्रा पूरणे । आहूतः सन्नागत्य चर्षणीनां मनुष्याणां हविःप्रदानादिना देवतामाकर्षतां वशीकुर्वताम् अभीष्टकामैः प्रपूरयिता चर्षणिप्राः । किं च ˇउत ˇद्विबर्हाः । बृहि वृद्धौ । द्वयोरपि स्थानयोर्मध्यमस्थाने उत्तमे च स्थाने बर्हाः बृहन् परिवृढः प्रभुः । ˇअमिनः ˇसहोभिः बलैरमितमात्राः । बहुवचनमविवक्षितम् ।

---

11. V1 S1 C after प्राति ins. तद्°; P1 om. प्राति;
C (अ) मात्यादि° for (अ) मात्यादिर्, P1 मनुष्य° for मनुष्यः
13. C उपायाएहितः, V1 S1 उपायरहितः for उपमारहितः
14. V1 S1 C विवृाद्धिः for विवृद्धः
16. P1 विपुला ... विस्तृता for विपुलः ... विस्तृतः
20. B1 कृषशेद्रादक्ष for नृवन्मनुष्यवत् आचर्षणिप्राः

अपरिमितबलः अतुलितबलः । शत्रुबलैरनुपहिंसितः । [v]अस्मद्र्यक् । अस्मान् द्रष्टुं[1] सर्वतः अञ्चतीति अस्मद्र्यक् । अस्मद्दर्शनोत्सुकः, अस्मदाभिमुखतया गन्ता अमद्र्यक् । 'महानिन्द्रो वावृधे'। [v]वावृधे वर्धताम् । किमर्थम् ? [v]वीर्याय वीरकर्मणे । य इन्द्रोऽस्मदीयैः [v]कर्तृभिः स्तूयमानः [v]उरुः प्रमाणतः, [v]पृथुः विस्तारेण । सुकृतः शोभनकृत् [v]भूत् भूयात् । 'उपयाम°' इत्यादि व्याख्यातम् ॥१॥

[इति सप्तमेऽध्याये एकविंशोऽनुवाकः ॥२१॥]

[अथ द्वाविंशोऽनुवाकः]

सा– एकविंशे माहेन्द्रग्रह उक्तः । द्वाविंशेऽनुवाके तस्यैव विकल्पितं मन्त्रान्तरमाम्नायते ॥

महाँ३ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ३ इव ।
स्तोमैर्वत्सस्य वावृधे ॥
उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥१॥(२२) ॥

महान् । इन्द्रः । यः । ओजसा ।
पर्जन्यः । वृष्टिमाँ इव । वृष्टिमानिवेति वृष्टिमान्ऽइव ।
स्तोमैः । वत्सस्य । वावृधे । ववृध इति ववृधे ॥ इपां ॥१॥(२२)॥

[वाचस्पतये तिस्रः ॥३॥ उपयामगृहीतोऽसि द्वे ॥२॥ आ वायो द्वे ॥२॥ अयं वां द्वे ॥२॥ या वामेका ॥१॥ तं प्रत्नथा चतस्रः ॥४॥ अयँ वेनः पञ्च ॥५॥ ये देवासश्चतस्रः ॥४॥ इन्द्राय त्वा द्वे ॥२॥ मूर्धानं तिस्रः ॥३॥ यस्त एका ॥१॥ मघव एका ॥१॥ इन्द्राग्नी आगतमेका ॥१॥ आ घा य एका ॥१॥ ओमासश्चर्षणीधृत एका ॥१॥ विश्वेदेवास एका ॥१॥ इन्द्रमरुत्व एका ॥१॥ मरुत्वन्तँ वृषभमेका ॥ मरुतामोजस एका ॥१॥ सजोषा इन्द्र एका ॥१॥ महाँ इन्द्र एका ॥१॥ महाँ इन्द्रेत्येका ॥१॥ द्वाविंशतिरनुवाकेषु चत्वारिंशत् ॥४०॥]

[इति शुक्लयजुर्वेदकाण्वसंहितापाठे सप्तमोऽध्यायः ॥ हरिः ॐ ॥]

पाठस्तु–[22] 'महाँ३ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ३ इव । स्तोमैर्वत्सस्य वावृधे । उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा' इति। [v]वृष्टिमान् वृष्ट्यभिमानी [v]पर्जन्यः देवः[23] [v]इव [v]यः [v]इन्द्रः [v]ओजसा बलेन [v]महान् स इन्द्रो वत्सस्थानीयस्य यजमानस्य [v]स्तोमैः स्तोत्रैः

---

1. B1 द्रविष्ठ for द्रष्टुं
22. P1 om. पाठस्तु
23. V1 S1 C इन्द्रदेवः for देवः

^{v}वावृधे वर्धताम् । हे सोम, त्वम् उपयामयतीत्युपयामो ग्रहः, तेन गृहीतो भवसि । हे ग्रह, त्वां महेन्द्रदेवतार्थं गृह्णामीति शेषः । ^{v}एषः खरप्रदेशस्तव स्थानम् । तं त्वां ^{v}महेन्द्राय, सादयामीति शेषः ॥१॥

[इति सप्तमेऽध्याये द्वाविंशोऽनुवाकः ॥२॥]

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो दद्याद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कमहीपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये काण्वसंहिताभाष्ये सप्तमोऽध्यायः ॥७॥

आ– समर्थः द्वितीयो मन्त्रविकल्पः ‘ महाऽ३ इन्द्रः ’ इति । माहेन्द्री गायत्री भरद्वाजः । ^{v}यः ^{v}ओजसा बलेन ^{v}महान् ^{v}इन्द्रः ^{v}पर्जन्यः ^{v}वृष्टिमान् ^{v}इव । यथा वृष्टिमान् वृष्ट्यभिमानी देवः पर्जन्यः वर्षधाराभिरपरिच्छिन्नसंख्यः वृष्ट्युत्सर्गकारणशक्तीनामसंख्यावत्त्वेन तथाऽयमप्योजसा असंख्या[त]महाभाग्यत्वेन ^{v}स्तोमैः स्तुतिभिः स्तूयमानः ^{v}वत्सस्य वसनशीलस्य यजमानस्य यज्ञः ^{v}वावृधे वर्धताम् । अतस्त्वं सोम, ^{v}उपयामगृहीतः ^{v}असि । ^{v}महेन्द्राय महेन्द्रार्थं त्वां गृह्णामीति शेषः । ‘ एष ते योनिर्महेन्द्राय त्वा ’, सादयामीति ॥१॥

इति श्रीमत्परमहंसपरिव्राजकार्य-वासुदेवपुरीपूज्यपाद-परमकारुण्यासादित-श्रीकृष्णभक्ति-साम्राज्य-श्रीजातवेद-भट्टोपाध्यायस्य सूनुना चतुर्वेदि-श्रीमदानन्दबोध-भट्टोपाध्यायेन विरचिते काण्ववेदमन्त्रभाष्यसंग्रहे सप्तमोऽध्यायः ॥

—–—

---

2. V1 S1 C om. तं
9. B1 भारद्वाजः for भरद्वाजः
11. B1 देवताः for देवः

अष्टमोऽध्यायः ।।

[अथ प्रथमोऽनुवाकः]

सा– यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥१॥

सप्तमेऽध्याये उपांशुग्रहादिसवनद्वयगतमन्त्रा उक्ताः । अष्टमेऽध्याये तृतीयसवनादित्यग्रहादिमन्त्रा उच्यन्ते–

क॒दा च॒न स्त॒रीर॑सि॒ नेन्द्र॑ सश्चसि दा॒शुषे॑ ।
उपो॒॑पेन्नु म॑घव॒न् भूय॒ इन्नु ते॒ दानं᳚ दे॒वस्य॑ पृच्यत
आदि॒त्येभ्य॑स्त्वा ॥१॥

क॒दा । च॒न° ॥क॥
आ॒दि॒त्येभ्य॑ः । त्वा॒ ॥ शि ॥१॥

सा– कात्यायनः– “आदित्यग्रहं गृह्णाति संस्रवेभ्यः कदा चनेति” (काश्रौ १०·४·४) इति । गृहीतहोमशेषाः संस्रवाः । तेभ्यः सकाशादादित्यग्रहं गृह्णीयात् । पाठस्तु– ‘कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे । उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यत आदित्येभ्यस्त्वा’ इति । हे ᵛइन्द्र, त्वं ᵛकदा ᵛचन कदाचिदपि ᵛन ᵛस्तरीः [ᵛअसि] हिंसको न भवसि । किं तु ᵛदाशुषे । षष्ठ्यर्थे चतुर्थी । हविर्दत्तवतो यजमानस्य हवींषि ᵛसश्चसि सेवसे । कुत्र ? ᵛउपोप ᵛइत् ᵛनु यजमानस्यात्यन्तसमीप एव । हे ᵛमघवन् धनवन् इन्द्र, ᵛभूयः ᵛइत् ᵛनु पुनरेव च ᵛदेवस्य [ते] तव ᵛदानं देयं हविः ᵛपृच्यते संबध्यते । पृची संपर्के । यजमानेन हविर्दीयत इत्यर्थः । हे ग्रह, ᵛआदित्येभ्यः देवेभ्यस्त्वां गृह्णामीति शेषः । अत्रेन्द्रनामभिरप्यादित्य एव स्तूयते ॥१॥

आ– आदित्यग्रहं गृह्णाति– ‘कदा चन स्तरीरासि’, ‘कदा चन प्रयुच्छासि’ इति द्वे आदित्यदेवत्ये बृहत्यौ पथ्या वा । “पथ्या पञ्चभिरष्टाक्षरैः” (द्र. पिंसू ३·४८) इति । अष्टाक्षरैः पञ्चपादैः पथ्या नाम छन्दो भवति । पथ्येति केचित् । अत्राग्निष्टोमिका मन्त्रा अवभृथपर्यन्ताः । एतेषां प्रजापतेरार्षमित्यभिहितं पुरस्तात् । हे ᵛइन्द्र, आदित्यस्यापीन्द्रत्वमैश्वर्ययोगात्, आदित्य,

---

3. C S1 सप्तमा° for सप्तमे°; P1 V1 om. अध्याये; C S1अष्टमा° for अष्टमे°
12. V1 C S1 आदित्यं for आदित्य°
13. P1 after पाठस्तु ins. अध्यायस्य प्रजापतिर्ऋषिः । आदित्यदेवत्या बृहती पथ्या च ।
16. P1 after उपोप इत् नु ins. प्रसमुपोदः पादपूरण इति द्विर्भावः ।
17. V1 S1 C तदव for ते तव; V1 S1 C om. पृची संपर्के
21. B1 °देवत्यौ बृहत्यौ बृहत्यौ इवामिव पथ्या वाः for °देवत्ये बृहत्यौ । पथ्या वा ।

^{v}भूयः याच्यमानस्त्वं ^{v}कदा ^{v}चन कदाचिदपि ^{v}न ^{v}स्तरीः ^{v}असि, स्तृणातिर्हिंसार्थः, तस्यैतद्रूपं स्तरीः इति, न कुप्यसि । अथवा स्तृञाच्छादने । "अवितृस्तृतन्त्रिभ्य ईः" (उ ४४६) इतीप्रत्यये गुणे च स्तरीः इति भवति । कदा चन कदाचिदपि धनानामाच्छादकः स्तरीः नासि । ^{v}सश्चसि ^{v}दाशुषे । सश्चतिः सेवाकर्मा । सेवसे । दाशुषे हवींषि दत्तानि [दत्तवते ?], हवींषि वा सेवसे । 'उपोपेन्नु मघवन् भूय इन्नु' । उपशब्दः पादपूरणः । इत्शब्द एवार्थः । नुशब्दः क्षिप्रवचनः । भूयःशब्दः बहुतरवचनः । "प्रसमुपोदः पादपूरणे" (पा ८·१·६) इत्युपशब्दस्य द्विर्वचनम् । हे ^{v}मघवन्, मघवान् धनसंपन्नः । ^{v}देवस्य दानादिगुणयुक्तस्य ^{v}ते तव संबन्धि ^{v}दानं क्षिप्रमेव बहु, तं दाश्वांसं मामेव ^{v}उपपृच्यते संततं मामेवोपसंबध्यते । ^{v}आदित्येभ्यः [अदितिरखण्डितशक्तिस्तस्याः पुत्रा आदित्याः], तेभ्यो देवेभ्योऽर्थाय त्वां सोमग्रहं गृह्णामीति शेषः । इन्द्रनामभिरादित्य एव स्तूयते ॥१॥

क॒दा च॒न प्र युच्छस्यु॒भे नि पा॑सि॒ जन्म॑नी ।
तुरीयादित्य॒ सव॑नं त इन्द्रि॒यमात॑स्था अ॒मृतं॑ दि॒व्या॑दि॒त्येभ्य॑स्त्वा ॥२॥

क॒दा । च॒न । प्र । यु॒च्छ॒सि॒ । उ॒भे इत्यु॒भे । नि । पा॒सि॒ । जन्म॑नी॒ इति॒ जन्म॑नी ।
तुरी॑य । आ॒दि॒त्य॒ । सव॑नम् । ते॒ । इ॒न्द्रि॒यम् । आ । त॒स्थौ॒ । अ॒मृत॑म् । दि॒वि ।
आ॒दि॒त्येभ्य॑: । त्वा॒ ॥ छौं ॥२॥

कात्यायनः– "पुनः कदा चनेति" (काश्रौ १०·४·५) इति । गृह्णीयादिति शेषः । पाठस्तु– 'कदा चन प्र युच्छस्युभे नि पासि जन्मनी । तुरीयादित्य सवनं त इन्द्रियमातस्था अमृतं दिव्यादित्येभ्यस्त्वा' इति । प्रशब्दो निषेधार्थः । युच्छिधातुः प्रमादार्थः । हे इन्द्र, त्वं कदाचिदपि न प्रमाद्यसि । किंतु वर्तमानं भावि चेति ^{v}उभे यजमानस्य ^{v}जन्मनी ^{v}नि ^{v}पासि नितरां पालयसि । तृतीयमित्यस्मिन्नर्थे

---

1. B1 स्तृणाते for स्तृणातिर्
2. B1 सवितृस्तृइण् तृभ्य इरिति प्रत्यये for अवितृ ... प्रत्यये [L 3]
3. B1 धननाम । छान्दकस्तरीर्नास्ति for धना ... नासि [L 4]
5. B1 इभ्यः शब्दो for इत्शब्दः
7. B1 मघवद्धन° for मघवान् धन°
8. B1 °संगताम् for °संबध्यते
9. B1 अवदतखण्डितशक्ते उरू for अदिति ... आदित्याः
16. P1 after पाठस्तु ins. पूर्ववत्
17. P1 V1 तुर्या° for तुरीया°
18. V1 S1 C नशब्दो for प्रशब्दो; P1 after निषेधार्थः ins. यद्वा काक्वा व्याख्येयः
19. C S1 om. अर्थे;

वर्णव्यत्ययेन तुरीयशब्दः प्रयुक्तः । हे ᵛआदित्य, यत् तृतीयं ᵛसवनं ᵛते त्वदीयं, तस्मिन् सवने इन्द्रियाभिवृद्धिकारणम् अमृतसमानं हविः ᵛदिवि द्युलोकसमाने ᵛआ ᵛतस्थौ आभिमुख्येन स्थितम् । स्पष्टमन्यत् ।।२॥

आ– द्वितीयं गृह्णाति– ‘ कदा चन प्रयुच्छसि ’ इति । कदाशब्दः कालवचनः । ᵛचन इति निपातोऽत्र पुनरर्थे । युच्छातिः प्रमादार्थः । प्रशब्दोऽत्रधात्वर्थनिवृत्तिमाचष्टे । हे श्रीभगवन् ᵛआदित्य, कस्मिन्नहनि त्वं पुनः ᵛप्रयुच्छसि पुनः पुनः प्रमाद्यसि ? उदयतापपाकप्रकाशादिकार्यं प्रति न कस्यांचिदवस्थायां प्रमादं करोषीत्यर्थः । किं च-- ‘ उभे नि पासि जन्मनी ’ । ᵛउभे ᵛजन्मनी देवमनुष्यसंबन्धिनी । यद्वा– अवित्र (अदितिपुत्र ?) याज्ञिकजन्मनी वर्तमानभविष्यज्जन्मनी वा, नितरां ᵛपासि नियमेन पासि । आदित्यग्रहमेव चतुर्थसवनत्वेन निरूपयन्नामन्त्रयते– ‘ तुरीय ’ इति । ᵛतुरीय चतुर्थसवनात्मक हे ᵛआदित्य, ᵛसवनं ᵛते तव त्वदीयं सवनम् ᵛइन्द्रियम् इन्द्रस्य परमैश्वर्यसंपन्नस्य प्रियं वीर्यवत्त्वं तदेतत् तवैव ᵛआतस्थौ आस्थितं, तथापि ᵛअमृतम् अनश्वरं विज्ञानानन्दलक्षणं, ᵛदिवि द्युलोके आदित्यमण्डलान्तरे स्थितम् । तदुक्तम्-- “ पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ” (ऋसं १०·८·३) इति श्रुतेः । एवं परापररूपेण अस्यामृच्यादित्यः स्तूयते ॥२॥

य॒ज्ञो दे॒वानां॒ प्रत्ये॑ति सु॒म्नमादि॑त्यासो॒ भव॑ता मृळ॒यन्त॑ः ।
आ वो॒ऽर्वाची॑ सु॒म॒तिर्व॑वृत्याद॒ꣳहो॒श्चिद्या व॑रिवो॒वित्त॒राऽस॑दादि॒त्येभ्य॑स्त्वा ।
विव॑स्वाꣳ३ आदित्यै॒ष ते॑ सोमपी॒थस्तस्मि॑न् मत्स्व ।।३।।(१)।।

य॒ज्ञः । दे॒वाना॑म् । प्रति॑ । ए॒ति॒ । सु॒म्नम् । आदि॑त्यासः । भव॑त । मृ॒ळ॒यन्त॑ः ।
आ । व॒ः । अ॒र्वाची॑ । सु॒म॒तिरिति॑ सु॒ऽम॒तिः । व॒वृ॒त्या॒त् ।
अ॒ꣳहोः । चि॒त् । या । व॒रि॒वो॒वित्त॒रेति॑ व॒रि॒वो॒वित्ऽत॑रा । अस॑त् ।
आ॒दि॒त्येभ्य॑ः । त्वा॒ । विव॑स्वान् । आ॒दि॒त्य॒ ।
ए॒षः । ते॒ । सो॒म॒पी॒थ इति॑ सो॒म॒ऽपी॒थः । तस्मि॑न् । म॒त्स्व॒ ॥ ढ्लैः ॥३॥(१)॥

---

1. P1 तुर्य° for तुरीय° P1 after प्रयुक्तः । ins. तुर्येत्येनल्लुप्तसप्तम्येकमाविभाक्तिकम् । आद्युदात्तत्वादिति द्रष्टव्यम् ।
2. P1 om. दिवि
7. B1 after प्रमादं adds न
9. B1 चतुर्थसमत्वेन for चतुर्थसवनत्वेन

सा– कात्यायनः– “ दध्ना श्रीणात्येनं यज्ञो देवानामिति ” (काश्रौ १०·४·५) इति। एनमादित्यग्रहं दध्ना मिश्रीकुर्यात्। पाठस्तु– ‘ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयन्तः। आ वोऽर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तराऽसदादित्येभ्यस्त्वा ’ इति। यस्मात् ^{v}यज्ञः ^{v}देवानाम् आदित्यानां युष्माकं ^{v}सुम्नं सुखं कर्तुं ^{v}प्रत्येति, तस्मात् ^{v}आदित्यासः आदित्या यूयं ^{v}मृळयन्तः अस्माकं सुखयितारः ^{v}भवत। ^{v}वः युष्माकं ^{v}या ^{v}सुमतिः शोभना बुद्धिः भक्तानुग्रहपरा, सा ^{v}अर्वाची अस्मदभिमुखी ^{v}आववृत्यात् आवर्तताम्। पुनरपि सैव विशेष्यते-^{v}अꣳहोः हननशीलस्य पापिनोऽपि, ^{v}चित् चेत् या सुमतिः, वरिवो धनं तद्वेत्तीति, तत्रातिशयेन नेत्री लब्धी वा ^{v}वरिवोवित्तरा ^{v}असत् भवेत्, सा सुमतिरस्मदभिमुखी सती आववृत्यादिति संबन्धः। हे सोम, त्वाम् ^{v}आदित्येभ्यः देवेभ्यो दध्ना मिश्रयामीति शेषः॥

कात्यायनः– “ उपांशुसवनेनैनं मिश्रयति विवस्वाꣳ३ आदित्येति ” (काश्रौ १०·४·६) इति। उपांशुग्रहार्थं येन पाषाणेन सोमोऽभिषूयते– तादृशेन पाषाणेन एनं ग्रहं मिश्रीकुर्यात्। पाठस्तु– ‘ विवस्वाꣳ३ आदित्यैष ते सोमपीथस्तस्मिन् मत्स्व ’ इति। हे ^{v}आदित्य, त्वम् तमांसि विवासयतीति ^{v}विवस्वान् विशिष्टधनवान् वा असि। ^{v}एष पात्रस्थः ^{v}ते तव ^{v}सोमपीथः पातव्यः सोमः, ^{v}तस्मिन् ^{v}मत्स्व तृप्तिं कुरु ।।३।।

[इत्यष्टमेऽध्याये प्रथमोऽनुवाकः ॥१॥]

आ– दध्ना श्रीणाति– ‘ यज्ञो देवानाम् ’ इति। आदित्यदेवत्या त्रिष्टुप्। कुत्सः। ‘ आदित्येभ्यस्त्वा ’ इति यजुः। यस्मात् [^{v}यज्ञः] ^{v}देवानां ^{v}सुम्नं सुखं कर्तुं ^{v}प्रत्येति तस्माद्धेतोः हे ^{v}आदित्यासः आदित्याः। मृड सुखने। ^{v}मृडयन्तः मृडयितारः अस्माकं सुखयितारः ^{v}भवत। तिपश्छान्दसो दीर्घः। ‘ आ वोऽर्वाची सुमतिर्ववृत्यात् ’। ^{v}वः युष्माकं ^{v}या ^{v}सुमतिः शोभना भक्तानुग्रहपरा [बुद्धिः] ^{v}अर्वाची अर्वागञ्चनशीला अस्मदभिमुखी ^{v}आववृत्यात् आवर्तताम्। पुनरपि मतिर्विशेष्यते–‘ अꣳहोश्चिद्या वरिवोवित्तराऽसत् ’। ^{v}अꣳहोः अंहनशीलस्य पापिनोऽपि या सुमतिः। ^{v}वरिवोवित्तरा वरिवो धनं तद्वेत्तीति तत्रातिशयेत वेत्री लब्ध्री वा वरिवोवित्तरा ^{v}असत् अभवत्। अस्मदभिमुखी सती आववृत्यात् इति संबन्धः॥

---

2. V1 S1 C एतम् for एनम्; V1 S1 C मिश्रितं for मिश्री°
3. V1 S1 C om. यस्मात्
4. V1 S1 C om. युष्माकं and तस्मात्, P1 after मृळयन्तः ins. मृड सुखने;
   P1 C V1 S1 मृडयन्तः for मृळयन्तः
9. V1 S1 C om. एनम्
11. P1 om. विशिष्ट°
12. V1 S1 C om. असि, P1 after मत्स्व ins. मद तृप्तौ
15. B1 क्रतुं यज्ञं for कर्तुं
17. B1 भवथ for भवत; B1 स्यात for तिपः
19. B1 आवर्तेताम् (आवर्तताम्)

उपांशुसवनेन ग्रहं मिश्रयति– 'विवस्वा३३ आदित्य' इति । लिङ्गोक्तदैवत्यं यजुः । तमांसि विवासयतीति ᵛविवस्वान्, विशिष्टं वसु धनम् [अस्येति विवस्वान्] धनवान् वा । हे ᵛआदित्य, ᵛएषः ᵛते तव ᵛसोमपीथः सोमपानम् । ᵛतस्मिन् सोमपाने ᵛमत्स्व । मद तृप्तौ । तृप्तिं कुरु ॥३॥

[इत्यष्टमेऽध्याये प्रथमोऽनुवाकः ॥१॥]

[अथ द्वितीयोऽनुवाकः]

प्रथमेऽनुवाके आदित्यग्रह उक्तः । द्वितीये सोमविशेषावेक्षणमुच्यते ।

श्रद॑स्मै नरो॒ वच॑से दधातन॒ यदा॑शी॒र्दा दम्प॑ती वा॒मम॑श्नु॒तः ।
पुमा॑न् पु॒त्रो जा॑यते वि॒न्दते॒ वस्वधा॑ वि॒श्वाहा॑ऽर॒प ए॑धते गृ॒हे ।।१।।(२)।।

श्रत् । अ॒स्मै॒ । न॒रः॒ । वच॑से । द॒धा॒त॒न॒ ।
यत् । आ॒शी॒र्देत्या॑शी॒ःऽदा । दम्प॑ती॒ इ॒ति॒ दमऽप॑ती । वा॒मम् । अ॒श्नु॒तः ।
पुमा॑न् । पु॒त्रः । जा॒य॒ते॒ । वि॒न्दते॑ । वसु॑ ।
अध॑ । वि॒श्वाहा॑ । अ॒र॒पः । ए॒ध॒ते॒ । गृ॒हे ॥ ञ्यः ॥१॥(२)॥

कात्यायनः – "श्रदस्मै नर इत्येनमवेक्षते पत्नी" (काश्रौ १०·५·४) इति । पत्नी एतं सोमविशेषं पश्येत् । पाठस्तु– 'श्रदस्मै नरो वचसे दधातन यदाशीर्दा दम्पती वाममश्नुतः । पुमान् पुत्रो जायते विन्दते वस्वधा विश्वाहाऽरप एधते गृहे' इति । हे ᵛनरः नेतारः ऋत्विग्यजमानाः, ᵛयत् ये यूयम् ᵛआशीर्दा । सुब्लोपश्छान्दसः । आशिषां दातारः । ते यूयम् ᵛअस्मै ᵛवचसे आशीर्वचनाय ᵛश्रत् ᵛदधातन श्रद्धां कुरुत आस्तिक्यबुद्धिं कुरुतेत्यर्थः । ᵛदम्पती पतिपत्न्यौ पत्नीयजमानौ ᵛवामं वननीयं संभजनीयं यज्ञफलम् ᵛअश्नुतः प्राप्नुतः । किं च इहैव ᵛपुमान् पुंस्त्वधर्मसंपन्नः ᵛपुत्रः ᵛजायते । ᵛवसु धनं ᵛविन्दते लभते । ᵛअध अनन्तरं ᵛविश्वाहा सर्वदा ᵛअरपः पापरहितः सन् ᵛगृहे ᵛएधते वर्धते ॥१॥

[इत्यष्टमेऽध्याये द्वितीयोऽनुवाकः ॥]

---

15. P1 after °विशेषं ins. आशिरामित्यर्थः
16. C1 °यजमानपतयो for यत् ये
17. C V1 S1 आशिषो for आशिषां
18. V1 S1 C वननीयसंबन्धि भजनीयं for वननीयं संभजनीयं
20. P1 after अघ ins; अघशब्द अथेत्यर्थवाचकः; P1 after अरपः ins. रपोरिप्रमिति पांपनामनी.

आ– अवेक्षयति पत्नी – ‘ श्रदस्मै नरः ’ इति। आशीर्देवत्या जगती यजमानपत्नीविषया। श्रदिति सत्यनामसु पठितम्। श्रद्दधातनेत्यत्र नकारोऽनर्थकः। हे ^{v}नरः ऋत्विग्यजमानाः, ^{v}यत् ये ^{v}आशीर्दा। सुलोपश्छान्दसः। आशीर्दा आशिषो दातारः। ते यूयम् ^{v}अस्मै ^{v}वचसे आशीर्वचनाय ^{v}श्रद् ^{v}दधातन श्रद्धां कुरुत (सत्य)बुद्धिम् आस्तिक्यबुद्धिं कुरुत। ^{v}दम्पती पतिपत्न्यौ पत्नीयजमानौ ^{v}वामं वननीयम् ^{v}अश्नुतः यज्ञफलं प्राप्नुतः। किं च इहैव ^{v}पुमान् ^{v}पुत्रः ^{v}जायते पुंस्त्वधर्मसंपन्नः पुत्रो जायताम्। किं च ^{v}विन्दते ^{v}वसु धनं लभते। अध अथेत्येतौ छन्दसि समानार्थौ। अध अनन्तरं ^{v}विश्वाहा सर्वदा। ^{v}अरपः, रपो रिप्रमिति पापनाम, पापरहितः। रपोऽस्य न विद्यते इत्ययम् अरपः अपापः सन् ^{v}गृहे एवावास्थितः ^{v}एधते वर्धते ॥१॥

[इत्यष्टमेऽध्याये द्वितीयोऽनुवाकः ॥]

——

[अथ तृतीयोऽनुवाकः]

द्वितीये सोमविशेषावेक्षणमुक्तम्। तृतीये सावित्रग्रह उच्यते।

वा॒मम॒द्य स॑वितर्वा॒ममु॒ श्वो दि॒वेदि॑वे वा॒मम॒स्मभ्य॑ँ सावीः ।
वा॒मस्य॒ हि क्षय॑स्य देव॒ भूरे॑र॒या धि॒या वा॑म॒भाज॑ः स्याम ॥१॥(३)॥

वा॒मम् । अ॒द्य । स॒वि॒त॒ः । वा॒मम् । ऊ॒ँ इत्यूँ॑म् । श्वः ।
दि॒वेदि॑व॒ इति॑ दि॒वेऽदि॑वे । वा॒मम् । अ॒स्मभ्य॑म् । सा॒वी॒ः ।
वा॒मस्य॑ । हि । क्षय॑स्य । दे॒व॒ । भूरे॑ः ।
अ॒या । धि॒या । वा॒म॒भा॒ज॒ इति॑ वा॒म॒ऽभाज॑ः । स्या॒म॒ ॥णौं॥ १॥(३)॥

कात्यायनः– “ उपांश्वन्तर्यामपात्रयोरन्यतरेण सावित्रग्रहणं वाममद्येति ” (काश्रौ १०.५.१३) इति। उपांशुग्रहान्तर्यामग्रहयोरेकतरेण सावित्रग्रहणं गृह्णीयात्। पाठस्तु– ‘ वाममद्य सवितर्वाममु श्वो दिवेदिवे वामस्मभ्यँ सावीः। वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ’ इति। हे ^{v}सवितः सर्वस्य प्रेरयितर्देव, ^{v}अद्य अस्मिन् दिने ^{v}अस्मभ्यं ^{v}वामं वननीयं कर्मफलं ^{v}सावीः प्रेरय, देहीत्यर्थः। ^{v}श्वः अपि समनन्तरदिने ^{v}वामं सावीः। ^{v}दिवेदिवे तत ऊर्ध्वं दिने दिने ^{v}वामं सावीः। ^{v}हि यस्मात् कारणात् हे ^{v}देव, ^{v}वामस्य वननीयस्य ^{v}भूरेः विस्तीर्णस्य ^{v}क्षयस्य स्वर्गनिवासस्य सिद्धये ^{v}अया अनया ^{v}धिया श्रद्धायुक्तया बुद्ध्या ^{v}वामभाजः ^{v}स्याम वननीयकर्मानुष्ठायिनो भवेम। तस्मादस्मभ्यं वननीयं कर्मफलं प्रेरयेति संबन्धः ॥१॥

[इत्यष्टमेऽध्याये तृतीयोऽनुवाकः]

---

23. V1 S1 C °निवास° for °निवासस्य
25. V1 S1 C प्रेरयति for प्रेरय

आ– सावित्रग्रहं गृह्णाति– ‘वाममद्य’ इति । भा[भ ?]रद्वाजो बार्हस्पत्यः । सवितृदेवत्याऽनुष्टुप् । हे ^{v}सवितः, ^{v}अस्मभ्यं ^{v}वामं ^{v}सावीः इति संबन्धः । ^{v}अद्य अस्मिन्नहनि वामं वननीयं मङ्गलम् अस्यभ्यं सावीः । षू प्रेरणे । प्रेरय । उकारस्य समुच्चयो वाऽर्थः, अवधारणं वा । ^{v}श्वः श्वोऽपि समनन्तरदिनेऽपि वामम् ^{v}एव सावीः ।

किं वा बहुनोक्तेन । ^{v}दिवेदिवे अहन्यहनि अस्मभ्यं ^{v}वामं सावीः । हे ^{v}देव देवनादिगुणयुक्त, ^{v}हि यस्मात् त्वमेवंगुणयुक्तः तस्मात् ^{v}वामस्य ^{v}क्षयस्य निवासस्य ^{v}भूरेः महतः अनल्पस्य धनपूर्णस्य वामस्य मङ्गलयुक्तस्य निवासस्य त्वं दाता भवेति शेषः ॥

^{v}अया ^{v}धिया अनया धिया । धीरिति कर्मनाम । धिया अनेन कर्मणा सोमाख्येन कर्मणा ^{v}वामभाजः ^{v}स्याम । अथवा अया धिया अनया बुद्धया सोमप्राप्तिकारणभूतया युष्मद्दत्तया वामभाजः मङ्गलफलभागिनः, स्यामेति संबन्धः ॥१॥

[इत्यष्टमेऽध्याये तृतीयोऽनुवाकः ॥३॥]

[अथ चतुर्थोऽनुवाकः]

तृतीयेऽनुवाके सावित्रग्रह उक्तः । चतुर्थेऽनुवाके तस्यैव विकल्पितो मन्त्र आम्नायते ।

उ॒प॒या॒मगृ॑हीतोऽसि
सावि॒त्रो॑ऽसि चनो॒धाश्चनो॒ मयि॑ धेहि ।
जिन्व॑ य॒ज्ञं जिन्व॑ य॒ज्ञप॑तिं॒ भगा॑य सवि॒त्रे त्वा॑ ।।१।।(४)।।

सा॒वि॒त्रः । अ॒सि॒ । च॒नो॒धा इति॑ च॒नः॒ऽधाः । चनः॑ । मयि॑ । धे॒हि॒ ।
जिन्व॑ । य॒ज्ञम् । जिन्व॑ । य॒ज्ञप॑ति॒मिति॑ य॒ज्ञऽप॑तिम् । भगा॑य । स॒वि॒त्रे । त्वा॒ ॥ झिं ॥१॥(४)॥

सा– ‘उपयागृहीतोऽसि सावित्रोऽसि चनोधाश्चनो मयि धेहि । जिन्व यज्ञं जिन्व यज्ञपतिं भगाय सवित्रे त्वा’ इति । हे सोम, त्वम् उपयामेन ग्रहेण गृहीतो भवसि । हे ग्रह, त्वं ^{v}सावित्रः ^{v}असि सवितृदेवत्योऽसि । ^{v}चन इत्यन्ननाम । चनः अन्नं धत्त इति ^{v}चनोधाः अन्नस्य धारयिता भवसि । ^{v}चनः ^{v}मयि ^{v}धेहि स्थापय । ^{v}यज्ञं ^{v}जिन्व प्रीणय । ^{v}यज्ञपतिं यजमानं तर्पय । ^{v}भगाय ऐश्वर्यादिगुणयुक्ताय । “ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीर्यते” (विपु ६.५.७४) इति । तादृशाय ^{v}सवित्रे सर्वप्राणिनां देवाय त्वां गृह्णामीति शेषः ॥१॥

[इत्यष्टमेऽध्याये चतुर्थोऽनुवाकः ॥]

1–11 [B1 commentary of Ānandabodha on third anuvāka is missing]
21. V1 S1 C om. चन इत्यन्ननाम

आ– सावित्रं गृह्णाति– ‘ उपायामगृहीतोऽसि सावित्रोऽसि ’ इति । सवितृदेवत्या बृहती । ᵛसावित्रः ᵛअसि सवितृदेवत्योऽसि । ᵛचनोधाः । चन इति अन्ननाम । चनं धत्त इति चनोधाः अन्नस्य धारयिता असि । अत अव ᵛचनः अन्नं ᵛमयि ᵛधेहि स्थापय । ᵛजिन्व ᵛयज्ञम् । जिन्वतिः प्रीतिकर्मा । यज्ञं तर्पय । ᵛयज्ञपतिं यजमानं तर्पय । ᵛभगाय । “ ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ” (विपु ६.५.६४) इति । ऐश्वर्यादिरूपाय ᵛभगाय ᵛसवित्रे सर्वप्राणिनां प्रसवादिकर्त्रे देवाय सवित्रर्थं त्वां गृह्णामीति शेषः ॥१॥

[इत्यष्टमेऽध्याये चतुर्थोऽनुवाकः ॥४॥]

[अथ पञ्चमोऽनुवाकः]

सा– चतुर्थेऽनुवाके सावित्रग्रहस्य वैकल्पिको मन्त्र उक्तः । पञ्चमे वैश्वदेवग्रह उच्यते ।

उ॒प॒या॒मगृ॑हीतोऽसि
सु॒शर्मा॑ऽसि सुप्रतिष्ठा॒नो बृ॒हदु॑क्षाय॒ नम॑ः ।
विश्वे॑भ्यस्त्वा दे॒वेभ्य॑ ए॒ष ते॒ योनि॒र्विश्वे॑भ्यस्त्वा दे॒वेभ्य॑ः ।।१।।(५)।।

सु॒शर्मेति॑ सु॒ऽशर्मा॑ । अ॒सि॒ । सु॒प्र॒ति॒ष्ठा॒नः । सु॒प्र॑ति॒स्था॒न इति॑ सु॒ऽप्र॒ति॒स्था॒नः ।
बृ॒हदु॒क्षा॒येति॑ बृ॒हत्ऽउ॑क्षाय । नम॑ः ॥ डे ॥१॥ (५) ॥

कात्यायनः– “ महावैश्वदेवग्रहणमुपयामगृहीतोऽसि सुशर्माऽसीति ” (काश्रौ १०.६.२) इति । वैश्वदेवग्रहं गृह्णीयात् । पाठस्तु–‘ उपयामगृहीतोऽसि सुशर्माऽसि सुप्रतिष्ठानो बृहदुक्षाय नमः । विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ’ इति । हे वैश्वदेवग्रह, त्वं 'सुशर्मा 'असि शोभनं शर्म सुखं यस्य तादृशो भवसि । सुष्ठु प्रतिष्ठानं पात्रे स्थितिर्यस्य तादृशोऽसि । बृहदुक्षाय । बृहन्महांश्चासा उक्षा सेक्ता चेति बृहदुक्षः । “ प्रजापतिर्वै बृहदुक्षः ” (शब्रा ४.४.१.१४) इति श्रुतेः । तादृशाय सर्वजगदुत्पादयित्रे विश्वदेवात्मकाय प्रजापतये । 'नमः इत्यन्ननाम । सोमाख्यमन्नं गृह्णामीत्यर्थः । स्पष्टमन्यत् ॥१॥

[इत्यष्टमेऽध्याये पञ्चमोऽनुवाकः ॥]

आ– वैश्वदेवं गृह्णाति– ‘ उपयामगृहीतोऽसि सुशर्माऽसि ’ इति । वैश्वदेवी त्रिष्टुप् । ᵛसुशर्मा [शोभनं शर्म] शरणमाश्रयो [वा यस्य स सु] शर्मा ᵛअसि । ᵛसुप्रतिष्ठानः

---

20. V1 S1 C om. सर्वे°

[शोभनं प्रतिष्ठानं] यस्य सः ᵛसुप्रतिष्ठानः, प्रतिष्ठाहेतुस्त्वमसि। “प्राणो वै सुशर्मा सुप्रतिष्ठानः” (शब्रा ४·४·१·१४) इति श्रुतेः। प्राणहेतुत्वात् प्राणः। अन्नं च प्राणहेतुः। ᵛबृहदुक्षाय ᵛनमः। उक्ष सेचने। बृहंश्चासावुक्षा चेति बृहदुक्षः, तस्मै बृहदुक्षाय सेक्त्रे वृष्टेरुत्पादयित्रे जगदुत्पत्त्यादिकर्त्रे वा। ᵛनमः इत्यन्ननाम। सोमाख्यमिदमन्नं बृहदुक्षार्थम्। विश्वेदेवात्मक-प्रजापतिरूपबृहदुक्षार्थं गृह्णामीत्यर्थः। “प्रजापतिर्वै बृहदुक्षः” (शब्रा ४·४·१·१४) इति श्रुतेः। यस्मादेवं तस्मात् ᵛउपयामगृहीतः ᵛअसि ᵛविश्वेभ्यः ᵛदेवेभ्यः सोमं ᵛत्वा गृह्णामीति शेषः। ᵛएषः ᵛते ᵛयोनिः ᵛविश्वेभ्यः ᵛत्वा ᵛदेवेभ्यः, सादयामीति शेषः ॥१॥

[इत्यष्टमेऽध्याये पञ्चमोऽनुवाकः ॥५॥]

———

[अथ षष्ठोऽनुवाकः]

सा– पञ्चमेऽनुवाके महावैश्वदेवग्रह उक्तः। षष्ठे पात्नीवतग्रह उच्यते।

उ॒प॒या॒मगृ॑हीतोऽसि॒ बृह॒स्पति॑सुतस्य ते देव सोम ।
इन्द॑ इन्द्रि॒याव॑त॒ः पत्नी॑वतो॒ ग्रहाँ॑३ ऋध्यासम् ॥१॥

बृह॒स्पति॑सुत॒स्येति॒ बृह॒स्पति॑ऽसुतस्य । ते॒ । दे॒व॒ । सो॒म॒ ।
इन्दो॒ इतीन्दो॑ । इ॒न्द्रि॒याव॑तः । इ॒न्द्रि॒यव॑त॒ इती॑न्द्रि॒यऽव॑तः ।
पत्नी॑वत॒ इति॒ पत्नी॑ऽवतः । ग्रहा॑न् । ऋ॒ध्या॒स॒म् ॥ धं ॥१॥

कात्यायनः– “उपयामगृहीतोऽसि बृहस्पतिसुतस्येति प्रतिप्रस्थाता पत्नीवतं ग्रहं गृह्णाति” (काश्रौ १०·६·१६) इति। प्रतिप्रस्थाता पात्नीवताख्यं ग्रहमुपांश्वन्तर्यामपात्रयोरेकतरेण गृह्णीयात्। पाठस्तु– ‘उपयामगृहीतोऽसि बृहस्पतिसुतस्य ते देव सोम। इन्द इन्द्रियावतः पत्नीवतो ग्रहाऽ३ ऋध्यासम्’ इति। हे ᵛइन्दो क्लेदनरूप ᵛदेव दीप्यमान ᵛसोम, ᵛबृहस्पतिसुतस्य बृहतो महतो यज्ञाख्यस्य कर्मणः पत्या पालयित्रा यजमानेन अभिषुतस्य ᵛते तव संबन्धिनः [ᵛग्रहान्] उपांशुप्रभृतीन् पात्रविशेषान् ᵛऋध्यासं समृद्धान् करोमि। कीदृशान्? ᵛइन्द्रियावतः वीर्यवतः ᵛपत्नीवतः पत्नीयुक्तान्। शिष्टं स्पष्टम् ॥१॥

---

5. B1 गृह्णीम इत्यर्थः for गृह्णामीत्यर्थः।
19. V1 S1 C om. महतो; V1 यज्ञस्य for यज्ञाख्यस्य; C यज्ञख्य° for यज्ञाख्यस्य
20. V1 S1 C संबन्धी for संबन्धिनो
21. V1 S1 C om. समृद्धान् करोमि

आ– उपांशुपात्रेण पात्नीवतं गृह्णाति– ‘ उपयामंगृहीतोऽसि बृहस्पतिसुतस्य ’ इति। लिङ्गोक्तदेवत्या बृहती। इन्दतीतीन्दुः। तत्संबोधनम्। हे ᵛइन्दो ᵛदेव ᵛसोम, ᵛते तव ᵛबृहस्पतिसुतस्य बृहस्पतिना ब्राह्मणेन सुतस्य। यद्वा - बृहतो यज्ञाख्यकर्मणः पत्या पालयित्रा यजमानेन सुतस्याभिषुतस्य सोमस्य ᵛग्रहान्। कथंभूतान् ग्रहानिति। ᵛइन्द्रियावतः इन्द्रियवतः ᵛपत्नीवतः (पत्नीसंयुक्तान्) उपांशुप्रभृतीन् ग्रहान् पात्रविशेषान् ᵛऋध्यासं संवर्धयेयम् ॥१॥

अ॒हं प॒रस्ता॑द॒हम॒वस्ता॒द्यद॒न्तरि॑क्षं॒ तदु॑ मे पि॒ताऽऽस॑ ।
अ॒हꣳ सूर्य᳚मु॒भय॑तो दद॒र्शा॒हं दे॒वानां॑ प॒रमं॑ गुहा॒ यत् ॥२॥

अ॒हम् । प॒रस्ता॑त् । अ॒हम् । अ॒वस्ता॑त् ।
यत् । अ॒न्तरि॑क्षम् । तत् । ऊँ॒ इत्यूँ॑म् । मे॒ । पि॒ता । आ॒स॒ ।
अ॒हम् । सूर्य᳚म् । उ॒भ॒य॑तः । द॒द॒र्श॒ ।
अ॒हम् । दे॒वाना॑म् । प॒र॒मम् । गुहा॑ । यत् ॥ कः ॥२॥

सा– कात्यायनः – “ प्रचरणीशेषेण श्रीणात्येनमहं परस्तादिति ” (काश्रौ १०·६·१७) इति। प्रचरणीपात्रे अवशिष्टेनोदकेन पात्नीवतं ग्रहं मिश्रीकुर्यात्। पाठस्तु– ‘ अहं परस्तादहमवस्ताद्यदन्तरिक्षं तदु मे पिताऽऽस। अहꣳ सूर्यमुभयतो ददर्शाहं देवानां परमं गुहा यत् ’ इति। अत्र मन्त्रद्रष्टा स्वस्य सर्वगतपरमात्मरूपत्वमभिप्रेत्य ब्रूते – ᵛअहं परमात्मरूपः सन् ᵛपरस्तात् उपरितनद्युलोकादौ ᵛअवस्ताद् अधस्तनभूलोकादौ तिष्ठामीति शेषः। ᵛयद् अन्तरिक्षं मध्यवर्तिलोकरूपमस्ति ᵛतत् ᵛउ तदेव ᵛमे देहधारिणो मम ᵛपिता सवितृवत् पालको बभूव। अहं परमात्मरूपः सन् ᵛउभयतः उपरिष्टादधस्ताच्च स्थित्वा ᵛसूर्यं ᵛददर्श दृष्टवानस्मि। ᵛयत् वस्तु ᵛदेवानाम् इन्द्रादीनां हृदये ᵛपरमं ᵛगुहा अत्यन्तं गोप्यमस्ति तदेवाहमस्मि ॥२॥

आ– श्रीणाति – ‘ अहं परस्तात् ’ इति। अध्यात्मदैवत्या त्रिष्टुप्। प्रजापतिरूपेणात्मानं पश्यन् श्रीणाति। ᵛअहं ᵛपरस्तात् अस्य जगतः परस्तात् उपरिष्टात्, ᵛयत् अहमध्यात्मरूपः जगतः पूर्वं पश्चाच्चेत्यर्थः। ‘ यदन्तरिक्षं तदु मे पिताभूत् ’। ᵛयत् ᵛतत् [ᵛअन्तरिक्षं] तदेव ᵛमे मम ᵛपिता स एव पालकः सदाऽभूत्। ‘ अहं सूर्यमुभयतो ददर्श ’। ᵛउभयतः परस्तादवस्ताच्च

---

3. B1 ब्राह्मणसुतस्य for ब्राह्मणेन सुतस्य
5. B1 पत्निवन्तः for पत्नीवतः
13. P1 पात्नीवन्तं, V1 पत्नीवन्तं for पात्नीवतं
15. V1 S1 C °रूपम् for रूपत्वम्
17. V1 S1 C प्रतिपालको for पालको
18. V1 S1 C अत्यन्त° for अत्यन्तं
23. B1 after उभयतो add ददर्श

Vसूर्यं, (षू प्रेरणे इत्यस्मात् क्यप् रुडागमश्च), प्रेरणात् सूर्यः, तं प्रेरकम् Vअहं Vददर्श आत्मत्वेन पश्यामि । ' अहं देवानां परमं गुहा यत् ' । Vदेवानाम् इन्द्राग्न्यादीनां Vयत् Vपरमं प्रकृष्टतमं Vगुहा गुहावत्, गुहा यज्ञे अतिगोप्यरूपं विष्णोः परमं पदलक्षणं तत् Vअहम् एव । एवं मन्त्ररूपेणापि परमानुग्रहकारिणी श्रुतिः परमार्थमुपदिशति ॥२॥

——

अग्ने॒ वाक् पत्नि॑ स॒जूर्दे॒वेन॒ त्वष्ट्रा॑ ।
सोमं॑ पि॒ब स्वाहा॑ ।।३।।

अग्ने॒ । वाक् । पत्नि॑ । स॒जूरिति॑ स॒ऽजूः । दे॒वेन॑ । त्वष्ट्रा॑ ।
सोम॑म् । पि॒ब॒ । स्वाहा॑ ॥ कौ ॥३॥

सा– कात्यायनः – " अग्ने वाक् पत्नीत्युत्तरार्धे जुहोति " (द्र. काश्रौ १०.६.१९) इति । आहवनीयस्योत्तरभागे जुहुयात् । पाठस्तु– ' अग्ने वाक् पत्नि सजूर्देवेन त्वष्ट्रा । सोमं पिब स्वाहा ' इति । हे Vवाक् वागभिमानिनि, हे Vपत्नि पत्नीवत् Vअग्ने, Vत्वष्ट्रा Vदेवेन सह Vसजूः समानप्रीतिः सन् Vसोमं Vपिब । Vस्वाहा सुहुतमस्तु ॥३॥

आ– जुहोति– ' अग्ने वाक् पत्नि ' इति । आग्नेयी त्रिपदा गायत्री । हे Vअग्ने Vवाक्, हे Vपत्नि, पत्नीवन्नग्ने इत्यर्थः । Vत्वष्ट्रा Vदेवेन सह Vसजूः समानप्रीतिः सन् त्वं Vसोमं Vपिब । Vस्वाहा सुहुतमस्तु ॥३॥

प्र॒जाप॑ति॒र्वृषा॑ऽसि रेतो॒धा रेतो॒ मयि॑ धेहि ।
प्र॒जाप॑तेस्ते॒ वृष्णो॑ रेतो॒धसो॑ रेतो॒धाम॑शीय ।।४।।(६)।।

प्र॒जाप॑ति॒रिति॑ प्र॒जाऽप॑तिः । वृषा॑ । अ॒सि॒ । रे॒तो॒धा इति॑ रे॒तः॒ऽधाः । रेतः॑ । मयि॑ । धे॒हि॒ ।
प्र॒जाप॑ते॒रिति॑ प्र॒जाऽप॑तेः । ते॒ । वृष्णः॑ ।
रे॒तो॒धस॒ इति॑ रे॒तः॒ऽधसः॑ । रे॒तो॒धामिति॑ रे॒तः॒ऽधाम् । अ॒शी॒य॒ ॥ श्रीं ॥४॥(६)॥

सा– कात्यायनः – " उद्गातृवत् । पत्नीं सदः प्रवेश्यापरेणोत्तरत उपविष्टामुद्गातारं समीक्षयति प्रजापतिर्वृषाऽसीति " (काश्रौ १०.७.२-३) इति । पूर्वमुद्गातुर्यथा सदःप्रवेशनं तथा पत्नीं सदः प्रवेशयित्वा पश्चिमोत्तरदिशोर्मध्ये स्थितां ताम् उद्गात्रा समीक्षयेत् । पत्नी उद्गातारं पश्येदित्यर्थः ।

---

1. B1 स्तुष्टुप् ईरणात् for षू प्रेरणे इत्यस्मात् क्यप् रुडागमश्च
23. P1 सह [स] मीक्षये for समीक्षयेत्

पाठस्तु– 'प्रजापतिर्वृषाऽसि रेतोधा रेतो मयि धेहि । प्रजापतेस्ते वृष्णो रेतोधसो रेतोधामशीय' इति । ᵛप्रजापतिः प्रजानां पालकस्त्वं ᵛवृषा ᵛअसि सेक्ता भवसि । ᵛरेतोधाः रेतसो वीर्यस्य धारयिताऽसि । एवंगुणयुक्तस्त्वं ᵛरेतः वीर्यं ᵛमयि ᵛधेहि स्थापय । तदनन्तरं ᵛवृष्णः वीर्यस्य सेक्तुः ᵛरेतोधसः रेतसो धारयितुः ᵛप्रजापतेः ᵛते तवानुग्रहात् ᵛरेतोधां रेतसो धारयितारं प्रजोत्पादनसमर्थं पुत्रम् ᵛअशीय प्राप्नुयाम् ॥४॥

[इत्यष्टमेऽध्याये षष्ठोऽनुवाकः ॥]

आ– पत्न्युद्गातारमवेक्षते– 'प्रजापतिर्वृषाऽसि' इति । प्राजापत्यनुष्टुप् । यस्त्वं ᵛप्रजापतिः स त्वं ᵛवृषा ᵛअसि । यतस्त्वं ᵛरेतोधाः रेतसो धारयिताऽसि अतः ᵛरेतः ᵛमयि ᵛधेहि स्थापय । यतस्त्वमेवंगुणः तस्मात् ᵛवृष्णः रेतसः सेक्तुः ᵛप्रजापतेः ᵛते तव सकाशात् ᵛरेतोधां रेतसो धारयितारं प्रजोत्पादनसमर्थं पुत्रम् ᵛअशीय प्राप्नुयाम् ॥३॥

[इत्यष्टमेऽध्याये षष्ठोऽनुवाकः]

[अथ सप्तमोऽनुवाकः]

सा– षष्ठेऽनुवाके पात्नीवतग्रह उक्तः । सप्तमे हारियोजनग्रह उच्यते–

उपयामगृहीतोऽसि
हरिरसि हारियोजनो हरिभ्यां त्वा ।
हर्योर्धाना स्थ सहसोमा इन्द्राय ।।१।।

हरिः । असि । हारियोजन इति हारिऽयोजनः । हरिभ्यामिति हरिऽभ्याम् । त्वा । हर्योः । धानाः । स्थ । सहसोमा इति सहऽसोमाः । इन्द्राय ॥ णं ॥१॥

कात्यायनः – "द्रोणकलशे हारियोजनग्रहणमुपयामगृहीतोऽसि हरिरसीति" (काश्रौ १०.८.१) इति । द्रोणकलशस्थं सोमं हारियोजनग्रहे गृह्णीयात् । पाठस्तु– 'उपयामगृहीतोऽसि हरिरसि हारियोजनो हरिभ्यां त्वा' इति । हे सोम, त्वं ᵛहरिः हरितवर्णः ᵛअसि । हे ग्रह, त्वं ᵛहारियोजनः, हरी इन्द्राश्वौ, तौ येन युज्येते इति [सः ?] हरियोजनः इन्द्रः, तत्संबन्धी भवसि । हे सोम, त्वां ᵛहरिभ्यां गृह्णामीति शेषः ॥

कात्यायनः – "धानाश्चावपति हर्योर्धाना इति" (काश्रौ १०.८.२) इति । भृष्टयवान् हारियोजनग्रहे निदध्यात् । पाठस्तु– 'हर्योर्धानाः स्थ सहसोमा इन्द्राय' इति । ᵛसहसोमाः सोमेन सहिताः ᵛधानाः भृष्टयवाः ᵛइन्द्राय इन्द्रस्य ᵛहर्योः अश्वयोर्भवन्ति ॥१॥

---

13. C S1 °ग्रहग्रहणम्, V1 °ग्रहणम् for first °ग्रहः
22. V1 S1 C प्रयुज्येते for युज्येते; P1 C S1 V1 हारि° for हरि°

आ– हारियोजनं गृह्णाति– ‘उपयामगृहीतोऽसि (हरिरसि)’ इति । अत्र विभज्य विनियोगः । पूर्वार्धम् ऋक्सामदेवत्यम् । उत्तरं धानादेवत्यम् । एकीकृत्य छन्दोऽनुष्टुप् । इन्द्रात्मना सोमः स्तूयते । सोम, त्वं ᵛहरिः ᵛअसि हरितवर्णोऽसि । यद्वा– हरिरिन्द्रोऽसि । ᵛहारियोजनः, हरी इन्द्राश्वौ तौ ऋक्सामलक्षणौ । हरी युज्येते येन स हरियोजनः । छन्दसि हरियोजन एव हारियोजनः इन्द्रः । “ऋक्सामे वै हरी” (शब्रा ४.४.३.६) इति श्रुतेः । ᵛहरिभ्यां सोमं ᵛत्वा गृह्णामीति शेषः ॥

धाना आवपति – ‘हर्योर्धानाः स्थ सहसोमा इन्द्राय’ । सोमेन सहिताः ᵛधानाः लाजाः ᵛसहसोमाः । ᵛहर्योः ᵛइन्द्राय । व्यत्ययः । इन्द्रस्य हर्योः इन्द्रस्याश्वयोः ᵛस्थ भवथ ॥१॥

यस्ते देव सोमाश्वसनिर्भक्षो यो गोसनिः ।
तस्य त इष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्योपहूत
उपहूतस्य भक्षयामि ॥२॥(७)॥

यः । ते । देव । सोम । अश्वसनिरित्यश्वऽसनिः । भक्षः । यः । गोसनिरिति गोऽसनिः ।
तस्य । ते । इष्टयजुष इतीष्टऽयजुषः । स्तुतस्तोमस्येति स्तुतऽस्तोमस्य ।
शस्तोक्थस्येति शस्तऽउक्थस्य । उपहूत इत्युपऽहूतः । उपहूतस्येत्युपऽहूतस्य । भक्षयामि ॥
॥ च्छूं ॥२॥ (७) ॥

सा– कात्यायनः – “यस्ते देव सोमाश्वसनिरिति प्राणभक्षं भक्षयित्वा” (काश्रौ १०.८.५) इति । प्राणधारणार्थं यो भक्षस्तं भक्षयेत् । पाठस्तु– ‘यस्ते देव सोमाश्वसनिर्भक्षो यो गोसनिः । तस्य त इष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्योपहूत उपहूतस्य भक्षयामि’ इति । हे ᵛदेव दीप्यमान ᵛसोम, ᵛते त्वदीयः ᵛभक्षः ᵛअश्वसनिः अश्वानां दाता, ᵛयः भक्षः गवां दाता, ᵛतस्य तादृशस्य ᵛते त्वदीयं तादृशं भक्षम् ᵛउपहूतः अभ्यनुज्ञातोऽहं भक्षयामि । कीदृशस्य ते ? ᵛइष्टयजुषः इष्टानि यजूंषि यस्य स इष्टयजुस्तस्य । ᵛस्तुतस्तोमस्य उद्गातृभिः स्तुतानि स्तोत्राणि यस्य स तथोक्तस्य । [ᵛशस्तोक्थस्य] होतृभिः शस्तानि उक्थानि शस्त्राणि यस्य स शस्तोक्थस्तस्य । ᵛउपहूतस्य अभ्यनुज्ञातस्य ॥२॥

[इत्यष्टमेऽध्याये सप्तमोऽनुवाकः ॥]

आ– प्राणभक्षं [भक्षयेत्]– ‘यस्ते देव सोम’ इति । लिङ्गोक्तदेवत्या पञ्चपदा पाङ्क्तिः । त्रिष्टुप् । हे ᵛदेव हे ᵛसोम, ᵛते तव संबन्धी ᵛयः ᵛभक्षः ᵛअश्वसनिः । षणु दाने ।

---

1. B1 शक्ता मे हर्यः हरिरसि इति
3. B1 सोमस्त्वं for सोम त्वं

धातूनाम् अनेकार्थत्वात् । अश्वान् सनोति संभजत इति अश्वसनिः यः भक्षः । गाः सनोतीति ^{v}गोसनिः ^{v}यः भक्षः । ^{v}तस्य ^{v}ते तव संबन्धिनः, ^{v}इष्टयजुषः, इष्टानि यजूंषि यस्य स इष्टयजुः, तस्य इष्टयजुषः । ^{v}स्तुतस्तोमस्य, उद्गातृभिः स्तुताः स्तोमाः स्तोत्राणि यस्य सः त्वं स्तुतस्तोमः, तस्य । ^{v}शस्तोक्थस्य, होतृभिः शस्तानि उक्थानि शस्त्राणि यस्य सः, तस्य ^{v}शस्तोक्थस्य । ^{v}उपहूतस्य अनुज्ञातस्य । तस्येत्यादयः कर्मणि षष्ठ्यः । इष्टयजुषं स्तुतस्तोमं शस्तोक्थम् उपहूतम् अश्वसनिं गोसनिं भक्षं त्वाम् ^{v}उपहूतः अभ्यनुज्ञातः अहं भक्षं ^{v}भक्षयामि ॥२॥

[इत्यष्टमेऽध्याये सप्तमोऽनुवाकः]

[अथ अष्टमोऽनुवाकः]

सप्तमे प्राणभक्षग्रह उक्तः । अष्टमे षोडशिग्रह उच्यते ।

यु॒क्ष्वा हि के॒शिना॒ ह॒री वृष॑णा कक्ष्य॒प्रा ।
अथा॑ न इन्द्र सोमपा गि॒रामुप॑श्रुतिं चर ।
उ॒प॒या॒मगृ॑हीतो॒ऽसीन्द्रा॑य त्वा षोळ॒शिने॑
ए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा षोळ॒शिने॑ ॥१॥ (८)॥

यु॒क्ष्व । हि । के॒शिना॑ । ह॒री इ॒ति॒ ह॒री॑ । वृष॑णा । क॒क्ष्य॒प्रेति॑ क॒क्ष्य॒ऽप्रा ।
अथ॑ । न॒ः । इ॒न्द्र॒ । सो॒म॒पा॒ इति॑ सोम॒ऽपाः । गि॒राम् । उप॑श्रुति॒मित्युप॑ऽश्रुतिम् । च॒र॒ ।
इन्द्रा॑य । त्वा॒ । षो॒ळ॒शिने॑ ।
ए॒षः । ते॒ । योनि॑ः । इन्द्रा॑य । त्वा॒ । षो॒ळ॒शिने॑ ॥ धिः ॥१॥ (८) ॥

कात्यायनः – "षोडशिनं खादिरेण चतुःस्रक्तिनाऽऽतिष्ठ युक्ष्वा हीति वा" (काश्रौ १२·५·२) इति । "आ तिष्ठ वृत्रहन्", "युक्ष्वा हि केशिना" इत्यनयोरन्यतरं मन्त्रम् उच्चारयन् खादिरवृक्षनिर्मितेन चतुरस्रेण पात्रेण षोडशिग्रहं गृह्णीयादिति शेषः । तयोरेकतरपाठस्तु– 'युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा । अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर । उपयामगृहीतोऽसीन्द्राय त्वा षोळशिन एष ते योनिरिन्द्राय त्वा षोळशिने' इति । हे ^{v}इन्द्र, ^{v}हि यस्मात् कारणात् ^{v}हरी हरितवर्णौ त्वदीयावश्वौ ^{v}युक्ष्व रथेन संयोजय । कीदृशौ हरी ? ^{v}केशिना केशिनौ प्रलम्बकेसरौ ^{v}वृषणा वृषणौ सेचनसमर्थौ । ^{v}कक्ष्यप्रा, कक्षे भवः कक्ष्यः अश्वसंनाहरज्जुः, तया पूर्येते संबध्येते इति कक्ष्यप्रौ । ^{v}अथ अनन्तरं ^{v}सोमपाः

---

24. P1 कक्ष्ये भवा कक्ष्या for कक्षे भवः कक्ष्यः; V1 कक्ष्यें for कक्षे;
V1 S1 C पूर्यते संबध्येते for पूर्येते संबध्येते

सोमपानं कुर्वन् ᵛनः अस्मदीयानां ᵛगिराम् ऋग्यजुःसामलक्षणानां वाचाम् ᵛउपश्रुतिम् उपश्रवणं ᵛचर गच्छ प्राप्नुहि, शृण्वित्यर्थः । ᵛषोळशिने, षोडशो ग्रहोऽस्यास्तीति षोडशी तादृशाय ᵛइन्द्राय हे ग्रह, तादृशं त्वां गृह्णामीति शेषः । शिष्टं स्पष्टम् ॥१॥

[इत्यष्टमेऽध्यायेऽष्टमोऽनुवाकः ॥]

आ– अथ षोडशिग्रहमन्त्रः – 'युक्ष्वा हि' इति । मधुच्छन्दा इन्द्रदेवत्याऽनुष्टुप् यजुरन्ता । हे ᵛइन्द्र ᵛकेशिना केशिनौ प्रलम्बकेसरौ । ᵛवृषणा वृषणौ, वृष सेचने, वर्षितारौ सेचनसमर्थौ तरुणौ । ᵛकक्ष्यप्रा कक्ष्यप्रौ । प्रा पूरणे, कक्षे भवा कक्ष्या अश्वस्य संनाहरज्जुः, तया रज्ज्वा पूर्येते संपूर्येते संबध्येते इति कक्ष्यप्रौ । तौ कक्ष्यप्रौ ᵛहरी । ᵛहि यस्मात् एवंगुणविशेष्यौ हरितवर्णाविश्वौ ᵛयुक्ष्व रथे नियोजय । ᵛअथ अनन्तरमेव हे इन्द्र, ᵛनः अस्माकं ᵛसोमपाः सोमपानस्य कर्ता सन् ᵛगिराम् ᵛउप ᵛश्रुतिम् ऋग्यजुःसामलक्षणानां गिरां वाचां वाक्यानाम् उपश्रुतिम् उपश्रवणं श्रोत्रपथेन श्रूयमाणं, शृण्विति शेषः । श्रुत्वा च ᵛचर अस्मद्गृहम् आगच्छ ॥

ᵛउपयामगृहीतः ᵛअसि ᵛइन्द्राय ᵛत्वा ᵛषोळशिने । षोळशो ग्रहः अस्यास्तीति षोळशी, तस्मै षोळशिने इन्द्राय ग्रहं गृह्णामीति शेषः ॥१॥

[इत्यष्टमेऽध्यायेऽष्टमोऽनुवाकः ॥]

——

[अथ नवमोऽनुवाकः]

आ ति॑ष्ठ वृत्रह॒न् रथं॑ यु॒क्ता ते॒ ब्रह्म॑णा॒ हरी॑ ।
अ॒र्वा॒ची॒नꣳ सु ते॒ मनो॒ग्रावा॑ कृणोतु व॒ग्नुना॑ ।
उ॒प॒या॒मगृ॑हीतो॒ऽसीन्द्रा॑य त्वा षोळ॒शिने॑
ए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा षोळ॒शिने॑ ॥१॥(९)॥

आ । ति॒ष्ठ॒ । वृ॒त्र॒ह॒न्निति॑ वृत्रऽहन् । रथ॑म् । यु॒क्ता । ते॒ । ब्रह्म॑णा । हरी॒ इति॒ हरी॑ ।
अ॒र्वा॒चीन॑म् । सु । ते॒ । मनः॑ । ग्रावा॑ । कृ॒णो॒तु॒ । व॒ग्नुना॑ ॥ च्युं ॥१॥ (९) ॥

सा– अथ अन्यतरपाठस्तु– 'आ तिष्ठ वृत्रहन् रथं युक्ता ते ब्रह्मणा हरी । अर्वाचीनꣳ सु ते मनो ग्रावा कृणोतु वग्नुना । उपयामगृहीतोऽसीन्द्राय त्वा षोळशिन एष ते योनिरिन्द्राय त्वा षोळशिने'

4- P1 S1 C V1 om. इत्यष्टमेऽध्यायेऽष्टमोऽनुवाकः ॥८॥
5. B1 befor षोडशि° adds षोडशिमन्त्राः

इति । हे ᵛवृत्रहन् इन्द्र, ᵛते त्वदीयौ ᵛहरी अश्वौ ᵛब्रह्मणा त्रयीलक्षणेन मन्त्रेण रथेन ᵛयुक्ता संयुक्तौ, अतस्त्वं ᵛरथम् ᵛआतिष्ठ आरोहणं कुरु। किं च ᵛग्रावा अयं सोमाभिषवणपाषाणः ᵛते रथमारूढस्य तव ᵛमनः ᵛवग्नुना। वग्नुरिति वाङ्नामसु पठितम् । वाचा श्रवणीयेन अभिषवणशब्देन सुष्ठु ᵛअर्वाचीनम् अस्मद्यज्ञाभिमुखं ᵛकृणोतु करोतु ॥१॥

[इत्यष्टमेऽध्याये नवमोऽनुवाकः ॥]

आ– षोळशिनं गृह्णाति– ‘आ तिष्ठ’ इति । इन्द्रदेवत्या अनुष्टुप् । गौतमः । वृत्रो नामासुरस्तं हन्तीति वृत्रहा, तस्य संबोधनं हे ᵛवृत्रहन् । ‘युक्ता ते ब्रह्मणा हरी’। हरितवर्णौ ᵛब्रह्मणा त्रयीलक्षणेन अनेन मन्त्रेण ᵛयुक्ता रथेन युक्तौ नियुक्तौ तौ, अतस्त्वं ᵛरथम् ᵛआतिष्ठ आरुह । किं च अयं ᵛग्रावा सोमाभिषवपाषाणः ᵛते रथमारूढस्य तव ᵛमनः ᵛवग्नुना । वग्नुरिति वाङ्नामसु पठितम् । वाचा वचनीयेन श्रवणीयेनाभिषवशब्देन ᵛअर्वाचीनम् अस्मद्यज्ञाभिमुखं ᵛसु सुष्ठु मनः कृणोत्विति संबन्धः । ᵛउपयामगृहीतः ᵛअसि, व्याख्यातसमानार्थः ॥१॥

[इत्यष्टमेऽध्याये नवमोऽनुवाकः]

[अथ दशमोऽनुवाकः]

सा– अष्टमनवमयोः षोडशिग्रह उक्तः । दशमे तस्यैव वैकल्पिको मन्त्र आम्नातः ।

इन्द्र॒मिद्धरी॑ वह॒तोऽप्र॑तिधृष्टशवसम् ।
ऋषी॑णां च स्तु॒तीरुप॑ य॒ज्ञं च॒ मानु॑षाणाम् ।
उ॒प॒या॒मगृ॑हीतो॒ऽसीन्द्रा॑य त्वा षोळ॒शिने॑
ए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा षोळ॒शिने॑ ॥१॥(१०)॥

इन्द्र॑म् । इत् । हरी॒ इति॒ हरी॑ । व॒ह॒तः । अप्र॑तिधृष्टशवस॒मित्यप्र॑तिधृष्टऽशवसम् ।
ऋषी॑णाम् । च॒ । स्तु॒तीः । उप॑ । य॒ज्ञम् । च॒ । मानु॑षाणाम् ॥ छिं ॥१॥(१०)॥

सा– ‘इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसम् । ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणाम् । उपयामगृहीतोऽसीन्द्राय त्वा षोळशिन एष ते योनिरिन्द्राय त्वा षोळशिने’ इति । हे ᵛहरी इन्द्रस्याश्वौ, युवाम् ᵛअप्रतिधृष्टशवसं, प्रतिधर्षयितुं शक्यं प्रतिधृष्टं, न प्रतिधृष्टमप्रतिधृष्टं, तादृशं शवो बलं यस्य सः,

---

5. C S1 अष्टमनवमानुवाकौ for °नवमोनुवाकः ॥
15. P1 °नवमानुवाकयोः for नवमयोः, P1 षोडशी for षोडशि°

तम् Vइन्द्रम् Vइत् इन्द्रमेव, Vऋषीणां वसिष्ठादीनां Vच Vस्तुतीः Vउप समीपम्, Vमानुषाणां यजमानानां Vच Vयज्ञम् [उप] समीपं च Vवहतः प्रापयतः ॥१०॥

[इत्यष्टमेऽध्याये दशमोऽनुवाकः ॥]

आ – तृतीयो मन्त्रविकल्पः – ‘ इन्द्रमित् ’ इति । इन्द्रदेवत्याऽनुष्टुप् । गोतमः । हे Vहरी अश्वौ, Vइन्द्रम् Vइत् इन्द्रम् एव । कथंभूतमिन्द्रम् ? Vअप्रतिधृष्टशवसम् । शवो बलं, प्रतिधर्षयितुं शक्यं प्रतिधृष्टम्, न प्रतिधृष्टं शवो यस्य सः [तम्] अप्रतिधृष्टशवसम् इन्द्रमेव । Vऋषीणां वसिष्ठादीनां Vस्तुतीः Vउप समीपं, Vमानुषाणां यजमानानां Vयज्ञम् Vउप समीपं, हरी अश्वौ Vवहतः इति संबन्धः । Vउपयामगृहीतः Vअसि इत्यादिः व्याख्यातसमानार्थः ॥१॥

[इत्यष्टमेऽध्याये दशमोऽनुवाकः ॥]

[अथ एकादशोऽनुवाकः]

सा– दशमे षोडशिग्रहस्य वैकल्पिको मन्त्रः उक्तः । एकादशे तस्योपस्थानमुच्यते ।

यस्मा॒न्न जा॒तः परो॑ अ॒न्यो अस्ति॒ य आ॑वि॒वेश॒ भुव॑नानि॒ विश्वा॑ ।
प्र॒जाप॑तिः प्र॒जया॑ सꣳर॒रा॒णस्त्रीणि॒ ज्योतीꣳ॑षि सच॒ते॑ स षो॑ळ॒शी ॥१॥(११)॥

यस्मा॑त् । न । जा॒तः । परः॑ । अ॒न्यः । अस्ति॑ ।
यः । आ॒वि॒वेशेत्या॑ऽवि॒वेश॑ । भुव॑नानि । विश्वा॑ । प्र॒जाप॑ति॒रिति॑ प्र॒जाऽप॑तिः ।
प्र॒जयेति॑ प्र॒ऽजया॑ । स॒ꣳर॒रा॒ण इति॑ स॒म्ऽर॒रा॒णः ।
त्रीणि॑ । ज्योतीꣳ॑षि । स॒च॒ते॒ । सः । षो॒ळ॒शी ॥ थ्रों ॥१॥ (११) ॥

कात्यायनः – “ उपस्थायैनं यस्मान्न जात इति ” (काश्रौ १२·५·२०) इति । षोडशिग्रहमुपतिष्ठेत् । पाठस्तु– ‘ यस्मान्न जातः परो अन्यो अस्ति य आविवेश भुवनानि विश्वा । प्रजापतिः प्रजया सꣳरराणस्त्रीणि ज्योतीꣳषि सचते स षोळशी ’ इति । Vयस्मात् पुरुषात् Vअन्यः व्यतिरिक्तः Vपरः उत्कृष्टो देवादिः Vजातः संभूतः Vन Vअस्ति । Vयः Vविश्वा विश्वानि सर्वाणि भूतजातानि Vआविवेश अन्तर्यामिरूपेण प्रविष्टवान् । “ यः सर्वेषु भूतेषु तिष्ठन् ” (बृउ ३·७·१५) इति श्रुतेः । Vप्रजापतिः स्वोत्पन्नानां

---

11. V1 S1 C वैकल्पिक° for वैकल्पिको
19. V1 S1 C °तिष्ठेत for °तिष्ठेत्
21. V1 S1 C om. विश्वा
22. V1 S1 C om. यः सर्वेषु ...श्रुते; V1 S1C °पातिश्च उत्पन्नानां for °पतिः स्वोत्पन्नानां

प्रजानां पालकः ᵛप्रजया प्रजारूपेण ᵛसंरराणः सम्यग् रममाणः, ᵛत्रीणि ᵛज्योतींषि विषयज्ञापकानि; अग्निवाय्वादित्यलक्षणानि ᵛसचते सेवते, स्वतेजसा ज्योतिषां सेवनं जडज्योतिषामुज्जीवनं करोतीत्यर्थः, “येन सूर्यस्तपति तेजसेद्धः” (तैब्रा ३.१२.९) इत्यादिश्रुतेः। य एवंरूपः ᵛसः एव ᵛषोळशी षोडशकलात्मको लिङ्गशरीरोपहितोऽसौ सर्वव्यवहाराश्रयः संभवतीत्येवं षोडशिग्रहरूप इति स्तूयते ॥१॥

आ षोळशिग्रहमुपतिष्ठते– ‘यस्मान्न जातः’ इति। ऐन्द्री त्रिष्टुप्। परब्रह्मरूपेण षोळशिनः स्तुतिः। ᵛयस्मात् ᵛअन्यः व्यतिरिक्तः ᵛपरः उत्कृष्टः देवादिः ᵛजातः संभूतः ᵛन ᵛअस्ति। ᵛविश्वा विश्वानि सर्वाणि भूतानि भूरादिस्थानानि वस्त्रोरूतानि (?) ᵛयः ᵛआविवेश जीवरूपेणान्तर्यामिरूपेण प्रविष्टवान्। यश्च ᵛप्रजापतिः स्वोत्पन्नानां सर्वासां प्रजानां पालकः ᵛप्रजया प्रजारूपेण ᵛसंरराणः संजग्मानः संवपवर्तमानां (?) रममाणः ᵛत्रीणि ᵛज्योतींषि अग्निवायुसूर्यलक्षणानि ᵛसचते। सच सेवने। स्वतेजसा सेवनं जठर (जड ?) ज्योतिषामुज्जीवनं करोति। “येन. सूर्यस्तपति तेजसेद्धः” (तैब्रा ३.१२.९) इत्यादिश्रुतेः। य एवंरूपः ᵛषोळशी षोडशकलात्मकलिङ्गशरीरोपहितोऽसौ सर्वव्यवहाराश्रयो भवतीत्येवं षोडशिग्रहरूप इति स्तूयते ॥१॥

सा– एकादशे [?][पूर्वस्मिन्] मन्त्रे षोळशिग्रहोपस्थानमुक्तम्। द्वादशे [अस्मिन् ?] तस्य भक्षणमुच्यते।

इन्द्रश्च सम्राड् वरुणश्च राजा तौ ते भक्षं चक्रतुरग्रं एतम्।
तयोरहमनु भक्षं भक्षयामि।
वाग्देवी जुषाणा सोमस्य तृप्यतु सह प्राणेन स्वाहा ॥२॥(११)॥

---

5. P1 S1 C श्रूयते for स्तूयते; P1 S1 C after स्तूयते ॥ adds इत्यष्टमेऽध्याय एकादशोऽनुवाकः ॥

15. [P1 S1 C Conclude this अनुवाक with स्तूयते ॥ Consequently these MSS register 23 अनुवाकs in this अध्याय as against 22 registered in अनुवाकानुक्रमणी which is the authentic record of अनुवाकs and verses that each अनुवाक contains in a chapter. The MS V1 has, however, recognised this mistake at the first instance itself, though it unwillingly has retained the introductory sentence : एकादशे षोडशिग्रहोपस्थानमुक्तम्। द्वादशे तस्य भक्षणमुच्यते। in the commentary on the following verse.]

V1 inadvertantly has retained एकादशे and द्वादशे

षोडश्युपस्थानमन्त्राः]

इन्द्र॑ः । च॒ । स॒म्राळिति॑ स॒म्ऽराट् । वरु॑णः । च॒ । राजा॑ ।
तौ । ते॒ । भ॒क्षम् । च॒क्र॒तु॒ः । अग्रे॑ । ए॒तम् ।
तयो॑ः । अ॒हम् । अनु॑ । भ॒क्षम् । भ॒क्ष॒या॒मि॒ ।
वाक् । दे॒वी । जु॒षा॒णा । सोम॑स्य । तृ॒प्य॒तु॒ । स॒ह । प्रा॒णेन॑ । स्वाहा॑ ॥घुः॥१॥(११)॥

कात्यायनः – "इन्द्रश्च सम्राडिति भक्षणम्" (काश्रौ १२·६·२) इति । पाठस्तु– 'इन्द्रश्च सम्राड् वरुणश्च राजा तौ ते भक्षं चक्रतुरग्र एतम् । तयोरहमनु भक्षं भक्षयामि वाग्देवी जुषाणा सोमस्य तृप्यतु सह प्राणेन स्वाहा' इति । यो वाजपेययाजी सः ᵛसम्राट्, षडैश्वर्ययुक्तः ᵛइन्द्रः ᵛच, ᵛराजा राजसूययाजी ᵛवरुणः ᵛच । "राजा वै राजसूयेनेष्ट्वा भवति सम्राड्वाजपेयेन" (शब्रा ५·१·१·१३) इति श्रुतेः । ᵛतौ इन्द्रावरुणौ हे षोडशिग्रह, ᵛते त्वदीयम् ᵛएतं सोमम् ᵛअग्रे प्रथमं ᵛभक्षं ᵛचक्रतुः कृतवन्तौ । ᵛतयोः इन्द्रवरुणयोः संबन्धिनं ᵛभक्षम् ᵛअनु पश्चात् ᵛअहं भक्षं भक्षयन् सोमं ᵛभक्षयामि । ᵛजुषाणा मदीयेन भक्षणेन सेवमाना ᵛवाक् ᵛदेवी सरस्वती ᵛप्राणेन प्राणदेवतया ᵛसह ᵛसोमस्य भक्षणेन ᵛतृप्यतु तृप्ता भवतु । ᵛस्वाहा सुहुतमस्तु ॥१॥

[इत्यष्टमेऽध्याये एकादशोऽनुवाकः ॥]

आ - षोडशिनं भक्षयति– 'इन्द्रश्च' इति । ऐन्द्रावारुणी त्रिष्टुप् षोडशिग्रहदेवत्या वा यजुरन्ता । इन्द्रश्च सम्राट् ᵛयः वाजपेययाजी सः ᵛसम्राट् परमैश्वर्ययुक्तः ᵛइन्द्रः ᵛच । [चकारः] समुच्चयार्थः । ᵛवरुणः ᵛच राजा राजसूययाजी । "राजा वै राजसूयेनेष्ट्वा भवति सम्राड्वाजपेयेन" (शब्रा ५·१·१·१३) इति श्रुतेः । ᵛतौ इन्द्रावरुणौ हे षोळशिग्रह, ᵛते त्वदीयम् ᵛएतं सोमम् ᵛअग्रे प्रथमं ᵛभक्षं ᵛचक्रतुः कृतवन्तौ । 'तयोरहमनु भक्षं', ᵛतयोः इन्द्रावरुणयोः संबन्धिनं ᵛभक्षम् ᵛअनु पश्चात् ᵛअहं भक्षं भक्षणीयं सोमं ᵛभक्षयामि । 'वाग्देवी जुषाणा'। मदीयेन च भक्षेण ᵛजुषाणा सेवमाना ᵛवाक् सरस्वती ᵛप्राणेन ᵛसह प्राणदेवतया सह ᵛसोमस्य भक्षेण ᵛतृप्यतु तृप्ता भवतु । ᵛस्वाहा सुहुतमस्तु ॥१॥

[इत्यष्टमेऽध्याये एकादशोऽनुवाकः ॥]

---

9. P1 एव, C S1 एनं for एतं
13. P1 S1 C द्वादशो° for एकादशो°
14. B1 after °वारुणी adds देवत्या

[अथ द्वादशोऽनुवाकः]

सा– एकादशे षोडशिग्रहस्य भक्षणमुक्तम् । द्वादशादिषु चतुर्ष्वनुवाकेषु अतिग्राह्या उच्यन्ते ।

अग्न॒ आयू॑ꣳषि पवस॒ आ सु॒वोर्ज॒मिषं॑ च नः ।
आ॒रे बा॑धस्व दु॒च्छुना॑म् ।
उ॒प॒या॒मगृ॑हीतोऽस्य॒ग्नये॑ त्वा॒ वर्च॑स ए॒ष ते॒ योनि॑र॒ग्नये॑ त्वा॒ वर्च॑से ।
अग्ने॑ वर्च॑स्व॒न् वर्च॑स्वा॒ꣳस्त्वं दे॒वेष्वसि॑ ।
वर्च॑स्वान॒हं म॑नु॒ष्ये॑षु भूयासम् ।।१।।(१२)।।

अग्ने॑ । आयू॑ꣳषि । प॒व॒से॒ । आ । सु॒व॒ । ऊर्ज॑म् । इष॑म् । च॒ । नः॒ ।
आ॒रे । बा॒ध॒स्व॒ । दु॒च्छुना॑म् ।
अ॒ग्नये॑ । त्वा॒ । वर्च॑से । ए॒षः । ते॒ । योनिः॑ । अ॒ग्नये॑ । त्वा॒ । वर्च॑से ।
अग्ने॑ । व॒र्च॒स्व॒न् । वर्च॑स्वान् । त्वम् । दे॒वेषु॑ । असि॑ ।
वर्च॑स्वान् । अ॒हम् । म॒नु॒ष्ये॑षु । भू॒या॒स॒म् ॥स्वा२ ३॥ १॥ (१२) ॥

कात्यायनः – " पृष्ठ्यः षडहः । तत्रातिग्राह्यग्रहणं त्र्यहे पूर्णेऽग्ने पवस्वोत्तिष्ठन्नहश्रमित्यहमेकैकम् । अग्ने वर्चस्वन्निन्द्रौजस्वन्त्सूर्य भ्राजस्वन्निति भक्षणम् " (द्र. काश्रौ १२·३·१-२,६) इति । अस्ति कश्चित् पृष्ठ्यः षडहाख्यः क्रतुः । स तु षड्भिरहोभिर्निष्पाद्यः । तत्र पूर्वस्मिन्नहस्त्रये क्रमेण 'अग्ने पवस्व' इत्यादिभिस्त्रिभिर्मन्त्रैरतिग्राह्यान् गृह्णीयात् । तथैव 'अग्ने वर्चस्वन्' इत्यादि[भिस्त्रि]भिर्मन्त्रैस्तत्तद्ग्रहशेषं भक्षयेत् । तत्र योऽयं प्रथमातिग्राह्यग्रहणार्थो 'अग्ने पवस्व' इति मन्त्रस्तेन सह विकल्पयितुमन्यः कश्चिद् ग्रहणमन्त्रो भक्षणमन्त्रश्चाम्नातः । तयोः पाठस्तु– 'अग्न आयूꣳषि पवस आ सुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् । उपयामगृहीतोऽस्यग्नये त्वा वर्चस एष ते योनिरग्नये त्वा वर्चसे । अग्ने वर्चस्वन् वर्चस्वांस्त्वं देवेष्वसि । वर्चस्वानहं मनुष्येषु भूयासम्' इति । हे अग्ने, आयूꣳषि पवसे गमय अस्मानतिदीर्घकालजीवनमानयेत्यर्थः । किं च नः अस्मभ्यम् ऊर्जं विशिष्टं क्षीरादिरसम् इषम् अन्नं वा सुव प्रेरय देहीत्यर्थः । दुच्छुनाम् अस्माकं दौर्गत्यम् आरे अतिदूर एव बाधस्व विनाशय । उपयामयतीति उपयामः ग्रहः । हे सोम, त्वं तेन गृहीतः असि । हे ग्रह, त्वां वर्चसे तेजस्विने अग्नये गृह्णामीति शेषः । एषः

---

2. P1 S1 C द्वादशे for एकादशे; C P1 S1 त्रयोदशादिषु for द्वादशादिषु
13. P1 पूर्वे°, V1 S1 C पूर्वो° for पूर्णे°
22. P1 after दुच्छुनाम् ins. दुष्टाः श्वान इति वर्णव्यत्ययेन यज्ञविघातकानसुरान् दूरत एव बाधस्वेति कश्चित् । V1 S1 C om. अति°
23. V1 S1 C om. वर्चसे

खरप्रदेशस्तव स्थानम्। तस्मिन्नग्निप्रीत्यर्थं धृत्यर्थं वा त्वां सादयामीति शेषः। हे ᵛवर्चस्वन् अतिविशिष्टतेजःसंपन्न ᵛअग्ने, ᵛत्वं ᵛदेवेषु इन्द्रादिषु मध्ये वर्चस्वान् अतिदीप्तिमान् ᵛअसि । अतस्त्वत्प्रसादाद् ᵛअहम् अपि ᵛमनुष्येषु मध्ये ᵛवर्चस्वान् ब्रह्मवर्चससंपन्नः ᵛभूयासम् ॥१॥

[इत्यष्टमेऽध्याये द्वादशोऽनुवाकः]

आ– अतिग्राह्यमाग्नेयग्रहं गृह्णाति– ‘ अग्न आयूꣳषि ’ इति । अग्निदेवत्या गायत्री । हे भगवन् ᵛअग्ने, ᵛनः अस्मभ्यम् ᵛआयूꣳषि ᵛपवसे गमय अतिदीर्घकालजीवित्वमानय । [‘ आ सुवोर्जमिषं च] नः ’ । ᵛऊर्जं विशिष्टं क्षीरादिरसम् ᵛइषं ᵛच ᵛआ ᵛसुव अवगमय । ᵛनः अस्माकं ᵛदुच्छुनां दौर्गत्यम् ᵛआरे दूरे ᵛबाधस्व विनाशय ॥

ᵛउपयामगृहीतः ᵛअसि ᵛअग्नये ᵛत्वा ᵛवर्चसे त्वां गृह्णामीति शेषः । ᵛएषः ᵛते ᵛयोनिः ᵛअग्नये ᵛत्वा ᵛवर्चसे त्वां सादयामि । हे ᵛअग्ने ᵛवर्चस्वन् अतिविशेषतेजःसंपन्न, ᵛदेवेषु मध्ये स्वभावतः ᵛत्वं ᵛवर्चस्वान् अतिदीप्तिमान् ᵛअसि। अतस्त्वप्रसादात् ᵛअहम् अपि ᵛमनुष्येषु मध्ये ᵛवर्चस्वान् ᵛभूयासं भवेयम् ॥१॥

[इत्यष्टमेऽध्याये द्वादशोऽनुवाकः]

[अथ त्रयोदशोऽनुवाकः]

सा– द्वादशे प्रथमातिग्राह्यस्य वैकल्पिकौ ग्रहणभक्षणमन्त्रौ उक्तौ । त्रयोदशे सूत्रोक्तौ ग्रहणमन्त्रावुच्येते ।

अग्ने॒ पव॑स्व॒ स्वपा॑ अ॒स्मे वर्चः॑ सु॒वीर्य॑म् ।
दध॑द्र॒यिं मयि॒ पोष॑म् ।
उ॒प॒या॒मगृ॑हीतोऽस्य॒ग्नये॑ त्वा॒ वर्च॑स ए॒ष ते॒ योनि॑र॒ग्नये॑ त्वा॒ वर्च॑से ।
अग्ने॑ वर्चस्व॒न् वर्च॑स्वा॒ꣳस्त्वं दे॒वेष्वसि॑ ।
वर्च॑स्वान॒हं म॑नु॒ष्ये॑षु भूयासम् ॥१॥(१३)॥

---

4. P1 S1 C त्रयोदशो° for द्वादशो°
5. B1 अग्नि ... ह्यमाग्नेय° for अतिग्राह्यमाग्नेय°
7. B1 after नः adds पवस्व
15. C P1 S1 त्रयोदशे for द्वादशे; C P1 S1 चतुर्दशे for त्रयोदशे

अग्ने । पवस्व । स्वपा इति सुऽअपाः । अस्मे इत्यस्मे । वर्चः । सुवीर्यमिति सुऽवीर्यम् । दधत् । रयिम् । मयि । पोषम् ॥ ठं ॥(१३)॥

तयोः पाठस्तु– ' अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधद्रयिं मयि पोषम् । उपयामगृहीतोऽस्यग्नये त्वा वर्चस एष ते योनिरग्नये त्वा वर्चसे । अग्ने वर्चस्वन् वर्चस्वाꣳस्त्वं देवेष्वसि । वर्चस्वानहं मनुष्येषु भूयासम् ' इति । हे 'अग्ने, 'स्वपाः । अप इति कर्मनाम । शोभनकर्मा त्वम् 'अस्मे अस्मभ्यं 'सुवीर्यं शोभनसामर्थ्योपेतं 'वर्चः ब्रह्मवर्चसं 'पवस्व गमय । किं कुर्वन्? 'मयि यजमाने 'रयिं धनं 'पोषं पुष्टिं च 'दधद् धारयन् स्थापयन्नित्यर्थः । अन्यद् व्याख्यातम् ॥१॥

[इत्यष्टमेऽध्याये त्रयोदशोऽनुवाकः ॥]

आ– ' अग्ने पवस्व ' इति । वैखानसः, आग्नेयी गायत्री । हे भगवन् 'अग्ने, 'स्वपाः । अप इति कर्मनामसु पठितम् । सुकर्मा शोभनकर्मा स्वपाः त्वम् अग्ने, 'अस्मे अस्मभ्यं 'वर्चः ब्रह्मवर्चसं 'पवस्व गमय । किं कुर्वन्निति । यजमाने 'सुवीर्यं 'दधत् सुवीर्यमपि धारयन् स्थापयन् । 'रयिं धनं 'पोषं पुष्टिं दधत् धारयन् । ' वर्चः पवस्व ' इति संबन्धः । ' उपयामगृहीतः असि अग्नये त्वा ' इति संबन्धः । व्याख्यातम् ॥१॥

[इत्यष्टमेऽध्याये त्रयोदशोऽनुवाकः ॥१३॥]

— —

[अथ चतुर्दशोऽनुवाकः]

सा– त्रयोदशेऽनुवाके प्रथमातिग्राह्यस्य ग्रहणभक्षणमन्त्रावुक्तौ । चतुर्दशे द्वितीयातिग्राह्यस्य ग्रहणभक्षणमन्त्रावुच्येते ।

उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः ।
सोममिन्द्र चमू सुतम् ।
उपयामगृहीतोऽसीन्द्राय त्वौजस एष ते योनिरिन्द्राय त्वौजसे ।
इन्द्रौजस्वन्नोजस्वाꣳस्त्वं देवेष्वसि ।
ओजस्वानहं मनुष्येषु भूयासम् ॥१॥(१४)॥

---

6. S1 C V1 ब्रह्मवर्चो for वर्चो; P1 after गमय ins. पवतिरत्र प्रवृत्त्यर्थोऽन्तर्भावित-(ण्यन्त) इत्यर्थः ।

8. P1 S1 C चतुर्दशो° for त्रयोदशो°

16. P1 S1 C चतुर्दशे for त्रयोदशे

उ॒त्ति॒ष्ठ॒न्नि॒त्यु॒तऽति॒ष्ठ॑न् । ओज॑सा । स॒ह । पी॒त्वी । शिप्रे॒ इति॒ शिप्रे॑ । अ॒वे॒प॒यः ।
सोम॑म् । इ॒न्द्र॒ । च॒मू इति॑ च॒मू । सु॒तम् ॥
इन्द्रा॑य । त्वा॒ । ओज॑से । ए॒षः । ते॒ । योनिः॑ । इन्द्रा॑य । त्वा॒ । ओज॑से ।
इन्द्र॑ । ओ॒ज॒स्व॒न् । ओज॑स्वान् । त्वम् । दे॒वेषु॑ । असि॑ ।
ओज॑स्वान् । अ॒हम् । म॒नु॒ष्ये॑षु । भू॒या॒स॒म् ॥ इ॒हौः ॥१॥(१४)॥

तयोः पाठस्तु– ‘उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः । सोममिन्द्र चमू सुतम् । उपयामगृहीतोऽसीन्द्राय त्वौजस एष ते योनिरिन्द्राय त्वौजसे । इन्द्रौजस्वन्नोजस्वाꣳस्त्वं देवेष्वसि । ओजस्वानहं मनुष्येषु भूयासम्’ इति । हे ᵛइन्द्र, त्वम् ᵛओजसा बलेन ᵛसह ᵛउत्तिष्ठन् ᵛचमू चम्वाम् अधिषवणचर्मणीत्यर्थः । ᵛसुतम् अभिषुतं ᵛसोमं ᵛपीत्वी पीत्वा ᵛशिप्रे हनू ᵛअवेपयः कम्पितवानसि वेपनं कम्पनमकरोः । हे ग्रह, ᵛओजसे बलरूपाय ᵛइन्द्राय त्वां गृह्णामि सादयामि चेति शेषः । हे ᵛओजस्वन्’ ओजो बलम्, तद्वान् ᵛइन्द्र, ᵛत्वं ᵛदेवेषु मध्ये यथा ᵛओजस्वान् विशिष्टबलसंपन्नः ᵛअसि, तथा ᵛअहम् अपि त्वत्प्रसादात् ᵛमनुष्येषु मध्ये ᵛओजस्वान् ᵛभूयासम् ॥१॥

[इत्यष्टमेऽध्याये चतुर्दशोऽनुवाकः ॥]

आ– अथेन्द्रं गृह्णाति– ‘उत्तिष्ठन्’ इति । ऐन्द्री गायत्री । हे भगवन् ᵛइन्द्र, ᵛउत्तिष्ठन् महता ᵛओजसा बलेन ᵛसह एव मातुरुत्सङ्गात् उत्तिष्ठन् ᵛसुतम् अभिषुतं ᵛसोमं ᵛपीत्वी, छान्दसं पदम्, पीत्वा तृप्तः सन् ᵛशिप्रे हनू नासिके वा । टुवेपृ कम्पने । अतिपानोद्वेगात् ᵛअवेपयः वेपनं कम्पनं चलनं वा अकरोः । अधिषवणचर्म त्वत्र ...... व्यत्ययः । अधिषवणचर्मणि सुतम् अभिषुतं पीत्वा शिप्रे अवेपय इति संबन्धः । ᵛउपयामगृहीतः ᵛअसि ᵛइन्द्राय ᵛत्वा ᵛओजसे, त्वां गृह्णामीति शेषः । ᵛएषः ᵛते ᵛयोनिः ᵛइन्द्राय त्वा ᵛओजसे, त्वां सादयामि । हे ᵛइन्द्र ᵛओजस्वन् । ᵛभूयासं भवेयम् ॥१॥

[इत्यष्टमेऽध्याये चतुर्दशोऽनुवाकः ॥१४॥]

---

6. P1 om. तयोः
9. V1 S1 C om. कम्पितवानसि
10. V1 S1 C ओजस्वन् for ओजसे and om. बलरूपाय; P1 om. च
13. P1 S1 C पञ्चदशो° for चतुर्दशो°
16. B1 °पानवेगात् for °पानोद्वेगात्
17. B1 वसुवमू च स्विवेति व्यत्ययः for .. व्यत्ययः

[अथ पञ्चदशोऽनुवाकः ॥]

सा- चतुर्दशे द्वितीयातिग्राह्यग्रहणभक्षणमन्त्रावुक्तौ । पञ्चदशे त्वनुवाके तृतीयातिग्राह्यस्य ग्रहणभक्षणमन्त्रावुच्येते ।

अदृ॑श्रमस्य के॒तवो॒ वि र॒श्मयो॒ जना॒ँ३ अनु॑ ।
भ्राज॑न्तो अ॒ग्नयो॑ यथा ।
उ॒प॒या॒मगृ॑हीतोऽसि॒ सूर्या॑य त्वा भ्रा॒ज ए॒ष ते॒ योनि॒ः सूर्या॑य त्वा भ्रा॒जे ।
सूर्य॑ भ्राजस्व॒न् भ्राज॑स्वा॒ँस्त्वं दे॒वेष्वसि॑ ।
भ्राज॑स्वान॒हं म॑नु॒ष्ये॑षु भूयासम् ॥१॥(१५)॥

अदृ॑श्रम् । अ॒स्य॒ । के॒तव॑ः । वि । र॒श्मय॑ः । जना॑न् । अनु॑ ।
भ्राज॑न्तः । अ॒ग्नय॑ः । य॒था॒ ।
सू॒र्या॑य । त्वा॒ । भ्रा॒जे । ए॒षः । ते॒ । योनि॑ः । सूर्या॑य । त्वा॒ । भ्रा॒जे ।
सूर्य॑ । भ्रा॒ज॒स्व॒न् । भ्राज॑स्वान् । त्वम् । दे॒वेषु॑ । असि॑ ।
भ्राज॑स्वान् । अ॒हम् । म॒नु॒ष्ये॑षु । भू॒या॒स॒म् ॥ श्वौः ॥१॥(१५)॥

तयोः पाठस्तु- 'अदृश्रमस्य केतवो वि रश्मयो जनाँ३ अनु । भ्राजन्तो अग्नयो यथा । उपयामगृहीतोऽसि सूर्याय त्वा भ्राज एष ते योनिः सूर्याय त्वा भ्राजे । सूर्य भ्राजस्वन् भ्राजस्वाँस्त्वं देवेष्वसि । भ्राजस्वानहं मनुष्येषु भूयासम् ' इति । ᵛअस्य ᵛसूर्यस्य ᵛकेतवः प्रज्ञालक्षणा रश्मयः किरणाः ᵛजनान् ᵛअनु सर्वान् प्राणिनः अनुगताः ᵛवि ᵛअदृश्रम् विशेषेणादृश्यन्त । दृशिर् धातोश्छान्दसं रूपम् । तत्र दृष्टान्तः - ᵛभ्राजन्तः ज्वलन्त ᵛअग्नयः यथा जनाननुगता दृश्यन्ते, तद्वत् । ᵛभ्राजे, भ्राजत इति भ्राट्, तस्मै ᵛसूर्याय हे ग्रह त्वां गृह्णामि । ᵛभ्राजे सूर्याय त्वां सादयामि च । हे भ्राजस्वन् ᵛसूर्य, त्वं ᵛदेवेषु मध्ये ᵛयथा ᵛभ्राजस्वान् भ्राजिष्ठोऽसि तथा ᵛअहम् अपि ᵛमनुष्येषु मध्ये ᵛभ्राजस्वान् भूयासम् । अन्यत् स्पष्टम् ॥१॥

[इत्यष्टमेऽध्याये पञ्चदशोऽनुवाकः ।]

---

2. P1 C S1 पञ्चदशे for चतुर्दशे; P1 S1 C षोडशे for पञ्चदशे
16. V1 S1 C °लक्षण° for °लक्षणा
17. V1 S1 C om. वि; V1 S1 C दृश्यन्ते for अदृश्यन्त
18. P1 अदृश्यन्त for दृश्यन्ते
19. P1 वा for च
20. V1 S1 C भ्राजिष्णो° for भ्राजिष्ठो°; V1 S1 C om. अन्यत् स्पष्टम् [L 21]

आ– सोमं गृह्णाति– ‘अदृश्रमस्य’ इति । प्रस्कण्वः सौरी गायत्री यजुरन्ता । दृशिर् प्रेक्षणे । ^{v}अदृश्रम् इति प्रथमपुरुषस्य बहुवचनस्थाने छान्दसं रूपम् । अदृश्यन्त । केतुरिति प्रज्ञानाम । ^{v}अस्य ^{v}सूर्यस्य ^{v}केतवः प्रज्ञालक्षणाः ^{v}रश्मयः मयूखाः ^{v}जनान् ^{v}अनु प्राणिनः अनुगताः । केतवस्त्विन्द्रियरूपेण प्राणिनः अनुगताः । रश्मयस्तु चक्षु ..... कत्वेन (?) अनुगताः इति विभागः । अस्यैवंरूपाः केतवो, रश्मयश्च सर्वजनाननुगता व्यदृश्यन्तेति संबन्धः । तत्र दृष्टान्तः – भ्राज दीप्तौ दीप्यमानः । अग्नयो यथा । वागिन्द्रियरूपेण तापपाकप्रकाशादिना ^{v}भ्राजन्तः ^{v}अग्नयः यथा ^{v}जनान् ^{v}अनु गताः तथैते इति संबन्धः । ^{v}उपयामगृहीतः ^{v}असि इत्यादिव्याख्यातसमानार्थः । भ्राजते दीप्यते इति भ्राट् तस्मै ^{v}भ्राजे ^{v}सूर्याय त्वां गृह्णामि । ^{v}सूर्याय भ्राजे त्वां सादयामि । हे ^{v}सूर्य ^{v}भ्राजस्वन्, यथा ^{v}देवेषु त्वं ^{v}भ्राजस्वान् भ्राजिष्ठोऽसि, तथा ^{v}मनुष्येषु अहं ^{v}भ्राजस्वान् ^{v}भूयासम् ॥१॥ (१५) ॥

[इत्यष्टमेऽध्याये पञ्चदशोऽनुवाकः ॥]

[अथ षोडशोऽनुवाकः]

सा– पञ्चदशेऽनुवाके तृतीयातिग्राह्यग्रहणभक्षणमन्त्रावुक्तौ । षोडशे गवामयनाख्यस्य संवत्सर-सत्रस्य विषुवन्नामके मध्यमेऽहनि सौर्यपशूपालम्भादूर्ध्वम् अतिग्राह्यग्रहणमुच्यते ॥

उदु॒ त्यं जा॒तवे॑दसं दे॒वं व॑हन्ति के॒तव॑: । दृ॒शे विश्वा॑य॒ सूर्य॑म् ।
उ॒प॒या॒मगृ॑हीतोऽसि॒ सूर्या॑य त्वा भ्रा॒ज ए॒ष ते॒ योनि॒: सूर्या॑य त्वा भ्रा॒जे ।
सूर्य॑ भ्राजस्व॒न् भ्राज॑स्वा॒ꣳस्त्वं दे॒वेष्वसि॑ ।
भ्राज॑स्वान॒हं म॑नु॒ष्ये॑षु भूयासम् ॥१॥(१६) ॥

उत् । ऊँ॒ इत्यू॑म् । त्यम् । जा॒तवे॑दस॒मिति॑ जा॒तऽवे॑दसम् ।
दे॒वम् । व॒हा॒न्ति॒ । के॒तव॑: । दृ॒शे । विश्वा॑य । सूर्य॑म् ॥ चं ॥१॥ (१६) ॥

कात्यायनः – “ सौर्य उपालम्भ्यः । उदु त्यम् इति ग्रहग्रहणम् ” (काश्रौ १३·२·११) इति । पाठस्तु– ‘ उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् । उपयामगृहीतोऽसि सूर्याय त्वा

---

2. B1 after रूपम् adds अदृश्रमिति । अदृश्रन्
13. P1 S1 C षोडशे for पञ्चदशे; P1 S1 C सप्तदशे for षोडशे
14. P1 °उपालम्भनात् for °उपालम्भात्
21. V1 S1 C अतिग्राह्य° for ग्रह°

भ्राज एष ते योनिः सूर्याय त्वा भ्राजे ' इति । ^{v}त्यं तं प्रसिद्धं ^{v}जातवेदसं जातानां वेदितारं ज्ञातप्रज्ञं वा ^{v}देवं देवनशीलम्। एवंगुणविशिष्टं महानुभावं ^{v}सूर्यं ^{v}केतवः प्रज्ञापका रश्मयः अश्वा इव ^{v}उद्वहन्ति उदयाचलादुद्गमयन्ति । किमर्थम् ? ^{v}विश्वाय । षष्ठ्यर्थे चतुर्थी । विश्वस्य सर्वस्य जगतः ^{v}दृशे दर्शनाय । प्रसिद्धमन्यत् ॥

अथ भक्षणमन्त्रपाठः– ' सूर्य भ्राजस्वन् भ्राजस्वाँस्त्वं देवेष्वसि । भ्राजस्वानहं मनुष्येषु भूयासम् ' इति । अतिग्राह्यान्तरेष्विव लक्षणमन्त्रस्यास्य पृथगाम्नातत्वात् । तद्वदत्राप्यनेन मन्त्रेण भक्षणं प्राप्तम् । तथापि कात्यायनेन " भक्षवर्जम् " (काश्रौ १३·२·११) इति भक्षणस्य निषिद्धत्वात् मन्त्राम्नातवैयर्थ्यपरिहाराय होमानन्तरमयं मन्त्रो जप्य इत्यभिप्रायः । अक्षरार्थस्तु पूर्ववद् योज्यः ॥

[इत्यष्टमेऽध्याये षोडशोऽनुवाकः]

आ– विषुवति ग्रहं गृह्णाति ' उदु त्यम् ' इति । सूर्यदेवत्या गायत्री देवानामार्षम् । यस्य ग्रहस्य संवत्सरसत्रस्य गवामयनाख्यस्य पूर्वषण्मासान्ते अहनि विषुवति विनियोगः । उत् इत्युपसर्गः । उ इति च निपातः । त्यत-शब्दस्य रूपं ' त्यम् ' इति । ^{v}त्यं ^{v}जातवेदसम् । जातं जातं वेत्ति वेदयतीति जातवेदाः । तं जातवेदसं सर्वज्ञं ^{v}देवं देवनादिगुणयुक्तम् । विद संज्ञाने । ^{v}केतवः प्रज्ञानात्मकाः असंख्याता रश्मयः ^{v}उ एव ^{v}उद्वहन्ति । ^{v}विश्वाय विश्वस्य सर्वस्य जगतः ^{v}दृशे दर्शनाय । सर्वलोकस्य दर्शनादिव्यवहारसिद्ध्यर्थम् उद्वहन्ति उद्गमयन्तीति संबन्धः । ' उपयामगृहीतोऽसि ' इत्यादि व्याख्यातसमानार्थः ॥१॥

[इत्यष्टमेऽध्याये षोडशोऽनुवाकः ॥१॥]

——

[अथ सप्तदशोऽनुवाकः]

सा– षोडशे विषुवत्सौर्यातिग्राह्यग्रहणभक्षणन्त्रावुक्तौ । सप्तदशे तत्रैव विकल्पितौ ग्रहणभक्षणमन्त्रावाम्नातौ ।

---

1. S1 C before इति add सूर्य भ्राजस्वन् भ्राजस्वाँस्त्वं देवेष्वसि । भ्राजस्वानहं मनुष्येषु भूयासम्; V1 इत्यन्तं for इति त्यं तं; S1 C om. त्यं तं

5. S1 C om. सूर्य .. भूयासमिति [L 6]

6. C एतेन for अनेन

9. P1 S1 C सप्तदशो° for षोडशो°

15. P1 उन्नव्यतीति for उद्गमयन्तीति

19. P1 S1 C सप्तदशे for षोडशे; V1 S1 C °अतिग्रहण° for °ग्रहण°; S1 C अष्टादशे for सप्तदशे

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आऽप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च ।
उपयामगृहीतोऽसि सूर्याय त्वा भ्राज एष ते योनिः सूर्याय त्वा भ्राजे ।
सूर्य भ्राजस्वन् भ्राजस्वाꣳस्त्वं देवेष्वसि ।
भ्राजस्वानहं मनुष्येषु भूयासम् ।।१।।(१७)।।

चित्रम् । देवानाम् । उत् । अगात् । अनीकम् ।
चक्षुः । मित्रस्य । वरुणस्य । अग्नेः ।
आ । अप्राः । द्यावापृथिवी इति द्यावाऽपृथिवी । अन्तरिक्षम् ।
सूर्यः । आत्मा । जगतः । तस्थुषः । च । क्रौं ॥१॥

तयोः पाठस्तु– ‘ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आऽप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च । उपयामगृहीतोऽसि सूर्याय त्वा भ्राज एष ते योनिः सूर्याय त्वा भ्राजे । सूर्य भ्राजस्वन् भ्राजस्वाꣳस्त्वं देवेष्वसि । भ्राजस्वानहं मनुष्येषु भूयासम्’ इति । ^{v}चित्रं रक्तश्वेतादिविविधवर्णं ^{v}देवानां द्योतमानानां रश्मीनाम् ^{v}अनीकं सैन्यसदृशमण्डलम् ^{v}उदगात् उदगच्छत् । कीदृशम् ? मित्रादिदेवोपलक्षितस्य कृत्स्नस्य प्राणजातस्येन्द्रियाधिष्ठातृत्वाच्चक्षुःस्थानीयम् । तन्मण्डलस्थः ^{v}सूर्यः ^{v}जगतः जङ्गमस्य ^{v}तस्थुषः स्थावरस्य ^{v}च ^{v}आत्मा । स च लोकत्रयम् ^{v}आऽप्राः सर्वतः पूरितवान् । ‘ उपयामगृहीतोऽसि ’ इत्यादि व्याख्यातं समानार्थम् ।।

[इत्यष्टमेऽध्याये सप्तदशोऽनुवाकः ॥]

आ– सूर्यश्चात्र परापररूपेण स्तूयते । ^{v}चित्रम् इति क्रियाविशेषणम् । ^{v}चित्रं विचित्रं यथा भवति तथा ^{v}उदगात् । आश्चर्यं हि [यः] स्वकीयेन ज्योतिषा शार्वरं तमोऽपहृत्यान्येषां ज्योतिरादाय गच्छतीति । यद्वा– चित्रं चायनीयं दर्शनाय उदगात् । ^{v}देवानां रश्मीनाम् ^{v}अनीकं मुखं प्रथममुदगात् । ततो देवानां रश्मीनाम् अनीकं रश्मिसंघातः, आदित्यमण्डलमिति यावत् । देवानामनीकं रश्मिसंघातः चित्रं विचित्रं चायनीयमादित्यमण्डलमुदगादित्यर्थः । यच्च ^{v}मित्रस्य ^{v}वरुणस्य ^{v}अग्नेः इत्येषां ^{v}चक्षुः दृष्टिः । स देवमनुष्यस्य जगतो

---

13. S1 C °वर्णानां for °वर्णं; V1 S1 C om. द्योतमानानां
14. P1 om. उदगच्छत्; V1 S1 C उदयच्छत् for उदगच्छत्
17. P1 S1 C अष्टादशो° for सप्तदशो°

यच्चक्षुस्तच्च आदित्यमण्डलम् । ‘ आऽप्राः द्यावापृथिवी अन्तरिक्षम् ’ । प्रा पूरणे । द्यावापृथिव्यौ तन्मध्यम् ᵛअन्तरिक्षं च स्वकीयेन प्रकाशेन ᵛआ आसमन्तात् ᵛअप्राः । पुरुषव्यत्ययः । अप्रात् आपूरितवान् । सूर्योदये हि रूपादयोऽभिव्यज्यन्ते । कालस्याऽपि विशिष्टक्रियाहेतुत्वं, यजमानानां च विशिष्टक्रियाकर्तृत्वं, देवानां च विशिष्टपूजाविषयत्वमित्येवमादिकं सर्वं सूर्योदयायत्तमित्यर्थः । स एव ᵛसूर्यः ᵛआत्मा ᵛजगतः ᵛतस्थुषः ᵛच, अस्य जगतः । गच्छतीति जगत् । तस्य जगतो जङ्गमस्य तस्थुषः स्थितिशीलस्य स्थावरस्य सूर्यः सर्वप्रेरको भगवानात्मा सर्वस्य प्रत्यगात्मभूतः परमात्मदृष्ट्या सूर्यः स्तूयते । ‘ उपयामगृहीतोऽसि ’ इत्यादिर्व्याख्यातसमानार्थः ॥१॥

[इत्यष्टमेऽध्याये सप्तदशोऽनुवाकः ॥४॥]

[अथ अष्टादशोऽनुवाकः]

सा– सप्तदशे विषुवत्सौर्यातिग्राह्यस्य विकल्पितौ ग्रहणभक्षणमन्त्रावुक्तौ । गवामयनस्योपान्त्ये महाव्रताख्येऽहनि प्राजापत्यपशूपालम्भादूर्ध्वं यो ग्रहो विहितस्तस्य वैकल्पिकग्रहणमन्त्रा अष्टादशादिष्वनुवाकेषूच्यन्ते ।

वि न॑ इन्द्र॒ मृधो॑ जहि नी॒चा य॑च्छ पृतन्य॒तः ।
यो अ॒स्माँ३ अ॑भि॒दास॒त्यध॑रं गमया॒ तम॑ः ।
उ॒प॒या॒मगृ॑हीतो॒ऽसीन्द्रा॑य त्वा वि॒मृध॑े
ए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा वि॒मृध॑े ।।१।। (१८)।।

वि । न॒ः । इ॒न्द्र॒ । मृध॑ः । ज॒हि॒ । नी॒चा । य॒च्छ॒ । पृ॒त॒न्य॒तः ।
यः । अ॒स्मान् । अ॒भि॒दास॒तीत्य॑भि॒ऽदास॑ति । अध॑रम् । ग॒म॒य॒ । तम॑ः ।
इन्द्रा॑य । त्वा॒ । वि॒मृ॒ध॒ इति॑ वि॒ऽमृध॑े । ए॒षः । ते॒ । योनि॑ः । इन्द्रा॑य ।
त्वा॒ । वि॒मृ॒ध॒ इति॑ वि॒ऽमृध॑े ॥ द्रयोः ॥१॥(१८)॥

कात्यायनः– “ ग्रहं गृह्णाति वि न इन्द्रः ’ इति । वाचस्पतिं विश्वकर्मंन्निति वा ” (काश्रौ १३·२·१८) इति । प्रथममन्त्रपाठस्तु– ‘ वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः । यो अस्मा३ अभिदासत्यधरं गमया तमः । उपयामगृहीतोऽसीन्द्राय त्वा विमृध एष ते योनिरिन्द्राय त्वा विमृधे ’

---

13. P1 S1 C एकोनविंशादिषु for अष्टादशादिषु
22. P1 before ग्रहं adds महाव्रतं

इति । हे ᵛइन्द्र, ᵛनः अस्माकं ᵛमृधः शत्रून् संग्रामान् [वा] विशेषेण ᵛजहि । किं च अस्मान् मारयितुं ᵛपृतन्यतः सेनामिच्छतः शत्रून् ᵛनीचा न्यग्भूतान् ᵛयच्छ उपरतान् कुरु । अन्यच्च - ᵛयः ᵛअस्मान् ᵛअभिदासति उपक्ष [प] यति । दसु उपक्षये । तं शत्रुम् ᵛअधरं निकृष्टं ᵛतमः नरकं ᵛगमय प्रापय । ᵛविमृधे विशिष्टसंग्रामवते ᵛइन्द्राय हे ग्रह, त्वां गृह्णामीति शेषः । शिष्टं स्पष्टम् ॥१॥

[इत्यष्टमेऽध्यायेऽष्टादशोऽनुवाकः ॥]

आ– महाव्रतीयं ग्रहं गृह्णाति ‘ वि न इन्द्रः ’ इति । शासो भरद्वाजः । ऐन्द्री अनुष्टुप् । हे ᵛइन्द्र, ᵛमृधः संग्रामोपलक्षितान् ᵛवि विशिष्टान् ᵛजहि छिन्धि । पृतना सेना । तत्र साधुः । संग्रामतः ᵛपृतन्यतः पृतन्यान् ᵛनीचा नीचान् क्षीणान् शत्रून् ᵛयच्छ । शत्रुः ᵛअस्मान् ᵛअभिदासति । दसु उपक्षये । आभिमुख्येन दसितुं उपलक्षयितुं य आगच्छति तं शत्रुम् ᵛअधरं निकृष्टं ᵛतमः नरकं ᵛगमय नरकं नयेति संबन्धः । ‘ उपयामगृहीतोऽसीन्द्राय त्वा विमृधे ’ । विशिष्टसंग्रामवते त्वां गृह्णामीति शेषः । ‘ एष ते योनिरिन्द्राय त्वा विमृधे ’, त्वां सादयामीति शेषः । अथवा ‘ वि न इन्द्रः ’ इति । हे इन्द्र, मृधः संग्रामात् पृतन्यतः; येऽत्रात्मनः पृतनामिच्छन्ति ते पृतन्यन्तः; तान् जहि विनाशय । नीचा नीचान् यच्छ निगृह्णीष्व । कश्चित् यः अस्मानभिदासति । दसु उपक्षये । उपक्ष[प] यति तम् अधरम् अधः निकृष्टं तमः नरकं गमय । समानमन्यत् ॥१॥

[इत्यष्टमेऽध्यायेऽष्टादशोऽनुवाकः ॥३॥]

[अथ एकोनविंशोऽनुवाकः]

सा– अष्टादशे महाव्रताख्येऽहनि विहितस्य ग्रहस्य ग्रहणमन्त्र उक्तः । एकोनविंशे तत्रैव विकल्पितो द्वितीयो ग्रहणमन्त्र उच्यते ।

वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम ।
स नो विश्वानि हवनानि जोषद्विश्वशंभूरवसे साधुकर्मा ।
उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मण
एष ते योनिरिन्द्राय त्वा विश्वकर्मणे ॥१॥(१९)॥

---

1. V1 S1 C om. संग्रामान्
2. V1 S1 C यच्चान्य· for अन्यच्च यः
3. V1 S1 C लक्षयति for क्ष[प]यति; V1 S1 C om. दसु उपक्षये
4. V1 S1 C om. विमृधे
13. B1 after संग्रामात् adds स हि संग्राममेत्य
18. C S1 P1 एकोनविंशे for अष्टादशे; C S1 P विंशे for एकोनविंशे

वा॒चः । पति॑म् । वि॒श्वक॑र्मा॒णमिति॑ वि॒श्वऽक॑र्माणम् । ऊ॒तये॑ ।
म॒नो॒जुव॒मिति॑ म॒न॒ःऽजुव॑म् । वाजे॑ । अ॒द्य । हु॒वे॒म॒ ।
सः । न॒ः । विश्वा॑नि । हव॑नानि । जो॒ष॒त् ।
वि॒श्वशं॑भू॒रिति॑ वि॒श्वऽशं॑ऽभूः । अव॑से । सा॒धुक॒र्मेति॑ सा॒धुऽक॑र्मा ।
इन्द्रा॑य । त्वा॒ । वि॒श्वक॑र्मण॒ इति॑ वि॒श्वऽक॑र्मणे ।
ए॒षः । ते॒ । योनि॑ः । इन्द्रा॑य । त्वा॒ । वि॒श्वक॑र्मण॒ इति॑ वि॒श्वऽक॑र्मणे ॥खुः॥ ॥१॥(१९)॥

पाठस्तु– ' वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम । स नो विश्वानि हवनानि जोषद्विश्वशंभूरवसे साधुकर्मा । उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मण एष ते योनिरिन्द्राय त्वा विश्वकर्मणे ' इति । ᵛवाचस्पतिं वाचां पालयितारम् । ᵛविश्वकर्माणं विश्वानि समस्तजगदुत्पत्त्यादिकर्माणि यस्य स तथोक्तः, तम् । ᵛमनोजुवम् । जूरिति जवनाम । मनसो जूरिव जव इव जवो यस्य स मनोजूः । तादृशमिन्द्रं ᵛवाजे महाव्रतीयलक्षणेऽन्नविषये ᵛअद्य अस्मिन्नहनि ᵛऊतये रक्षणाय ᵛहुवेम आह्वयामः । ᵛसः इन्द्रः, ᵛनः अस्माकं ᵛविश्वानि ᵛहवनानि सर्वाण्याह्वानानि ᵛअवसे । अन्ननाम । अन्नसमृद्ध्यै रक्षणाय वा ᵛजोषत् जुषतां युष्मदाह्वानं साधु साध्विति सेवताम् । कीदृश इन्द्रः ? ᵛविश्वशंभूः । विश्वस्य शं सुखमस्माद् भवतीति विश्वशंभूः । ᵛसाधुकर्मा समीचीनकर्मा । शिष्टं स्पष्टम् ॥१॥

[इत्यष्टमेऽध्याये एकोनविंशोऽनुवाकः ॥]

आ– द्वितीयो मन्त्रविकल्पः । ' वाचस्पातिम् ' इति । विश्वकर्मदेवत्या त्रिष्टुप् । इन्द्रात्मना विश्वकर्मा स्तूयते । ᵛवाचस्पातिम् इन्द्रम् । " इन्द्रो वाचस्पतिः " इति श्रुतेः । ᵛविश्वकर्माणम् । समस्तजगदुत्पत्त्यादीनि कर्माणि यस्य स विश्वकर्मा । तं विश्वकर्माणं [विश्वस्य] कर्तारम् । ᵛमनोजुवम् । जूरिति जवनाम । मनसः जूरिव जव इव जवो यस्य स मनोजूः, तं मनोजुवम् । भगवन्तं विश्वकर्माणं ᵛवाजे महाव्रतीयलक्षणे विषये ᵛअद्य आस्मिन्नहनि त्वां ᵛहुवेम । अव रक्षणे इत्यस्य रूपम् ᵛऊतये इति । अवनाय रक्षणाय ᵛविश्वशंभूः, विश्वस्य सुखमस्माद्भवतीति विश्वशंभूः । ᵛसाधुकर्मा समीचीनकर्मा । ᵛसः विश्वकर्मा ᵛनः अस्माकं ᵛविश्वानि ᵛहवनानि आह्वानानि ᵛजोषत् जुषताम् । युष्मदाह्वानं साधु साध्विति सेवताम् । ᵛअवसे । अव इत्यन्ननाम । अवसे अन्नाय अन्नसमृद्धये अस्माकं रक्षणाय । उपयामगृहीतोऽसीत्यादि समानार्थः ॥१॥

[इत्यष्टमेऽध्याये एकोनविंशोऽनुवाकः ॥]

---

11. V1 S1 C after इन्द्रम् add अवसे । अन्ननाम । अन्नसमृद्ध्यै ।
16. P1 S1 C विंशो° for एकोनविंशो°

[अथ विंशोऽनुवाकः]

सा– एकोनविंशे महाव्रताख्ये द्वितीयो वैकल्पिको ग्रहणमन्त्र उक्तः । विंशे तत्रैव वैकल्पिको ग्रहणमन्त्र उच्यते ।

विश्व॑कर्मन् ह॒विषा॑ वावृधा॒नः स्व॒यं य॑जस्व पृथि॒वीमु॒त द्याम् ।
मुह्य॑न्त्व॒न्ये अ॒भित॑ः स॒पत्ना॑ इ॒हास्माकं॑ म॒घवा॑ सू॒रिर॑स्तु ।
उ॒प॒या॒मगृ॑हीतो॒ऽसीन्द्रा॑य त्वा वि॒श्वक॑र्मण
ए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा वि॒श्वक॑र्मणे ।।१।।(२०)।।

विश्व॑कर्म॒न्नि॒ति विश्व॑ऽकर्मन् । ह॒विषा॑ । वा॒वृ॒धा॒नः । व॒वृ॒धा॒न इति॑ व॒वृ॒धा॒नः ।
स्व॒यम् । य॒ज॒स्व॒ । पृ॒थि॒वीम् । उ॒त । द्याम् ।
मुह्य॑न्तु । अ॒न्ये । अ॒भित॑ः । स॒पत्ना॒ इति॑ स॒ऽपत्ना॑ः ।
इ॒ह । अ॒स्माक॑म् । म॒घवेति॑ म॒घऽवा॑ । सू॒रिः । अ॒स्तु॒ । म्यों ॥१॥

पाठस्तु–' विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् । मुह्यन्त्वन्ये अभितः सपत्ना इहास्माकं मघवा सूरिरस्तु । उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मण एष ते योनिरिन्द्राय त्वा विश्वकर्मणे ' इति । हे vविश्वकर्मन् इन्द्र, त्वं महाव्रतीयलक्षणेन vहविषा vवावृधानः अतिशयेन वर्धमानः vस्वयं त्वं vपृथिवीं भूलोकम् vउत अपि vद्यां द्युलोकं vयजस्व यजनं पूजनं कुरुष्व । एवंविधं त्वदीयं कर्म दृष्ट्वा vअन्ये तव vसपत्नाः शत्रवः vअभितः सर्वतः vमुह्यन्तु संमोहं गच्छन्तु । vइह अस्मिन् कर्मणि vअस्माकं [vमघवा] समग्रधनसंपन्नः vसूरिः पण्डितः vअस्तु । अन्यद् गतम् ॥१॥

[इत्यष्टमेऽध्याये विंशोऽनुवाकः ॥]

आ– ' विश्वकर्मन् हविषा ' इति ऐन्द्री वैश्वकर्मणी च त्रिष्टुप् यजुरन्ता । हे vविश्वकर्मन्, vहविषा अनेन महाव्रतलक्षणेन हविषा vवावृधानः अतिशयेन वर्धमानः vस्वयं त्वं vपृथिवीम् , vउत अपि vद्यां vयजस्व यजनं कुरुष्व । एवंविधं युष्मत्कर्म दृष्ट्वा vअन्ये युष्माकं vसपत्नाः शत्रवः vअभितः सर्वतः vमुह्यन्तु संमोहं गच्छन्तु । vइह अस्मिन् कर्मणि अस्माकं vमघवा समग्रधनसंपन्नः vसूरिः पण्डितः vअस्तु । उपयामगृहीतोऽसीत्यादिर्व्याख्यातः ॥१॥

[इत्यष्टमेऽध्याये विंशोऽनुवाकः ॥]

---

2. P1 S1 C विंशे for एकोनविंशे°; P1 S1 C एकविंशे for विंशे
15. V1 S1 C after अपि add त्वां; V1 S1 C °विधत्वदीय° for °विधं त्वदीयं
18. S1 C एकविंशो°, for विंशो P1 एकोनविंशो for विंशो°

[अथ एकाविंशोऽनुवाकः]

सा– विंशे तृतीयो वैकल्पिकग्रहण मन्त्र उक्तः । एकाविंशे तत्रैवान्यो वैकल्पिको ग्रहणमन्त्र आम्नातः ।

विश्वकर्मन् हविषा वर्धनेन त्रातारमिन्द्रमकृणोरयुध्यम् ।
तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथाऽसत् ।
उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मण
एष ते योनिरिन्द्राय त्वा विश्वकर्मणे ॥१॥(२१)॥

विश्वकर्मन्निति विश्वऽकर्मन् । हविषा । वर्धनेन ।
त्रातारम् । इन्द्रम् । अकृणोः । अयुध्यम् ।
तस्मै । विशः । सम् । अनमन्त । पूर्वीः ।
अयम् । उग्रः । विहव्य इति विऽहव्यः । यथा । असत् ॥त्र्यैं॥१॥ (२१) ॥

पाठस्तु– ‘ विश्वकर्मन् हविषा वर्धनेन त्रातारमिन्द्रमकृणोरयुध्यम् । तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत्। उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मण एष ते योनिरिन्द्राय त्वा विश्वकर्मणे ’ इति । हे ᵛविश्वकर्मन्, त्वं ᵛवर्धनेन वर्धमानेन ᵛहविषा ᵛइन्द्रं ᵛत्रातारं जगतः रक्षकं कृतवानसि । किं च – युद्धार्हो युध्यः । न विद्यते युध्यो यस्य स ᵛअयुध्यः । तम् इन्द्रम् अयुध्यम् अप्रतिभटमकरोरित्यर्थः । ᵛतस्मै तादृशायेन्द्राय ᵛपूर्वीः पूर्वा वसिष्ठादयः ᵛविशः सर्वाः प्रजाः ᵛसमनमन्त सम्यङ्नताः । ᵛअयम् इन्द्रः ᵛउग्रः उद्गूर्णबलो विविधेषु कार्येषु आह्व(? हू)यत इति ᵛविहव्यः । तादृशः ᵛयथा येन प्रकारेण ᵛअसत् स्यात् तथा तस्मै समनमन्तेति संबन्धः । अन्यत् गतम् ॥१॥

[इत्यष्टमेऽध्याये एकविंशोऽनुवाकः ।]

आ– अथाऽपरो मन्त्रविकल्पः । ‘ विश्वकर्मन् हविषा वर्धनेन ’ इति । ऐन्द्री वैश्वकर्मणी त्रिष्टुप् । हे ᵛविश्वकर्मन् ᵛवर्धनेन वर्धमानेन ᵛहविषा ᵛत्रातारम् ᵛइन्द्रं जगतः त्रातारम् ᵛअकृणोः कृतवानसि । किंच ᵛअयुध्यम् । युध संप्रहारे । युद्धार्हो [युध्यः, न युध्यः अयुध्यस्तम् । तस्मै चैवंप्रभावायेन्द्राय ᵛविशः] सर्वाः प्रजाः ᵛपूर्वीः पूर्व्यः । पूर्वे वासिष्ठादयः । इदानींतना अपि

14- C S1 VI om. वर्धमानेन
15. P1 अकार्षीर् for अकरोर्
16. V1 S1 C पूर्वे विशिष्टायो for पूर्वा वासिष्ठादयो
17. V1 S1 C om. उग्रः; P1 om. यथा
19. P1 C S1 द्वाविंशो° for एकविंशो°

ᵛसमनमन्त सम्यङ्नताः । अयमुग्रः । ᵛअयम् इन्द्रः ᵛउग्रः उद्गूर्णवज्रः ᵛविहव्यः च । विविधेषु कार्येषु आह्व(?हू)यत इति विहव्यः । ᵛयथा येन प्रकारेण ᵛअसत् स्यात् तथा तस्मै समनमन्तेति संबन्धः । उपयामगृहीतोऽसीत्यादिर्व्याख्यातसमानार्थः ॥१॥

[इत्यष्टमेऽध्याये एकविंशोऽनुवाकः]

[अथ द्वाविंशोऽनुवाकः]

सा– अष्टादशादिषु चतुर्ष्वनुवाकेषु गवामयनस्योपान्ते महाव्रताख्येऽहनि वैकल्पिका ग्रहोपादानमन्त्रा उक्ताः । द्वाविंशे अदाभ्यग्रहस्य मन्त्रा उच्यन्ते ॥

उ॒प॒या॒मगृ॑हीतोऽस्य॒ग्नये॑ त्वा गाय॒त्रछ॑न्दसं
गृ॒ह्णा॒मीन्द्रा॑य त्वा त्रि॒ष्टुप्छ॑न्दसं गृह्णामि ॥
विश्वे॑भ्यस्त्वा दे॒वे॑भ्यो॒ जग॑च्छन्दसं गृह्णाम्यनु॒ष्टुप् ते॑ऽभिग॒रः ॥१॥

अ॒ग्नये॑ । त्वा॒ । गा॒य॒त्रच्छ॑न्दस॒मिति॑ गा॒य॒त्रऽछ॑न्दसम् । गृ॒ह्णा॒मि॒ ।
इन्द्रा॑य । त्रि॒ष्टुप्छ॑न्दसम् । त्रि॒स्तुप्छ॑न्दस॒मिति॑ त्रि॒स्तुप्ऽछ॑न्दसम् ।
विश्वे॑भ्यः । दे॒वेभ्यः॑ । जग॑च्छन्दस॒मिति॒ जग॑त्ऽछन्दसम् ।
अ॒नु॒ष्टुप् । अ॒नु॒स्तु॒बित्य॑नु॒ऽस्तुप् । ते॒ । अ॒भि॒ग॒र इत्य॑भि॒ऽग॒रः ॥ बुं ॥१॥

कात्यायनः– "अदाभ्यं गृह्णात्यासिच्य निग्राभ्याः पात्रे तस्मिंस्तूष्णीं पात्रे तस्मिंस्त्रीनंशूनवधायाग्नये त्वा गायत्रच्छन्दसमिति प्रतिमन्त्रमुपयामः । सर्वत्राविशेषात्" (काश्रौ १२.५.१३-१५) इति । औदुम्बरे पात्रे वसतीवर्याख्या अप आनीय तस्मिंस्तिस्रः सोमलताः प्रक्षिप्य 'अग्नये त्वा' इति त्रिभिर्मन्त्रैः क्रमेण अदाभ्यं गृह्णाति । 'उपयामगृहीतोऽसि इत्येतत् त्रिष्वपि मन्त्रेषु आदावनुषञ्जनीयम् । सर्वशेषत्वादाम्नातस्येति सूत्राऽभिप्रायः ॥

तत्र प्रथममन्त्रपाठस्तु– 'उपयामगृहीतोऽस्यग्नये त्वा गायत्रच्छन्दसं गृह्णामि' इति । हे सोम, त्वम् उपयामेन ग्रहेण गृहीतोऽसि । हे ग्रह, ᵛअग्नये अग्निप्रीत्यर्थं गायत्रच्छन्दसम् । गायत्री छन्दो यस्य ग्रहस्य तादृशं त्वां ᵛगृह्णामि ।

---

6. S1 C P1 एकोनविंशादिषु for अष्टादशादिषु
7. S1 C P1 त्रयोविंशे for द्वाविंशे
16. S1 C P1 औदुम्बर॰ for औदुम्बरे
20. P1 V1 om. तत्र
22. C S1 om. ग्रहस्य

द्वितीयमन्त्रपाठस्तु– ‘ इन्द्राय त्वा त्रिष्टुप्छन्दसं गृह्णामि ’ इति । हे ग्रह, vत्रिष्टुप्छन्दसं त्वां vगृह्णामि ।

तृतीयमन्त्रपाठस्तु– ‘ विश्वेभ्यस्त्वा देवेभ्यो जगच्छन्दसं गृह्णामि ’ इति । जगती छन्दो यस्य ग्रहस्य सः । तादृशं त्वां ग्रहं vगृह्णामि ॥

कात्यायनः– “ अनुष्टुप् त इत्युक्त्वा ” (काश्रौ १२.५.१७) इति । एनं मन्त्रमुच्चारयेत् । अभिगर इति मन्त्रशेषः । हे सोम, vते तव vअनुष्टुप् छन्दः vअभिगरः । गॄ स्तुतौ । अभिषव इत्यर्थः ॥१॥

* * *

आ– अदाभ्यं गृह्णाति । ‘ उपयामगृहीतोऽस्यग्नये त्वा ’ इत्यादीनि देवानामार्षाणि अदाभ्यदेवत्यानि यजूंषि । ‘ अग्नये त्वा गायत्रच्छन्दसं गृह्णामि ’ । गायत्री छन्दो यस्य ग्रहस्य सः । तं vगायत्रच्छन्दसं vगृह्णामि । एकग्रहणम् । ‘ इन्द्राय त्वा त्रिष्टुप्छन्दसं गृह्णामि ’ । द्वितीयग्रहणम् । ‘ विश्वेभ्यस्त्वा देवेभ्यो जगच्छन्दसं गृह्णामि ’ । तृतीयग्रहणम् । एवं सवनदेवताभ्यः स्वच्छन्दस्कं सोमं गृहीत्वा अनन्तरमाह– ‘ अनुष्टुप् तेऽभिगरः ’ इति । हे सोम, vते तव vअनुष्टुप् । गॄ स्तुतौ । vअभिगरः अभिषव इत्यर्थः ॥१॥

* * *

व्रेशी॑नां त्वा॒ पत्म॒न्ना धू॑नोमि कुकू॒नना॑नां त्वा॒ पत्म॒न्ना धू॑नोमि
भ॒न्दना॑नां त्वा॒ पत्म॒न्ना धू॑नोमि॒ मध्व॑न्तमानां त्वा॒ पत्म॒न्ना धू॑नोमि ।
शु॒क्रं त्वा॑ शु॒क्र आ धू॑नो॒म्यह्नो॑ रू॒पे सूर्यँ॑स्य र॒श्मिषु॑ ॥२॥
क॒कु॒हꣳ रू॒पꣳ वृ॑ष॒भस्य॑ रोचते
बृ॒हस्तोम॒ः सोम॑स्य पु॒रो॒गाः शु॒क्रः शु॒क्रस्य॑ पु॒रो॒गाः ।
यत् ते॑ सो॒मादा॑भ्यं॒ नाम॒ जागृ॑वि॒ तस्मै॑ त्वा गृह्णामि॒ ।
तस्मै॑ ते सोम॒ सोमा॑य॒ स्वाहा॑ ॥३॥

---

4. S1 V1 C om. सः ।
5. S1 V1 C एवं for एनं
10;11. B1 गृह्णासि for गृह्णामि

व्रेशी॑नाम् । त्वा॒ । पत्म॑न् । आ । धू॒नो॒मि॒ । कु॒कू॒नना॑नाम् ।
भ॒न्दना॑नाम् । मध्व॑न्तमाना॒मिति॒ मधु॑ऽअन्तमा॑नाम् ।
शु॒क्रम् । त्वा॒ । शु॒क्रे । आ । धू॒नो॒मि॒ ।
अह्न॑ः । रू॒पे । सूर्य॑स्य । र॒श्मिषु॑ ॥ क्यैं ॥२॥
क॒कु॒हम् । रू॒पम् । वृ॒ष॒भस्य॑ । रो॒च॒ते॒ ।
बृ॒हत् । सोम॑ः । सोम॑स्य । पु॒रो॒गा इति॑ पु॒रः॒ऽगाः ।
शु॒क्रः । शु॒क्रस्य॑ । पु॒रो॒गा इति॑ पु॒रः॒ऽगाः ।
यत् । ते॒ । सो॒म॒ । अदा॑भ्यम् । नाम॑ । जागृ॑वि । तस्मै॑ । त्वा॒ । गृ॒ह्णा॒मि॒ ।
तस्मै॑ । ते॒ । सो॒म॒ । सोमा॑य । स्वाहा॑ ॥ ज्रुं ॥३॥

सा– कात्यायनः– "आधूनोत्यंशुभिर्व्रेशीनां त्वेति गच्छन्नाहवनीयम्" (काश्रौ १२·५·१७) इति। आहवनीयस्य समीपं गच्छन्नंशुभिरदाभ्यग्रहस्थान्युदकानि चालयेत्। पाठस्तु– 'व्रेशीनां त्वा पत्मन्ना धूनोमि कुकूननानां त्वा पत्मन्ना धूनोमि भन्दनानां त्वा पत्मन्ना धूनोमि मध्वन्तमानां त्वा पत्मन्ना धूनोमि। शुक्रं त्वा शुक्र आधूनोम्यह्नो रूपे सूर्यस्य रश्मिषु ॥ ककुहꣳ रूपꣳ वृषभस्य रोचते बृहत् सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगाः। यत् ते सोमादाभ्यं नाम जागृवि तस्मै त्वा गृह्णामि' इति। ^{v}व्रेशीनां व्रजतो मेघस्योदरे शेरत इति व्रेश्यो मेघोदरस्था आपस्तासाम्। ^{v}कुकूननानाम्। कु शब्दे। अत्यर्थं कुवन्त्यः शब्दं कुर्वाणा नमन्ति प्रह्वीभवन्तीति कुकूनना मेघ्या आपस्तासां च। ^{v}भन्दनानाम्। भदि कल्याणे सुखे च। कल्याणकारिण्यः सुखकारिण्यो वा भन्दना आपस्तासां च। ^{v}मध्वन्तमानाम्। मधुवत् स्वादुतमानाम्। एवंभूतानामपां ^{v}पत्मन् पतने निमित्ते हे सोम, त्वाम् ^{v}आधूनोमि कम्पयामि। किं च – ^{v}शुक्रं शुद्धमक्लिष्टकर्माणं त्वाम् ^{v}शुक्रे अक्लिष्टकर्मणि शुद्धे निग्राभ्यालक्षणे उदके ^{v}आ धूनोमि। ^{v}अह्नः ^{v}रूपे दिवसस्य रूपे शुक्लत्वसाधारण्यात् सूर्यस्य रश्मिषु भासमानत्वसाम्यात्। हे सोम, त्वाम् ^{v}आधूनोमि। हे सोम, ^{v}वृषभस्य श्रेष्ठस्य तव ^{v}ककुहं ककुभम्। छान्दसो हकारः। ककुभमिति महन्नामसु पठितम्। महत् ^{v}रूपम्। यद्वा–ककुभो दिशो व्यापि, ^{v}रोचते दीप्यते। ^{v}बृहत् महान् ^{v}सोमः एव ^{v}सोमस्य ^{v}पुरोगाः पुरोगामी, ^{v}शुक्रस्य शुद्धस्य सोमस्य तव ^{v}शुक्रः तेजस्वी आदित्यः ^{v}पुरोगाः पुरोगामी, यस्मादेवं तस्मात् हे ^{v}सोम, ^{v}ते त्वदीयम् ^{v}अदाभ्यम् अनुपाहिंसितं ^{v}जागृवि जागरणशीलं ^{v}यत् ^{v}नाम् अस्ति ^{v}तस्मै त्वां ^{v}गृह्णामि।

कात्यायनः– "तस्मै त इति जुहोति" (काश्रौ १२·५·१७) इति। पाठस्तु– 'तस्मै ते सोम सोमाय स्वाहा' इति। हे ^{v}सोम, तादृशाय ^{v}सोमाय ^{v}ते तुभ्यं हुतमस्तु ॥ २–३ ॥

---

11. C S1 अशुाचिर् for अंशुभिर्
15. C S1 कुशब्दं for कु शब्दे
16. C कुर्वन्त्यः, V1 कुवत्यः for कुवन्त्यः
18. V1 S1 C om. निमित्ते
19. V1 S1 C निग्राभ्य° for निग्राभ्या°
20. V1 S1 C om. शुक्लत्वसाधारण्यात् and भासमानत्वसाम्यात्

आ– ग्रहपात्रस्थासु निग्राभ्यासु अंशूनाधूनोति– ‘ व्रेशीनां त्वा ’ इति । सौम्यानि यजूꣳषि । ᵛव्रेशीनां मेघस्य व्रजतः उदरे शेरत इति व्रेश्यः मेघोदरस्था आपः । तासां व्रेशीनाम् अपां ᵛपत्मन् पतने, हे सोम, त्वाम् ᵛआधूनोमि कम्पयामि । ᵛकुकूननानाम् । कु शब्दे । अत्यर्थं कुवन्त्यः शब्दं कुर्वाणा नमन्ति प्रह्वीभवन्तीति कुकूननाः मेध्या आपः । तासां कुकूननानाम् अपां ᵛपत्मन् पतने, हे सोम, त्वाम् ᵛआधूनोमि कम्पयामि । ‘ भन्दनानां त्वा ’ । भदि कल्याणे सुखे च । कल्याणकारिण्यः सुखकारिण्यो वा भन्दनाः । तासां ᵛभन्दनानां ᵛपत्मन् पतने, हे सोम त्वाम् ᵛआधूनामि । ᵛशुक्रं शुद्धम् अक्लिष्टकर्माणं त्वां ᵛशुक्रे अक्लिष्टकर्मणि शुद्धे निग्राभ्यालक्षणे उदके ᵛआधूनोमि । ᵛअह्नः ᵛरूपे दिवसस्य रूपे ᵛसूर्यस्य ᵛरश्मिषु हे सोम, त्वामाधूनोमि इति संबन्धः ॥ २ ॥

‘ कुकुहꣳ रूपम् ’ इति । ककुहमिति छान्दसो भकारस्य हकारः । ककुभमिति महन्नामसु पठितम् । हे सोम, ᵛवृषभस्य श्रेष्ठस्य सोमस्य ते तव ᵛककुहं [महत्] ᵛरूपम् । यद्वा-ककुभो दिशो व्यापि बृहद्रूपं ᵛरोचते दीप्यते । प्रभावतः ᵛबृहत् ᵛसोमः एव ᵛसोमस्य ᵛपुरोगाः पुरोगामी । ᵛशुक्रस्य सोमस्य ᵛशुक्रः आदित्यः ᵛपुरोगाः पुरोगामी । अतः कारणात्– ‘ यत् ते सोमादाभ्यं नाम जागृवि ’ । हे ᵛसोम, ᵛअदाभ्यम् अनुपहिंसितं ᵛजागृवि जागरणशीलं ᵛते ᵛयत् जागृवीति ते ᵛनाम ᵛतस्मै ᵛत्वा ᵛगृह्णामि । हे ‘ सोम । ‘ सोमाय स्वाहा ’ इति जुहोति ॥३॥

उ॒शिक् त्वं दे॑व सोमा॒ग्नेः प्रि॒यं पाथोऽपी॑हि
व॒शी त्वं दे॑व सो॒मेन्द्र॑स्य प्रि॒यं पाथोऽपी॑हि ।
अ॒स्मत्स॑खा॒ त्वं दे॑व सोम॒ विश्वे॑षां दे॒वानां॑
प्रि॒यं पाथोऽपी॑हि ॥४॥ (२२) ॥ हरिः ॐ ॥

---

4. B1 कुहूननानां कुशब्देन इत्यर्थं कुर्वन्त्यः for कुकूननानां, कु शब्दे, अत्यर्थं कुर्वन्त्यः; B1 कुहूननाः; for कुकूननाः; B1 मेधाः for मेध्याः
5. B1 कुहूननाम् for कुकूननानाम्
6. B1 स्तुतौ for सुखे
8. B1 अनिष्टकर्मणा त्वां शुक्रे अश्लिष्टकर्माणि for अक्लिष्टकर्माणं त्वां शुक्रे अक्लिष्टकर्मणि
15. B1 °शील for °शीलं

उ॒शिक् । त्वम् । दे॒व॒ । सो॒म॒ । अ॒ग्नेः । प्रि॒यम् । पाथ॑ः । अपि॑ । इ॒हि॒ ।
व॒शी । इन्द्र॑स्य ।
अ॒स्मत्स॒खेत्य॒स्मत्ऽस॑खा । त्वम् । दे॒व॒ । सो॒म॒ । विश्वे॑षाम् ।
दे॒वाना॑म् । प्रि॒यम् । पाथ॑ः । अपि॑ । इ॒हि॒ ॥ गाः ॥४॥(२२)॥

[कदाचन तिस्रः ॥३॥ श्रदस्मै ॥१॥ वाममद्य ॥१॥ सावित्रः ॥१॥ सुशर्मेत्येकैका ॥१॥ बृहस्पतिः चतस्रः ॥४॥ हरिरसि द्वे ॥२॥ युक्ष्वा हि ॥१॥ आ तिष्ठ ॥१॥ इन्द्रमित्येकैका ॥१॥ यस्मान्न जात इति द्वे ॥२॥ अग्न आयूꣳषि ॥१॥ अग्ने पवस्व ॥१॥ उत्तिष्ठन् ॥१॥ अदब्धम् ॥१॥ उदु त्यम् ॥१॥ चित्रमेका ॥१॥ वि नः ॥१॥ वाचस्पतिम् ॥१॥ विश्वकर्मन्नेका ॥१॥ ।विश्वकर्मान्नित्येकैका ॥१॥ अग्नये त्वा चतस्रः ॥४॥ इति द्वाविंशत्यनुवाकेषु द्वात्रिंशत् ॥३२॥]

इति शुक्लयजुर्वेदकाण्वसंहितायाम् अष्टमोऽध्यायः ॥८॥

सा- कात्यायनः – “ अंशून् सोमे निदधाति उशिक् त्वमिति प्रतिमन्त्रम् ” (काश्रौ १२·५·१८) इति । मन्त्रत्रयेणांशून् सोमे स्थापयेत् । तत्र प्रथममन्त्रपाठस्तु– ‘उशिक् त्वं देव सोमाग्ने प्रियं पाथोऽपीहि’ इति । हे दीप्यमान सोम, ᵛउशिक् कामयमानः ᵛत्वम् ᵛअग्नेः ᵛप्रियं ᵛपाथः अन्नम् ᵛअपीहि प्राप्नुहि ॥

द्वितीयमन्त्रपाठस्तु– ‘ वशी त्वं देव सोमेन्द्रस्य प्रियं पाथोऽपीहि ’ इति । हे दीप्यमान ᵛसोम, ᵛवशी ᵛत्वम् ᵛइन्द्रस्य ᵛप्रियम् अन्नं प्राप्नुहि ॥

तृतीयमन्त्रपाठस्तु– ‘ अस्मत्सखा त्वं देव सोम विश्वेषां देवानां प्रियं पाथोऽपीहि ’ इति । हे दीप्यमान ᵛसोम, अस्मत्सखीभूतः ᵛत्वं ᵛविश्वेषां ᵛदेवानाम् अभिरुचितमन्नं प्राप्नुहि ॥४॥

[इत्यष्टमेऽध्याये द्वाविंशोऽनुवाकः ॥]

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो विद्याद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे काण्वसंहिताभाष्ये अष्टमोऽध्यायः ॥८॥

10,11. A om. इति
12,13. S1 om. इति प्रतिमन्त्रम् ... प्रियं पा (L. 4)
13. C V1 S1 before मन्त्र° add °उशिक्त्वमिति
14. V1 S1 C om. प्राप्नुहि
18. C S1 P1 त्रयोविंशो° for द्वाविंशो°

आ– अंशून् सोमे निदधाति– ‘ उशिक् त्वम् ’ इति । लिङ्गोक्तदेवत्यं यजुः । वश कान्तौ । क्विप्-संप्रसारणादौ कृते उशिगिति भवति । यतः ^{v}उशिक् कान्तः वल्लभः ^{v}त्वं हे ^{v}देव, अतः ^{v}अग्नेः ^{v}प्रियं ^{v}पाथः अन्नम् ^{v}अपीहि अप्येहि । हे ^{v}देव ^{v}सोम, [यतः] ^{v}इन्द्रस्य ^{v}त्वं ^{v}वशी अतः ^{v}इन्द्रस्य ^{v}प्रियं ^{v}पाथः ^{v}अपीहि । ^{v}देव ^{v}सोम, [यतस्त्वम्] ^{v}अस्मत्सखा असि, अतः त्वं ^{v}विश्वेषां ^{v}देवानां ^{v}प्रियम् अभिरुचितं ^{v}पाथः अन्नं ^{v}अपीहि ॥४॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य–श्रीवासुदेवपुरीपूज्यपादपरमकारुण्यासादित-
श्रीकृष्णभक्तिसाम्राज्यस्य श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदि-
श्रीमदानन्दबोधभट्टोपाध्यायेन विरचिते काण्ववेदमन्त्रभाष्यस्य संग्रहे
अष्टमोऽध्यायः समाप्तः ॥

नवमोऽध्यायः

[अथ प्रथमोऽनुवाकः]

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अष्टमेऽध्याये तृतीयसवनसंबन्धिनामादित्यग्रहादीनां षोडश्यतिग्राह्यादीनां ग्रहणासादानमन्त्रा उक्ताः । नवमे उपांश्वन्तर्यामादीनां ग्रहाणामवेक्षणमन्त्रा दक्षिणहोमादिमन्त्राश्चोच्यन्ते ।

प्रा॒णाय॑ मे वर्चो॒दा वर्च॑से पवस्व
व्या॒नाय॑ मे वर्चो॒दा वर्च॑से पवस्व ।
उ॒दा॒नाय॑ मे वर्चो॒दा वर्च॑से पवस्व
वा॒चे मे॑ वर्चो॒दा वर्च॑से पवस्व ॥१॥

प्रा॒णाय॑ । मे॒ । व॒र्चो॒दा इति॑ व॒र्चः॒ऽदाः । वर्च॑से । प॒व॒स्व॒ ।
व्या॒नायेति॑ वि॒ऽआ॒नाय॑ । उ॒दा॒नायेत्यु॑त्ऽआ॒नाय॑ । वा॒चे ॥ ठो ॥१॥

सा– कात्यायनः– "ग्रहानवेक्षयति यथागृहीतमवकाशान् वाचयन् प्राणाय म इति प्रतिमन्त्रम् ॥ उपांशुसवनं द्वितीयम् । आश्विनं षष्ठम् । शुक्रामन्थिनौ युगपत्" (काश्रौ ९.७.९-१२) इति । अयमर्थः– ज्ञातिप्रियाननूचानान् यजमानानवकाशाख्यान् 'प्राणाय मे' इत्यादिमन्त्रान् वाचयन् प्रतिमन्त्रं ग्रहणक्रमेणोपांश्वादीन् दर्शयति । उपांशुसवनाख्यो ग्रहो वा द्वितीयो भवति । बहिष्पवमानोत्तरकालेऽप्याश्विनः षष्ठो भवति । शुक्रामन्थिनौ द्वौ ग्रहौ मन्त्रगतद्विवचनलिङ्गेन युगपदवेक्षणीयाविति । ᵛउपांशुग्रहावेक्षणमन्त्रपाठस्तु – 'प्राणाय मे· वर्चोदा वर्चसे पवस्व' इति । हे उपांशुग्रह, यस्त्वं ᵛमे मदीयाय ᵛप्राणाय ᵛवर्चोदाः वर्चसो बलस्य दाता भवसि स त्वं मदीयाय ᵛवर्चसे ब्रह्मवर्चसार्थं ᵛपवस्व शुद्धो भव ॥

अथोपांशुसवनान्तर्यामैन्द्रवायवग्रहावेक्षणमन्त्रपाठः– 'व्यानाय मे वर्चोदा वर्चसे पवस्व । उदानाय मे वर्चोदा वर्चसे पवस्व । वाचे मे वर्चोदा वर्चसे पवस्व' इति ॥ स्पष्टार्थः ॥१॥

---

5. C S1 om. अध्याये
6. P1 om. च
15. V1 S1 C वाचयेत् for वाचयन्; V1 S1 C प्रतिमन्त्र° for प्रतिमन्त्रं
16. V1 S1 C ग्रावा for ग्रहो
18. P1 om. °मन्त्र°; V1 S1 C om. तु
20. P1 after भव ins. यतस्त्वेति वा
21. V1 S1 C °ग्रहाणामवेक्षण° for ग्रहावेक्षण°

आ– ग्रहान् वाचयति (दर्शयति ?) अवकाशान् वाचयन् । यज्ञस्यैते प्राणाः । अनूचानस्य यजमानस्य अथोपांशुं प्राणरूपेण दर्शयति– ‘ प्राणाय मे वर्चोदाः ’ इति । पूर्वप्रकृत एवास्याध्यायस्यापि ऋषिः । ऋषिविशेषोक्तौ तु विशेषो द्रष्टव्यः । ‘ प्राणाय ’ इत्यादीन्येकादश यजूंषि लिङ्गोक्तदेवत्यानि ॥

अथ ग्रहनामानि– उपांशुग्रहः । उपांशुसवनः । अन्तर्यामः । ऐन्द्रवायवः । मैत्रावरुणः । आश्विनः । शुक्रामन्थिनौ । आग्रयणः । उक्थ्यः । ध्रुवः । पूतभृदाहवनीयौ । मध्यस्थं द्रोणकलशम् । एते सोमग्रहाः ॥

हे उपांशो ग्रह, य[त]स्त्वं स्वभावत एव Vवर्चोदाः । वर्च दीप्तौ । दीप्तिप्रदाता, अतस्त्वां ब्रवीमि– ‘ प्राणाय मे वर्चोदाः ’ इति । मे मदीयाय Vवर्चसे ब्रह्मवर्चसार्थं Vपवस्व प्रवर्तस्व । अनेन समानव्याख्याता अवकाशमन्त्राः । उपांशुसवनं व्यानरूपेण दर्शयति– ‘ व्यानाय मे वर्चोदाः ’ इति । अन्तर्याममुदानरूपेण दर्शयति– ‘ उदानाय मे ’ इति । ऐन्द्रवायवं वाग्रूपेण दर्शयति– ‘ वाचे मे ’ इति ॥ १ ॥

क्रतूदक्षाभ्यां मे वर्चोदा वर्चसे पवस्व ।
श्रोत्राय मे वर्चोदा वर्चसे पवस्व ।
चक्षुर्भ्यां मे वर्चोदसौ वर्चसे पवेथाम् ॥२॥

क्रतुदक्षाभ्याम् ।
श्रोत्राय ।
चक्षुर्भ्यामिति चक्षुःऽभ्याम् ।
मे । वर्चोदसा इति वर्चःऽदसौ । वर्चसे । पवेथाम्॥ छै ॥२॥

सा– अथ मैत्रावरुणग्रहावेक्षणमन्त्रपाठः– ‘ क्रतूदक्षाभ्यां मे वर्चोदा वर्चसे पवस्व ’ इति । क्रतुः संकल्पो मदीयः कामस्तस्य समृद्धिर्दक्षः दक्षिणा, ताभ्यां क्रतूदक्षाभ्याम् । हे मैत्रावरुणग्रह, यस्त्वं बलप्रदाताऽसि स त्वं मदीयाय ब्रह्मवर्चसार्थं पूतो भव ॥

अथाश्विनावेक्षणमन्त्रपाठः– ‘ श्रोत्राय मे वर्चोदा वर्चसे पवस्व ’ इति ॥ स्पष्टार्थः ॥

अथ शुक्रामन्थिग्रहावेक्षणमन्त्रपाठः – ‘ चक्षुर्भ्यां मे वर्चोदसौ वर्चसे पवेथाम् ’ इति ॥

---

12. B1 वाचो मे इति
20. P1 after °पाठः ins. तु

हे शुक्रामन्थिग्रहौ, यौ युवां मदीयाभ्यां vचक्षुर्भ्यां दीप्तिप्रदातारौ स्थः तौ युवां मदीयब्रह्मवर्चसार्थं शुद्धौ भवतम् ॥२॥

आ– मैत्रावरुणं क्रतूदक्षाभ्यां दर्शयति – ‘ क्रतूदक्षाभ्यां मे ’ इति । क्रतुः संकल्पो मदीयः कामः, तस्य समृद्धिर्दक्षः ताभ्यां vक्रतूदक्षाभ्याम् ।

आश्विनं श्रोत्ररूपेण दर्शयति– [‘ श्रोत्राय मे वर्चोदाः ’ इति ॥ स्पष्टार्थः ॥]

शुक्रामन्थिनौ युपगच्चक्षूरूपेण दर्शयति– ‘ चक्षुर्भ्याम् ’ इति । शुक्रामन्थिनौ vवर्चोदसौ ब्रह्मवर्चसस्य दातारौ vवर्चसे ब्रह्मवर्चसाय vपवेथाम् इति संबन्धः ॥२॥

आ॒त्मने॑ मे वर्चो॒दा वर्च॑से पव॒स्वौज॑से मे वर्चो॒दा वर्च॑से पव॒स्वायु॑षे मे
वर्चो॒दा वर्च॑से पवस्व ।
विश्वा॑भ्यो मे प्र॒जाभ्यो॑ वर्चो॒दसौ॒ वर्च॑से पवेथाम् ॥३॥

आ॒त्मने॑ ।
ओज॑से ।
आयु॑षे ।
विश्वा॑भ्यः । मे॒ । प्र॒जाभ्य॒ इति॑ प्र॒ऽजाभ्यः॑ ।
व॒र्चो॒द॒सा॒विति॑ व॒र्चः॒ऽदसौ॑ । वर्च॑से । प॒वे॒था॒म् ॥ जौ ॥३॥

सा– अथाग्रयणोक्थ्यध्रुवग्रहावेक्षणमन्त्रपाठः – ‘आत्मने मे वर्चोदा वर्चसे पवस्वौजसे मे वर्चोदा वर्चसे पवस्वायुषे मे वर्चोदा वर्चसे पवस्व ’ इति ॥ स्पष्टम् ॥

कात्यायनः– “ पूतभृदाधवनीयौ च विश्वाभ्यो म इति ” (काश्रौ ९·७·१३) इति । चशब्दो युगपदित्यस्यानुकर्षणार्थः । वाचयन्नवेक्षयतीत्यनुवर्तते । पूतभृदाधवनीयाख्यौ पवमानग्रहावनेन मन्त्रेण दर्शयेदित्यर्थः । पाठस्तु– ‘ विश्वाभ्यो मे प्रजाभ्यो वर्चोदसौ वर्चसे पवेथाम् ’ इति । हे पूतभृदाधवनीयौ, सर्वाभ्यः vप्रजाभ्यः vवर्चोदसौ दीप्तिप्रदातारौ युवां मदीयाय ब्रह्मवर्चसार्थं vपवेथाम् प्रवर्तेथाम् ॥३॥

---

16. C S1 °ग्रवणोक्थ for °ग्रयणोक्थ्य°
17. V1 S1 C om. स्पष्टम्
18. V1 S1 C आहव° for आधव°
20. C S1 om. पाठस्तु

आ– आग्रयणमात्मरूपेण दर्शयति– ‘ आत्मने मे ’ इति। उक्थ्यमोजोरूपेण दर्शयति– ‘ ओजसे मे ’ इति । ध्रुवमायूरूपेण दर्शयति, पूतभृदाधवनीयौ युगपत् विश्वप्रजारूपेण दर्शयति– ‘ विश्वाभ्यो मे प्रजाभ्यो वर्चोदसौ वर्चसे पवेथाम् ’ इति ॥३॥

को॑ऽसि कत॒मो॑ऽसि॒ कस्या॑सि॒ को नामा॑सि ।
यस्य॑ ते॒ नामाम॑न्महि॒ यं त्वा॒ सोमे॒नाती॑तृपाम ॥४॥

कः । आ॒सि॒ । क॒त॒मः । कस्य॑ । कः । नाम॑ । अ॒सि॒ ।
यस्य॑ । ते॒ । नाम॑ । अम॑न्महि । यम् । त्वा॒ । सोमे॑न । अती॑तृपाम ॥ सूं ॥४॥

सा– कात्यायनः– “ कोऽसीति द्रोणकलशम् ” (काश्रौ ९.७.१४) इति । अवेक्षेतेदिति शेषः । पाठस्तु– ‘ कोऽसि कतमोऽसि कस्यासि को नामासि । यस्य ते नामामन्महि यं त्वा सोमेनातीतृपाम ’ इति । हे द्रोणकलश, त्वं ᵛकः प्रजापतिः ᵛअसि । ᵛकतमः ᵛअसि अन्यातिशयेन प्रजापतितमोऽसि। ᵛकस्य प्रजापतेरनन्यभूतः ᵛअसि । अत एव तव ᵛकः प्रजापतिरिति ᵛनाम ᵛअसि । ᵛयस्य द्रोणकलशरूपप्रजापतेः ᵛते तव ᵛनाम नामधेयम् ᵛअमन्महि वयं जानीमः । द्रोणकलशरूप, त्वां ᵛसोमेन ᵛअतीतृपाम तर्पितवन्तः त्वं तादृशो भवसीत्यर्थः ॥४॥

आ– मध्यमस्थं द्रोणकलशं प्रजापतिरूपेणाह– ‘ कोऽसि ’ इति । प्रजापतिदेवत्या वर्धमाना त्रिष्टुबनुष्टुवा । हे द्रोणकलश, ᵛकः प्रजापतिः स त्वं ᵛअसि, अत्य[न्या]तिशयेनापि प्रजापतिस्त्वमासि । ‘ कस्यासि ’ । ᵛकस्य प्रजापतेः अनन्यभूतः ᵛअसि। ‘ को नामासि ’। प्रजापतिनाम ᵛअसि । ‘ यस्य ते नामामन्महि ’ । मन ज्ञाने। ᵛअमन्महि वि जानीमः । ᵛयं द्रोणकलशरूपं प्रजापतिं त्वां ᵛसोमेन ᵛअतीतृपाम तर्पितवन्तः । स त्वमस्मान् विदितनाम्नः कुरु । तर्पयेति शेषः ॥४॥

भूर्भुव॒ः स्व॑ः सुप्र॒जाः प्र॒जया॑ भूयासम् ।
सु॒वीरो॑ वी॒रैः सु॒पोष॒ः पोषै॑ः ॥५॥(१)॥

भूर्भुव॒ः ॥ भ ॥ ५ ॥ (१) ॥

---

10. V1 S1 C प्रजापतिः for प्रजापतितम
18. B1 सा त्वदास्मान् विदितनामानः; for स त्वमस्मान् विद्रितनाम्नः

सा– कात्यायनः– "भूर्भुवः स्वरिति जपति" (काश्रौ ९.७.१५) इति। उपांश्वादिग्रहावेक्षणानन्तरं 'भूर्भुवः स्वः' इति मन्त्रं जपेत् । पाठस्तु– 'भूर्भुवः स्वः सुप्रजाः प्रजया भूयासम् । सुवीरो वीरैः सुपोषः पोषैः' इति । अयं मन्त्रस्तृतीयाध्याये व्याख्यातः ।।५।।

[इति नवमेऽध्याये प्रथमोऽनुवाकः ।।]

आ– 'भूर्भुवः स्वः सुप्रजाः' इत्ययं मन्त्रस्तृतीये व्याख्यातः ।।

[इति नवमेऽध्याये प्रथमोऽनुवाकः]

[अथ द्वितीयोऽनुवाकः]

प्रथमेऽनुवाके उपांश्वादिग्रहावेक्षणमन्त्रा उक्ताः । द्वितीये दाक्षिणहोमादिमन्त्रा उच्यन्ते ।

उदु त्यं जातवेदसं देवं वहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ।।१।।

उदु त्यम् ।। वा ।। (१) ।।

सा– कात्यायनः– "शालाद्वार्ये दाक्षिणहोमः । वासः प्रबद्धꣳ हिरण्यꣳ हवन्यामवधाय चतुर्गृहीतमुदु त्यमिति" (काश्रौ १०.२.४-५) इति । वाससि प्रबद्धं सुवर्णं स्रुचि चतुर्गृहीताज्यायां प्रक्षिप्य 'उदु त्यम्' इत्यनेन शालामुखीयेऽग्नौ दक्षिणहोमं जुहुयात् । पाठस्तु– 'उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम्' इति । ᵛकेतवः रश्मयस्त्वां ᵛजातवेदसं तमग्निसदृशं ᵛसूर्यम् ᵛउद्वहन्ति ऊर्ध्वदेश एव नयन्ति । किमर्थम् ? ᵛविश्वाय कृत्स्नस्य जगतः ᵛदृशे द्रष्टुम् ।।१।।

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आऽप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च ।।२।।

चित्रं देवानाम् ।। च ।। (२) ।।

कात्यायनः– "चित्रं देवानामिति द्वितीयाम्" (काश्रौ १०.२.६) इति । 'उदु त्यम्' इति यथा प्रथमाहुतिः शालामुखीये हुता तदपेक्षयैषाऽऽहुतिर्द्वितीया । तां तस्मिन्नेवाग्नौ जुहुयादिति शेषः

15.　P1 after °सदृशं adds क्रीडादिगुणं
16.　C S1 उर्ध्वसदृश°, V1 ऊर्ध्वदृश° for ऊर्ध्वदेशे

पाठस्तु– ‘ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आऽप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च ’ इति। चित्रं रक्तश्वेतादिविविधवर्णं देवानां रश्मीनाम् अनीकं सैन्यसदृशं मण्डलम् उदगात् उदगच्छत्। कीदृशम् ? मित्रादिदेवोपलक्षितस्य कृत्स्नस्य प्राणिजातस्येन्द्रियाधिष्ठातृत्वाच्चक्षुःस्थानीयं, तन्मण्डस्थः सूर्यः जगतः जगन्मण्डलस्य तस्थुषः स्थावरस्य च आत्मा सन् लोकत्रयम् आऽप्राः सर्वतः पूरितवान् ।।२।।

आ– ‘ उदुत्यम् ’, ‘ चित्रम् ’ इति। द्वावष्टमे व्याख्यातौ ।। १–२ ।।

अग्ने॒ नय॑ सु॒पथा॑ रा॒ये अ॒स्मान् विश्वा॑नि देव व॒युना॑नि वि॒द्वान् ।
यु॒यो॒ध्य॒स्मज्जु॑हुरा॒णमेनो॒ भूयि॑ष्ठां ते॒ नम॑ उक्तिं विधेम ।।३।।

अग्ने॒ नय॑ ।। अ ।। (३) ।।

सा– कात्यायनः – “ आग्नीध्रीयेऽग्ने नयेति ” (काश्रौ १०.२.६) इति। आग्नीध्रमण्डपस्थेऽग्नौ जुहुयादिति शेषः। पाठस्तु- ‘ अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ’ इति। हे अग्ने, पारलौकिकधनप्राप्त्यर्थम् अस्मान् सुपथा शोभनमार्गेण नय प्रापय । देव, विश्वानि वयुनानि सर्वान् मार्गान् विद्वान् जानासि । जुहुराणं कुटिलम् एनः पापम् अस्मत्तः युयोधि वियोजय । ते तुभ्यं भूयिष्ठां नमउक्तिं नमस्कारोक्तिं विधेम कुर्याम ।।३।।

अ॒यं नो॑ अ॒ग्निर्वरि॑वस्कृणोत्व॒यं मृध॑ः पु॒र ए॑तु प्रभि॒न्दन् ।
अ॒यं वाजा॑ञ्जयतु॒ वाज॑साता अ॒यꣳ शत्रू॑ञ्जयतु॒ जर्हृ॑षाण॒ः स्वाहा॑ ।।४।।

अ॒यं न॑ः ।। अ ।।(४)।।

सा– कात्यायनः– “ अयं न इत्यपरामश्वं चेद्युक्तं दद्यादयुक्तं वा ” (काश्रौ १०.२.५) इति। रथादौ नियुक्तं केवलं वाऽश्वं यदि दक्षिणात्वेन दद्यात् ‘ अयं नः ’ इत्यपरां द्वितीयामाहुतिमाग्नीध्रे जुहुयात्। पाठस्तु– ‘ अयं नो अग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् । अयं वाजाञ्जयतु वाजसाता अयꣳ शत्रूञ्जयतु जर्हृषाणः स्वाहा ’ इति। अयम् अग्निः नः अस्माकं वरिवः धनं कृणोतु करोतु। अयम् एवाग्निः मृधः संग्रामात् पुरः पुरतः प्रभिन्दन् वैरिणो विदारयन् एतु गच्छतु।

---

1. V1 om. उदगाद् ... तस्थुषश्च [L. 2]
11. V1 om. पाठस्तु
19. V1 S1 C अपरम् for अपराम्; C V1 S1 before चेद् add तं
24. C V1 S1 om. करोतु

vअयम् एवाग्निः vवाजान् अन्नानि शत्रुसंबन्धीनि vजयतु स्ववशं कृत्वा तान्यस्मभ्यं ददात्वित्यर्थः । vवाजसातौ संग्रामे vअयम् एवाग्निः vजर्हृषाणः अत्यन्तं हृष्यन् vशत्रून् vजयतु । vस्वाहा सुहुतमस्तु ॥४॥

आ ‘ अग्ने नय ’, ‘ अयं तो अग्निः ’ इति च द्वौ पञ्चमे व्याख्यातौ ॥ ३ – ४ ॥

रू॒पेण॑ वो रू॒पम॒भ्यागा॑ं तु॒थो वो॑ वि॒श्ववे॑दा॒ वि भ॑जतु ।
ऋ॒तस्य॑ प॒था प्रेत॑ च॒न्द्रद॑क्षिणाः ॥५॥

रू॒पेण॑ । व॒: । रू॒पम् । अ॒भि । आ । अ॒गा॒म् ।
तु॒थः । व॒: । वि॒श्ववे॑दा॒ इति॑ वि॒श्वऽवे॑दाः । वि । भ॒ज॒तु॒ ।
ऋ॒तस्य॑ । प॒था । प्र । इ॒त॒ । च॒न्द्रद॑क्षिणा॒ इति॑ च॒न्द्रऽद॑क्षिणाः ॥ ञे ॥ ५ ॥

सा– कात्यायनः – “ सहिरण्यो यजमानः शालां पूर्वेण तिष्ठन्नभिमन्त्रयते दक्षिणा बहिर्वेदि तिष्ठन्तीर्दक्षिणतो रूपेण व इति ” (काश्रौ १०.२.१०) इति । हिरण्यं धारयन् यजमानः प्राग्वंशस्य पुरस्तात् स्थित्वा महावेदेर्दक्षिणतोऽपि बहिःस्थिता दक्षिणार्था गा अभिमन्त्रयेत् । पाठस्तु– “ रूपेण वो रूपमभ्यागां तुथो वो विश्ववेदा विभजतु । ऋतस्य पथा प्रेत चन्द्रदक्षिणाः ’ इति । हे दक्षिणाः, vरूपेण अनेनोद्धृतहिरण्येन सह vवः वेदेर्दक्षिणभागेऽवस्थितानां युष्माकं vरूपम् vअभ्यागाम् आभिमुख्येन प्राप्नोमि । विश्वं वेत्ति वेदयतीति वा vविश्ववेदाः सर्वज्ञः । तुथनामकः देवः vवः युष्मान् vविभजतु ऋत्विजां यथार्हं विभागं करोतु । vऋतस्य प्रस्तुतस्य यज्ञस्य vपथा मार्गेण चन्द्रदक्षिणाः चन्द्रं हिरण्यं दक्षिणार्थं प्रधानद्रव्यं यजमानहस्तगतं यासां दक्षिणानां ता यूयं vप्रेत गच्छत ॥५॥

आ– अग्रेण शालामभितिष्ठन्नभिमन्त्रयते, दक्षिणतः स्थितो दक्षिणाः अभिमन्त्रयते– ‘ रूपेण वो रूपम् ’ इति । दक्षिणादेवत्या नष्टरूपाऽनुष्टुप् । हे दक्षिणाः, vरूपेण मूर्त्या vवः, युष्मत्संबंन्धि vरूपम् vअभ्यागाम् अभ्यागतोऽस्मि । किंतु ‘ तुथः वो विश्ववेदाः ’ । विश्वं वेत्ति वेदयतीति वा vविश्ववेदाः सर्वज्ञः । तुथ इति ब्रह्मणो नाम । vतुथः ब्रह्मा प्रजापतिः vवः युष्मान् दक्षिणाः vविभजतु ऋत्विजां यथार्हं विभागं करोतु । vऋतस्य प्रस्तुतस्य यज्ञस्य vपथा मार्गेण vचन्द्रदक्षिणाः, चन्द्रं हिरण्यं दक्षिणार्थं प्रधानद्रव्यं यजमानहस्तगतं यासां दक्षिणानां ताः चन्द्रदक्षिणाः, यूयं vप्रेत प्रय [ग ?] च्छत ॥५॥

---

9. P1 S1 V1 C पूर्वे for पूर्वेण
10. V1 S1 C तिष्ठन्त्येतीति for तिष्ठन्तीर्

वि स्व॒: पश्य॒ व्य॒न्तरि॑क्षं॒ यत॑स्व सद॒स्यैः ।
ब्रा॒ह्म॒णम॒द्य वि॑देय पितृ॒मन्तं॑ पैतृ॒म॒त्यमृषि॑मार्षे॒यꣳ सु॒धातु॑दक्षिणम् ॥६॥

वि । स्व॒रिति॒ स्व॑: । पश्य॑ । वि । अ॒न्तरि॑क्षम् । यत॑स्व । स॒द॒स्यैः ।
ब्रा॒ह्म॒णम् । अ॒द्य । वि॒दे॒य॒ । पि॒तृ॒मन्त॒मिति॑ पि॒तृऽमन्त॑म् । पै॒तृ॒म॒त्यमिति॑ पै॒तृऽम॒त्यम् ।
ऋषि॑म् । आ॒र्षे॒यम् । सु॒धातु॑दक्षिण॒मिति॑ सु॒धातु॑ऽदक्षिणम् ॥ थूं ॥ ६ ॥ ५

सा– कात्यायनः – “ वि स्वरिति ” (काश्रौ १०·२·१७) इति । सदो गच्छेति शेषः । पाठस्तु ‘ वि स्वः पश्य व्यन्तरिक्षम् ’ इति । हे सदस्य, ᵛस्वः स्वर्गं देवयानमार्गं विशेषेण ᵛपश्य । ᵛअन्तरिक्षम् अन्तरिक्षलोकं पितृयानमार्गं विपश्य ।

कात्यायनः – “ यतस्व सदस्यैरिति सदस्यान् ” (काश्रौ १०·२·१८) इति । प्रेक्षेतेति शेषः । १० सदसि सभायां साधवः सदस्याः, तैर्दक्षिणाभिः पूरितैः सह ᵛयतस्व यज्ञं प्रति यत्नं कुरु ॥

कात्यायनः – “ ब्राह्मणमद्येत्याग्नीध्रगमनम् ” (काश्रौ १०·२·१९) इति । आग्नीध्रमण्डपस्थितमृत्विजं गच्छेत् । पाठस्तु– ‘ ब्राह्मणमद्य विदेय पितृमन्तं पैतृमत्यमृषिमार्षेयꣳ सुधातुदक्षिणम् ’ इति । अष्टवर्षमारभ्य षोडशवर्षपर्यन्तं शिक्षयन्ती माता यस्य तं मातृमन्तमित्यर्थादभिहितम् । शिक्षकः पिता विद्यते यस्य स पितृमान्, तादृशम् । यद्वा-माता च पिता च पितरौ तौ शिक्षकौ विद्येते यस्यासौ १५ पितृमान्, तम् इत्यर्थः । यस्य पितामहप्रभृतयो विख्याताः श्रोत्रियाः सः पैतृमत्यस्तथाविधम् ᵛऋषिं मन्त्रद्रष्टारम् । ᵛआर्षेयं जात्या प्रवरैश्च विख्यातम् । शोभनो धातुः सर्वधातुभ्य उत्तमं हिरण्यं दक्षिणा यस्यासौ सुधातुदक्षिणस्तमेवंगुणविशिष्टं ᵛब्राह्मणम् ᵛअद्य अस्मिन् दिने ᵛविदेय लभेय । विद्लृ लाभे ॥६॥

आ– सदो गच्छति– ‘ वि स्वः पश्य ’ इति । लिङ्गोक्तदेवत्याऽनुष्टुप् । ᵛस्वः स्वर्गं देवयानमार्गं पश्यामीति व्यत्ययः । दक्षिणया स्वर्गसोपानभूतया स्वः देवयानमार्गं ᵛवि २० पश्यामि । ᵛवि ᵛअन्तरिक्षम् अन्तरिक्षलोकं पितृयानमार्गं विपश्यामि ।

सदसि स्थितान् ब्राह्मणान् प्रेक्षते– ‘ यतस्व ’ इति । लिङ्गोक्तदेवत्या गायत्री । यती प्रयत्ने । सदसि सभायां साधवः सदस्याः, तैर्दक्षिणाभिः पूरितैः ᵛसदस्यैः सह ᵛयतस्व यज्ञं प्रति यत्नं कुरु । यज्ञमातिष्ठेत्यर्थः ॥

---

7. V1 S1 C om. हे सदस्य; P1 °मार्गाविशेषं for °मार्गं विशेषेण
13. V1 S1 C इत्यर्थः for इत्यर्थात्
14. V1 S1 C om. यद्वा ... तम् इत्यर्थः [L. 15]
16. V1 S1 C om. विद्लृ लाभे

आग्नीध्रं गच्छति– ‘ ब्राह्मणमद्य ’ इति । ‘ ब्राह्मणमद्य ’ इत्यादीनि लिङ्गोक्तदेवत्यानि अष्ट यजूंषि । अष्टवर्षपर्यन्तं शिक्षयन्तीयं माता यस्य सः, तं मातृमन्तमित्यर्थादिदमभिहितम् । अष्टवर्षमारभ्य षोडश (वर्ष) पर्यन्तं शिक्षाकर्ता पिता विद्यते यस्य सः पितृमान्, तं ᵛपितृमन्तम्। पितृमतामपत्यं ᵛपैतृमत्यम् । यस्य पितामहप्रभृतयो विख्याताः श्रोत्रियाः सः पैतृमत्यः, तम् ᵛऋषिं मन्त्राणां द्रष्टारं व्याख्यातारम् । ᵛआर्षेयं जात्या प्रवरैश्च विख्यातम् । सुधातुः शोभनधातुः सुवर्णं दक्षिणार्थं यस्य दीयते सः, तं ᵛसुधातुदक्षिणम् । एवं गुणाविशिष्टं ब्राह्मणभूतमातापितृजनानां ᵛब्राह्मणम् ᵛअद्य अस्मिन्नहनि ᵛविदेयम् । विद् लाभे । लभेयेति संबन्धः ॥६॥

अ॒स्मद्रा॑ता देव॒त्रा ग॑च्छ प्रदा॒तार॒मावि॑श ।
अ॒ग्नये॑ त्वा॒ मह्यं॒ वरु॑णो ददातु॒ सो॑ऽमृत॒त्वम॑श्यात् ।।७।।
आयु॑र्दा॒त्र ए॑धि॒ मयो॒ मह्यं॑ प्रतिग्रही॒त्रे ।
रु॒द्राय॑ त्वा॒ मह्यं॒ वरु॑णो ददातु॒ सो॑ऽमृत॒त्वम॑श्यात् ।
प्रा॒णो दा॒त्र ए॑धि॒ मयो॒ मह्यं॑ प्रतिग्रही॒त्रे ।
बृह॒स्पत॑ये त्वा॒ मह्यं॒ वरु॑णो ददातु॒ सो॑ऽमृ॒त॒त्वम॑श्यात् ।
त्वग्दा॒त्र ए॑धि॒ मयो॒ मह्यं॑ प्रतिग्रही॒त्रे ।
य॒माय॑ त्वा॒ मह्यं॒ वरु॑णो ददातु॒ सो॑ऽमृ॒त॒त्वम॑श्यात् ।
वयो॑ दा॒त्र ए॑धि॒ मयो॒ मह्यं॑ प्रतिग्रही॒त्रे ।।८।।

अ॒स्मद्रा॒तेत्य॒स्मत्ऽरा॑ता । दे॒व॒त्रेति॑ दे॒व॒ऽत्रा । ग॒च्छ॒ ।
प्र॒दा॒ता॒रमिति॑ प्र॒ऽदा॒तार॑म् । आ । वि॒श॒ ।
अ॒ग्नये॑ । त्वा॒ । मह्य॑म् । वरु॑णः । द॒दा॒तु॒ । सः ।
अ॒मृ॒त॒त्वमित्य॑मृ॒त॒ऽत्वम् । अ॒श्या॒त् ॥ थुं ॥७॥
आयु॑ः । दा॒त्रे । ए॒धि॒ । मय॑ः । मह्य॑म् । प्र॒ति॒ग्र॒ही॒त्र इति॑ प्र॒ति॒ऽग्र॒ही॒त्रे ।
रु॒द्राय॑ ।
प्रा॒णः ।
बृह॒स्पत॑ये ।
त्वक् ।
य॒माय॑ ।
वय॑ः । मय॑ः । मह्य॑म् । प्र॒ति॒ग्र॒ही॒त्र इति॑ प्र॒ति॒ऽग्र॒ही॒त्रे ॥ ञूं ॥८॥

सा– कात्यायनः – " उपविश्य हिरण्यमस्मै ददात्यस्मद्राता इति " (काश्रौ १०.२.२०) इति । यजमानः स्वयमाग्नीध्रमण्डप उपविश्य तत्रोपविष्टायास्मा आग्नीध्राय सदस्याय च हिरण्यं दद्यात् ।

पाठस्तु– 'अस्मद्राता देवत्रा गच्छ प्रदातारमाविश ' इति । हे दक्षिणे, त्वम् ᵛअस्मद्राता अस्माभिः राता दत्ता सती ᵛदेवत्रा देवान् प्रति ᵛगच्छ । देवानभ्येत्य तेषां तृप्तिं संपाद्य यज्ञफलं साधयन्ती ᵛप्रदातारं प्रकर्षेण दक्षिणाया दातारं यजमानम् ᵛआविश ॥

कात्यायनः– " अग्नये त्वेति हिरण्यं प्रतिगृह्णीतः " (काश्रौ १०.२.२८) इति । आग्नीध्रसदस्यावुभौ यजमानेन दत्तं हिरण्यम् अनेन प्रतिगृह्णीयाताम् । पाठस्तु– ' अग्नये त्वा मह्यं वरुणो ददातु सोऽमृतत्वमश्यात् । आयुर्दात्र एधि मयो मह्यं प्रतिग्रहीत्रे ' इति । हे दक्षिणे, हिरण्यरूपां ᵛत्वा त्वाम् ᵛअग्नये अग्निरूपाय ᵛमह्यं ᵛवरुणः ᵛददातु दद्यात् । ᵛसः प्रतिगृह्णन् ᵛअमृतत्वं विनाशराहित्यम् ᵛअश्यात् प्राप्नुयात् । दक्षिणायाः प्रदात्रे यजमानाय ᵛआयुः शतसंवत्सरपर्यन्तं दीर्घायुष्यम् ᵛएधि । ᵛप्रतिग्रहीत्रे ᵛमह्यं ᵛमयः सुखम् एधि भव ॥

कात्यायनः– " रुद्राय त्वेति गाम् " (काश्रौ १०.२.२९) इति । प्रतिगृह्णीयादिति शेषः । पाठस्तु- ' रुद्राय त्वा मह्यं वरुणो ददातु सोऽमृतत्वमश्यात् । प्राणो दात्र एधि मयो मह्यं प्रतिग्रहीत्रे ' इति । हे गौः, त्वां रुद्ररूपाय ᵛमह्यं ᵛवरुणः ᵛददातु । ᵛसः प्रतिग्रहीता ᵛअमृतत्वम् प्राप्नुयात् । ᵛदात्रे यजमानाय ᵛप्राणः प्राणरूपः ᵛएधि । तव ᵛप्रतिग्रहीत्रे ᵛमह्यं ᵛमयः सुखम् ᵛएधि ॥

कात्यायनः– " बृहस्पतये त्वेति वासः " (काश्रौ १०.२.३०) इति । प्रतिगृह्णीयादिति शेषः । पाठस्तु– ' बृहस्पतये त्वा मह्यं वरुणो ददातु सोऽमृतत्वमश्यात् । त्वग्दात्र एधि मयो मह्यं प्रतिग्रहीत्रे ' इति । हे वासः, त्वां बृहस्पतिरूपाय ᵛमह्यं ᵛवरुणः ᵛददातु । ᵛसः अमृतत्वम् ᵛअश्यात् प्राप्नुयात् । त्वगिन्द्रियं यजमानाय तव ᵛप्रतिग्रहीत्रे ᵛमह्यं ᵛमयः सुखम् ᵛएधि भव ॥

कात्यायनः – " यमाय त्वेत्यश्वम् " (काश्रौ १०.२.३१) इति । प्रतिगृह्णीयात् । केचिदश्वस्थाने अन्नमिच्छन्ति । पाठस्तु– ' यमाय त्वा मह्यं वरुणो ददातु सोऽमृतत्वमश्यात् । वयो दात्र एधि मयो मह्यं प्रतिग्रहीत्रे ' इति । यमरूपाय ᵛमह्यम् अश्वमन्नं वा त्वां ᵛवरुणः ᵛददातु । योऽनेन विधिना प्रतिगृह्णाति, ᵛसः ᵛअमृतत्वम् ᵛअश्यात् प्राप्नुयात् । ᵛवयः अन्नमश्वो वा ᵛदात्रे यजमानाय ᵛएधि भव । ᵛप्रतिग्रहीत्रे ᵛमह्यं सुखं भव ॥ ७–८ ॥

आ– दक्षिणां च ददाति– ' अस्मद्राता ' इति । अस्माभिः राता दत्ता दक्षिणा । हे दक्षिणे, अस्माभिः राता दत्ता सती, ᵛदेवत्रा । देवमनुष्यादीनां द्वितीयार्थे त्राप्रत्ययः । देवान् प्रति ᵛगच्छ । हे दक्षिणे, देवानभ्येत्य तेषां तृप्तिं संपाद्य यज्ञफलं साधयन्ती ᵛप्रदातारं प्रकर्षेण दक्षिणायाः दातारं यजमानं त्वम् ᵛआविश ॥७॥

---

8. P1 om. त्वा
10. P1 after एधि ins. यद्वा एध वर्धयेत्यर्थः
11. P1 om. एधि
22. V1 S1 C after यमरूपाय add अश्वाय

तत उत्तरं पञ्च (प्रति)ग्रहमन्त्राः । हिरण्यं प्रतिगृह्णाति– ‘ अग्नये ’ इति । vअग्नये [अग्नि-] रूपायान्नाय vमह्यं हिरण्यं vत्वा त्वां vवरुणः vददातु । हिरण्यं प्रतिगृह्णानो न रिष्यामीति देवतादेशः । vसः vअमृतत्वम् vअश्यात् । अशू व्याप्तौ । प्राप्नुयात् । ‘ आयुर्दात्र एधि ’ । vदात्रे दक्षिणायाः यजमानाय vआयुः vएधि । “ घ्वसोरेद्धावभ्यासलोपः ” (पा ६·४·११९) इति ‘ अस भुवि ’ इत्यस्य रूपम् एधि इति । दाता आयुष्मान् भवतु । ‘ मयो मह्यं प्रतिग्रहीत्रे ’ । दक्षिणा vप्रतिग्रहीत्रे vमह्यं vमयः सुखम् एधि ॥

गां प्रतिगृह्णाति– ‘ रुद्राय त्वा ’ इति । रुद्ररूपाय vमह्यं हे गौः, गां vत्वा त्वां vवरुणः vददातु । vसः vअमृतत्वम् vअश्यात् अनेन विधानेन संगृह्णानः अमृतत्वं प्राप्नुयात् । vप्राणः vदात्रे यजमानाय प्राणः प्राणरूपः vएधि भव । vप्रतिग्रहीत्रे vमह्यं vमयः सुखम् vएधि भव ॥

वासो गृह्णाति– ‘ बृहस्पतये त्वा ’ इति । बृहस्पातिरूपायान्नाय vमह्यं त्वा वासः त्वां vवरुणः vददातु । vसः vअमृतत्वम् vअश्यात् सः अनेन विधानेन गृह्णानः अमृतत्वं प्राप्नुयात् । ‘ त्वग्दात्र एधि ’ । हे vत्वक्, त्वगिन्द्रिय, त्वं vदात्रे vएधि, vप्रतिग्रहीत्रे vमह्यं vमयः सुखम् ।

अन्नं प्रतिगृह्णाति -- ‘ यमाय त्वा ’ इति । यमरूपायान्नाय vमह्यम् अश्वं vत्वा त्वां vवरुणः vददातु । vसः अनेन विधानेन गृह्णानः vअमृतत्वम् vअश्यात् । vवयः अन्नं पशुर्वा । vदात्रे यजमानाय vएधि । vप्रतिग्रहीत्रे vमह्यं vमयः सुखम् ॥५॥

को॑ऽदा॒त् कस्मा॑ अ॒दा॒त् कामो॑ऽदा॒त् कामा॑यादात् ।
कामो॑ दा॒ता काम॑ः प्रतिग्रही॒ता
कामै॒तत् ते॒ तव॑ काम सु॒ता भु॑नजामहै ॥९॥(२)॥

कः । अ॒दा॒त् । कस्मै॑ । काम॑ः । कामा॑य ।
काम॑ः । दा॒ता । काम॑ः । प्र॒ति॒ग्र॒ही॒तेति॑ प्र॒ति॒ऽग्र॒ही॒ता ।
काम॑ । ए॒तत् । ते॒ । तव॑ । का॒म॒ । सु॒ता । भु॒न॒जा॒म॒है॒ ॥ घैं ॥९॥ (२) ॥

सा– कात्यायनः– “ कोऽदादित्यन्यत् । इच्छतो मन्त्रवचनम् ” (काश्रौ १०·२·३२-३३) इति । हिरण्यगवादिव्यतिरिक्तमन्यद्द्रव्यं प्रतिजिघृक्षुः । ‘ कोऽदात् ’ इत्यनेन मन्त्रेण प्रतिगृह्णीयात् । पाठस्तु– ‘ कोऽदात् कस्मा अदात् कामोऽदात् कामायादात् । कामो दाता कामः प्रतिग्रहीता कामैतत् ते

---

1. B1 °ग्रहा मन्त्राः for °ग्रहमन्त्राः

तव काम सता भुनजामहै ’ इति । दातुर्दानाभिमानाभावाय प्रतिग्रहदोषाभावाय च दातृप्रतिग्रहीतारौ, देहेन्द्रियात्मादिसंघाते विवेचयतः । तत्र ‘ कः, कस्मै ’ इति प्रश्नद्वयम् । तस्योत्तरं ‘ कामः, कामाय ’ इति । नाहं प्रतिग्रहीता न त्वं दाता, किन्तु हे दातः, तव ^{v}कामः कामाभिमानी देव एव ^{v}कामाय मदीयाय कामाभिमानिदेवाय ^{v}अदात् दत्तवान् । तदेव स्पष्टयति–‘ कामो दाता ’ इत्यादिना । यत एवमतो हे ^{v}काम, ^{v}एतत् दीयमानं द्रव्यं ^{v}ते तवैव । हे ^{v}काम, वयं तु ^{v}तव संबन्धिना ^{v}सता विद्यमानेन भोगजातेन ^{v}भुनजामहै भुञ्जामहि ॥८॥

[इति नवमेऽध्याये द्वितीयोऽनुवाकः ॥]

आ– अथ यदन्यद्ददाति तदनेन प्रतिगृह्णाति– ‘ कोऽदात् ’ इति । कामी पङ्क्तिः पञ्चपदा । ^{v}कः पुरुषः ^{v}अदात् दत्तवान्, अयमेकः प्रश्नः । ^{v}कस्मै पुरुषाय ^{v}अदात्, अयं द्वितीयः प्रश्नः । अनयोरुत्तरमाह – ‘ कामोऽदात् कामायादात् ’ इति । ‘ कोऽदात् ’ इत्यस्य ‘ कामः अदात् ’ इत्युत्तरम् । काम्यते येन स कामः, कामयतीति वा । सर्वान्तर्यामी भगवान् कामः । सर्वैः (?....) । ‘ कस्मै ’ इत्यत्य ‘ कामाय ’ इत्युत्तरम् । यतः ^{v}कामः एव ^{v}दाता ^{v}कामः एव ^{v}प्रतिग्रहीता च, अतो ब्रवीमि ‘ कामैतत् ते तव काम सता भुनजामहै ’ इति । हे ^{v}काम, ^{v}एतत् हिरण्यादिसर्वं ^{v}ते कामस्य तत्र एव । अतः कारणात् हे ^{v}काम, तव ^{v}सता त्वदीयेन केनाचिन्निमित्तेन सता कामस्त्वमेव दाता । केनाचिन्निमित्तविशेषेण त्वमेव प्रतिग्रहीतेत्येवं रूपेण सता विद्यमानेन रूपेण त्वया वयं ^{v}भुनजामहै कामबलेनैव सर्वभागं करवामहै ॥८॥

[इति नवमेऽध्याये द्वितीयोऽनुवाकः ॥]

* * *

[अथ तृतीयोऽनुवाकः]

सा– द्वितीयेऽनुवाके दाक्षिणहोमादिमन्त्रा उक्ताः । तृतीयेऽनुवाके समिष्टयजुराख्यो होमो निरूप्यते ।

समि॑न्द्र णो॒ मन॑सा नेषि॒ गोभि॒ः सꣳ सू॒रिभि॑र्मघव॒न्त्सꣳ स्व॒स्त्या ।
सं ब्रह्म॑णा दे॒वकृ॑तं॒ यदास्ति॒ सं दे॒वाना॑ꣳ सुम॒तौ य॒ज्ञिया॑नाम् ॥१॥

---

2. V1 S1 C om. °आत्म°; C V1 S1 विवेचयति for विवेचयत:
3. V1 S1 C om. एव
4. P1 कामनाभि° for कामाभि°
5. V1 S1 C om. एव; P1 om तु
19. P1 द्वितीये for द्वितीयेऽनुवाके

सम् । इन्द्र॒ । न॒ः । मन॑सा । ने॒षि॒ । गोभि॑ः ।
सम् । सू॒रिभि॒रिति॑ सू॒रिऽभि॑ः । म॒घ॒व॒न्निति॑ मघऽवन् । सम् । स्व॒स्त्या ।
सम् । ब्रह्म॑णा । दे॒वकृ॑त॒मिति॑ दे॒वऽकृ॑तम् । यत् । आस्ति॑ ।
सम् । दे॒वाना॑म् । सु॒म॒ता इति॑ सु॒ऽम॒तौ । य॒ज्ञिया॑नाम् ॥ घः ॥१॥

कात्यायनः – "समिन्द्र ण इति नव समिष्टयजूꣳषि जुहोति प्रतिमन्त्रम्" (काश्रौ १०.८.१२) इति । 'समिन्द्र णः' इत्यादिभिर्नवभिर्मन्त्रैः समिष्टयजुराख्या नवाहुतीर्जुहुयात् । तत्र प्रथममन्त्रपाठः – 'समिन्द्र णो मनसा नेषि गोभिः सꣳ सूरिभिर्मघवन्त्सꣳ स्वस्त्या । सं ब्रह्मणा देवकृतं यदस्ति सं देवानाꣳ सुमतौ यज्ञियानाम्' इति । हे ˇइन्द्र, त्वमनुग्रहयुक्तेन ˇमनसा ˇनः अस्मान् ˇगोभिः स्तुतिलक्षणाभिर्वाग्भिर्गवादिभिर्वा ˇसं ˇनेषि संनय संयोजय । हे ˇमघवन् विशिष्टधनसंपन्न इन्द्र, ˇसूरिभिः पण्डितैर्होतृप्रमुखैः ˇसं योजय । ˇस्वस्त्या क्षेमेण ˇसं योजय । ˇब्रह्मणा वेदेन अर्थज्ञानसहितेन ˇदेवकृतं देवार्थं कर्म ˇयत् ˇअस्ति तेन ˇसं योजय । ˇयज्ञियानां यज्ञसंबन्धिनां ˇदेवानां ˇसुमतौ सुमत्या अनुग्रहबुद्ध्या संयोजय ॥१॥

आ– [नव] समिष्टयजूंषि जुहोति– 'समिन्द्र णो मनसा' इति । ऐन्द्री त्रिष्टुप् अत्रिः । समित्ययमुपसर्गो नेषीत्यनेन संबध्यते । हे भगवन् ˇइन्द्र परमैश्वर्यसंपन्न । मन ज्ञाने । ˇमनसा सम्यग्ज्ञानसाधनेन मनसा ˇनः अस्मान् ˇसं ˇनेषि । नयतेर्लेटि, शपो लुकि, गुणे च रूपम्, संगमय संयोजय । ˇगोभिः वाग्भिस्तव स्तुतिलक्षणैर्गवादिभिर्वा नः अस्मान् सं नेषि संगमय । सुपूर्वस्य रातेः क्विप्प्रत्ययान्तस्य रूपं सूरिभिरिति । ˇसूरिभिः पण्डितैर्होतृप्रभृतिभिः स्तोत्रादिकुशलैः ˇसंनेषि । हे ˇमघवन् विशिष्टधनसंपन्न, ˇस्वस्त्या अविनाशेन । सुपूर्वस्य क्विप्प्रत्ययान्तस्य 'अस भुवि' इत्यस्य रूपम् । स्वस्तीत्यविनाशनाम । नः अस्मान् ˇसं नेषि । ˇब्रह्मणा । किमिदं ब्रह्मेति तदाह– 'देवकृतं यदस्ति' इति । ˇदेवकृतं देवेन क्रीडनादिगुणयुक्तेन श्रीभगवता कृतं प्रणीतम् । उच्छ्वासवद्भूतं ˇयत् ˇअस्ति नित्यत्वेन स्थितम् ऋग्यजुःसामादिलक्षणं ब्रह्म, तेन ब्रह्मणा वेदेन वेदार्थज्ञानेन वा तदर्थानुष्ठानेन वा ˇसं नेषि । 'सं देवानां सुमतौ यज्ञियानाम्' । स्तुतिभाक् तेन च यज्ञसंबन्धिनां ˇयज्ञियानां ˇदेवानां ˇसुमतौ कल्याणमत्याम् अनुग्रहबुद्ध्या नः अस्मान् ˇसं नेषि संगमयासि । यद्वा– "यज्ञो वै विष्णुः" (शब्रा १.१.२.१३) इति श्रुतेः । श्रीविष्णोरेवावयवत्वेन संबन्धिनां यज्ञियानां देवानां सुमत्या नः सं नेषीति संबन्धः ॥१॥

---

15. B1 लङि for लटि
18. B1 मघवन्नविशिष्ट° for मघवन् विशिष्ट°; B1 किप्रत्ययान्तस्य
22. B1 देवेन for वेदेन
24. B1 °गमयति for °गमयासि

सं वर्चसा पयसा सं तनूभिरगन्महि मनसा स॒ शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनु मार्ष्टु तन्वो यद्विलिष्टम् ॥२॥
सं वर्चसा ॥ स ॥२॥

सा- अथ द्वितीयः - " सं वर्चसा पयसा सं तनूभिरगन्महि मनसा स॒ शिवेन । त्वष्टा सुदत्रो विदधातु रायोऽनु मार्ष्टु तन्वो यद्विलिष्टम् ' इति । ᵛवर्चसा ब्रह्मवर्चसेन ᵛसमगन्महि वयं संगता भवामः। तथा ᵛपयसा क्षीरादिरसेन समगन्महीत्यनुवर्तते । ᵛतनूभिः अनुष्ठानदानैः शरीरावयवैः समगन्महि ᵛशिवेन समीचीनेन कर्मश्रद्धायुक्तेन ᵛमनसा समगन्महि । किं च ᵛसुदत्रः ᵛत्वष्टा शोभनदानोपेतः त्वष्टृनामको देवः ᵛरायः धनानि ᵛदधातु संपादयतु । ᵛतन्वः शरीरस्यास्मदीयस्य ᵛयत् ᵛविलिष्टं विशेषेण न्यूनमङ्गं यदस्ति तदिति शेषः। ᵛअनु ᵛमार्ष्टु न्यूनत्वपरिहारेणानुकूलं कृत्वा शोधयतु ॥२॥

आ- ' सं वर्चसा ' इति व्याख्यातो मन्त्रः ॥

धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपा देवो अग्निः ।
त्वष्टा विष्णुः प्रजया स॒ रराणो यजमानाय द्रविणं दधातु ॥३॥

धाता । रातिः । सविता । इदम् । जुषन्ताम् ।
प्रजापतिरिति प्रजाऽपतिः । निधिपा इति निधिऽपाः । देवः । अग्निः ।
त्वष्टा । विष्णुः । प्रजयेति प्रऽजया । स॒रराण इति सम्ऽरराणः ।
यजमानाय । द्रविणम् । दधातु ॥ थे ॥३॥

सा- अथ तृतीयः - ' धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपा देवो अग्निः । त्वष्टा विष्णुः प्रजया स॒ रराणो यजमानाय द्रविणं दधातु ' इति । ᵛधाता ᵛसविता ᵛप्रजापतिः ᵛअग्निः ᵛत्वष्टा ᵛविष्णुः चेत्येते षड् देवा नोऽस्माकम् ᵛइदं हविः ᵛजुषन्तां सेवन्ताम् । कीदृशो धाता ? ᵛरातिः दानशीलः। कीदृशः प्रजापतिः ? ᵛनिधिपाः महापद्मशङ्खपद्मादिनामकानां नवानां निधीनां पालयिता। कीदृशोऽग्निः ? ᵛदेवः दीप्यमानः । सोऽयं देवगणो यजमानसंबन्धिन्या प्रजया सह ᵛसंरराणः सम्यग् रममाणो ᵛयजमानाय ᵛद्रविणं ᵛदधातु प्रयच्छतु ॥३॥

आ- ' धाता रातिः ' इति लिङ्गोक्तबहुदेवत्या त्रिष्टुप् । अत्रिः । ᵛधाता धारकः पोषकश्च । रातिर्दाने । सर्वश्रेयसां दाता । ᵛसविता सर्वस्य प्रेरकः अभ्यनुज्ञाता च । ᵛप्रजापतिः जनिमतां

---

5. V1 S1 C भवाम for भवामः

सर्वेषां पतिः, परमेष्ठी । ᵛनिधिपाः इति प्रजापतिरेव वा विशेष्यते । निधीयन्ते पुरुषार्था एष्विति निधयः वेदाः, तेषां पाता रक्षिता निधिपाः । देवनादिगुणयुक्तः ᵛदेवः ᵛअग्निः सर्वज्ञो भगवान् । ᵛत्वष्टा। तक्षू त्वक्षू तनूकरणे। देवविरोधिनां रक्षसां बलस्य कृशीकरणकर्ता ᵛविष्णुः प्रपन्नानामपेक्षितफलस्याभिवार्षिता । एवं धात्रादयो देवाः ᵛइदं समिष्टयजुर्लक्षणं हविः ᵛजुषन्तां सेवन्ताम् । जुषित्वा च ᵛप्रजया ᵛसंरराणः यजमानसंबन्धिन्या च प्रजया संरममाणः यजमानाय ᵛद्रविणं ᵛदधातु । अथवा रा दाने। रराणः स्वयं दानशीलः प्रजया सह द्रविणं यजमानाय दधात्विति संबन्धः ॥३॥

सुगा वों देवाः सदंना अकर्म य आंजग्मेदꣳ सवंनं जुषाणाः ।
भरंमाणा वहंमाना हवीꣳष्यस्मे धंत्त वसवो वसूंनि ॥४॥

सुगेति सुऽगा । वः । देवाः । सदंना । अकर्म ।
ये । आजग्मेत्याऽजग्म । इदम् । सवंनम् । जुषाणाः ।
भरंमाणाः । वहंमानाः । हवीꣳषि । अस्मे इत्यस्मे ।
धत्त । वसवः । वसूंनि ॥ द्रैं ॥४॥

सा– अथ चतुर्थः– ‘सुगा वो देवाः सदना अकर्म य आजग्मेदꣳ सवनं जुषाणाः । भरमाणा वहमाना हवीꣳष्यस्मे धत्त वसवो वसूनि ’ इति । हे ᵛदेवाः, ᵛये भवन्तः ᵛइदं ᵛसवनम् इमं यज्ञं ᵛजुषाणाः सेवमानाः ᵛआजग्म आजग्मुः । तेषां ᵛवः युष्माकम् अस्मिन् यज्ञे ᵛसुगा सुगमनीयानि ᵛसदना सदमानि स्थानानि ᵛअकर्म वयमकार्ष्म । हे ᵛवसवः निवासहेतवः, ᵛहवीꣳषि ᵛभरमाणाः पोषयन्तः ᵛवहमानाः रथादिभिश्च नयन्तो यूयम् ᵛअस्मे अस्मासु ᵛवसूनि धनानि ᵛधत्त स्थापयत ॥४॥

आ– देवदेवत्या त्रिष्टुप् । अत्रिः । हे ᵛदेवाः ᵛवः युष्माकं ᵛसुगा सुगानि सुगमनीयानि । सुष्ठु गम्यन्त इति [सुगानि] । ᵛसदना सदनानि । अत्र छान्दसः सुपो लोपः । ᵛअकर्म । करोतेर्लुङि छान्दसं रूपम् । स्थानानि कृतवन्तो वयमित्यर्थः ॥

---

4. B1 after °वार्षिता add सुप्रश्रवणे
14. S1 C तुरीयः for चतुर्थः; V1 S1 C P1 सुगाः for सुगा
15. S1 C ये for यज्ञं
17. V1 S1 C जोषयन्तो for पोषयन्तो
19. B1 नोऽस्माकं for वः युष्माकं ; B1 सुगाः for सुगा

' य आजग्मेदꣳ सवनम् ' । ^{v}ये यूयं देवाः । जग्मुरिति पुरुषव्यत्ययः । ^{v}इदं ^{v}सवनं इमं यज्ञं ^{v}जुषाणाः सेवमानाः । अथ यज्ञे समाप्ते ^{v}भरमाणाः, ये रथिनस्ते रथेषु ^{v}हवींषि भरमाणाः धारयमाणाः । ये वा अरथिनस्ते तु स्कन्धे हवींषि ^{v}वहमानाः वहन्तो नयन्तश्च । हे देवाः हे ^{v}वसवः वासयितारः । वस निवासे वस आच्छादने च । ^{v}वसूनि विशिष्टधनानि । ^{v}अस्मे अस्मासु ^{v}धत्त स्थापयेति (स्थापयतेति ?) संबन्धः ॥४॥

याꣳ३ आऽव॑ह उश॒तो दे॑व दे॒वाꣳस्तान् प्रेर॑य॒ स्वे अ॑ग्ने स॒धस्थे॑ ।
ज॒क्षि॒वाꣳसः॑ प॒पि॒वाꣳस॑श्च॒ विश्वेऽसु॑ं घ॒र्मꣳ स्व॒राति॑ष्ठ॒तानु॑ ॥५॥

यान् । आ । अव॑हः । उ॒श॒तः । दे॒व॒ । दे॒वान् ।
तान् । प्र । ई॒र॒य॒ । स्वे । अ॒ग्ने॒ । स॒धस्थ॒ इति॑ स॒धऽस्थे॑ ।
ज॒क्षि॒वाꣳस॒ इति॑ ज॒क्षि॒ऽवाꣳसः॑ । प॒पि॒वाꣳस॒ इति॑ प॒पि॒ऽवाꣳसः॑ । च॒ । विश्वे॑ ।
असु॑म् । घ॒र्मम् । स्वः॑ । आ । ति॒ष्ठ॒त॒ । अनु॑ ॥ ण्विः ॥५॥

सा– अथ पञ्चमः – ' याꣳ३ आवह उशतो देव देवाꣳस्तान् प्रेरय स्वे अग्ने सधस्थे । जक्षिवाꣳसः पपिवाꣳसश्च विश्वेऽसुं घर्मꣳ स्वरातिष्ठतानु ' इति । हे ^{v}अग्ने ^{v}देव, ^{v}उशतः हवींषि कामयमानान् ^{v}यान् ^{v}देवान् ^{v}आवह आहूतवानसि ^{v}तान् देवान् ^{v}स्वे स्वकीये ^{v}सधस्थे सहनिवासस्थाने ^{v}प्रेरय । किमुक्त्वा प्रेरयेति चेदत आह– एवंभूता हे देवा यूयं ^{v}जक्षिवाꣳसः सवनीयपुरोडाशान् भक्षितवन्तः । ^{v}पपिवाꣳसः सोमपानं कृतवन्तश्च । ^{v}विश्वे सर्वे यूयम् ^{v}अनु यज्ञं समाप्त्यनन्तरम् ^{v}असुं हिरण्यगर्भ-प्राणलक्षणं वायुं वायुमण्डलमित्यर्थः । ^{v}घर्मम् आदित्यमण्डलं वा । ^{v}स्वः द्युलोकं वा ^{v}आतिष्ठत आगच्छत । यस्य यस्य यत्र यत्र गृहाः सन्ति तांस्तानातिष्ठतेत्यर्थः ॥५॥

आ– अग्निं स्तौति– ' याꣳ३ आवह ' इति । आग्नेयी त्रिष्टुप् । अत्रिः । हे भगवन् ^{v}अग्ने, ^{v}यान् ^{v}उशतः हवींषिं कामयमानान् ^{v}आवह आहूतवानसि । हे ^{v}देव अग्ने, ^{v}तान् ^{v}देवान् ^{v}स्वे ^{v}सधस्थे, यत्र सह तिष्ठान्ति तस्मिन् स्वकीयसधस्थाने गृहे निमित्ते ^{v}प्रेरय । प्रेरणाप्रकारं स्वयमेवाह श्रुतिः– ' जाक्षिवाꣳसः पपिवाꣳसश्च ' । ये देवाः पशुपुरोडाशं ^{v}जाक्षिवाꣳसः ।

---

14. S1 C om. देव उशतः
16. V1 S1 C om. किमुक्त्वा ... आह
17. V1 हिरण्यं गर्भ°, P1 हिरण्यगर्भ for हिरण्यगर्भं°

जक्ष् भक्षहसनयोः । अतिशयेन पुरोडाशं भक्षितवन्तः । vविश्वे सर्वे देवाः सोमं vपपिवाꣳसः । पा पिब पाने । अतिशयेन सोमपानं कृतवन्तः । यज्ञश्चायं परिसमाप्तः । अतश्च ‘ असुं घर्मꣳ स्वरातिष्ठतानु ’ । vअसुं हिरण्यगर्भप्राणलक्षणं वायुं वायुमण्डलम् vआतिष्ठत, vघर्मम् आदित्यं वा vआतिष्ठत । vस्वः द्युलोकं वा vअनु आतिष्ठत । यस्य यस्य यत्र यत्र गृहास्तांस्ताननु आतिष्ठतेत्यभिप्रायः ॥ ५ ॥

वयꣳ हि त्वा प्रयति यज्ञे अस्मिन्नग्ने होतारमवृणीमहीह ।
ऋधगया ऋधगुताशमिष्ठाः प्रजानन् यज्ञमुपयाहि विद्वान् ॥६॥

वयम् । हि । त्वा । प्रयतीति प्रऽयति । यज्ञे । अस्मिन् ।
अग्ने । होतारम् । अवृणीमहि । इह ।
ऋधक् । अयाः । ऋधक् । उत । अशमिष्ठाः ।
प्रजानन्निति प्रऽजानन् । यज्ञम् । उप । याहि । विद्वान् ॥ छ्वः ॥६॥

सा– अथ षष्ठः – ‘ वयꣳ हि त्वा प्रयति यज्ञे अस्मिन्नग्ने होतारमवृणीमहीह । ऋधगया ऋधगुताशमिष्ठाः प्रजानन् यज्ञमुपयाहि विद्वान् ’ इति । हे vअग्ने, vहि यस्मात् कारणात् vइह अस्मिन् दिने vअस्मिन् vयज्ञे vप्रयति प्रवर्तमाने सति vहोतारं देवानामाह्वातारं होमनिष्पादकं वा त्वां वयम् vअवृणीमहि वृतवन्तः । तस्मात् कारणात् vऋधक् समृद्धं यथा भवति तथा vअयाः अयाजा (? क्षीः) इष्टवानसि यज्ञं कारितवानित्यर्थः । vउत अपि च vऋधक् समृद्धिं vप्रजानन् अवगच्छन् vअशमिष्ठाः विघ्नशान्तिमकार्षीः । अतस्त्वं vविद्वान् vयज्ञम् vउपयाहि ॥६॥

आ– अग्निमवसृजति– ‘ वयꣳ हि त्वा ’ इति । आग्नेयी त्रिष्टुप् अग्निः । हे भगवन् vअग्ने, vअस्मिन् vयज्ञे vप्रयति प्रय [ग ?] च्छति प्रवर्तमाने पूर्वे वयमेव अग्निं त्वां देवानां vहोतारं रहःस्थाने vअवृणीमहि वृतवन्तः । ‘ अग्निर्देवानां होता ’ इति त्वं वृतोऽसि ॥

किंच ‘ ऋधगयाः ’ । ऋधगिति समृद्ध्यर्थस्य ऋध्नोतेः रूपम् । अया इति यजतेः रूपम् । अया अयाजी (? क्षीः) । अग्ने vऋधक् । vअयाः इष्टवानसि । किं च– ‘ ऋधगुताशमिष्ठाः ’ । vउत अपि च यज्ञम् vऋधक् ऋध्नुवन्नेव समर्धयन्नेव । शम उपशमे । vअशमिष्ठाः प्रायश्चित्तेन छिन्नभिन्नादिदोषोपशमनम् अकार्षीः । vप्रजानन् इदानीं यज्ञसमाप्तिं प्रजानन् अवगच्छन् ।

---

14. V1 S1 C वर्तमाने for प्रवर्तमाने
15. P1 after ऋधक् ins. ऋध्नुवन्नेवेति क्वचित्
16. V1 S1 C om. यज्ञम्

‘ उपयाहि विद्वान् ’। इत उत्तरं कर्तव्यं तद् ᵛविद्वान्, ᵛउपयाहि स्वाधिकारपदमुपयाहि । या प्रापणे ॥६॥

देवा॑ गातुविदो गा॒तु॒मि॒त्वा गा॒तुमि॑त ।
मन॑सस्पत इ॒मं दे॑व य॒ज्ञꣳ स्वाहा॒ वाते॑ धाः ॥७॥

देवा॑ गातुविदः ॥ य ॥७॥

सा– अथ सप्तमः– ‘ देवा गातुविदो गातुमित्वा गातुमित । मनसस्पत इमं देव यज्ञꣳ स्वाहा वाते धाः ’ इति । कै गै रै शब्दे । गीयते नानाविधैर्वैदिकशब्दैः प्रतिपाद्यत इति गातुर्यज्ञस्तं विदन्ति जानन्तीति ᵛगातुविदः । तादृशा हे ᵛदेवाः ᵛगातुम् ᵛइत्वा अस्मदीयो यज्ञः प्रवृत्त इति विदित्वा । एति धातोर्गत्यर्थस्य ज्ञानार्थत्वमुपचर्यते । ᵛगातुम् ᵛइत यज्ञं गच्छ । यद्वा-गातुर्गन्तव्यो मार्गः । अस्मदीयेन यज्ञेन तुष्टाः सन्तः स्वकीयमार्गं गच्छत । हे ᵛमनसः ᵛपते यष्टुमस्मदीयस्य मनसः प्रेरणेन पालक परमेश्वर, ᵛइमम् अनुष्ठितं ᵛयज्ञं ᵛस्वाहा त्वद्धस्ते ददामि । त्वं च ᵛवाते वायुरूपे देवे ᵛधाः धेहि स्थापय ॥७॥

आ– ‘ देवा गातुविदो ’ इति व्याख्यातो मन्त्रः ॥७॥

यज्ञ॑ य॒ज्ञं ग॑च्छ य॒ज्ञप॑तिं गच्छ॒ स्वां योनिं᳚ गच्छ॒ स्वाहा॑ ।
ए॒ष ते॑ य॒ज्ञो य॑ज्ञपते स॒ह॑सूक्तवाक॒ः सर्व᳚वी॒रस्तं जु॑षस्व॒ स्वाहा॑ ॥८॥(३) ॥

यज्ञ॑ । य॒ज्ञम् । ग॒च्छ॒ । य॒ज्ञप॑ति॒मिति॑ य॒ज्ञऽप॑तिम् ॥
स्वाम् । योनि॑म् । ग॒च्छ॒ । स्वाहा॑ ।
ए॒षः । ते॒ । य॒ज्ञः । य॒ज्ञ॒प॒त॒ इति॑ यज्ञऽपते ।
स॒ह॑सूक्तवाक॒ इति॑ स॒ह॑ऽसूक्तवाकः । सर्व᳚वीर॒ इति॒ सर्व᳚ऽवीरः ।
तम् । जु॒ष॒स्व॒ । स्वाहा॑ ॥ धैं ॥८॥ (३) ॥

सा– अथाष्टमः– ‘ यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा ’ इति । हे ᵛयज्ञ, स्वप्रतिष्ठार्थं यज्ञनामकं विष्णुं ᵛगच्छ । फलप्रदानार्थं ᵛयज्ञपतिं यजमानं ᵛगच्छ । स्वनिष्पत्त्यर्थं ᵛस्वां ᵛयोनिं स्वकारणभूतां वायोः क्रियाशक्तिं ᵛगच्छ । ᵛस्वाहा सुहुतमस्तु ॥

अथ नवमः– ‘ एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तं जुषस्व स्वाहा ’ इति । हे यजमान, ᵛएषः अनुष्ठीयमानः ᵛते त्वदीयः ᵛ यज्ञः [ᵛसह-] सूक्तवाकः सूक्तवाकैः स्तोत्रैः सहितः ।

---

7. V1 S1 C after शब्दे ins. इति धातुः
24. V1 S1 Com. [सह] सूक्तवाकः; P1 om. सूक्तवाकैः

ᵛसर्ववीरः । सोमपशुसवनीयचरुपुरोडाशा वीरा इत्युच्यन्ते । तादृशाः सर्वे वीरा यस्य स तथोक्तः । एवंभूतस्त्वं [ᵛतं] यज्ञं ᵛजुषस्व सेवस्व । ᵛस्वाहा सुहुतमस्तु ॥८॥

[इति नवमेऽध्याये तृतीयोऽनुवाकः ॥]

आ– 'यज्ञ यज्ञम्' इति । 'यज्ञ यज्ञम्', 'एष ते' इति द्वे लिङ्गोक्तदेवत्ये यजुषी । हे ᵛयज्ञ, त्वं ᵛयज्ञं श्रीभगवन्तं विष्णुमेव ᵛगच्छ । विष्णुर्हि यज्ञस्मात्मा । 'यज्ञो वै विष्णुः' (शब्रा १.१-२.१३) इति श्रुतेः । हे यज्ञ, ᵛयज्ञपतिं यजमानं त्वं ᵛगच्छ । यजमानेन निवृत्तत्वात् तत्कर्तुरेव क्रियाफलाश्रयत्वात् ᵛस्वां ᵛयोनिं योनिकारणं सर्वहेतुभूतां विष्णोः क्रियाशक्तिं ᵛगच्छ । द्रव्यं दैवतं हि यज्ञस्य स्वयोनिः । तस्य सर्वस्य भगवान् योनिरिति वा । तं गच्छ । ᵛस्वाहा सुहुतमस्तु ॥

'एष ते यज्ञः' इति । हे ᵛयज्ञपते यजमान, ᵛएषः ᵛते तव शरीरभूतो यः ᵛयज्ञः ᵛसहसूक्तवाकः, सूक्तं वदन्तीति सूक्तवाकाः, तैः सहितः सूक्तवाकसहितः विविधस्तोत्रकः । ᵛसर्ववीरः । सर्वे सोमपशुसवनीयचरुपुरोडाशाः वीरा इत्युच्यन्ते । सर्वे वीरा यस्य स सर्ववीरः । यज्ञ [पते], एषः यज्ञः तव श्रेयसे भूयादिति शेषः । अतस्त्वं ᵛतं यज्ञं ᵛजुषस्व सेवस्व इति संबन्धः । ᵛस्वाहा सुहुतमस्तु ॥८॥

[इति नवमेऽध्याये तृतीयोऽनुवाकः ॥३॥]

[अथ चतुर्थोऽनुवाकः]

तृतीयेऽनुवाके समिष्टयजुर्होमोऽभिहितः । चतुर्थेऽवभृथो वर्ण्यते ।

माऽहि॑र्भू॒र्मा पृदा॑कुः ।
उ॒रुꣳ हि रा॒जा वरु॑णश्च॒कार॒ सूर्या॑य॒ पन्था॒मन्वे॑त॒वा उ॑ ।
अ॒पदे॒ पादा॒ प्रति॑धातवेऽकरु॒तापव॒क्ता हृ॑दया॒विध॑श्चित् ।
नमो॒ वरु॑णाया॒भिष्ठि॑तो॒ वरु॑णस्य॒ पाश॑ः ॥१॥

उ॒रुम् । हि । राजा॑ । वरु॑णः । च॒कार॑ ।
सूर्या॑य । पन्था॑म् । अन्वे॑त॒वा इत्य॑नु॒ऽए॒त॒वै । ऊँ॒ इत्यू॑म् ।
अ॒पदे॑ । पादा॑ । प्रति॑धातव॒ इ॒ति प्रति॑ऽधातवे । अ॒क॒ः ।
उ॒त । अ॒प॒व॒क्तेत्य॑प॒ऽव॒क्ता । हृ॒द॒या॒विध॑ः । हृ॒द॒य॒वि॒ध॒ इति॑ हृ॒द॒य॒ऽवि॒ध॑ः । चि॒त् ।
नम॑ः । वरु॑णाय । अ॒भिष्ठि॑तः । अ॒भिस्थि॑त॒ इत्य॒भिऽस्थि॑तः । वरु॑णस्य । पाश॑ः ॥ ग्रु॑ः ॥१॥

कात्यायनः – "कृष्णविषाणामेखले चात्वाले प्रास्यति माऽहिर्भूरिति" (काश्रौ १०·८·१३) इति । यजमानहस्तबद्धा कृष्णविषाणा या च मध्यबद्धा शरमयी मेखला उभे विस्रंस्य चात्वाले प्रक्षिपेत् । पाठस्तु– 'माऽहिर्भूर्मा पृदाकुः' इति । ᵛअहिः सर्पः ᵛमा ᵛभूः मा भूयाः । ᵛपृदाकुः अजगरः सर्पविशेषः सोऽपि ᵛमा भूयाः ॥

कात्यायनः – "उरुꣳ हीति वाचयति" (काश्रौ १०·८-१५) इति । अवभृथार्थं जिगमिषुरध्वर्युर्यजमानं वाचयेत् । पाठस्तु– 'उरुꣳ हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ । अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित्' इति । उशब्दोऽवधारणे । ᵛवरुणः एव ᵛराजा ᵛसूर्याय सूर्यस्य ᵛअन्वेतवै अनुक्रमेण गन्तुम् ᵛअपदे निरालम्बे अन्तरिक्षे ᵛउरुं ᵛपन्थां विस्तीर्णं मार्गं ᵛहि यस्मात् ᵛचकार, तस्मादस्माकमपि ᵛपादा ᵛप्रतिधातवे पादं प्रक्षेप्तुं मार्गम् ᵛअकः करोतु । ᵛउत अपि च, यः शत्रुः ᵛअपवक्ता निन्दकः, यश्च ᵛहृदयाविधः हृदयोपलक्षितं शरीरं ताडयति । चित्-शब्दः समुच्चये । सोऽपि प्रतिबन्धमकृत्वा मार्गं करोत्वित्यर्थः ।

कात्यायनः – "नमो वरुणायेति वाचयत्यपोऽवक्रमयन्" (काश्रौ १०·८-२१) इति । अवभृथस्नानार्था अपः प्रवेशयन् यजमानं वाचयेत् । पाठस्तु– 'नमो वरुणायाभिष्ठितो वरुणस्य पाशः' इति । ᵛवरुणस्य ᵛपाशः ᵛअभिष्ठितः आक्रान्तः । तस्मै ᵛवरुणाय नमस्करोत्विति शेषः ॥१॥

आ– कृष्णविषाणामेखले प्रास्यति– 'माऽहिर्भूः' इति । दैवे यजुषी । ᵛअहिः सर्पः ᵛमा ᵛभूः भूयाः । ᵛपृदाकुः अजगरः ᵛमा भूयाः । वाचयति– 'उरुꣳ हि' इति । शुनःशेपो वारुणी त्रिष्टुप् । ᵛवरुणः ᵛराजा ᵛसूर्याय ᵛपन्थाम् । षष्ठ्यर्थे चतुर्थी । सूर्यस्य पन्थां पन्थानं विस्तीर्णं ᵛचकार ᵛहि कृतवान् ᵛअन्वेतवै अन्वेतुम् । ᵛउ अपि । एवम् अन्वहमागमनायैव । अथ ᵛअपदे अन्यस्मिन् पदे पथि अन्तरिक्षलोके । ᵛपादा । षष्ठीबहुवचनस्थाने आकारः । पादानां ᵛप्रतिधातवे प्रतिधातुं प्रतिनिधानाय ᵛअकः अकरोत् कृतवान् । आलम्बनं कृतवानिति शेषः । प्रत्यक्षतो मर्मण्युच्चार्योच्चार्य हृदयं यः पिशुनो विध्यति स हृदयवित् । छान्दसो दीर्घः । तस्य ᵛहृदयविधः परेषां हृदयव्यथाकर्तुरपि अयं वरुणः ᵛअपवक्ता अपवादस्य कर्तुरपि व्यथयिता । किमुत अन्येषाम् अयुक्तकारिणामिति । यत एवंभूतो वरुणः सोऽस्माकमवभृथाय तीर्थं ददातु इति शेषः । अथवा अनालम्बे अन्तरिक्षे अन्वेतवै अनुक्रमेण गन्तुं सूर्यस्य पन्थां पन्थानम् ᵛउरुं विस्तीर्णं वरुणः राजा अस्माकमपि पादा पादान् प्रतिधातवे प्रतिधातुं विस्तीर्णं पन्थानम् अकः करोतु, अस्मदवभृथार्थमपि च । यो नाम हृदयाविधः हृदयवेदनाप्रकरणः अपवक्ता पुरुषोऽपि नास्माकमपवक्ता । अपि तु सोऽस्माकमवभृथार्थं मार्गं करोतु । अवभृथार्थगमनप्रतिषेधं मा कार्षीदित्यभिप्रायः । अप्सु

---

1. V1 S1 C भूपृदाकुर् for भूर्
2. V1 S1 C हस्तं बद्ध्वा .. मध्ये बद्ध्वा for हस्तबद्धा ... मध्यबद्धा
10. V1 S1 C तापयति for ताडयति
14. P1 after वरुणाय add, च

क्रममाणं वाचयति– ‘ नमो वरुणाय ’ इति । अवभृथस्नानार्थं ᵛवरुणस्य ᵛपाशः त्वालम्बनाय ᵛअभिष्ठितः आक्रान्तः ॥१॥

अ॒ग्नेरनी॑कम॒प आ वि॑वे॒शा॒पां नपा॑त् प्र॒ति॒रक्ष॑न्नसु॒र्य॑म् ।
दमे॑दमे स॒मिधं॑ यक्ष्यग्ने॒ प्रति॑ ते जि॒ह्वा घृ॒तमुच्च॑रण्य॒त् स्वाहा॑ ।।२।।

अ॒ग्नेः । अनी॑कम् । अ॒पः । आ । वि॒वे॒श॒ ।
अ॒पाम् । नपा॑त् । प्र॒ति॒रक्ष॒न्निति॑ प्र॒ति॒ऽ- रक्ष॑न् । अ॒सु॒र्य॑म् ।
दमे॑दम॒ इ॒ति॒ दमे॑ऽदमे । स॒मि॒धमिति॑ स॒म्ऽइध॑म् । य॒क्षि॒ । अ॒ग्ने॒ ।
प्रति॑ । ते॒ । जि॒ह्वा । घृ॒तम् । उत् । च॒र॒ण्य॒त् । स्वाहा॑ ॥ ऋचः ॥२॥

सा– कात्यायनः – “ प्रास्य समिधं चतुर्गृहीतेनाभिजुहोत्यग्नेरनीकमिति ” (काश्रौ १०.८.२२) इति । अप्सु काञ्चित् समिधं प्रक्षिप्य चतुर्गृहीतेनाज्येन तामभिजुहुयात् । पाठस्तु– ‘ अग्नेरनीकमप आ विवेशापां नपात् प्रतिरक्षन्नसुर्यम्। दमे दमे समिधं यक्ष्यग्ने प्रति ते जिह्वा घृतमुच्चरण्यत् स्वाहा ’ इति । ᵛअग्नेः ᵛअनीकं सुखम् ᵛअपः उदकान्याभिमुख्येन ᵛविवेश । हे ᵛअपां ᵛनपात् एतन्नामकाग्ने, ᵛदमदमे तत्तद्यज्ञगृहे ᵛअसुर्यम् असुरैः कृतं यज्ञविघ्नं ᵛप्रतिरक्षन् प्रतिनिवर्त्य यज्ञं पालयन् ᵛसमिधं समिन्धनसाधनं समित्काष्ठं ᵛयक्षि संगतं कुरु । अनन्तरं हे ᵛअग्ने, ᵛते तव ᵛजिह्वा ज्वाला ᵛघृतं ᵛप्रति ᵛउच्चरण्यत् उद्युक्ता भवतु । ᵛस्वाहा सुहुतमस्तु ॥२॥

आ– समिधं प्रास्याभिजुहोति– ‘ अग्नेरनीकम् ’ इति । आग्नेयी त्रिष्टुप् यजुरन्ता । ᵛअग्नेः ᵛअनीकं यस्य सतः तत्र यत् अनीकं सुखम् ᵛअपः उदकम् ᵛआ ᵛविवेश प्रविवेश । प्रविष्टम् ᵛअपां ᵛनपात् अपामपत्यमपां नपात् । ᵛअसुर्यम् असुरस्य स्वयंजातम् । हे भगवन् ᵛअग्ने, स त्वं ᵛप्रतिरक्षन् असुरैः क्रियमाणं यज्ञविघातं प्रतिनिवार्य अपां नपात्संज्ञकं रक्षन् ᵛदमेदमे ᵛसमिधं ᵛयक्षि । दम इति गृहनाम । दमेदमे यज्ञगृहे [यज्ञ-] गृहे समिधं याक्षि । यजतिः संगतिकरणार्थः । समिधं (धः ?) संगतिं कुरु । समित्संगतो भव । ततोऽनन्तरं हे अग्ने। ‘ प्रति ते जिह्वा घृतम् ’ । ᵛघृतं ᵛप्रति ᵛते तव ᵛजिह्वा ज्वाला ᵛउच्चरण्यत् । चर गतौ । “ कण्ड्वादिभ्यो यक् ” (पा ३.१.२७) । [उच्चरन्तु] समिधः [सकाशात्]॥२॥

---

13. P1 after गृहे ins. दम इति गृहनाम; V1 S1 C om. यज्ञविघ्नं; V1 S1 C om. प्रतिनिवर्त्य यज्ञं पालयन्; V1 S1 C om. समिन्धनसाधनं समित्काष्ठं [L 14]

14. V1 S1 C संगतिं for संगतं; P1 om. अनन्तरं हे अग्ने

स॒मु॒द्रे ते॒ हृद॑यम॒प्स्व॒न्तः सं त्वा॑ विश॒न्त्वोष॑धीरु॒ताप॑ः ।
य॒ज्ञस्य॑ त्वा यज्ञपते सू॒क्तोक्तौ॑ नमोवा॒के वि॑धेम॒ यत् स्वाहा॑ ॥३॥

स॒मु॒द्रे । ते॒ । हृद॑यम् । अ॒प्स्वित्य॒प्ऽसु । अ॒न्तरित्य॒न्तः ।
सम् । त्वा॒ । वि॒श॒न्तु॒ । ओष॑धीः । उ॒त । आप॑ः ।
य॒ज्ञस्य॑ । त्वा॒ । य॒ज्ञ॒प॒त॒ इति॑ यज्ञऽपते । सू॒क्तोक्ता॒ इति॑ सू॒क्तऽउ॑क्तौ ।
न॒मो॒वा॒क इति॑ न॒मः॒ऽवा॒के । वि॒धे॒म॒ । यत् । स्वाहा॑ ॥ भौं ॥३॥

सा– कात्यायनः – ‘‘ समुद्रे त इत्यृजीषकुम्भं प्लावयति ’’ (काश्रौ १०·९-१) इति । गतसारः सोम ऋजीषस्तेन पूर्णं कुम्भमप्सु प्रक्षिपेत्। पाठस्तु– ‘ समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः । यज्ञस्य त्वा यज्ञपते सूक्तोक्तौ नमोवाके विधेम यत् स्वाहा ’ इति । हे सोम, ᵛते तव ᵛहृदयं ᵛसमुद्रे समुद्रसमानासु ᵛअप्सु ᵛअन्तः मध्ये प्रतितिष्ठत्विति शेषः । ᵛओषधीः ओषधयः त्वां सम्यग् ᵛविशन्तु । ᵛउत अपि च ᵛआपः विशन्तु । हे ᵛयज्ञपते यज्ञस्य पालक, ᵛयज्ञस्य यजनीयं ᵛत्वा ᵛसूक्तोक्तौ शोभनवचनोच्चारणेन ᵛनमोवाके नमस्कारवचनेन ᵛविधेम स्थापयामः । यस्मादेवं तस्मात् ᵛस्वाहा सुहुतमस्तु ॥३॥

आ– [ऋजीषकुम्भं प्लावयति– ‘ समुद्रे ते ’ इति । सौमी विराट् । यत् ᵛते तव ᵛहृदयम् ᵛअप्सु ᵛअन्तः अपां च अन्तर्मध्ये वर्तते ᵛतत्र त्वां गमयामि ।] ᵛसं ᵛत्वा ᵛविशन्तु ᵛओषधीः । तत्र स्थितमनस्कस्य ते ओषधयः सन्तु सदा भवन्तु । हे ᵛयज्ञपते सोम, यस्य पतिः त्वाम् ᵛआपः आविशन्तु । ᵛयज्ञस्य ते ᵛसूक्तोक्तौ शोभनवचनोच्चारणेन ᵛनमोवाके नमस्कारवचनेन च सोमं त्वां ᵛविधेम । विधातिरत्र स्थापनार्थः । ᵛस्वाहा इति होमार्थः ॥३॥

देवी॑राप ए॒ष वो॒ गर्भ॒स्तꣳ सुप्री॑त॒ꣳ सुभृ॑तं बिभृत ।
दे॑व सोमै॒ष ते॑ लो॒कः परि॑ च॒ वक्षि॒ शं च॑ वक्षि ।
अव॑भृथ निचुम्पुण निचे॒रुर॑सि निचुम्पुण ।
अव॑ दे॒वैर्दे॒वकृ॑त॒मेनो॑ऽयासिष॒मव॒ मर्त्यै॒र्मर्त्य॑कृतं पु॒रुरा॑व्णो देव रि॒षस्पा॑हि ।
दे॒वाना॑ꣳ स॒मिद॑सि ॥४॥(४)॥

V1 S1 C स्थापयाम for स्थापयामः

देवी॑ः । आ॒प॒ः । ए॒षः । व॒ः । गर्भ᳚ः ।
तम् । सुप्री॑त॒मिति॒ सुऽप्री॑तम् । सुभृ॑त॒मिति॒ सुऽभृ॑तम् । बि॒भृ॒त॒ ।
देव॑ । सो॒म॒ । ए॒षः । ते॒ । लो॒कः । परि॑ । च॒ । वक्षि॑ । शम् । च॒ । व॒क्षि॒ ।
दे॒वाना॑म् । स॒मिदिति॑ स॒म् - इत् । अ॒सि॒ ॥ ठीः ॥४॥ (४) ॥

सा– कात्यायनः – "देवीराप इति विसृज्योपतिष्ठते" (काश्रौ १०·९·२) इति । ऋजीषं विसृज्य उपस्थानं कुर्यात् । पाठस्तु– 'देवीराप एष वो गर्भस्तꣳ सुप्रीतꣳ सुभृतं बिभृत । देव सोमैष ते लोकः परि च वक्षि शं च वक्षि' इति । ᵛदेवीः हे ᵛआपः देव्यः, ᵛवः युष्माकम् ᵛएषः सोमो गर्भस्थानीयः ᵛतं तादृशं सोमं ᵛसुप्रीतं शोभनप्रीतियुक्तं ᵛसुभृतं सुपुष्टं ᵛबिभृत धारयत । हे दीप्यमान ᵛसोम, ᵛते तव ᵛएषः वक्ष्यमाणः ᵛलोकः स्थानं, तत्रावस्थितस्त्वं ᵛपरि समन्तात् ᵛशं सुखं ᵛवक्षि अस्मान् प्रति वह प्रापय, अस्मत्तः सर्वान् सुखं प्रापय । च-शब्दः इतरेतरसमुच्चयार्थः ॥

कात्यायनः – "अवभृथेति मज्जयति" (काश्रौ १०·९·३) इति । यजमानं स्नापयेत । पाठस्तु– 'अवभृथ निचुम्पुण निचेरुरसि निचुम्पुण । अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि' इति । अवाचीनानि पात्राणि जलमध्ये ह्रियन्ते यस्मिन् यज्ञविशेषे सोऽयमवभृथः । हे ᵛअवभृथ, त्वं ᵛनिचुम्पुण नितरां मन्दं गच्छ । चुपि मन्दायां गतौ । ᵛनिचेरुः ᵛअसि नितरां चरणशीलोऽसि । तथाप्यत्र ᵛनिचुम्पुण नितरां मन्दं गच्छ । किं प्रयोजनमिति तदुच्यते– ᵛदेवैः द्योतनात्मकैरस्मदीयैरिन्द्रियैः ᵛदेवकृतं हविःस्वामिषु देवेषु कृतम् ᵛएनः पापं यदस्ति तत् ᵛअवायासिषम् अस्मिन् जलेऽहमवनीतवानस्मि । तथा ᵛमर्त्यैः मनुष्यैरस्मत्सहायभूतैर्ऋत्विग्भिः ᵛमर्त्यकृतं मर्त्येषु मनुष्येषु यज्ञदर्शनार्थमागतेषु कृतमवज्ञारूपं यदेनोऽस्ति तदप्यहमवायासिषमित्यनुवर्तते । इदमस्माभिः परित्यक्तमेनो यथा त्वां न प्राप्नोति तथा हे यज्ञ, मन्दं गच्छेत्यभिप्रायः । हे ᵛदेव अवभृथाख्य यज्ञ, त्वं ᵛपुरुराव्णः । रा दाने । बहुविधविरुद्धफलदायिनः ᵛरिषः वधात् ᵛपाहि पालय । रिषतिर्हिंसार्थः । विरुद्धफलदायी वधस्त्वत्प्रसादादस्माकं मा भूदित्यर्थः ॥

कात्यायनः – "आहवनीये समिदाधानं देवानाꣳ समिदसीति" (काश्रौ ५·५·३५) इति । स्नानानन्तरमाहवनीयसमीपं गत्वा तस्मिन् समिधमादध्यात् । ᵛदेवानां संबन्धिनी ᵛसमिद् इन्धनम् ᵛअसि ॥४॥

(इति नवमेऽध्याये चतुर्थोऽनुवाकः ॥४॥)

आ– विसृज्योपतिष्ठते– 'देवीरापः' इति । बृहती पूर्वर्धार्चे आप्यः, उत्तरस्तु सोम्यः । अपां च सोमस्य च संगतिं वदति । ᵛदेवीः हे देव्यः ᵛआपः, ᵛएषः सोमः ᵛवः युष्माकं ᵛगर्भः भूत्वा वर्तते । अतो यूयं ᵛतं सोमं ᵛसुप्रीतं साधु तर्पितं ᵛसुभृतं सुभरणसंपन्नं सुपुष्टं यथा भवति तथा ᵛबिभृत धारय । हे ᵛदेव हे ᵛसोम, ᵛएषः ᵛते तव सोमस्य ᵛलोकः स्थानम् ।

15· V1 S1 C om. तद्
20. V1 S1 C after दाने add इति धातुः; V1 S1 C ऋषिर्हिंसार्थे for रिषतिर्हिंसार्थः

तस्मिन् अवस्थितः त्वं ᵛशं ᵛवक्षि । वह प्रापणे । शं ᵛच वक्षि अस्मान् प्रति वह प्रापय । ᵛपरि ᵛच ᵛवक्षि अस्मत्तः सर्वान् संप्रापय ।

मज्जयति– ‘ अवभृथ निचुम्पुण ’ इति । व्याख्यातोऽयं मन्त्रस्तृतीये ।

समिधमादधाति– ‘ देवाना१ँ समिदसि ’ इति । आग्नेयं यजुः । ᵛदेवानां संबन्धिनी ᵛसमित् इन्धनं त्वम् ᵛअसि ॥४॥

[इति नवमेऽध्याये चतुर्थोऽनुवाकः ॥४॥

[अथ पञ्चमोऽनुवाकः]

चतुर्थेऽवभृथो निरूपितः । अनुबन्ध्या यदि गर्भिणी स्यात् तत्र प्रायश्चित्तिः पञ्चमेऽनुवाके निरूप्यते —

एज॑तु॒ दश॑मास्यो॒ गर्भो॑ ज॒रायु॑णा स॒ह ।
य॒थाऽयं वा॒युरेज॑ति॒ यथा॑ समु॒द्र एज॑त्ये॒वायं दश॑मास्यो॒
अस्र॑ज्ज॒रायु॑णा स॒ह ॥१॥

एज॑तु । दश॑मास्य॒ इति॒ दश॑ऽमास्यः । गर्भः॑ । ज॒रायु॑णा । स॒ह ।
यथा॑ । अ॒यम् । वा॒युः । एज॑ति । यथा॑ । स॒मु॒द्रः । एज॑ति । ए॒व ।
अ॒यम् । दश॑मास्य॒ इति॒ दश॑ऽमास्यः । अस्र॑त् । ज॒रायु॑णा । स॒ह ॥ ओं ॥१॥

कात्यायनः – “ निरुह्यमाणमभिमन्त्रयत एजतु दशमास्य इति ” (काश्रौ २५·१०·५) इति । यद्यनुबन्ध्या वशा गर्भिणी तदा विशसनकाले मातुः सकाशात् पृथक् क्रियमाणं गर्भमभिमन्त्रयेत । पाठस्तु– ‘ एजतु दशमास्यो गर्भो जरायुणा सह । यथाऽयं वायुरेजति यथा समुद्र एजत्येवायं दशमास्यो अस्रज्जरायुणा सह ’ इति । ᵛदशमास्यः दशमासकालावच्छिन्नः इव अयं ᵛगर्भः । जरायुर्गर्भवेष्टनम् । तेन ᵛसह ᵛएजतु कम्पनं चलनं करोतु । एजृ कम्पने । ᵛयथा येन प्रकारेण ᵛअयं ᵛवायुः ᵛएजति चलति, ᵛयथा ᵛसमुद्रः चलति, एवम् ᵛअयं ᵛदशमास्यः संपूर्णावयवो गर्भः ᵛजरायुणा ᵛसह ᵛअस्रत् निर्गच्छतु ॥१॥

---

17. P1 °मन्त्रयते for मन्त्रयेत

19. V1 S1 C om. दशमास्यः दशमासाव° ... गर्भः ।

20. V1 S1 C after कम्पने add इति धातुः

आ – इत उत्तरम् अनुबन्ध्या यदि गर्भिणी स्यात् तत्र प्रायश्चित्तिरुच्यते । निरुह्यमाणं पृथक् क्रियमाणं गर्भमभिमन्त्रयते– ‘ एजतु दशमास्यः ’ इति । लिङ्गोक्तदेवत्या महापङ्क्तिः । vदशमास्यः, दशसु मासेषु भवो गर्भो दशमास्यः । vगर्भः vजरायुणा vसह । जरायुर्गर्भवेष्टनम् । तेन सह । एजृ कम्पने । कम्पनं चलनम् । vएजतु कम्पतु चलतु । कथं चलत्विति । vयथा vअयं vवायुः vएजति चलति कम्पते, vयथा अनेन प्रकारेण vसमुद्रः vएजति, एवम् vअयं vदशमास्यः संपूर्णावयवो गर्भः vजरायुणा vसह vअस्रत् सुखेन निर्गच्छतु । अस्रदिति स्रंसतेः रूपं, स्रवतेर्वा ॥१॥

यस्या॑स्ते य॒ज्ञियो॒ गर्भो॒ यस्या॒ योनि॑र्हि॒रण्ययी॑ ।
अङ्गा॒न्यह्रु॑ता॒ यस्य॒ तं मा॒त्रा सम॑जीगम॒ꣳ स्वाहा॑ ।।२।।

यस्याः॑ । ते॒ । य॒ज्ञियः॑ । गर्भः॑ । यस्याः॑ । योनिः॑ । हि॒रण्ययी॑ ।
अङ्गा॑नि । अह्रु॑ता । यस्य॑ । तम् । मा॒त्रा । सम् । अ॒जी॒ग॒म॒म् । स्वाहा॑ ॥ लुं ॥ २ ॥

कात्यायनः – “ अवदानान्यनु जुहोति यस्यास्त इति ” (काश्रौ २५·१०·९) इति । वशायाः दानानि प्रथमं हुत्वा पश्चाद्गर्भं जुहुयात् । पाठस्तु– ‘ यस्यास्ते यज्ञियो गर्भो यस्या योनिर्हिरण्ययी । अङ्गान्यह्रुता यस्य तं मात्रा समजीगमꣳ स्वाहा ’ इति । vयस्याः वशाया अनुबन्ध्यायाः vगर्भः vयज्ञियः यज्ञार्हः; vयस्याः तव vयोनिः vहिरण्ययी हिरण्मयी, तादृशीं त्वां गर्भेण संगमयामीति शेषः । vयस्य गर्भस्य vअङ्गानि vअह्रुता अह्रुतानि अवर्द्धितानि vतं गर्भं vमात्रा अनुबन्ध्यालक्षणया जनन्या vसमजीगमं संगमयामि । vस्वाहा इति होमार्थः ॥२॥

आ– अवदानान्यनु जुहोति– ‘ यस्यास्ते ’ इति । वशादेवत्यानुष्टुप् यजुरन्ता । vयस्याः वशायाः वन्ध्यायाः vते तव vयज्ञियः यज्ञार्हः vगर्भः, vयस्याः तव vयोनिः vहिरण्ययी हिरण्मयी, तां वशां त्वां गर्भेण संगमयामीति शेषः । ‘ अङ्गान्यह्रुता यस्य ’ । गर्भस्य vअङ्गानि vअह्रुता अह्रुतानि अनवखण्डितानि । “ ह्रु ह्वरेश्छन्दसि ” (पा ७·२·३२) इति ह्वरेर्ह्रु आदेशः । अनभिवर्द्धिता वा । vतं गर्भं vमात्रा अनुबन्ध्यालक्षणया जनन्या vसमजीगमं संगमयामि । vस्वाहा इति होमार्थः ॥२॥

---

2. B1 अतिमन्त्रयते for अभिमन्त्रयते
3. B1 °वेष्टने for °वेष्टनम्
6. B1 सहस्रत् for अस्रत्; B1 सहस्रादिति for अस्रादिति
15. C S1 om. हिरण्मयीः V1 om. हिरण्ययी; P1 यस्याः for यस्य;
16. V1 S1 C अनवर्धितानि for अवर्धितानि

पु॒रु॒द॒स्मो विषु॑रूप॒ इन्दु॑र॒न्तर्म॑हि॒मान॑मानञ्ज॒ धीरः॑ ।
एक॑पदीं द्वि॒पदीं॑ त्रि॒प॒दीं चतु॑ष्पदीम॒ष्टाप॑दीं॒ भुव॒नानु॑ प्रथन्ता॒ꣳ स्वाहा॑ ॥३॥

पु॒रु॒द॒स्म इति॑ पु॒रु॒ऽद॒स्मः । विषु॑रूप॒ इति॒ विषु॑ऽरूपः । इन्दु॑ः ।
अ॒न्तः । म॒हि॒मान॑म् । आ॒न॒ञ्ज॒ । धीर॑ः ।
एक॑पदी॒मित्येक॑ऽपदीम् । द्वि॒पदी॒मिति॑ द्वि॒ऽपदी॑म् । त्रि॒पदी॒मिति॑ त्रि॒ऽपदी॑म् ।
चतु॑ष्पदी॑म् । चतु॑ःपदी॒मिति॒ चतु॑ःऽपदीम् । अ॒ष्टाप॑दी॒मित्य॒ष्टाऽप॑दीम् ।
भुव॑ना । अनु॑ । प्र॒थ॒न्ता॒म् । स्वाहा॑ ॥ छैं ॥३॥

सा– कात्यायनः – “ प्रतिप्रस्थाता प्रचरण्यां सर्वमवद्यति ॥ स्विष्टकृतमनु जुहोति पुरुदस्म इति ” (द्र. काश्रौ २५·१०·१२-१३) इति । प्रचरण्यां स्रुचि प्रतिप्रस्थाता गर्भरसं सर्वमवदाय अध्वर्युणा स्विष्टकृद्धोमे कृते सति जुहुयात् । पाठस्तु– ‘ पुरुदस्मो विषुरूप इन्दुरन्तर्महिमानमानञ्ज धीरः । एकपदीं द्विपदीं त्रिपदीं चतुष्पदीमष्टापदीं भुवनानु प्रथन्ताꣳ स्वाहा ’ इति । ᵛइन्दुः क्लेदनरूपः सोमसदृशः गर्भः ᵛमहिमानं महत्त्वम् ᵛआनञ्ज व्यक्तिं करोतु । कीदृशः ? ᵛपुरुदस्मः बहुदानयुक्तः ᵛविषुरूपः बहुरूपः ᵛअन्तः उदरेऽवस्थितः ᵛधीरः मेधावी इत्थंरूपं महिमानमानञ्जेत्यर्थः । भुवनानि भूतजातानि ᵛअनु ᵛप्रथन्तां वशाया गर्भं प्रख्यातं कुर्वन्तु । इयं वशा चतुष्पदी सती कथमेकपद्यादिभिः स्तूयते ? उच्यते– यदा वशासंबन्धिन्यां वपायां जुहुयात् तदा एकपदी, यदा अङ्गहोमस्तदा द्विपदी, यदौपयड्होमः कृतस्तदा त्रिपदी, यदा पत्नीसंयाजैर्जुहुयात् तदा चतुष्पदी । चतुर्भिः पादैर्युक्ता वा । एवं स्वपादैर्गर्भसंबन्धिभिश्च पादैरष्टापदी । एवंभूतां वशां गणयित्वा ᵛअनुप्रथन्ताम् इति संबन्धः । ᵛस्वाहा सुहुतमस्तु ॥३॥

आ– अध्वर्योरनुहोमं जुहोति– इन्दुसंस्तवेन गर्भः स्तूयते– ‘ पुरुदस्मः ’ इति । गर्भदेवत्या त्रिष्टुप् यजुरन्ता । ᵛपुरुदस्मः । दसेरौणादिको मट् । बहुदानः । ᵛविषुरूपः बहुरूपा गर्भा भवन्ति । ᵛइन्दुः सोमः । पशोर्हि सोम (संस्तवो) विद्यते । ᵛअन्तः उदरे व्यवस्थितः । ᵛमहिमानं महाभाग्यम् ᵛआनञ्ज अभिव्यक्तीकरोतु । ᵛधीरः मेधावी । इत्थंरूपं महिमानमानञ्ज ।

---

8. V1 S1 C after सर्वम् ins. एवम् ;
   S1 C om. स्विष्टकृतम् ... अध्वर्युणा (L. 25)
14. V1 S1 C चतुष्पदा for चतुष्पदी; V1 S1 C om. स्तूयते
15. C यद् यदाङ्गैर्भागः, V यदाङ्गैर्यागः for यदा अङ्गहोमः
16. P1 °संयाजे for संयाजैः
18. B1 °संस्तवेन for संस्तवेन
20. B1 ... सोम भावो for सोमसंस्तवो

येन ᵛएकपदीं ᵛद्विपदीं ᵛत्रिपदीं ᵛचतुष्पदीम् ᵛअष्टापदीम् अपि वशाम् .... भूतरूपेण ᵛभुवना भुवनानि भूतजातानि ᵛअनुप्रथन्तां वशायाः गर्भमनुप्रथन्ते । वृद्धिरेवं भूतानामपि भविष्यतीत्यभिप्रायः । कथमियं वशा चतुष्पदी सती एकपद्यादि[भेदैर्] उच्यते । अवप्लुत्य स्तूयत इति ब्रूमः । वशेत्येकपदी । वपया अङ्गैश्च द्विपदी । उपयट्होमैस्त्रिपदी । पत्नीसंयाजैश्चतुष्पदी । चतुर्भिः पादैर्वा चतुष्पदी । एवं स्वपादैर्गर्भसंबन्धिभिः पादैश्च अष्टापदी ॥ ३ ॥

म॑रु॒तो॒ यस्य॒ हि क्षये॑ पा॒था दि॒वो वि॑महसः ।
स सु॑गो॒पात॑मो॒ जन॑ः ॥४॥

म॑रुतः । यस्य॑ । हि । क्षये॑ । पा॒थ । दि॒वः । वि॒म॒ह॒स॒ इति॑ विऽमहसः ।
सः । सु॒गो॒पात॑म॒ इति॑ सु॒ऽगो॒पात॑मः । जन॑ः ॥ त्रं ॥ ४ ॥

सा– कात्यायनः –" समिष्टयजुरन्ते शामित्र एव जुहुयात् तिष्ठन्मरुत इत्यस्वाहाकृत्य " (काश्रौ २५.१०.१६) इति । यदि यजमानः शापाद्बिभीयात् तदा समिष्टयजुर्होमानन्तरं शामित्रे अग्नावेव गर्भं जुहुयात् । मन्त्रान्ते स्वाहाकारोऽपि न कर्तव्य इति । पाठस्तु– ' मरुतो यस्य हि क्षये पाथा दिवो विमहसः । स सुगोपातमो जनः ' इति । हे देवाः, ᵛदिवः ᵛविमहसः द्युलोकस्य संबन्धिना विशिष्टेन महसा तेजसा युक्ताः हे ᵛमरुतः, यूयं ᵛयस्य यजमानस्य ᵛक्षये यज्ञगृहे ᵛपाथ पानं कुरुथ । 'पा पाने' इत्यस्य छान्दसं रूपम् । ᵛहि यस्मादेवं तस्मात् ᵛसः यजमानाख्यः ᵛजनः ᵛसुगोपातमः सुगुप्ततमो भवति । युष्मद्गुप्तानां न भयमस्तीत्यर्थः ॥४॥

आ– जुहोति– ' मरुतो यस्य ' इति । गौतमो मारुती गायत्री । हे ᵛमरुतः, मरुतो नाम देवाः ᵛयस्य यजमानस्य ᵛक्षये निवासे गृहे ᵛपाथ । पा पाने । शपो लुकि, पाथ, पानं कुरुथ । हे देवाः । ' दिवो विमहसः ' । ᵛदिवः द्युलोकस्य संबन्धिना वि[शिष्टेन] महसा तेजसा युक्ता ᵛविमहसः विशिष्टतेजःसंपन्नाः दिवः विमहसः मरुतः यस्य क्षये पाथ । ᵛसुगोपातमः सुगोप्तृतमो भवति युष्मद्गुप्तानां न भयमस्तीत्यभिप्रायः ॥४॥

---

1. B1 वशां गर्भात्वोद्भूते । रूपेण for वशाम् ... भूतरूपेण
3. B1 अवयत्य (अवप्लुत्य)
15. V1 S1 C °गोप्तृतमो for °गुप्ततमो;
16. V1 S1 C °युक्तानां for °गुप्तानां

म॒ही द्यौः पृ॑थि॒वी च॑ न इ॒मं य॒ज्ञं मि॑मिक्षताम् ।
पि॒पृ॒तां नो॒ भरी॑मभिः ॥५॥(५)

म॒ही । द्यौः । पृ॒थि॒वी । च॒ । न॒ः । इ॒मम् । य॒ज्ञम् । मि॒मि॒क्ष॒ता॒म् ।
पि॒पृ॒ताम् । न॒ः । भरी॑म॒भि॒रि॒ति॒ भरी॑मऽभिः ॥ घां ॥ ५ ॥ (५)॥

सा– कात्यायनः – "मही द्यौरित्यङ्गारैरभ्यूहति" (काश्रौ २५·१०·१६) इति । शामित्रे प्रक्षिप्तं गर्भमङ्गारैः प्रच्छादयेत् । पाठस्तु– 'मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः' इति । ^{v}मही महती ^{v}द्यौः द्युलोकः ^{v}पृथिवी भूलोकः ^{v}च ^{v}नः अस्मदीयम् ^{v}इमं ^{v}यज्ञं ^{v}मिमिक्षतां सिञ्चताम् । ^{v}भरीमभिः भरणैर्हिरण्यधान्यादिभिः स्वैः स्वैर्भागैः ^{v}नः अस्मदीयं गृहं ^{v}पिपृतां परिपूरयतु ॥४॥

[इति नवमेऽध्याये पञ्चमोऽनुवाकः ॥५॥]

आ– अङ्गारैरभिसमूहति– 'मही द्यौः' इति । मेधातिथिः द्यावापृथिवीदेवत्या गायत्री ^{v}मही इति गोनाम । ^{v}द्यौः द्युस्थानं ^{v}पृथिवी यागभूमिः ^{v}च ^{v}नः अस्माकम् ^{v}इमं प्रक्रान्तं ^{v}यज्ञं ^{v}मिमिक्षताम् । 'पिपृतां नो भरीमभिः' । ^{v}नः अस्मान् ^{v}भरीमभिः भरणैः हिरण्यधान्यादिभिः स्वैः स्वैर्भागैः ^{v}पिपृताम् । पृ पालनपूरणयोः; । मां परिपूरयन्तु ॥ ५ ॥

[इति नवमेऽध्याये पञ्चमोऽनुवाकः ॥५॥]

——

[अथ षष्ठोऽनुवाकः]

पञ्चमेऽनुबन्ध्यापशोर्गर्भे सति प्रायश्चित्तमन्त्रा उक्ताः । षष्ठे त्वहर्गणसंबन्धिनो मन्त्रा उच्यन्ते–

आ जि॑घ्र क॒लशं॑ म॒ह्या त्वा॑ विश॒न्त्विन्द॑वः ।
पुन॑रू॒र्जा नि व॑र्तस्व॒ सा नः॑ स॒हस्रं॑ धुक्ष्वो॒-
रुधा॑रा॒ पय॑स्वती॒ पुन॒र्मा॑ऽऽ वि॑शताद्र॒यिः ॥१॥

आ । जि॒घ्र॒ । क॒लश॑म् । म॒हि॒ । आ । त्वा॒ । वि॒श॒न्तु॒ । इन्द॑वः ।
पुन॑ः । ऊ॒र्जा । नि । व॒र्त॒स्व॒ । सा । न॒ः । स॒हस्र॑म् । धु॒क्ष्व॒ ।
उ॒रु॒धा॒रेत्यु॑रुऽधा॑रा । पय॑स्वती । पुन॑ः । मा॒ । आ । वि॒श॒ता॒त् । र॒यिः ॥ डीः ॥१॥

---

8. P1 षिञ्चेताम् for सिञ्चताम्

कात्यायनः – "द्रोणकलशमेनामाघ्रापयत्याजिघ्रेति" (काश्रौ १३·४·१८) इति । गर्गत्रिरात्रे गोसहस्रं दक्षिणा । तत्र सहस्रसंख्यापूरणी रोहिणी धेनुः। तां द्रोणकलशम् आघ्रापयेत् । पाठस्तु– 'आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः । पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्माऽऽविशताद्रयिः' इति । महीति गोनाम । हे ᵛमहि हे धेनो, त्वं ᵛकलशं द्रोणकलशाख्यं पात्रम् ᵛआजिघ्र आभिमुख्येन घ्राणं कुरु । किं च, हे धेनो, त्वाम् ᵛइन्दवः सोमाः ᵛआविशन्तु । ᵛऊर्जा विशिष्टरसेन पयोभूतेन अस्मान् ᵛपुनः ᵛनिवर्तस्व । मयैवं या त्वं स्तुता ᵛसा ᵛनः अस्माकं ᵛसहस्रं सहस्रसंख्याकं धनं ᵛधुक्ष्व देहीत्यर्थः । किं च अतस्त्वत्प्रसादात् ᵛउरुधारा बहुपयोयुक्ता ᵛपयस्वती धेनुः ᵛमा मां ᵛपुनः ᵛआविशतात् आगच्छत्वित्यर्थः । तथा ᵛरयिः धनमपि माम् आविशतात् ॥१॥

आ– द्रोणकलशाभिमन्त्रणं द्वाभ्यामृग्भ्याम् । महापङ्क्तिः प्रस्तारपङ्क्तिः । ताभ्यां द्रोणकलशं जिघ्रन्ति– 'आ जिघ्र कलशम्' इति । 'आ जिघ्र कलशम्', 'हव्ये काम्ये' इति द्वे गोदेवत्ये महापङ्क्तिप्रस्तारपङ्क्त्यौ । कुसुरुबिन्दोरार्षम् । मही इति गोनामसु पठितम् । हे ᵛमहि हे धेनो, ᵛकलशं द्रोणकलशम् आभिमुख्येन ᵛजिघ्र गन्धाघ्राणं कुरु । घ्रा गन्धोपादाने । "पाघ्राध्मा°" (पा ७·३·७८) इत्यादिना जिघ्रादेशः । किं च– हे कलश, 'आ त्वा विशन्त्विन्दवः' । ᵛइन्दवः सोमाः कलशं त्वाम् ᵛआविशन्तु । किं च– ᵛपुनः ᵛऊर्जा विशिष्टरसेन (पयोभूतेन) अस्मान् प्रति पुनः ᵛनिवर्तस्व । किं च– यां वयं स्तुमः ᵛसा ᵛनः अस्माकं ᵛसहस्रं, यत् सहस्रम् अपरिमितं धनम् अस्माभिर्दत्तम् तत् सर्वं ᵛधुक्ष्व । दुहिरत्रादानार्थः । अतस्तत् पुनर्देहि । त्वत्प्रसादाच्च ᵛउरुधारा पृथुधारा, पयसा संयुक्ता उरुधारा ᵛपयस्वती ᵛमा मां पुनः ᵛआविशतात् आविशतु । ᵛरयिः धनमपि पुनराविशतात् ॥१॥

हव्ये॒ काम्ये॒ इळे॒ रन्ते॒ चन्द्रे॒ ज्योतेऽदि॑ते॒ सर॑स्वति॒ महि॒ विश्रु॑ति ।
ए॒ता ते॑ अघ्न्ये॒ नामा॑नि । दे॒वेषु॑ मा सु॒कृतं॑ ब्रूतात् ॥२॥

हव्ये॑ । काम्ये॑ । इळे॑ । रन्ते॑ । चन्द्रे॑ ।
ज्योते॑ । अदि॑ते । सर॑स्वति । महि॑ । विश्रु॒तीति॒ विऽश्रु॑ति ।
ए॒ता । ते॒ । अ॒घ्न्ये॑ । नामा॑नि ।
दे॒वेषु॑ । मा॒ । सु॒कृ॒तमिति॑ सु॒ऽकृ॑तम् । ब्रू॒ता॒त् ॥ रों ॥२॥

---

1. V1 S1 C गर्भ° for गर्ग°
6. V1 S1 C धेनुं for धनं
15. B1 प्राप्तेन मनो (पयोभूतेन)
16. B1 यः सहस्रम् for यत् सहस्रम्

सा– कात्यायनः:- " इडे हव्ये काम्ये इति दक्षिणेऽस्याः कर्णे यजमानो जपति " (काश्रौ १३·४·१९) इति । पूर्वोक्ताया धेनोर्दक्षिणे कर्णे यजमानो जपेत् । पाठस्तु– ' हव्ये काम्य इळे रन्ते चन्द्रे ज्योतेऽदिते सरस्वति महि विश्रुति। एता ते अघ्न्ये नामानि देवेषु मा सुकृतं ब्रूतात् ' इति । सर्वैराहूयत इति हव्या । सर्वैः काम्यत इति काम्या । स्तूयत इतीळा । रमयतीति रन्ता । आह्लादयतीति चन्द्रा । ज्वलति प्रकाशयतीति ज्योता । अदितिरनवखण्डिता । सरस्वतीति, सरः क्षीरं, तद्वती सरस्वती । मही महती। विश्रूयत इति विश्रुतिः । अहन्तव्येत्यघ्न्या । एवंभूते हे धेनो, ^{v}ते त्वदीयानि ^{v}एता एतानि ^{v}नामानि एवमतिशययुक्तानि । एवंभूतैर्नामभिरभिहिता सती ^{v}देवेषु देवेभ्यः । सुष्ठु कर्म करोतीति सुकृत्, तादृशं ^{v}मा ^{v}ब्रूतात् ब्रूहि ॥२॥

आ– दाक्षिणेऽस्याः कर्णे यजमानो जपति– ' हव्ये काम्ये ' इति । ह्वयन्ते यस्या विकारेण हविषेति हव्या, तत्संबोधनं ^{v}हव्ये । ^{v}काम्ये, मनुष्यादिभिः काम्यत इति काम्या, तत्संबोधनं काम्ये । इळा नाम मनोर्दुहिता । इळेव इळा स्तुतिरूपिणी, तत्संबोधनम् ^{v}इळे । रमयतीति रन्ता, तत्संबोधनं ^{v}रन्ते । चन्द्र इवाह्लादयतीति चन्द्रा, तत्संबोधनं ^{v}चन्द्रे । ^{v}ज्योते । द्युत दीप्तावित्यस्य रूपं ज्योता, दीप्ता । तत्संबोधनं ^{v}ज्योते । ^{v}अदिते अनवखण्डिते । ^{v}सरस्वति । सृ गतौ । (सरतेरसुनि) सरः । तदस्यास्तीति मतुपि सरस्वती, तत्संबोधनं सरस्वति । ^{v}महि महति । महेरौणादिकः कीः, तत्संबोधनं महि । विश्रुतिः कीर्तिः । विविधं श्रूयत इति विश्रुतिः (? तीः), तत्संबोधनं ^{v}विश्रुति । ^{v}एता एतानि, ^{v}अघ्न्ये । अघ्न्या इति गोनामसु पठितम् (निघण्टु २·११·१), तत्संबोधनम् । एवंविधायाः ^{v}ते गोः ^{v}नामानि अतिशयगुणयुक्तानि । एतैरभिहिता सती ^{v}देवेषु देवेभ्यः, सुष्ठु करोतीति सुकृत्, तं ^{v}सुकृतं ^{v}मा मां ^{v}ब्रूतात् ब्रूहि ॥२॥

इ॒ह रति॑रि॒ह र॑मध्वमि॒ह धृति॑रि॒ह स्वधृ॑ति॒ः स्वाहा॑ ।
उ॒प॒सृ॒जन् ध॒रुणं॑ मा॒त्रे ध॒रुणो॑ मा॒तरं॒ धय॑न्
रा॒यस्पोष॑म॒स्मासु॑ दीध॑र॒त् स्वाहा॑ ॥३॥

---

4. P1 रन्तिः for रन्ता
6. V1 S1 C om. एता
7. V1 S1 C om. एवम
14. B1 सरस्वतेरसुनि (सरतेरसुनि)
15. B1 after महति adds श्रयते । किर्ति
19. B1 ब्रूयात् for ब्रूतात्

इ॒ह । रति॑ः । इ॒ह । र॒म॒ध्व॒म् । इ॒ह । धृति॑ः ।
इ॒ह । स्वधृ॑ति॒रि॒ति॒ स्वऽधृ॑तिः । स्वाहा॑ ।
उ॒प॒सृ॒जन्नित्यु॑प॒ऽसृ॒जन् । ध॒रुण॑म् । मा॒त्रे । ध॒रुण॑ः । मा॒तर॑म् । धय॑न् ।
रा॒यः । पोष॑म् । अ॒स्मासु॑ । दी॒ध॒र॒त् । स्वाहा॑ ॥ ञ्लः ॥३॥

सा– कात्यायनः – " शालाद्वार्येऽन्वारब्धेष्विह रतिरिति जुहोति " (काश्रौ १२.४.९) इति । तत्रोत्थानं सर्वेषु यजमानेषु परस्परं स्पृष्टेषु सत्सु इदानींतनगार्हपत्ये जुहुयात् । पाठस्तु– ' इह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहा ' इति । हे गावः, युष्मदीया ᵛरतिः रमणम् ᵛइह यजमानेषु स्यात् अस्तु ᵛइह एव यूयं ᵛरमध्वम् । युष्माकम् ᵛइह यजमानेषु ᵛधृतिः स्यात् । स्वकीयानामपि धृतिः ᵛइह एव स्यात् । ᵛस्वाहा सुहुतमस्तु ॥

कात्यायनः – " अपरामुपसृजन्निति " (काश्रौ १२.४.१०) इति । तत्रैवैतां द्वितीयामाहुतिं जुहुयात् । पाठस्तु– ' उपसृजन् धरुणं मात्रे धरुणो मातरं धयन् रायस्पोषमस्मासु दीधरत् स्वाहा ' इति । ᵛधरुणः धारयिताग्निः ᵛमात्रे ᵛधरुणं मातुः पृथिव्या धारयितारम् ᵛउपसृजन् समीपं प्रापयन् ᵛमातरं पृथिवीं ᵛधयन् स्वयं पिबन्, तत्रोत्पन्नं हविर्भक्षयन्नित्यर्थः । ᵛअस्मासु ᵛरायः ᵛपोषं पशुधनादिपुष्टिं ᵛदीधरत् अत्यन्तं धारयतु । ᵛस्वाहा इति होमार्थः ॥३॥

आ– सत्रोत्थाने द्वे आहुती जुहोति– ' इह रतिः ' इति । पशुदेवत्यं यजुः । देवानामार्षम् । उत्क्रामन्ते पशवो नियम्यन्ते च । ᵛइह यजमानेषु भवतां ᵛरतिः रमणम् । रमेरत्र नियमार्थत्वम् । अतस्तु ᵛइह एव यूयं ᵛरमध्वम् । ᵛइह यजमानेष्वेव भवतां पशूनां ᵛधृतिः स्यात् । इह धृतिः । स्वकीयानामपि ᵛइह एव धृतिः स्यात् । ᵛस्वाहा सुहुतमस्तु ।

द्वितीयां जुहोति– ' उपसृजन् ' इति । उष्णिगाग्नेयी । ᵛधरुणः धारयिता । अग्निः ᵛमात्रे पृथिव्यै मातुः पृथिव्याः ᵛधरुणं धारयितारम् ᵛउपसृजन् समीपं प्रापयन् प्रेरयन् वा ᵛमातरं पृथिवीं स्वयं ᵛधयन् । धेट् पाने । पृथिव्युत्पन्नं हविः पिबन् भक्षयित्वा ᵛअस्मासु ᵛरायः ᵛपोषं पशुधनादिपुष्टिं ᵛदीधरत् अतिशयेन धारयत् । ᵛस्वाहा सुहुतमस्तु ॥३॥

अग॑न्म॒ ज्योति॑र॒मृता॑ अभू॒म दिवं॑ पृथि॒व्या अध्याऽरु॑हाम ।
अवि॑दाम दे॒वान्त्स्व॒र्ज्योति॑ः ॥४॥

अग॑न्म । ज्योति॑ः । अ॒मृता॑ः । अ॒भू॒म॒ ।
दिव॑म् । पृ॒थि॒व्याः । अधि॑ । आ । अ॒रु॒हा॒म॒ ।
अवि॑दाम । दे॒वान् । स्व॑ः । ज्योति॑ः ॥ ळर्यी ॥४॥

---

12. V1 S1 C after धारयितारं add पितरं दिवम्

सा– कात्यायनः – " यजमान आत्मानं स्तुवीतागन्म ज्योतिरिति " (काश्रौ १०.९.७) इति। पाठस्तु– 'अगन्म ज्योतिरमृता अभूम दिवं पृथिव्या अध्यारुहाम । अविदाम देवान्त्स्वर्ज्योतिः' इति। यजमाना वयं vज्योतिः आदित्यलक्षणम् vअगन्म प्राप्ताः । ततः vअमृता अमरणधर्मा vअभूम । vपृथिव्याः सकाशाद् vदिवं द्युलोकम् vअध्यारुहाम । vदेवान् इन्द्रादीन् vअविदाम पश्याम, ज्योतिःस्वरूपं vस्वः स्वर्गं पश्याम ॥४॥

आ– यजमाना आत्मानं स्तुवन्ति– 'अगन्म ज्योतिः' इति। यजमानस्तुतिदेवत्याऽनुष्टुप्, ज्योतिः । आदित्यलक्षणं vज्योतिः vअगन्म गताः प्राप्ताः । vअमृताः vअभूम मरणादिधर्मरहिताश्च अभूम संजाताः । 'दिवं पृथिव्याः' । vपृथिव्याः सकाशात् vदिवं द्युलोकम् vअध्याऽरुहाम । vदेवान् अग्न्यादीन् vअविदाम पश्याम । vस्वः स्वर्गम् अविदाम । vज्योतिः ज्योतिर्मण्डलम् अविदाम पश्याम ॥४॥

यु॒वं तमि॑न्द्रापर्वता पु॒रो॒यु॒धा यो न॑ः पृ॒त॒न्याद॒प तंत॒मिद्ध॑तं॒
वज्रे॑ण॒ तंत॒मिद्ध॑तम् ।
दू॒रे॑ च॒त्ताय॑ छन्त्स॒द्गह॑नं॒ यदि॑नक्ष॒द॒स्माक॒ꣳ शत्रू॒न् परि॑ शूर वि॒श्वतो॑
द॒र्मा द॑र्शीष्ट वि॒श्वत॑ः ।।५।।

यु॒वम् । तम् । इ॒न्द्रा॒प॒र्व॒ता॒ । पु॒रो॒यु॒धेति॑ पु॒रः॒ऽयुधा॑ ।
यः । न॒ः । पृ॒त॒न्यात् । अप॑ । तंत॒मि॒ति॒ तम्ऽत॑म् । इत् । ह॒त॒म् ।
वज्रे॑ण । तंत॒मि॒ति तम्ऽत॑म् । इत् । ह॒त॒म् ।
दू॒रे । च॒त्ताय॑ । छ॒न्त्स॒त् । गह॑नम् । यत् । इन॑क्षत् ।
अ॒स्माक॑म् । शत्रू॑न् । परि॑ । शू॒र॒ । वि॒श्वत॑ः ।
द॒र्मा । द॒र्शी॒ष्ट॒ । वि॒श्वत॑ः ॥ ण्यौः ॥५॥

सा– कात्यायनः – "युवं तमिति दक्षिणस्याधोऽक्षम्" (काश्रौ १२.४.१३) इति । यन्तीत्यनुवर्तते । सर्वे यजमानाः अक्षस्याधोभागं प्रति गच्छेयुः । पाठस्तु– 'युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तंतमिद्धतं वज्रेण तं तमिद्धतम् । दूरे चत्ताय छन्त्सद्गहनं यदिनक्षदस्माकꣳ शत्रून् परि शूर विश्वतो दर्मा दर्शीष्ट विश्वतः' इति। हे पुरोयुधौ शत्रूणां पुरतो युद्धस्य कर्तारौ । vइन्द्रापर्वता

---

5. P1 after पश्याम ins. अविदामेत्यनुवर्तते
10. B1 अविदामः पश्यामः for अविदाम पश्याम
24. V1 S1 C om. हे, P1 om. इन्द्रापर्वता

इन्द्रापर्वतौ ᵛयुवं युवां ᵛयः शत्रुः ᵛनः अस्मान् ᵛपृतन्यात् संग्रामयेत् युद्धं कारयेत्, ᵛतंतं शत्रुम् ᵛअप ᵛहतं युवां विनाशयतम् । किं च ? ᵛतंतम् ᵛइत् तत्तत्समानमेव सर्वमपि शत्रुं विनाशयतम् । तत्रापि विशेष्यते– वज्राख्येनायुधेन तंतमेव शत्रुं विनाशयतम् । हे ᵛशूर इन्द्र, त्वदीयो वज्रः सः । ᵛगहनम् अत्यन्तगम्भीरं वनं प्रवेशयामीति । ᵛयद् यदा ᵛदूरे ᵛचत्ताय दूरादागताय शत्रवे ᵛछन्त्सत् । छन्दतिः कामनार्थः । कामयते, तदा ᵛइनक्षत् तं शत्रुं व्याप्नुयात् । ततः ᵛदर्मा दरणशीलो वज्रः ᵛअस्माकम् अस्मदीयान् ᵛविश्वतः सर्वतः आगतान् ᵛविश्वतः सर्वान् ᵛशत्रून् ᵛपरि ᵛदर्शीष्ट परितो विदार्य दर्शयति स्म ॥५॥

आ– दक्षिणस्य हविर्धानस्याधोक्षं सर्पति– ‘ युवं तम् ’ इति । ऐन्द्री अष्टिरत्यष्टिर्वा । परुच्छेपः । प्रथमोऽर्धर्चस्त्विन्द्रापर्वतदेवत्यः । ᵛइन्द्रापर्वता इन्द्रापर्वतौ । ᵛपुरोयुधा पुरोऽग्रेषु युध्यत इति पुरोयुधौ । हे पुरोयुधौ युद्धस्य कर्तारौ, ᵛयुवं युवां ᵛनः अस्मान् ᵛयः ᵛपृतन्यात् संग्रामयेत् योधयेत् ᵛतंतं तव शत्रुम् ᵛइत् अपि ᵛअप ᵛहतं पुरोयुधौ युवां विनाशयतम् । तत्रापि विशेषमाह– ‘ वज्रेण ’ इति । त्वदीयेन वज्राख्येनायुधेन तं शत्रुम् ᵛइत् एव ᵛहतम् ॥

उत्तरोऽर्धर्चः ऐन्द्रः । ‘ दूरे चत्ताय ’ । चततिर्गतिकर्मा । ᵛदूरे ᵛचत्ताय दूरादागताय शत्रवे ᵛछन्त्सत् । छन्दतिः कामनार्थः । कामयताम् । हे इन्द्र, त्वदीयो वज्रः । ᵛशत्रून् ᵛगहनं वनं प्रवेशयामि । ᵛयत् यदि कामयते तदा[ग]ताय ᵛइनक्षत् । इनक्षतिर्व्याप्तिकर्मा, धातूनामनेकार्थत्वात् । परिदश्यात् व्याप्नुयाद्वा । हे शूर इन्द्र, ᵛअस्माकं ये शत्रवः तान् ᵛशत्रून् त्वदीयो वज्रः ᵛदर्मा । दृ विदारणे । दर्मा दरणशीलः । त्वदीयो वज्रः ᵛदर्शीष्ट । तथैव शत्रून् [ᵛविश्वतः] सर्वतः आगतान् वा परितः विदार्य दर्शयति स्म ॥५॥

**भूर्भुव॒ः स्वः॑ सु॒प्र॒जाः प्र॒जया॑ भूयासम् ।
सु॒वीरो॑ वी॒रै॑ः सु॒पोष॒ः पोषैः॑ ॥६॥(६)॥**

भूर्भुव॑ः ॥ भ ॥६॥ (६) ॥

---

1. V1 S1 C संग्रामात् for संग्रामयेत्;
   C S1 V1 तं शत्रुं युद्धं कारयेत् तम् अपहतं for युद्धं कारयेत् ... हतं [L 2]
3. V S1 C सद् for सः
4. P1 after आगताय ins. चत्तातिर्गतिकर्मा;
   S1 V1 C om. छन्त्सत् । छन्दतिः कामनार्थः [L 5]
11. B1 तं शत्रुं for तंतं
15. B1 प्रवेशयामि । ऊलेचेति । यत यदि for प्रवेशयामि यत् यदि

सा- कात्यायनः - "वाग्विसर्जनं ... भूर्भुवः स्वरिति" (काश्रौ द्र. १२.४.२६-२७)। वाचो विसर्जनं कुर्यादित्यर्थः। पाठस्तु- 'भूर्भुवः स्वः सुप्रजाः प्रजया भूयासम्। सुवीरो वीरैः सुपोषः पोषैः' इति । व्याख्यातोऽयं मन्त्रः ॥६॥

[इति नवमेऽध्याये षष्ठोनुवाकः ॥]

आ - जपति - 'भूर्भुवः स्वः' इति । व्याख्यातो मन्त्रः । सत्रोत्थानं समाप्तम् ॥६॥

[इति नवमेऽध्याये षष्ठोऽनुवाकः ॥६॥]

[अथ सप्तमोऽनुवाकः]

षष्ठे अहर्गणसंबन्धिनो मन्त्रा उक्ताः । सप्तमे तु सोमसंबन्धिनो नैमित्तिका मन्त्रा उच्यन्ते-

प॒र॒मे॒ष्ठ्य॑भिधी॑तः प्र॒जाप॑तिर्वा॒चि व्याहृ॑ताया॒मन्धो॒ अच्छे॑तः सवि॒ता स॒न्याम् ।
वि॒श्वक॑र्मा दी॒क्षाया॑ं पूषा सोम॒क्रय॑ण्याम् ॥१॥

प॒र॒मे॒ष्ठी । प॒र॒मे॒स्थीति॑ प॒र॒मे॒ऽस्थी । अ॒भिधी॑त॒ इत्या॒भिऽधी॑तः ।
प्र॒जाप॑ति॒रिति॑ प्र॒जाऽप॑तिः । वा॒चि । व्याहृ॑ताया॒मिति॑ वि॒ऽआहृ॑तायाम् ।
अन्ध॑ः । अच्छे॑त॒ इत्यच्छ॑ऽइतः । स॒वि॒ता । स॒न्याम् ।
वि॒श्वक॒र्मेति॑ वि॒श्वऽक॑र्मा । दी॒क्षाया॑म् । पूषा । सो॒म॒क्रय॑ण्या॒मिति॑ सो॒म॒ऽक्रय॑ण्याम् ॥ सुं ॥१॥

कात्यायनः - "परमेष्ठ्यादींश्च चतुस्त्रिंशतं जुहोति" (काश्रौ २५.६.१) इति । यदा सोमो यजमानेन अभिधीतः संकल्पितो भवति तदा परमेष्ठ्यादींश्चतुस्त्रिंशतं जुहुयात् । तत्र प्रथममन्त्रपाठस्तु- 'परमेष्ठ्यभिधीतः' इति। यदा सोमो यजमानेन ˈअभिधीतः तदा ˈपरमेष्ठी इति नाम्नाऽभिधीयते ॥

अथ द्वितीयः - 'प्रजापतिर्वाचि व्याहृतायाम्' इति। 'सोमेन यक्ष्ये' इति वचस्युच्चारिते सति सोमः प्रजापतिनामको भवति ॥

अथ तृतीयः - 'अन्धो अच्छेतः' इति । यदा सोमः अच्छम् आभिमुख्यम् इतः प्राप्तः तदा ˈअन्धः भवति ॥

अथ चतुर्थः - 'सविता सन्याम्' इति । ˈसन्यां सोमस्य संभक्तौ सत्यां सोमः सवितृनामको भवति ॥

अथ पञ्चमः - 'विश्वकर्मा दीक्षायाम्' इति । ˈदीक्षायां सत्यां ˈविश्वकर्मा इत्युच्यते ॥

अथ षष्ठः - 'पूषा सोमक्रयण्याम्' इति । सोमक्रये सति ˈपूषा इत्यभिधीयते ॥१॥

---

8. V1 S1 C om. तु

आ– ‘ परमेष्ठ्यभिधीतः ’ इति अध्यायपरिसमाप्तेर्नैमित्तिकानि चतुस्त्रिंशत्सोमसंस्थासु चतुस्त्रिंशद्देवताभिधायीनि यजूंषि चतुस्त्रिंशल्लिङ्गोक्तदेवत्यानि । अध्यायपरिसमाप्तेत्रिसिष्टस्यार्षम् । एते सर्वे मन्त्रा ऋज्वर्थाः । ‘ परमेष्ठ्यभिधीतः ’। यजमानेन कदाचित् ᵛअभिधीतः सोमः संकल्पितः तदा सोमः ᵛपरमेष्ठी भवति हि । ‘ प्रजापतिर्वाचि व्याहृतायाम् ’ इति । ‘ सोमेन यक्ष्ये ’ इति ᵛवाचि ᵛव्याहृतायां वचने उच्चारिते सः सोमः ᵛप्रजापतिः इति नाम्ना अभिधीयते । ‘ अच्छेतः ’ इति । अच्छं सोमम् इतः सोमं प्राप्तुमितो गतः, यदा ‘ अन्धसे अन्नाय स्वाहा ’ इति यजमानोऽभिवदति । [ᵛसविता ᵛसन्याम् ।] त (य) दा सोमस्य संभक्तौ सन्यां [सत्यां] सोमः ᵛसविता इत्यभिधीयते । [ᵛदीक्षायां सत्यां सोमः ᵛविश्वकर्मा इत्युच्यते ।] ‘ पूषा सोमक्रयण्याम् ’ । ᵛसोमक्रयण्यां सत्यां सोमः ᵛपूषा इत्याभिधीयते ॥१॥

इन्द्र॑श्च म॒रुत॑श्च क्र॒यायो॒पोत्थि॑तः ।
असु॑रः प॒ण्यमा॑नो मि॒त्रः क्री॒तः ॥२॥

इन्द्र॑ः । च॒ । म॒रुत॑ः । च॒ । क्र॒याय॑ । उ॒पोत्थि॑त॒ इत्यु॑प॒ऽउत्थि॑तः ।
असु॑रः । प॒ण्यमा॑नः । मि॒त्रः । क्री॒तः ॥ खं ॥२॥

सा– अथ सप्तमः – ‘ इन्द्रश्च मरुतश्च क्रयायोपोत्थितः ’ इति । यदा सोमक्रयार्थमुत्तिष्ठेत् तदा सोम इन्द्रनामको मरुन्नामकश्च भवति ।

अथाष्टमः – ‘ असुरः पण्यमानः ’ इति । यदा सोमो यजमानेन पण्यते तदा असुरनाम्नाभिधीयते ॥

अथ नवमः – ‘ मित्रः क्रीतः ’ इति । यदा सोमो यजमानेन क्रीयते तदासौ ᵛमित्रः भवति ॥२॥

आ– ‘ इन्द्रश्च मरुतश्च क्रयायोपोत्थितः ’। यदा यजमानः सोमक्रयार्थम् ᵛउपोत्थितः तदा सोमः ᵛइन्द्रः [मरुन्नामकः] ᵛच भवति । ‘ असुरः पण्यमानः ’। यदा यजमानेन सोमः पण्यते तदा सोमः ᵛअसुरः भवति । ‘ मित्रः क्रीतः ’ इति । यदा सोमो यजमानेन ᵛक्रीतः तदा सोमः ᵛमित्रः भवति ॥२॥

विष्णु॑ः शिपिवि॒ष्ट ऊ॒रा आस॑न्नो॒ विष्णु॑र्न॒रन्धि॑षः प्रो॒ह्यमा॑णः ।
सोम॒ आग॑तो॒ वरु॑ण आ॒सन्द्यामास॑न्नः ॥३॥

---

1. B1 °धीयत इति (°धीत इति)

विष्णुः । शिपिविष्ट इति शिपिऽविष्टः ।
ऊरौ । आसन्न इत्याऽसन्नः । विष्णुः । नरन्धिषः ।
प्रोह्यमाणः । प्रोह्यमान इति प्रऽउह्यमानः । सोमः । आगत इत्याऽगतः ।
वरुणः । आसन्द्यामित्याऽसन्द्याम् । आसन्न इत्याऽसन्नः । ।। क्रीं ।।३।।

सा– अथ दशमः – 'विष्णुः शिपिविष्टः' इति । शिपिर्यज्ञस्तत्र यदा प्रविष्टस्तदा Vविष्णुः भवति ।।

अथैकादशः – 'ऊरा आसन्नो विष्णुर्नरन्धिषः' इति । यदा Vऊरौ उत्सङ्गे Vआसन्नः उत्सङ्गं प्राप्तः [तदा] सोमः Vविष्णुः Vनरन्धिषः भवति ।।

अथ द्वादशः – 'प्रोह्यमाणः सोम आगतः' इति । यदा Vआगतः Vसोमः प्रोह्यते तदा सोमनामा भवति ।।

अथ त्रयोदशः – 'वरुण आसन्द्यामासन्नः' इति । यदा सोमः Vआसन्द्याम् Vआसन्नः तदा Vवरुणः भवति ।।३।।

आ – 'विष्णुः शिपिविष्टः' । शिपिर्यज्ञः, तत्र प्रविष्टः । यदा सोमो यज्ञे प्रविष्टस्तदा सोमः Vविष्णुः [भवति । 'ऊरा आसन्नो विष्णुर्नरन्धिषः' । Vऊरौ यजमानस्योत्सङ्गे Vआसन्नः स्थितः सोमः] Vविष्णुः Vनरन्धिषः भवति । ['प्रोह्यमाणः सोम आगतः' ।] यज्ञे सोमः Vप्रोह्यमाणः Vआगतः Vसोमः सोमनामा भवति । 'वरुण आसन्द्यामासन्नः' । सोमो यदा Vआसन्द्याम् अल्पमन्त्रप्राप्तस्तदा Vवरुणः भवति ।।३।।

अग्निराग्नीध्र इन्द्रो हविर्धाने ।
अथर्वोपावह्रियमाणो विश्वे देवा अꣳशुषु न्युप्यमानेषु ।।४ ।

अग्निः । आग्नीध्रे । इन्द्रः । हविर्धान इति हविःऽधाने ।
अथर्वा । उपावह्रियमाण इत्युपऽअवह्रियमाणः ।
विश्वे । देवाः । अꣳशुषु । न्युप्यमानेष्विति निऽउप्यमानेषु ।। णं ।।४।।

सा– अथ चतुर्दशः – 'अग्निराग्नीध्रे' इति । सोमो यदा Vआग्नीध्रे वर्तते तदा Vअग्नि इत्यभिधीयते ।।

---

5. V1 S1 C om. यदा; V1 S1 C om. तदा विष्णुर्भवति
6. V1 S1 C om. यदा
14. B1 यज्ञसोमः for यज्ञे सोमः

अथ पञ्चदशः – ‘ इन्द्रो हविर्धाने ’ इति । ᵛहविर्धाने वर्तमानः सोमः ᵛइन्द्रः भवति ।।

अथ षोडशः – ‘ अथर्वोपावह्रियमाणः ’ इति । यदा सोम उपावह्रियते तदा ᵛअथर्वा भवति ।।

अथ सप्तदशः – ‘ विश्वे देवा अंशुषु न्युप्यमानेषु ’ इति । ᵛअंशुषु ᵛन्युप्यमानेषु सत्सु ᵛविश्वेदेवाः एतन्नामको भवति ।।४।।

आ– ‘ अग्निराग्नीध्रे ’ । यदा सोमः ᵛआग्नीध्रे भवति तदा ᵛअग्निः भवति । ‘ इन्द्रो हविर्धाने ’ । यदा सोमः ᵛहविर्धाने वर्तते तदा ᵛइन्द्रः भवति । ‘ अथर्वोपावह्रियमाणः ’ । यदा सोमः ᵛउपावह्रियमाणः तदा ᵛअथर्वा भवति । ‘ विश्वे देवा अंशुषु न्युप्यमानेषु ’ । यदा सोमः ᵛअंशुषु न्युप्तस्तदा ᵛविश्वे ᵛदेवाः भवति ।।४।।

विष्णु॑राप्रीत॒पा आ॑प्या॒य्यमा॑नो य॒मः सूयमा॑नो॒ विष्णु॑ः संभ्रि॒यमा॑णः ।
वा॒युः पूयमा॑नः शु॒क्रः पू॒तः ।।५।।

विष्णु॑ः । आ॒प्री॒त॒पा इत्या॑प्री॒त॒ऽपाः । आ॒प्या॒य्यमा॑न॒ इत्या॑ऽप्या॒य्यमा॑नः । य॒मः । सू॒यमा॑नः ।
विष्णु॑ः । सं॒भ्रि॒यमा॑ण॒ इति॑ स॒म्ऽभ्रि॒यमा॑णः ।
वा॒युः । पू॒यमा॑नः । शु॒क्रः । पू॒तः ।।ठां।। ५ ।।

सा– अथाष्टादशः – ‘ विष्णुराप्रीतपाः ’ इति । ᵛआप्रीतपाः सोमः ᵛविष्णुः भवति ।

अथैकोनविंशः – ‘ आप्यायमानो यमः ’ इति । ᵛआप्यायमानः सोमः ᵛयमः भवति ।।

अथ विंशः – ‘ सूयमानो विष्णुः संभ्रियमाणः ’ इति । यदा सोमोऽभिपूयते संभ्रियते च तदा ᵛविष्णुः भवति ।।

अथैकविंशः – ‘ वायुः पूयमानः ’ इति । ᵛपूयमानः सोमः ᵛवायुः भवति ।।

अथ द्वाविंशः – ‘ शुक्रः पूतः ’ इति । ᵛपूतः सोमः ᵛशुक्रः भवति ।।५।।

आ– ‘ विष्णुराप्रीतपाः ’ । यदा सोमः ᵛआप्रीतपाः तदा ᵛविष्णुः भवति । ‘ आप्याय्यमानो यमः ’ । यदा सोमः ᵛआप्याय्यमानः तदा सोमः ᵛयमः भवति । ‘ सूयमानो विष्णुः ’ । यदा सोमः ᵛसूयमानः तदा ᵛविष्णुः भवति । ‘ संभ्रियमाणः ’ । यदा सोमः ᵛसंभ्रियमाणः तदाऽपि सोमः

---

15. P1 आप्यायमानः for आप्याय्यमानः

20. B1 सोमः ।विष्णुराप्रीतपा for सोम ... ... विष्णुः ।

विष्णुः भवति । ‘ वायुः पूयमानः ’ । यदा सोमः ᵛपूयमानः तदा सोमः ᵛवायुः भवति । ‘ शुक्रः पूतः ’ । यदा सोमः ᵛपूतः तदा सोमः ᵛशुक्रः भवति ॥५॥

शु॒क्रः क्षीर॒श्रीर्म॒न्थी स॑क्तु॒श्रीः ।
विश्वे॑ दे॒वाश्च॑म॒सेषू॒न्नीतो॒ऽसु॒र्हो॑मा॒योद्य॑तः ॥६॥

शु॒क्रः । क्षी॒र॒श्रीरिति॑ क्षी॒र॒ऽश्रीः । म॒न्थी । स॒क्तु॒श्रीरिति॑ स॒क्तु॒ऽश्रीः ।
विश्वे॑ । दे॒वाः । च॒म॒सेषु॑ । उन्नी॑त॒ इत्यु॑त्ऽनी॑तः । असु॑ः । हो॑मा॑य । उद्य॑त॒ इत्यु॑त्ऽय॑तः
॥ श्रां ॥ ६ ॥

सा– अथ त्रयोविंशः – ‘ शुक्रः क्षीरश्रीः ’ इति । क्षीरेण संमिश्रितः सोमः ᵛशुक्रः भवति ॥

अथ चतुर्विंशः – ‘ मन्थी सक्तुश्रीः ’ इति । सक्तुभिः संमिश्रितः सोमः ᵛमन्थी भवति ॥

अथ पञ्चविंशः – ‘ विश्वे देवाश्चमसेषून्नीतः ’ इति । ᵛचमसेषु ᵛउन्नीतः सोमः ᵛविश्वे ᵛदेवाः भवति ॥

अथ षड्विंशः – ‘ असुर्होमायोद्यतः ’ इति । होमार्थम् ᵛउद्यतः सोमः ᵛअसुः भवति ॥६॥

आ– ‘ शुक्रः क्षीरश्रीः ’ । शो (शु ?) भा [क्षीरस्य] श्रीरिव श्रीर्यस्य सोमस्य सः क्षीरश्रीः । यदा सोमः ᵛक्षीरश्रीः तदा सोमः ᵛशुक्रः भवति । ‘ मन्थी सक्तुश्रीः ’ । यदा सोमः ᵛसक्तुश्रीः तदा सोमः ᵛमन्थी भवति । ‘ विश्वे देवाश्चमसेषून्नीतः ’ । यदा सोमः ᵛचमसेषु ᵛउन्नीतः तदा ᵛविश्वे ᵛदेवाः भवति । ‘ असुर्होमायोद्यतः ’ । यदा यजमानेन ᵛहोमाय ᵛउद्यतः तदा सोमः ᵛअसुः भवति ॥६॥

रु॒द्रो हू॒यमा॑नो॒ वातो॒ऽभ्यावृ॑त्तो नृ॒चक्षाः॒ प्रति॑ख्यातो
भ॒क्षः पी॒तः पि॒तरौ॑ नारा॒शꣳसाः सा॒द्यमा॑नः ।
सिन्धु॑रवभृ॒थायोद्य॑तः समु॒द्रोऽभ्यवह्रि॒यमा॑णः सलि॒लः प्रप्लु॑तः ॥७ ।

---

10. V1 S1 C after second देवा adds इति

12. C V1 S1 यदा सोमाय निष्कासितस्तदा for होमार्थमुद्यतः सोमः

रु॒द्रः । हू॒यमा॑नः । वात॑ः । अ॒भ्यावृ॑त्त॒ इत्य॑भि॒ऽआवृ॑त्तः ।
नृ॒ऽचक्षा॒ इति॑ नृ॒ऽचक्षाः॑ । प्रति॑ख्यात॒ इ॒ति प्रति॑ऽख्यातः ।
भ॒क्षः । पी॒तः । पि॒तर॑ः । ना॒रा॒श॒ꣳसाः । सा॒द्यमा॑नः ।
सिन्धु॑ः । अ॒व॒भृ॒थायेत्य॑व॒ऽभृ॒थाय॑ । उद्य॑त॒ इत्यु॑त्ऽय॑तः ।
स॒मु॒द्रः । अ॒भ्य॒व॒ह्रि॒यमा॑ण॒ इत्य॑भि॒ऽअ॒व॒ह्रि॒यमा॑णः ।
स॒लि॒लः । प्रप्लु॑त॒ इ॒ति प्रऽप्लु॑तः ॥ छ्रौं ॥ ७ ॥

सा– अथ सप्तविंशः – ‘ रुद्रो हूयमानः ’ इति । यदा सोमो हूयते तदा ^{v}रुद्रः भवति ॥

अथाष्टाविंशः – ‘ वातोऽभ्यावृत्तः ’ इति । यजमानेन ^{v}अभ्यावृत्तः सोमो वातनामा भवति ॥

अथैकोनत्रिंशः – ‘ नृचक्षाः प्रतिख्यातः ’ इति । ^{v}प्रतिख्यातः सोमो नृचक्षोनामा भवति ॥

अथ त्रिंशः – ‘ भक्षः पीतः ’ इति । ^{v}पीतः सोमः ^{v}भक्षः भवति ॥

अथैकत्रिंशः – ‘ पितरो नाराशꣳसाः साद्यमानः ’ इति । यदा सोमः साद्यते तदा ^{v}पितरः ^{v}नाराशꣳसाः भवति ।

अथ द्वात्रिंशः – ‘ सिन्धुरवभृथायोद्यतः ’ इति । अवभृथार्थं यदा सोमः ^{v}उद्यतः तदा ^{v}सिन्धुः भवति ॥

अथ त्रयस्त्रिंशः – ‘ समुद्रोऽभ्यवह्रियमाणः ’ इति । यदा सोमोऽभ्यवह्रियते तदा ^{v}समुद्रः भवति ॥

अथ चतुस्त्रिंशः – ‘ सलिलः प्रप्लुतः ’ इति । यदा सोमः ^{v}प्रप्लुतः अप्सु निमग्नस्तदा ^{v}सलिलः भवति ॥७॥

आ– ‘ रुद्रो हूयमानः ’ । यदा सोमो यजमानेन ^{v}हूयमानः स्थितस्तदा ^{v}रुद्रः भवति । ‘ वातोऽभ्यावृत्तः ’ । यदा सोमो यजमानेन ^{v}अभ्यावृत्तः तदा सोमः ^{v}वातः भवति । ‘ नृचक्षाः प्रतिख्यातः ’। यदा सोमः ^{v}प्रतिख्यातः तदा सोमः ^{v}नृचक्षाः भवति । ‘ भक्षः पीतः ’। यदा सोमः ^{v}पीतः, तदा ^{v}भक्षः भवति । ‘ पितरो नाराशꣳसाः साद्यमानः ’ । यदा सोमः ^{v}साद्यमानः तदा ^{v}पितरः ^{v}नाराशꣳसाः भवति । ‘ सिन्धुरवभृथायोद्यतः ’ । [यदा सोमः ^{v}अवभृथाय ^{v}उद्यतः] तदा सोमः ^{v}सिन्धुः भवति । ‘ समुद्रोऽभ्यवह्रियमाणः ’ । यदा सोमः यजमानेन ^{v}अभ्यवह्रियमाणः तदा सोमः ^{v}समुद्रः भवति । ‘ सलिलः प्रप्लुतः ’ । यदा [सोमः] ^{v}प्रप्लुतः अप्सु निमग्नस्तदा सोमः ^{v}सलिलः भवति ॥७॥

---

9. C नृचक्षा इति for नृचक्षोनामा

12. P1 भवान्ति

ययो॒रोज॑सा स्कभि॒ता रजा॑ꣳसि वी॒र्ये॑भिर्वी॒रत॑मा॒ शवि॑ष्ठा
या पत्ये॑ते॒ अप्र॑तीता॒ सहो॑भि॒र्विष्णू॑ अग॒न् वरु॑णा पू॒र्वहू॑तौ ।।८।।

ययो॑ः । ओज॑सा । स्क॒भि॒ता । रजा॑ꣳसि ।
वी॒र्ये॑भिः । वी॒रत॒मेति॑ वी॒रऽत॑मा । शवि॑ष्ठा ।
या । पत्ये॑ते॒ इति॒ पत्ये॑ते । अप्र॑ती॒तेत्यप्र॑तिऽइता । सहो॑भि॒रिति॒ सह॑ःऽभि ।
विष्णू॒ इति॒ विष्णू॑ । अ॒ग॒न् । वरु॑णा । पू॒र्वहू॑ता॒ इति॑ पू॒र्वऽहू॑तौ ।।घ्युं॥८।।

सा– कात्यायनः – " स्कन्नमभिमृशति ययोरोजसेति " (द्र. काश्रौ २५.२.९) इति । पाठस्तु– ' ययोरोजसा स्कभिता रजांꣳसि वीर्येभिर्वीरतमा शविष्ठा । या पत्येते अप्रतीता सहोभिर्विष्णू अगन् वरुणा पूर्वहूतौ ' इति । ^{v}ययोः विष्णुवरुणयोः ^{v}ओजसा बलेन ^{v}रजांꣳसि लोकाः ^{v}स्कभिता स्कभितानि स्कम्भितानि । किं च ^{v}वीर्येभिः वीर्यैः ^{v}वीरतमा अत्यन्तवीरौ ^{v}शविष्ठा शविष्ठौ बलवन्तौ ^{v}या यौ विष्णुवरुणौ ^{v}पत्येते परसैन्येषु पततः ^{v}सहोभिः बलैः ^{v}अप्रतीता अप्रतिगमनावनन्यसाध्यौ ^{v}विष्णू ^{v}वरुणा इत्युभावित्यस्मदीयो यज्ञः ^{v}पूर्वहूतौ पूर्वमाह्वाने ^{v}अगन् अगच्छत् ॥८॥

आ– स्कन्नमभिमृशति यूपे – ' ययोरोजसा ' इति । विष्णुवरुणदेवत्या अनुष्टुप् । ^{v}ययोः विष्णुवरुणयोः ^{v}ओजसा बलेन ^{v}स्कभिता ^{v}रजांꣳसि । रजांसि लोकाः । स्कम्नोतिः स्तम्भनार्थः । सुपश्छान्दसो लोपः । स्कभितानि रजांसि न चलन्ति । यौ ^{v}वीर्येभिः वीर्यैः सामर्थ्यविशेषैः ^{v}वीरतमा वीरतमौ विष्णुवरुणौ शविष्ठौ बलिष्ठौ । ^{v}या यौ विष्णुवरुणौ श्येनाविव ^{v}पत्येते परबलेषु पतन्तौ । ^{v}अप्रतीतौ अप्रतिगतौ अनन्यसाध्यौ । ^{v}सहोभिः बलैरप्रतीतौ विष्णु [वरुणौ] तुल्यकार्यत्वात् उभावपि विष्णुवरुणौ । पूर्वहूतौ ^{v}पूर्वमेवाह्वाने आहूतौ ^{v}अगन् । एवंविधौ विष्णुवरुणौ प्रति यज्ञो गच्छतीति शेषः ॥८॥

दे॒वान् दिव॑मगन् य॒ज्ञस्तत॑ो मा॒ द्रवि॑णमष्टु
मनु॒ष्या॒न॒न्तरि॑क्षमगन् य॒ज्ञस्तत॑ो मा॒ द्रवि॑णमष्टु।
पि॒तॄन् पृ॑थि॒वीम॑गन् य॒ज्ञस्तत॑ो मा॒ द्रवि॑णमष्टु
यं कं च॑ लो॒कमग॑न् य॒ज्ञस्तत॑ो मे भ॒द्रम॑भूत् ।।९।। (७)।।

---

10. V1 S1 C om. वीर्यैः; V1 S1 C om. या
12. P1 after उभौ ins. कर्मीभूतौ
16. B1 वीर्यतमौ for वीरतमौ

दे॒वान् । दिव॑म् । अ॒ग॒न् । य॒ज्ञः । तत॑ः । मा॒ । द्रवि॑णम् । अ॒ष्टु॒ ।
म॒नु॒ष्या॑न् । अ॒न्तरि॑क्षम् ।
पि॒तॄ॒न् । पृ॒थि॒वीम् ।
यम् । कम् । च॒ । लो॒कम् । अग॑न् । य॒ज्ञः ।
तत॑ः । मे॒ । भ॒द्रम् । अ॒भू॒त् ॥ हिः ॥ ९॥ (७) ॥

[प्राणाय मे पञ्च ॥५॥ उदु त्यं नव ॥९॥ समिन्द्र णोऽष्ट ॥८॥ माहिश्चतस्रः ॥४॥ एजतु दशमास्यः पञ्च ॥५॥ आजिघ्र षट् ॥६॥ परमेष्ठी नव ॥९॥ सप्तानुवाकेषु षट्चत्वारिंशत् ॥४६॥]

[इति शुक्लयजुर्वेदकाण्वसंहितायां सप्तमोऽध्यायः ॥]

सा– तत्रैव विकल्पितो द्वितीयो मन्त्र आम्नायते– ‘ देवान् दिवमगन् यज्ञस्ततो मा द्रविणमष्टु मनुष्यानन्तरिक्षमगन् यज्ञस्ततो मा द्रविणमष्टु । पितॄन् पृथिवीमगन् यज्ञस्ततो मा द्रविणमष्टु यं कं च लोकमगन् यज्ञस्ततो मे भद्रमभूत् ’ इति । अयं 'यज्ञः 'देवान् आतिवाहिकान् वाय्वादीन् प्राप्य 'दिवं द्युलोकम् 'अगन् अगच्छत् । 'ततः तत्र स्थिताद्यज्ञात् 'मा मां 'द्रविणं विशिष्टभोगसाधनरूपं धनम् 'अष्टु व्याप्नोतु । अनेन सुकृतिनामारोहक्रममभिधाय इदानीमवरोहक्रममाह– 'ततः द्युलोकादवरोहणकाले अन्तरिक्षलोकमागत्य 'मनुष्यान् 'अगन् । 'यज्ञः मनुष्यलोकमागच्छत् । तत्र स्थिताद्यज्ञात् मां 'द्रविणं व्याप्नोतु । दक्षिणायने गमनागमनमाह– अयं 'यज्ञः धूमादिमार्गेण 'पितॄन् प्राप्य 'पृथिवीम् आगच्छत् । तत्र स्थिताद् यज्ञाद् मां 'द्रविणं व्याप्नोतु । 'यं 'कम् अपि 'लोकम् अयं 'यज्ञः अगच्छत् । 'ततः तस्माद्यज्ञो मम 'भद्रं कल्याणम् 'अभूत् भूयादिति यजमानेनाशास्यते ॥९॥ (७) ॥

[इति नवमेऽध्याये सप्तमोऽनुवाकः ॥]

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे काण्वसंहिताभाष्ये नवमोऽध्यायः ॥९॥

---

7. A after चत्वारिंशत् ॥४६॥ adds प्राणावाजहोता यज्जाषट्चत्वारिंशत् ॥४६॥
14. V1 S1 C आगच्छन् for आगच्छत्
19. V1 om. वेदार्थस्य ... महेश्वरः ॥ [L 20]
21. V1 श्री for श्रीमद्राजाधिराज
22. P1 V1 °संहितायां for °संहिताभाष्ये.

आ– द्वितीयो मन्त्रविकल्पः – ‘देवान् दिवम्’ इति । यजमानाशीर्लिङ्गोक्तदेवत्यं यजुः । अयं ^{v}यज्ञः ^{v}देवान् आतिवाहिकान् वाय्वादीन् देवान् प्राप्य ^{v}दिवं द्युलोकम् आगच्छत् । वचनव्यत्ययः । ^{v}अगन् । ^{v}ततः द्युलोकस्थिताद् यज्ञात् ^{v}मा मां ^{v}द्रविणं धनं विशिष्टभोगसाधनरूपम् ^{v}अष्टु । अंशू व्याप्तौ । विकरणव्यत्ययः । अश्नोतु । देवयाने सुकृतिनामारोहक्रममभिधाय इदानीमवरोहक्रममाह– ‘मनुष्यानन्तरिक्षमगन्’ इति । ^{v}ततः द्युलोकादवरोहणकाले ^{v}अन्तरिक्षम् अन्तरिक्षलोकम् अगच्छत् । ^{v}ततः मनुष्येषु स्थिताद्यज्ञात् ^{v}मा मां ^{v}द्रविणम् ^{v}अष्टु व्याप्नोतु । दक्षिणायने गमनागमनमाह– ‘पितॄन् पृथिवीमगन्’ । ^{v}ततः अयं ^{v}यज्ञः धूमादिमार्गेण ^{v}पितॄन् प्राप्य तत्र स्वफलं दत्वा ततः ^{v}पृथिवीम् ^{v}अगन् । तत पृथिवीं प्राप्य [तत्र] स्थिताद्यज्ञात्^{v} द्रविणं ^{v}मा माम् ^{v}अष्टु । यद्वा – ^{v}यं ^{v}कं ^{v}च ^{v}लोकं स्वसामर्थ्येन स्वफलप्रदानाय ^{v}यज्ञः ^{v}अगन् । ^{v}ततः अस्माद्यज्ञात् मम ^{v}भद्रं कल्याणं फलम् ^{v}अभूत् भूयादित्येवं यजमानाशीः ॥ ९ ॥(७) ॥

[इति नवमेऽध्याये सप्तमोऽनुवाकः ॥]

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीवासुदेवपुरीपूज्यपादपरमकारुण्यासादित-श्रीकृष्णभक्ति-साम्राज्यश्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदिश्रीमदानन्दबोधभट्टोपाध्यायेन विरचिते काण्ववेदमन्त्रभाष्यसंग्रहे नवमोऽध्यायः ॥

दशमोऽध्यायः ।।

[अथ प्रथमोऽनुवाकः]

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥१॥

चतुर्थाध्यायमारभ्य नवमान्तेषु षट्सु अध्यायेषु सोमयागमन्त्रास्तदीयप्रासङ्गिकमन्त्राश्च निरूपिताः । दशमाऽध्याये वाजपेयिका मन्त्रा निरूप्यन्ते ॥

तत्र प्रथमेऽनुवाके सवितृप्रेरणाद्यर्था मन्त्रा उच्यन्ते ।

।। हरिः ॐ ।।

देव॑ सवि॑त॒ः प्र सु॑व य॒ज्ञं प्र सु॑वे॒मं भगा॑य ।
दि॒व्यो ग॑न्ध॒र्वः केत॒पाः केत॑ं नः पुनातु
वा॒चस्पति॑र्नो अ॒द्य वाज॑ꣳ स्वदतु ॥१॥

देव॑ । स॒वि॒त॒रिति॑ सवितः । प्र । सु॒व॒ । य॒ज्ञम् । प्र । सु॒व॒ । इ॒मम् । भगा॑य ।
दि॒व्यः । ग॒न्ध॒र्वः । के॒त॒पा इति॑ के॒त॒ऽपाः । केत॑म् । न॒ः । पु॒ना॒तु॒ ।
वा॒चः । पति॑ः । न॒ः । अ॒द्य । वाज॑म् । स्व॒द॒तु॒ ॥ ज्राः ॥१॥

सा– कात्यायनः – "देव सवितरिति जुहोति" (काश्रौ १४·१·११) इति । वाजपेयिसंबन्धि कर्म प्रारभमाणः प्रथममनेन जुहुयात् । पाठस्तु– ' देव सवितः प्रसुव यज्ञं प्रसुवेमं भगाय । दिव्यो गन्धर्वः केतपाः केतं नः पुनातु वाचस्पतिर्नो अद्य वाजꣳ स्वदतु ' इति । हे 'सवितः ᵛदेव सर्वस्य प्रेरकान्तर्यामिन्, 'यज्ञं वाजपेयलक्षणं यागं 'प्र 'सुव प्रवर्तय । 'इमं यजमानं ᵛभगाय भजनीयाय अनुष्ठानफलरूपायैश्वर्याय ᵛप्र 'सुव प्रेरय । किं च त्वत्प्रसादाद् ᵛदिव्यः दिवि भवः 'गन्धर्वः गवां रश्मीनां धारयिता 'केतपाः । केतशब्देनात्रान्नमुच्यते । अन्नस्य पालयिता सूर्यमण्डलरूपी देवः ᵛनः अस्माकं 'केतम् अन्नं ᵛपुनातु शोधयतु । 'वाचस्पतिः प्रजापतिरपि त्वत्प्रसादाद् 'अद्य अस्मिन् दिने 'नः अस्मदीयं ᵛवाजं हविर्लक्षणमन्नं 'स्वदतु [आ] स्वादयतु ॥१॥

---

19. V1 S1 C after °प्रसादाद् ins. आदित्यो and om. दिव्यो
20. V1 S1 C °वर्ती for रूपी
21. V1 S1 C om. अद्य; V1 S1 C अस्मान् दिने दिने for अस्मिन् दिने

आ– ॐ । ‘देव सवितः’ इति वाजपेयिका मन्त्राः ‘एष ते निर्ऋते’ (कासं ११·१·१) इत्येतस्मात् प्राक् । बृहस्पतेरार्षमिन्द्रस्य च । जुहोति– ‘देव सवितः’ इति । सवितृदेवत्याऽनुष्टुप् । ^{v}देव ^{v}सवितः सर्वस्य प्रसवक हे देव देवनादिगुणयुक्त, ^{v}यज्ञम् । यज देवपूजासंगतिकरणदानेषु । ^{v}प्र ^{v}सुव वाजपेयलक्षणमनुजानीहि । ^{v}भगाय यशःश्रीर्धर्मादिलक्षणाय भजनीयाय यज्ञफलाय । एवं पुरुषमुक्त्वा अथेदानीं मण्डलं प्रत्याह । त्वत्प्रसादात् सूर्यमण्डललक्षणो दिवि भवः ^{v}दिव्यः ^{v}गन्धर्वः गवां रश्मीनां धारयिता गन्धर्वः ^{v}केतपाः, केतशब्देनान्नमुच्यते, अन्नस्य पालयिता ^{v}नः अस्माकं ^{v}केतम् अन्नं ^{v}पुनातु शोधयतु । त्वत्प्रसादाच्च ^{v}वाचस्पतिः प्रजापतिः ^{v}नः अस्माकम् ^{v}अद्य अस्मिन्नहनि ^{v}वाजम् अन्नम् हविर्लक्षणं ^{v}स्वदतु । स्वद स्वाद आस्वादने । आस्वादयतु ॥१॥

ध्रुवसदँ त्वा नृषदँ मनःसदम् ।
उपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥२॥

ध्रुवसदमिति ध्रुवऽसदम् । त्वा । नृषदम् । नृसदमिति नृऽसदम् । मनःसदमिति मनःऽसदम् ।
उपयामगृहीत इत्युपयामऽगृहीतः । असि । इन्द्राय । त्वा । जुष्टम् । गृह्णामि ।
एषः । ते । योनिः । इन्द्राय । त्वा । जुष्टतममिति जुष्टऽतमम् ॥ मैं ॥२॥

सा– कात्यायनः – “पञ्च चैन्द्रान् ध्रुवसदमिति प्रतिमन्त्रम्” (काश्रौ १४·१·१२) इति । इन्द्रदेवताकान् पञ्चग्रहान् ‘ध्रुवसदम्’ इत्यादिभिः पञ्चभिर्मन्त्रैः क्रमेण गृह्णीयादिति शेषः । तत्र प्रथममन्त्रपाठः – ‘ध्रुवसदं त्वा नृषदं मनःसदम् । उपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम्’ इति । हे सोम, त्वमुपयामयतीत्युपयामो ग्रहस्तेन गृहीतः ^{v}असि । ^{v}इन्द्राय ^{v}जुष्टं प्रियं त्वां ^{v}गृह्णामि । कीदृशं त्वाम् ? ^{v}ध्रुवसदम् ध्रुवे स्थिरलक्षणे ग्रहे सीदतीति ध्रुवसदम् । नृषु मनुष्येषु सीदतीति ^{v}नृषदम् । मनसि सीदतीति ^{v}मनःसदम् । तादृशम् । ‘एष ते’ इत्यासादनमन्त्रः । हे ग्रह, ^{v}एषः खरप्रदेशः तव स्थानम् । ^{v}इन्द्राय प्रियतमं त्वां सादयामीति शेषः ॥२॥

आ– पञ्च वाजपेयिका ग्रहा गृह्यन्ते । ‘ध्रुवसदं त्वा’ इत्यादीनि ऐन्द्राणि त्रीणि यजूंषि । सोमाहुतिपरिणामभूतो रसः एषु लोकेषु वर्तमानः इह गृह्यत इति ग्रहः, सोऽपि स्थिरत्वात् ध्रुवः । ध्रुवे

---

5. B1 पुरुषान् for पुरुषम्
6. B1 केतुपाः for केतपाः
7. B1 केतुम् for केतम्

सीदतीति ध्रुवसत्, तं ^{V}ध्रुवसदम् । नृषु सीदतीति नृषत्, तं ^{V}नृषदम् । मनसि सीदतीति मनःसत्, तं ^{V}मनःसदम् । ^{V}इन्द्राय ^{V}त्वा ^{V}जुष्टम् अभिरुचितं त्वां गृह्णामीति । त्वं तु ‘ ^{V}उपयामगृहीतः ^{V}असि । उपयामयतीत्युपयामः । तेन गृहीतोऽसि । अत्र भिन्नक्रमः— प्रथमम् ‘ उपयामगृहीतोऽसि ’; पश्चात् ‘ त्वां गृह्णामि ’ इति । ‘ एष ते योनिः ’ । ^{V}इन्द्राय त्वां जुष्टम् अभिरुचितम् आसादयामीति ॥

अ॒प्सु॒षदं॑ त्वा घृत॒सदं॑ व्योम॒सद॑म् ।
उ॒प॒या॒मगृ॑हीतो॒ऽसीन्द्रा॑य त्वा॒ जुष्टं॑ गृह्णाम्ये॒ष ते॒ योनि॒रिन्द्रा॑य त्वा॒ जुष्ट॑तमम् ॥
पृ॒थि॒वि॒सदं॑ त्वाऽन्तरि॒क्षसदं॑ दिवि॒सदं॑ देव॒सदं॑ नाक॒सद॑म् ।
उ॒प॒या॒मगृ॑हीतो॒ऽसीन्द्रा॑य त्वा॒ जुष्टं॑ गृह्णाम्ये॒ष
ते॒ योनि॒रिन्द्रा॑य त्वा॒ जुष्ट॑तमम् ॥३॥

अ॒प्सु॒षद॑म् । अ॒प्सु॒सद॒मित्य॑प्सु॒ऽसद॑म् । त्वा॒ ।
घृ॒त॒सद॒मिति॑ घृ॒त॒ऽसद॑म् । व्यो॒म॒सद॒मिति॑ व्यो॒म॒ऽसद॑म् ।
पृ॒थि॒वि॒सद॒मिति॑ पृ॒थि॒वि॒ऽसद॑म् । अ॒न्त॒रि॒क्ष॒सद॒मित्य॑न्त॒रि॒क्ष॒ऽसद॑म् ।
दि॒वि॒सद॒मिति॑ दि॒वि॒ऽसद॑म् । दे॒व॒सद॒मिति॑ दे॒व॒ऽसद॑म् । ना॒क॒सद॒मिति॑ ना॒क॒ऽसद॑म् ॥कौं॥३॥

सा— अथ द्वितीयः — ‘ अप्सुषदं त्वा घृतसदं व्योमसदम् । उपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ’ इति । तदुदकघृतान्तरिक्षेषु सीदन्तं त्वां ^{V}गृह्णामि । शेषो व्याख्यातसमानार्थः ॥

अथ तृतीयः — ‘ पृथिविसदं त्वाऽन्तरिक्षसदं दिविसदं देवसदं नाकसदम् । उपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ’ इति । स्पष्टार्थः ॥३॥

आ — द्वितीयग्रहं गृह्णाति । अप्सु सीदतीति अप्सुषद्, तम् । घृते सीदतीति घृतसत्, तम् । व्योम्नि अन्तरिक्षे सीदतीति व्योमसत्, तं ^{V}व्योमसदम् । ‘ उपयामगृहीतोऽसि ’ इत्यादिर्व्याख्यातसमानार्थः ॥ [तृतीयं गृह्णाति — ‘ पृथिविसदम् ’ इत्यादि । स्पष्टोऽर्थः ॥] ॥३॥

2.　B1 before इन्द्राय adds त्वाम्

अ॒पाꣳ रस॒मुद्व॑यस॒ꣳ सूर्ये॒ सन्त॑ꣳ स॒माहि॑तम् ।
अ॒पाꣳ रस॑स्य॒ यो र॒सस्तं वो॑ गृह्णाम्युत्त॒मम् ।
उ॒प॒या॒मगृ॑हीतो॒ऽसीन्द्रा॑य त्वा॒ जुष्टं॑ गृह्णाम्ये॒ष
ते॒ योनि॒रिन्द्रा॑य त्वा॒ जुष्ट॑तमम् ।।४।।

अ॒पाम् । रस॑म् । उद्व॑यस॒मित्युत्ऽव॑यसम् । सूर्ये॑ । सन्त॑म् । स॒माहि॑त॒मिति॑ स॒म्ऽआहि॑तम् ।
अ॒पाम् । रस॑स्य । यः । रसः॑ । तम् । व॒ः । गृ॒ह्णा॒मि । उ॒त्त॒ममित्यु॑त्ऽत॒मम् । डुं॥४॥

अथ चतुर्थः – ‘ अपां रसमुद्वयसꣳ सूर्ये सन्तꣳ समाहितम् । अपाꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तमम् । उपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ’ इति । हे चतुर्थग्रह, ^{v}अपां ^{v}रसस्य उदकस्य सारभूतः सोमवल्लीरूपेण परिणतः ^{v}यः ^{v}रसः अस्ति, तस्यापि रसस्य यो रसः सारभूतः, ^{v}तं तादृशम् ^{v}उत्तमम् उत्कृष्टतमं रसं ^{v}वः युष्मदर्थं ^{v}गृह्णामि । वः इति प्रजार्थं बहुवचनम् । ^{v}अपां ^{v}रसम् उदकस्य सारम् ^{v}उद्वयसम्, उद्गतं वयोऽन्नं यस्य तम् । ^{v}सूर्ये ^{v}सन्तं सम्यगाहितम् । शिष्टं स्पष्टम् ॥४॥

आ– चतुर्थं गृह्णाति– ‘ अपां रसम् ’ इति । रसदेवत्याऽनुष्टुप् । ^{v}अपां ^{v}रसं सारं वायुम् । “ एष वा अपां रसो योऽयं पवते ” (माशब्रा ८·१·२-६) इति श्रुतेः । ^{v}उद्वयसं उद्गच्छन्तं वयः अन्नमस्माद् वायोः स उद्वयाः, तं रसमुद्वयसम् । ‘ सूर्ये सन्तं समाहितम् ’ । ^{v}सूर्ये ^{v}समाहितं सम्यगाहितम् । अस भुवीत्यस्य “ श्नसोरल्लोपः ” (पा ६·४·२ ३) इत्यतो लोपे च शतृप्रत्ययादौ च सन्निति । तं सन्तम् । ‘ अपां रसस्य यो रसः ’ । ^{v}अपां ^{v}रसस्य वायोः ^{v}रसः सारः, ^{v}तम् ^{v}उत्तमम् उत्कृष्टं ^{v}वः युष्मभ्यं युष्मदर्थं ^{v}गृह्णामि । ‘ उपयामगृहीतोऽसि ’ इत्यादि व्याख्यातसमानार्थः ॥४॥

ग्रहा॑ ऊर्जाहुतयो॒ व्यन्तो॒ विप्रा॑य म॒तिम् ।
ते॒षां विशि॑प्रियाणां वो॒ऽहमि॒षमू॒र्जꣳ सम॑ग्रभम् ।
उ॒प॒या॒मगृ॑हीतो॒ऽसीन्द्रा॑य त्वा॒ जुष्टं॑ गृह्णाम्ये॒ष ते॒ योनि॒रिन्द्रा॑य त्वा॒ जुष्ट॑तमम् ।।५।।

---

9. C S1 तुरीय° for चतुर्थ°
11. P1 यस्यां for यस्य; V1 ते for तं

ग्रहा॑ः। ऊ॒र्जा॒हु॒त॒य॒ इत्यू॑र्जाऽआहुतयः। व्यन्त॑ः। विप्रा॑य। म॒तिम्।
तेषा॑म्। विशि॑प्रियाणा॒मिति॒ विऽशि॑प्रियाणाम्। व॒ः।
अ॒हम्। इषं॑म्। ऊर्जं॑म्। सम्। अग्रभम्॥ सीं॥ ५॥

सा– अथ पञ्चमः – ' ग्रहा ऊर्जाहुतयो व्यन्तो विप्राय मतिम्। तेषां विशिप्रियाणां वोऽहमिषमूर्जं समग्रभम्। उपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ' इति। हे Vग्रहाः, ऊर्जमन्नं यैराहूयते ते Vऊर्जाहुतयः। ये यूयं Vविप्राय मेधाविने इन्द्राय Vमतिं विशिष्टबुद्धिं Vव्यन्तः। ' वी ' इत्यस्य गतिकर्मणो धातोः शत्रन्तस्य व्यन्त इति रूपम्। व्यन्तोऽवगच्छन्तोऽनुजानन्त इत्यर्थः। Vविशिप्रियाणां विविधानि शिप्राणि हनूस्थानीयानि पात्राग्राणि, तत्पर्यन्ताः विशिप्रियास्तादृशानां Vतेषां Vवः युष्माकं संबन्धिनम् Vइषम् अन्नम् Vऊर्जं रसम् Vअहं Vसमग्रभं समग्रहं सम्यक् गृह्णामि। 'उपयामगृहीतः' इति व्याख्यातम् ॥५॥

आ– पञ्चमं गृह्णाति– ' ग्रहा ऊर्जाहुतयः ' इति लिङ्गोक्तदेवत्याऽनुष्टुप्। हे Vग्रहाः, Vऊर्जाहुतयः ऊर्जमन्नं रसम् आह्वयन्तीत्येते ऊर्जाहुतयः। Vविप्राय। प्रा पूरणे। अपोक्षितफलपूरकस्य मेधाविने Vमतिं विचक्षित (? विशिष्ट) बुद्धिं Vव्यन्तः। वी इत्यस्य गतिकर्मणो धातोः शत्रन्तस्य रूपम्। व्यन्तः पश्यन्तः जानन्तः अनुजानन्त [इत्यर्थः।] भवतेति शेषः। ' तेषां विशिप्रियाणां वः '। ' शिप्रे हनू नासिके वा ' इत्युक्तम्, इह तु हनू एव गृह्येते। विगतं हन्वोः कर्म येषु ते विशिप्रियाः। शोभनाभिषवसंस्कृताः सुपूताः विशिप्रिया उच्यन्ते। तत्र [हि] हन्वोः व्यापारो नास्ति। Vतेषां Vविशिप्रियाणां सतां Vवः युष्माकं संबन्धिनम् Vइषम् अन्नम् Vऊर्जं रसम् Vअहं Vसमग्रभं समग्रहं संगृह्णामि। ' उपयामगृहीतोऽसि '। व्याख्यातम् ॥५॥

सं॒पृ॒चं॑ स्थ॒ सं मा॑ भ॒द्रेणं॑ पृङ्क्त।
वि॒पृ॒चं॑ स्थ॒ वि मा॑ पा॒पेनं॑ पृङ्क्त ॥६॥ (१)॥

सं॒पृ॒च॒ इतिं॑ स॒म्ऽपृचं॑ः। स्थ॒। सम्। मा॒। भ॒द्रेणं॑। पृ॒ङ्क्त॒।
वि॒पृ॒च॒ इतिं॑ वि॒ऽपृचं॑ः। स्थ॒। वि। मा॒। पा॒पेनं॑। पृ॒ङ्क्त॒॥ छिं॥६॥(१)॥

---

6. P1 ग्रह for ग्रहाः, C V1 S1 येन for यैः; V1 S1 C om. इन्द्राय
7. P1 अनुगच्छन्तो° for अवगच्छन्तो°
8. V1 S1 C तत्तत्पर्यन्ताः for तत्पर्यन्ताः;
   B1 आह्वयन्ती ते ते एते for आह्वयन्तीत्येते
14. B1 before भवतेति adds विाशि प्रायाः
15. B1 गृह्यते for गृह्येते; B1 after हन्वोः add यातया

सा– कात्यायनः – “ उपर्यक्षमध्वर्युर्धारयत्यधो नेष्टा संपृच स्थ ” इति (द्र. काश्रौ १४.२.७) इति । अध्वर्युरुपर्यक्षं सोमग्रहं धारयेत् । नेष्टा अधोक्षं सुराग्रहं धारयेत् । पाठस्तु– ‘ संपृच स्थ सं मा भद्रेण पृङ्क्त । विपृच स्थ वि मा पापेन पृङ्क्त ’ इति । हे ग्रहाः, यूयं ᵛसंपृचः ᵛस्थ संपृक्ताः संसृष्टाः भवथ । यत एवम्, अतो ᵛमा मां ᵛभद्रेण भन्दनीयेन कल्याणेन ᵛसंपृक्त संसृजत । यतो यूयं ᵛविपृचः ᵛस्थ विगतान्यसंसर्गा भवथ, अतः ᵛमा मां ᵛपापेन ᵛविपृङ्क्त वियोजयत ॥६॥

[इति दशमेऽध्याये प्रथमोऽनुवाकः ॥१॥]

आ– उपर्यक्षं सोमग्रहं करोत्यध्वर्युः, अधोऽक्षं नेष्टा सुराग्रहं करोति– ‘ संपृचः स्थ ’ इति, ‘ विपृचः स्थ ’ इति द्वे यजुषी लिङ्गोक्तदेवत्ये । पृची संपर्के । संपृच्यन्ते संवृज्यन्त इति ᵛसंपृचः ग्रहाः संपृक्ताः ᵛस्थ भवथ । यत एवंगुणा यूयमतः ᵛमा मां ᵛभद्रेण भन्दनीयेन कल्याणेन ᵛपृङ्क्त संसृजत । यतो यूयं ᵛविपृचः विपृक्तान्यसंसर्गाः ᵛस्थ, अतः ᵛवि ᵛमा मां ᵛपापेन ᵛविपृङ्क्त पापेन वियोजयत अपापान् कुरुत ॥६॥

[इति दशमेऽध्याये प्रथमोऽनुवाकः ॥१॥]

[अथ द्वितीयोऽनुवाकः]

प्रथमे सवितृप्रेरणार्था मन्त्रा उक्ताः । द्वितीयेऽनुवाके रथारोहणार्था मन्त्रा उच्यन्ते ॥

इन्द्र॑स्य॒ वज्रो॑ऽसि वा॒ज॒सास्त्वया॒ऽयं वाज॑ꣳ सेत् ।
वाज॑स्य॒ नु प्र॑स॒वे मा॒तरं॑ म॒हीमदि॑ति॒ नाम॒ वच॑सा करामहे ।
यस्या॑मि॒दं विश्वं॒ भुव॑नमावि॒वेश॒ तस्यां॑ नो दे॒वः स॑वि॒ता धर्मं॑ साविषक् ॥१॥

इन्द्र॑स्य । वज्र॑ः । अ॒सि॒ । वा॒ज॒सा इति॑ वा॒ज॒ऽसाः । त्वया॑ । अ॒यम् । वाज॑म् । से॒त् ।
वाज॑स्य । नु । प्र॒स॒व इति॑ प्र॒ऽस॒वे । मा॒तर॑म् । म॒हीम् ।
अदि॑तिम् । नाम॑ । वच॑सा । क॒रा॒म॒हे॒ ।
यस्या॑म् । इ॒दम् । विश्व॑म् । भुव॑नम् । आ॒वि॒वेशेत्या॑ऽवि॒वेश॑ ।
तस्या॑म् । न॒ः । दे॒वः । स॒वि॒ता । धर्म॑ । सा॒वि॒ष॒क् ॥ढो॥१॥

सा– कात्यायनः – “ इन्द्रस्य वज्र इति रथावहरणम् ” (काश्रौ १४.३.१) इति । रथमाहरेत् । पाठस्तु– ‘ इन्द्रस्य वज्रोऽसि वाजसास्त्वयाऽयं वाजꣳ सेत् ’ इति । हे रथाभिमानिदेव, त्वम् ᵛइन्द्रस्य

वज्रसमो भवसि । वज्रभूतेन ᵛत्वया ᵛअयं यजमानः ᵛवाजम् अन्नं ᵛसेत् सनुयात् संभजेत् । अतस्त्वं ᵛवाजसाः अन्नस्य दाता भवसि ॥

कात्यायनः – “ दक्षिणेन चात्वालमावर्तयति वाजस्येति धूर्गृहीतम् ” (काश्रौ १४.३.२) इति । चात्वालस्य दक्षिणभागे धूर्गृहीतं रथमावर्तयेत् । पाठस्तु– ‘ वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे । यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्मं साविषक् ’ इति । हे अन्तर्वेदे, ᵛवाजस्य अन्नस्य ᵛप्रसवे नु अनुज्ञायामेव वर्तमाना वयं ᵛमातरं जगतो निर्मात्रीं ᵛमहीं महनीयाम् ᵛअदितिम् अदीनामखण्डितां वा भूमिं ᵛनाम प्रसिद्धं यथा भवति तथा ᵛवचसा मन्त्रेण ᵛकरामहे स्तुम इत्यर्थः । ᵛयस्यां भूमौ ᵛइदं ᵛविश्वं सर्वं ᵛभुवनं भूतजातम् ᵛआविवेश तस्यां भूमावेव ᵛनः अस्माकं ᵛधर्म धारणमवस्थानं ᵛसविता ᵛदेवः ᵛसाविषक् । षू प्रसव इति धातोर्णिचि कृते सत्येतद्रूपम् । प्रसवमनुज्ञां करोतु ॥१॥

आ– रथमवतरति ‘ इन्द्रस्य वज्रोऽसि ’ इति रथदेवत्या अत्यष्टिः । यस्त्वम् ᵛइन्द्रस्य ᵛवज्रः ᵛअसि ’ । रसौ वै वज्रः । स गोजातः । ᵛवाजसाः । वाजमन्नं सनोति ददातीति वाजसाः अन्नदाता । तं त्वां ब्रवीमि । ᵛत्वया ᵛअयं ᵛवाजं ᵛसेत् सिनुयात् बध्नीयादित्यर्थः । धूर्गृहीतमभ्यावर्तयति– ‘ वाजस्य ’ इति जगत्यतिजगती वा पृथिवीदेवत्या । चतुर्थः पादः सावित्रः । ‘ वाजस्य नु प्रसवे ’ । ᵛवाजस्य अन्नस्य ᵛनु एवमभ्यनुज्ञायामेव वर्तमाना इति शेषः । या माता जगतो निर्मात्री तां ᵛमातरं ᵛमहीं महनीयां पृथिवीं त्वां ᵛवचसा वेदवाक्येन मन्त्रेण ᵛअदितिं ᵛनाम प्रसिद्धम् । दो अवखण्डने । अखण्डितामेव । अदीनां नाम अनुकूलां तामेव ᵛकरामहे । ᵛयस्यां पथिव्याम् ᵛइदं ᵛविश्वं भुवनं सर्वं भूतजातम् ᵛआविवेश प्रविष्टं, तस्यां पृथिव्यामेव ᵛनः अस्माकं ᵛदेवः ᵛसविता ᵛधर्म धारणमवस्थानं ᵛसाविषत् । षू प्रसवे । सूते । निचक्षतेर्लि–(? ले) टि साविषदिति रूपम् । प्रसवमनुज्ञां करोतु ॥१॥

देवी॑रापो अपां नपा॒द्यो व॑ ऊ॒र्मिः प्रतू॑र्तिः ।
क॒कुन्मा॑न् वाज॒सास्ते॑ना॒यं वाज॑ꣳ सेत् ।।२।।

देवी॑ः । आ॒प॒ः । अ॒पा॒म् । न॒पा॒त् । यः । व॒ः । ऊ॒र्मिः । प्रतू॑र्ति॒रि॒ति॑ प्रऽतू॑र्तिः ।
क॒कु॒न्मानिति॑ क॒कुत्ऽमा॑न् । वा॒ज॒सा इति॑ वा॒ज॒ऽसाः ।
तेन॑ । अ॒यम् । वाज॑म् । से॒त् ॥ द्रयुं ॥ २ ॥

---

1. P1 om. अयं; V1 S1 C समभजत् for संभजेत्
2. V1 S1 C वाजस्य for वाजसाः
6. V1 S1 C om. हे अन्तर्वेदे; V1 S1 C om. नु
13. B1 अन्नसं for तं

सा– कात्यायनः – “ अश्वान् प्रोक्षत्यपोऽवनीयमानान् स्नातानागतानप्स्वन्तरिति देवीराप इति वा समुच्चयो वा ” (काश्रौ १४.३.५) इति । स्नानार्थमप उद्दिश्य नीयमानान् स्नातानागतान् वाऽश्वानप्सु ‘ अप्स्वन्तरमृतम् ’ इति मन्त्रेण वा, ‘ देवीरापः ’ इति मन्त्रेण वा एतन्मन्त्रद्वयेन वा प्रोक्षेत् । तत्र ‘ देवीरापः ’ इत्यस्य मन्त्रस्य पाठः–‘ देवीरापो अपां नपाद्यो व ऊर्मिः प्रतूर्तिः । ककुन्मान् वाजसास्तेनायं वाजꣳ सेत् ’ इति । हे आपः देव्यः, ^{v}वः युष्मदीयः ^{v}यः ^{v}ऊर्मिः कल्लोलः ^{v}अपां ^{v}नपात् अपामपत्यं गर्भभूत इत्यर्थः । कीदृशः ? ^{v}प्रतूर्तिः प्रकर्षेण त्वरणशीलः । ककुच्छब्देन वृषभस्कन्धस्थ उन्नतप्रदेश उच्यते । अत्र कल्लोलसामान्यादुदकनिचयैः संयुक्तबहुलोद्गतोदकसंघातवान् ^{v}ककुन्मान् इत्युच्यते । ^{v}वाजसा अन्नस्य दाता य एवंविशिष्टः ^{v}तेन अपां विशिष्टरूपेण ^{v}अयम् अश्वः प्रोक्षितः सन् ^{v}वाजम् अन्नं ^{v}सेत् संभजेत् ॥२॥

आ– ‘ अश्वानद्भिरभ्युक्षति– ‘ देवीरापः ’ इति । अब्देवत्या उष्णिक् । ^{v}देवीः ^{v}आपः देव्य आपः, ^{v}वः युष्माकं ^{v}यः ^{v}अपां ^{v}नपात् अपामपत्यमपां गर्भः, ^{v}वः युष्माकम् ^{v}ऊर्मिः कल्लोलाख्यः ^{v}प्रतूर्तिः प्रत्वरणशीलः हिंसनशीलो वा ^{v}ककुन्मान् । ककुप्शब्देन वृषभस्कन्धे उन्नतप्रदेश उच्यते । तत्साम्यादुदकनिचयैः संयुक्तबहुलोद्गतोदकसंपा (घा)तवान् ककुन्मानिति । ^{v}वाजसाः अन्नस्य संभक्ता अन्नस्य दाता । ^{v}यः एवंगुणः ^{v}तेन अपां विशिष्टरूपेण ^{v}अयम् अश्वः प्रोक्षितः सन् ^{v}वाजम् अन्नं ^{v}सेत् । सनोतेः सिनोतेर्वा लिङ्येतद्रूपं सेदिति । सनुयात् संभजेत , सिनुयात् बध्नीयात् ॥२॥

अ॒प्स्व॒न्तर॒मृत॑म॒प्सु भे॑ष॒जम॒पामु॒त प्रश॑स्तिभिः ।
अश्वा॒ भव॑त वा॒जिन॑ः ।।३।।

आ॒प्स्वित्य॒प्ऽसु । अ॒न्तः । अ॒मृत॑म् । अ॒प्स्वित्य॒प्ऽसु । भे॒ष॒जम् ।
अ॒पाम् । उ॒त । प्रश॑स्तिभि॒रि॒ति प्रश॑स्तिऽभिः ।
अश्वा॑ः । भव॑त । वा॒जिन॑ः ॥ ठां ॥३॥

---

1. C V1 S1 प्रोक्षयति for प्रोक्षति
3. C V1 S1 प्रोक्षयेत् for प्रोक्षेत्
6. V1 S1 C वृषभस्य for वृषभस्कन्धस्थः
7. S1 C कल्लोलस्तत्साम्याद्; V1 कल्लोलस्तस्माद् for कल्लोलसामान्याद्
9. B1 अश्वानभ्युजति for अश्वानाद्भिरभ्युक्षति
11. B1 प्रवरण° for प्रत्वरण°
13. B1 अन्नानस्य for अन्नस्य;

सा– अथ द्वितीयः प्रोक्षणमन्त्रः –' अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तिभिः । अश्वा भवत वाजिनः ' इति । ᵛअप्सु उदकेषु ᵛअन्तः मध्ये ᵛअमृतं सारभूतमपां स्वरूपं यदस्ति तेन अपां सारभूतेन अश्वाः संभूताः । अतोऽश्वानां ᵛभेषजम् आरोग्यकरं पुष्टिकरं च औषधं यदस्ति तद् ᵛअप्सु एव प्रतिष्ठितम् इति शेषः । ᵛउत अपि च ᵛअपाम् उदकानां ᵛप्रशस्तिभिः प्रशंसनैः स्तोत्रैः ᵛवाजिनः अन्नवन्तः वेगवन्तो वा ᵛअश्वाः यूयमेव स्तुताः ᵛभवत ।।३।।

आ– द्वितियः प्रोक्षणमन्त्रः – ' अप्स्वन्तः ' इति । अश्वदेवत्योष्णिक् । ᵛअप्सु जलेषु ᵛअन्तः जलानामन्तःस्वरूपं यत् ᵛअमृतं सारभूतं तस्मात् ᵛअश्वाः ᵛभवत । अपां साररूपेण यूयमश्वाः संभूताः । अतोऽश्वानां ᵛभेषजम् आरोग्यकरं पुष्टिकरं त्वौषधम् ᵛअप्सु प्रतिष्ठितमिति शेषः । ' अपामुत प्रशस्तिभिः ' । [ᵛउत अपि च ᵛअपां जलानां ᵛप्रशस्तिभिः प्रशंसनैः स्तोत्रैः ᵛवाजिनः अन्नवन्तः अश्वाः यूयं भवत ॥३॥]

वातो॑ वा वो॒ मनो॑ वा गन्ध॒र्वाः स॒प्तवि॑ꣳशतिः ।
ते अ॑ग्रेऽश्व॑मयुञ्ज॒ꣳस्ते अ॑स्मिञ्ज॒वमाद॑धुः ।।४।।

वात॑ः । वा॒ । व॒ः । मन॑ः । वा॒ । ग॒न्ध॒र्वाः । स॒प्तवि॑ꣳशति॒रिति॑ स॒प्तऽवि॑ꣳशतिः ।
ते । अग्रे॑ । अश्व॑म् । अ॒यु॒ञ्ज॒न् । ते । अ॒स्मि॒न् । ज॒वम् । आ । अ॒द॒धु॒ः ॥ क्लें ॥४॥

सा– कात्यायनः – " दक्षिणं युनक्ति वातो वेति " (काश्रौ १४·३·६) इति । दक्षिणप्रदेशे प्रथममश्वं योजयेत् । पाठस्तु– ' वातो वा वो मनो वा गन्धर्वाः सप्तविंशतिः । ते अग्रेऽश्वमयुञ्जꣳस्ते अस्मिन् जवमादधुः ' इति । अत्र वा-शब्दः समुच्चयार्थः । ᵛवातः ᵛवा वायुश्च ᵛमनः च ᵛगन्धर्वाः च ᵛसप्तविंशतिः सप्तविंशतिसंख्यायुक्तानि नक्षत्राणि च । ᵛते एते वातप्रभृतयः सर्वे ᵛअग्रे पूर्वं वयं युष्मान् । बहुवचनं पूजार्थम् । ᵛअश्वं त्वाम् ᵛअयुञ्जन् रथे योजितवन्तः । ᵛते च पुनः ᵛअस्मिन् अश्वे त्वयि ᵛजवम् अतिवेगयुक्तं बलम् ᵛआदधुः स्थापितवन्तः ॥४॥

आ– [अश्वं युनक्ति– ' वातो वा ' इति । अश्वदेवत्या उष्णिक् । वा-शब्दः समुच्चयार्थः । ' वातो वा वो मनो वा गन्धर्वाः ' । ᵛवातः च ᵛमनः च ᵛगन्धर्वाः च ᵛसप्तविंशतिः

---

2. V1 S1 C om. अन्तः
3. P1 अश्वेषु, V1 अश्वे च for अप्सु एव
5. P1 भवथ for भवत
7. B1 भवन्तः for भवत

सप्तविंशतिसंख्याकानि नक्षत्राणि च । ᵛते] एते वातप्रभृतयः ᵛअग्रे पूर्वमश्वं त्वाम् ᵛअयुञ्जन् अश्वं नियोजितवन्तः । ᵛते च ᵛअस्मिन् अश्वे त्वयि ᵛजवम् अतिवेगगुणयुक्तं बलम् ᵛआदधुः स्थापितवन्तः ॥४॥

वात॑रꣳहा भव वाजिन् यु॒ज्यमा॑न॒ इन्द्र॑स्येव॒ दक्षि॑णः श्रि॒यैधि॑ ।
यु॒ञ्जन्तु॑ त्वा म॒रुतो॑ वि॒श्ववे॑दस॒ आ ते॒ त्वष्टा॑ प॒त्सु ज॒वं द॑धातु ॥५॥

वात॑रꣳहा॒ इति॒ वात॑ऽरꣳहाः । भ॒व॒ । वा॒जि॒न् । यु॒ज्यमा॑नः ।
इन्द्र॑स्ये॒वेतीन्द्र॒स्यऽइव । दाक्षि॑णः । श्रि॒या । ए॒धि॒ ।
यु॒ञ्जन्तु॑ । त्वा॒ । म॒रुतः॑ । वि॒श्ववे॑दस॒ इति॑ वि॒श्वऽवे॑दसः ।
आ । ते॒ । त्वष्टा॑ । प॒त्स्विति॑ प॒त्ऽसु । ज॒वम् । द॒धा॒तु॒ ॥ न्यों ॥५॥

सा– कात्यायनः – “उत्तरं वातरꣳहा इति” (काश्रौ १४·३·७) इति । वामभागे द्वितीयमश्वं योजयेत् । पाठस्तु– ‘ वातरꣳहा भव वाजिन् युज्यमान इन्द्रस्येव दक्षिणः श्रियैधि । युञ्जन्तु त्वा मरुतो विश्ववेदसः आ ते त्वष्टा पत्सु जवं दधातु ’ इति । हे ᵛवाजिन् वेगवन्नश्व, ᵛयुज्यमानः उत्तरभागे नियुज्यमानस्त्वं ᵛवातरꣳहाः वायुवद्वेगयुक्तः ᵛभव । ᵛदक्षिणः दक्षिणभागे स्थितोऽश्वस्त्वम् ᵛइन्द्रस्य अश्वः ᵛइव ᵛश्रिया शोभया युक्तः ᵛएधि भव । ᵛविश्ववेदसः सर्वज्ञः ᵛमरुतः ᵛत्वा त्वां ᵛयुञ्जन्तु नियुञ्जन्तु । किं च ᵛत्वष्टा त्वष्टृनामकः देवः, हे अश्व, ᵛते तव ᵛपत्सु पादेषु ᵛजवं वेगम् ᵛआदधातु स्थापयतु ॥५॥

आ- द्वितीयं युनक्ति - ‘ वातरꣳहा ’ इति । अश्वदेवत्या त्रिष्टुप् । अश्वस्तुतिः । रंहतिर्गत्यर्थः । वातस्य रꣳहः । वातस्येव रꣳहो यस्य सः ᵛवातरꣳहाः । हे ᵛवाजिन्, ᵛयुज्यमानः त्वं वातरꣳहाः वायुजवः ᵛभव । ᵛइन्द्रस्य अश्व ᵛइव यजमानरथस्य ᵛदक्षिणः अश्वः दक्षिणतः स्थितोऽश्वः त्वं ᵛश्रिया शोभया युक्तः ᵛएधि ᵛभव । ‘ युञ्जन्तु त्वा मरुतो विश्ववेदसः ’ । सर्वव्यापिनः सर्वज्ञाश्च ᵛमरुतः वायुदेवाः अश्वं त्वां ᵛयुञ्जन्तु । ‘ आ ते त्वष्टा ’, ᵛत्वष्टा च देवः ᵛते तव युक्तस्य ᵛपत्सु पादेषु ᵛजवं वेगं बलम् ᵛआदधातु स्थापयतु ॥५॥

ज॒वो यस्ते॑ वाजि॒न् निहि॑तो॒ गुहा॒ यः श्ये॒ने परी॑तो॒ अच॑रच्च॒ वाते॑ ।
तेन॑ नो वाजि॒न् बल॑वा॒न् बले॑न वाज॒जिच्चै॒धि सम॑ने च पारयि॒ष्णुः ॥६॥

---

1. B1 °अथ पुरामश्वं for अग्रे पूर्वमश्वं
12. V1 S1 C युज्यमानाद् for युज्यमानः
13. P1 om. दक्षिणः

ज॒वः । यः । ते॒ । वा॒जि॒न् । निहि॑त॒ इति॒ निऽहि॑तः । गुहा॑ । यः ।
श्ये॒ने । परी॑त॒ इति॒ परि॑ऽइतः । अच॑रत् । च॒ । वाते॑ ।
तेन॑ । न॒ः । वा॒जि॒न् । बल॑वा॒निति॒ बल॑ऽवान् । बले॑न । वा॒ज॒जिदिति॑ वा॒ज॒ऽजित् । च॒ ।
ए॒धि । सम॑ने । च॒ । पा॒रयि॒ष्णुः ॥ श्रीः ॥६॥

सा– कात्यायनः – " दक्षिणाप्रष्टिं जवो यस्त इति " (काश्रौ १४·३·८) इति । व्यवहितयोरीषयोर्मध्ये प्रष्टिनामकं तृतीयमश्वं योजयेत् । पाठस्तु– ' जवो यस्ते वाजिन्निहितो गुहा यः श्येने परीतो अचरच्च वाते । तेन नो वाजिन् बलवान् बलेन वाजजिच्चैधि समने च पारयिष्णुः ' इति । हे ᵛवाजिन् अश्व, ᵛते तव ᵛगुहा गुहायां हृदयप्रदेशे ᵛयः ᵛजवः वेगः ᵛनिहितः अवस्थापितः; ᵛश्येने श्येनाख्ये पक्षिणि यो जवः ᵛपरीतः प्राप्तः; ᵛवाते वायौ यो जवः ᵛअचरत् चरति; हे ᵛवाजिन्, ᵛतेन ᵛबलेन ᵛबलवान् त्वं ᵛनः अस्माकं ᵛवाजजित् वाजस्यान्नस्य जेता ᵛच एधि अन्नस्य दाता भवेत्यर्थः । ᵛसमने संग्रामे ᵛच ᵛपारयिष्णुः परं गमनशीलो भव ॥६॥

आ– तृतीयं युनक्ति– ' जवो यस्ते ' इति । जगती अश्वस्तुतिः । हे ᵛवाजिन्, ᵛते तव ᵛगुहा । गुहाशब्दो रहस्यवचनः । गुहायां तव हृदये ᵛयः ᵛजवः वेगः ᵛनिहितः स्थापितः, " मनसो जवी (? वो) यः " (कासं ४०.४) इति श्रुतेः, प्रसिद्धं परमात्मबलमत्र विवक्षितम् । ' यः श्येने परीतः ' ᵛश्येने पक्षिणि यो जवः ᵛपरीतः । परिपूर्वस्य (तनोतेरेतद्रूपम् ।) परीतः व्यवस्थितः । स वेगः पश्चाद् ᵛवाते ᵛअचरत् । हे ᵛवाजिन्, ᵛतेन ᵛबलेन ᵛबलवान् त्वं ᵛनः अस्माकं ᵛवाजजित् ᵛएधि । अस्माकं वाजस्य जित् अन्नस्य दाता भवेत्यर्थः । ᵛसमने संग्रामे ᵛपारयिष्णुः ᵛच पारयिता संग्रामस्य पारगमनशीलो भव ॥६॥

---

5. V1 S1 C °प्राष्टिं° for प्रष्टिं
6. V1 S1 C प्रष्टि° for प्रष्टि°; P1 after पाठस्तु ins. जगती छन्दः
7. P1 परितो for परीतो
9. P1 परि इतः परितः for परीतः
10. V1 S1 C om. च; P1 after च ins. समुच्चयार्थ चकोरादन्तोदन्तः;
    V1 S1 C धाता for दाता
11. P1 after भव । adds परित (? परीत) इत्यस्य विहितशब्दसाहचर्यादवस्थानार्थत्वम् । प्रकृतिप्रत्ययविभागस्तु परिपूर्वाद्दधातेर्धातोः क्त प्रत्यये दधातेर्हिः । (पा ७.४.४२) । इति हेरादेशस्य छान्दसत्वेन लोपे परेर्दीर्घे रूपसिद्धिः । परीत्त इति पाठे तु दधातेराकारलोपे दीर्घे सति रूपमिति ज्ञेयम् । अत एव प्रातिशाख्ये परितोवत्तानं सुविताय सग्धिरिति सूत्रे धातोस्तदेकदेशस्य वा लोपान्नात्रावग्रह इत्युक्तं कात्यायनेन
15. B1 इतरेतरद्रूपं for तनोतेरेतद्रूपम् ।

वाजि॑नो वाजजितो॒ वाजं॑ꣳ सरि॒ष्यन्त॑ः ।
बृह॒स्पते॑र्भा॒गमव॑ जिघ्रत ॥७ ।(२)॥

वाजि॑नः । वा॒ज॒जि॒त॒ इति॑ वाजऽजित॑ः । वाज॑म् । स॒रि॒ष्यन्त॑ः ।
बृह॒स्पते॑ः । भा॒गम् । अव॑ । जि॒घ्र॒त॒ ॥ घो ॥७॥(२)॥

सा– कात्यायनः – " बार्हस्पत्यमनेनाघ्रापयति वाजिन इति " (काश्रौ १४.३.१०) इति । एनानश्वान् बृहस्पतिदेवताकं चरुमाघ्रापयेत् । पाठस्तु– ' वाजिनो वाजजितो वाजꣳ सरिष्यन्तः । बृहस्पतेर्भागमव जिघ्रत ' इति । ᵛवाजजितः अन्नस्य जेतारः ᵛवाजम् अन्नम् ᵛसरिष्यन्तः गमिष्यन्तः ᵛवाजिनः अश्वाः यूयं ᵛबृहस्पतेः ᵛभागं चरुम् ᵛअवजिघ्रत आघ्राणं कुरुत ॥७॥

[इति दशमेऽध्याये द्वितीयोऽनुवाकः ॥]

आ– बार्हस्पत्यमश्विनो (? अश्वान्) घ्रापयति– ' वाजिनो वाजजितः ' इति । अश्वदेवत्या गायत्री । ᵛवाजिनः अश्वाः ᵛवाजजितः अन्नस्य जेतारः ᵛवाजम् अन्नं प्रति ᵛसरिष्यन्तः गमिष्यन्तः । हे अश्वाः, ᵛबृहस्पतेः ᵛभागं चरुम् ᵛअवजिघ्रत अवघ्राणं कुरुत ॥७॥

[इति दशमेऽध्याये द्वितीयोऽनुवाकः ॥]

[अथ तृतीयोऽनुवाकः]

द्वितीये रथाहरणादिमन्त्रा उक्ताः । तृतीयेऽनुवाके रथचक्रादिरोहणमन्त्रा उच्यन्ते ॥

दे॒वस्य॑ व॒यꣳ स॑वि॒तुः स॒वे स॒त्यस॑वसः ।
बृह॒स्पते॑रुत्त॒मं नाक॑ꣳ रुहे॒मेन्द्र॑स्योत्त॒मं नाक॑ꣳ रुहे॑म ।
दे॒वस्य॑ व॒यꣳ स॑वि॒तुः स॒वे स॒त्यस॑वसः ।
बृह॒स्पते॑रुत्त॒मं नाक॑मरुहा॒मेन्द्र॑स्योत्त॒मं नाक॑मरुहाम ॥१॥

---

5. V1 S1 C आघ्रायाति for आघ्रापयति
7. V1 S1 C om. गमिष्यन्तः ।
15. P1 रथावहरण° for रथाहरण°

दे॒वस्य॑ । व॒यम् । स॒वि॒तुः । स॒वे । स॒त्यस॑वस॒ इति॑ स॒त्यऽस॑वसः ।
बृ॒ह॒स्पते॑ः । उ॒त्त॒ममित्यु॑त्ऽत॒मम् । नाक॑म् । रु॒हे॒म॒ ।
इन्द्र॑स्य । उ॒त्त॒ममित्यु॑त्ऽत॒मम् । नाक॑म् । रु॒हे॒म॒ । अ॒रु॒हा॒म॒ ॥ डुं ॥१॥

सा– कात्यायनः – ' देवस्य वयमिति ब्रह्मा रथचक्रमारोहति। उत्करे नाभिमात्रे स्थाणौ स्थितम् " (द्र. काश्रौ १४·३·१२) इति । उत्करे प्रदेशे निखातस्य नाभिप्रमाणस्य काष्ठस्याग्रे स्थिरं रथचक्रं ब्रह्मा ऋत्विगारोहेत् । पाठस्तु– ' देवस्य वयं सवितुः सवे सत्यसवसः । बृहस्पतेरुत्तमं नाकꣳ रुहेमेन्द्रस्योत्तमं नाकꣳ रुहेम ' इति । ᵛसत्यसवसः सत्यप्रसवस्य सत्याभ्यनुज्ञानस्य ᵛसवितुः सर्वप्रेरकस्य ᵛदेवस्य ᵛसवे अभ्यनुज्ञायां वर्तमानाः ᵛवयम् ᵛबृहस्पतेः संबन्धिनम् ᵛउत्तमम् उत्कृष्टं ᵛनाकं स्वर्गं ᵛरुहेम आरुहेम स्वर्गारोहणं करवाम । तथा ᵛइन्द्रस्य ᵛउत्तमं स्वर्गमारुहेम ॥

कात्यायनः – " देवस्य वयमिति यजुर्मन्त्रयुक्तमारोहति यजमानः " (द्र. काश्रौ १४·३·१५) [इति ॥] देवस्येति मन्त्रयुक्तं रथं यजमान आरोहेत् । पाठस्तु– ' देवस्य वयꣳ सवितुः सवे सत्यसवसः । बृहस्पतेरुत्तमं नाकमरुहामेन्द्रस्योत्तमं नाकमरुहाम ' इति । सत्याभ्यनुज्ञानस्य ᵛसवितुः ᵛदेवस्य प्रसवे वर्तमानाः ᵛवयं ᵛबृहस्पतेः ᵛइन्द्रस्य च संबन्धिनम् ᵛउत्तमं स्वर्गम् ᵛअरुहाम आरुहेम ॥१॥

आ– ब्रह्मा रथचक्रमारोहति ' देवस्य वयम् ' इति । लिङ्गोक्तदेवत्या बृहती । ᵛसत्यसवसः तस्य प्रसवे सत्याभ्यनुज्ञानस्य ᵛसवितुः सर्वेषां प्रसवकर्तुः ᵛदेवस्य ᵛसवे अभ्यनुज्ञायां वर्तमानाः ᵛवयं ᵛबृहस्पतेः संबन्धि(नम्) ᵛउत्तमम् उत्कृष्टं ᵛनाक स्वर्गं ᵛरुहेम आरुहेम स्वर्गारोहणं करवामहै ॥

ब्रह्मा रथचक्रादवतरति– ' देवस्य वयम् ' इति । तथा लिङ्गोक्तदेवत्या बृहती । ᵛसत्यसवसः ᵛसवितुः देवस्य ᵛसवे वर्तमाना वयं ᵛबृहस्पतेः ᵛउत्तमं ᵛनाकम् ᵛअरुहाम अवरोहणं कृतवन्तः । ᵛइन्द्रस्य ᵛउत्तमं ᵛनाकम् ᵛअरुहाम ॥१॥

बृह॑स्पते॒ वाजँ॑ जय॒ बृ॒ह॒स्पत॑ये॒ वाचं॑ꣳ वदत ।
बृ॒ह॒स्पतिं॒ वाजँ॑ जापयत ॥२॥

4- V1 S1 C उत्करं for उत्करे
6. V1 S1 C आरोहयेत् for आरोहेत्
8. V1 S1 C संबन्धि for संबन्धिनम
11. V1 S1 C om. देवस्येति
13. V1 S1 C संबन्धि for संबन्धिनं
15. B1 प्रसवेस्य सत्याभ्यनुज्ञातस्य for तस्य प्रसवे सत्याभ्यनुज्ञानस्य

बृह॑स्पते । वाज॑म् । ज॒य॒ । बृ॒ह॒स्पत॑ये । वाच॑म् । व॒द॒त॒ ।
बृ॒ह॒स्पति॑म् । वाज॑म् । जा॒प॒य॒त॒ ॥ औ ॥२॥

इन्द्र॒ वाजं॑ ज॒येन्द्रा॑य॒ वाचं॑ꣳ वदत ।
इन्द्रं॒ वाजं॑ जापयत ॥३॥

इन्द्र॑ । वाज॑म् । ज॒य॒ । इन्द्रा॑य । वाच॑म् । व॒द॒त॒ ।
इन्द्र॑म् । वाज॑म् । जा॒प॒य॒त॒ ॥ औ ॥३॥

सा– कात्यायनः – " बृहस्पते वाजमित्येकदुन्दुभिमाहन्ति " (काश्रौ १४·३·१५) इति । सप्तदशसु दुन्दुभिषु मध्ये प्रथमं मुख्यं दुन्दुभिमाहन्यात् । पाठस्तु– ' बृहस्पते वाजं जय बृहस्पतये वाचं वदत । बृहस्पतिं वाजं जापयत ॥ इन्द्र वाजं जयेन्द्राय वाचं वदत । इन्द्रं वाजं जापयत ' इति । हे ᵛबृहस्पते, देव, त्वं ᵛवाजम् अन्नं ᵛजय । हे दुन्दुभयः, यूयं ᵛबृहस्पतये अर्थाय इत्थंभूतां ᵛवाचं ᵛवदत । किं च ᵛबृहस्पतिं ᵛवाजम् अन्नं च जेष्याम इति ᵛजापयत उद्वादयत । जप जल्प व्यक्तायां वाचीति धातोर्ण्यन्तस्य रूपम् ॥ हे ᵛइन्द्र, ᵛवाजं ᵛजय । ᵛइन्द्राय इन्द्रार्थम् इत्थंभूतां ᵛवाचं ᵛवदत । हे दुन्दुभयः, ᵛइन्द्रं ᵛवाजं च जेष्याम इति ᵛजापयत उद्वादयत ॥२-३॥

आ– दुन्दुभिमाहन्ति– ' बृहस्पते वाजं जय ' इति । लिङ्गोक्तदेवत्योष्णिक् । हे ᵛबृहस्पते, ᵛवाजम् अन्नं ᵛजय । हे दुन्दुभयः, ᵛबृहस्पतये अर्थाय इत्थंभूतां ᵛवाचं यूयं ᵛवदत ब्रूत । ᵛबृहस्पतिं ᵛवाजं ᵛजापयत वाजमन्नं जेष्यामीति उद्वादयत ॥२॥

दुन्दुभिमवहरति– ' इन्द्र वाजम् ' इति । त्रिपदा गायत्री लिङ्गोक्तदेवत्या । हे ᵛइन्द्र, ᵛवाजं ᵛजय । हे दुन्दुभयः, यूयम् ᵛइन्द्राय इन्द्रार्थे इत्थंभूतां ᵛवाचं ᵛवदत । वाजं जेष्यामीति ᵛइन्द्रं ᵛवाजं ᵛजापयत उद्वादयत ॥३॥

ए॒षा व॒ः सा स॒त्या सं॒वाग॑भूद्य॒या बृह॒स्पतिं॒ वाज॒मजी॑जपत ।
अजी॑जपत॒ बृह॒स्पति॒ꣳ वाच॒ं वन॑स्पतयो॒ वि मु॑ञ्चध्वम् ॥४॥

---

10. P1 बृहस्पत्यर्थमन्नं जयेति for बृहस्पतये अर्थाय इत्थंभूतां; V1 S1 C after वदत add यूयं ब्रूत; V1 S1 C om. किंच;

11. V1 S1 C om. च जेष्याम इति; V1 S1 C om. इति धातोर्ण्यन्तस्य रूपम् [L 12]

12. V1 om. इन्द्राय; P1 om. इन्द्राय ... वदत; V1 S1 C वाजं जेष्यामीति इन्द्रं वाजं for हे दुन्दुभयः ... जेष्याम इति P1 om. उद्वादयत

एषा । वः । सा । सत्या । सँवागिति सम्ऽवाक् । अभूत् ।
यया । बृहस्पतिम् । वाजम् । अजीजपत ।
अजीजपत । बृहस्पतिम् । वाचम् । वनस्पतयः । वि । मुच्यध्वम् ॥ खें ॥४॥

सा– कात्यायनः – “दुन्दुभिमवहरति एषा व इति” (द्र. काश्रौ १४.४.९) इति । पाठस्तु– ‘एषा वः सा सत्या संवागभूद्यया बृहस्पतिं वाजमजीजपत । अजीजपत बृहस्पतिं वाचं वनस्पतये वि मुच्यध्वम्’ इति । हे दुन्दुभयः, यूयं ^{v}बृहस्पतिं ^{v}वाजम् अन्नं ^{v}यया वाचा ^{v}अजीजपत जेष्यामः इत्युद्वादितवन्तः, ^{v}वः युष्मदीया ^{v}सा ^{v}एषा [^{v}संवाक्] समीचीना वाक् ^{v}सत्या यथार्थवादिनी ^{v}अभूत् । हे ^{v}वनस्पतयः हे वनस्पतिविकारा दुन्दुभयः, यस्माद् बृहस्पतिमन्नं जेष्यामीति वदन्तः ^{v}बृहस्पतिं ^{v}अजीजपत वाजजितं च कृतवन्तः तस्मात् ^{v}वाचं ^{v}विमुच्यध्वम् वाग्विमोचनं कुरुत ॥४॥

आ– दुन्दुभिमवहरति– ‘एषा वः’ इति । लिङ्गोक्तदेवत्या त्रिष्टुप् । हे दुन्दुभयः, ^{v}वः युष्माकं संबन्धिनी ^{v}सा ^{v}संवाक् ^{v}सत्या तथ्या यथार्थवादिनी ^{v}अभूत् । ^{v}यया वाचा ^{v}बृहस्पतिं ^{v}वाजम् ^{v}अजीजपत वाजं जेष्यामीति ^{v}बृहस्पतिम् अजीजपत । जपतेर्णिजन्तस्य लुङि एतद्रूपम् । जापितवन्तः उद्वादितवन्त इत्यर्थः । ‘अजीजपत बृहस्पतिं वाजम्’ । यच्च ^{v}वाजं जेष्यामीति वदन्तं ^{v}बृहस्पतिम् ^{v}अजीजपत, तच्च बृहस्पतिना वा जितम् । अतो यूयं कृतकृत्याः सन्तो हे बृहस्पतयः । कार्ये कारणशब्दप्रयोगः । हे वानस्पत्या दुन्दुभयः, ^{v}विमुच्यध्वं विमोचनं कुरुत ॥४॥

देवस्य वयꣳ सवितुः सवे सत्यसवसः ।
बृहस्पतेर्वाजजितो वाजं जेष्म ॥५॥

देवस्य । वयम् । सवितुः । सवे । सत्यसवस इति सत्यऽसवसः ।
बृहस्पतेः । वाजजित इति वाजऽजितः । वाजम् । जेष्म ॥ झौ ॥५॥

---

4. V1 S1 C om. कात्यायनः ... मुच्यध्वमिति [L. 6]
6. V1 S1 C after दुन्दुभयः add – वो युष्माकं संबन्धिनी या संवाक् सत्या तथ्या यथार्थवादिनी अभूत् ; P1 उद्वाजित° for उद्वादित°
8. C S1 यूयं विकाराः यूयं यस्मादन्नं, यूपाविकाराः यूयं यस्मादन्नं for हे वनस्पतिविकाराः ... बृहपातिमन्नं
14. B1 तत्र बृहस्पतिं for तच्च बृहस्पतिना

सा– कात्यायनः – “ ब्रह्माऽवरोहति देवस्य वयमिति ” (द्र. काश्रौ १४·४·८) इति । रथचक्रात् सकाशादवरोहेत् । पाठस्तु– ‘ देवस्य वयꣳ सवितुः सवे सत्यसवसः । बृहस्पतेर्वाजजितो वाजं जेष्म ’ इति । ᵛसत्यसवसः सत्यप्रसवस्य ᵛसवितुः देवस्य प्रसवे अभ्यनुज्ञायां वर्तमाना ᵛवयं ᵛवाजजितः, वाजमन्नं जयतीति वाजजित्, तस्य ᵛबृहस्पतेः संबन्धि ᵛवाजम् अन्नं ᵛजेष्म वयं जितवन्तः ॥५॥

आ– रथमारोहति यजमानः । ‘ देवस्य वयम् ’ इति लिङ्गोक्तदेवत्योष्णिक् । ᵛसत्यसवसः सत्यप्रसवस्य ᵛसवितुः ᵛदेवस्य ᵛसवे अभ्यनुज्ञायां श्रीभगवदाज्ञायां वर्तमाना वयं ᵛबृहस्पतेः ᵛवाजजितः, वाजं जयतीति वाजजित्, तस्य वाजजितः बृहस्पतेः संबन्धि ᵛवाजं ᵛजेष्म ॥५॥

वाजि॑नो॒ वाजं॑ जय॒ताऽध्वं॑न स्क॒भ्नन्तः॑ ।
योजं॑ना॒ मिमा॑ना॒ः काष्ठां॑ गच्छत ॥६॥

वाजि॑नः । वाज॑म् । ज॒य॒त॒ । अध्व॑नः । स्क॒भ्नन्त॑ः ।
योज॑ना । मिमा॑नाः । काष्ठा॑म् । ग॒च्छ॒त॒ ॥ हौ ॥६॥

सा– कात्यायनः– “ वाजिन इति वाचयति ” (काश्रौ १४·३·२२) इति । यजमानं वाचयेत् । पाठस्तु– ‘ वाजिनो वाजं जयताध्वनः स्कभ्नन्तः । योजना मिमानाः काष्ठां गच्छत ’ इति । हे ᵛवाजिनः शीघ्रगामिनोऽश्वाः, यूयं ᵛवाजम् अन्नं ᵛजयत वशीकुरुत । किं च – ᵛअध्वनः मार्गान् ᵛस्कभ्नन्तः स्तम्भयन्तः पीडयन्तः ᵛयोजना यजनानि ᵛमिमानाः परिच्छिन्दन्तः शीघ्रगत्या अल्पानीव कुर्वन्तो यूयं ᵛकाष्ठाम् अध्वसमाप्तिं लक्ष्यस्थानं ᵛगच्छत प्राप्नुत ॥६॥

आ– वाचयति– ‘ वाजिनो वाजम् ’ इति । अश्वदेवत्या गायत्री । हे ᵛवाजिनः अश्वाः, ᵛवाजम् अन्नं ᵛजयत अन्नं वशीकुरुत । ᵛअध्वनः मार्गान् ᵛस्कभ्नन्तः । स्तभि स्कभि प्रतिबन्धे । स्कभनं नामाश्वानां मार्गान् पृष्ठतः कृत्वा पुरोगमनम् । तद्वन्तः स्कभ्नन्तः क्षोभयन्तश्च । ᵛयोजना योजनानि ᵛमिमानाः । माङ् माने । शीघ्रगत्या परिच्छिन्दन्तः शीघ्रगामिनः । ᵛकाष्ठाम् उद्दिष्टां दिशं लक्ष्यस्थानं स्वर्गम् । “ स्वर्गो वै लोकः काष्ठा ” (द्र. तैब्रा १·३·६·५) इति श्रुतेः । वेगेन ᵛगच्छत ॥६॥

ए॒ष स्य वा॒जी क्षि॒प॒णिं तु॑रण्यति ग्री॒वायां॑ ब॒द्धो अ॑पिक॒क्ष आ॒सनि॑ ।
क्रतुं॑ द॒धि॒क्रा अनु॑ स॒न्तवी॑त्वत् प॒थामङ्क॒ांस्यन्वा॒पनी॑फणत् ॥७॥

---

18. B1 प्रतिस्कम्भो for प्रतिबन्धे
19. B1 पृष्ठताः कृतः त्वत्पुरः पुरोगमनं for पृष्ठतः कृत्वा पुरोगमनं

एषः । स्यः । वाजी । क्षिपणिम् । तुरण्यति ।
ग्रीवायाम् । बद्धः । अपिकक्ष इत्यपिऽकक्षे । आसनि ।
क्रतुम् । दधिक्रा इति दधिऽक्राः । अनु । संतवीत्वदिति संऽतवीत्वत् ।
पथाम् । अङ्काꣳसि । अनु । आपनीफणदित्याऽपनीफणत् ॥ धैं ॥७॥

सा– कात्यायनः – "एष स्य इति प्रत्यृचं जुहोत्यनुमन्त्रयतेति वा" (द्र. काश्रौ १४.४.३-४) इति । 'एष स्य वाजी', 'उत स्म' इत्येतन्मन्त्रद्वयेन जुहुयादनुमन्त्रणं वा कुर्यात । तत्राद्यमन्त्रपाठः– 'एष स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि । क्रतुं दधिक्रा अनु संतवीत्वत् पथामङ्काꣳस्यन्वापनीफणत्' इति । ᵛग्रीवायां कक्षे आस्ये च तत्तदुचितरज्जुविशेषैः ᵛबद्धः ᵛएषः ᵛस्यः ᵛवाजी सोऽयमश्वः ᵛक्षिपणिं ᵛतुरण्यति कशां त्वरयति, बहुधावित्वाद्रथं भञ्जयितुमितस्ततो न गच्छति, कशायास्त्वरया शीघ्रम् ऋजु धावतीत्यर्थः । ᵛदधिक्राः धारकान् मार्गावरोधकान् पाषाणादीनप्यतिक्रमन् । ᵛक्रतुं सादिनोऽभिप्रायम् ᵛअनु ᵛसंतवीत्वत् सम्यगनुसंदधानः ᵛपथां मार्गाणाम् ᵛअङ्कांसि लक्षणानि कुटिलानि निम्नोन्नतानि वा । ᵛअन्वापनीफणत् अनुक्रमेण ऋजुत्वं समत्वं वाऽऽपादयन्, ᵛतुरण्यति इति पूर्वत्राऽन्वयः ॥ ७ ॥ ५ १०

आ– 'एष स्य वाजी', 'उत स्म' इति दधिक्रावा अश्वदेवत्ये जगत्यौ । ᵛस्यः इति त्यदो रूपम् । सोऽयं ᵛवाजी वाजवान् । ᵛक्षिपणिं क्षेपणम् । कशाघातम् ᵛअनु ᵛतुरण्यति । तुरण्यतिर्गमनकर्मा । तूर्णमध्वानमश्नुते । कथंभूतः सन् ? इत्यत आह– ᵛग्रीवायां ᵛबद्धः । ᵛअपिकक्षे पर्याणस्थानप्रदेशे सन्नाहरक्षाबद्धः । ᵛआसनि आस्ये मुखे च कविकया बद्धः । ᵛदधिक्राः, वचनव्यत्ययः । दधिक्रा इत्यश्वनाम । अश्वः ᵛक्रतुं, क्रतुरिति कर्म ज्ञानं वा । स्वजात्युचितकर्मज्ञानं क्रतुम् । अत्यर्थमनुसंतनोतीति । ᵛअनु ᵛसंतवीत्वत् स्वोचितव्यापारविस्तरणे सुशिक्षितः ᵛपथाम् अश्वगतिमार्गाणाम् ᵛअङ्काꣳसि पथां कुटिलानि चक्राणि अतिशीघ्रतया क्षिप्रं प्राप्नोतीति । ᵛअन्वापनीफणत् । फण गतौ । अनुपूर्वस्याङ्पूर्वस्य फणतेर्गत्यर्थस्य रूपम् 'अपनीफणत्' इति ॥७॥ १५ २०

उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनु वाति प्रगर्धिनः ।
श्येनस्येव ध्रजतो अङ्कसं परि दधिक्राव्णः सहोर्जा तरित्रतः ॥८॥

---

9. V1 S1 C बहुधा बहुत्वाद् for बहुधावित्वाद्
10. C वारकान् for धारकान्
16. B1 before अपिकक्षे add अपि कक्षे आनद्धयः
18. B1 अश्वनामा for अश्वनाम
21. P1 अन्वाङ्पूर्वस्य फणतेर्गत्यर्थस्य यद्लुकि रूपमिति भाष्यान्तरम्
    for अनुपूर्वस्य ... अपनीफणदिति

उ॒त । स्म॒ । अ॒स्य॒ । द्रव॑तः । तु॒रण्य॒तः ।
प॒र्णम् । न । वेः । अनु॑ । वा॒ति॒ । प्र॒ग॒र्द्धिन॒ इति॑ प्र॒ऽग॒र्द्धिनः॑ ।
श्ये॒नस्ये॒वेति॑ श्ये॒नस्य॑ऽइव । ध्रज॑तः । अ॒ङ्क॒सम् । परि॑ ।
द॒धि॒क्राव्ण॒ इति॑ द॒धि॒ऽक्राव्णः॑ । स॒ह । ऊ॒र्जा । तरि॑त्रतः ॥ ठौँ ॥८॥

---

५ **सा– द्वितीयमन्त्रपाठस्तु– ‘उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनु वाति प्रगर्द्धिनः । श्येनस्येव ध्रजतो अङ्कसं परि दधिक्राव्णः सहोर्जा तरित्रतः’ इति । ᵛउत ᵛस्म आ च ᵛद्रवतः गच्छतः ᵛतुरण्यतः त्वरयतः ᵛप्रगर्द्धिनः अवाधिं प्राप्तुं काङ्क्षन्तः ᵛअस्य अश्वस्य ᵛअङ्कसं शृङ्गारचिह्नं वस्त्रचामरादिकं ᵛपरि सर्वस्मिन्नपि देहे वर्तमानम् ᵛअनु ᵛवाति गच्छन्तमश्वमनु उत्क्षिप्तत्वेन दृश्यमानं गच्छति । कस्य किमिव ? ᵛवेः पक्षिणः ᵛपर्णं ᵛन पक्ष इव । यथा त्वरया गच्छतः पक्षिणः पक्ष उत्क्षिप्तो गच्छन्नवलोक्यते**
१० **तथा धावतोऽश्वस्य अलङ्काररूपवस्त्रचामरादिकं विस्पष्टमवलोक्यते । पक्षिमात्रस्य पर्णमङ्कसं दृष्टान्तत्वेनाभिहितम् । शीघ्रधावने श्येनदृष्टान्त उच्यते– ᵛध्रजतः गच्छतः ᵛश्येनस्येव स्वचामरादिकं ᵛदधिक्राव्णः धारकपर्वताद्यतिक्रामिणः ᵛऊर्जा ᵛसह अत्यन्तबलेन सह ᵛतरित्रतः भृशं तरतोऽश्वस्येति योज्यम् ॥८॥**

आ– ‘उत स्मास्य द्रवतः’ । ᵛउत ᵛस्म अपि च ᵛअस्य यजमानस्य रथे युक्तस्य अश्वस्य ᵛद्रवतः गच्छतः ᵛतुरण्यतः तूर्णमध्वानमश्नुवानस्य । ‘पर्णं न वेरनु वाति प्रगर्द्धिनः’ ।
१५ ᵛदधिक्राव्णः । दधिक्रावेत्यश्वस्य नाम । अश्वस्य । वीति पक्षिनाम । पर्णं पत्रं पक्ष इति पर्यायाः । ᵛपर्णं ᵛन इव पक्षिणः पत्रमिव अश्वस्य संबान्धिना रथेन ᵛवाति शीघ्रं गच्छति ᵛस्म । पक्षिष्वपि दृष्टान्तविशेषमाह – ‘श्येनस्येव’ इति । ᵛध्रजतः, ध्रजतिः परिधावनार्थः, अतिशयेन ध्रजतः परिधावतः श्येनस्य पक्षिविशेषस्य । कथंभूतस्य ? ᵛसह ᵛऊर्जा बलेन सह ᵛतरित्रतः अतिशयेन महदध्वानं (?) तरतः श्येनस्य ᵛअङ्कसं शरीरं गच्छन्तं वायुम् ᵛअनु परिधावति ।
२० तद्वद्यजमानस्यैवंगुणविशिष्टाश्वसंबन्धित्वेन युक्तो रथोऽतिवेगेन परिधावति स्म इति संबन्धः ॥८॥

शं नो॑ भवन्तु वा॒जिनो॒ हवे॑षु दे॒वता॑ता मि॒तद्र॑वः स्व॒र्काः ।
ज॒म्भय॒न्तोऽहिं॒ वृक॒ꣳ रक्षा॑ꣳसि॒ सने॑म्य॒स्मद्यु॑यव॒न्नमी॑वाः ॥९॥

---

10. V1 S1 C om °रूप°
11. C V1 S1 व्रजतो for ध्रजतः; C V1 S1 विदधिक्रान्तो for दधिक्राव्णो;
12. C वारक° for धारक° C S1 भ्रंशतस्ततो; V1 भ्रंशतरतो for भृशं तरतो
15. B1 दधिक्राव्ण इति for दधिक्रावेति; B1 तत्र पक्ष इति पर्ययः for पत्रं पक्ष इति पर्यायाः
17. B1 व्रजतः व्रजतिः (ध्रजतः । ध्रजतिः)
18. B1 अनेन for बलेन

शम् । न॒ः । भ॒व॒न्तु॒ । वा॒जिन॑ः । ह॒वे॑षु ।
दे॒व॒ता॒तेति॑ दे॒वऽता॑ता । मि॒तद्र॑व॒ इति॑ मि॒तऽद्र॑वः । स्व॒र्का॑ इति॑ सु॒ऽअ॒र्का॑ः ।
ज॒म्भय॑न्तः । अहि॑म् । वृक॑म् । रक्षां॑ꣳसि ।
सनै॑मि । अ॒स्मत् । यु॒य॒व॒न् । अमी॑वाः । ॥ टूयें ॥९॥

सा– कात्यायनः – 'उत्तरेण तृचेन चाश्वांस्तौति' (द्र. काश्रौ १४·४·५) इति । तत्रेयं प्रथमा– 'शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः । जम्भयन्तोऽहिꣳ वृकꣳ रक्षाꣳसि सनेम्यस्मद्युयवन्नमीवाः' इति । ᵛवाजिनः अश्वाः ᵛनः अस्माकं ᵛशं सुखकरा ᵛभवन्तु । ᵛहवेषु आह्वानेषु सत्सु, ᵛदेवताता देवतातौ यज्ञे ᵛमितद्रवः, मितं परिमितं द्रवन्ति गच्छन्तीति मितद्रवोऽश्वाः । ᵛस्वर्काः सुरुचः स्वञ्चना वा । ᵛअहिं सर्पं ᵛवृकम् अरण्यश्वानं ᵛरक्षाꣳसि राक्षसांश्च ᵛजम्भयन्तः क्षोभयन्तः । ᵛसनेमि इति पुराणनाम । इह तु क्षिप्रवचनम् । क्षिप्रम् । ᵛअस्मत् अस्मत्तः ᵛअमीवाः रोगान् । यु पृथग्भावे । ᵛयुयवन् वियोजितवन्तः, तादृशाः । 'शं नो भवन्तु' इति संबन्धः ॥१॥

आ– उत्तरेण तृचेनैतानेवाश्वांस्तौति– 'शं नो भवन्तु' इति । वसिष्ठः, अश्वदेवत्या त्रिष्टुप्, विराड् वा । शमिति सुखनाम । ᵛनः अस्माकं ᵛवाजिनः ᵛशं ᵛभवन्तु सुखरूपा भवन्तु । ᵛहवेषु आह्वानेषु सत्सु । ᵛदेवताता, छान्दसं पदम्, देवतातौ देवास्तन्यन्ते विस्तार्यन्ते यत्र सा देवतातिः । तत्र देवतातौ यज्ञे ᵛमितद्रवः, मितं परिमितं द्रवन्ति गच्छन्तीति मितद्रवः अश्वाः । ᵛस्वर्काः सुरुचः स्वञ्चना वा । ᵛजम्भयन्तः, ᵛअहिं सर्पं ᵛवृकं बालभयंकरं ᵛरक्षांसि च जम्भयन्तः । सनेमे (? मी) तिपुराणनाम । इह तु क्षिप्रवचनम्, वाक्यवशात् । ᵛसनेमि क्षिप्रम् ᵛअस्मत् अस्मत्तः ᵛयुयवन् । यु पृथग्भावे । युयवन् पृथग्भावं कुर्वन्त्वित्यर्थः । ᵛअमीवाः, अमीवा व्याधिः, ततः अमीवाः व्याधीन् ᵛयुयवन् पृथक्कुर्वन्तः अश्वाः । 'शं नो भवन्तु' इति संबन्धः ॥ ९ ॥

ते नो॒ अर्व॑न्तो हवन॒श्रुतो॒ हवं॒ विश्वे॑ शृण्वन्तु वा॒जिनो॑ मि॒तद्र॑वः ।
स॒ह॒स्र॒सा मे॒धसा॑ताइव॒ त्मना॑ म॒हो ये धनं॑ꣳ समि॒थेषु॑ ज॒भ्रिरे ॥१०॥

ते । न॒ः । अर्व॑न्तः । ह॒व॒न॒श्रु॒त॒ इति॑ ह॒व॒न॒ऽश्रुत॑ः । हव॑म् ।
विश्वे॑ । शृ॒ण्व॒न्तु॒ । वा॒जिन॑ः । मि॒तद्र॑व॒ इति॑ मि॒तऽद्र॑वः ।
स॒ह॒स्र॒सा इति॑ स॒ह॒स्र॒ऽसाः । मे॒धसा॑ताइ॒वेति॑ मे॒धसा॑तौऽइव । त्मना॑ ।
म॒हः । ये । धन॑म् । स॒मि॒थेष्विति॑ स॒म्ऽइ॒थेषु॑ । ज॒भ्रिरे ॥ फ्रौं ॥१०॥

---

8. V1 S1 C before यज्ञे adds देवास्तन्यन्ते विस्तार्यन्ते यत्र स तथा
9. P1 अस्मदस्मत्तः अमीवाः रोगान् सनेमि क्षिप्रं सनेमेति क्षिप्रनाम for सनेमीति ... रोगान्
   [L 10]
10. V1 S1 C om. यु पृथग्भावे

सा– अथ द्वितीयः – ' ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः। सहस्रसा मेधसाता इव त्मना महो ये धनं समिथेषु जभ्रिरे ' इति । ᵛअर्वन्तः गतिकुशलाः ᵛहवनश्रुतः आह्वानं शृण्वन्तः ᵛवाजिनः अन्नवन्तः ᵛमितद्रवः यजमानचित्तानुकूलतया परिमितगामिनः ᵛविश्वे सर्वेऽपि ᵛते अश्वाः ᵛनः अस्मदीयं हवम् आह्वानं ᵛशृण्वन्तु। ᵛसहस्रसाः सहस्रस्य महतोऽन्नराशेः सनितारो दातारः ᵛये अश्वाः ᵛमेधसाताइव, मेधो यज्ञः, स यत्र सीयते सेव्यते इति मेधसातिर्यज्ञशाला, तस्यामिव । ᵛसमिथेषु संग्रामेषु । ᵛमहः महत् ᵛधनं ᵛत्मना आत्मना स्वकीयबलेन ᵛजभ्रिरे जह्रिरे आहृतवन्तः। ते अश्वा अस्मदीयमाह्वानं शृण्वन्त्विति संबन्धः ॥१०॥

आ– ' ते नो अर्वन्तः ' । नाभानेदिष्ठः । अश्वदेवत्या जगती । ᵛते ᵛअर्वन्तः अश्वाः अस्माकं ᵛहवनश्रुतः, हवनम् आह्वानं शृण्वन्तीति हवनश्रुतः, स्वभावत एव हवनश्रुतः आह्वानं शृण्वन्तः । अतो हे ᵛमितद्रवः यजमानचित्तानुकूलतया परिमितगामिनः । ᵛवाजिनः अश्वाः । ᵛनः अस्माकं ᵛहवं ᵛशृण्वन्तु । ᵛसहस्रसाः, सहस्रबलं स्यन्ति अलं नयन्तीति सहस्रसाः । षणु [दान] कर्मणीत्यस्य रूपम् । सहस्रस्य सनितारः । ᵛमधसातौ, मेघो यज्ञः, स यत्र सीयते संभज्यते सा मेधसातिः, तस्यां ᵛमेधसाताइव यज्ञशालायामिव ᵛसमिथेषु संग्रामेषु ᵛमहः महत् ᵛधनं ᵛत्मना आत्मानम् आत्मबलेन ᵛये ᵛजाभ्रिरे जह्रिरे । ये अश्वाः आहू (? हृ) तवन्तः । ' ते नो अर्वन्तः ' इति संबन्धः ॥१०॥

वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥११॥

वाजेवाज इति वाजेऽवाजे । अवत । वाजिनः । नः ।
धनेषु । विप्राः । अमृताः । ऋतज्ञा इत्यृतऽज्ञाः ।
अस्य । मध्वः । पिबत । मादयध्वम् ।
तृप्ताः । यात । पथिभिरिति पथिऽभिः । देवयानैरिति देवऽयानैः ॥ ध्रें ॥११॥

सा– अथ तृतीयः – ' वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः। अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ' इति । ᵛवाजेवाजे सर्वस्मिन्नन्ने उपस्थिते सति ᵛधनेषु चोपस्थितेषु हे ᵛवाजिनः अश्वाः, ᵛनः अस्मान् ᵛअवत पालयत। ᵛविप्राः मेधाविनः परिदृष्टकारिणः ᵛअमृताः

---

4. V1 S1 C हवन for हवम्
5. V1 S1 C मेध्यो for मेधो
6. C om. जह्रिरे; V1 S1 C आहूतवन्तः for आहृतवन्तः
10. B1 °वित्तानु° for °चित्तानु°
12. B1 शीनयेते for सीयते

अमरणधर्माणः ᵛऋतज्ञाः सत्यज्ञाः अश्वाभिमानिनो देवा यूयम् ᵛअस्य ᵛमध्वः इदं धावनात् पूर्वं पश्चाद्घ्राऽवघ्रायमाणं मधुसमानं नैवारं चरुं ᵛपिबत। पीत्वा च ᵛमादयध्वं तृप्ताः भवत। ᵛतृप्ताः सन्तः ᵛदेवयानैः देवाधिष्ठितैः ᵛपथिभिः मार्गैः ᵛयात गच्छत ॥११॥

आ– 'वाजेवाजे' इति। वसिष्ठः अश्वदेवत्या त्रिष्टुप्। हे ᵛवाजिनः अश्वाः ᵛवाजेवाजे अन्ने अन्ने उपस्थिते ᵛनः अस्मान् ᵛअवत पालयत। ᵛधनेषु उपस्थितेषु नोऽवत। ᵛविप्राः मेधाविनः परिदृष्टकारिणः ᵛअमृताः अमरणधर्माणः ᵛऋतज्ञाः सत्यज्ञाः ᵛअस्य ᵛमध्वः नीवारचरुलक्षणस्य मध्वः मधुनः। कर्मणि षष्ठी। मधु ᵛपिबत। पीत्वा च ᵛमादयध्वं तृप्यध्वम्। अश्वा नैवारं चरुं जिघ्रन्तीत्यभिप्रायः। ᵛतृप्ताः च सन्तः ᵛदेवयानैः देवाधिष्ठितैः ᵛपथिभिः मार्गैः ᵛयात प्रापयत ॥११॥

आ मा॒ वाज॑स्य प्रस॒वो ज॑गम्या॒दे॒मे द्यावा॑पृथि॒वी वि॒श्वरू॑पे।
आ मा॑ गन्तं पितरा मातरा युवमा मा॒ सोमो॑ अमृत॒त्वाय॑ गम्यात् ॥१२॥

आ। मा॒। वाज॑स्य। प्र॒स॒व इति॑ प्र॒ऽस॒वः। ज॒ग॒म्या॒त्।
आ। इ॒मे इती॒मे। द्यावा॑पृथि॒वी इ॒ति॒ द्यावा॑पृ॒थि॒वी। वि॒श्वरू॑पे॒ इति॑ वि॒श्वऽरू॑पे।
आ। मा॒। ग॒न्त॒म्। पि॒त॒रा॒। मा॒त॒रा॒। यु॒वम्।
आ। मा॒। सोम॑ः। अ॒मृ॒त॒त्वायेत्य॑मृ॒त॒ऽत्वाय॑। ग॒म्या॒त् ॥ फः ॥१२॥

सा– कात्यायनः – 'नैवारमालभते तीर्थे स्थितमा मा वाजस्येति' (काश्रौ १४·४·११) इति। तीर्थप्रदेशे स्थापितं नीवारसंबन्धिनं चरुं स्पृशेत्। पाठस्तु– 'आ मा वाजस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे। आ मा गन्तं पितरा मातरा युवमा मा सोमो अमृतत्वाय गम्यात्' इति। ᵛवाजस्य ᵛप्रसवः उत्पत्तिः ᵛमा माम् ᵛआजगम्यात् आगच्छतु। ᵛविश्वरूपे विश्वरूपात्मिके ᵛइमे ᵛद्यावापृथिवी द्यावापृथिव्यावागच्छताम्। ᵛपितरा ᵛमातरा। "पितरा मातरा च छन्दसि" (पा ६·३·३३) इति विरूपैकशेषो निपात्यते। अस्मदीयः पिता माता च ᵛयुवम् युवां चिरभावित्वान्मां प्रत्यागतम्। किं च ᵛसोमः च ᵛअमृतत्वाय मम देवत्वजन्मने मां प्रति ᵛआगम्यात् आगच्छतु ॥१२॥

आ– यजमानो नैवारं चरुमालभते– 'आ मा वाजस्य' इति। प्रजापतिदेवत्या त्रिष्टुप्। ᵛवाजस्य अन्नस्य ᵛप्रसवः अभ्यनुज्ञा ᵛमा मां प्रति ᵛआजगम्यात्। गम्लृ सृप्लृ

---

1. P1 अमर° for अमरण°; V1 S1 C पश्चाद्यावघ्रीय° for पश्चाद्घ्रावघ्राय° [L 2]
20. V1 S1 C om. पितरा मातरा च … निपात्यते [L 21]

गतौ । आगच्छेत् । ᵛआ ᵛइमे ᵛद्यावापृथिवी ᵛविश्वरूपे विश्वरूपात्मिके प्रजापतिरूपे द्यावापृथिव्यौ आगच्छेताम् । ' आ मा गन्तं पितरा मातरा ' । पिता च माता च पितरौ । माता च पिता च मातरौ । " पितरा मातरा च छन्दसि " (पा ६·३·३३) इत्येकशेषः । आकारश्च । ᵛमा मां प्रति ᵛपितरा पितृरूपा द्यौः ᵛमातरा मातृरूपा पृथिवीति वा उभावपि ᵛयुवं युवाम् ᵛआगन्तम् आगच्छतम् । ' आ मा सोमः अमृतत्वाय '। अमृतत्वार्थं ᵛमा मां प्रति ᵛसोमः ᵛआगम्यात् आगच्छतु ॥१२॥

वाजिनो वाजजितो वाजꣳ ससृवाꣳसः ।
बृहस्पतेर्भागमवं जिघ्रत निमृजानाः ॥१३॥

वाजिनः । वाजजित इति वाजऽजितः । वाजम् । ससृवाꣳस इति ससृऽवाꣳसः ।
बृहस्पतेः । भागम् । अव । जिघ्रत । निमृजाना इति निऽमृजानाः ॥ णौ ॥१३॥

सा– कात्यायनः – " यजुर्युक्तानाघ्रापयति वाजिन इति " (काश्रौ १४·४·१२) इति । मन्त्रेण योजितानश्वान् नैवारं चरुमाघ्रापयेत् । पाठस्तु– ' वाजिनो वाजजितो वाजꣳ ससृवाꣳसः । बृहस्पतेर्भागमवजिघ्रत निमृजानाः ' इति । हे ᵛवाजिनः अश्वाः ᵛवाजजितः वाजस्यान्नस्य जेतारः, ᵛवाजम् अन्नं जेतुं ᵛससृवाꣳसः सृतवन्तः गच्छन्तः ᵛनिमृजानाः शुद्धिं कुर्वाणा यूयं ᵛबृहस्पतेः संबन्धिनं ᵛभागं चरुम् ᵛअवजिघ्रत आघ्राणं कुरुत ॥१३॥

[इति दशमेऽध्याये तृतीयोऽनुवाकः ॥३॥]

आ– नैवारमश्वानाघ्रापयति– ' वाजिनो वाजजितः ' इति । अश्वदेवत्या अनुष्टुप् । हे ᵛवाजिनः अश्वाः ᵛवाजजितः वाजस्यान्नस्य जेतारः ᵛवाजम् अन्नं जेतुं ᵛससृवाꣳसः सुप्तवन्तः, ᵛबृहस्पतेः संबन्धिनं ᵛभागं ᵛअवजिघ्रत घ्राणं कुरुत । ᵛनिमृजानाः, मृजु शुद्धौ । शुद्धिं कुर्वाणाः शोधयतेति शेषः ॥१३॥

[इति दशमेऽध्याये तृतीयोऽनुवाकः ॥३॥]

---

14. C S1 ससुवन्तो, V1 सुष्टवन्तो for सृतवन्तः, S1 om: गच्छन्तो
15. S1 C अवघ्राणं for आघ्राणं

[अथ चतुर्थोऽनुवाकः ।]

सा– तृतीयेऽनुवाके रथारोहणादिमन्त्रा उक्ताः । चतुर्थे स्रुवाहुत्यादिमन्त्रा निरूप्यन्ते ॥

आ॒पये॒ स्वाहा॑ स्वा॒पये॒ स्वाहा॑ऽपि॒जाय॒ स्वाहा॒ क्रत॑वे॒ स्वाहा॑ ।
वस॑वे॒ स्वाहा॑ऽह॒र्पत॑ये॒ स्वाहा॑ ।
अह्ने॑ मु॒ग्धाय॒ स्वाहा॑ मु॒ग्धाय॑ वैनꣳशि॒नाय॒ स्वाहा॑
वि॒नꣳशिन॑ आन्त्याय॒नाय॒ स्वाहाऽन्त्या॑य भौ॒व॒नाय॒ स्वाहा॒
भुव॑नस्य॒ पत॑ये॒ स्वाहाऽधि॑पतये॒ स्वाहा॑ ॥१॥

आ॒पये॑ । स्वाहा॑ । स्वा॒पय॒ इति॑ सु॒ऽआ॒पये॑ ।
अ॒पि॒जायेत्य॑पि॒ऽजाय॑ । क्रत॑वे । वस॑वे । अ॒ह॒र्पत॑ये । अ॒ह॒ःपत॒य इत्य॑ह॒ःऽपत॑ये ।
अह्ने॑ । मु॒ग्धाय॑ । मु॒ग्धाय॑ । वै॒न॒ꣳशि॒नाय॑ ।
वि॒न॒ꣳशि॒न॒ इति॑ वि॒ऽन॒ꣳशिने॑ । आ॒न्त्या॒य॒नायेत्या॑न्त्य॒ऽआ॒य॒नाय॑ । अन्त्या॑य । भौ॒व॒नाय॑ ।
भुव॑नस्य । पत॑ये । अधि॑पतय॒ इत्यधि॑ऽपतये ॥ खौं ॥१॥

कात्यायनः – “ द्वादश स्रुवाहुतीर्जुहोत्यापये स्वाहेति प्रतिमन्त्रम् ” (काश्रौ १४·५·१) इति । ‘ आपये स्वाहा ’ इत्यादिभिर्द्वादशभिर्मन्त्रैः प्रत्येकं स्रुवेण द्वादशसंख्याका आहुतीर्जुहुयात् । तन्मन्त्रपाठस्तु– ‘ आपये स्वाहा स्वापये स्वाहाऽपिजाय स्वाहा क्रतवे स्वाहा । वसवे स्वाहाऽहर्पतये स्वाहा । अह्ने मुग्धाय स्वाहा मुग्धाय वैनꣳशिनाय स्वाहा विनꣳशिन आन्त्यायनाय स्वाहाऽन्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाऽधिपतये स्वाहा ’ इति । अत्र संवत्सराभिमानी देवः स्तूयते । आप्नोतीत्यापिस्तस्मै ᵛस्वाहा सुहुतमस्तु । सुशोभनमाप्नोतीति स्वापिस्तस्मै सुहुतमस्तु । पुनः पुनर्जायत इत्यपिजस्तस्मै ᵛस्वाहा । क्रतुः संकल्पो भोगादिविषयो यज्ञो वा तस्मै । ᵛवसवे निवासहेतवे । अह्नां वासराणां पतिरहर्पतिस्तस्मै । मुह वैचित्त्ये । मुह्यतीति मुग्धस्तस्मै ᵛमुग्धाय, ᵛअह्ने अहरभिमानिदेवाय ᵛवैनꣳशिनाय विनाशसंयुक्तेषु वसतीति वैनꣳशिनस्तस्मै, ᵛविनꣳशिने विनाशयुक्ताय । अन्ते अयने भवः आन्त्यायनस्तस्मै । अन्त्ये भव आन्त्यस्तस्मै ᵛआन्त्याय । भुवने भवो भौवनस्तस्मै । तस्य ᵛपतये जगतः पालयित्रे । ᵛअधिपतये सर्वेषां लोकानां स्वामिने ᵛस्वाहा सुहुतमस्तु ॥१॥

आ– द्वादशाप्रीर्जुहोति– ‘ आपये स्वाहा ’ इति ‘ आयुर्यज्ञेन ’ इति च । द्वे प्रजापति-

---

14. P1 तत्र मन्त्र° for तन्मन्त्र°
18. V1 S1 C before पुनः पुनः add अप्सु
20. P1 before मुह्यति adds मोहयति; V1 S1 C om. अह्ने अहरभिमानिदेवाय
22. V1 S1 C om. आन्त्यस्तस्मै; P1 om. second तस्मै

देवत्यानि यजूंषि । ‘ आपये स्वाहा ’ । प्रजापतेः संवत्सरस्य यज्ञस्य चैतानि नामानि । आप्लृ व्याप्तौ । आप्नोतीत्यापिः तस्मै ᵛआपये । सुशोभनमाप्नोतीति स्वापिः, तस्मै ᵛस्वापये ᵛस्वाहा सुहुतमस्तु । अपीति छान्दसः, अप इति कर्मनाम, तत्र अप्सु अपि जायत इत्यपिजः, तस्मै । ᵛक्रतवे, क्रतुः संकल्पो यज्ञो वा, तस्मै । वस निवासे, वस आच्छादने वा । वासयिता वसुः, तस्मै । अह्नां पतिरहर्पतिः, तस्मै । मुह वैचित्ये । मुह्यतीति मुग्धः तस्मै । ᵛअह्ने दिवसाय । अह्ने मुग्धायेत्येकं नाम । ‘ मुग्धाय वैनꣳशिनाय ’ । छान्दसम् । विनाशसंयुक्तेषु वसतीति वैनꣳशिनस्तस्मै ᵛवैनꣳशिनाय । ᵛविनꣳशिने विनाशयुक्ताय । ᵛआन्त्यायनाय । अन्ते अयने भवः आन्त्यायनः, तस्मै आन्त्यायनाय । ᵛअन्त्याय अन्त्ये भवाय । भुवने भवो भौवनः, तस्मै । ᵛभुवन [स्य] ᵛपतये ᵛअधिपतये ᵛस्वाहा सुहुतमस्तु ॥१॥

आयु॑र्य॒ज्ञेन॑ कल्पतां प्रा॒णो य॒ज्ञेन॑ कल्पता॒ं
चक्षु॑र्य॒ज्ञेन॑ कल्पता॒ꣳ श्रोत्रं॑ य॒ज्ञेन॑ कल्पताम् ।
पृ॒ष्ठं य॒ज्ञेन॑ कल्पतां य॒ज्ञो य॒ज्ञेन॑ कल्पताम् ॥२॥

आयु॑ः । य॒ज्ञेन॑ । क॒ल्प॒ता॒म् । प्रा॒णः । चक्षु॑ः । श्रोत्र॑म् ।
पृ॒ष्ठम् । य॒ज्ञः । य॒ज्ञेन॑ । क॒ल्प॒ता॒म् ॥ हम् ॥२॥

सा– कात्यायनः – “ वाचयति वा ॥ षट्चोत्तरानिति । पूर्वान् ” (द्र. काश्रौ १४.५.१-२) इति । पूर्वोक्तमन्त्रान् प्रति उपरितनानां ‘ आयुर्यज्ञेन ’ इत्यादीनां षण्णां मन्त्राणां पृथग्यजमानं वाचयेदिति शेषः । तेषां पाठस्तु– ‘ आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पतां । पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् ’ इति । मदीयम् ᵛआयुः वाजपेयाख्येन ᵛयज्ञेन ᵛकल्पतां क्लृप्तं भवतु । पञ्चवृत्तिकः ᵛप्राणः अध्ययनेन ᵛयज्ञेन क्लृप्तो भवतु । ᵛचक्षुः इन्द्रियं ᵛयज्ञेन क्लृप्तं भवतु । श्रोत्रेन्द्रियं ᵛयज्ञेन क्लृप्तं भवतु । ᵛपृष्ठं रथन्तरादिकं शरीरस्य पृष्ठं वा ᵛयज्ञेन ᵛकल्पताम् । ᵛयज्ञेन मदीयेन वाजपेयाख्येन यज्ञात्मको विष्णुः ᵛकल्पतां क्लृप्तं भवतु ॥२॥

---

1. B1 अशु for आप्लृ
6. B1 विनंशिकः । तस्मै वैनꣳशिकाय for वैनꣳशिनस्तस्मै वेनꣳशिनाय [L 7]
15. P1 om. वा षट्चोत्तरानिति
19. P1 after क्लृप्तं add समर्थं संयुक्तं
20. V1 S1 C श्रोत्रं for श्रोत्रेन्द्रियं; P1 बृहद्रथन्तरा° for रथन्तरा°;
    P1 before शरीरस्य adds क्लृप्तमस्तु; P1 trans. वा before पृष्ठं
21. V1 S1 C om. कल्पतां

आ– ' आयुर्यज्ञेन कल्पताम् ' । मदीयम् 'आयुः अनेन ^{v}यज्ञेन 'कल्पतां क्लृप्तं भवतु । प्राणः पञ्चवृत्तिकः । अनेन वाजपेयाख्येन ^{v}यज्ञेन ^{v}प्राणः ^{v}कल्पतां क्लृप्तो भवतु । ^{v}यज्ञेन ^{v}चक्षुः ^{v}कल्पतां क्लृप्तमस्तु । ^{v}यज्ञेन ^{v}श्रोत्रं क्लृप्तमस्तु । ^{v}यज्ञेन ^{v}पृष्ठं रथन्तरादिकं ^{v}कल्पतां क्लृप्तमस्तु, शरीरस्य पृष्ठं वा । ' यज्ञो यज्ञेन ' । मदीयेन वाजपेयेन यज्ञेन च ^{v}यज्ञः विष्णुः ^{v}कल्पतां क्लृप्तो भवतु ॥२॥

जाय॒ ए॒हि॒ स्वो॒ रोहा॑व । प्र॒जाप॑तेः प्र॒जा अ॑भूम॒
स्व॑र्दे॑वा अगन्मा॒मृता॑ अभूम ॥३॥

जाये॑ । आ । इ॒हि॒ । स्व॒रि॒ति॒ स्वः॑ । रोहा॑व ।
प्र॒जाप॑ते॒रिति॑ प्र॒जाऽप॑तेः । प्र॒जा इति॑ प्र॒ऽजाः । अ॒भू॒म॒ ।
स्वः॑ । दे॒वाः॒ । अ॒ग॒न्म॒ । अ॒मृताः॑ । अ॒भू॒म॒ ॥ द्रीं ॥३॥

सा– कात्यायनः – " निश्रेयणीं यूप उच्छ्रयत्युत्तरां दक्षिणां वा आरोक्ष्यन् जायामामन्त्रयते जाय एहि स्वो रोहावेति " (द्र. काश्रौ १४.५.५-६) । यूपस्य दक्षिणोत्तरभागयोर्निश्रेणीद्वयमुच्छ्रयेत् । तयोरेकतरायामारोहणं कुर्वन् यजमानो भार्यामामन्त्रयेत । हे 'जाये, 'एहि आगच्छ । 'स्वः स्वर्गं 'रोहाव आवाम् आरोहणं करवाव ॥

कात्यायनः – " प्रजापतेरित्यारोहतः " (काश्रौ १४.५.८) इति । पत्नीयजमानावारोहणं कुर्याताम् । पाठस्तु– ' प्रजापतेः प्रजा अभूम ' इति । वयं ^{v}प्रजापतेः संबन्धिन्यः ^{v}प्रजाः संभूताः स्मः ॥

कात्यायनः – " स्वरिति गोधूममालभते "(काश्रौ १४.५.९) गोधूमनिर्मितं चषालं स्पृशेत् । पाठस्तु– ' स्वर्देवा अगन्म ' इति । हे देवाः, वयं, 'स्वः स्वर्गम् ^{v}अगन्म प्राप्ताः ॥

कात्यायनः – " शिरसा यूपमुज्जिहीतेऽमृता इति " (काश्रौ १४.५.१०) इति । मूर्ध्ना यूपमुन्नमयेत । अभूम इति मन्त्रशेषः । पाठस्तु– ' अमृता अभूम ' इति । वयम् 'अमृताः मरणरहिताः ^{v}अभूम संभूताः ॥३॥

---

4. B1 after च add वाजपेयाख्येन
13. P1 आमन्त्रयेत् for आमन्त्रयेत
14. V1 S1 C करवाम for करवाव
17. P1 °निर्मित° for °निर्मितं
20. P1 S1 V1 om. पाठस्तु-अमृता अभूम इति ।

आ– यजमानो जायां यूपमारोहयति– ‘ जाय एहि ’ इति । लिङ्गोक्तदेवत्यं यजुः । हे ᵛजाये, ᵛएहि आगच्छ । ᵛस्वः स्वर्गं ᵛरोहाव आरोहणं करवाव । यूपं यजमान आरोहति– ‘ प्रजापतेः ’ इति। ‘ प्रजापतेः प्रजाः, स्वर्देवाः, अमृताः ’ इति यजूंषि यजमानदेवत्यानि । वयं ᵛप्रजापतेः भगवतः ᵛप्रजाः ᵛअभूम प्रजापतेरपत्यभूताः संजाताः । अनुस्पृशति– ‘ स्वर्देवाः ’ इति । ᵛस्वः ᵛदेवाः स्वर्गं लोकम् ᵛअगन्म गताः । शिरसा यूपमुज्जिहीते– ‘ अमृता अभूम ’ इति । वयम् ᵛअमृताः ᵛअभूम संभूताः ॥३॥

अ॒स्मे॑ वो॑ अस्त्विन्द्रि॒यम॒स्मे नृ॒म्णमु॒त क्रतु॑ः ।
अ॒स्मे वर्चा॑ꣳसि सन्तु वः ॥४॥

अ॒स्मे इत्य॒स्मे । व॒ः । अ॒स्तु॒ । इ॒न्द्रि॒यम् । अ॒स्मे इत्य॒स्मे । नृ॒म्णम् । उ॒त । क्रतु॑ः ।
अ॒स्मे इत्य॒स्मे । वर्चा॑ꣳसि । स॒न्तु॒ । व॒ः ॥ डिं ॥४॥

सा– कात्यायनः – “ अस्मे व इति दिशो वीक्षते ” (काश्रौ १४.५.११) इति । पाठस्तु– ‘ अस्मे वो अस्त्विन्द्रियमस्से नृम्णमुत क्रतुः । अस्मे वर्चांꣳसि सन्तु वः ’ इति । हे दिग्देवताः, ᵛअस्मे अस्मासु ᵛवः युष्मत्संबन्धि ᵛइन्द्रियं सामर्थ्यम् ᵛअस्तु भवतु । ᵛनृम्णं युष्मत्संबन्धि धनम् ᵛअस्मे अस्मासु भवतु । ᵛउत अपि च ᵛक्रतुः अस्मदीयो यज्ञो युष्मदर्थोऽस्तु । ᵛवः युष्मत्संबन्धीनि ᵛवर्चांसि तेजांसि ᵛअस्मे अस्मासु ᵛसन्तु ॥४॥

आ– दिशो वीक्षते– ‘ अस्मे वः ’ इति । यजमानदेवत्या त्रिपदा गायत्री । ᵛअस्मे अस्मासु ᵛवः युष्मत्संबन्धि ᵛइन्द्रियं वीर्यम् ᵛअस्तु भवतु । ‘ अस्मे नृम्णम् ’ । युष्मत्संबन्धि ᵛनृम्णम् धनम् ᵛअस्मे अस्मासु अस्तु । ᵛउत अपि च अस्मदीयः ᵛक्रतुः संकल्पः तत्पूर्वकः यज्ञोऽपि युष्मत्संबन्धी युष्मदर्थोऽस्तु । ᵛवः युष्मत्संबन्धीनि ᵛवर्चांसि ᵛअस्मे अस्मासु ᵛसन्तु ॥४॥

नमो॑ मा॒त्रे पृ॑थि॒व्या इ॒यं ते॒ राड्य॒न्ताऽसि॒ यम॑नः ।
ध्रु॒वो॑ऽसि ध॒रुणः कृ॒ष्यै क्षेमा॑य र॒य्यै पोषा॑य ॥५॥(४)॥

---

1. B1 °देवते for देवत्यं
13. V1 S1 C अस्मत्संबन्धिनं for युष्मत्संबन्धि धनम्
14. V1 S1 C om. च

अन्नहोममन्त्राः]

न॑मः । मा॒त्रे । पृ॒थि॒व्यै । इ॒यम् । ते॒ । राट् । य॒न्ता । अ॒सि॒ । य॑मनः ।
ध्रु॒वः । अ॒सि॒ । ध॒रुण॑ः । कृ॒ष्यै । क्षेमा॑य । र॒य्यै । पोषा॑य ॥ हें ॥५॥(४) ।

सा– " नमो मात्र इति भूमिमवेक्षते " (काश्रौ १४·५·१४) इति । ' पृथिव्यै ' इति मन्त्रशेषः । पाठस्तु– ' नमो मात्रे पृथिव्यै ' इति । ᵛमात्रे मातृरूपायै ᵛपृथिव्यै ᵛनमः नमस्कारोऽस्तु ॥

कात्यायनः – " उत्तरवेदिमपरेणौदुम्बरीमासन्दीमजचर्मणाऽऽस्तृणाति इयं त इति " (द्र. काश्रौ १४·५·१७) इति । उत्तरवेदेः पश्चात्स्थितामुदुम्बरनिर्मितामासन्दीमजसंबन्धिना चर्मणा स्तृणुयात् । ' राट् ' इति मन्त्रशेषः । पाठस्तु– ' इयं ते राट् ' इति । ᵛते तव ᵛइयं ᵛराट् राज्यम् ॥

कात्यायनः – "सुन्वन्तमस्यामुपवेशयति यन्तासीति इति" (काश्रौ १४·५·१८) इति । पाठस्तु– ' यन्ताऽसि यमनः । ध्रुवोऽसि धरुणः कृष्यै क्षेमाय रय्यै पोषाय ' इति । त्वं ᵛयन्ता सर्वस्य नियन्ता ᵛअसि । ᵛयमनः स्वयं यमनकर्ता भवसि । ᵛध्रुवः स्थिरः ᵛअसि । ᵛधरुणः धारकः भवसि । ᵛकृष्यै सकलकृष्यर्थं [ᵛक्षेमाय क्षेमार्थम् ।] ᵛरय्यै ᵛपोषाय धनपुष्ट्यर्थम् । त्वां प्रवेशयामीति शेषः ॥५॥

[इति दशमेऽध्याये चतुर्थोऽनुवाकः ॥४॥]

आ– यजमानः पृथिवीमवेक्षते ' नमो मात्रे ' इति । पृथिवीदेवत्या उष्णिक् । ᵛमात्रे मातृरूपायै ᵛपृथिव्यै ᵛनमः । औदुम्बरीमासन्दीं बस्तचर्मणाऽऽस्तृणाति– ' इयं ते राट् ' इति । आसन्दीदेवत्या गायत्री । हे इन्द्र, ᵛइयं ᵛते तव ᵛराट् राज्यम् यतस्त्वमभिषिक्तोऽसि । सुन्वन्तमस्यामुपवेशयति– ' यन्ताऽसि यमनः ' । ᵛयन्ता नियन्ता ᵛअसि, सर्वस्य नियन्ता त्वमासि । स्वयं यमनकर्ताऽसि । ᵛध्रुवः ᵛअसि स्थिरः असि । ᵛधरुणः धारकः असि । ᵛकृष्यै सफलकृष्यर्थम् । ᵛक्षेमाय क्षेमार्थम् । ᵛरय्यै ᵛपोषाय धनस्य पुष्ट्यर्थम् । त्वां प्रवेशयामीति शेषः ॥५॥

[इति दशमेऽध्याये चतुर्थोऽनुवाकः ॥४॥]

[अथ पञ्चमोऽनुवाकः]

सा– चतुर्थे स्रुवाहुत्यादिमन्त्रा निरूपिताः । पञ्चमेऽनुवाके अन्नहोमा उच्यन्ते ॥

वाज॑स्ये॒मं प्र॑स॒वः सु॑षु॒वेऽग्रे॒ सोम॒ꣳ राजा॑न॒मोष॑धीष्व॒प्सु ।
ता अ॒स्मभ्य॒ं मधु॑मतीर्भवन्तु व॒यꣳ रा॒ष्ट्रे जा॑गृयाम पु॒रोहि॑ताः ॥१॥

---

3. V1 om. मन्त्रशेषः
4. S1 C om. पाठस्तु- नमो मात्रे पृथिव्यै इति
7. V1 oms. –पाठस्तु इयं ते राडिति;
   P1 after राज्यम् । adds इयं ते राज्यमभिषिक्त इति श्रुतेः
15. B1 य इन्द्र for हे इन्द्र

वाजस्य । इमम् । प्रसव इति प्रऽसवः । सुषुवे । सुसुव इति सुसुवे । अग्रे ।
सोमम् । राजानम् । ओषधीषु । अप्स्वित्यप्ऽसु ।
ताः । अस्मभ्यम् । मधुमतीरिति मधुऽमतीः । भवन्तु ।
वयम् । राष्ट्रे । जागृयाम । पुरोहिता इति पुरःऽहिताः ॥ मों ॥१॥

सा– कात्यायनः – “ स्रुवेण संभृतान् जुहोति वाजस्येममिति ” (काश्रौ १४.५.२३) इति । प्रत्यौदुम्बरपात्रे संपादितान् सप्तदशान्नविशेषान् । पाठस्तु– ‘ वाजस्येमं प्रसवः सुषुवेऽग्रे सोमꣳ राजानमोषधीष्वप्सु । ता अस्मभ्यं मधुमतीर्भवन्तु वयꣳ राष्ट्रे जागृयाम पुरोहिताः ’ इति । ᵛवाजस्य अन्नस्य ᵛप्रसवः उत्पादकः प्रजापतिः ᵛअग्रे सृष्ट्यादौ ᵛओषधीषु ᵛअप्सु च संभूतमिमं सोमवल्लीरूपं ᵛराजानं दीप्तिमन्तं पदार्थं ᵛसुषुवे उत्पादयामास । ᵛताः चौषधयश्चापश्च ᵛअस्मभ्यम् अस्मदर्थं ᵛमधुमतीः माधुर्योपेताः ᵛभवन्तु । ᵛवयम् अप्यस्मिन् ᵛराष्ट्रे ᵛपुरोहिताः यागानुष्ठानादौ पुरोगामिनः ᵛजागृयाम जागरूका भूयास्म ॥१॥

आ– ‘ वाजस्येमम् ’ इत्यादयस्तिस्रः प्रजापतिदेवत्यास्त्रिष्टुभः । ᵛओषधीषु ᵛअप्सु वर्तमानम् ᵛइमं ᵛसोमं ᵛराजानं ᵛवाजस्य ᵛप्रसवः ᵛअग्रे प्रथमम् अभ्यनुज्ञा ᵛसुषुवे अभिषुतवान् । या इत्थंभूताः सोमस्य जनयित्र्यः ओषधयः आपः, ᵛताः ᵛअस्मभ्यम् अस्मदर्थं ᵛमधुमतीः मधुमत्यः रसवत्यः ᵛभवन्तु, भोग्या वा भवन्तु । एवं चेत् ᵛपुरोहिताः अग्रतः स्थिताः, प्रधानभूताश्च, अस्मद्धितं पूर्वमेव भरन्तः । ᵛवयं च ताभिरद्भिरभिषिक्ताः सन्तः स्वकीये ᵛराष्ट्रे ᵛजागृयाम । जागृ निद्राक्षये । विनिद्राः अप्रमत्ताः स्याम ॥१॥

वाजस्येदं प्रसव आ बभूवेमा च विश्वा भुवनानि सर्वतः ।
सनेमि राजा परि याति विद्वान् रयिं पुष्टिँ वर्धयमानो अस्मे ॥२॥

वाजस्य । इदम् । प्रसव इति प्रऽसवः । आ । बभूव ।
इमा । च । विश्वा । भुवनानि । सर्वतः ।
सनेमि । राजा । परि । याति । विद्वान् ।
रयिम् । पुष्टिम् । वर्धयमानः । अस्मे इत्यस्मे ॥ ज्यौं ॥२॥

सा– अथ द्वितीयः – ‘ वाजस्येदं प्रसव आ बभूवेमा च विश्वा भुवनानि सर्वतः । सनेमि राजा परि याति विद्वान् रयिं पुष्टिं वर्धयमानो अस्मे ’ इति । ᵛवाजस्य ᵛप्रसवः प्रजापतिः ᵛइदम् अनुष्ठीयमानं

---

6. P1 om. पाठस्तु
8. C V1 S1 भूतम् for संभूतम्

कर्म ᵛआ ᵛबभूव भावितवानुत्पादितवान् । किं च ᵛइमा इमानि सर्वाणि भूतानि ᵛसर्वतः उत्पादितवान् । स प्रजापतिः ᵛसनेमि चिरन्तनः ᵛराजा दीप्तः सन् ᵛविद्वान् स्वाधिकारं जानन् ᵛअस्मे अस्माकं ᵛरयिं धनं ᵛपुष्टिं प्रजादिपुष्टिं ᵛवर्धयमानः अभिवृद्धिं गमयन् परितः सर्वतः ᵛयाति स्वेच्छया गच्छति ॥ (२)

आ– ‘ वाजस्येदं प्रसवः ’। ᵛवाजस्य अन्नस्य संबन्धी ᵛप्रसवः, तत्र अन्नानुग्रहकारणरूपः, अभ्यनुज्ञा । ᵛइदं विश्वम् ᵛआबभूव ब्रह्मरूपेण प्रथमं संबभूव । ᵛइमा ᵛच ᵛविश्वा भूतानि ᵛभुवनानि च ᵛसर्वतः आबभूव । ᵛसनेमि इति पुराणवचनः । योऽयमन्नस्य प्रसवः स चिरन्तनः ᵛराजा दीप्तः सन् ᵛपरि ᵛयाति सर्वतः ᵛसर्वान् परियाति। स्वेच्छाचारी सन् ᵛविद्वान् स्वाधिकारं जानन् ᵛअस्मे अस्माकं ᵛरयिं धनं ᵛपुष्टिं ᵛवर्धयमानः अभिवृद्धिं गमयन् परि यातीति संबन्धः ॥२॥

वाज॑स्ये॒मां प्र॑स॒वः शि॑श्रिये॒ दिव॑मि॒मा च॒ विश्वा॒ भुव॑नानि स॒म्राट् ।
अदि॑त्सन्तं दापयति प्रजा॒नन्त्स नो॑ र॒यिꣳ सर्व॑वीरं॒ नि य॑च्छतु ।।३।।

वाज॑स्य । इ॒माम् । प्र॒स॒व इति॑ प्र॒ऽस॒वः । शि॒श्रि॒ये॒ । दिव॑म् ।
इ॒मा । च॒ । विश्वा॑ । भुव॑नानि । स॒म्राळिति॑ स॒म्ऽराट् ।
अदि॑त्सन्तम् । दा॒प॒य॒ति॒ । प्र॒जा॒नन्निति॑ प्र॒ऽजा॒नन् ।
सः । न॒ः । र॒यिम् । सर्व॑वीर॒मिति॒ सर्व॑ऽवीरम् । नि । य॒च्छ॒तु॒ ॥ द्यौं ॥३॥

सा– अथ तृतीयः – ‘वाजस्येमां प्रसवः शिश्रिये दिवमिमा च विश्वा भुवनानि सम्राट् । अदित्सन्तं दापयति प्रजानन्त्स नो रयिꣳ सर्ववीरं नि यच्छतु ’ इति । ᵛवाजस्य अन्नस्य ᵛप्रसवः ईश्वरः ᵛइमां पृथिवीं ᵛदिवं द्युलोकं ᵛच ᵛइमा इमानि विश्वानि च सर्वाण्यन्यानि च ᵛभुवनानि ᵛशिश्रिये आश्रितवान् । ᵛसः च ᵛसम्राट् सर्वेषां भुवनानां राजा भूत्वा ᵛअदित्सन्तं हविर्दातुमनिच्छन्तं मां ᵛप्रजानन् अवगच्छन् अस्मदीयबुद्धिप्रेरणेन हविः ᵛदापयति । ततः ᵛनः अस्मभ्यं ᵛसर्ववीरं सर्वैर्वीरैः पुत्रभृत्यादिभिर्युक्तं ᵛरयिं धनं ᵛनियच्छतु नियमेन ददातु ॥३॥

---

1. P1 om. इमा
2. V1 S1 C सनेमिश्° for सनेमि; P1 after चिरंतनः ins. सनेमीति पुराणवचन
7. B1 पर्याति for first परियाति
8. B1 पर्यातीति for परियातीति
18. V1 S1 C अतित्सन्तम् for आदित्सन्तं; C इच्छन्तं for अनिच्छन्तं
19. V1 S1 C वीरैः,
20. P1 om. रयिं

आ– ‘ वाजस्येमाम् ’ इति । यस्य ᵛवाजस्य अन्नस्य ᵛप्रसवः संबन्धी, प्रसवः अभ्यनुज्ञा [नम्] । ᵛसम्राट् दीप्तो यः, प्रसवः ईश्वरः ᵛइमां पृथिवीं ᵛदिवं द्युलोकं च, ᵛइमा ᵛच इमानि विश्वानि ᵛभुवनानि च भूतानि च ᵛशिश्रिये, अतिशयेनाश्रयति । करणात्मना यः प्रजापतिः सम्राडाश्रयति । ‘ अदित्सन्तं दापयति ’ । दातुमिच्छन् दित्सन्, दातुमनिच्छन्नदित्सन्, तम् ᵛअदित्सन्तं ᵛप्रजानन् अवगच्छन् प्रदापयति, धर्मार्थदानं कारयति, यः ᵛसः ᵛनः अस्मभ्यं ᵛसर्ववीरं, पुत्रादयः सर्वे वीरा यस्य सः, तम् सर्ववीरसंयुक्तं ᵛरयिं धनं ᵛनियच्छतु ददातु ॥३॥

अग्ने॒ अच्छा॑ वदे॒ह न॒ः प्रति॑ नः सु॒मना॑ भव ।
प्र नो॑ यच्छ सहस्रजि॒त् त्वꣳ हि ध॑न॒दा असि॑ ॥४॥

अग्ने॑ । अच्छ॑ । व॒द॒ । इ॒ह । न॒ः । प्रति॑ । न॒ः । सु॒म॒ना इति॑ सु॒ऽमना॑ः । भ॒व॒ ।
प्र । न॒ः । य॒च्छ॒ । स॒ह॒स्र॒जि॒दिति॑ सहस्रऽजित् ।
त्वम् । हि । ध॒न॒दा इति॑ ध॒न॒ऽदाः । असि॑ ॥ णैं ॥४॥

सा– अथ चतुर्थः – ‘ अग्ने अच्छा वदेह नः प्रति नः सुमना भव । प्र नो यच्छ सहस्रजित् त्वं हि धनदा असि ’ इति । हे ᵛअग्ने, ᵛइह अस्मिन् कर्मणि ᵛनः अस्माकम् ᵛअच्छ आभिमुख्येन ᵛवद हितं ब्रूहि । ᵛनः अस्मान् प्रति ᵛसुमनाः करुणार्द्रचित्तः ᵛभव । हे ᵛसहस्रजित् सहस्राणां जेतः, ᵛहि यस्मात् ᵛत्वं स्वभावतः ᵛधनदाः ᵛअसि, अतस्त्वं ᵛनः अस्मभ्यं धनं ᵛप्रयच्छ देहि ॥४॥

आ– ‘ अग्ने अच्छा ’ इति । त्रितापसः ऋषिः । अग्निदेवत्यानुष्टुप् । हे ᵛअग्ने, ᵛअच्छा निर्मला मलविरोधिन् ᵛनः अस्माकं ᵛवद ब्रूहि । ᵛइह अत्र स्थितानस्मान् प्रति ᵛसुमनाः शोभनमनस्कः ᵛभव । हे ᵛसहस्राजित् सहस्राणां जेतः, यतः ᵛत्वं स्वभावतः ᵛधनदाः ᵛअसि, अतस्त्वं ᵛनः अस्मभ्यं धनं ᵛप्रयच्छ ॥४॥

---

1. B1 संबन्धः (संबन्धी), B1 प्रसवोऽभ्यापाहितः । यः सम्राट् । सस्वरं मन्त्रः । ईश्वरः for प्रसवः ... ईश्वरः [L 2]
6. B1 पुत्रादेः वीराः सर्वे वीराः for पुत्रादयः सर्वे वीराः
14. P1 अच्छा वद for अच्छ
15. V1 S1 C भवेह for भव हे; V1 S1 C जेता for जेतः
16. P1 च for त्वं
18. B1 निर्मला पापापन्नानां पापविमलविरोधिन् for निर्मला मलाविरोधिन्

सोम॒ꣳ राजा॑न॒मव॑से॒ऽग्निम॒न्वार॑भामहे ।
आ॒दि॒त्यं विष्णु॒ꣳ सूर्यं॑ ब्र॒ह्माणं॑ च॒ बृह॒स्पति॑म् ॥५॥

सोम॑म् । राजा॑नम् । अव॑से । अ॒ग्निम् । अ॒न्वार॑भामह॒ इत्य॑नु॒ऽआर॑भामहे ।
आ॒दि॒त्यम् । विष्णु॑म् । सूर्य॑म् । ब्र॒ह्माण॑म् । च॒ । बृह॒स्पति॑म् ॥ यां ॥५॥

सा– अथ पञ्चमः – ' सोमꣳ राजानमवसेऽग्निमन्वारभामहे । आदित्यं विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिम् ' इति । ᵛअवसे रक्षणार्थं ᵛसोमं ᵛराजानम् ᵛअग्निं च ᵛअन्वारभामहे यजमानार्थमन्वारम्भणं करवामहे । किं च ᵛआदित्यम् अखण्डितशक्तेराविर्भूतं ᵛविष्णुं सर्वव्यापिनं ᵛसूर्यं सर्वप्रेरकं ᵛब्रह्माणं ᵛबृहस्पतिं बृहतां मन्त्राणां पालकमित्येतान् देवान् प्रत्येकम् अन्वारभामहे इति संबन्धः ॥५॥

आ– ' सोमꣳ राजानम् ' इति । लिङ्गोक्तदेवत्याऽऽनुष्टुप् । ᵛसोमं ᵛराजानम् ᵛअग्निं च ᵛअन्वारभामहे यजमानार्थमन्वारम्भणं करवामहे । ᵛअवसे रक्षणाय तर्पणाय वा ᵛआदित्यम् अखण्डितशक्तेराविर्भूतं ᵛविष्णुं सर्वव्यापिरूपं ᵛसूर्यं सर्वप्रेरकं ᵛब्रह्माणं परब्रह्मरूपं चतुर्मुखं वाचस्पतिं (? ᵛबृहस्पतिं) प्रत्येकम् अन्वारभामहे इति संबन्धः ॥५॥

प्र नो॑ यच्छत्वर्य॒मा प्र पूषा प्र सर॑स्वती ।
प्र वाग्दे॒वी द॑दातु नः ॥६॥

प्र । न॒ः । य॒च्छ॒तु॒ । अ॒र्य॒मा । प्र । पू॒षा । प्र । सर॑स्वती ।
प्र । वाक् । दे॒वी । द॒दा॒तु॒ । न॒ः ॥ षीं ॥६॥

सा– अथ षष्ठः – ' प्र नो यच्छत्वर्यमा प्र पूषा प्र सरस्वती । प्र वाग्देवी ददातु नः ' इति । ᵛअर्यमा एतन्नामकः सूर्योऽस्मदभिलषितमर्थं ᵛप्रयच्छतु । ᵛपूषा प्रयच्छतु । ᵛसरस्वती विशिष्टज्ञानोपेता एतन्नामिका देवी ᵛनः अस्मदभिलषितं धनं प्रयच्छतु । वागभिमानिनी ᵛदेवी च ᵛप्रददातु ॥६॥

आ– ' प्र नो यच्छतु ' इति । लिङ्गोक्तदेवत्या गायत्री । ᵛनः अस्मभ्यम् ᵛअर्यमा सूर्यः अस्मदभिलषितमर्थं ᵛप्रयच्छतु । [ᵛपूषा] ᵛसरस्वती च प्रयच्छतु । ᵛवाक् ᵛदेवी ᵛनः अस्मभ्यं ददातु ॥६॥

अ॒र्य॒म॒णं बृह॒स्प॒ति॒मिन्द्रं॒ दाना॑य चोदय ।
वा॒चं विष्णु॒ꣳ सर॑स्वतीꣳ स॒वि॒तारं॑ च वा॒जिन॑म् ॥७॥

अ॒र्य॒मण॑म् । बृह॒स्पति॑म् । इन्द्र॑म् । दाना॑य । चो॒द॒य॒ ।
वाच॑म् । विष्णु॑म् । सर॑स्वतीम् । स॒वि॒तार॑म् । च॒ । वा॒जिन॑म् ॥ अं ॥७॥

सा– अथ सप्तमः – ‘ अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय । वाचं विष्णुं सरस्वतीं सवितारं च वाजिनम् ’ इति । हे ईश्वर, त्वम् अर्यमादीन् देवान् ᵛदानाय धनप्रदानार्थं ᵛचोदय प्रेरय । ᵛसवितारं सर्वस्य प्रसवकर्तारं ᵛच ᵛवाजिनम् अन्नवन्तं देवताश्वं वा ॥७॥

आ– ‘ अर्यमणं बृहस्पतिम् ’ इति । लिङ्गोक्तदेवत्यानुष्टुप् । ᵛअर्यमणं श्रेष्ठतमम् । ᵛदानाय दानार्थं यजमानापेक्षितफलस्य प्रदानार्थं च ᵛचोदय प्रेरय । बृहतो देवस्य पतिं ᵛबृहस्पतिम् । ᵛइन्द्रं परमैश्वर्ययुक्तं दानाय चोदय । चुद प्रेरणे । प्रेरय । वक्तीति, वाच्यतेऽनयेति वा वाक् ताम् । ᵛविष्णुं सर्वव्यापिनम् । ᵛसरस्वतीं विशिष्टज्ञानलक्षणसरोवतीम् । ᵛसवितारं सर्वस्य प्रसवकर्तारम् । ᵛवाजिनं वाजवन्तम् अश्वं अश्वाख्यदैवतम् । चोदयेति संबन्धः ॥७॥

दे॒वस्य॑ त्वा स॒वि॒तुः प्र॑स॒वे॒ऽश्विनो॑र्बा॒हुभ्यां॑ पू॒ष्णो हस्ता॑भ्याम् ।
सर॑स्वत्यै॑ वा॒चो य॒न्तुर्यै॒ तु॒र्यं॑ दधामि ।
बृ॒ह॒स्पते॑ष्ट्वा॒ साम्रा॑ज्येना॒भि षि॑ञ्चा॒मीन्द्र॑स्य त्वा॒ साम्रा॑ज्येना॒भि षि॑ञ्चामि ॥८॥

सर॑स्वत्यै । वा॒चः । यन् । तु॒र्यै॑ । तु॒र्य॑म् । द॒धा॒मि॒ ।
बृ॒ह॒स्पतेः॑ । त्वा॒ । साम्रा॑ज्ये॒नेति॒ साम्ऽरा॑ज्येन । अ॒भि । सि॒ञ्चा॒मि॒ ।
इन्द्र॑स्य । त्वा॒ । साम्रा॑ज्ये॒नेति॒ साम्ऽरा॑ज्येन । अ॒भि । सि॒ञ्चा॒मि॒ ॥ ढयें ॥८॥(५)॥

सा– कात्यायनः – “ शेषेणाभिषिञ्चति यजमानं देवस्य त्वा ” (काश्रौ १४.५.२२) इति । होमानन्तरमौदुम्बरपात्रस्थेन सप्तदशान्नपयोमिश्रोदकशेषेण यजमानमभिषिञ्चेत् । पाठस्तु– ‘ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । सरस्वत्यै वाचो यन् तुर्यै तुर्यं दधामि । बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चामीन्द्रस्य त्वा साम्राज्येनाभिषिञ्चामि ’ इति । ‘ देवस्य त्वा ’ इत्यादि गतम् । ᵛसरस्वत्यै सरस्वत्याः वाग्देवतायाः ᵛवाचः ᵛयन् तन्माहात्म्यप्रकाशकानि स्तोत्ररूपाणि वचांसि गच्छन् प्राप्नुवन् स्तुवन्नहं ᵛतुर्यै तदीये वर्णाभिव्यक्तिरूपे वचसि ᵛतुर्यम् अभिव्यक्तिवर्णात्मकं परादिविवक्षया चतुर्थं स्तुतिरूपं वचः ᵛदधामि स्थापयामि । हे अभिषिच्यमान यजमान, ᵛत्वा त्वां ᵛबृहस्पतेः देवस्य ᵛसाम्राज्येन सद्भावेन ᵛअभिषिञ्चामि । एवमुत्तरवाक्येऽपि योज्यम् । ‘ इन्द्रस्य ’ इति तत्र विशेषः ॥८॥(५)॥

[इति दशमेऽध्याये पञ्चमोऽनुवाकः]

---

3. V1 S1 C om. देवताश्वं; V1 S1 C च for वा
20. V1 S1 C om. स्तुवन्
21. C च चोदयामि for वचो दधामि

आ– अथैनं परिशिष्टेनाभिषिञ्चति– ‘ देवस्य त्वा ’ इति । व्याख्यातः । एवं सुन्वन्तं परिशिष्टेनाभिषिञ्चति– ‘ सरस्वत्यै वाचः ’ इति । लिङ्गोक्तदेवत्या बृहती । ᵛसरस्वत्यै सरस्वत्यां ᵛवाचः ᵛयन् वाचोनियमनविवक्षितविषये शक्तितात्पर्ये कल्पयन् ᵛतुर्यं वाचः तुरीयं ᵛतुर्ये परमैश्वर्यरूपे कल्पयन् तत्रैव ᵛदधामि स्थापयामि । अथवा सरस्वत्यै वाचस्तुरीयमिति–

वैखरी वर्णनिष्पत्तिर्मध्यमा श्रुतिगोचरा ।
द्योतितार्था न पश्यन्ती सूक्ष्मा वागनपायिनी ॥

इति वचनात् । अनपायिनीं सूक्ष्मां ज्ञाज्ञशक्तिरूपिणीमारभ्य गणने वैखरी या चतुर्थी भवति–

“चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ”॥
(ऋसं० १.१६४.४५)

इति श्रुतेश्च । ᵛबृहस्पतेः संबन्धिना ᵛसाम्राज्येन सम्राड्भावेन त्वाम् ᵛअभिषिञ्चामि । ᵛइन्द्रस्य ᵛसाम्राज्येन च त्वाम् ᵛअभिषिञ्चामि ॥८॥

[इति दशमेऽध्याये पञ्चमोऽनुवाकः ॥५॥]

[अथ षष्ठोऽनुवाकः]

सा– पञ्चमेऽनुवाकेऽन्नहोमा उक्ताः । षष्ठेऽनुवाके उज्जितिमन्त्रा उच्यन्ते ॥

अ॒ग्निरेका॑क्षरेण प्रा॒णमुद॑जय॒त् तमुज्जे॑षमा॒श्विनौ॒
द्व्य॑क्षरेण द्वि॒पदौ॑ मनु॒ष्या॒नुद॑जयता॒ं तानुज्जे॑षम् ।
विष्णु॒स्त्र्य॑क्षरे॒ण त्रीनि॒माँल्लो॒कानुद॑जय॒त् तानुज्जे॑ष॒ꣳ
सोम॒श्चतु॑रक्षरे॒ण चतु॑ष्पदः प॒शूनुद॑जय॒त् तानुज्जे॑षम् ॥१॥

अ॒ग्निः । एका॑क्षरे॒णेत्येक॑ऽअक्षरेण । प्रा॒णम् । उत् । अ॒ज॒य॒त् । तम् । उत् । जे॒ष॒म् ।
अ॒श्विनौ॑ । द्व्य॑क्षरे॒णेति॒ द्वि॒ऽअ॑क्षरेण । द्वि॒पद॒ इति॑ द्वि॒ऽपदः॑ । म॒नु॒ष्या॑न् । उत । अ॒ज॒य॒ता॒म् ।
तान् । उत् । जे॒ष॒म् ।
विष्णु॑ः । त्र्य॑क्षरे॒णेति॒ त्रिऽअ॑क्षरेण । त्रीन् । इ॒मान् । लो॒कान् । उत् । अ॒ज॒य॒त् ।
तान् । उत् । जे॒ष॒म् ।
सोम॑ः । चतु॑रक्षरे॒णेति॒ चतुः॑ऽअक्षरेण । चतु॑ष्पदः । चतुः॑पद॒ इति॒ चतुः॑ऽपदः ।
प॒शून् । उत् । अ॒ज॒य॒त् । तान् । उत् । जे॒ष॒म् ॥ खें ॥१॥

---

3. B1 चावः तुरियं सत्वं तार्य for वाचः तुरीयं तुर्ये

पूषा पञ्चाक्षरेण पञ्च ऋतूनुदजयत् तानुज्जैषꣳ
सविता षळक्षरेण षळृतूनुदजयत् तानुज्जैषम् ।
मरुतः सप्ताक्षरेण सप्त ग्राम्यान् पशूनुदजयꣳस्तानुज्जैषं
बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत् तामुज्जैषम् ।।२।।
मित्रो नवाक्षरेण त्रिवृतꣳ स्तोममुदजयत् तमुज्जैषꣳ
वरुणो दशाक्षरेण विराजमुदजयत् तामुज्जैषम् ।
इन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयत् तामुज्जैषं
विश्वे देवा द्वादशाक्षरेण जगतीमुदजयꣳस्तामुज्जैषम् ।।३।।

पूषा । पञ्चाक्षरेणेति पञ्चऽअक्षरेण । पञ्च । ऋतून् । उत् । अजयत् ।
तान् । उत् । जेषम् ।
सविता । षळक्षरेणेति षट्ऽअक्षरेण । षट् । ऋतून् । उत् । अजयत् ।
तान् । उत् । जेषम् ।
मरुतः । सप्ताक्षरेणेति सप्तऽअक्षरेण । सप्त । ग्राम्यान् । पशून् । उत् । अजयन् ।
तान् । उत् । जेषम् ।
बृहस्पतिः । अष्टाक्षरेणेत्यष्टऽअक्षरेण । गायत्रीम् । उत् । अजयत ।
ताम् । उत् । जेषम् ।। श्वे ।।२।।
मित्रः । नवाक्षरेणेति नवऽअक्षरेण । त्रिवृतमिति त्रिऽवृतम् । स्तोमम् । उत् । अजयत् ।
तम् । उत् । जेषम् ।
वरुणः । दशाक्षरेणेति दशऽअक्षरेण । विराजमिति विऽराजम् । उत् । अजयत् ।
ताम् । उत् । जेषम् ।
इन्द्रः । एकादशाक्षरेणेत्येकादशऽअक्षरेण । त्रिष्टुभम् । त्रिस्तुभमिति त्रिऽस्तुभम् । उत् । अजयत् ।
ताम् । उत् । जेषम् ।
विश्वे । देवाः । द्वादशाक्षरेणेति द्वादशऽअक्षरेण । जगतीम् । उत् । अजयन् ।
ताम् । उत । जेषम् ।। ईर्युः ३३ ।।३।।

वसवस्त्रयोदशाक्षरेण त्रयोदशꣳ स्तोममुदजयꣳस्तमुज्जेषꣳ
रुद्राश्चतुर्दशाक्षरेण चतुर्दशꣳ स्तोममुदजयꣳस्तमुज्जेषम् ।
आदित्याः पञ्चदशाक्षरेण पञ्चदशꣳ स्तोममुदजयꣳस्तमुज्जेषमदितिः
षोळशाक्षरेण षोळशꣳ स्तोममुदजयत् तमुज्जेषम् ।
प्रजापतिः सप्तदशाक्षरेण सप्तदशꣳ स्तोममुदजयत् तमुज्जेषम् । (४)॥६॥
॥ हरिः ॐ ॥

वसवः । त्रयोदशाक्षरेणेति त्रयोदशऽअक्षरेण । त्रयोदशमिति त्रयःऽदशम् । स्तोमम् ।
उत् । अजयन् । तम् । उत् । जेषम् ।
रुद्राः । चतुर्दशाक्षरेणेति चतुर्दशऽअक्षरेण । चतुर्दशमिति चतुःऽदशम् । स्तोमम् ।
उत् । अजयन् । तम् । उत् । जेषम् ।
आदित्याः । पञ्चदशाक्षरेणेति पञ्चदशऽअक्षरेण । पञ्चदशमिति पञ्चऽदशम् । स्तोमम् ।
उत् । अजयन् । तम् । उत् । जेषम् ।
अदितिः । षोळशाक्षरेणेति षोळशऽअक्षरेण । षोळशम् । स्तोमम् । उत् । अजयत् ।
तम् । उत् । जेषम् ।
प्रजापतिरिति प्रजाऽपतिः । सप्तदशाक्षरेणेति सप्तदशऽअक्षरेण ।
सप्तदशमिति सप्तऽ- दशम् । स्तोमम् । उत् । अजयत् । तम् । उत् । जेषम् ॥
फ्वॄ ३ ३ ॥(४)॥६॥

[देव सवितः षट् ॥६॥ इन्द्रस्य वज्रः सप्त ॥७॥ देवस्य वयस्त्रयोदश ॥१३॥ आपये पञ्च ॥५॥ वाजस्येममष्ट ॥८॥ अग्निरेकाक्षरेण चतस्रः ॥४॥ षळनुवाकेषु त्रयश्चत्वारिꣳशत् ॥४३॥ देवसवितरिमꣳस्तनं त्रयश्चत्वारिꣳशत् ॥४३॥ हरिः ॐ ॥]

कात्यायनः – " अग्निरेकाक्षरेणेत्यनुवाकम् " (काश्रौ १४.५.२६) इति । वाचयतीति शेषः । पाठस्तु– ' अग्निरेकाक्षरेण प्राणमुदजत् तमुज्जेषमश्विनौ द्व्यक्षरेण द्विपदो मनुष्यानुदजयतां तानुज्जेषम् । विष्णुस्त्र्यक्षरेण त्रीनिमाँल्लोकानुदजयत्तानुज्जेषꣳ सोमश्चतुरक्षरेण चतुष्पदः पशूनुदजयत् तानुज्जेषम् ' ॥१॥ ' पूषा पञ्चाक्षरेण पञ्च ऋतूनुदजयत्तानुज्जेषꣳ सविता षळक्षरेण षळृतूनुदजयत्तानुज्जेषम्॥ मरुतः सप्ताक्षरेण सप्त ग्राम्यान् पशूनुदजयꣳस्तानुज्जेषं बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत्तामुज्जेषम् ' ॥२॥ ' मित्रो नवाक्षरेण त्रिवृतꣳ स्तोममुदजयत्तमुज्जेषं वरुणो दशाक्षरेण विराजमुदजयत्तामुज्जेषम् । इन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयत्तामुज्जेषं विश्वे देवा द्वादशाक्षरेण जगतीमुदजयꣳस्तामुज्जेषम् ' ॥३॥ ' वसवस्त्रयोदशाक्षरेण त्रयोदशꣳ स्तोममुदजयꣳस्तमुज्जेषꣳ रुद्राश्चतुर्दशाक्षरेण चतुर्दशꣳस्तोममुदजयꣳस्तमुज्जेषम् । आदित्याः पञ्चदशाक्षरेण पञ्चदशꣳ स्तोममुदजयꣳस्तमुज्जेषमदितिः षोळशाक्षरेण षोळशꣳ स्तोममुदजयत्तमुज्जेषम् ।

प्रजापतिः सप्तदशाक्षरेण सप्तदशꣳ स्तोममुदजयत्तमुज्जेषम् ' ॥४॥ इति ॥ ' ॐ श्रावय ' इत्यादि सप्तदशाक्षरात्मकप्रजापतिरधिदैवमधियज्ञं च समासव्यासाभ्यामुज्जीयते । ᵛअग्निः ᵛएकाक्षरेण छन्दसा पञ्चवृत्तिकं ᵛप्राणम् ᵛउदजयत् उत्कृष्टं जयं लब्धवान् । तथाऽहमपि तादृशं ᵛतं प्राणम् ᵛउज्जेषम् उत्कृष्टतया जयेयम्, वशीकुर्यामित्यर्थः । ᵛअश्विनौ देवौ ᵛद्व्यक्षरेण अक्षरद्वयात्मकेन छन्दसा ᵛद्विपदः पादद्वयोपेतान् ᵛमनुष्यान् ᵛउदजयताम् उत्कृष्टं जयं लब्धवन्तौ । तथाऽहमपि तेनैव द्व्यक्षरेण छन्दसा तादृशान् मनुष्यान् उत्कृष्टजयं लभेयम्। ᵛविष्णुः ᵛत्र्यक्षरेण अक्षरत्रयात्मकेन छन्दसा पृथिव्यादीन् ᵛइमान् ᵛत्रीन् ᵛलोकान् ᵛउदजयत् अहमपि तादृशाँल्लोकान् ᵛउज्जेषम्। ᵛसोमः अक्षरचतुष्टयात्मकेन छन्दसा पादचतुष्टयोपेतान् ᵛपशून् उत्कृष्टजयं लब्धवान् । अहमपि तथा तेनैव ᵛचतुरक्षरेण तादृशान् पशून् उत्कृष्टं जयं लभेयम् । ᵛपूषा देवः पञ्चाक्षरात्मकेन छन्दसा पञ्चसंख्याकान् ᵛऋतून् ᵛउदजयत् । तादृशान् ऋतूनहमपि ᵛउज्जेषम् । ᵛसविता सर्वस्य प्रेरको देवः ᵛषळक्षरेण षट्संख्याकान् ᵛऋतून् लब्धवान् । तथा ऋतूनहं लभेयम् । ᵛमरुतः देवाः ᵛसप्ताक्षरेण छन्दसा सप्तसंख्याकान् ᵛग्राम्यान् ᵛपशून् ᵛउदजयन् । तादृशान् सप्त ग्राम्यानहं जयेयम् । ᵛबृहस्पतिः अष्टाक्षरात्मकेन छन्दसा ᵛगायत्रीम् उत्कृष्टं जयं लब्धवान् । तथा तादृशीं गायत्रीमहं लभेय । ᵛमित्रः देवः ᵛनवाक्षरेण छन्दसा ᵛत्रिवृतं ᵛस्तोमम् ᵛउदजयत् । तादृशं स्तोममहम् ᵛउज्जेषम् । ᵛवरुणः देवः ᵛदशाक्षरेण छन्दसा ᵛविराजं, " दशाक्षरा विराट् " इति (ऐब्रा ६·२०) श्रुतिप्रसिद्धां तदभिमानिनीं देवताम् ᵛउदजयत् । तथा तेनैव छन्दसा तादृशीं विराजमहम ᵛउज्जेषम् । ᵛइन्द्रः ᵛएकादशाक्षरेण छन्दसा त्रिष्टुबभिमानिनीं देवताम् ᵛउदजयत् । तथा तेनैव छन्दसा ᵛताम् ᵛउज्जेषम् । ᵛविश्वे ᵛदेवाः ᵛद्वादशाक्षरेण छन्दसा जगत्यभिमानिनीं देवतामुत्कृष्टं जयं लब्धवन्तः । अहमपि तादृशीं जगतीमुत्कृष्टं जयं लभेय । ᵛवसवः देवाः ᵛत्रयोदशाक्षरेण छन्दसा ᵛत्रयोदशं ᵛस्तोमं लब्धवन्तः । तादृशं स्तोममहम् ᵛउज्जेषम् । ᵛरुद्राः ᵛचतुर्दशाक्षरेण छन्दसा ᵛचतुर्दशं ᵛस्तोमम् ᵛउदजयन् । तादृशं स्तोममहं ᵛउज्जेषम् । ᵛआदित्याः देवाः ᵛपञ्चदशाक्षरेण छन्दसा ᵛपञ्चदशं ᵛस्तोमम् ᵛउदजयन् । तादृशं स्तोममहम् ᵛउज्जेषम् । ᵛअदितिः देवमाता ᵛषोळशाक्षरेण छन्दसा ᵛषोळशं ᵛस्तोमम् ᵛउदजयत् । तथा तेनैव षोडशाक्षरं स्तोमम् ᵛउज्जेषम् । ᵛप्रजापतिः देवः ᵛसप्तदशाक्षरेण छन्दसा सप्तदशाख्यं ᵛस्तोमम् उत्कृष्टं जयं लब्धवान् । तथा तेनैव सप्तदशाक्षरेण ᵛतं तादृशं सप्तदशं स्तोममहम् ᵛउज्जेषम् ॥१॥२॥३॥४॥

[इति दशमेऽध्याये षष्ठोऽनुवाकः ॥]

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो दद्याद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते वेदार्थप्रकाशे काण्वसंहिताभाष्ये दशमोऽध्यायः ॥१०॥

ॐ

---

1. Pl after इति ॥ ins. ता वा एताः पञ्चव्याहृतय ॐ श्रावयास्तु श्रौषड्यज ये यजमहे वौषळिति तासां पञ्चानां व्याहृतीनाꣳ सप्तादशाक्षराणि संपद्यन्त इति शतपथे ।
3. Vl after जयं adds च
14. Vl Sl C om. श्रुति°
28. P V: °संहितायां for संहिताभाष्ये

आ– अथोज्जितीर्वाचयति– ‘ अग्निरेकाक्षरेण ’ इति यजूंषि सप्तदश लिङ्गोक्तदेवतानि । “ ॐ श्रावय इति चतुरक्षरम् अस्तु श्रौषट् इति चतुरक्षरम् । यज इति द्व्यक्षरम् ये यजामह इति पञ्चाक्षरम् द्व्यक्षरो वषट्कारः* ” । स एष सप्तदशा [क्षरात्मकः] प्रजापतिरधिदैवतं चाधियज्ञं समासव्यासाभ्यामुज्जीयते । यतः ᵛएकाक्षरेण छन्दसा ᵛअग्निः ᵛप्राणम् ᵛउदजयत् उत्कृष्टं जयं लब्धवान् । अहमपि एकाक्षरेण छन्दसा प्राणं पञ्चवृत्तिकं परमात्मानं वा ᵛउज्जेषम् । अडभावो गुणश्च छान्दसः । उत्कृष्टं तथा जयेयं, ᵛतं वशीकुर्याम् । एकाक्षरादिपञ्चाक्षरपर्यन्तं गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तयो देवीशब्दपूर्विका ज्ञातव्याः । यद्वा– उक्ताभ्युक्ता मध्या प्रतिष्ठा सुप्रतिष्ठा या । गायत्र्युष्णिगनुष्टुप् जगत्यतिजगती शक्वर्यतिशक्वरी । अष्टयत्यष्टिधृत्यतिधृतिकृतिप्रकृत्याकृतिविकृतिसंकृत्यभिकृत्युत्कृतिसंज्ञकान्येकाक्षरपादत्वेन पादचतुष्टयात्मकं छन्द आरभ्य पादेष्वेकैकाक्षराभिवृद्ध्या चतुरक्षराधिक्ये सति यथोक्तानि छन्दांसि भवन्तीत्येतानि वा योज्यानि । अत्र तु सप्तदशाक्षरपर्यन्तानि छन्दांसि ज्ञातव्यानि । “ प्रजापतिः सप्तदशाक्षरेण ” (तैसं १.६.११) इति श्रुतेः । ᵛअश्विनौ ᵛद्व्यक्षरेण छन्दसा, अश्विनौ देवौ ᵛद्विपदः पादद्वययुक्तान् ᵛमनुष्यान् ᵛउदजयतां जयं लब्धवन्तौ । अतोऽहं तेन द्व्यक्षरेण छन्दसा ᵛतान् मनुष्यान् ᵛउज्जेषम् उत्कृष्टजयं लभेय । ᵛविष्णुः ᵛत्र्यक्षरेण अक्षरत्रयरूपेण छन्दसा ᵛइमान् ᵛत्रीन् ᵛलोकान् ᵛउदजयत् । अतोऽहमपि [ᵛतान् लोकान् ᵛउज्जेषम् । ᵛसोमः ᵛचतुरक्षरेण छन्दसा ᵛचतुष्पदः पादचतुष्टयोपेतान् ᵛपशून् ᵛउदजयत् ।] अतोऽहमपि चतुरक्षरेण छन्दसा ᵛतान् चतुष्पदः पशून् ᵛउज्जेषम् । ᵛपूषा ᵛपञ्चाक्षरेण छन्दसा ᵛपञ्च ᵛऋतून् ᵛउदजयत् । अतः ᵛतान् ऋतून् पञ्चाक्षरेण छन्दसा अहमपि ᵛउज्जेषम् । षळक्षरेण छन्दसा ᵛसविता ᵛषळ् ᵛऋतून् ᵛउदजयत् । अतोऽहमपि षळक्षरेण छन्दसा गायत्र्या ᵛतान् षळृतून ᵛउज्जेषम् । ᵛसप्ताक्षरेण छन्दसा उष्णिहा ᵛमरुतः देवाः ᵛग्राम्यान् ᵛसप्त ᵛपशून् उदजयन् । अतोऽहं सप्ताक्षरेण छन्दसा ᵛतान् ग्राम्यान् सप्त पशून् ᵛउज्जेषम् । ᵛबृहस्पतिः ᵛअष्टाक्षरेण छन्दसा अनुष्टुभा ᵛगायत्रीम् ᵛउदजयत् । अतोऽहमपि अष्टाक्षरेण छन्दसा ᵛतां गायत्रीम् ᵛउज्जेषम् । ᵛमित्रः ᵛनवाक्षरेण छन्दसा ᵛत्रिवृतं, त्रिधा आवर्तयत इति त्रिवृत्, तं त्रिवृतं ᵛस्तोमम् ᵛउदजयत् । अतोऽहमपि नवाक्षरेण छन्दसा बृहत्या ᵛतं त्रिवृतं स्तोमम् ᵛउज्जेषम् । ᵛदशाक्षरेण छन्दसा विराजा ᵛवरुणः ᵛविराजं, ‘ दशाक्षरा विराट् ’ इति प्रसिद्धां

---

3. * [द्र. तैसं १.६.११]
4. B1 चेताधियज्ञं for चाधियज्ञं
5. B1 यज्ञं तु करोति वा लब्धवान् ; for जयं लब्धवान्
6. B1 जयां जयेयम् for जयेयम्
23. V1 स्तोमौ वृहौ तौ । इति स्तोमं वन्त्रं । उदजयत् for स्तोमम् उदजयत्

विराजं तदभिमानिनीं देवतां च Vउदजयत्। अतोऽहमपि दशाक्षरेण छन्दसा Vताम् विराजम् Vउज्जेषम् । Vएकादशाक्षरेण छन्दसा Vइन्द्रः Vत्रिष्टुभम् Vउदजयत् । अतोऽहमपि एकादशाक्षरेण छन्दसा Vतां त्रिष्टुबभिमानिनीं देवताम् Vउज्जेषम् । Vविश्वे Vदेवाः Vद्वादशाक्षरेण छन्दसा जगत्या Vजगतीं जगत्यभिमानिनीं देवताम् Vउदजयन् । अतोऽहमपि द्वादशाक्षरेण छन्दसा Vतां जगतीम् Vउज्जेषम् । Vवसवः Vत्रयोदशाक्षरेण छन्दसा अतिजगत्या Vत्रयोदशं Vस्तोमं वसवः Vउदजयन् । अतोऽहमपि त्रयोदशाक्षरेण छन्दसा Vतं त्रयोदशं स्तोमम् Vउज्जेषम् । Vचतुर्दशाक्षरेण छन्दसा Vरुद्राः Vचतुर्दशं Vस्तोमम् Vउदजयन् । अतोऽहमपि चतुर्दशाक्षरेण Vतं चतुर्दशं स्तोमम् Vउज्जेषम् । Vपञ्चदशाक्षरेण छन्दसा Vआदित्याः Vपञ्चदशं Vस्तोमम् Vउदजयन् । अतोऽहमपि पञ्चदशाक्षरेण Vतं पञ्चदशं स्तोमम् Vउज्जेषम् । Vषोळशाक्षरेण छन्दसा Vअदितिः देवमाता Vषोळशं Vस्तोमम् Vउदजयत् । अतोऽहमपि षोडशाक्षरेण छन्दसा Vतं षोडशं स्तोमम् Vउज्जेषम् । Vसप्तदशाक्षरेण छन्दसा Vप्रजापतिः Vसप्तदशं Vस्तोमम् Vउदजयत् । अतोऽहमपि सप्तदशाक्षरेण छन्दसा Vतं सप्तदशं स्तोमम् Vउज्जेषम् इति ॥१–४॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवपूज्यपादपरमकारुण्यासादित-
श्रीकृष्णभक्तिसाम्राज्यस्य श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदि-
श्रीमदानन्दबोधभट्टाचार्येण विरचिते काण्ववेदमन्त्रभाष्यसंग्रहे दशमोऽध्यायः ॥

ॐ
